AMARSINHA

AMARKO

OR

NAM-LINGANUSHASHAN KOSH.

WITH

COMMENTARIES AND NOTES IN SANSKRIT



BY

PANDIT SHAKTIDHAR SHASTRY,

WITH THE PERMISSION OF

THE LATE HON'BLE M PRAYAG NARAYAN BHARGAVA,
Late Proprietor of the N. K. Press, Lucknow.

FIRST EDITION

LUCKNOW
PRINTED AND PUBLISHED BY K D SETH, AT THE NEWUL KISHORE PRESS



1937

॥ श्रीः ॥

अमरकोषः

अर्थात्

नामलिङ्गानुशासनंनामकोषः

श्रीमदमरसिंहविरचितः

संस्कृतभाष्योपेतः

स्वर्गीयआनरेबुलधर्मपरायणमुंशीप्रयागनारायणरायबहादुराज्ञया शुक्लो-
पाह्वपण्डितशक्तिधरशास्त्रिकृतया रसालाख्यया व्याख्यया
समलंकृतः, टिप्पण्यादिपुरस्कृतः संशोधितश्च

सच

प्रथमावृत्तौ

लक्ष्मणपुरे

मुंशी नवलकिशोर (सी. आई. ई.,) इत्यस्य मुद्रणालये मुद्रितः प्रकाशितश्च ।

संवत् १९७५ वैक्रमीयः

ॐ परमात्मने नमः ।

अथ प्रस्तावना ।

अयि सकलकलाचातुरीधुरीणाः, शब्दशास्त्रनिपुणाः, प्रियपाठकाः ! श्रूयतामिति । धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयानां निष्पत्तिः सर्वैरभीप्सिता । साच श्रुतिस्मृतिपुराणेतिहासादितत्तच्छास्त्रार्थज्ञानाधीना । तत्तदर्थज्ञानं च तत्तदवान्तरवाक्यार्थज्ञानाधीनम् । तत्तद्वाक्यार्थज्ञानं च तत्तत्पदार्थज्ञानाधीनम् । तत्पदार्थज्ञानं च तत्तत्पदशक्तिग्रहाधीनम् । तत्तत्पदशक्तिग्रहे च शिष्टोक्तिमाह— "शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृते-र्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इति शिष्टोक्तिदर्शितेषु शक्तिग्रहोपायेषु कोषस्यैव मुख्यकारणत्वम् । व्याकरणस्य यौगिकशक्तिग्राहकत्वेऽपि रूढयोग-रूढयोः शक्तिग्राहकत्वाभावात् । उपमानादीनां स्वतः शक्तिग्राहकत्वाभावात् । कोषेषु च केवलनामानुशासनभूतानां, केवललिङ्गानुशासनभूतानां च लाघ-वेनोपकारकत्वाभावेन नामलिङ्गोभयानुशासनत्वेनामरसिंहविरचितस्यास्यैव को-षस्य सर्वोपकारकत्वम् । 'अयममरसिंहः कदा किं जातीयः कुत्रत्यं मही-मण्डलं मण्डयांचकारेति न निश्चितम्' । परन्तु "अमरा निर्जरा देवाः" इत्यादिना देवसामान्यनामान्युक्त्वा देवविशेषनामारम्भे "सर्वज्ञः सुगतो बुद्धः" इत्यादिना बुद्धनाम्नां लेखनेन बौद्धत्वमवसीयते । केचित्तु "धन्वन्तरिः क्षपण-कोऽमरसिंहशंकु वेतालभट्टघटखर्परकालिदासाः । ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" इति वैक्रमनवरत्नख्यापकश्लोकतो विक्रमसमकालकत्वममरसिंहस्य वदन्ति । परेतु "इन्द्रश्चन्द्रः काशकृत्स्ना-ऽऽपिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः" इति पद्यानुरोधेन पाणिनि-समन्तभद्रयोरन्तरालभवत्वं ब्रुवते । अत्रेदं बोध्यम्— इदं न क्रमबोधकम्, पाणिनिमहाभाष्यप्रवृत्तिसमकालकनिष्पत्तिकचान्द्रव्या-करणकर्तृचन्द्राचार्यस्य पाणिनितः प्राग्लेखनात् । अस्य वैयाकरणत्वं तु "अ-

सिद्धोहि पापीयान्सर्वं भाष्यमचूचुरत्" इति पद्यात्सकलभाष्यतत्त्वज्ञत्वस्य प्रतीतेः प्रतीतमेव । इत्थं भङ्ग्यन्तरेणोक्तिस्तु बौद्धत्वेन सकलवैदिकविरुद्धत्वात् । अस्य सनातनरूपस्य, कैयटमम्मटप्रभृतिभिः सर्वाचार्यैः प्रमाणीकृतस्य सर्वोपकारकत्वादेव बहुभिरस्य व्याख्यातृभिर्व्याख्याः कृतास्तासु या मद्दृष्टास्तु ता एवाहः—

व्याख्याः सन्ति विदांवरैर्विरचिता यद्यप्यनेकानघा
यासु स्वल्पधियो विवेकरहिता बाला विषीदन्ति ये ।
तेषामेवकृते पदार्थवलिता व्याख्या रसाला कृता
सोयं सेऽत्रपरोपकारककुशलैः संक्षम्यतां दुर्नयः ॥ १ ॥

१ अमरकोषोद्घाटनम्—भट्टक्षीरस्वाम्युत्प्रेक्षितम् ।
२ पदचन्द्रिका—रायमुकुटेन त्रिपञ्चरामचन्द्रशकाब्दे निर्मिता ।
३ बुधमनोहरा—स्वयंप्रकाशवेदान्तिमहादेवविनिर्मिता ।
४ पीयूषव्याख्या—रामकृष्णदीक्षितकृता ।
५ अमरचन्द्रिका—परमानन्दमैथिलकृता, मुकुटसारभूता ज्ञेया ।
६ पदविभूतिः—लिङ्गसूरिविरचिता ।
७ व्याख्या सुधा—भानुजिदीक्षितकृता ।
८ आमराविवेकः—महामाननीयमहेश्वरभट्टेन भणितः ।

आसामेतासां व्याख्यानां सारं समधिगम्य लक्ष्मणपुर—नरहीनिवासिना मया-शुक्लोपाह्वेन पण्डितश्रीकविवरशर्मणा शास्त्रिणा स्वर्गीयानरेबुल श्रीमद्रायबहादुर धर्मरत्नप्रभाकर श्रीयुतमुंशीप्रयागनारायणाज्ञया सर्वसाधारणानां पण्डितानां, शास्त्रिणां, महामहोपाध्यायानां, सर्वविद्यार्थिनां, नरनायकानां, नगराधिपानां च सुखपदबोधार्थमेषा रसाला विनिर्मिता—

एषा रसाला रचिता विशाला
[illegible] सुधीनाम् ।
[illegible] दिशातु
[illegible] नित्यं [illegible] ॥ २ ॥

[illegible] नान्यत्र बालबोधार्थ-

मवर्णक्रमेण विभाव्यन्ते—अजयः, अनेकार्थध्वनिमञ्जरी, अभिधानचिन्तामणिः, अभिधानमाला, अमरदत्तः, अमरमाला, अरुणः, इन्दुकोषः, उत्पलिनी, ऊष्मविवेकः, एकाक्षरकोषः, कलिङ्गः, कल्पतरुः, कल्पद्रुः, कात्यः, कात्यायनः, कोषसारः, गङ्गाधरः, गोवर्धनकोषः, चन्द्रकोषः, चरककोषः, तारपालः, त्रिकाण्डशेषः, त्रिविक्रमः, दामोदरकोषः, दुर्गकोषः, देशिकोषः, द्विरूपकोषः, धनञ्जयः, धनपालः, धन्वन्तरिः, धरणीकोषः, धर्मदासः, नानार्थध्वनिमञ्जरी, नानार्थरत्नमाला, नामनिधानम्, नाममाला, नामलिङ्गानुशासनम्, पदरत्नावली, पालकोषः, पुद्गलकोषः, भट्टमल्लः, भरतमाला, भागुरिकोषः, भुग्नकोषः, भोगीन्द्रकोषः, मङ्ककोषः, महीपकोषः, माधवकोषः, मुकुटः, मुक्तावली, मुनिकोषः, मेदिनीकोषः, यादवः, रत्नकोषः, रत्नमाला, रन्तिदेवः, रभसः, राजदेवः, राजमुकुटः, रुद्रकोषः, वररुचिः, वाचस्पतिः, विक्रमादित्यः, विश्वकोषः, विश्वप्रकाशः, विश्वरूपः, विश्वलोचनः, वैजयन्ती, वोपालितः, व्याडिः, शब्दरत्नावली, शब्दार्णवः, शब्दार्थचिन्तामणिः, शाश्वतः, शुभाङ्कः, संसारावर्तः, सज्जनकोषः, सर्वधरः, साहसाङ्कः, सुधा, सुभूतिकोषः, सोमनन्दिः, हरकोषः, हारावलीत्यादयो वहुशः कोषाः सन्तीति विज्ञेयम्—

संप्रति संस्कृतसाहित्ये कोषमन्तरा न कश्चित् किमपि वक्तुं समर्थो भवति। अतो महत्कठिनं परिश्रममङ्गीकृत्य "अमरोऽयं सनातनः" इत्यादिना सर्वकोपचूडामणेरमरकोषस्यैव व्याख्या विशदीकृता। अस्यामकारादिक्रमेण शब्दानुक्रमणिका संस्थापिता, शब्दानामुपरि पुंलिङ्गे, 'पुम्' स्त्रीलिङ्गे, 'स' नपुंसके, 'न' इति लाञ्छनेन विभूषितम्, सर्वपदानां व्युत्पत्तिमाला च दर्शिता, साधनन्तु पाणिनीयरीत्या संदर्शितम्। यथा—दीव्यन्तीतिविग्रहे 'दिवु क्रीडादौ' अस्मादैवादिकात्कर्तरि 'पचाद्यचि, गुणे च 'देवाः' इत्यादयः सिध्यन्तीति बोध्यम्। एवं सर्वसुखाय श्लोकानां सम्मुखे शब्दार्थरूपं मार्जनमपि संधारितम्। यत्र धातूनां न्यासः कृतस्तत्र 'डुधाञ् धारणपोषणयोः' एतादृशलाञ्छनेन सुशोभितम्। यत्र कोषान्तरप्रमाणं दत्तं तत्र "शुभ्रं स्यादभ्रके क्लीबमुद्दीप्तशुक्लयोस्त्रिषु" (इति मेदिनी) इतिवत्सं-

स्थापितम् । यत्र टिप्पण्यादिपुरस्कृतस्तत्र " क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते " इतिवद्विभूषितम् । अनया नूतनया रसालाख्यया व्याख्यया गुरुं विनापि बालकानां महती सहायता मिलिष्यत्यनुमीमहे वयमिति ।

तथा च सज्जन-महज्जन-विद्वज्जनमहोदयानां निकटे निवेदयामिः-

बुद्धिमान्द्यवशात्किञ्चिद्यदशुद्धमलेखि तत् ।
द्वेषभावं समुत्सृज्य शोधनीयं मनीषिभिः ॥ १ ॥

एवमस्याः संशोधनविषये यत्र कुत्रापि कुदृष्टि-कुमुद्रणादिदोषवशादशुद्धता प्रतीयते तत्र क्षन्तव्यः सद्भिस्सुधीभिरिति ।

इदं रसालासमलंकृतं पुस्तकं सर्वविदुषां करसरोजे समर्पयित्वा आशास्महे ममायासं सफलीकुर्वन्त्विति शम् ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥ १ ॥

इति विज्ञापयामि.

सर्वविद्वज्जनकृपावलम्बी शुक्लोपाह्वः
पण्डित शक्तिधर शर्मा, शास्त्री,
नवलकिशोरमुद्रणालयः, लक्ष्मणपुरम्.

अथामरकोषे मूलस्थशब्दानामकारादिक्रमेण

शब्दानुक्रमणिका व्याख्यायते ।

पृष्ठम्	श्लोकः	शब्दः	पृष्ठम्	श्लोकः	शब्दः	पृष्ठम्	श्लोकः
२२०	२	राष्ट्र	२४६	१७	रुजा	१८६	५१
६१	१२		५२४	१६३	रुत	५५	२५
१०८	२२	राष्ट्रिका	१२०	६४	रुदित	६६	३५
८८	१०	राष्ट्रीय	६०	१४	रुरु	२६७	६०
४८४	६	रासभ	३१७	७७	रुष	३	१०
६००	२१	रास्ना	१३७	११४		१०	३४
१६३	२४		१४५	१४०	रुदार्थी	११	३७
११२	३५	राहु	२६	२६	रुधिर	१६०	६४
११२	३५	रिक्तक	२८०	५६		५१४	२२
११४	४५	रिक्थ	३२२	६०	रुत	१५८	१०
२१४	१२६	रिङ्गण	६७	३६	रुबूक, टी.	११७	५१
१०२	४	रिङ्खण	६७	३६	रुबूक, टी.	११७	५१
२६२	१६	रिपु	२४४	१०	रुशती	५३	१८
६६	५	रिरि, टी.	२३४	४३	रुशती	५६	१८
१०२	४	रिष्ट	४५१	४३	रूप	६२	३८
७८	११	रिष्टि	२७३	८१	रूढा	१४१	१५८
८५	४१	रीढा	६२	२२	[illegible]	४४५	२३४
२४६	१८	रीत	३१८	६८	रूपा	४४	७
३३	४	रीति	३२६	१०	रूपानीता	१७८	११
३३	५		४६६	७५		३२८	११
१८	६०	रीतिद्रुम	३२०	१०३	[illegible]	३२६	१८
१८	[illegible]	[illegible]	[illegible]	१७		४१२	२६६
[illegible]	४	[illegible]	१८५	५०	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	१४	[illegible]	[illegible]	[illegible]
[illegible]	११	[illegible]	[illegible]	८	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	११	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	३१	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]		[illegible]	[illegible]		[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]		[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]		[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]		[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

[illegible]

पृष्ठम्	श्लोकः	शब्दः	पृष्ठम्	श्लोकः	शब्दः	पृष्ठम्	श्लोकः
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

पृष्ठ	श्लोकः	शब्दः	पृष्ठ	श्लोकः	शब्दः	पृष्ठ	श्लोकः

इति श्रीमत्पण्डितशशिधरशुक्लविरचितामरकोषानुक्रमणिका समाप्तिं प्रकाशेति शम् ।

ॐ परमात्मने नमः ॥

श्रीमदमरसिंहविरचितः

अमरकोषः ।

रामाश्रम्याख्यया व्याख्यया समेतः ॥

प्रथमं काण्डम् ।

[illegible] ॥ १ ॥

[illegible] ॥ २ ॥

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

[illegible]

अथ स्वर्गवर्गः ॥

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

[illegible]

नामलिङ्गानुशासनं नामानि लिङ्गानि च अनुशिष्यन्ते विविच्य बोध्यन्तेऽस्मिन्नने वेति संपूर्णं न्यूनत्वदोषरहितं उच्यते कथ्यत इति ॥ २ ॥

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

प्रायश इति—प्रायशो बाहुल्येन रूपभेदेन ङ्याब्विसर्गबिन्दुरूपेण स्त्रीपुंनपुंसकं ज्ञेयम्, यथा—'लक्ष्मीः पद्मालया पद्मा' 'पिनाकोजगवं धनुः' पुनः कुत्रचित्साहचर्यात्स्त्रीपुंनपुंसकं ज्ञेयम्, यथा—'अश्वयुगश्विनी' 'भानुःकरः' 'वियद्विष्णुपदम्' अत्राश्वयुग्भानुवियन्तिसाहचर्यात्स्त्रीपुंनपुंसकानि ज्ञेयानि, क्वचित्तद्विशेषविधेः स्त्रीपुंनपुंसकानि ज्ञेयानि यथा—'भेरी स्त्री दुन्दुभिः पुमान्' 'रोचिः शोचिरुभे क्लीबे' इति ॥ ३

भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥

भेदेति—अत्र कोषे, अनुक्तानां स्वपर्यायेष्वपठितानां भिन्नलिङ्गानां भिन्नं लिङ्गं येषामिति तेषां द्वन्द्वो न कृतः यथा 'देवतादेवतामराः' इति न स्यात् तथा एकशेषः न कृतः यथा—'नभः खं श्रावणो नभाः' इत्यत्र 'खश्रावणौ तु नभसौ' इत्येकशेषो स्यात् तथा तेषां क्रमादृते क्रमं विना संकरो मिश्रतारूपो न कृतः यथा—'स्तवः स्तोत्रं स्तुतिर्नुतिः' इत्यत्र 'स्तुतिः स्तोत्रं स्तवो नुतिः' इति संकरो नोकारीति ॥ ४ ॥

त्रिलिङ्ग्यां (त्रिष्विति पदं) मिथुने (तु) द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं (त्वन्ताथादि) न पूर्वभाक् ॥ ५

त्रिलिङ्ग्यामिति—त्रयाणां लिङ्गानां समाहारस्त्रिलिङ्गी तस्यां 'त्रिषु' इतिपदं ज्ञेयम्, यथा 'त्रिषु स्फुलिङ्गोऽग्निकणः' मिथुने तु स्त्रीपुंसौ मिथुनं तत्र द्वयोरिति पदं ज्ञेयम्, यथा—'द्वयोर्ज्वालकीलाविति' तथा निषिद्धलिङ्गं निषिद्धं लिङ्गं यस्य तन्निषिद्धलिङ्गं शेषार्थं ज्ञेयम्, यथा—'वज्रमस्त्री स्यादिति' तुरन्ते यस्य तत्त्वन्तं अथ आदिर्यस्य तदथादि त्वन्तं च अथादि च त्वन्ताथादि नामपदं लिङ्गपदं च पूर्वभाक् न भवतीति यथा—'नगरी त्वमरावती' जवोऽथ शीघ्रं त्वरितमिति ज्ञेयम् ॥ ५ ॥

अथ स्वर्गवर्गो व्याख्यायते ।

अ. पु. पु. पु. पु.
स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
पु. पु. म. न.
सुरलोको द्योदिवौ (द्वे स्त्रियां) 'क्लीबे' त्रिविष्टपम् ॥ ६ ॥

[illegible] ॥

[illegible] ॥ ६ ॥

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥
आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥
बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि (पुंसि वा) देवताः (स्त्रियाम्) ॥ ९ ॥

[illegible]

नामलिङ्गानुशासनं नामानि लिङ्गानि च अनुशिष्यन्ते विविच्य बोध्यन्तेऽस्मि... वेति संपूर्णं न्यूनत्वदोषरहितं उच्यते कथ्यत इति ॥ २ ॥

प्रायशो रूपभेदेन साहचर्य्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

प्रायश इति–प्रायशो बाहुल्येन रूपभेदेन ङ्याब्विसर्गबिन्दुरूपेण स्त्रीपुंनपुं ज्ञेयम्, यथा–'लक्ष्मीः पद्मालया पद्मा' 'पिनाकोऽजगवं धनुः' पुनः कुत्रचित्स चर्य्यात्स्त्रीपुंनपुंसकं ज्ञेयम्, यथा–'अश्वयुगश्विनी' 'भानुःकरः' 'वियद्विष्णुपदम्' त्राश्वयुग्भानुवियन्विसाहचर्य्यात्स्त्रीपुंनपुंसकानि ज्ञेयानि, क्वचित्तद्विशेषविधेः स्त्रीपुंन कानि ज्ञेयानि यथा–'भेरी स्त्री दुन्दुभिः पुमान्' 'रोचिः शोचिरुभे क्लीबे' इति ॥

भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥

भेदेति–अत्र कोषे, अनुक्तानां स्वपर्य्यायेष्वपठितानां भिन्नलिङ्गानां भिन्नं लिङ्गं ये मिति तेषां द्वन्द्वो न कृतः यथा 'देवतादैवतामराः' इति न स्यात् तथा एकशेष न कृतः यथा–'नभः खं श्रावणो नभाः' इत्यत्र 'खश्रावणौ तु नभसौ' इत्येकशेषो स्यात् तथा तेषां क्रमादृते क्रमं विना संकरो मिश्रतारूपो न कृतः यथा–'स्तवः स्त स्तुतिर्नुतिः' इत्यत्र 'स्तुतिः स्तोत्रं स्तवो नुतिः' इति संकरो नोकारीति ॥ ४ ॥

त्रिलिङ्ग्यां (त्रिष्विति पदं) मिथुने (तु) द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं (त्वन्ताथादि) न पूर्वभाक् ॥ ५

त्रिलिङ्ग्यामिति–त्रयाणां लिङ्गानां समाहारस्त्रिलिङ्गी तस्यां 'त्रिषु' इतिपदं ज्ञम्, यथा 'त्रिषु स्फुलिङ्गोऽग्निकणः' मिथुने तु स्त्रीपुंसौ मिथुनं तत्र द्वयोरिति पदं ज्ञ म्, यथा–'द्वयोर्ज्वालकीलावर्चि' तथा निषिद्धलिङ्गं निषिद्धं लिङ्गं यस्य तन्निषिद्ध लिङ्गं शेषार्थं ज्ञेयम्, यथा–'वज्रमस्त्री स्यादिति' तुरन्ते यस्य तत्त्वन्तं अथ आदिर्यस्य तदथादि त्वन्तं च अथादि च त्वन्ताथादि नामपदं लिङ्गपदं च पूर्वभाक् न भवतीति, यथा–'नगरी त्वमरावती' जवोऽथ शीघ्रं त्वरितमिति ज्ञेयम् ॥ ५ ॥

अथ स्वर्गवर्गो व्याख्यायते ।

अ. पु. पु. पु. पु.
स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
पु. स्त्री. स्त्री. न.
सुरलोको द्योदिवौ (द्वे स्त्रियां) 'क्लीबे' त्रिविष्टपम् ॥ ६ ॥

* [illegible] ॥

स्वरिति—स्वर्यते स्तूयते इति स्वः 'स्वरादि १ । १ । ३७' पाठादव्ययत्वम्, सुष्ठु अर्ज्यत इति स्वर्गः, कं सुखं तद्विरुद्धमकं दुःखं नास्त्यकमत्रेति नाकः, तिसृषु अवस्थासु त्रयो देवा वा दीव्यन्त्यत्रेति त्रिदिवः, त्रिदशानां देवानामालयस्त्रिदशालयः, सुराणां लोकः सुरलोकः, द्योतन्तेऽस्यां द्योतीति वा 'डो' प्रत्यये 'द्यौः' दीव्यन्त्यस्यामिति द्यौरिति द्वे स्त्रिया ज्ञेये, तृतीयं विष्टपं त्रिविष्टपम् "पिष्टपो विष्टपोऽप्यस्त्री भुवनं च नपुंसकम्" इत्यमरमालायामिति क्लीबे ज्ञेयमिति नव स्वर्गस्य ॥ ६ ॥

पु. पु. पु. पु. पु. पु.

देवता **अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।**

पु. पु. पु. पु.

सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥

पु. पु. पु. पु.

आदितेया दिविषदो लेखा अदितिनन्दनाः ।

पु. पु. पु. पु. पु.

आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥

पु. पु. पु. पु.

बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।

पु. पु.न. स.

वृन्दारका दैवतानि (पुंसि वा) देवताः (स्त्रियाम्) ॥ ९ ॥

अमरा इति—न म्रियन्ते पचाद्यचि अमराः, जराया निष्क्रान्ता निर्जराः, तिस्रो दशा येषामिति त्रिदशाः, विबुध्यन्ते इति विबुधाः, सुरन्तीति सुराः, सुष्ठु पर्व येषामिति सुपर्वाणः, शोभनं मनो येषामिति सुमनसः, त्रिदिवस्येशास्त्रिदिवेशाः, दिवमोको येषामिति दिवौकसः, अदित्या अपत्यानि आदितेयाः, दिवि सीदन्तीति दिविषदः, चित्रादौ लिख्यन्त इति लेखाः, अदितेर्नन्दना अदितिनन्दनाः, अदितेरपत्यानि आदित्याः, ऋ अदितिस्तत्र भवन्तीति ऋभवः, न स्वप्नं येषामिति अस्वप्नाः, न मर्ते भवा अमर्त्याः, अमृतमन्धोऽन्नं येषाममृतान्धसः, बर्हिरग्निर्मुखं येषामिति बर्हिर्मुखाः, क्रतुषु भुञ्जत इति क्रतुभुजः, गीरेव बाणो येषामिति गीर्वाणाः, दानवानामरयो दानवारयः, प्रशस्तं वृन्दं येषामिति वृन्दारकाः, देवता एव दैवतानि वा पुंसि देवा एव देवता. स्त्रियां स्युरिति षड्विंशतिर्देवानाम् ॥ ७ । ८ । ९ ॥

पु. पु. पु पु. पु. पु.

गणदेवता **आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।**

पु. पु. पु.

महाराजिकसाध्याश्च रुद्रा (श्च गणदेवताः) ॥ १० ॥

---

१ आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः । वसवश्चाष्ट संख्याताः षट्त्रिंशत्तुषिता मताः ॥ आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः । महाराजिकनामानो द्वे शते विंशतिस्तथा । साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः ॥

आदित्येति—अदितेरपत्यानि आदित्याः द्वादशसंख्यकाः, विशन्ति कर्मस्विति विश्वे विश्वेदेवा दशस्मृताः, वसन्तीति वसवोष्ट संख्याताः, तुष्यन्तीति तुषिताः षट्त्रिंशन्मताः, आभासनशीला आभास्वराश्चतुष्षष्टिसंमताः, अनन्त्यनेन अनिलाः पञ्चाशदूनकाः, महती राजिः पंक्तिर्येषामिति महाराजिकाः द्वे शते विंशतिः, साध्यं सिद्धिरस्त्येषामिति साध्याः द्वादश विख्याताः, रोदयन्त्यसुरानिति रुद्रा एकादश स्मृताः एते गणदेवताः समुदायचारिण्यो देवता विज्ञेया इति ॥ १० ॥

पु. स. पु. न. पु. पु.

देवजाति विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः ।

पु. पु. पु. पु.

पिशाचो गुह्यकः सिद्धो[3] भूतो(ऽमी देवयोनयः)॥ ११॥

विद्येति—धरतीति धरो विद्याया धरो विद्याधरः, अद्भ्यः सरन्तीत्यप्सरसः, यक्ष्यते पूज्यते यक्षः, रक्षन्त्येभ्यो रक्षांसि, गन्धं सौरभमर्वतीति गन्धर्वः, कुत्सिता नराः किन्नराः, पिशितमश्नातीति पिशाचः, गूहति निधिं रक्षतीति गुह्यकः, सिद्धिरस्यास्तीति सिद्धः, भूतिरस्यास्तीति भूतः अमी देवयोनयो देवांशका इति ॥ ११ ॥

पु. पु. पु. पु. पु. पु.

असुर असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।

पु. पु. पु. पु.

शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥ १२ ॥

असुरेति—अस्यन्ति क्षिपन्ति देवान्, असुषु रमन्ते वेत्यसुराः, दितेरपत्यानि दैत्याः, दित्या अपत्यानि दैतेयाः, दनोर्दनौ वा जाता दनुजाः, इन्द्रस्यारयः इन्द्रारयः, दनोरपत्यानि दानवाः, शुक्रस्य शिष्याः शुक्रशिष्याः, दितेः सुताः दितिसुताः, पूर्वे च ते देवाश्च, पूर्वदेवाः, पूर्वं देवा येभ्यो वेति पूर्वदेवाः, सुरान् द्विषन्ति सुरद्विषः इति दश नामान्यसुराणाम् ॥ १२ ॥

पु. पु. पु. पु. पु.

जिन बुद्ध सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।

पु. पु. पु. पु. पु.

समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥ १३ ॥

---

१ [illegible] ॥

२ [illegible] गुह्यं गोपनीयं क गुह्यं यस्येति वा ॥

३ [illegible] ॥

४ [illegible] ॥

पु. पु. पु. पु.
षडभिज्ञो[1] दशबलो[2]ऽद्वयवादी विनायकः ।
पु. पु. पु. पु. पु.
मुनीन्द्रः श्रीघनः शास्ता मुनिः(शाक्यमुनिस्तु)यः॥१४॥

सर्वज्ञेति—सर्वं जानाति सर्वं ज्ञा येन यस्माद्यस्य वेति सर्वज्ञः, शोभनं गतं ज्ञानमस्येति सुगतः, बुध्यते—प्रशस्ता बुद्धिरस्येति वा बुद्धः, धर्मेण राजते, धर्मस्य राजेति वा धर्मराजः, तथा सत्यं गतं ज्ञानं यस्य तथागतः, समन्तभद्रमस्येति समन्तभद्रः, भगं माहात्म्यमस्यास्तीति भगवान्, मारं कामं जयतीति मारजित्, लोकं जयतीति लोकजित्, जयतीति जिनः, षट्सु दानशीलक्षान्तिवीर्यध्यानप्रज्ञास्वभिज्ञा आद्यं ज्ञानमस्येति षडभिज्ञः, दश बलान्यस्येति दशबलः, अद्वयमद्वैतं वदत्यवश्यमित्यद्वयवादी, विनयत्यनुशास्तीति विनायकः, मुनिषु इन्द्रो मुनीन्द्रः, श्रिया घनः पूर्णः श्रीघनः, शास्तीति शास्ता, मन्यते मुनिरित्यष्टादश बुद्धस्य ॥ १३ । १४ ॥

बौद्धमती

पु. पु. पु.
(स) शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च (सः) ।
पु. पु. पु.
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च (सः) ॥ १५ ॥

शाक्येति—यः शकोऽभिजनोऽस्येति शाक्यश्चासौ मुनिश्चेति, स शाक्यः सिंह इव उपमितं व्याघ्रादिभिरिति समासे शाक्यसिंहः, सः सर्वार्थेषु सिद्धो निष्पन्नः सर्वार्थसिद्धः, शुद्ध ओदनोऽस्येति शुद्धोदनस्तस्यापत्यं शौद्धोदनिः, गोतमस्यायं शिष्यो गौतमः, यः अर्कस्य बन्धुः अर्कबन्धुः, सः माया चासौ देवी च तस्याः सुत इति सप्त शाक्यस्य[3] ॥ १५ ॥

ब्रह्मा

पु. पु. पु. पु. पु.
ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
पु. पु. पु. पु.
हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः ॥ १६ ॥
पु. पु. पु. पु. पु.
धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
पु. पु. पु. पु. पु. पु.
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः ॥ १७ ॥

---

१ दिव्य चक्षुः, श्रोत्रम्, परचित्तज्ञानम्, पूर्वनिवासानुस्मृतिः, आत्मज्ञानम्, वियद्गमनम्, कायव्यूहसिद्धिश्चेति षट् अभितो ज्ञायमानानि यस्येति ॥

२ दान शील क्षमा वीर्य ध्यानप्रज्ञाबलानि च । उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै ॥

३ क्वचित्पुस्तके इत उत्तरम् " सर्वज्ञो वीतरागोऽर्हन् केवली तीर्थकृज्जिनः " जिनदेवनामानि इत्यधिकम् ॥

ब्रह्मेति—बृंहति वर्धयति प्रजा इति ब्रह्मा, आत्मनो विष्णोः सकाशात् भवति आत्मना स्वयमेव भवतीति वा आत्मभूः, सुरेषु ज्येष्ठः सुरज्येष्ठः, परमे व्योमनि चिदाकाशे ब्रह्मपदे वा तिष्ठतीति परमेष्ठी, लोकपितॄणां मरीच्यादीनामर्यमादीनां पितापितामहः, हिरण्यं हिरण्मयमण्डं गर्भोऽस्येति हिरण्यगर्भः, लोकानामीशो लोकेशः, स्वयं भवतीति स्वयंभूः, चत्वारि आननानि यस्येति चतुराननः, दधातीति धाता, अब्जं योनिरस्येत्यब्जयोनिः, द्रुह्यति दुष्टेभ्यो द्रुहिणः (द्रुघणो वा) विरचयतीति विरिञ्चिः, विरञ्चिः, विरिञ्चो वा, कमलमासनं यस्येति कमलासनः, सृजतीति स्रष्टा, प्रजानां पतिः प्रजापतिः, विदधातीति वेधाः, विशेषेण दधातीति विधाता, विश्वं सृजतीति विश्वसृट्, विधत्ते इति विधिरिति विंशतिर्ब्रह्मणः ॥ १६ । १७ ॥

पु. पु. पु. पु. पु.
विष्णु विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
पु. पु. पु. पु. पु.
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १८ ॥
पु. पु. पु. पु.
दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पु. पु. पु. पु. पु.
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९
पु. पु. पु. पु.
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पु पु. पु. पु.
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० ॥
पु. पु. पु. पु.
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
पु. पु पु. पु.
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१ ॥
पु पु. पु. पु.
विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।

विष्णुरिति—वेवेष्टि सर्वं जगदिति विष्णुः, नराणां समूहो नारं तदयनं यस्येति, नरा [illegible] आपः, नराणि वा अयनं यस्येति नारायणः, नरा अयनं यस्येति वा [illegible] "[illegible] नारायणो विष्णुर्[illegible]कर्मा नरायणः" (इति शब्दार्णवः) कृष्णो [illegible] अर्गलिनि वा कृष्णः, विकुण्ठाया अपत्यम्—विगता कुण्ठा [illegible] नियन्ता ज्ञानदो वा वैकुण्ठः, विष्टरे श्रूयते—वि[illegible]

* [illegible] ॥ [illegible] पर अम कृष्ण [illegible] इति [illegible] ॥
[illegible] ॥

ष्टरो दर्भमुष्टिरिव श्रवसी कर्णावस्येति विष्टरश्रवाः, दाम उदरे यस्येति दामोदरः, हृषीकाणामिन्द्रियाणामीशो हृषीकेशः, प्रशस्ताः केशाः सन्त्यस्येति—कश्च ईशश्च केशौ पुत्रपौत्रौ स्तोऽस्येति वा केशौ वातीति वा केशवः, मायाः लक्ष्म्या धवः पतिः—मधोरपत्यं वा माधवः, स्वतो भवतीति स्वभूः, दैत्यानामरिर्दैत्यारिः, पुण्डरीकमिवाक्षिणी यस्य—पुण्डरीकेष्वक्षि यस्य—पुण्डरीकं लोकात्मकमक्षतीति वा पुण्डरीकाक्षः, गां भुवं धेनुं स्वर्गं वेदं वा विन्दतीति गोविन्दः, गरुडो ध्वजाश्चिह्नं यस्येति गरुडध्वजः, पीतमम्बरं यस्येति पीताम्बरः, नास्ति च्युतं स्खलनं स्वपदाद्यस्य नाच्योष्ट इति वा च्युतः, शृङ्गस्य विकारः शार्ङ्गं धनुरस्यास्तीति शार्ङ्गी, विषु नाना अञ्चति विषूची सेना यस्येति विष्वक्सेनः, जननं जनो जन्म तमर्दयति—जनाः समुद्रस्थदैत्यविशेषास्तेषामर्दनो वा जनार्दनः, इन्द्रमुपगतोऽनुजत्वादुपेन्द्रः, इन्द्रस्यावरं जातः इन्द्रावरजः, चक्रं पाणौ यस्येति चक्रपाणिः, चत्वारो भुजा यस्य—चतुर्णां धर्मार्थकाममोक्षाणां भुजश्चतुर्भुजः, पद्मं नाभौ यस्येति पद्मनाभः, मधोरसुरस्य रिपुर्मधुरिपुः, वसुदेवस्यापत्यं—वसतीति वासुः दीव्यतीति देवः वासुश्चासौ देवश्च वासुदेवः "सर्वभूतावासो वासुदेव इति श्रुतेः" त्रिषु लोकेषु गुणेषु वा त्रयो वा विक्रमाः पादविन्यासा यस्येति त्रिविक्रमः, देवक्या नन्दनो देवकीनन्दनः, शूरस्यापत्यं शौरिः सौरिरपि, श्रियः पतिः श्रीपतिः, पुरुषेभ्यः पुरुषाणां पुरुषेषु वा उत्तमः पुरुषोत्तमः, वनमालास्यास्तीति वनं मलितुं शीलमस्येति वा वनमाली, बलिमसुरं ध्वंसितुं शीलमस्य—बलिना पूजादिनाऽविद्यां ध्वंसितुं शीलमस्येति वा बलिध्वंसी, कंसस्यारातिः कंसारातिः, अधः कृतमक्षजं ज्ञानं येनेति-अधोक्षाणां जितेन्द्रियाणां जायते प्रत्यक्षो भवतीति-अधः अक्षजं ज्ञानं यस्येति वा अधोक्षजः, विश्वं बिभर्तीति विश्वम्भरः, कैटभमसुरमजैषीदिति कैटभजित्, विध्यत्यसुरानिति विधुः, वदति महत्त्वं वत्सः श्रीयुक्तो वत्सः श्रीवत्सो महत्त्वलक्षणं श्वेतरोमावर्तविशेषो लाञ्छनं यस्येति ऊनचत्वारिंशद्विष्णोः ॥ १८।-२१ ॥

पु. पु.
वसुदेव **वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥ २२ ॥**

वसुदेव इति—अस्य कृष्णस्य जनकः पिता वसुषु दीव्यतीति वसुदेवः, स एव आनकदुन्दुभिश्चोपलक्षितः, वसुदेवजन्मनि देवैरानकदुन्दुभिवादनादिति द्वे कृष्णपितुः॥२२॥

पु. पु. पु. पु.
बलदेव या **बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः।**
बलदाऊ पु. पु. पु. पु.
रेवतीरमणो रामः कामपालो हलायुधः ॥ २३ ॥
पु. पु. पु. पु. पु.
नीलाम्बरो रौहिणेयस्तालाङ्को मुशली हली।
पु. पु. पु. पु.
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥ २४ ।

बलभद्र इति—बलं भद्रं श्रेष्ठमस्य, बलेन भद्र इति वा, प्रलम्बं हतवान् प्रलम्बघ्नः, बलेन दीव्यतीति बलदेवः, अच्युताग्रजः अच्युतस्याग्रजः, रेवत्या रमणो रेवतीरमणः, रमते, रमन्ते योगिनोऽस्मिन्निति वा रामः, कामान् पालयतीति कामपालः, हलमायुधं यस्येति हलायुधः, नीलमम्बरं यस्येति नीलाम्बरः, रोहिण्या अपत्यं रौहिणेयः, तालोऽङ्को ध्वजो यस्येति तालाङ्कः, मुस्यतीति मुसलमस्त्यस्येति मुसली, हलमस्त्यस्येति हली, संकर्षति, संकृष्यते वेति संकर्षणः, सीरः पाणौ यस्येति सीरपाणिः, कालिन्द्या भेदनः कालिन्दीभेदनः, बलमस्यास्तीति बलः इति सप्तदश बलभद्रस्य ॥ २३ । २४ ॥

पु. पु. पु. पु. पु.
प्रद्युम्न **मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।**
पु. पु. पु. पु. पु. पु.
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥ २५ ॥
पु. पु. पु. पु.
सम्वरारिर्मनसिजः कुसुमेषुरनन्यजः ।
पु. पु. पु. पु.
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६
पु. पु.
अनिरुद्ध **ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्ध उषापतिः ।**

मदन इति—मदयतीति मदनः, मननं मत्—चेतना मथतीति मथः मतो मथो मन्मथः, म्रियन्तेऽनेन, मारयतीति वा मारः, प्रकृष्टं द्युम्नं बलमस्येति प्रद्युम्नः, मीनो मकरः केतनं ध्वजो यस्येति मीनकेतनः, कुत्सितो दर्पोऽस्येति कन्दर्पः, दर्पयतीति दर्पकः, नास्ति अङ्गमस्य, न अङ्गं ज्ञानं यस्माद्विति वानङ्गः, काम्यतेऽनेनेति कामः, पञ्च शराः बाणाः अस्येति पञ्चशरः, स्मरयत्युत्कण्ठयतीति स्मरः, संवरणं संवरः दैत्यानां शं कल्याणं वृणोतीति वा संवरः शंवरस्तस्यारिः संवरारिः, मनसि शृङ्गाररूपेण जायते स्मेति मनसिजः, कुसुमानीषवो यस्येति कुसुमेषुः, नास्त्यन्यो यस्मादनन्यो विष्णुस्ततो जातः मनसोऽन्यस्मान्न जायत इति वा अनन्यजः, पुष्पं धनुरस्येति पुष्पधन्वा, रतेः पतिः रतिपतिः, मकरो ध्वजोऽस्येति मकरध्वजः, आत्मना भवतीति आत्मभूः, ब्रह्मतपो ब्रह्माणं वा सुवति प्राप्नोतीति ब्रह्मसूः, विश्वस्मिन् केतुरस्येति विश्वकेतुरित्येकविंशतिः कामस्य। अनीति निरुध्यते स्म निरुद्धः, न निरुद्धः अनिरुद्धः, उषाया बाणात्मजायाः पतिः उषापतिः इत्यपि द्वे अनिरुद्धस्य ॥ २५ । २६ ॥

स्त्री. स्त्री. स्त्री. स्त्री. स्त्री. स्त्री.
लक्ष्मीः **लक्ष्मीः[2] पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥ २७ ॥**

---

१ [illegible] । सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः ॥

२ [illegible]) [illegible] ।

लक्ष्मीरिति—लक्षयति पश्यति नीतिज्ञमिति लक्ष्मीः, लक्ष्मी वा, पद्ममालयोऽस्या इति पद्मालया, पद्ममस्त्यस्या इति पद्मा, कमलमस्त्यस्या इति कमला, श्रयति हरिमिति, श्रीयते सर्वैरिति वा श्रीः, हरेः प्रिया हरिप्रिया इति षट् लक्ष्म्याः ॥ २७ ॥

शंख चक्र गदा तलवार मणि

पु. पु. मं.

शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः ।

स. पु. पु. पु.

कौमोदकी(गदा)खड्गो(नन्दकः)कौस्तुभो(मणिः) २८॥

शङ्ख इति—लक्ष्मीपतेः दैत्यानां शं खनतीति, शाम्यतीति वा शङ्खः, पञ्चजने दैत्यभेदे पाताले वा भवः पाञ्चजन्य इत्येकं विष्णुशङ्खस्य । लक्ष्मीपतेश्चक्रं शोभनं दर्शनमस्य, सुखेन दृश्यत इति वा सुदर्शनः इत्येकं विष्णुचक्रस्य । लक्ष्मीपतेर्गदा गदतीति गदा-पालकत्वात् कोः पृथिव्या मोदकः कुमोदको विष्णुस्तस्येयं कौमोदकी इत्येकं विष्णुगदायाः । लक्ष्मीपतेः खड्गः नन्दयति देवानिति नन्दक इत्येकं विष्णुखड्गस्य । लक्ष्मीपतेर्मणिः कुं भुवं स्तुभ्नाति व्याप्नोति कुस्तुभोऽब्धिस्तत्र भवः, कुं स्तोभते कुस्तुभो विष्णुस्तस्यायमिति वा कौस्तुभः इत्येकं विष्णोर्मणेः ॥ २८ ॥

गरुड

पु. पु. पु. पु. पु.

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।

पु. पु. पु. पु.

नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ॥ २९ ॥

गरुत्मानिति—गरुतः पक्षास्सन्त्यस्येति गरुत्मान्, गरुद्भिः पक्षैर्डयत इति गरुडः, तृक्षस्य कश्यपस्यापत्यं तार्क्ष्यः, विनताया अपत्यमिति वैनतेयः, खे आकाशे गच्छन्तीति खगास्तेषामीश्वरः खगेश्वरः, नागानां सर्पाणामन्तको नाशको नागान्तकः, विष्णोः रथ इव, विष्णोः रथः पौरुषं देहो वेति विष्णुरथः, कनकमयत्वात् शोभने पर्णे पक्षावस्येति सुपर्णः, पन्नगानश्नाति, पन्नगा अशनं यस्येति वा पन्नगाशन. इति नव गरुडस्य ॥२९॥

शिव या महादेव

पु. पु. पु. पु. पु. पु.

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ।

पु. पु. पु. पु. पु

ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः ॥ ३० ॥

पु. पु. पु. पु. पु.

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।

पु. पु. पु. पु.

मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ ३१ ॥

---

* पाठा. शार्ङ्गं धनुस्तु श्रीवत्सो लाञ्छनं स्मृतम् । अश्वाश्च शैब्यसुग्रीवमेघपुष्पबलाहकाः । सारथिः दारुको मन्त्री ह्युद्धवश्चानुजो गदः ॥

पु. पु. पु. पु. पु.
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
पु. पु. पु. पु.
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३२ ॥
पु. पु. पु. पु.
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
पु. पु. पु. पु. पु.
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ॥ ३३ ॥
पु. पु. पु. पु
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
पु. पु. पु. पु. पु. पु. †
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥ ३४ ॥

शम्भुरिति—शं सुखं भवति (भावयतीति) शम्भुः, ईष्टे इति ईशः, पशूनां जीवानां पतिरिति पशुपतिः, शिवमस्यास्तीति, शिवयतीति वा शिवः, शूलमस्यास्तीति शूली, महांश्चासावीश्वरश्चेति महेश्वरः, ईशितुं शीलमस्येश्वरः, शृणातीति, सर्वतीति वा शर्वः—सर्वः, ईष्टे तच्छील ईशानः, शं करोतीति शंकरः, चन्द्रः शेखरो यस्येति चन्द्रशेखरः, भूतानामीशो भूतेशः, खण्डयतीति खण्डः परशुरस्येति खण्डपरशुः, गिरेरीशो गिरीशः, गिरौ शेते इति गिरिशः, मृडति मृड्णातीति वा मृडः, मृत्युं जयतीति मृत्युञ्जयः, कृत्तिश्चर्मवासोऽस्येति कृत्तिवासाः, पिनाकोऽस्यास्तीति पिनाकी, प्रमथानामधिपः प्रमथाधिपः, उच्यति क्रुधा समवैत्यत इत्युग्रः, कपर्दोऽस्यास्तीति कपर्दी, श्रीः शोभा कण्ठेऽस्येति श्रीकण्ठः, शितिः कालः कण्ठोऽस्येति शितिकण्ठः, कपालं बिभर्तीति कपालभृत्, वामयति दुष्टाना मदमिति वामः दीव्यतीति देवः वामश्चासौ देवश्चेति वामदेवः, महांश्चासौ देवश्च—महान् देवो नृत्यादिरूपा क्रीडा यस्येति वा महादेवः, विदिशः भिन्नचन्द्राग्निरूपाण्यक्षीणि यस्य, विरूपेणापि अक्षिकृपादृष्टिर्यस्य, विविधानि रूपाणि [illegible] वा अक्षाणीन्द्रियाण्यस्येति वा विरूपाक्षः, त्रीणि लोचनानि यस्य, त्रिषु कालेषु लोकेषु गुणेषु देवेषु लोचनं ज्ञानमस्य, त्रयो वेदा वर्णा अकारोकारमकारा वा लोचनानि यस्येति त्रिलोचनः, कृशानौ रेतो यस्य, कृशानुः सूतरूपो रेतोऽस्येति वा कृशानुरेताः, सर्वं जानातीति सर्वज्ञः, धूर्भारभृता जटिर्जटा यस्येति धूर्जटिः, नीलश्चासौ लोहितश्च नीललोहितः, हरतीति हरः, स्मरं कामं हरतीति स्मरहरः, भर्जते, भृज्यन्ते [illegible] वा भर्गः, त्रीण्यम्बकान्यस्य, त्रिष्वम्बकमस्येति, त्रयाणां लोकानाम् [illegible], [illegible] वा त्र्यम्बकः, त्रयाणां धातूनां पुराणि नेपा[illegible] त्रिपुरं [illegible] त्रिपुरान्तकः, धरतीति धरः गङ्गाया धरः गङ्गाधरः,

[illegible]

अन्धकस्य दैत्यस्य रिपुः अन्धकरिपुः, क्रतुं ध्वंसयतीति क्रतुध्वंसी, वृषो ध्वजश्चिह्नमस्येति वृषध्वजः, व्योम्नि केशा यस्येति व्योमकेशः, भवति-भवते वा सर्वमिति भवः, बिभेत्यस्मादिति भीमः, तिष्ठतीति स्थाणुः, रोदयतीति रुद्रः, उमायाः पतिः उमापतिरित्यष्टचत्वारिंशच्छम्भोः ॥ ३० । ३४ ॥

पु. पु. न.

जटा, धनुष — **कपर्दो "ऽस्य जटाजूटः" पिनाकोऽजगवं (धनुः) ।**

पु.

सेवक, मातायें — **प्रमथाः (स्युः पारिषदा) ब्राह्मी "त्याद्यास्तु मातरः" ॥ ३५ ॥**

कपर्द इति—अस्य शिवस्य जटाजूटो जटाबन्धः केन सुखेन जलेन वा परं पूर्तिं ददाति, कस्य जलस्य परा पूरणेन दायतीति वा कपर्दः इत्येकं जटाबन्धस्य । अस्य धनुः पातीति पिनाकः अजेन ब्रह्मणा गम्यते-अजं छागं गच्छति यज्ञत्वेन प्रविशतीति अजगो विष्णुरस्ति शरत्वेनास्मिन्निति अजगवम्—आजगवमिति द्वे शिवधनुषः । अस्य परिषदि साधवः पारिषदाः, दुष्टान्प्रमथन्तीति प्रमथाः स्युरिति द्वे शिवानुचराणां तु पुनः ब्रह्मण इयं ब्राह्मी ब्रह्मशक्तिरित्याद्याः मान्यन्ते पूज्यन्ते लोकमातृत्वादिति, मान्ति शिवपरिवारत्वेन समाविशन्तीति वा मातरः "ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा । कौमारीत्यपि चामुण्डा चर्चिकेत्यष्ट मातरः" ब्रह्मादिशक्तिदेवतानामैकैकम् ॥ ३५ ॥

स. स. न.

सिद्धियां — **विभूतिर्भूतिरैश्वर्यं 'मणिमादिकमष्टधा' ।**

विभूतिरिति—विभवनं विभूतिः, भवनं भूतिः, ईश्वरस्य भावः ऐश्वर्यमिति "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा । ईशिता वशिता चैव तथा कामावशायिता" तत्र अणोर्भावोऽणिमा, लघोर्भावो लघिमा, प्रापणं प्राप्तिरंगुल्यग्रेण चन्द्रादेः, प्रकामस्य भावः प्राकाम्यमिच्छानभिघातः, महतो भावो महिमा येन ब्रह्माण्डेपि न माति, ईशोऽस्यास्तीतीशी तस्य भाव ईशिता प्रभुत्वं येन स्थावरा अप्याज्ञाकारिणः, वशिनो भावो वशिता यया भूमावप्युन्मज्जननिमज्जने, कामानवशेते कामादरायी तस्य भावः कामावशायिता इति अणिमाद्यष्टसिद्धीनां नामत्रयम् ॥

स. स. स. स. स. स.

पार्वती — **उमा कात्यायनी गौरी काली हैमवतीश्वरा ॥ ३६ ॥**

स. स. स. स. स.

शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ।

स. स. स. स. स. स.

***अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥ ३७ ॥**

उमेति—ओमहेशेन मा लक्ष्मीरिवनुमा, कात्यायनस्येयं कन्यापत्यमिति वा क...

* आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।

यनी, गौरो वर्णोऽस्त्यस्या गौरी, कालो वर्णोऽस्त्यस्या इति काली, हिमवतोऽपत्यं स्त्री हैमवती, ईष्टे इतीश्वरा—ईश्वरी वा, शिवयति, शिवमस्त्यस्याः, शिवो वास्ति भर्तृत्वेन यस्या इति वा शिवा, शिवस्य स्त्री तु शिवी, भवस्य स्त्री भवानी, रुद्रस्य स्त्री रुद्राणी, शर्वस्य स्त्री शर्वाणी, सर्वेभ्यः सर्वेषां वा मङ्गला, सर्वाणि मङ्गलान्यस्या इति वा सर्वमङ्गला, न पर्णान्यस्या इत्यपर्णा, पर्वतस्येयं पार्वती, दुःखेन गम्यते ज्ञायतेऽस्याम्, दुःखेन दुष्टैर्वा गीयते स्तूयते इति दुर्गा, मृडस्य स्त्री मृडानी, चण्डते इति चण्डिका, अम्ब्यते शब्द्यते इत्यम्बा, अम्बैवाम्बिका इति सप्तदश पार्वत्याः ॥ ३६ । ३७ ॥

पु. पु. पु. पु.

गणेश **विनायको विघ्नराजद्वैमातुरगणाधिपाः ।**

पु. पु. पु. पु.

(अप्ये) कदन्तहेरम्बलम्बोदरगजाननाः ॥ ३८ ॥

विनायक इति—विनयति, विशिष्टो नायकः, विगतो नायको नियन्तास्येति वा विनायकः, विघ्नानां राजेति विघ्नराजः, द्वयोर्मात्रोरपत्यमिति द्वैमातुरः, गणानां प्रमथानामधिपो गणाधिपः, एको दन्तोऽस्येत्येकदन्तः, हे प्रभाते रम्बते इति हेरम्बः, लम्बमुदरमस्येति लम्बोदरः, गजस्याननमिवाननं यस्य गज आननमस्येति वा गजाननः इत्यष्टौ गणेशस्य ॥ ३८ ॥

पु पु. पु. पु.

स्वामिकार्त्तिकेय **कार्त्तिकेयो महासेनः शरजन्मा षडाननः ।**

पु. पु. पु. पु. पु.

पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ ३९ ॥

पु. पु. पु. पु.

बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।

पु. पु. पु. पु.

षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ ४० ॥

कार्त्तिकेय इति—कृत्तिकानामपत्यमिति कार्त्तिकेयः, महती सेना यस्येति महासेनः, [illegible] शरजन्मा, षट् आननान्यस्येति षडाननः, पार्वत्या नन्दनः पार्वतीनन्दनः, [illegible] स्कन्दः, सेनां नयतीति सेनानीः, अग्नेर्भवतीत्यग्निभूः, गूहति रक्षति [illegible] गुहः, बहुलानां कृत्तिकानामपत्यमिति बाहुलेयः, तारकं जयतीति तारकजित्, [illegible]—विशाखायां जात इति वा विशाखः, शिखी मयूरो वाहनमस्येति शिखिवाहनः, [illegible] षाण्मातुरः, [illegible], शक्तेर्धरः शक्तिधरः, कुमारयति, [illegible] कौ पृथिव्यां मारयति दुष्टानिति वा कुमारः, क्रौञ्चस्य पर्वतस्य [illegible] कार्त्तिकेयस्य ॥ ३९ । ४० ॥

[illegible]

पु. पु. पु. पु. पु.

इन्द्र- इन्द्रोमरुत्वान्मघवा विडौजाः पाकशासनः ।

पु. पु. पु. पु.

वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः ॥ ४१ ॥

पु. पु. पु. पु. पु.

जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।

पु. पु. पु. पु. पु. पु.

सुत्रामागोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ ४२ ॥

पु. पु. पु. पु.

वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ।

पु. पु. पु. पु.

जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥ ४३ ॥

पु. पु. पु. पु.

संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ।

पु. पु. पु.

आखण्डलः सहस्राक्ष ऋभुक्षा (तस्य तु प्रिया) ॥४४॥

इन्द्र इति—इन्दतीति इन्द्रः, मरुत, सन्त्यस्येति मरुत्वान्, मह्यते पूज्यत इति मघवा, मघो धनमस्येति व्युत्पत्त्या (मघवान्) विडति विडंभेदकमोजोऽस्येति विडौजा विट्सु प्रजासु मनुष्येषु वा ओजोऽस्येति विडोजा इति वा पाकस्य दैत्यभेदस्य शासन इति पाकशासनः, वृद्धे श्रवसी यस्येति, वृद्धेषु पण्डितेषु श्रवो यशो यस्येतिवा वृद्धश्रवाः, सुष्ठु नासीरं सेना मुखं यस्य, शोभना नासीरा अग्रेसरा यस्येति वा सुनासीरः—शुनो वायुः शीरः सूर्यस्तौ रतोऽस्येति वा शुनासीरः, पुरुप्रचुरं हूतमाह्वानं यज्ञेष्वस्य, पुरूणि हूतानि नामान्यस्येति वा पुरुहूतः, पुरोरीणां दारयतीति पुरन्दरः, जयतीति जिष्णुः, लेखेषु ऋषभः, लेखऋषभ इवेति वा लेखर्षभः, शक्नोतीति शक्रः, शतं मन्यवो यागा अस्य, शतेषु दैत्येषु मन्युः क्रोधोऽस्येति वा, शतं मन्यवो दैन्यान्यस्येति वा शतमन्युः, दिवः पतिर्दिवस्पतिः, सुष्ठु त्रायते इति सुत्रामा—"सूत्रायत इति सूत्रामा", गोत्रान्पर्वतान्भिनत्तीति गोत्रभित, वज्रोऽस्यास्तीतिवज्री, वसवो देवा वसूनि रत्नान्यस्य वा सन्ति, वसोरपत्यमिति वा वासवः, वृत्रं हतवानिति वृत्रहा, वर्षतीति वृषा, वास्तोर्गृहक्षेत्रस्य पतिः वास्तोष्पतिः, सुराणां पतिः सुरपतिः, बलस्यासुरस्यारातिः बलारातिः, शच्याः पतिः शचीपतिः, जम्भमसुरं भेत्तुं शीलमस्येति जम्भभेदी,

१ श्वन्नुक्षन्नित्यादिना मघवन्निति निपातितं 'मघवा बहुल'मिति आदेशपक्षे तु मघवानित्यपि ... तु आदेशे दीर्घाभावान्मघवन्निति स्वामिनोक्तं तन्न सर्वनामस्थाने चासम्बुद्धाविति दीर्घसंभवात्—न च ... संज्ञायामित्यत्र मघवा बहुलमिति बहुलग्रहणेन तदवारणात् । अतएव मतुपा वन्तादेशमत्यास्थन्परे ... न संगच्छते 'हविर्जक्षिति निःशङ्कं मखेषु मघवानसौ' इति भट्टिः एतेन मघवा, मघवद् ... न्मानि ।

हरिर्हरिद्वर्णो हयो यस्येति हरिहयः, स्वः स्वर्गे राजते—स्वेषु देवेषु स्वेन धनेन वा आराजते स्वाराट्, न मुञ्चतीति नमुचिर्दैत्यस्तस्य सूदनो नमुचिसूदनः, संक्रन्दयतीति संक्रन्दनः, दुःखेन दुष्टं दुष्टेषु वा च्यवनमस्य, दुस्सहश्च्यवनो मुनिरस्येति वा दुश्च्यवनः, तुतोर्तीति तुरो वेगवाँस्तं साहयति अभिभवतीति तुराषाट्, मेघा वाहनमस्येति मेघवाहनः, आखण्डयतीत्याखण्डलः, सहस्रमक्षीणि यस्येति सहस्राक्षः, ऋभवः क्षियन्त्यत्रेति "ऋभुक्षः स्वर्गवज्रयोरिति विश्वः" ऋभुक्षः स्वर्गो वज्रो वास्त्यस्येति ऋभुक्षा इति पञ्चत्रिंशदिन्द्रस्य ॥४१।४४॥

इन्द्राणी, नगरी, घोड़ा, सारथि, वन

स. स. स. . स.

पुलोमजाशचीन्द्राणी (नगरी त्वमरावती) ।

पु. पु. न.

(हय) उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ॥ ४५ ॥

तस्येति—तस्येन्द्रस्य प्रिया तु पुलोम्नो मुनेर्जाता पुलोमजा (पौलोमी अपि) शचते शची, सर्वेन्द्रियेषु सचतइति वा सची दन्त्यादिरपि इन्द्रस्य स्त्री, इन्द्राणी इति त्रीणीन्द्रपत्न्याः । नगरी तु अमराः सन्त्यस्यामिति अमरावती इत्येकमिन्द्रपुरस्य । हय अश्वस्तु उच्चैःश्रवसी यस्य, उच्चैः शृणोतीति वा, उच्चैर्महच्छ्रवो यशो यस्येति वा उच्चैःश्रवा इत्येकमिन्द्राश्वस्य । सूतः सारथिः मतं लातीति मतलस्तस्यापत्यापत्यमिति मातलिरित्येकमिन्द्रसारथेः । वनं नन्दयतीति नन्दनमित्येकमिन्द्रवनस्य ॥ ४५ ॥

इन्द्रघर, पुत्र, हाथी

पु. पु. पु.

स्यात्प्रासादो वैजयन्तः जयन्तः पाकशासनिः ।

पु. पु. पु. पु.

ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ॥ ४६ ॥

स्यादिति—तस्य प्रासादो गृहं वैजयन्त्यः पताकाः सन्त्यस्येति वैजयन्तः स्यादित्येकमिन्द्रगृहस्य । जयतीति जयन्तः, पाकशासनस्यापत्यमिति पाकशासनिरिति द्वे इन्द्रपुत्रस्य । इरा उदकानि सन्त्यस्मिन्निति इरावान्समुद्रस्तत्र भवः ऐरावतः, अभ्रं मेघस्तदात्मको मातङ्गः, अभ्रे आकाशे मेघे वा विद्यमानो मातङ्ग इति वा अभ्रमातङ्गः, इरया उदकेन वणति, इरावणमुदकं वहिमन्निति वा इरावणस्तत्र भवः ऐरावणः, अभ्रेमाति, न भ्राम्यति वा अभ्रमुस्तस्य वल्लभः अभ्रमुवल्लभः इति चत्वारीन्द्रगजस्य ॥ ४६ ॥

वज्र

न. पु. न. पु. न. न. पु.

ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ।

पु. पु. पु. पु. पु स.

शतकोटिः स्वरुः शम्बो दम्भोलिरशनि (द्वयोः) ॥४७॥

[illegible] स्यादत्र [illegible] धान्या क्लीब योगान्तरे पुमान् । वज्रास्तु [illegible] इति ॥

[illegible]

ह्लादिनीति—ह्लादतेऽवश्यमिति । ह्लादोऽस्त्यस्या इति वा ह्लादिनी, वजतीति वज्रं-मस्त्री पुंक्लीबे स्यात्, कुलौ हस्ते शेते, कुलिनः पर्वतान् श्यति, कुत्सितमीषल्लिशतीति वा कुलिशम्, भिनत्तीति भिदुरम्, पुनातीति पविः, शतं कोटयो धारा अस्येति शतकोटिः, स्वरतीति, शोभनान्यरूंषि धारा अस्येति स्वरुः, शं शुभमस्त्यस्येति, शम्ब-यति संवध्नाति शत्रूनिति वा शम्बः, सम्बयतीति विग्रहे तु सम्बः दन्त्यादिरपि, दम्नोतीति दम्भः रोधनं तस्मिन्नलति भूषयतीत्यालिः समर्थः दम्भोलिः, अश्नाति—अश्यतेऽनेनेति वा अशनिः द्वयोः स्त्रीपुंसयोः स्यादिति दश वज्रस्य ॥ ४७ ॥

न. पु. न. पु.
विमान देवर्षि **व्योमयानं विमानोऽस्त्री (नारदाद्याः) सुरर्षयः ।**
स. स. न. न. स.
सभा अमृत **स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा ॥ ४८ ॥**

व्योमयानमिति—व्योमयाति, व्योम्नि यान्त्यनेन वा व्योमयानम्, विशिष्टं मानयन्त्यनेन, विशेषेण मान्त्यस्मिन्निति, विगतं मानमुपमास्येति वा विमान. अस्त्री स्यादिति द्वे देवरथस्य । नरस्य धर्म्य नारं ददाति, नराणां समूहो नारं तद्द्यति खण्डयति कलहेनेति वा । नृणिदं नारमज्ञानं तद्द्यति ज्ञानोपदेशेनेति वा नारदः स एवाद्यो मुख्यो येषामिति नारदाद्याः सुराश्च ते ब्रह्मादिपुत्रत्वादृषयश्चेति सुरर्षय इत्येकं सुरर्षीणाम् । शोभनो धर्मोऽस्यामिति सुधर्मा देवसभा स्यादिति सह भान्त्यस्यामिति सभा देवानां सभा आस्थानगृहमिति द्वे देवसभायाः । पीय्यत इति पीयूषम्, न म्रियन्तेऽनेनेत्यमृतम्, सुखेन धीयत इति सुधा इति त्रीण्यमृतस्य ॥ ४८ ॥

स. स. स. स. स.
आकाशगङ्गा सुमेरु **मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका ।**
पु. पु. पु. पु. पु.
मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ॥ ४९ ॥

मन्दाकिनीति—मन्दमकितुं शीलमस्या इति मन्दाकिनी, वियति वियतो वा गङ्गा वियद्गङ्गा, स्वः स्वर्गस्य नदी स्वर्णदी, सुराणां दीर्घिकेव सुरदीर्घिका इति चत्वारि देवगङ्गायाः । मिनोत्युच्चत्वाज्ज्योतींषीति मेरुः, शोभनो मेरुः सुमेरुः, हेम्नोऽद्रिः हेमाद्रिः, रत्नानि सानावस्येति रत्नसानुः, सुराणामालयः सुरालय इति पञ्च मेरोः ॥ ४९ ॥

पु. पु.
कल्पवृक्ष **(पञ्चैते देवतरवो) मन्दारः पारिजातकः ।**
पु. पु. न. पु.
सन्तानः कल्पवृक्षश्च (पुंसि वा) हरिचन्दनम् ॥ ५० ॥

पञ्चेति—"पञ्च देवतरवः देववृक्षाः सन्ति" मन्द्यति मोदयतीति मन्दा आरां-भारा अस्येति वा मन्दारः, पारिणोऽब्धेर्जातः पारिजातः स एव पारिजातकः, —

नोति पुष्पाणि—सन्तन्यन्ते पुष्पाण्यस्मिन्निति वा सन्तानः, कल्पः संकल्पितोऽर्थस्तद्वृक्षः कल्पवृक्षः, चन्दयतीति चन्दनः, हरेश्चन्दनः हरिचन्दनः वा पुंसि स्यादिति पञ्चानां देववृक्षाणामेकैकम् ॥ ५० ॥

पु. पु. पु. पु.

सनत्कुमार **सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ ।**

स्वर्गवैद्य पु. पु. पु. पु.

नासत्यावश्विनौ दस्रावाश्विनेयौ च (तावुभौ) ॥५१॥

सनदिति—सनन्नित्यं कुमारः सनत्कुमारः सनद्ब्रह्मा तस्य कुमारोऽपत्यमिति वा सनत्कुमारः, विधातुरपत्यं वैधात्र. इति द्वे ब्रह्मपुत्रस्य। स्वः स्वर्गस्य वैद्यौ स्वर्वैद्यौ, अश्विन्याः सुतौ अश्विनीसुतौ, न सत्यं ययोस्तावसत्यौ न असत्यौ नासत्याविति, प्रशस्ता अश्वाः सन्ति ययोः अश्विन्यां जातौ वा अश्विनौ, दस्यतः क्षिपतो रोगानिति दस्रौ, तौ उभौ यमलौ अश्विन्या अपत्ये आश्विनेयौ स्यातामिति षडश्विनोः ॥ ५१ ॥

स. स.

अप्सरा **स्त्रियां बहुष्वप्सरसः स्वर्वेश्या (उर्वशीमुखाः) ।**

गन्धर्व पु. पु.

हाहा हूहूश्चैवमाद्या 'गन्धर्वास्त्रिदिवौकसाम्' ॥ ५२॥

स्त्रियामिति—उरून्महतोऽश्नुते व्याप्नोति वशीकरोतीति, उरु अश्नातीति वा उर्वशी (स्त्री) मुखा आद्या यासां ता उर्वशीमुखाः अप्सरसः, स्वर्वेश्या इति चोच्यन्ते अद्भ्यः सरन्तीत्यप्सरसः स्त्रियां स्त्रीलिङ्गे बहुषु बहुत्वेषु स्युः बहुष्वेति प्रायोवादः अतश्चिचेति सूत्रे 'अप्सराः' इति भाष्यप्रयोगादेकवचनमपि । स्वः स्वर्गस्य वेश्याः स्वर्वेश्याः, इति द्वे उर्वश्यादेः एवं हा कष्टं जहातीति हाहाः शसि हाहः अव्युत्पन्नपक्षे तु हाहान् हाहाः सान्तोपि " गन्धर्वा हाहसि प्रोक्ताः " (इति रत्नकोषः) हूडति हूयतीति हूहूश्चेत्याद्याः तुम्बुरुविश्वावसुचित्ररथादय. त्रिदिवौकसां देवानां गन्धं सौरभमर्दन्तीति गन्धर्वाः स्युरित्येकं देवगायकानाम् ॥ ५२ ॥

पु. पु. पु. पु. पु.

अग्निदेव **अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ।**

पु. पु. पु. पु.

कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥

---

१ " [illegible] " इति शब्दार्णवात् ॥

२ [illegible] उर्वशी च [illegible] । [illegible] अप्सरसो [illegible] ॥

३ [illegible] ([illegible]) [illegible] शसि हाहान्—[illegible] [illegible] " [illegible] " [illegible]

पु. पुं. पु. पु.
बर्हिःशुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः।
पु. पु. पु. पु. पुं.
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः॥ ५४॥
पु. पु. पु. पु.
लोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः।
पु. पु. पु. पु.
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः॥ ५५॥
पु. पु. पु. पु. पु.
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः।
पु. न. पु. पु. पु.
वडवानल शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः॥ ५६॥

अग्निरिति—अङ्गत्यूर्ध्वं गच्छतीत्यग्निः, विश्वेनरा अस्येति विश्वानरस्तस्यापत्यं वैश्वानरः, वहति हव्यमिति वह्निः, वीयत इति वीतिः, वीतिर्भक्ष्यं पुरोडाशादिर्हूयतेऽस्मिन्निति वीतिहोत्रः, धनं जयतीति धनञ्जयः, कृपीटस्य जलस्य योनिः—कृपीटं जलं योनिरस्येति वा कृपीटयोनिः, ज्वलतीति ज्वलनः, विद्यते लभ्यत इति वेदः जातं वेदो धनं यस्येति जातवेदाः, तनूं शरीरं न पातयति, तनुं स्वं स्वरूपं न पातीति तनूनपात्, बृंहतीति बर्हिः, शुष्यत्यनेनेति शुष्मा, कृष्णो धूमो वर्त्मास्येति कृष्णवर्त्मा, शोचींषि ज्वालाः केशा इवास्येति शोचिष्केशः, उषः संध्यायां बुध्यते प्रकाशत इति उषर्बुधः, आश्रयमाधारमश्नातीति आश्रयाशः "आशेरतेऽत्रेति आशयस्तमश्नातीत्याशयाशः" इति पाठान्तरम् बृहन्तो भानवोऽस्येति बृहद्भानुः, कृश्यतीति कृशानुः, पुनातीति पावकः, अनित्यनेनेत्यनलः, लोहिता अश्वा यस्येति—रोहितो मृगोऽश्वो वाहनमस्येति वा लोहिताश्वः—रोहिताश्वः, वायोः सखा वायुसखः, शिखाः सन्त्यस्येति शिखावान्, आशु शीघ्रं आशुं व्रीहिं वा शुक्षणोतीत्याशुशुक्षणिः, हिरण्यं रेतोऽस्येति हिरण्यरेताः, हुतं भुङ्क्त इति हुतभुक्, दहतीति दहनः, हव्यं वाहयतीति हव्यवाहनः, सप्तार्चिषः सप्तार्चयो यस्येति सप्तार्चिः, दाम्यति दमयतीति वा दमुनाः, शोचयतीति, शुक्रं रेतोऽस्यास्तीति शुक्रः, चित्रा भानवोऽस्येति चित्रभानुः, विभा प्रभा वसु धनं यस्येति विभावसुः, अपां पित्तमिव अप्पित्तमिति चतुस्त्रिंशदग्नेः—उर्वस्य मुनेरपत्यमिति औरवः, वडवायां भवो वाडवः, वडवाया अनलो वडवानल इति त्रीणि वाडवाग्नेः॥ ५३। ५६॥

पु.स. पु.स. स. स. स.
अग्निज्वाला वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्।
पु.स.न. पु. पु. पु.
अग्निकणे इत्यर्थे
ज्वरस्य (त्रिषु)स्फुलिङ्गोऽग्निकणःसन्तापः संज्वरः(समौ)॥५७॥

१ काली कराली मनोजवा सुलोहिता सुधूम्रवर्णा स्फुलिङ्गिनी विश्वरूपाख्याः सप्तजिह्वाः।

वह्नेरिति—वह्नेरग्नेः ज्वलतीति ज्वालः, कीलतीति कीलः, तौ द्वयोः स्त्रीपुंसयोः स्ताम् । अर्च्यत इत्यर्चिः सान्तस्त्विदन्तोपि, हिनोति—हन्ति वा हेतिः, शेते इति शिखा स्त्रियां स्त्रीलिङ्गे स्यादिति पञ्चज्वालायाः । स्फुना फूत्कारेण लिङ्गतीति स्फुलिङ्गः, अग्नेः कणोऽग्निकणः इति द्वे अग्निकणस्य । संतापयतीति संतापः, संज्वरयतीति संज्वरः उभौ समौ समानार्थौ समलिङ्गाविति द्वे संतापस्य ॥ ५७ ॥

यमराज

पु. पु. पु. पु.
धर्मराजः पितृपतिः समवर्ती परेतराट् ।
पु. पु. पु. पु. पु.
कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ॥ ५८ ॥
पु. पु. पु. पु. पु.
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।

धर्मराज इति—धर्मस्य राजा धर्मराजः, पितॄणां पतिः पितृपतिः, समं वर्तितुं शीलमस्येति समवर्ती, परेतेषु मृतेषु राजत इति परेतराट्, कृतोऽन्तो विनाशो येनेति कृतान्तः, यमुनाया भ्राता यमुनाभ्राता, शमयतीति शमनः, यमेन संयमेन राजत इति यमराट्, यमयतीति यमः, कलयति, कालयत्यायुरिति, कल्यत इति वा कालः, धरतीति धरो दण्डस्य धरो दण्डधरः, श्राद्धस्य देवः श्राद्धदेवः, विवस्वतोपत्यमिति वैवस्वतः, अन्तं करोत्यन्तयति अन्तयतीत्यन्तक इति चतुर्दश यमस्य ॥ ५८ । ½ ॥

राक्षस

पु. पु. पु. पु. पु. पु.
राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः ॥ ५९ ॥
पु. पु. पु. पु.
रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः ।
पु. पु. पु. न. न.
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥

राक्षस इति—रक्षोऽस्मात् [illegible] रक्ष एव राक्षसः, कुणपं शवं भक्षयितुं शीलमस्य, कोणं पातीति कोणपो निर्ऋतिस्तस्यायमिति वा कौणपः, क्रव्यमाममांसमत्तीति क्रव्यात्, कृत्तं छिन्नं तदेव पुनर्विशसतः हुतं पक्वं च भुङ्क्ते इति क्रव्यादः, अस्रं रक्तं पिबतीति अस्रपः, [illegible] इति वा आशृणातीति आशरः, रात्रौ चरतीति रात्रिंचरः, रात्रिचरः, कर्वतीति कर्बुरः, निकषाया आत्मजः निकषात्मजः, यातूनि रक्षांसि दधाति पुष्णाति, यातूनि [illegible] इति वा यातुधानः, जातु कदाचिद्धानं संनिधानमस्येति जातुधानश्च [illegible], [illegible] पुण्यश्चासौ जनश्चेति पुण्यजनः, निर्ऋतेरपत्यमिति नैर्ऋतः, [illegible] यातु, [illegible] । रक्षः इति पञ्चदश राक्षसस्य ॥ ५९ । ६० ॥

वरुण

पु. पु. पु. पु. पु.
प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ।

* [illegible] (दृ. मे.) [illegible] ॥

प्रचेता इति—प्रचेतयति प्रकृष्टं चेतोऽस्येति वा प्रचेताः, व्रियते वृणोति वा वरुणः वरणोपि, पाशोऽस्यास्तीति पाशी, यादांसि जलजन्तवस्तेषां पतिः यादसांपतिः, अपांपतिः अप्पतिरिति पञ्च वरुणस्य ॥

पवन

पु. पु. पु. पु. पु.
श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६१ ॥
पु. पु. पु. पु. पु.
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः।
पु. पु. पु. पु. पु.
समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६२ ॥
पु. पु. पु. पु. पु.
नभस्वद्वातपवनपवमानप्रभञ्जनाः।

श्वसन इति—श्वसित्यनेनेति श्वसनः, स्पृशतीति स्पर्शनः, वातीति वायुः, मातर्यन्तरिक्षे श्वयति संचरति, मातरि जनन्यां श्वयति वर्धते वा मातरिश्वा, सदागतिर्गमनमस्येति सदागतिः, पृषद् मृगभेदोऽश्वो वाहनमस्य, पृषतामम्बुकणानामश्व इवेति वा पृषदश्वः, वहतीति वहः गन्धस्य वहो गन्धवहः, गन्धं वहतीति गन्धवाहः, अनित्यनेनेति अनिलः, आशु गच्छतीति आशुगः, सम्यगीर्ते गच्छति—ईरयति प्रेरयति वा समीरः, म्रियन्तेऽनेन वृद्धेन विना वेति मरुत्स एव मारुतः, मरुद्वा, जगतां प्राणो जगत्प्राणः, समीरयतीति समीरणः, नभोऽस्याश्रयत्वेनास्ति नभस्वान्, वातीति वातः, पुनातीति पवनः, पवते इति पवमानः, प्रकृष्टं भनक्तीति प्रभञ्जन इति विंशतिर्वातस्य ॥ ६१ । ६२ । $\frac{१}{२}$ ॥

शरीरस्थ पवन

पु. पु. पु. पु. पु.
प्राणोऽपानः समानश्चोदानव्यानौ (च वायवः) ॥ ६३ ॥
न. न. पु. पु.
(शरीरस्था) इमे रंहस्तरसी तु रयः स्यदः।

प्राण इति—प्राणयतीति प्राणः, अपानयतीति अपानः, समानयतीति समानः, उदानयतीति उदानः, व्यानयतीति व्यानः, इमे प्राणादयो वायवः शरीरस्थाः स्युरिति "हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले। उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः" इति। रमतेऽनेन, रंहत्यनेन वा रंहः, तरत्यनेनेति तरः, रिणात्यनेनेति रयतेऽनेनेति वा रयः, स्यन्दतेऽनेनेति स्यदः, वस्तुतस्तु रंहादिष्वपि भावे व्युत्पत्तिरेव न्याय्येति। जवनं जव इति पञ्चवेगस्य ॥ ६३ । $\frac{१}{२}$ ॥

शीघ्रता या वेग

पु. न. न. न. न. न. न
जवो (ऽथ) शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ६४ ॥
न. न. न. न न.
सत्वरं चपलं तूर्णमविलम्बितमाशु (च)।

अथ व्योमवर्गो व्याख्यायते ॥

स. स. न. न. न. न.

आकाश द्योदिवौ "द्वे स्त्रियाम्" अभ्रं व्योमपुष्करमम्बरम् ।

न. न. न. न. न. न.

नभोन्तरीक्षं गगनमनन्तं सुरवर्त्म खम् ॥ १ ॥

न. न. पु.न. पु.न.

वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ।

इति व्योमवर्गः ॥

द्योदिवाविति—द्योतन्ते तारका अस्यामिति द्यौः गोवत्—दीव्यन्त्यस्यामिति द्यौः दिवः द्युभ्यामित्यादि—द्वे स्त्रियां स्यातामिति न बिभर्ति किञ्चित्—आपो भृश्यन्त्यस्मात् अभ्रति स्थैर्यं गच्छति न भ्राजते वा अभ्रम्, व्ययति व्यवतीति वा व्योम, पुष्यती पुष्कं वारि रातीति वा पुष्करम्, अम्बनमम्बः शब्दस्तं रातीति अम्बरम्, नह्यते मेघैः नभस्ति, नभते वा नभः, द्यावापृथिव्योरन्तरीक्ष्यते अन्तरीक्षम्, अन्तर् ऋक्षाण्य स्येति व्युत्पत्त्या अन्तरिक्षम्, गच्छन्त्यनेनास्मिन्वा गगनम्, नास्त्यन्तो यस्येति अनन्तम् सुराणां वर्त्मेति सुरवर्त्म, खन्यते—खर्वत्यस्मिन्निति वा खम्, विविश्वत एति व्याप्नोति वियच्छति न विरमति वा वियत्, विष्णोः पदमास्पदं स्वरूपं वा विष्णुपदम्, आकाशन्ते सूर्यादयोऽत्रेति आकाशः, विशेषेण हाययति गमयति विमानादीनिति विहायाः आकाशश्च विहायश्चेत्याकाशविहायसी वा पुंसि स्यातामिति षोडशाकाशस्य ॥ १ । १ ॥

इति व्योमवर्गविवरणम् ॥

अथ दिग्वर्गो व्याख्यायते ॥

१ स. स. स. स. स.

दिशा दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च (ताः) । *

स. स. स.

दिशा के भेद प्राच्यवाची प्रतीच्यस्ताः (पूर्वदक्षिणपश्चिमाः) ॥ १ ॥

स. पु.स.न.

दिशाविभाग उत्तरा दिगुदीची स्याद्दिश्यन्तु (त्रिषु) दिग्भवे ।

दिश इति—दिशन्त्यवकाशमिति दिशः, कं वातं स्कुभ्नन्ति विस्तारयन्तीति ककुभः, काशन्त इति काष्ठाः, आश्नुवते व्याप्नुवन्तीति आशाः, हरन्ति नयन्त्यनयेति हरित 'ताः' इत्यनेन स्त्रीत्वं व्यनक्ति—दिशां बहुत्वाद्बहुवचनमिति पञ्चदिशः । प्राञ्चति प्रागञ्चति सूर्यमिति प्राची, अपाञ्चति सूर्यमिति अपाची अवाची वा प्रतिपन्नः नास्तं गच्छति सूर्यमिति प्रतीची ताः पूर्वदक्षिणपश्चिमा भवन्तीति उदूर्ध्वं गच्छ [illegible] दिश उदञ्चतीति उदीची स्यादिति प्रत्येकं द्वे द्वे चतसृणाम्, दिशि भवं दि [illegible] दिश्यं त्रिषु स्यादिति एकं दिग्भवस्य ॥ १ । २ ॥

* ककुभित्यत्र इति [illegible] दिक् तु स्त्रियां दिशा स्त्री ककुबाशा [illegible] पाणिनि (शब्दार्णवः) ॥

पु. पु. पु. पु. पु. पु.

दिशाओंकेस्वामी इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ॥ २ ॥

पु. पु.

कुबेर ईशः (पतयः पूर्वादीनां दिशां क्रमात्) ।

इन्द्र इति—इन्द्रः, वह्निः, पितृपतिः, नैर्ऋतः, वरुणः, मरुत्, कुबेरः, ईशः एते क्रमात् पूर्वादीनां दिशां पतयः स्युरिति यथा पूर्वेशः इन्द्रः, आग्नेयीशो वह्निः, दक्षिणेशः पितृपतिः, नैर्ऋत्येशो नैर्ऋतः, पश्चिमेशो वरुणः, वायव्याधिपो मरुत्, उत्तरेशः कुबेरः, ईशानाधिपः ईशश्च । एते पूर्वादीनां स्वामिनो ज्ञेयाः ॥ २ । १/२ ॥

पु. पु. पु. पु. पु.

दिग्गज ऐरावतःपुण्डरीको वामनः कुमुदोऽञ्जनः ॥ ३ ॥

पु. पु. पु.

पुष्पदन्तः सार्वभौमःसुप्रतीकश्च (दिग्गजाः) ।

ऐरावत इति—इरा उदकानि सन्तीति इरावान्समुद्रस्तत्र भवः ऐरावतः, पुण्डरीकवद्वर्णो यस्येति पुण्डरीकः, वामयतीति वामनः, कुमुदवद्वर्णो यस्येति कुमुदः, अञ्जनवद्वर्णो यस्येत्यञ्जनः, पुष्पमिव दन्ता यस्येति पुष्पदन्तः, सर्वस्यां भूमौ विदितः सार्वभौमः, शोभनाः प्रतीका अवयवा यस्येति सुप्रतीकः एते दिक्षु विख्याता गजाः दिग्गजा इतीन्द्रगजानामैककम् ॥ ३ । १/२ ॥

स. स. स. स.

हथिनियां दिशाओंकामध्य या कोन (करिण्यो)ऽभ्रमुकपिलापिङ्गलानुपमाःक्रमात् ॥४॥

स. स. स. स.

ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ।

न. स.

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ॥५॥

करिण्य इति—अभ्रे आकाशे एव मातीति अभ्रमुः, कपिलवद्वर्णोऽस्याः कपिला, पिङ्गलवद्वर्णोऽस्याः पिङ्गला, नास्त्युपमाऽस्या अनुपमा, ताम्रौ कर्णौ यस्यास्ताम्रकर्णी, शुभ्रौ दन्तावस्याः शुभ्रदन्ती, अङ्गानि कल्याणान्यङ्गान्यस्या वा अङ्गना, अञ्जनमस्त्यस्या अञ्जनावती एताः क्रमात् करिण्यो हस्तिन्यः स्युरिति क्रमेणैरावतादीनां हस्तिनीनामैककम् । क्लीबाव्ययमिति, दिशोर्मध्ये दिशयोर्मध्ये तु अपदिशम्, नपुंसकाव्ययं स्यात्, दिग्भ्यो विनिर्गता विदिक् स्त्रियां स्यादिति द्वे अग्न्यादिकोणस्य ॥ ४ । ५ ॥

न. न. पु-न. न.

बीच स्थान अभ्यन्तरं त्वन्तरालं चक्रवालं(तु)मण्डलम् ।

अभ्यन्तरमिति—अभिगतमन्तरमभ्यन्तरम्, अन्तरं लातीत्यन्तरालमिति, (२) चक्रस्यापरेण वलते, चक्रमिव वालो यस्य, चक्राकारेण वाड्यत इति वा चक्रवालम्,

डम्, मण्डयतीति, मण्डं भूषां लातीति वा मण्डलमिति द्वे मण्डलाकारेण परिणतसमूहस्य।

न. पु. पु. पु. पु.

बादल **अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ॥६॥**

पु. पु. पु. पु. पु.

धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् ।

पु. पु. पु. पु. पु.

घनजीमूतमुदिरजलमुग्धूमयोनयः ॥ ७ ॥

अभ्रमिति—अपो बिभर्ति, अभ्रति, न भ्रश्यन्त्यापो यस्मादित्यभ्रमभ्रं वा, मेहतीति मेघः, वारि वहतीति वारिवाहः, स्तनयतीति स्तनयित्नुः, बलाकाभिर्हायते गम्यते, बलेन हीयते आहायते वा बलाहकः, धाराणां धरो धाराधरः, जलस्य धरः जलधरः, तडितः सन्त्यस्मिन्निति तडित्वान्, वारि ददातीति वारिदः, अम्बु बिभर्तीत्यम्बुभृत्, हन्यते वायुना घनः, जीवनं जलं मूतं बद्धमनेन—ज्यानं जीः जिया वयोहान्या मूतो बद्ध इति वा जीमूतः, मोदन्तेऽनेनेति मुदिरः, जलं मुञ्चतीति जलमुक्, धूमो योनिरस्येति धूमयोनिरिति पञ्चदश मेघस्य ॥ ६ । ७ ॥

स. स. पु.स.न.

मेघों की पांति **कादम्बिनी मेघमाला (त्रिषु) मेघभवे ‘ऽभ्रियम्’।**

मेघों की वस्तु न. न. पु न.

मेघगर्जना **स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ॥ ८ ॥**

कादम्बिनीति—कादम्बाः कलहंसा बलाकाश्च मेघमनुधावन्ति ते सन्त्यस्या इति कादम्बिनी, मेघानां माला मेघमालेति द्वे मेघपङ्क्तेः। मेघभवे—अभ्रे भवमभ्रियं त्रिपु पुंस्त्रीनपुंसकेषु स्यादित्येकं मेघभवस्य। स्तन्यते स्म स्तननं वा स्तनितम्, गर्ज्यते स्म—गर्जनं वेति गर्जितम्, निर्घोषणं निर्घोषो मेघस्य निर्घोषो मेघनिर्घोषः, रसनमिति रसितम्, आदिना ध्वनित—ह्राद—रासादयो गृह्यन्त इति चत्वारि मेघध्वनेः ॥ ८ ॥

स. स. स. स. स.

बिजली **शंपा शतह्रदा ह्रादिन्यैरावत्यः क्षणप्रभा ।**

स. स. स. स. स.

तडित्सौदामनी विद्युच्चञ्चला चपला (अपि) ॥ ९ ॥

शंपेति—शं सुखं भयंकरत्वात्पिबतीति शंपा, शतं ह्रादा अव्यक्ताः शब्दा यस्याः शतं ह्रदा अर्चींषि अगाधजलाशया वा सन्त्यस्या इति वा शतह्रदा, ह्रादतेऽवश्यमिति ह्रादोऽस्ति अस्या इति ह्रादिनी, इरा आपः सन्त्यस्य इरावान् मेघस्तस्येयमैरावती, क्षणं प्रकाशमाना इति क्षणप्रभा, ताडयतीति तडित्, सुदाम्नि मेघे भवा सौदामनी—सौदामिनी—सौदाम्नी, विद्योतत इति विद्युत्, चञ्चलं चाञ्चल्यं लातीति चञ्चला, चोपतीति चपलेति दश विद्युतः ॥ ९ ॥

* [illegible] । [illegible] जीमूतो [illegible] । [illegible] (इति [illegible])।

पु. पु. पु. पु.

बिजली का तड़पना, मेघोंकी चमक, इन्द्रधनुष, सीधा इन्द्रधनुष — **स्फूर्जथुर्वज्रनिर्घोषे मेघज्योतिरिरंमदः ।**

न. न. न.

इन्द्रायुधं शक्रधनु (स्तदेव ऋजु) रोहितम् ॥ १० ॥

स्फूर्जथुरिति—स्फूर्जनं स्फूर्जथुः केचित्तु स्फूर्जथुरिति दीर्घ नेच्छन्ति, वज्रनिर्घोषेऽशनिशब्दे वज्रनिष्पेषे वा स्यादित्येकं वज्रध्वनेः । अन्योन्यस्य संघट्टेन मेघाग्निरुत्सृत्य वृक्षादौ ज्योतिः पतति मेघस्य ज्योतिरिति वा मेघज्योतिः, इरया जलेन माद्यतीति इरंमद इति द्वे वज्राग्नेः । इन्द्रस्यायुधमिन्द्रायुधम्, शक्रस्य धनुः शक्रधनुरिति द्वे इन्द्रधनुषः । तदिन्द्रधनुरुत्पातादिना ऋजु अवक्रं सद्रोहितं स्यादित्येकमृजोरिन्द्रधनुषः ॥ १० ॥

स. न. पु. पु.

वर्षा रुकना मेघ — **वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ (समौ) ।**

पु. पु. पु.

धारा फुहोरा — **धारासंपात आसारः शीकरोऽम्बुकणाः स्मृताः ॥ ११ ॥**

वृष्टिरिति— वर्षणं वृष्टिः, वर्षणं वर्षमिति द्वे वृष्टेः । तद्विघाते तस्या वृष्टेर्विघातेऽवग्रहणमवग्राहः, अवग्रहः तौ समौ समानार्थौ समानलिङ्गाविति द्वे वृष्टिविघातस्य । संपतनं संपातः धाराणां संपातो धारासंपातः, आसरणमासार इति द्वे महावृष्टेः । शीकते सीं करोतीति वा शीकरः, सीकरः स्मृता वायुना प्रेरिता अम्बुकणा जलबिन्दव इत्येकं वातप्रक्षिप्तजलकणस्य ॥ ११ ॥

पु. पु स. न.

ओला दुर्दिन — **वर्षोपलस्तु करका "मेघच्छन्नेऽह्नि" दुर्दिनम् ।**

वर्षेति—उपलातीति उपलः वर्षस्य उपलो वर्षोपलः, कृणोतीति करका, करकश्चेति द्वे वर्षणोपलस्य । मेघच्छन्ने मेघान्धकारितेऽह्नि दिवसे दुर्निन्दितं दिनं 'दुर्दिन' मित्येकं मेघान्धकारितस्य ॥

स. स. पु. न.

ढांपना या छिपजाना — **अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ॥ १२ ॥**

न. न. न. न.

अपिधानतिरोधानपिधानाऽऽच्छादनानि (च) ।

अन्तर्धेति—अन्तर्धानमन्तर्धा, व्यवधानं व्यवधा, अन्तर्धीयते वान्तर्धानमन्तर्धिः, अपवार्यतेऽपवारणम्, अपिधीयतेऽपिधानम्. तिरोधीयते तिरोधानम्, अपिधीयते पिधानम् 'वष्टिभागुरिरिति वाल्लोपः' आच्छाद्यत इत्याच्छादनं, छद्यते छदनं इत्यष्टावन्तर्धानस्य ॥ १२ । ३ ॥

पु. पु. पु. पु. पु.

चन्द्रमा — **हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥ १३ ॥**

सधर्मिणी पत्नी लोपामुद्रा न मुदं रातीति अमुद्रालोपे धर्मलोपे अमुद्रा हर्षं न लभत इत्येकमगस्त्यपत्न्याः ॥ २० ॥

न. न. न. स. स. स.न.

तारा नक्षत्रमृक्षं भं तारा तारकाप्युडु (वा स्त्रियाम्)।

दक्षकीकन्या स. स. स.

अश्विनी दाक्षायण्योऽ(श्विनीत्यादितारा) अश्वयुगश्विनी ॥२१॥

नक्षत्रमिति—न क्षदते हिनस्ति, नक्षति, न क्षणोतीति वा नक्षत्रम्, ऋषतीति ऋक्षम्, भातीति भम्, तरन्त्यनया तारा, तारयतीति तारका तारकं वा उ ऊर्ध्वं डयते, उना शंभुना डीयते वा 'उडु' वा स्त्रियामिति षट् नक्षत्रसामान्यस्य । अश्विनीत्यादितारा: दक्षस्यापत्यानि दाक्षायण्यः स्युरित्येकमश्विन्यादिभानाम् । अश्वं युनक्ति रूपेणानुकरोतीति अश्वयुक्, अश्वः अश्वरूपमस्त्यस्या अश्विनीति द्वे अश्विन्याः ॥२१॥

विशाखा स. स. पु. पु. स.

पुष्य राधाविशाखापुष्येतु सिध्यतिष्यौ श्रविष्ठया ।

धनिष्ठा स. स. स.

पूर्व और उत्तर

भाद्रपद समाधनिष्ठा स्युः प्रोष्ठपदा भद्रपदाः (स्त्रियः) ॥ २२ ॥

राधेति—राध्नोति कार्यमनया राधा, विशाखतीति विशाखेति द्वे विशाखायाः । पुष्णाति कार्याणीति पुष्यस्तस्मिन् पुष्येतु सिध्यन्ति कार्याण्यस्मिन्निति सिध्यः, तुष्यन्त्यस्मिन्निति तिष्य इति त्रीणि पुष्यस्य । श्रवणं श्रवः सोऽस्त्यस्याः श्रववती अतिशयेन श्रववती श्रविष्ठा तया अतिशयेन धनवती धनिष्ठा सासमेत्यन्वयः । प्रोष्ठो गौस्तस्येव पादा यासामिति, भद्रं पदं यासा ताः स्त्रियः स्युरिति द्वे पूर्वभद्रपदोत्तरभद्रपदानाम् ॥२२॥

पु. न. पु. न. स.

मृगशिरा मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ।

न.

[illegible] इन्वका (स्तच्छिरोदेशे तारका निवसन्ति याः) ॥२३॥

मृगेति—मृगस्य शीर्षमिव शीर्षं यस्येति मृगशीर्षम्, मृगः शिरोऽस्येति मृगशिरस्तस्मिन्नेव [illegible] [illegible]त्या [illegible]णीति त्रीणि मृगशिरसः । तच्छिरोदेशे यास्तार[illegible] निवसन्ति [illegible], इन्वन्ति प्रीणयन्तीति इन्वकाः इल्वन्तीति इल्वका, वेति मृगशीर्षशिरोदेशस्थानां पञ्चानां स्वल्पतारकाणामेकम् ॥ २३ ॥

---

१ [illegible] मिथ, [illegible], मृगशिरोऽभिरामेऽन्ये, आर्द्रा स्यैकन्ये, पुनर्वसुपुष्यौ पुष्येऽन्ये, [illegible], हस्तो मिथुनेऽन्ये, चित्रा स्यैकन्ये, स्वातिर्मिथुनेऽन्ये, विशाखा [illegible], [illegible], अषाढाद्ये [illegible], श्रवणो मिथुनेऽन्ये, धनिष्ठादे [illegible] इति ॥

[illegible] ।

पु. पु. पु. पु. पु.

बृहस्पति **बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः।**

पु. पु. पु. पु.

जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ २४ ॥

बृहस्पतिरिति—बृहतां पतिर्बृहस्पतिः, सुराणामाचार्यः सुराचार्यः, गिरां पतिः गीर्पतिः गीःपतिः गीःपतिः गीष्पतिर्वा, धृष्णोति प्रशस्ता धिषणास्येति वा धिषणः, गृणात्युपदिशतीति गुरुः, जीवयतीति जीवः, अङ्गिरसोऽपत्यमिति आङ्गिरसः, वाचः पतिः वाचस्पतिः वाक्पतिर्वा, चित्रशिखण्डिनो जातश्चित्रशिखण्डिजः इति नव बृहस्पतेः॥२४॥

पु. पु. पु. पु. पु. पु.

शुक्र, मंगल **शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः।**

पु. पु. पु. पु. पु.

अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥ २५ ॥

शुक्र इति—शोचतीति, माहेश्वरशुक्रद्वारानिर्गतत्वाद्वा शुक्रः, दैत्यानां गुरुर्दैत्यगुरुः, [illegible]तुमवश्यमारब्धातुमर्हत्वात्काव्यः, वष्टीति उशना, भृगोरपत्यं भार्गवः, कवते—कौतीति कविरिति षट् शुक्रस्य। अङ्गानि इयर्ति पीनत्वात्, अङ्गतीति वा अङ्गारः स एवाङ्गारकः, कोः पृथिव्या जातः कुजः, भूमेरपत्यं भौमः, लोहितान्यङ्गान्यस्येति लोहिताङ्गः, मह्याः सुतो महीसुत इति पञ्च मङ्गलस्य॥ २५ ॥

पु. पु. पु. पु. पु.

बुध, शनैश्चर, **रौहिणेयो बुधः सौम्यः(समौ) सौरिशनैश्चरौ।**

राहु, केतु

न. पु. पु. पु. पु.

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ॥ २६ ॥

रौहिणेय इति—रोहिण्या अपत्यमिति रौहिणेयः, बुध्यत इति बुधः, सोमस्यापत्यमिति [illegible]म्यः इति त्रीणि बुधस्य। सूरस्यार्कस्यापत्यमिति सौरिः, सूरस्यायं सौरोऽपि, शनैश्चरति पंगुत्वादिति शनैश्चरः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे शनेः। ताम्यति तमः सान्तोऽदन्तश्च, रहति गृहीत्वा त्यजति चन्द्रार्काविति राहुः, स्वराकाशे [illegible]तीति स्वर्भानुः, सिंहिकाया अपत्यमिति सैंहिकेयः, विधुं तुदतीति विधुन्तुदः इति [illegible] राहोः। चाय्यतेऽनेनेति केतुः, शिखास्त्यस्येति शिखी इति द्वे केतोः॥ २६ ॥

पु.

राशि, लग्न, **सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः।**

न.

राशीनामुदयो लग्नं (ते तु मेषवृषादयः)॥ २७ ॥

---

१ [illegible] ॥

२ [illegible] ॥

सप्तेति—मरीच्यत्रिमुखाः सप्त च ते ऋषयश्चेति सप्तर्षयः, चित्रः शिखण्डश्चूडाविशेषोऽस्त्येषामिति चित्रशिखण्डिनः चित्रशिखण्डिसंज्ञकाः स्युरिति। अश्नुवते व्याप्नुवन्ति राशयस्तेषामुदयः अलगीदिति लग्नम्, ते राशयो मेषवृषावादी येषान्ते मेषवृषाद्य प्रत्येकमेकम् ॥ २७ ॥

पु. पु. पु. पु. पु. पु.
सूर्ये सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ।
पु. पु. पु. पु. पु.
भास्कराऽहस्करब्रध्नप्रभाकरविभाकराः ॥ २८ ॥
पु. पु. पु. पु. पु.
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
पु. पु. पु. पु. पु. पु.
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥ २९ ॥
पु. पु. पु. पु. पु.
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
पु. पु. पु. पु.
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥ ३० ॥
पु. पु. पु. पु. पु. पु.
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।

सूरेति—सुवति प्रेरयति लोकमिति सूरः—शवति शूरयते वा शूरः, सरत्याकाश सुवति प्रेरयति कर्मणि लोकानिति वा सूर्यः, इयर्तीति अर्यमा, अदितेरपत्यमादि द्वादश आत्मानो मूर्तयो यस्येति द्वादशात्मा, दिवा दिनं करोतीति दिवाकरः, भाः करोतीति भास्करः, अहः करोतीति अहस्करः, तिमिरं बध्नातीति ब्रध्नः, प्रभां करो प्रभाकरः, विभां करोतीति विभाकरः, भासः सन्त्यस्येति भास्वान्, विविधं आच्छादयतीति विवो रश्मिरस्यास्तीति विवस्वान्, सप्ताश्वा यस्येति सप्ताश्वः, हतोऽश्वा यस्येति हरिदश्वः, उष्णा रश्मयोऽस्येति उष्णरश्मिः, विशेषेण कर्तन निकृन्तयति अन्धकारानिति वा विकर्तनः, अर्च्यते—अर्क्यते वा अर्कः, मृतेऽण्डे मार्तण्डः मार्ताण्डः, मेहतीति मिहिरः, ऋच्छतीति अरुणः, पुष्णाति-पूषतीति पूषा, दिवो मणिर्द्युमणिः, तरत्यनेन संसारमिति तरणिः, मेद्यतीति मित्रः, भानवोऽस्येति चित्रभानुः, विरोचते इति विरोचनः, विभैव वसु यस्येति विभा ग्रहाणां पतिर्ग्रहपतिः, त्विषांपतिः, अह्नः पतिरहर्पतिः, भातीति भानुः, हन्तीति सहस्रमंशवो यस्येति सहस्रांशुः, तपति तापयति वा तपनस्तापनो वा, सविता सूते, सुवते, रवते वा रविरिति सप्तत्रिंशत्सूर्यस्य ॥ २८ । ३० । ३

पु. पु. पु.

आसपास रहने वाले सूर्यगण सारथि मण्डल माठरः पिङ्गलो दण्ड (श्चण्डांशोः पारिपार्श्वकाः) ॥३१॥

पु. पु. पु. पु. पु.

सूर्यसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः।

पु. पु. न. न.

परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥ ३२ ॥

माठर इति—मनुते मठरस्स एव, मठतीतिमठरस्तस्यापत्यमिति वा माठरः, पिङ्गलो वर्णोऽस्यास्तीति, पिङ्गं वर्णं लातीति वा पिङ्गलः, दण्डोऽस्यास्ति, दण्डयतीति वा दण्डः इति त्रयश्चण्डांशोः सूर्यस्य पारिपार्श्वकाः पार्श्वेइति परिपार्श्वम् परि पार्श्वेवर्तन्ते पारिपार्श्विका इति सूर्यपार्श्वस्थानां माठरादित्रयाणामेकैकम्। सूर्यस्य सूतः सूर्यसूतः, अरुणो वर्णोऽस्यास्तीति अरुणः, अविद्यमानावूरू यस्येत्यनूरुः, कश्यपस्यापत्यमिति काश्यपिः, गरुडस्याग्रजो गरुडाग्रज इति पञ्च सूर्यसारथेः। परितो विष्यते विश्यते अनेन परिवेषः—परिवेशः, परितो धीयतेऽनेनेति परिधिः, उपगतं सूर्यमुपसूर्यन्तदेवो सूर्यकम्, मण्डतीति, मण्डं लातीति वा मण्डलमिति चत्वारि चन्द्रार्कयोरुत्पातादि गतमण्डलस्य ॥ ३१। ३२ ॥

पु. पु. पु. पु. पु. पु. पु.

किरण किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः।

पु. पु. पु.स. स.

भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिःस्त्रियाम् ॥ ३३ ॥

किरण इति—कीर्यत इति किरणः, वसन्ति रसा अस्मिन्निति उस्रः, मिमीते इति मयूखः, अंशयतीत्यंशुः, गच्छतीति गः ज्ञेयवर्गस्तं बभस्ति दीपयतीति गभस्तिः, घृणाति घरतीति वा घृणिः, अश्नुत इति रश्मिः, भातीति भानुः, कीर्यत इति करः, म्रियते तमोऽस्मिन्निति मरीचिः "स्त्रीपुंसयोः" स्यात्, दीधीते दीप्यत इतिदीधितिः त्रया स्त्रीत्वे स्यादित्येकादश किरणानाम् ॥ ३३ ॥

स. स. स. स. स. स. स. स. स.

प्रभा (स्युः) प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः।

न. न. पु. पु. पु.

घाम रोचिः शोचि (रुभे क्लीबे) प्रकाशो द्योत आतपः॥ ३४ ॥

स्युरिति—प्रभातीति प्रभा, रोचनं रुक्, रोचत इति रुचिः, त्वेषतीति त्विट्, भातीति भा,भाः, भासत इति भाः, छ्यति—छिनत्तीति तमो वा छविः, छवी, द्योतते अनेनेति द्युतिः, दीप्यतेऽनयेति दीप्तिः, रोचतेऽनेन रोचिः, शुच्यति पूतीभवत्यनेनेति

१ भातीति मिङ् भाश्चव्ययाभावान् पुंल्लिङ्गादिः 'भाः' विरूपावत्।

शोचिः उभे क्लीबे स्यातामित्येकादश प्रभायाः । प्रकाशनं प्रकाशः, द्योतनं द्योत, आतपतीत्यातप इति त्रीण्यातपस्य ॥ ३४ ॥

न. न. न. न.

थोड़ागर्म **कोष्णं कवोष्णं मन्दोष्णं कदुष्णं (त्रिषु तद्वति)।**

न. न. न. स. स.

बड़ागर्म मृगतृष्णा **तिग्मं तीक्ष्णं खरं(तद्वन्)मृगतृष्णा मरीचिका ॥ ३५॥**

इति दिग्वर्गः ॥

कोष्णमिति—ईषदुष्णं कोष्णम्, कवोष्णम्, मन्दं च तदुष्णं च मन्दोष्णम् ईषदुष्णं कदुष्णम् एते गुणे क्लीबाः, तद्वति गुणवति त्रिषु त्रिलिङ्गेषु भवन्तीति चत्वारि दुष्णस्य। तेजयतीति तिग्मम्—तीक्ष्णं वा खमिन्द्रियं रात्यभिभवतीति खरम् गुणे क्लीवम्, तद्वति त्रिपु यथा तीक्ष्णोऽसिः, तीक्ष्णा गदा, तीक्ष्णं चक्रमिति—त्रीणि उष्णस्य । मृगाणां तृष्णास्यामिति मृगतृष्णा, मरीचिरिव मरीचिकेति द्वे तृष्णायाः ॥ ३५ ॥

इति दिग्वर्गविवरणम् ।

अथ कालवर्गो व्याख्यायते ॥

पु. पु. पु. पु. स.

समय, **कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ।**

स.

पहली तिथि तिथियां **प्रतिपद् (द्वे इमे स्त्रीत्वे) तदाद्यास्तिथयो द्वयोः ॥ १**

काल इति—कालयति सर्वं कल्यते वा कालः, दिशतीति दिष्टः, नाहन्तिनाह वा अनेहाः, सम्यगेति समयः स्यादिति चत्वारि सामान्यकालस्य । अथेति प मूलं पक्षतिः, प्रतिपद्यते उपक्रम्यतेऽनयेति प्रतिपद् इमे द्वे स्त्रीत्वे स्याताम् प्रतिपत्तिथेः । तदाद्येति सा प्रतिपद् आद्या यासां ताः अतन्तीति तिथयः स्त्रीपुंसयोः स्युरित्येकं सामान्यतिथेः ॥ १ ॥

पु. न. न. पु. न. पु. न.

दिन प्रभात प्रातःकाल **घस्रो दिनाहनी (वा) तु (क्लीबे)दिवसवासरौ ।**

पु. न. न. न. न.

प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी (अपि) ॥ २॥

न. पु.न.अ. स. स.

प्रभातं च दिनान्ते तु सायः सन्ध्या पितृप्रसूः ।

घस्र इति—घसत्यन्धकारमिति घस्रः, दीयते अंशं भवतीति, द्यति तमो निद्य... ति दीनं वा दिनम्, न जहातीति अहः, दीव्यन्त्यत्रेति दिवसः, वासयतीति व

उभौ तु वा क्लीवे स्यातामिति पञ्च दिनस्य। प्रत्यूष इति—प्रत्यूषति रुजति कामुकानिति प्रत्यूषः, अह्नो मुखमित्यहर्मुखम्, कलयति चेष्टामिति कल्यं काल्यं वा, ओषत्यन्धकारमित्युषः, प्रत्योषतीति प्रत्युषः, भातुं प्रवृत्तमिति प्रभातमिति षट् प्रभातस्य। दिनस्यान्तो दिनान्तस्तस्मिन्दिनान्ते तु स्यति समापयति दिनमिति सायः,सायं मान्तमव्ययं त्वव्ययवर्गे वक्ष्यत्येकं दिनान्तस्य। संध्यायन्ति जनाः परब्रह्मास्यामिति संध्या, निर्यकारोपि संधीयतेऽनु सन्धीयतेऽस्यामिति सन्धा, पितॄन्प्रसूते इति पितृप्रसूरिति द्वे संध्यायाः॥ २। ३॥

पु. पु. पु. स.
दिनके भाग **प्राह्णापराह्णमध्याह्नास्(त्रिसन्ध्य)मथ शर्वरी ॥ ३ ॥**
स. स. स. स. स. स.
रात्रि **निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।**
स. स स. स. स.
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥ ४ ॥

प्राह्णेति—प्रथमं च तदहश्चेति प्राह्णः, अह्नोऽपरम्—अपराह्णः, अह्नो मध्यं मध्यं च तदहश्चेति वा मध्याह्नः, तिसृणां संध्यानां समाहारस्त्रिसन्ध्यम्—त्रिसन्ध्या वेत्येकं दिनाद्यन्तमध्यानाम्। अथेति—शृणाति चेष्टा इति शर्वरी, शार्वरी वा नितरां श्यति तनूकरोति व्यापारानिति निशा, निशीथोऽस्त्यस्यामिति निशीथिनी, राति ददाति सुखमिति रात्रिः,रात्रीत्यपि, त्रयो यामा यस्या इति त्रियामा, क्षणमुत्सवं निर्व्यापारस्थितिं वा ददातीति क्षणदा, क्षपयति चेष्टामिति क्षपा, विभाति नक्षत्रादिभिरिति विभावरी, तमोऽस्त्यस्यामिति तमस्विनी, रजन्त्यनुरक्ता भवन्ति रागिणोऽस्यामिति रजनी, निन्दिता यामा यस्या इति यामिनी, ताम्यन्त्यस्यामिति तमी, तमिः, तमा वेति द्वादश रात्रेः॥ ३। ४॥

अँधेरी राति स. स. स.
चांदनी राति **तमिस्रा तामसी रात्रिर्ज्यौत्स्नी (चन्द्रिकयान्विता)**
पूर्व व पर दिन स.
संयुत राति **(आगामिवर्तमानाहर्युक्तायां निशि) पक्षिणी ॥ ५ ॥**

तमिस्रेति—तामसी महान्धकारवती रात्रिः तमोबहुलमस्त्यस्यामिति तमिस्रेति कथ्यत इत्येकमत्यन्धकाररात्रेः। चन्द्रिकयान्विता या रात्रिः सा ज्यौत्स्नीति भण्यते इत्येकं ज्योत्स्नावद्रात्रेः। आगामिवर्तमाने अहनीयुक्ते यस्यामिति तस्या निशि पूर्वापरदिने पक्षाविव स्तो यस्यामिति पक्षिणी स्यादित्येकं दिनद्वयमध्यगतरात्रेः॥ ५॥

न. पु. न.
आधीरात प्रदोष **गणरात्रं(निशाबह्व्यः) प्रदोषो रजनीमुखम्।**
पु. पु. पु. पु.
आधी रात पहर **अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ(समौ) ॥ ६ ॥**

गणेति—बह्व्यो निशा, गणानां बह्वीनां रात्रीणां समाहारो गणरात्रमित्येकं रात्रिसमुदायस्य । दुष्यतीति दोषा प्रारब्धा दोषा यस्मिन्निति प्रदोषः, रजन्यामुखमिव रजनीमुखमिति द्वे रात्रिप्रारम्भस्य । अर्धं रात्रेरित्यर्धरात्रः, नितरां शेरतेऽस्मिन्निति निशीथः इमौ द्वौ समौ समानार्थौ समानलिङ्गाविति द्वे रात्रिमध्यस्य । यातीति यामः, प्रह्रियते ढक्कादिरस्मिन्निति प्रहरः इमौ द्वौ समाविति द्वे प्रहरस्य ॥ ६ ॥

पर्व सन्धि अमाव पूर्णिमा पूर्णमासी

(स)पर्वसन्धिः(प्रतिपत्पञ्चदश्योर्यदन्तरम्) ।
पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी(तु)पूर्णिमा ॥ ७ ॥

स इति—प्रतिपत्पञ्चदश्योर्यदन्तरं स सन्धिः स एव पर्व अपि पर्वसन्धिर्वेत्येकं पर्वसन्धेः । द्वे पञ्चदश्यौ पूर्णिमामावास्ये, पक्षस्यान्तौ पक्षान्तावित्येकं नाम पूर्णिमामावास्ययोः । पूर्णो मासो यस्यामिति पूर्णमासा सा एव पौर्णमासी, माश्चन्द्रः पूर्णो माः पूर्णमास्तस्येयं पौर्णमासीति वा पूर्ण- चन्द्रस्य पूरणं तेन निर्वृत्ता पूर्णिमेति द्वे पूर्णिमायाः ॥ ७ ॥

कलाहीन पूर्णिमा कला सहित पूर्णिमा अमावास्या

(कलाहीने)सानुमतिः (पूर्णे) राकानिशाकरे ।
अमावास्या त्वमावस्या दर्शःसूर्येन्दुसंगमः ॥ ८ ॥

कलेति—उदयकाले प्रतिपद्योगात्कलाहीने निशाकरे चन्द्रे सति सा पूर्णिमा अनुमन्यते अनुमतिरित्येकं कलाहीनपूर्णिमायाः । पूर्णे निशाकरे सति सैव पूर्णिमा राति शुभमिति राकेत्येकं कलासमेतपूर्णिमायाः । अमा सह वसतश्चन्द्रार्कावस्यामिति अमावास्या, अमावस्या, अमावासी, अमावसी, अमामासी, अमामसी, अमा—दर्शनात्स्रंसते इति दर्शः, सूर्येन्दू संगच्छतोऽस्मिन्निति सूर्येन्दुसंगम इति चत्वारि दर्शस्य ॥ ८ ॥

[illegible]

(सादृष्टेन्दुः) सिनीवाली (सानष्टेन्दुकला) कुहूः
उपरागो ग्रहो(राहुग्रस्ते त्विन्दौ च पूष्णि च) ॥ ९ ॥
सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः ।

---

१ [illegible] अमावास्या है उसे कुहू कहते हैं [illegible]

सेति—दृष्टेन्दुश्चतुर्दशीयोगाद्दृष्टचन्द्रा सती सा अमा एन विष्णुना सह वर्तते सा लक्ष्मीरस्त्यस्या इति सिनी चन्द्रकला तां वलति धारयतीति सिनीवालीति भण्यते, नष्टेन्दुकला उदये अमायोगान्नष्टचन्द्रकला सा अमा कुहयतीति कुहूः, कुहुरपि इति द्वे अमाविशेषस्य । राहुग्रस्ते इन्दौ चन्द्रे पूष्णि सूर्ये च सति उपरज्यतेऽनेनेति उपरागः, ग्रहणं ग्रहः, उपप्लवेन सह वर्तमानः सोपप्लवः, उपरज्यते स्म उपरक्तः इमौ द्वावपीति चत्वारि ग्रहणस्य । अग्नेरुत्पतनमग्न्युत्पातः, उप आसन्नमाहितं फलं यस्येति उपाहितः इति द्वे आकाशादिष्वग्निविकारस्य ॥ ९ । ३ ॥

एकत्र स्थित चन्द्र सूर्य — पु.

(एकयोक्त्या) पुष्पवन्तौ (दिवाकरनिशाकरौ) ॥१०॥

एकयेति—एकया उक्त्या साधारणवचनेन दिवाकरनिशाकरौ रविशशिनौ पुष्प्यते पुष्पो विकासोऽस्ति ययोस्तौ पुष्पवन्तौ पुष्पस्यावन्ताविति वा स्याताम् अकारान्तोपि पुष्पवन्तशब्दो ज्ञेयः । तथा च पुष्पदन्तोपि इत्येकमेकत्रस्थितचन्द्रसूर्ययोः ॥ १० ॥

काष्ठा कला — स. स.

(अष्टादश निमेषास्तु) काष्ठा 'त्रिंशत्तु ताः' कला ।

क्षण मुहूर्त — पु. पु.न.

(तास्तु) त्रिंशत्क्षणस्ते तु मुहूर्तो (द्वादशास्त्रियाम्) ॥११॥

अष्टादशेति—अष्टभिरधिका दश अष्टादशनिमेषाः "क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयमित्यादिशास्त्रसिद्धाः" मिलित्वा काशत इति काष्ठा स्यादित्येकं काष्ठायाः । तास्त्रिंशत् काष्ठा मिलित्वा कलयतीति कला स्यादित्येकं कलायाः । तास्त्रिंशत् कला मिलित्वा क्षणोतीति क्षणः स्यादित्येकं क्षणस्य । ते तु क्षणा द्वादश मिलित्वा हूर्च्छतीति मुहूर्तोऽस्त्रियां पुन्नपुंकं स्यादित्येकं मुहूर्तस्य ॥ ११ ॥

दिनरात पक्ष — पु.न. पु.

ते तु त्रिंशदहोरात्रः पक्ष (स्ते दशपञ्च च) ।

पक्षभेद मास — पु. पु. पु.

पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ ॥ १२ ॥

ते त्विति—ते तु त्रिंशन्मुहूर्ताः अहश्च रात्रिश्चानयोः समाहारः—अहोरात्रः स्यादित्येकमहोरात्रस्य । ते दशपञ्च चाहोरात्राः पक्ष्यन्ते इति पक्षः स्यादित्येकं पक्षस्य । शुक्लकृष्णौ पूर्वापरौ पक्षौ स्याताम् शुक्लपक्षः पूर्वसंज्ञः, कृष्णपक्षोऽपरसंज्ञः स्यादिति निर्णीतम् । तावुभौ पक्षौ मस्यतेऽनेनेति मासः स्यादित्येकं मासस्य ॥ १२ ॥

---

१ [illegible]

पु. न.

ऋतु (द्वौ द्वौ मार्गादिमासौ)स्यादृतुस्तैरयनं (त्रिभिः)।

आधा वर्ष १ पु.

वर्ष (अयने द्वे)(गतिरुदग्दक्षिणार्कस्य) वत्सरः ॥ १३ ॥

द्वाविति—मार्गादी द्वौ द्वौ मासौ इयर्ति ऋच्छति वा 'ऋतुः' स्यात्स च हेमन्तादि माघादीत्यपिपाठः माघाद्युपक्रमस्तु अयनारम्भवशाज्ज्ञातव्य इत्येकमृतोः। तैः ऋतुभिः अयतेऽर्कोऽनेनेति अयनं स्यादित्येकमयनस्य तद्द्विधा सूर्यगतिभेदात्। सूर्यस्य उदक् उत्तरागतिः दक्षिणागतिश्च स्यात् द्वे अयने वसन्त्यस्मिन्निति वत्सर दित्येकं वत्सरस्य ॥ १३ ॥

न. न.

समरात्रिदिन (समरात्रिंदिवेकाले) विषुवद्विषुवं (च तत्)।

समरात्रिमिति—रात्रिश्च दिवा च रात्रिंदिवं तत्समं यस्मिन् तादृशे काले तुल्यवच्छिन्ने विषु साम्यं तदस्यास्तीति विषुवत्, विषुवम्, विषु वातीति वा विषु नगमनं विष्वक् तदस्यास्तीति विषुणोऽपि इति द्वे समरात्रिंदिवकालस्य ॥

पु. पु. पु. पु.

अगहन मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ॥ १४ ॥

मार्गेति—मृगशिरसा युक्ता पौर्णमासी मार्गशीर्षी सास्मिन्नस्तीति मार्गशीर्षस्तस्मिन्, सहते सहाः सहश्च, मृगेण युक्ता पौर्णमासी मार्गी सास्मिन्निति मार्गः, सः आग्रहायण्या युक्ता पौर्णमास्यस्मिन्निति आग्रहायणिकश्चेति चत्वारि मार्गमासस्य ॥ १४ ॥

पु. पु. पु. पु. पु. पु.

पूस माघ पौषे तैषसहस्यौ (द्वौ) तपा माघे (ऽथ) फाल्गुने।

फागुन, चैत, पु. पु. पु पु. पु.

स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको मधुः ॥ १५ ॥

पौषेति—पुष्येण युक्ता पौर्णमास्यस्मिन्निति पौषस्तस्मिन्, तिष्येण युक्ता पौर्णमास्यस्मिन्निति तैषः, सहसि बले साधुः सहस्यः उभौ द्वौ स्यातामिति त्रीणि पौषमासस्य। मघया युक्ता पौर्णमास्यस्मिन्निति माघस्तस्मिन्, तपतीति तपाः तपश्च स्यादिति द्वे माघमासस्य। अथेति—फलानि निष्पादयति फल्गुनस्स एव फाल्गुनस्तस्मिन्, तपसि माघे भवस्तपस्यः, फल्गुनीभिर्युक्ता पौर्णमास्यस्मिन्नस्तीति फाल्गुनिकः स्यादिति त्रीणि फाल्गुनमासस्य। चित्रया युक्ता पौर्णमास्यस्मिन्नस्तीति चैत्रस्तस्मिन्, चित्रया युक्ता पौर्णमासी [illegible] चैत्रिकः, मन्यते [illegible] इति त्रीणि चैत्रमासस्य ॥ १५ ॥

[illegible] तु भाद्रपद—अयनं तु न [illegible]

पु. पु. पु. पु. पु. पु.

वैशाख **वैशाखे माधवो राधो ज्यैष्ठे शुक्रश्शुचि (स्त्वयम्) ।**

ज्येष्ठ पु. पु. पु. पु.

आषाढ़ **आषाढे श्रावणे तु स्यान्नभाः श्रावणिकश्च (सः) ॥१६॥**

सावन

वैशाख इति—विशाखया युक्ता पौर्णमास्यस्मिन्नस्तीति वैशाखस्तस्मिन्, मधुमकरन्दः सोस्मिन्नस्तीति माधवः, राधाविशाखातद्वती पौर्णमासी राधी सास्मिन्नस्तीति राधः इति त्रीणि वैशाखमासस्य। ज्येष्ठयायुक्ता पौर्णमास्यस्मिन्नस्तीति ज्यैष्ठः,ज्येष्ठोपि तस्मिन्, विरहिणः शोचन्त्यस्मिन्निति शुक्र इति द्वे ज्येष्ठमासस्य । शोचन्ति विरहिणोऽस्मिन्निति शुचिः, अयमिति शुचेः पुंस्त्वाभिव्यक्त्यर्थम्, अषाढया युक्ता पौर्णमास्यस्मिन्नित्याषाढः, आषाढाभिराख्यात इति विग्रहे तु अषाढकोपीति द्वे आषाढमासस्य । श्रवणेन युक्ता पौर्णमास्यस्मिन्नस्तीति श्रावणस्तस्मिन्, विरहिणो नभ्यति—नभ्नाति—नभते वा नभाः सः श्रवणवती पौर्णमास्यस्मिन्नस्तीति श्रावणिकश्च स्यादिति त्रीणि श्रावणमासस्य॥ १६ ॥

पु. पु. पु. पु.

भादों, **स्युर्नभस्यप्रोष्ठपदभाद्रभाद्रपदाः (समाः) ।**

कुआर, पु. पु. पु. पु.

कातिक **स्यादाश्विनइषोप्याश्वयुजोपि स्यात्तु कार्त्तिकः ॥ १७ ॥**

स्युरिति—नभा अभ्रं तत्र साधुर्नभस्यः, प्रोष्ठपदाभिर्युक्ता पौर्णमास्यस्मिन्नस्तीति प्रोष्ठपदः, भद्राभिर्युक्ता पौर्णमास्यस्मिन्निति भाद्रः, भद्रपदाभिर्युक्ता पौर्णमास्यस्मिन्नस्तीति-भाद्रपदश्चैते समाः समानार्थाः समानलिङ्गकाश्चेति चत्वारि भाद्रपदमासस्य । स्यादिति—अश्विन्या युक्ता पौर्णमास्यस्मिन्नस्तीति आश्विनः, एषणमिट् यात्रा सास्मिन्मासे जिगीषूणामस्तीति इषः, अश्वयुजा युक्ता पौर्णमास्यस्मिन्नस्तीति आश्वयुजः अश्वयुजोपीति त्रीणि आश्विनमासस्य ॥ १७ ॥

पु. पु. पु. पु. पु.न.

हेमन्त **बाहुलोर्जौ कार्त्तिकिको हेमन्तः शिशिरोऽस्त्रियाम् ।**

शिशिर पु. पु. पु. पु. पु.

बसंत **वसन्ते पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः ॥ १८ ॥**

पु. पु. पु. पु. पु.

ग्रीष्म **निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ।**

[illegible]ति—कृत्तिकाभिर्युक्ता पौर्णमास्यस्मिन्नस्तीति कार्त्तिकः, बहुलाः कृत्तिका[illegible] [illegible] पौर्ण[illegible] [illegible] बाहुलः, ऊर्जयन्त्युत्साहयति जिगीषूनिति ऊर्जः, कृत्ति[illegible]

पौर्णमास्यस्मिन्निति कार्त्तिकिक इति चत्वारि कार्त्तिकमासस्य । हन्तीति हेमन्तः, हिनोति वर्धयति बलमिति हेमापि इति मार्गपौषाभ्यां निष्पन्नस्य ऋतोरेकम् । शशन्ति धावन्ति पथिका यस्मिन्निति शिशिर अस्त्रियामित्येकं माघफाल्गुनाभ्यामृतोः । वसन्ति मदनोत्सवा यत्रेति वसन्तस्तस्मिन् , पुष्पाणां समयः पुष्पसमयः, सुष्ठु रभन्ते रभसयुक्ता भवन्त्यत्रेति सुरभिरिति त्रीणि चैत्रवैशाखाभ्यामृतोः । ग्रसते रसानिति ग्रीष्मः, ऊष्माणं सृजतीति ऊष्मा स एव ऊष्मकः, नितरां दह्यतेऽत्रेति निदाघः, उष्णमुपगममत्रेति उष्णोपगमः, ओषतीति उष्णः, ऊष्मा तप आगमोऽत्रेति उष्मागमः, तपतीति तप इति सप्त ज्येष्ठाषाढाभ्यामृतोः ॥ १८ । ३ ॥

स. स.

वर्षा **स्त्रियां प्रावृट् (स्त्रियां भूम्नि) वर्षा (अथ) शरत्स्त्रियाम् ॥ १९ ॥**

पु.

शरत् **(षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात्)**

स्त्रियामिति—वर्षणां वृट् प्रकृष्टा वृडत्रेति प्रावृट् स्त्रियां स्यात् प्रावृषापि, वर्षं वर्षणमत्रास्तीति वर्षा स्त्रियां स्त्रीत्वे भूम्नि बहुत्वे स्यात्तेन नित्यबहुवचनान्तो ज्ञेयः इति द्वे श्रावणभाद्राभ्यामृतोः । अथेति शीर्यन्ते पाकेनौषधयोऽस्यामिति शरत् , (द्) स्त्रियां स्यात् शरदा चेत्येकमाश्विनकार्त्तिकाभ्यामृतोः । अमी हेमन्तादयः षट् ऋच्छन्तीति ऋतवः पुंसि पुंस्त्वे भवन्ति ते च मार्गादीनां मार्गशीर्षादिमासानां युगैः युगलैः क्रमादवगन्तव्या इति हेमन्तादीनां षणामेकम् ॥ १९ । ३ ॥

पु. पु. पु. पु. न. स. स.

वर्ष या साल **संवत्सरो वत्सरोऽब्दो हायनो (ऽस्त्री) शरत्समाः ॥ २० ॥**

संवत्सर इति—संवसन्त्यृतवोऽत्रेति संवत्सरः, वसन्त्यृतवोऽत्रेति वत्सरः, आप्यत इति अब्दः, भावाञ्जहाति, जिहीते वा हायनः 'अस्त्री' स्त्रीत्वे न स्यात् , शृणातीति शरत् स्त्रियां स्यात , समन्ति विक्लवं कुर्वन्ति सर्वमिति—समान्ति सह वर्तन्ते ऋतवोऽस्यामिति समाः प्रायेणायं बहुवचनान्तः क्वचिदेकवचनान्तोपीति षट् संवत्सरस्य ॥ २० ॥

पु. पु. पु.

पितृदिन देवदिन **(मासेन स्या) दहोरात्रः पैत्रो (वर्षेण) दैवतः ।**

पु. पु.

ब्रह्मा दिन कल्प **(दैवे युगसहस्रे द्वे) ब्राह्मः कल्पौ तु (तौ नृणाम्) ॥ २१ ॥**

१ [illegible] मार्गशीर्षादि [illegible] मासौ ऋतुर्मत ।

२ [illegible] चतुर्युगम् । प्रोक्तो [illegible] दिनपुच्यत इति [illegible] । [illegible] देववर्षैः ४८०० [illegible] ३६० [illegible] १७२८००० [illegible] ३६०० मानुषैः १२९६००० [illegible] २४०० [illegible] ८६४००० चतुर्युग दिव्यैः १२००० [illegible] ४३२०००००० [illegible]

मासेनेति—मासेन नृणां मासेन पितृणामयं पैत्रः अहोरात्रः स्यात् । तत्र कृष्णपक्षो दिनम् , शुक्लपक्षो रात्रिरित्येकं पैत्रदिनस्य । वर्षेणेति, नृणां वर्षेण देवतानामयं दैवतो ऽहोरात्रः, तत्रोत्तरायणं दिनं, दक्षिणायनं रात्रिरित्येकं दैवतदिनस्य । दैव इति- दैवे द्वे युगसहस्रे देवानां युगसहस्रद्वयेन ब्रह्मणोऽयं ब्राह्मोऽहोरात्र इत्येकं ब्रह्मणो दिनस्य । ये दैवेयुगसहस्रे तौ नृणां मनुष्याणां कल्पयतः स्थिति प्रलयं चेति कल्पावित्येकं कल्पस्य ॥ २१ ॥

न.
मन्वन्तरन्तु(दिव्यानां युगानामेकसप्ततिः)।[1]
पु. पु. पु. पु. पु.
संवर्तः प्रलयः कल्पः क्षयः कल्पान्त(इत्यपि) ॥ २२ ॥

मन्वन्तरमिति—दिव्यानां युगानां एकाधिका सप्ततिः मनोरन्तरमवकाश इति मन्वन्तरमित्येकं मन्वन्तरस्य । संवर्त इति—संवर्तते जगदत्रेति संवर्तः, प्रलीयतेऽत्रेति प्रलयः, कल्प्यन्ते क्षीयन्तेऽत्रेति कल्पः, क्षीयन्ते प्राणिनोऽत्रेति क्षयः, कल्पस्यान्तोऽवधिरिति कल्पान्तोपीति पञ्च प्रलयस्य ॥ २२ ॥

पु.न. पु. न. न. न.
(अस्त्री)पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम् ।
न. न. न. न. न. न. न.
कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम् ॥ २३ ॥

अस्त्रीति—पच्यते दुःखमनेन—पच्यतीति वा पङ्कं अस्त्री स्यात्, आप्नोति व्याप्नोति लोकानिति पाप्मा पुमान्स्यात्, पान्त्यस्मादात्मानम्—पिबति भक्षयति कर्तारमिति वा पापम्, केलयति क्रीडयति विषयेष्विति किल्बिषम्, शुभं कर्म स्यति समाप्तं करोतीति कल्मषम्, कलयति वशीकरोतीति कलुषम्, वृज्यत इति वृजिनम्; यन्त्यधोऽनेन—एति गच्छति प्रायश्चित्तेनेति वा एनः, अङ्घते गच्छति दानादिनेत्यघः, अमति—अंहतीति वा अंहः, दुष्टमितं गमनमनेनेति दुरितम्, दुष्टं कृतं करणमनेनेति दुष्कृतमिति द्वादश पापस्य ॥ २३ ॥

पु न. न. न. न. पु.
स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।
न. स. पु. पु. पु. पु. पु
मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसंमदाः ॥ २४ ॥
पु. पु. न. न. न.
स्यादानन्दथुरानन्दः शर्मशातसुखानि (च)।

---

[1] [illegible] १०८८४१६८८ वर्षाणि, ६ मासाः, २५ दिनानि, ४२ घटिकाः, [illegible] ॥

स्यादिति—धरति विश्वमिति, ध्रियते जनैरिति वा धर्मम् अस्त्रियां पुन्नपुंसक स्यात्, पुनाति, पुणातीति पुण्यमर्हति तत्र साधुर्वेति पुण्यम्, अतिशयेन प्रशस्यमिति श्रेयः, सुष्ठुकृतमिति सुकृतम्, वर्षति फलमिति वृष इति पञ्च धर्मस्य। मुदिति—मोदनं मुत्, प्रीतिः, प्रमदनं प्रमदः, हर्षणं हर्षः, प्रमोदनं प्रमोदः, आमोदनमामोदः, संमदनं संमदः, आनन्दनमानन्दथुः, आनन्दनमानन्दः, शृणातीति शर्म, श्यति दुःखमिति शातम्, सातयतीति सातं वा सुखयतीति सुखमिति द्वादश सुखस्य हर्षस्य वा ॥ २४ । ३ ॥

न. न. न. न. न. न.

कल्याण श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥ २५ ॥

न. न. न. न. पु.न.

भावुकं भविकं भव्यं कुशलं क्षेम (मस्त्रियाम्) ।

न.

शस्तं (चाथ त्रिषु द्रव्ये)पापं पुण्यं सुखादि (च) ॥

श्वःश्रेयसमिति—श्व आगामि श्रेयोऽत्रेति श्वःश्रेयसम्, श्वोवसीयमपि शेते नेति शिवम्, भन्दत इति भद्रं—भन्द्रं वा, कल्यं नीरुजत्वमाणयति—कल्ये प्रातः कण्यते वा कल्याणम्, मङ्गतीति मङ्गलम्, शोभते—शु पूजितं भातीति वा, शुभम्, भवनशीलं भावुकम्, भवोभद्रादिरत्रास्तीति भविकम्, भवतीति भवत्यनेनेति वा भव्यम्, कुत्सितं शलते संवृणोतीति कुशलम्—कुसलं—कुषलम् वा क्षयत्यशुभमिति क्षेम, मस्त्रियां स्यात्, शस्यते स्मेति शस्तमिति द्वादश कल्याणमात्रस्य। अथेति पापं पुण्यं पापपुण्यशब्दौ सुखादि च शस्तान्तं शब्दजातं द्रव्ये वर्तमानं त्रिषु त्रिलिङ्गं बोध्यम् ॥ २५ । २६ ॥

स. स. पु.न. पु. पु.

श्रद्धा या प्रशस्त शुभभाग्य मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।

पु.

प्रशस्तवाचकान्यमून्ययः (शुभावहो विधिः) ॥ २७ ॥

मतल्लिकेति—मतं मतिमल्लतीति मतल्लिका, मं शम्भुं चर्चतीति मचर्चिका, प्रकृष्टं काण्डमवसरो यस्यास्य, प्रगतः काण्डो धर्मोऽस्मादिति वा प्रकाण्डः, उद्धन्तीति उद्धः, तल्लनीति [illegible] अमूनि प्रशस्तवाचकानि यथा प्रशस्तः पुरुषः=पुरुषमतल्लिका, ब्राह्मणमचर्चिका, गोप्रकाण्डम, मनुष्योद्धः, कुमारीतल्लज इत्यादयो [illegible] मतल्लिकादीनां [illegible] प्रशंसावचनैश्चेति कृष्णसर्पवाप्यश्वादिवदेते [illegible] समासाः [illegible] पञ्च प्रशस्तस्य। शुभावहः शुभप्रापकः विधिर्भाग्यं [illegible] [illegible] शुभभाग्यस्य ॥ २८ ॥

[illegible]

पु.मं. पु.न. पु.न. पु.न. स. पु

भाग्य **दैवं दिष्टं भागधेयं भाग्यं (स्त्री) नियतिर्विधिः ।**

न. न. न

कारण, आदिकारण **हेतु (र्ना) कारणं बीजं (निदानं) त्वादिकारणम् ॥ २८ ॥**

दैवमिति—देवादागतं दैवम्, दिश्यतेऽस्मेति दिष्टम्, भाग एव भागधेयम्, भज्यत इति भाग्यम्, नियच्छति—नियम्यतेऽनयेति वा नियतिः स्त्री स्यात्, विधीयतेऽनेनेति विधिरिति षट् प्राक्तनशुभाशुभकर्मणः। हिनोति व्याप्नोति कार्यमिति हेतुः ना पुंलिङ्गः स्यात्, कार्यतेऽनेनेति कारणम्, विशेषेण जायतेऽनेन, वीयते वीर्विय संवृतं जायते नयतीति, विशेषेण एः कामादिना वा जायते, विशिष्टा ई लक्ष्मीर्जायतेऽस्मादिति, जतीति वा बीजं ववयोरभेदाद्वीजमपीति त्रीणि कारणस्य। नितरां दीयतेऽसाधारण्या जन्यतेऽनेनेति निदानम्, आदिर्मुख्यं कारणमित्यादिकारणमिति द्वे मुख्यकारणस्य ॥ २८ ॥

पु. पु. पु. न. स.

चैतन्यपुरुष, प्रकृति **क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः(स्त्रियाम्) ।**

स. न. न. न.

अवस्था गुण **(विशेषःकालिको)वस्था(गुणाः)सत्त्वं रजस्तमः ॥ २९ ॥**

क्षेत्रज्ञ इति—क्षीयत इति क्षेत्रं शरीरं तज्जानातीति क्षेत्रज्ञः, अतति सततं व्याप्नोतीत्यात्मा, पुरति—पूरयतीति वा पुरुषः पूरुष इति त्रीण्यात्मनः। प्रधत्ते सर्वमत्रेति—प्रधत्ते सर्वमात्मनि—प्रकृष्टं धानमनेन वा प्रधानम्, प्रकृष्टाकृतिः प्रकुरुते वा प्रकृतिस्त्रियां स्यादिति द्वे सत्त्वादिगुणसाम्यावस्थायाः। कालेन निर्वृत्तः कालकृतो धर्मो यौवनादिर्विशेषः अवस्थीयते अवस्थानं वा अवस्थेत्येकमवस्थायाः। सीदन्ति गुणादयोऽस्मिन्निति सतोभावो वा सत्त्वम्, रञ्जयतीति रजः, ताम्यत्यनेनेति तमः अदन्तोपि गुणाः स्युरिति त्रयाणामप्येकैकम् ॥ २९ ॥

न. न. न. स. स. पु.

जन्म **जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।**

पु. पु. पु. पु. पु. पु.

जीवधारी **प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ ३० ॥**

जनुरिति—जननं जनुः, जन्यते जननम्, जायते इति जन्म अदन्तो वा जननं जनिः, उत्पत्तिरुत्पत्तिः उद्भवनमुद्भव इति षट् जननस्य। प्राणाः सन्त्यस्येति प्राणी, चेतति चेतयते वा चेतनः, जन्मोऽस्यास्तीति जन्मी, जायत इति जन्तुः, जायत इति जन्युः शरीरमस्यास्तीति शरीरी इति षट् प्राणिनः ॥ ३० ॥

स. न. न. स. स.

जाति व्यक्ति — जातिर्जातं च सामान्यं व्यक्तिस्तु पृथगात्मता ।

न. न. न. न. न. न. न.

मन — चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ ॥

इति कालवर्गः ॥

जातिरिति—जायत इति जातिः, जायत इति जातम्, समानानां भावः सामान्यमिति त्रीणि घटत्वादिजातेः । व्यनक्ति व्यज्यतेऽनयेति वा व्यक्तिः, पृथगात्मा यस्य तस्य भावः पृथगात्मतेति द्वे घटादिव्यक्तेः स्वरूपस्य वा । चित्यते स्म चेतनं वा चित्तम्, चेतयत्यनेनेति चेतः, ह्रियते विषयैः, हरत्याहरति विषयानिति वा हृदयम्, स्वन्यते स्मेति स्वान्तम्, हरतीति हृत्, द्व, मन्यतेऽनेन मनस्तदेव मानसम् तदभावे मनः अर्थवदित्यमित्येके तदा 'मनाः' इत्यपीति सप्त मनसः ॥ ३१ ॥

इति कालवर्गविवरणम् ॥

अथ धीवर्गो व्याख्यायते ॥

म. स. स. स. स. स. स.

बुद्धि या ज्ञान — बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।

स. स. स. स. स. स. स.

प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥

बुद्धिरिति—बुध्यतेऽनया, बोधनं वा बुद्धिः, ईषणमीषा मनस ईषेति मनीषा, धृष्णोत्यनयेति धिषणा, ध्यायत्यनया, ध्यानं वेति धीः, प्रज्ञायतेऽनया प्रज्ञानं वेति प्रज्ञा, शेते मोहो[illegible]न्तं मुष्णातीति शेमुषी, मन्यतेऽनया, मननं वेति मतिः, प्रकृष्टमीक्षणं प्रेक्षा, उपलम्भनमुपलभ्यतेऽनयेति वा उपलब्धिः, चेतनं चित्, संवेदनं संवित्, प्रतिपदनं प्रतिपद्यतेऽनयेति वा प्रतिपत्, ज्ञपयत्यनयेति ज्ञप्तिः, चेतयति, चेतनमिति वा चेतना इति चतुर्दश बुद्धेः ॥ १ ॥

स. पु.

मेधा भावना — (धीर्धारणावती) मेधा संकल्पः (कर्म मानसम्) ।

पु. प. स. स. स.

[illegible] विचार — चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा ॥ २

धीरिति—धारणावती धारणाशक्तियुक्ता धीः बुद्धिः मेधते संगच्छते सर्वमिति मेधा [illegible] धारणात्मकबुद्धेः । मानसं कर्म इदमहं कुर्यामिति मनसः [illegible] संकल्पनं संकल्पः इत्यादिरूपं मनोव्यापारस्य । चित्तस्य मनसः आभोगः [illegible] पूर्णता वा चित्ताभोगः, करणं कारो मनसः कारो मनस्[illegible]

[illegible] ॥

इति द्वे मनसः सुखादौ तत्परत्वस्य। चर्चनं चर्चा, संख्यानं संख्या, विचारणमिति विचारणा इति त्रीणि विचारस्य ॥ २ ॥

पु. पु. पु. स. पु.

तर्क — **अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः।**

संदेह — पु. पु. पु. पु.

निश्चय — **संदेहद्वापरौ चाथ (समौ) निर्णयनिश्चयौ ॥ ३ ॥**

अध्याहार इति—अध्याहरणमध्याहारः, तर्कणमपूर्वोत्प्रेक्षणं तर्कः, ऊहनमूह इति त्रीणि तर्कस्य। विचिकित्सनं विचिकित्सा, संशयनं संशयः, संदेहनं संदेहः द्वौ परौ प्रकारौ यस्येति द्वापर इति चत्वारि विरुद्धानेककोट्यवगाहिज्ञानस्य। अथेति निर्णयनं निर्णयः, निश्चयनं निश्चय इति समौ समानार्थौ समानलिङ्गाविति द्वे निश्चयज्ञानस्य ॥ ३ ॥

स. स. पु. न.

मिथ्याज्ञान, परद्रोह — **मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम्।**

पु. पु. स. स. पु.

सिद्धान्त, भ्रान्तिज्ञान — **(समौ) सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥ ४ ॥**

मिथ्येति—'मिथ्या' इत्यपह्नवे तद्विपर्ययिणी दृष्टिरस्येति मिथ्यादृष्टिः, नास्ति परलोके मतिरस्येति नास्तिकस्तस्य भावो नास्तिकता इति द्वे परलोको नास्तीत्यादिबुद्धेः। व्यापादनं व्यापादः, द्रोहणं द्रोहस्तस्य चिन्तनं द्रोहचिन्तनमिति द्वे द्रोहचिन्तनस्य। असेधीदिति सिद्धः सिद्धोऽन्तो निश्चयोऽत्रेति सिद्धान्तः, राध्यतिस्मेति राद्धः राद्धस्सिद्धोऽन्तो निश्चयोऽत्रेति राद्धान्तः इति द्वे सिद्धान्तस्य। भ्रमणं भ्रान्तिः, मिथ्या चासौ मतिश्चेति मिथ्यामतिः, भ्रमणं भ्रम इति त्रीण्यतस्मिंस्तज्ज्ञानस्य ॥ ४ ॥

स. स. न. पु. पु. पु.

अङ्गीकार — **संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः।**

पु. पु. पु. पु.

अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥

संविदिति—संवेदनं संवित्, आगमनमागूर्वपूर्वत्—आगच्छतीत्यागूर्वपांभूवत्—आगुरणमागूः, प्रतिज्ञायत इति प्रतिज्ञानम्, नियमननिति नियमः, आश्रवणमाश्रवः, संश्रवणं संश्रवः, अङ्गीकरणमित्यङ्गीकारः, अभ्युपगमनमित्यभ्युपगमः, प्रतिश्रवणं प्रतिश्रवः, समाधानं समाधिरिति दशाङ्गीकारस्य ॥ ५ ॥

---

* [illegible] वा [illegible]—[illegible] ॥

१ [illegible] स्थाणुर्वा पुरुषो वायमित्यनेककोटिकं ज्ञानं संशयः, स्थाणौ स्थाणु-[illegible] ॥

न. न.

ज्ञान विज्ञान **(मोक्षे धी) र्ज्ञानं (मन्यत्र) विज्ञानं (शिल्पशास्त्रयोः)।**

स. न. न. न. न. न.

मोक्ष **मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ६ ॥**

पु. पु. न. स. स.

अज्ञान **मोक्षोपवर्गोथाज्ञानमविद्याहंमतिः (स्त्रियाम्)।**

मोक्ष इति—मोक्षविषयिणी मोक्षफलिका वा या धीः बुद्धिः सा ज्ञानमुच्यत इत्येकं मोक्षोपयोगिबुद्धेः । अन्यत्रेति—अन्यफलिका शिल्पशास्त्रयोर्या धीः सा विज्ञानं कथ्यते इत्येकं शिल्पादिविषयकबुद्धेः । मुक्तिरिति—मोचनं मुक्तिः, बन्धविरहात्केवलस्य भावः कैवल्यम्, निर्वात्यत्र, निरवायीति वा निर्वाणम्, अतिशयेन प्रशस्यं श्रेयः, नितरां श्रेयं निःश्रेयसम्, अविद्यमानं मृतं मरणमत्रेत्यमृतम्, मोक्षणमवसानमिति मोक्षः, अपवर्जनमपवर्गः इत्यष्टौ मोक्षस्य । अथेति—ज्ञानविरुद्धमज्ञानम्, विद्याविरुद्धा अविद्या, अहं प्रधाना मतिरहंमतिस्स्त्रियां स्यादिति त्रीण्यविद्यायाः ॥ ६ । १ ॥

न. पु. पु. पु. पु.

विषय **रूपं शब्दो गन्धरसस्पर्शाश्च विषया (अमी) ॥ ७ ॥**

पु. पु. न. न. न.

इन्द्रिय **गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ।**

रूपमिति—रोपयति विमोहयति, रूप्यते स्तूयते वा रूपम्, शप्यते आक्रुश्यत इति शब्दः, गन्धयतीति गन्धः, रस्यत इति रसः, स्पृश्यते इति स्पर्शः अमी विसिन्वन्ति निबध्नन्तीन्द्रियाणि विषयाः, गाव इन्द्रियाणि चरन्त्येष्विति गोचराः इन्द्रियैरर्थ्यन्त इति इन्द्रियार्थाः इति पञ्चानां प्रत्येकं त्रीणि । हृष्यत्यनेनेति हृषीकम्, विषयोऽस्यास्तीति विषयि, इन्द्रस्यात्मनो लिङ्गमितीन्द्रियमिति त्रीणीन्द्रियाणाम् ॥ ७ । १ ॥

न. न.

कर्मेन्द्रिय ज्ञानेन्द्रिय **कर्मेन्द्रियं (तु पाय्वादि) मनोनेत्रादि (धीन्द्रियम्) ॥ ८ ॥**

पु.न. पु.न. पु. पु. पु.

रस मीठा **तुवरस्तु कषायो(ऽस्त्री) मधुरो लवणः कटुः ।**

पु. पु.

तीता आदि **तिक्तोऽम्लश्च रसाः पुंसि (तद्वत्सु षडमी त्रिषु) ॥ ९ ॥**

कर्मेन्द्रियमिति—पाययति शोषयतीति पायुः स एवादिर्यस्य तत् पाय्वादि कर्मसाधकमिन्द्रियं कर्मेन्द्रियमुच्यत इत्येकं गुदादीन्द्रियस्य । मनोनेत्रादि धीसाधनमिन्द्रियं कथ्यत इत्येकं ज्ञानेन्द्रियस्य । तुवर इति तवीति छिनत्ति रोगानिति तुवरः, तूवरोऽपि, कषति कण्ठमिति कषायः स्त्रीं वर्जयित्वा द्वे कषायरसस्य । मधु माधुर्यमस्यास्तीति मधुर इत्येकं मधुररसस्य । लुनाति जाड्यमिति लवणः इत्येकं लवणरसस्य । कटत्यावृणोति

तीक्ष्णतया मुखमिति कटुः, कट्वी, कटुकेत्येकं कटुरसस्य। तेजयतिस्मेति तिक्तः इत्येकं तिक्तरसस्य। अम्यते शब्द्यते भोक्तृभिरित्यम्लः, अमति रुजत्यरुचिमिति वा अम्लः अम्लीति इत्येकमम्लरसस्य। रस्यन्ते आस्वाद्यन्त इति रसाः तुवरादयः षट्रसशब्द-वाच्यास्तत्र तूवरस्तु कषायोऽस्त्रीत्युक्तत्वादितरेषां लिङ्गनिश्चयमाह—पुंसीति गुणमात्रे वर्तमानाः मधुरादयः पञ्च पुंसि भवन्ति अमी षट् तद्वत्सु गुणवत्सु त्रिषु त्रिलिङ्गयां स्युरिति षड्रसनाम् ॥ ८। ९ ॥

पु.

सुगन्ध या (विमर्दोत्थे) परिमलो (गन्धे जनमनोहरे)।

अतर खुशबू पु.

आमोदः(सोतिनिर्हारी)(वाच्यलिङ्गत्वमागुणात्)॥१०॥

विमर्दोत्थ इति—सुरतादिविमर्दोत्थे माल्यादिके घर्षणसमुद्भवे चन्दने च जनानां मनोहरे गन्धे परितो मलते धारयति जनमनांसि मल्यते वेति परिमलः स्यादित्येकं परि-मलस्य। सः परिमलः अतिनिर्हारी अत्यन्तमनोहरश्चेत् आसमन्तान्मोदयति इत्यामोदः स्यादित्येकमामोदस्य। वाच्येति आगुणात् "गुणे शुक्लादयः पुंसि" इत्यतः प्राक् अतः परं वाच्यलिङ्गत्वमधिक्रियते ॥ १० ॥

पु. पु. पु. पु.

बड़ी दूर जाने समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः।

वाला सुगन्ध पु. पु. पु. पु.

भला सुगन्ध पान की गन्ध इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ॥ ११ ॥

समाकर्षीति—समाकर्षत्यवश्यं मनः, समाकर्षणशीलो वेति समाकर्षी, निर्हरति मनोऽवश्यमिति, निर्हरणशीलो वेति निर्हारीति द्वे दूरगामिगन्धस्य—सुष्ठु रमन्तेऽत्रेति सुरभिः, घ्राणं तर्पयतीति घ्राणतर्पणः, इष्टगन्धोऽस्येति इष्टगन्धः, सुष्ठुगन्धोऽस्येति सुगन्धिरिति चत्वारीष्टगन्धस्य। आमोदयतीत्यामोदी, मुखं वासयतीति मुखवासनः स्यादिति द्वे मुखवासनगुटिकादेः ॥ ११ ॥

पु. पु. न. न.

दुर्गन्ध बिना पके मांस का गन्ध पूतिगन्धिस्तु दुर्गन्धो विस्रं (स्या)दामगन्धि (यत्)।

पूतीति—पूयते इति पूतिः दुष्टो गन्धोऽस्येति पूतिगन्धिः, दुष्टो गन्धोऽस्येति दुर्गन्ध इति द्वे दुर्गन्धस्य। विस्यति विस्रंसते वेति विस्रम्, आमोऽपक्वो मलस्तस्येव गन्धोऽस्येति आमगन्धि यत् आमगन्धि तद्विस्रं स्यादिति द्वे अपक्वमांसादिगन्धस्य ॥

पु. पु. पु. पु.१ पु. पु. पु.

सफेद का शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥

पु. पु. पु. पु. पु. पु.

* अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः।

* [illegible] । [illegible] ॥ [illegible] " (इति [illegible]) ॥

शुक्लेति—शोकति मनोऽस्मिन्निति शुक्लः, शोभते इति शुभ्रः, शोचतीति शुचिः, श्वेतनं श्वेतः, विशीयत इति विशदः, श्यायत इति श्येतः, पण्डते मनोऽस्मिन्निति पाण्डरः, अवदायते स्मेति अवदातः, सिनोति मन इति सितः, गुरते उद्युङ्क्ते मनोऽस्मिन्निति गौरः, अवलक्ष्यते, वलतीति वल्—अक्षन्त्यस्मादित्यक्षः वल्चासावक्षश्चेति वलं [illegible] तीति वा वलक्षः, धावति मनोऽत्रेति, धवनं धवस्तं लातीति वा धवलः, अर्ज्यत इत्य- र्जुन इति त्रयोदश शुक्लवर्णस्य ॥ १२ ॥ ३ ॥

पु. पु. पु. पु.

कुछ उजला हरिणः पाण्डुरः पाण्डु (रीषत्पाण्डुस्तु) धूसरः॥ १३

पीला व कुछ पु. पु. पु. पु. पु. पु. पु.

उजला काला कृष्णो नीलासितश्यामकालश्यामलमेचकाः।

हरिण इति—हरति मनो हरिणः, पाण्डुरस्यास्तीति पाण्डुरः पण्ड्यते ज्ञाने पाण्डुरिति त्रीणि पीतसंवलितशुक्लस्य। ईषत्पाण्डुस्तु धुनोति चेत इति, धूसः स्तं रातीति वा धूसर इत्येकमीषत्पाण्डुरस्य। कर्षति मन इति कृष्णस्तस्मिन्, तीति नीलः, सितविरुद्धोऽसितः, श्यायते मनोऽस्मिन्निति श्यामः, कलयत इति श्यामोऽस्यास्तीति श्यामलः, मचति मिश्रीभवति वर्णान्तरेणेति मेचक इति कृष्णवर्णस्य ॥ १३ ॥ ३ ॥

पु. पु. पु. पु. पु. पु.

पीला हरा पीतोगौरोहरिद्राभः पालाशोहरितोहरित् ॥ १४ ॥

लाल पु. पु. पु. पु. पु.

लालकमलसम रोहितोलोहितोरक्तः शोणः कोकनदच्छविः।

पीत इति—पीयते, पिबति वा वर्णान्तरमिति पीतः, गुरति मनो यस्मिन्निति हरिद्रा इव आभा यस्येति हरिद्राभ इति त्रीणि पीतवर्णस्य। पलाशस्य पत्रस्यायमिति मदनालीति पलाशः स एव पालाशः, हरतीति हरितः, हरतीति हरित् इति हरितवर्णस्य। रोहतीति रोहितः, लोहितो वा रजतिस्म, रज्यते रमेति वा रक्त इति रक्तवर्णस्य। शोणायतीति शोणः, कोकनदं रक्तोत्पलमिव छविर्यस्येति कोकनदच्छविः द्वे शोणवर्णस्य ॥ १४ ॥ ३ ॥

पु. पु.

[illegible] (अव्यक्तराग) स्त्वरुणः (श्वेतरक्तस्तु) पाटलः ॥ १५ ॥

[illegible] पु. पु. पु. पु. पु.

[illegible] श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते।

अव्यक्तेति—अव्यक्तो रागो [illegible] अव्यक्तरागः, [illegible] इति द्वे [illegible] । [illegible] [illegible] पाटयतीति पाटल इति द्वे [illegible]

ायत इति श्यावः, कपिर्वर्णविशेषोऽस्यास्तीति, कपिर्मर्कटस्तद्वद्वर्णोऽस्त्यस्येति वा
पेशः स्यादिति द्वे कृष्णपीतस्य । धूमं रातीति धूम्रः, धूमं लातीति धूमलः उभौ कृष्ण-
श्चो लोहितः कृष्णलोहितस्तस्मिन्स्यातामिति त्रीणि कृष्णलोहितस्य ॥ १५ । १ ॥

पु. पु. पु. पु. पु. पु.

ला **कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥**

पु न. पु. पु. पु. पु. पु.

चित्रविचित्र **चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।**

"गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति" ॥ १७ ॥

इति धीवर्गः ॥

कडार इति—गडति, कडनं कडस्तमृच्छतीति वा कडारः, कवते, कपिं वर्णं
तीति वा कपिलः, पिञ्जयतीति पिङ्गः, पिशतीति पिशङ्गः, कन्दतीति कद्रुः, पिङ्गं ला-
ति पिङ्गल इति षट् कपिलस्य । चीयते, चित्तं त्रायते वेति चित्रम्, कीर्य्यते इति कि-
रः, कलयतीति कल्—माषयत्यभिभवति वर्णानिति माषः—कल् चासौ माषश्चेति
ल्माष, शपत्याक्रोशति वर्णानिति शबलः, एति वर्णानिति एतः, कर्वति वर्णानिति
र्बुरः—कर्बुरम्—कर्बुरा चेति षट् नानावर्णस्य । शुक्लादयः शब्दाः गुणे गुणमात्रे पुंसि
वन्ति । गुणिलिङ्गास्तु तद्वति गुणवति विशेष्यस्यानुपादाने यदेव यल्लिङ्गं प्रतिपिपाद-
यिषितं तल्लिङ्गा इति यथा "शुक्लं वस्त्रम्—शुक्लः पटः—शुक्ला शाटी" त्यादयो
याः ॥ १६ । १७ ॥

इति धीवर्गविवरणम् ॥

अथ शब्दादिवर्गो व्याख्यायते ॥

स. स. स. स. स. स. स.

सरस्वती **ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।**

पु. स. न. न. न. न.

बोलना **व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥**

ब्राह्मीति—ब्रह्मण इयं ब्राह्मी, भरतस्येयं भारती, भाष्यत इति भाषा, गृणन्त्येता-
मिति गीः भागुरिमते गिरापि, उच्यते, वचनं वेति वाक्, वण्यत इति वाणिः वाणी वा
[illegible]ति येदुच्चारयतीति वणो ध्वना तस्येयं वाणीति वा, सरोऽस्त्यस्या इति सरस्वती,
रमतीति सरो ज्ञानमस्त्यस्येति सरस्वान्ब्रह्मा तस्येयं शक्तिरिति वेति सप्तवचनाधिष्ठात्रि-
[illegible]कायाः । व्याहरणं व्याहारः, वचनमित्युक्तिः, लपनमिति लपितम्, भाषणमिति
भाषितम्, उच्यत इति वचनम्, वक्तीति वच इति षट् भाषणस्य । केचित्तु ब्राह्म्याद्याश्चो-
क्ता षट्पर्याया इति वदन्ति ॥ १ ॥

१ [illegible] इति [illegible] "गुणे शुक्लादयः पुंसि" इत्यत्र [illegible] ॥

पु. पु. पु. पु.

अपशब्द / शब्द **अपभ्रंशोपशब्दः स्या (च्छास्त्रे) शब्द (स्तु) वाचकः ।**

अपभ्रंश इति—संस्कृतादपभ्रश्यतीति अपभ्रंशः, अपभ्रष्टः शब्दोऽपशब्दः इति द्वे व्याकरणानिष्पन्नस्य गावी—गोता—गोणीत्यादेः—शास्त्रे व्याकरणादौ यो वाचकः साधुः स शब्दः स एव निरुपपदेन शब्दशब्देन व्यवह्रियत इत्येकं शब्दस्य ॥

न.

वाक्य **(तिङ्सुबन्तचयो)वाक्यं क्रिया(वा)कारकान्विता ॥२॥**

तिङिति—तिङ् च सुप् च तिङ्सुपौ तावन्ते येषान्ते तिङ्सुबन्तास्तेषां चयः "सुप् च तिङ् च सुप्तिङ् सुप्तिङ् सुप्विशिष्टं तिङ् सुप्तिङ् तयोरेकशेषेऽन्तशब्देन समासस्तेन सुबन्तचय-तिङन्तचय—सुप्तिङन्तचयानां त्रयाणामपि लाभः तत्र सुबन्तचयः—चैत्रेण शयितव्यम्, तिङन्तचयः—'पचति, भवति' सुप्तिङन्तचयः "चैत्रः पचतीत्यादि" वाक्यम् । कारका-न्विता कारकविशिष्टा क्रिया वेति वाक्यम् । यथा यज्ञदत्तः घटमानय, गां पालय-घासादि-नेत्यादिकारकविशिष्टक्रिया बोधकं शब्दजातं वाक्यमिति विज्ञेयमित्येकं वाक्यस्य ॥२॥

स. पु. पु. स. पु.

वेद धर्म **श्रुतिः (स्त्री) वेदआम्नायस्त्रयीधर्मस्तु (तद्विधिः) ।**

श्रुतिरिति—श्रूयते, श्रूयते धर्मोऽनयेति वा श्रुतिः स्त्री स्यात्, विदन्ति धर्ममनेनेति वेदः, आम्नायते अभ्यस्यते—आमनन्ति धर्माधर्माविति वा आम्नायः, त्रयोऽवयवा यस्या इति त्रयीति चत्वारि वेदस्य । तद्विधिः तेन वेदेन विधीयते यज्ञादिरेतेन वेदविहितत्वं धर्मत्वम्, वेदश्च धर्मे प्रमाणमित्युक्तम्—धरति लोकानिति, ध्रियते जनैरिति वा धर्मः इत्येकं वेद-विहितकर्मणः ॥

स. न. न. स.

वेदभेद **स्त्रियामृक्सामयजुषी (इतिवेदास्त्रय)स्त्रयी ॥ ३ ॥**

स्त्रियामिति—ऋच्यन्ते स्तूयन्ते देवा अनयेति ऋक् स्त्रियां स्यात् । स्यति पापमिति साम, इज्यतेऽनेनेति यजुरिति वेदानां प्रत्येकमेकैकम् । इति एते त्रयो वेदाः त्रयोऽवयवा यस्याः सा त्रयीत्येकं वेदत्रयसंघातस्य ॥ ३ ॥

---

१ [illegible] वाक्यार्थं [illegible] कर्त्रादिभिर्विशेषणैः सहितं [illegible] यथा '[illegible]' [illegible] यथा 'शोभन्ते [illegible]' अत्र सर्वपदेषु [illegible] यथा—'अहिन' अत्र [illegible] गम्यते । [illegible] "ओदनं पच तव भविष्यति" [illegible] । [illegible] वाक्यानीति वार्त्तिककारस्येति ॥

१ न. पु. पु.

वेदाङ्ग,वेदारम्भ, **(शिक्षेत्यादि श्रुते) रङ्गमोङ्कारप्रणवौ (समौ)।**

महाभारत आदि, पु. न. पु.

स्वर **इतिहासः पुरावृत्त (मुदात्ताद्यास्त्रयः) स्वराः ॥ ४ ॥**

शिक्षेत्यादि—शिक्ष्यते स्थानादिकमनयेति शिक्षा इत्यादि श्रुतेर्वेदस्य अङ्ग्यते ज्ञायतेऽनेनेत्यङ्गमुच्यते इत्येकं वेदाङ्गस्य। अवतीत्योम् वषट्कार इति लिङ्गात्समुदायादपि कारप्रत्ययः ओङ्कारः, प्रणूयते स्तूयत इति प्रणवः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे वेदारम्भस्य। 'इति ह' पारंपर्योपदेशेऽव्ययं तदास्तेऽस्मिन्निति इतिहासः, पुरावृत्तमाचष्टे पुरावृत्तयतीति पुरावृत्तमिति द्वे पूर्वाचरितप्रतिपादकभारतादिग्रन्थस्य। उदात्तेति—उदात्ताद्यास्त्रयः स्वरन्ति शब्दायन्ते इति स्वरा उच्यन्त इत्येकमुदात्तादिस्वराणाम् ॥ ४ ॥

स. स.

न्याय **आन्वीक्षिकी दण्डनीति (स्तर्कविद्यार्थशास्त्रयोः)।**

कहानी स. न. न.

पुराण **आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥ ५ ॥**

आन्वीक्षिकीति—अनुश्रवणोत्तरमीक्षणं परीक्षणमन्वीक्षा सा प्रयोजनमस्या इति आन्वीक्षिकी, दम्यतेऽनेनेति दण्डो,नीयते बोध्यतेऽनयेति, दण्डं नयति दण्डयान्प्रतिप्रापयतीति वा दण्डनीतिः एतौ द्वौ क्रमात्तर्कविद्यार्थशास्त्रयोर्वर्तेते। आन्वीक्षिकी तर्कविद्यायां न्यायरूपायामिति, दण्डनीतिः अर्थस्य भूम्यादेः प्रापकं शास्त्रमर्थशास्त्रन्तस्मिन्निति अर्थशास्त्रे चेत्येकैकम्। आचष्टे इति आख्यायिका, उपलब्धो ज्ञातोऽर्थो यस्या इत्युपलब्धार्थेति द्वे ज्ञातसत्यार्थभूतायाः कथायाः। पुराभवमिति—पुरापि नवमिति—पुरा अतीतानागतावर्थावणतीति वा पुराणम्, पञ्चलक्षणान्यस्येति पञ्चलक्षणमिति द्वे व्यासादिप्रणीतमत्स्यपुराणादेः ॥ ५ ॥

स. स. स. ४

कथा,पहेली **"प्रबन्धकल्पना" कथा प्रवल्हिका प्रहेलिका।**

स. स. स. पु.

स्मृति,संग्रह **स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ॥ ६ ॥**

प्रबन्धेति—प्रबन्धस्य कल्पना रचनेति प्रबन्धकल्पना, कथनमिति कथेति द्वे काद-

१ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः। छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते ॥
२ "[illegible] पुराणानि पृथक् पृथक्"(इति देवीभागवते)
३ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंश्यानुचरितं चैव पुराणं पञ्चलक्षणम् ॥
४ [illegible]

न्वर्यादिकथायाः। प्रवल्हते आच्छादयतीति प्रवल्हिका, प्रहेलयति अभिप्रायं सूचयतीति प्रहेलिका "व्यक्तिकृत्यकमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र बाह्यार्थसंबन्धं कथ्यते सा प्रहेलिका" इति द्वे दुर्विज्ञानार्थप्रश्नस्य। वेदार्थस्मरणपूर्वकं रचितत्वात्स्मृतिः, स्मर्य्यतेऽनयेति वा स्मृतिः, धर्मबोधार्थं रचिता संहिता धर्मसंहितेति द्वे मन्वादिस्मृतेः। समाहरणं समाहृतिः, संग्रहणं संग्रहः "विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः। निबन्धो यः समासेन संग्रहं तं विदुर्बुधा" इति द्वे संग्रहग्रन्थस्य ॥ ६ ॥

स. स. स. स.

समस्या पूरा करना, गौंगा — समस्या तु समासार्था किंवदन्ती जनश्रुतिः।

स. स. पु. पु. पु.

वृत्तान्त, — वार्ताप्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥ ७ ॥

स. स. न. न. न.१

नाम — आख्याह्वे अभिधानं च नामधेयं च नाम च।

समस्येति—समसनमिति, समं कृत्स्नं तद्विषयिणीच्छा वेति समस्या, समासोऽर्थो यस्या इति समासार्था पूरणसाकाङ्क्षा कविशक्तिपरीक्षार्थमपूर्णतयैव पठ्यमाना यथा "शतचन्द्रं नभस्तलम्" इति तत्र "दामोदरकराघातविह्वलीकृतचेतसा। दृष्टं चाणूरमल्लेन" इत्यादिना सा पूर्य्यत इति द्वे समस्यायाः। कोपिवादः किंपूर्वाद्वदेर्भावे कर्मण्यन्तादेशे ङीपि च किंवदन्ती, जनेभ्यः श्रूयते इति जनश्रुतिरिति द्वे लोकापवादस्य। वृत्तिर्लोकवृत्तं तदस्त्यस्यामिति वार्ता, प्रवर्तते व्याप्नोतीति प्रवृत्तिः, वृत्तोऽनुवर्तनीयो गवेषणीयोऽन्तः समाप्तिर्यस्येति वृत्तान्तः, उद्गतोऽन्तो यस्येति उदन्तः साधुवार्तयोःस्यादिति चत्वारि वृत्तान्तस्य। अथेति—आह्वयन्त्याह्वास्तैर्याचतेत्राप्यते—आह्वानमाहूस्तस्या अय इति वा आह्वयः, आख्यानमित्याख्या, आह्वानमित्याह्वा, अभिधीयत इत्यभिधानम्—म्नायत इति नाम तदेव नामधेयम् नम्यतेऽभिधीयतेऽर्थोऽनेनेति नाम इति षट् नाम्नः ॥ ७ । ३ ॥

स. स. न. स.

पुकारना, बुलाना — हूतिराकारणाह्वानं संहूति (र्बहुभिःकृता) ॥ ८ ॥

पु. २ पु. पु. न.

झगड़ा, व्यवहार — विवादोव्यवहारः स्यादुपन्यासस्तु वाङ्मुखम्।

पु. २ पु. न. पु.

उपक्रम, शपथ — उपोद्घात उदाहारः शपनं शपथः (पुमान्) ॥ ९ ॥

हूतिरिति—ह्वानं हूतिः, आकारणमित्याकारणा, आहूयते इत्याह्वानमिति त्रीणि आह्वानस्य। बहुभिः कृता हूतिः संह्वानमिति संहूतिरित्येकं संहूतेः। विवदनमिति, विरुद्धो वाद इति वा विवादः, व्यवहरणं व्यवहारः स्यादिति द्वे ऋणादिन्यायस्य। उपन्यसनमुप-

१ [illegible] ॥

२ " [illegible] " इति [illegible] ॥

३ [illegible] ॥

न्यासः, वाचो मुखमिव वाङ्मुखमिति द्वे वचनोपक्रमस्य । उपसमीपे उद्धननं ज्ञापनमित्युपोद्घातः, उदाहरणमित्युदाहार इति द्वे वक्ष्यमाणयोग्यार्थवर्णनस्य । शप्यते शपनम्, शपनं शपथः पुमान्स्यादिति द्वे सुतस्पर्शादिना शपथकरणस्य॥ ८ । ९ ॥

पूछना सवाल, प्रत्युत्तर जवाब
पु. पु. स. न. न.
प्रश्नोनुयोगः पृच्छा च प्रतिवाक्योत्तरे (समे) ।

सांच को झूठ करना, झूठ दोष लगाना
पु. न. न.
मिथ्याभियोगोऽभ्याख्यानमथमिथ्याभिशंसनम्॥१०॥

प्रीतिसे उपजा शब्द
पु. पु.
अभिशापः प्रणादस्तु (शब्दस्स्यादनुरागजः) ।

प्रश्न इति—प्रच्छनं प्रश्नः "प्रश्ने चासन्नकाले" इति लिङ्गान्न संप्रसारणम्, अनुयोजनमनुयोगः, प्रच्छनं पृच्छेति त्रीणि प्रश्नस्य । प्रतिवचनं प्रतिवाक्यम्, उत्तरणमुत्तरम्—उभे समे समानार्थे समानलिङ्गके चेति द्वे प्रतिवाक्यस्य । मिथ्या वासावभियोगश्चेति मिथ्याभियोगः, अभ्याख्यायत इत्यभ्याख्यानमिति द्वे 'शतंमेधारयसीत्यादिमिथ्याविवादस्य । अथेति मिथ्या च अभिशंसनं चेति मिथ्याभिशंसनम्' अभिशपनमभिशापः इति द्वे मिथ्यारोपस्य सुरापानादिविषयस्य । अनुरागजः शब्दः प्रणादनमिति प्रणादः स्यादित्येकं प्रीतिविशेषजनितमुखकण्ठादिशब्दस्य ॥ १० । ९ ॥

यश, स्तुति
न. स. स. पु. न. स. स.
यशःकीर्तिःसमज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ ११ ॥

द्विगुण, ऊंचे घोषना
न. न. स.
आम्रेडितं(द्विस्त्रिरुक्त) मुच्चैर्घुष्टं तु घोषणा ।

शोकादि से बोलना
स.
काकुः "स्त्रियांविकारोयःशोकभीत्यादिभिर्ध्वनेः" ॥१२॥

यश इति—अश्नुते व्याप्नोतीति यशः, कीर्त्यत इति कीर्तिः, समैः सर्वैर्ज्ञायत इति समज्ञा, समाज्ञानं समाज्ञा वा समजन्त्यस्यामिति समज्या समाज्या वेति त्रीणि कीर्तेः । स्तूयतेऽनेनेति स्तवः, स्तूयतेऽनेनेति स्तोत्रम्, स्तूयतेऽनयेति स्तुतिः, नूयतेऽनया नवनं वेति नुतिरिति चत्वारि स्तुतेः । द्विस्त्रिरुक्तं द्विस्त्रिवारोक्तं आम्रेड्यते आधिक्येनोच्यतेस्मेति आम्रेडितं स्यादित्येकं द्विस्त्रिवारोक्तस्य । उच्चैर्घुष्यते स्मेति उच्चैर्घुष्टम्, घोषणमिति घोषणेति द्वे उच्चैः शब्दनस्य । शोकभीत्यादिभिर्ध्वनेः यः विकारः सः कक्यत इति काकुः स्त्रियां स्यादित्येकं शोकादिशब्दविकारस्य ॥ ११ । १२ ॥

निन्दा
पु. पु. पु. पु. पु.
अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।

पु. स. स. स. स.
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३

अवर्णेति—वर्ण्यत इति वर्णः प्रशंसा तद्विरुद्धोऽवर्णः, आक्षेपणमाक्षेपः, निर्वादः, परिवादनं परीवादः, अपवादनमपवादः अववादो वा, वदिति सप्त पुं॰ ऽव्ययम्, उपक्रोशनमुपक्रोशः, जुगुप्सनं जुगुप्सा, कुत्सनं कुत्सा, निन्दनं निन्दा, गर्हणमिति दश निन्दायाः ॥ १३ ॥

न. पु. न. स.

कठोर, डराना, खिझाना

पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः ।

न.

यः सनिन्द उपालम्भ(स्तत्र स्यात्) परिभाषणम् ॥ १४ ॥

पारुष्यमिति—परुषो निष्ठुरभाषी तस्य भावः पारुष्यम्, अतिक्रम्योक्तिः अतिवदनं वेति अतिवादः स्यादिति द्वे अप्रियवाक्यस्य । भर्त्स्यते तर्ज्यते इति भर्त्सनम् अपकारार्था गीरित्यपकारगीरिति द्वे 'चौरोसि घातयिष्यामि त्वाम्' इत्याद्यपकारवाक्यस्य । यः सनिन्दः निन्दया समेतः उपालम्भनमुपालम्भस्तत्र परितो भाष्यते इति परिभाषणं स्यात्—उपालम्भो द्विधा गुणाविष्करणपूर्वको निन्दापूर्वकश्च आद्यो यथा "महाकुलीन ! तव किमुचितमिदम्" द्वितीयस्तु "बन्धकीसुत ! तवोचितमेवेदम्" इति तत्र यो द्वितीयः स परिभाषणमित्येकं परिभाषणस्य ॥ १४ ॥

स.न.

निन्दा करना, प्रिय बोलना, बकना

तत्र त्वाक्षारणा यः स्या "दाक्रोशो मैथुनं प्रति" ।

न. पु. पु.

स्यादाभाषणमालापः प्रलापो (ऽनर्थकं वचः) ॥ १५ ॥

तत्रेति—मैथुनं प्रति यः आक्रोशः स्यात् तत्र तु आक्षारणमिति आक्षारणा, आक्षार्यत इति आक्षारणमपीत्येकं परस्त्रीनिमित्तं पुंसः परपुरुषनिमित्तं स्त्रियाश्चाक्रोशनस्य । आभाष्यत इत्याभाषणम्, आलपनमालापः स्यादिति द्वे संभाषणस्य । अनर्थकमर्थशून्यं वचः प्रलपनं प्रलापः स्यादित्येकं प्रयोजनशून्यस्योन्मत्तादिवचनस्य ॥ १५ ॥

बार बार कहना, रोना, ... कहना, परस्पर कहना

पु. स. पु. न.

अनुलापो मुहुर्भाषा विलापः परिदेवनम् ।

पु. स. पु.

विप्रलापो विरोधोक्तिः संलापो (भाषणं मिथः) ॥ १६ ॥

अनुलाप इति—अनुलपनमनुलापः, मुहुः पुनः पुनर्भाषणमिति मुहुर्भाषा इति द्वे बारं बारं भाषणस्य । विलपनं विलापः, परिदेव्यते इति परिदेवनम्, परिदेवनमितिवा परिदेवना इति द्वे शोकेनवचनस्य । विरुद्धः प्रलापो विप्रलापः, विरोधस्य उक्तिर्विरोधोक्तिरिति द्वे अन्योन्यविरुद्धवचनस्य । मिथोऽन्योन्यं प्रतिभाषणं संलपनं संलापः स्यादित्येकं मिथोभाषणस्य ॥ १६ ॥

पु. न. पु. पु.

सुन्दर कहना छिपाना **सुप्रलापः सुवचनमपलापस्तु निह्नवः।**

स. न.

दूतका कहना **संदेशवाग्वाचिकं स्या "द्वाग्भेदास्तु त्रिषूत्तरे"॥ १७॥**

सुप्रलाप इति—सुष्ठु प्रकृष्टं लपनं सुप्रलापः, सुष्ठु उच्यते सुवचनमिति द्वे शोभनवचनस्य। अपलपनमपलापः, निह्नवनं निह्नव इति द्वे धार्यमाणेन धारयामीत्याद्युक्तेः। संदिश्यते संदेशोऽर्थस्तस्य वाक्, संदिष्टोऽर्थो ययोच्यते सा वाचिकमिति द्वे संदेशवचनस्य। उत्तरे वक्ष्यमाणा वाग्भेदा रुशत्यादयः सम्यगन्तास्तु त्रिषु त्रिलिङ्गेषु भवन्तीति॥ १७॥

पु.स. स.

बुरी वाणी भली वाणी **रुशतीवाग "कल्याणी" स्यात्कल्या "तु शुभात्मिका"।**

न. न. न.

मधुर कहना ठीक कहना **"अत्यर्थमधुरं" सान्त्वं संगतं हृदयंगमम्॥ १८॥**

रुशतीति—अकल्याणी कल्याणविरुद्धा वाक् रुशती—उशती—उषती वा स्यात् यथा उशती—उषती—रुशती वाणी, उशन्—उषन्—रुशन् शब्दः, उशत्—उषत्—रुशद्वचनमित्यादयस्त्रिलिङ्गाः स्युरित्येकं कल्याणविहीनवाण्याः। शुभात्मिका तु वाक् कलासु साधुः कल्या काले साधुः काल्या वेत्येकं शुभवाण्याः। अत्यर्थमधुरं वचनं सान्त्वयतीति सान्त्वमित्येकमत्यन्तमधुरवचनस्य। संगच्छतेस्म संगतम्, हृदयं गच्छतीति हृदयंगममिति द्वे युक्तिमिलितवचनस्य॥ १८॥

न. न. न. न. न.

कठोर वचन गमैला वचन प्रिय व सत्य व परस्पर कहना **निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं (प्रिये)।**

न. न. न.

सत्येऽथ संकुलक्लिष्टे परस्परपराहते॥ १९॥

निष्ठुरमिति—नितिष्ठतीति निष्ठुरम्, पिपर्ति पूरयत्यलं बुद्धिं करोतीति परुषमिति द्वे कर्कशवचनस्य। ग्रामे भवं ग्राम्यम्, श्रियं लातीति श्रीलं तद्भिन्नमश्लीलमिति द्वे भण्डादिवचनस्य। प्रीणातीति प्रियम्—सत्सु साधु सत्यम् प्रियं यत्सत्यं तस्मिन् सुष्ठु नृत्यन्त्यनेनेति सूनृतमित्येकं प्रियसत्यवचनस्य। अथेति—संकुलतीति संकुलम्, क्लिश्यते स्मेति क्लिष्टम् उभे पराहतानि पराहतं परस्परेण पराहतं तस्मिन्व्याहतामिति द्वे 'माता मे वन्ध्या' इत्यादिपरस्परार्थवचनस्य॥ १९॥

न. न. न.

"लुप्तवर्णपदं" ग्रस्तं निरस्तं त्वरितोदितम्।

न. न. न. न.

(अम्बूकृतं) सनिष्ठेवमबद्धं स्यादनर्थकम्॥ २०॥

लुप्तेति—लुप्तो वर्णः पदं वा यत्रेति लुप्तवर्णपदम्, अस्यते स्मेति अस्तमिति द्वे आ-क्त्यादिनासंपूर्णोच्चारितस्य। निरस्यते स्मेति निरस्तम्, त्वरितमुदितं त्वरितोदित-मिति द्वे शीघ्रोच्चारितवचनस्य। न अम्बु अनम्बु अम्बु अकारीति अम्बूकृतम्, सहनिष्ठी-वेन श्लेष्मकणादिनिर्गमेनेति सनिष्ठेवम्, सनिष्ठीवमपीति द्वे श्लेष्मनिर्गमसहितवच-स्य। न बध्यते स्मेति अबद्धम्—अबध्यमपि, न अर्थो यस्येत्यनर्थकं स्यादिति द्वे समुदायार्थ-शून्यवचनस्य ॥ २० ॥

न. न. न. न.

अयोग्य वचन / असभावित — **अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम्।**

न. न. न. न.

हाससमेत कहना / रतिकूजित — **सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ॥ २१ ॥**

अनक्षरमिति—न प्रशस्तान्यक्षराणि यस्मिन्निति अनक्षरम्, न वचनार्हमवाच्यं(स्या-)दिति द्वे निन्दावचनस्य। आहन्यते स्मेत्याहतम्, मृषा अर्थो यस्येति मृषार्थकमिति 'एष वन्ध्यासुतो याति' इत्यादिवचनस्य। उल्लुण्ठ्यते उल्लुण्ठनम्—उल्लुण्ठनेन सहितं सोल्लुण्ठनम्, उत्प्रासनमुत्प्रासस्तत्सहितं सोत्प्रासम्—सोपहासमपीति द्वे सोपहासस्य। मणनं मणितम्, रतौ कूजितं रतिकूजितमिति द्वे रतिकूजितस्य ॥ २१ ॥

न. न. न. न.

अस्पष्ट / असत्य — **अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः।**

न. न. न. न.

सत्य — **सत्यं तथ्यमृतं सम्यग् "अमूनि त्रिषु तद्वति" ॥ २२ ॥**

अथेति—म्लेच्छ्यते स्मेति म्लिष्टम्, न विस्पश्यते स्मेति अविस्पष्टमिति द्वे अप्रका-शितवचनस्य। विगतं तथा सत्यं यस्मादिति वितन्यते वा वितथम्, न ऋतमनृतं वचः वचनमिति द्वे असत्यवचनस्य अथवा अनृतमसत्यं वचो वचनं वितथं स्यादित्येकमसत्य-वचनस्य। सति साधु सत्यम्, तथा सत्ये साधु तथ्यम्, अर्यते स्मेति ऋतम्, सम्यञ्चं संगच्छते इति सम्यक्—समीची क्रियामिति चत्वारि सत्यवचसः। अमूनि सत्यादीनि तद्वति सत्यवति वर्तमानानि त्रिषु त्रिलिङ्गानि भवन्तीति यथा "सत्यः पुमान्, सत्या स्त्री, सत्यं कुलम्" इत्यादयो विज्ञेयाः ॥ २२ ॥

पु. पु. पु. पु. पु. पु. पु.

शब्द — **शब्दे निनादनिनदध्वनिध्वानरवस्वनाः।**

पु. पु. पु. पु. पु. पु.

[illegible] — **स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः।**

पु. पु. पु. पु. पु.

[illegible] — **आरवारावसंरावविरावा (अथ) मर्मरः ॥ २३ ॥**

[illegible]

न.
"स्वनिते वस्त्रपर्णानां, भूषणानां च" शिञ्जितम् ।

शब्द इति—शब्दनं शब्दस्तस्मिन्, निनदनं निनादः, निनदनं निनदः, ध्वन्यते—ध्वननं ति ध्वनिः, ध्वननं ध्वानः, रवणं रवः, स्वननं स्वनः, स्वननं स्वानः, निर्घोषणं निर्घोषः, निर्ह्रादनं निर्ह्रादः, नदनं नादः, निस्वननं निस्वानः, निस्वननं निस्वनः, आरवणमारवः, आरवणमारावः, संरवणं संरावः, विरवणं विराव इति सप्तदश शब्दस्य । अथेति—वस्त्रपर्णानां वस्त्राणां पर्णानां च स्वनिते शब्दे मर्मरातीति मर्मरः स्यादित्येकं वस्त्रपर्णध्वनेः । भूषणानां च ध्वनौ शिञ्ज्यते स्मेति शिञ्जितम्, शिञ्जापीत्येकं भूषणध्वनेः ॥२३ । ½ ॥

पु. पु. पु. पु. न.
वीणाआदि निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ॥ २४ ॥
पु. पु.
का शब्द "वीणायाःक्वणिते प्रादेः" प्रक्वाणप्रक्वणादयः ।

निक्वाण इति—वीणायाः क्वणिते शब्दिते निक्वणनं निक्वाणः, निक्वणनं निक्वणः, क्वणनं क्वाणः, क्वणनं क्वणः, क्वण्यते क्वणनमित्यपीति पञ्च भूषावीणाकिन्नरादिस्वनितस्य । प्रादेःप्राद्युपसर्गात् प्रक्वणनं प्रक्वाणः, प्रक्वणनं प्रक्वणः आदिशब्दादुपक्वणादय इमेपि वीणाक्वणनस्यैव ज्ञेयाः ॥ २४ । ½ ॥

पु. पु. न. न.
कोलाहलः कलकल(स्तिरश्चां) वाशितं रुतम् ॥ २५ ॥
स. पु. न.
स्त्रीप्रतिश्रुत्प्रतिध्वाने गीतंगानमिमे(समे) ॥ २६ ॥

(margin: पुल पक्षियों का शब्द प्रतिध्वनि)

इति शब्दादिवर्गः ॥

कोलाहल इति—कोलनं कोल एकीभावस्तमाहलतीति कोलाहलः, कलनं कलः कलादपि कलः कलकल इति बहुभिःकृतशब्दस्य । तिरोऽञ्चन्ति ते तिर्यञ्चस्तेषां यद्रुतं शब्दनं वाशितम्, वाशितमपीत्येकं खगारावस्य । प्रतिध्वननं प्रतिध्वानस्तस्मिन्, प्रति श्रूयते शब्दं लक्ष्यीकृत्य श्रूयते इति प्रतिश्रुत् स्त्री स्यादित्येकं प्रतिध्वनेः । अगायीति गीतम्, गीयते गानमिमे द्वे समे समानार्थे समानलिङ्गके चेति द्वे गायनस्य ॥ २५ । २६ ॥

इति शब्दादिवर्गविवरणम् ॥

अथ नाट्यवर्गो व्याख्यायते ॥

१पु. पु. पु. पु. पु. पु.

गाने के स्वर निषादर्षभगान्धारषड्जमध्यमधैवताः ।

पु.

पञ्चम (श्चेत्यमीसप्ततन्त्रीकण्ठोत्थिताःस्वराः) ॥ १

निषादेति—निषीदति मनोऽस्मिन्निति निषादः, ऋषति बलीवर्दस्वरसादृश्यं । ऋषभः, गन्धारदेशे भवो गान्धारः, षड्भ्यः नासाकण्ठोरस्तालुजिह्वादन्तेभ्यो जायते षड्जः, मध्ये भवो मध्यमः, धीमतामयं धैवतः, पञ्चानां पूरणः पञ्चमः अमी सप्त स्वरा स्तन्त्रीतः कण्ठाच्चोच्चरन्तीति— "दारवी गात्रवीणा च द्वे वीणे स्वरधारिके" इति वचनात्, वंशमुरजादयस्तु अनुकरणमात्रोपयोगिन इति भावः "षड्जं रौति मयूरो गावो नर्दन्ति चर्षभम् । अजाविकौ च गान्धारं क्रौञ्चो नदति मध्यमम् ॥ पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् । अश्वस्तु धैवतं रौति निषादं रौति कुञ्जर" (इति नारदः) इति सप्तस्वराणामेकैकम् ॥ १ ॥

स.

सूक्ष्मस्वर, मधुरस्वर, काकली "तु कले सूक्ष्मे" ध्वनौ तु मधुरास्फुटे ।

पु. पु. पु.

गम्भीरस्वर, उच्चस्वर, कलो मन्द्रस्तु गम्भीरे तारोत्युच्चै(स्त्रयस्त्रिषु) ॥ २ ॥

काकलीति—सूक्ष्मे कले तु ईषत्कलः काकली, कलते कल्यते वा कलिः ईषत्कलिः काकलिः काकली वा अतएव "साधूदितं काकलिभिः कुलीनैरित्यभिनन्दः प्रयोगः" संगच्छत इत्येकं सूक्ष्मस्वरस्य । मधुरःश्रुतिसुखः सचासावस्फुटोऽव्यक्ताक्षरश्च तादृशे ध्वनौ तु कलनं, कडति माद्यत्यनेनेति वा कल इत्येकं मधुरस्वरस्य । गम्भीरे मेघादिध्वनौ तु मन्दत इति मन्द्र इत्येकं गम्भीरस्वरस्य । अत्युच्चैर्ध्वनौ तु तारयत्यतिक्रामत्यन्यान्शब्दानिति तार इत्येकमत्युच्चस्वरस्य त्रयः कलमन्द्रतारास्त्रिषु विशेष्यनिघ्ना भवन्तीति ॥ २

पु. स. स.

वीणा वीणाविशेष (समन्वितलयस्त्वे)कतालो वीणा तु वल्लकी ।

स. स.

विपञ्ची (सा तु तन्त्रीभिःसप्तभिः) परिवादिनी ॥ ३ ॥

समन्वित इति—सम्यगन्वितो लयो नृत्यगीतवाद्यानां साम्यं यत्र स एकः समताल

१ निषादः [illegible] पयान्तरे । [illegible] । " गान्धारो [illegible] " इति हैमः । [illegible] । षड्भ्यः संजायते यस्मात्तस्मात्षड्ज इति स्मृतः ॥ [illegible] मध्यमः ॥ धीमतामयमित्यत्र [illegible] पञ्चम उच्यते । [illegible]

गानमस्येत्येकतालः कथ्यते इत्येकमेकतालस्य । वेति जायते स्वरोऽस्यामिति वीणा, वल्लत इति वल्लकी, विपञ्चयति विस्तारयति शब्दमिति विपञ्चीति त्रीणि वीणायाः । सैव सप्तभिस्तन्त्रीभिरुपलक्षिता परिवदति स्वरान्, परिवदत्यवश्यमिति वा परिवादिनीत्येकं विशेषवीणायाः ॥ ३ ॥

वीणाशब्द न. न.
मृदङ्ग आदि **ततं "वीणादिकं वाद्य" मानद्धं "मुरजादिकम्"।**
भेरी आदि न. न.
घण्टाझालरिआदि **वंशादिकं तु शुषिरं कांस्यतालादिकं घनम् ॥४॥**

ततमिति—वीणादिकं यद्वाद्यं वादनीयं तत् तन्यते, तायते स्मेति वा ततं स्यादित्येकं वीणादिवाद्यस्य। मुरजादिकं यद्वाद्यं तदानह्यते स्म मुखे चर्मणा वध्यते स्मेत्यानद्धं स्यादित्येकं मुरजादिवाद्यस्य। वंशादिकं तु वंशो वेणुः, आदिना काहलादि। शुषिरिश्छिद्रमस्यास्तीति शुषिरं—सुषिरमपीत्येकं वंशादिवाद्यस्य। कांस्यतालादिकं कांस्यमयस्तालः कांस्यतालः आदिना घण्टादि हन्यते हननं वेति घनं स्यादित्येकं कांस्यतालादिवाद्यस्य ॥ ४ ॥

न. न. न.
बाद्य भेद **"चतुर्विधमिदं" वाद्यवादित्रातोद्यनामकम्।**
मृदङ्ग पु. पु. पु. पु. पु.
मृदङ्ग भेद **मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ॥ ५ ॥**

चतुर्विधमिति—"इदं ततादि चतुर्विधं" 'वाद्यवादित्रातोद्यनामकम्' वाद्यते ध्वन्यते इति वाद्यम्, वाद्यते वादित्रम्, आसमन्तात्तुद्यते ताड्यते इत्यातोद्यमिति वाद्यं वादित्रमातोद्यं नाम यस्य तदिति त्रीणि ततादिचतुष्टयस्य । मृद्यन्ते इति मृदङ्गाः, मुराद्वेष्टनाज्जातो मुरं वेष्टनं जातमेषामिति वा मुरजा इति द्वे मृदङ्गस्य। तेषां भेदास्तु त्रयः अङ्के उत्सङ्गे भव अङ्क्यः, आलिङ्ग्यत इत्यालिङ्ग्यः, ऊर्ध्वं कायति शब्दायत इति ऊर्ध्वकः, तदुक्तम्—"हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः । आलिङ्ग्यश्चैव गोपुच्छो मध्यदक्षिणवामगाः" इति त्रीणि मृदङ्गभेदानाम् ॥ ५ ॥

ढोल नगाड़ा, पु. स. स. पु.
ढक्का, भेरी **स्याद्यशःपटहो ढक्का भेरी (स्त्री) दुन्दुभिः (पुमान्)**
नगाड़ा नफ़ीरी पु. पु. न. पु.
[illegible] **आनकः पटहोऽस्त्री स्यात्कोणो 'वीणादिवादनम्'॥ ६**

स्यादिति—यशोऽर्थः पटहः यशःपटहः, ढक् इति शब्दं करोतीति द्वे ढक्कायाः

[illegible] ॥
[illegible]

बिभेति अस्या रवादिति भेरी भेरिर्वा स्त्री स्यात्, दुन्दुइति शब्देन भातीति धामुभी शब्देनेति वा दुन्दुभिः पुमान्स्यादिति द्वे भेर्याः । आनयति प्राणयति सोत्सहान्करोति योधानिति आनकः, पटेन हन्यते पट इति शब्दं जहातीति वा पटहः अस्त्री स्यादिति द्वे पटहस्य । वीणादि वाद्यते येन धनुराद्याकृतिना स क्वणयते इति कोणः कथ्यत इति वीणादिवादनदण्डस्य ॥ ६ ॥

पु. पु. पु. पु.

वीणा का दण्ड, वीणा की मढ़ी **वीणादण्डः प्रवालः स्यात्ककुभस्तु प्रसेवकः ।**

पु. पु. न.

तुम्बी वीणा का स्वरूप वीणाका बन्धन **कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ॥ ७ ॥**

वीणेति—वीणाया दण्डो वीणादण्डः, प्रकर्षेण वल्यते संव्रियते प्रवालः स्यादिति द्वे वीणादण्डस्य । कं वातं स्कुभ्नाति, कश्च कुश्च कक् तौ भाति प्रकाशयतीति वा ककुभः प्रसेव्यत इति प्रसेवकः, प्रसेवोपीति द्वे वीणादण्डादधः स्थितशब्दगाम्भीर्यार्थचर्मावृत दारुमयभाण्डस्य । वीणाप्रान्तस्थवक्रकाष्ठस्येत्यन्ये—अस्या वीणायाः कायः अलाबुदण्डककुभसमुदायस्तन्त्रीरहितः, कोलतीति कोल्, अम्बते, अम्ब्यते वा अम्बकः कोलश्चासावम्बकश्च कोलम्बक इत्येकं वीणास्वरूपस्य । उपनह्यतेऽनेनास्मिन्वा उपनाहः निबध्यतेनेनास्मिन्वेति निबन्धनमिति द्वे यत्र तन्त्र्यो निबध्यन्ते तस्योर्ध्वभागस्य ॥ ७

पु. पु. पु. पु.

बाजों का भेद **"वाद्यप्रभेदा" डमरुमड्डुडिण्डिमझर्झराः ।**

पु. पु. स. स.

नाचने वाली **मर्दलः पणवोऽन्ये च नर्तकीलासिके (समे) ॥ ८ ॥**

वाद्येति—डमरुमड्डुडिण्डिमझर्झरादयो वाद्यप्रभेदा भवन्ति तत्र डमिति शब्दमियर्तीति डमरुः, डमरुकमपीत्येकं डमरोः । स एव महान्मज्जतीति मड्डुरित्येकं महड्डमरोः डिण्डीति शब्दं मिनोति प्रकाशयतीति डिण्डिम इत्येकं तम्बूराख्यस्य । झर्झतीति, झर्झशब्दं रातीति वा झर्झर इत्येकं झाझाख्यातस्य । मर्दमुपमर्दं लातीति मर्दल इत्येकं मृदङ्गतुल्यवाद्यविशेषस्य । पणं व्यवहारं वाति गच्छतीति पणवः प्रणवोऽपीत्येकं शृंगाद्याख्यातस्य । अन्ये च गोमुखहुडुकादयोऽपि वाद्यप्रभेदाः स्युरिति पृथक् पृथगेकैकं वाद्यविशेषाणाम् । नृत्यतीति नर्तकः, नर्तकी, लसतीति लासकः, लासकीति उभे समे समानार्थे समानलिङ्गे चेति द्वे नर्तक्याः ॥ ८ ॥

न. पु. न.

विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।

पु. पु.

तालः "कालक्रियामानं" लयः साम्यमथाक्रियाम् ॥ ९ ॥

न. न. न. न. न. न.

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।

विलम्बितमिति—विलम्बितादीनि क्रमात्तत्त्वादीनि भवन्ति यथा, विलम्बन्ते करचरणादयोऽत्रेति विलम्बितं, तननं तत्—तदस्यास्तीति तत्त्वं स्यादित्येकं विलम्बितस्य। द्रवन्ति शीघ्रं गच्छन्त्यत्रेति द्रुतम्—ओचनमोघः स्यादित्येकं द्रुतस्य तयोर्मध्ये भवत्वान्मध्यम्—हननं घनं स्यादित्येकं मध्यस्य। कालक्रियामानं कालक्रिययोर्मानं परिच्छेदनं तालः स्यादित्येकं तालस्य। गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यं, लयनं लय. स्यादित्येकं लयस्य। अथेति—अस्त्रियाम् तण्डुना प्रोक्तं ताण्डवम्, नट्यते नटनम्, नटस्य कर्म नाट्यम्, लसितुमर्हं लास्यम्, नर्तितुमर्हं नृत्यम्, नृत्यते नर्तनम्, नृत्तमपीति षट् नृत्यस्य ॥ ९ । ३ ॥

न. न.
नाचना, गाना, बजाना इनका तौर्यत्रिकं "नृत्यगीतवाद्यं" नाट्यमिदं त्रयम् ॥ १० ॥

पु. पु. पु.
एकस्वर नाच- भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंस (श्चेति नर्तकः)।

स.
भेषवाला पुरुष नाचकी वेश्या स्त्रीवेषधारी पुरुषो "नाट्योक्तौ" गणिकाज्जुका ॥ ११ ॥

तौर्येति—नृत्यगीतवाद्यमिदं त्रयं तोरितुमर्हं तूर्यं मृदङ्गमुरजादि तत्र भवं तौर्यम्, त्रयोंऽशा यस्येति त्रिकं, तौर्योपलक्षितं त्रिकं तौर्यत्रिकम्, नटस्येदं नाट्यमिति द्वे नृत्यगीतवाद्यस्य। यः पुरुषः स्त्रीवेषं धर्तुं शीलमस्येति स्त्रीवेषधारी, नृत्यतीति नर्तकः स्यात्तस्मिन् भ्रुवोर्भ्रुवा वा कुंसो भाषणमस्य, भ्रुवा कुंसयतीति वा भ्रकुंसः, भ्रुकुंसः, भ्रूकुंसः, भ्रूकुंसश्चेति त्रीणि स्त्रीवेषधारिनर्तकपुरुषस्य। नाट्योक्तावित्यधिकारः प्रागङ्गारात् या गणिका वेश्या सा अर्जतीत्यज्जुका स्यादित्येकं गणिकायाः ॥ १० । ११ ॥

पु. पु. पु.
बहनोई पण्डित "भगिनीपति" रावुत्तो भावो विद्वानथावुकः।

पु. पु. पु. पु.
बाप राजकुमार जनको युवराजस्तु कुमारो भर्तृदारकः ॥ १२ ॥

भगिनीति—नाट्योक्तौ भगिन्याः पतिर्भगिनीपति, आपननात् तकुत्नोतीत्यावुत्तः स्यादित्येकं भगिनीपतेः। विद्वान् येन भावयति परिभावयतीति भावः स्या- [illegible] ।अथेति—जनकः पिता [illegible] आवुकः स्यादित्येकं पितुः। युवा [illegible] कुमारयतीति कुमारः, [illegible] अर्थभूतो दारको भर्तृ- [illegible] ॥ १२ ॥

पु. पु. स्त्री.
[illegible] राजा भट्टारको देवस्तत्सुता भर्तृदारिका।

स्त्री. स्त्री.
[illegible] देवी कृताभिषेकायामितरासु तु भट्टिनी ॥ १३

राजेति—नाट्योक्तौ राजा भटतीति भट्, टलतीति टारकः, भट्‌ चासौ टारकश्च भट्टं स्वामित्वमृच्छतीति वा भट्टारः स एव भट्टारकः, दीव्यतीति देव इति द्वे राज्ञः। राज्ञः सुता भर्तुर्दारिका भर्तृदारिकेत्येकं राजकन्यायाः। कृताभिषेकायां दीव्यतीति देवीत्येकं बद्धपट्टाया राज्ञ्याः। इतरासु राजपत्नीषु भटतीति भट्टः सोऽस्त्यस्याः भट्टिनी स्यादित्येकं राजपत्नीर्नाम् ॥ १३ ॥

अवध्यकथन, राजाका साला, माता, कन्या, मान्य

न. पु.
अब्रह्मण्य (मवध्योक्तौ) 'राजश्यालस्तु' राष्ट्रियः।
स. स. स. स. पु. पु.
अम्बा माताथ बालास्याद्वासूरार्यस्तु मारिषः ॥ १४ ॥

अब्रह्मण्यमिति—अवध्योक्तौ वधं नार्हतीत्युक्तौ ब्रह्मणि साधु ब्रह्मण्यं, न ब्रह्मण्यमब्रह्मण्यमित्येकं ब्राह्मणाद्यवध्यस्य। राज्ञः श्यालः राष्ट्रेऽधिकृतः राष्ट्रियः स्यादित्येकं राजश्यालस्य। माता अम्ब्यते शब्द्यत इत्यम्बा स्यादित्येकं मातुः। अथेति—बाला कुमारी, बालस्तद्गृह इति वासूरित्येकं कन्यायाः। अर्तु योग्यः आर्यः मारिषतीति मारिषः, मर्षणात्सः नाड्हिंसानिवारकत्वान्मारिषः मार्षश्चेत्येकं मान्यस्य ॥ १४ ॥

जेठी बहन, नाट्यसन्धि, ठीक कहना

स. स. न.
अत्तिका"भगिनी ज्येष्ठा" निष्ठानिर्वहणे समे।
स. स. स.
हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति ॥ १५ ॥

अत्तिकेति—ज्येष्ठा भगिनी अत्तामाता सैव अत्तिका अन्तिकापि वा स्यादित्येकं ज्येष्ठभगिन्याः। नियतं स्थानं निष्ठा, निर्वाहो निर्वहणमित्युभे समे समानार्थे न तु समानलिङ्गे शब्दार्णवे लिङ्गभेददर्शनादिति द्वे मुख-प्रतिमुख-गर्भ-विमर्श-निर्वहणाख्य पञ्चनाटके सन्धयस्तत्र पञ्चमस्य सन्धेः। नीचां प्रत्याह्वानं हिण्डते इति हण्डे स्यादित्येकं नीचाह्वानस्य। चेटीं प्रत्याह्वानं ह्रियन्ते इति हञ्जे स्यादित्येकं चेट्याह्वानस्य। सखीं प्रत्याह्वानं हलतीति हला स्यादित्येकं सख्याह्वानस्य ॥ १५ ॥

भावकरना-सूचना, अभि-प्रायकाप्रकाश, शरीर और मन की चेष्टा

पु. पु. पु. पु.
अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ (समौ)।
पु.म.न. पु.म.न.
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥ १६ ॥

अङ्गेति—अङ्गस्य हरणं स्थानात्स्थानान्तरे नयनमङ्गहारः, अङ्गस्य विक्षेपोऽङ्गुल्यादिविक्षेपः अङ्गविक्षेप इति द्वे नृत्यविशेषनर्तनस्य। व्यनक्तीति व्यञ्जकः, अभिनयत्यर्थं [illegible] इमौ समौ समानार्थौ समानलिङ्गौ चेति द्वे मनोगतभावाभिव्यञ्जकस्य।

१ [illegible] । निष्ठा [illegible] न तु [illegible]" (इति [illegible]
२ [illegible] ॥

अङ्गसत्त्वाभ्यां निर्वृत्ते आङ्गिकसात्त्विके द्वे त्रिषु त्रिलिङ्गयां स्याताम् । अङ्गेन निर्वृत्तं भ्रूविक्षेपादि—सत्त्वेन निर्वृत्तं स्तम्भादि, "निर्वृत्तेऽक्षद्यूतादिभ्यः" इति प्राग्वहतीयष्ठक् । "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका गुणाः" इति क्रमेणैकैकम् ॥ १६ ॥

आठ रस **शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।**

पु. पु. पु. पु.

शृङ्गार रस **बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥ १७ ॥**

शृङ्गारेति—शृङ्गारादयोऽष्टौ रस्यन्ते इति रसाः च शब्दाच्छान्तोपि नवमः, वात्सल्यं दशमश्च तत्र शान्तस्यालौकिकत्वेन, वात्सल्यस्य पुत्रादिस्नेहरूपत्वाद्रत्यात्मकत्वेन च न निर्दिष्टाविति अतएवाष्टानां विवरणं क्रियत इत्याह—शृङ्गं प्राधान्यमियर्तीति शृङ्गारः, शोचन्त्यनेनेति शुचिः, उज्ज्वलति प्रकाशत इत्युज्ज्वलः इति त्रीणि शृङ्गाररसस्य ॥ १७ ॥

पु. पु. न. स. स.

वीर करुणा **उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।**

हास्य स. स. स. पु. पु.

बीभत्स रस **कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः ॥ १८ ॥**

पु. न. पु.स.न. पु.स.न.

या पिदाना **हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ।**

उत्साहेति—उत्साहेन वर्धते, उत्साहं वर्धयतीति वा उत्साहवर्धनः, वीरयति, विशेषेण ईर्ते ईरयति वा वीरः इति द्वे वीररसस्य । करुणः करुणावांस्तस्य भावः कारुण्यम्, करणं करुणा, घ्रियतेऽनयेति घृणा, कृपणं कृपा, दयते रक्षत्यनयेति दया अनुकम्पनमनुकम्पा, अनुक्रोशन्त्यनेनेत्यनुक्रोशोपि स्यादिति सप्त करुणारसस्य अथविति—हसनं हसः, हसनं हासः, हसितुमर्हं हास्यमिति त्रीणि हास्यरसस्य । बीभत्सते बीभत्साऽस्त्यस्येति बीभत्सम्, विकरणं विकृतम् वैकृतोपीदं द्वयं त्रिलिङ्गेषु ज्ञेयमिति बीभत्सस्य ॥ १८ । ½ ॥

---

१ विभावेरनुभावैश्च व्यक्तो वा व्यभिचारिभिः । आस्वाद्यत्वात्प्रधानत्वात्स्थाय्येव तु रसो भवेदित्युक्ते रत्यादिः स्थायिभाव एव सामाजिकैश्चर्व्यमाणो रसपदव्यपदेश्यो भवति तत्र रतिस्थायिभावकः क[illegible] [illegible] स्वक्चन्दनाद्युद्दीपितः कटाक्षाद्यनुभावितो व्रीडादिसंचारितः शृङ्गारः १ उत्सा[illegible] [illegible] [illegible]जनादीनालम्बनतोऽवदान्युपायद्युद्दीपितः प्रतीकारकरणदानाद्यनुभावितो ह[illegible] [illegible] वीरः २ शोकस्थायिभावको मृताद्यालम्बनस्तद्गुणाद्युद्दीपितो रोदनाद्यनुभावि[illegible] [illegible] करुणः ३ [illegible] विस्मयजनकवस्त्वालम्बनो विस्मयकर्माद्युद्दीपित[illegible] [illegible] ४ हासस्थायिभावको विकृताकारालम्बनो वैकृताद्युद्दी[illegible] [illegible] हास्यः ५ भयस्थायिभावको [illegible] [illegible] भयानकः ६ [illegible] [illegible] ७ [illegible] [illegible] ८ [illegible] ॥

पु. न. न. न. न.

आश्चर्य विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ॥ १९ ॥

न. न. न. न. न. न.

भयानक दारुणं भीषणं भीष्मं भीमं घोरं भयानकम् ।

न. न. न. न.

उग्ररस भयंकरं प्रतिभयं रौद्रं तूग्र (ममी त्रिषु) ॥ २० ॥

पु.न. स. स. न. न.

भय चतुर्दश दरत्रासौ भीतिर्भीः साध्वसं भयम् ।

विस्मय इति—विस्मयनं विस्मयः, अदित्याश्चर्यार्थेऽव्ययं तस्य भवनमित्यद्भुत आ इति चर्यतेऽभिनीयत इत्याश्चर्यम्, चित्रयतीति चित्रमपीति चत्वार्यद्भुतस्य । अथो भीरोरिदं भैरवम, दारयति चित्तमिति दारुणम्, भीषयते भीषणम्, बिभेत्यस्मा भीष्मम्, भीमम्, हन्ति, घोरयतीति वा घोरम्, बिभेत्यस्मादिति भयानकम्, करोतीति भयंकरम्, प्रतिगतं भयेन प्रतिभयमिति नव भयानकरसस्य । रुद्रस्येदं, र देवतास्येति वा रौद्रम्, उच्यति क्रुधा सम्बन्ध्यत इत्युग्रमिति द्वे उग्ररसस्य । अमी अ ताद्याश्चतुर्दश तद्वति त्रिषु भवन्तीति—दीर्यतेऽस्मादिति दरः, त्रसनं त्रासः, भयनं भी भयनं भीः, साधूनामसमिति साध्वसम्, भयनं भयमिति षड् भयस्य ॥ १९।२०।

पु.

मन का विकार अर्थ प्रकाशक "विकारो मानसो"भावोऽनुभावो (भावबोधकः)॥२१

पु. पु. पु. पु. स.

गर्व या घमण्ड प्रतिष्ठा या बड़प्पन गर्वोऽभिमानोहंकारो मानश्चित्तसमुन्नतिः ।

विकार इति—मानसो विकारः भावयति करोति रसानिति भावः स्यादित्येकं मन विकारस्य । भावस्य बोधकः सूचको गुणक्रियादिः, अनुभावयत्यनुभावः स्यादित्ये रत्यादिसूचकरोमाञ्चादेः । गर्वणं गर्वः, अभितः सर्वतो मानः अभिमानः, अहमिति करणमहंकार इति त्रीणि गर्वस्य । मत्समो नास्तीति मननं मानः, चित्तस्य समुन्नतिरिति समुन्नतिरिति द्वे अतियोग्यमपिप्रतिचित्तोत्कर्षप्रत्ययस्य ॥ २१ । २ ॥

पु. पु. ३ पु. स.

अपमान अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥

स. स. स. न. न.

[illegible] रीढावमाननावज्ञावहेलनमसूर्क्षणम् ।

न. न. स. स. स. स.

[illegible] मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः ॥ २३ ॥

[illegible]

[illegible]

[illegible]

अनादर इति—आदरणमादरः न आदरः अनादरः, परिभवनं परिभवः, पराभवोपि परिभवनं परीभावः, पराभावोपि, तिरस्करणं तिरस्क्रिया, रेहणं रीढा, अवमानन-मवमानना—विमानना, अवज्ञानमवज्ञा, अवहेलोऽवहेलनम्, न सूर्क्षणमसूर्क्षणमिति नव परिभवस्य। मन्दमक्षं वागादि यत्रेति मन्दाक्षम्, ह्रयणं ह्रीः, त्रपणं त्रपा, व्रीडनं व्रीडा, लज्जनं लज्जेति पञ्च लज्जायाः। सा लज्जा अन्यतश्चेत्तदा अपत्रपा स्यादित्येकं मित्रादेः पुरतोजातलज्जायाः ॥ २२ । २३ ॥

स. स. स.

(सहना पर-धन की चाह) **क्षान्तिस्तितिक्षाभिध्या (तु परस्वविषये स्पृहा)।**

स. स. स.

(असहना दोष लगाना) **अक्षान्तिरीर्ष्यासूया तु "दोषारोपो गुणेष्वपि" ॥ २४ ॥**

क्षान्तिरिति—क्षमणं क्षान्तिः, तितिक्षणं तितिक्षेति द्वे क्षमायाः। परस्वविषये चौर्यादिना स्पृहा तु अभिध्यानमभिध्या इत्येकं परधनहरणचिन्तायाः। न क्षमणमक्षान्तिः, ईर्ष्यणमीर्ष्येति द्वे परोत्कर्षासहिष्णुत्वस्य। गुणेष्वपि दोषारोपणमसूयनमित्यसूया अभ्यसूया च स्यादित्येकमर्थदानादिषु गुणेषु दम्भकत्वादिरूपदोषारोपणस्य॥२४॥

न. पु. पु. पु. पु. स.

(वैर शोक) **वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् (स्त्रियाम्)।**

पु. पु. पु.

(पछतावा) **पश्चात्तापोनुतापश्च विप्रतीसार (इत्यपि) ॥ २५ ॥**

वैरमिति—वीरस्य कर्म वैरम्, विरोधनं विरोधः, विद्वेषणं विद्वेष इति त्रीणि वैरस्य। मन्यते मन्युः, शोचनं शोकः, शोचनं शुक् स्त्रियां स्यादिति त्रीणि शोकस्य। पश्चात्तापनं पश्चात्तापः, अनुतपनमनुतापः, विप्रतिसरणं विप्रतीसारः, विप्रतिसार इत्यपि स्यादिति त्रीणि पश्चात्तापस्य ॥ २५ ॥

पु. पु. पु. पु. पु. स. स.

(क्रोध) **कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौ (स्त्रियाम्)।**

न. पु. पु.

(शील चरित्र) **शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः॥ २६ ॥**

कोपेति—कोपनं कोपः, क्रोधनं क्रोधः, मर्षणं मर्षो न मर्षोऽमर्षः, अन्येषामपीति [illegible] रोषणं रोषः, प्रतिहननं प्रतिघः, रोषणं रुट् रुषापि, [illegible] स्त्रियां स्याताम् 'आपः [illegible]' [illegible] क्रोधस्य। शुचौ [illegible] शीलम् चारित्रमात्रेपि शीलम् [illegible]

[illegible]

[illegible]

[illegible]

चारित्रं चरित्रं चरितं तथेति रत्नकोषादित्येकं शीलस्य । उन्मादनमुन्मादः, चित्त विभ्रमोऽनवस्थानं चित्तविभ्रम इति द्वे उन्मादस्य ॥ २६ ॥

प्रेम — प्रेमा (ना) प्रियता हार्दं प्रेम स्नेहो (ऽथ) दोहदम्

मनोरथ — इच्छा कांक्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः ॥

बड़ी चाहना — कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा (द्वयोः) ।

धर्मचिन्ता मानसी पीड़ा — उपाधि (र्ना) धर्मचिन्ता पुंस्याधि (र्मानसी व्यथा) ॥

प्रेमेति—प्रीणातीति प्रियस्तस्य भावः प्रेमा ना पुमान् स्यात् "प्रेमा स्त्रीस्नेहना रित्युक्तत्वात्क्लीबोपि, प्रियस्य भावो प्रियता, हृदयस्य कर्म हार्दम्, प्रयणं प्रेम, क्लीबम्, स्नेहनं स्नेह इति पञ्च स्नेहस्य। अथेति—दोहमाकर्षं ददातीति दोहदम् "मिच्छामात्रवाच्यपि विशेषेण गर्भिणीच्छायां प्रयुज्यते" एषणमिच्छा, काङ्क्षणं काङ् स्पृहणं स्पृहा, ईहनमीहा, तर्पणं तृट्तृषापि भागुरिमते, वाञ्छनं वाञ्छा, लि लिप्सा, मन एव रथोऽत्रेति मनोरथ इव वेति मनोरथः, कमनं कामः, अभिलषण लाषः, तर्षणं तर्षश्चेति द्वादशेच्छायाः । सतर्षोऽत्यर्थं महांश्चेत्तदा भृशं लसनं,लाल वा लालसा द्वयोः स्त्रीपुंसयोः स्यादित्येकं लालसायाः । उपाधीयतेऽनेनेत्युपाधि पुमान्स्यात्, धर्मस्य चिन्ता धर्मचिन्तेति द्वे धर्मविचारस्य । मानसी व्यथा पीडा आधि दुःखमनेनेत्याधिः पुंसि स्यादित्येकं मनसः पीडायाः ॥ २७ । २८ ॥

स्मरण मिलने की — स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके (समे)

जल्दी उत्साह बड़ा उत्साह — उत्साहोऽध्यवसायस्स्यात्स वीर्यमतिशक्तिभाक् ॥ २९

स्यादिति—चिन्तनं चिन्ता—चिन्तियापि, स्मरणं स्मृतिः, आध्यातमित्याध्यानं त्रीणि स्मरणस्य । उत्कण्ठनमुत्कण्ठा, उत्कलतीति उत्कलिका उभे समे समा समानलिङ्गे चेति द्वे कामादिजस्मृतेः । उत्सहनमुत्साहः, अध्यवसानमध्यव स्यादिति द्वे उत्साहस्य । स उत्साहः अतिशक्तिभाक् चेत्तदा वीरे साधु वीर्यं स्या स्थेऽप्यतिशयितोध्यवसायस्य ॥ २९ ॥

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।

कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ॥ ३० ॥

कपट इति—के मूर्ध्नि पट इवाच्छादकः, पटतीति पटः, कस्य ब्रह्मणोऽपि पटो व्यापको कपटः अस्मी स्यादिति। व्यजन्ति क्षिपन्त्यनेनेति व्याजः, दम्भ्यतेऽनेनेति दम्भः, [illegible]धीयते आरोप्यतेऽनेनेति उपधिः, छाद्यन्तेऽनेनेति छद्म, कितवस्य कर्म कैतवम्, [illegible]त्सिता सृतिः कुसृतिः, निकृष्टा कृतिः क्रिया परप्रतारणरूपापराभीष्टस्य निकर्तनं वेति [illegible]कृतिः, शठतीति शठस्तस्य कर्म शठनं वेति शाठ्यमिति नव कपटस्य। प्रमदनं प्रमादः, अवधानमस्य तस्य भावोऽनवधानतेति द्वे अविमृष्टकृत्यस्य॥ ३०॥

न. न. न. न.

कौतूहलं कौतुकं च कुतुकं च कुतूहलम्।
स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा॥ ३१॥
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः।

कौतूहलमिति—कुतूः चर्मनिर्मितस्नेहपात्रं हलति, हलतीति हलं कृत्वा हलं तदेव कौतूहलम्, कुतूं कायतीति कुतुकं तदेव कौतुकम्—कुतुकम्, कुतूं हलतीति कुतूहल[illegible]मिति चत्वारि कौतुकस्य। विलसनं विलासः (प्रियसमीपगमने यः स्थानासनगमनवि[illegible]लोकितेषु विकारोऽकस्माच्च क्रोधस्मितचमत्कारमुखविक्लवनं स विलासः) विवानं [illegible]वैर्गतिविशेषः, उच्यते समवैत्यत्रेति ओकः, विवोरोकः विब्बोकः (अभिमतप्राप्तावपि [illegible]गर्वादनादरः सापराधस्य स्रक्चन्दनादिना संयमनं ताडनं च विब्बोकः) विभ्रमणं विभ्रमः (मदरागहर्षजनितो विपर्यासो विभ्रमः यथा अनिमित्तमासनादुत्थाया[illegible]न्यत्र गमनम्, [illegible]कथामाक्षिप्य सख्या सहालापनम्, मुधैव रुषितक्रोधौ [illegible] यावत्ता सहसैव तत्परित्यागः, वस्त्राभरणमाल्यानामकारणात् खण्डनं [illegible] योषितां यौवनजो विकारो विभ्रमः) ललनं ललितम् (प्रियं प्रति भावा[illegible] ललितम्) हेलनं हेला (स्पष्टभावसूचको हावो हेलास्यैवानुभावनम्। [illegible] हेलेति वा) लयनं लीः, लियं लातीति लीला (अलब्धप्रियसमा[illegible] स्वचित्तविनोदार्थं प्रियस्य या वेषगतिदृष्टिहसितभणितैरनुकृतिः क्रियते सा [illegible]) इति [illegible]न्येपि ज्ञेयाः। विच्छेदनं विच्छित्तिः (प्रियेण दत्तं [illegible] स्वल्पमपि भूषणं विच्छित्तिः) किलकिञ्चितमत्रेति किलकिञ्चितम् "[illegible] किलकिञ्चितम्". मोटनं मोट्ट. मोट्टायनं स्मेति मोट्टायितम् "[illegible] मोट्टायितम्", कुट्टनं कुट्ट. कुट्टेन [illegible] [illegible] कुट्टमितम् "[illegible] [illegible]" [illegible] "[illegible] व्याजादिना [illegible]" अमी [illegible]

[illegible]

[illegible]

भावजा: शृंगाराद्रत्यादेः भावान्मनोविकाराच्च जाताः क्रियाश्चेष्टा अलंकाराख्या लासादिकाः स्त्रीणां हवनं हावाः हावशब्दवाच्याः स्युरिति ॥ ३१ । १/२ ॥

क्रीड़ामात्र पु. पु.स. पु. स. स. न.

स्वरूप का **द्रवकेलिपरीहासाः क्रीडा खेला नर्म च ॥ ३२ ॥**

छिपाना पु. पु. न. स. स. न.

कूदना **व्याजोपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ।**

द्रव इति—द्रवणं द्रवः, केलनं केलिः, केलीति वा, परिहसनं परीहासः, क्रीडनं क्री० खेलनं खेला, नरणं नर्मेति षट् क्रीडायाः परिहास्यस्य वा । व्यजनं व्याजः परप्रोह० अपदेशनमपदेशः, लक्षणं लक्ष्यम् , लक्षं वेति त्रीणि स्वरूपाच्छादनस्य । क्रीडनं क्री० खेलनं खेला, कूर्यत इति कूर्दनमिति त्रीणि कन्दुकादिक्रीडनस्य ॥ ३२ । १/२ ॥

पसीना पु. पु. पु. पु. स.

मूर्च्छा **घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ॥ ३३ ॥**

आकारगोपन स. स. पु. पु.

दौड़ा दौड़ **अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ ।**

सशब्दहास न.

थोड़ा हास **स्यादाच्छुरितकं(हासः सोत्प्रासः)समनाक् स्मितम्**

घर्म इति—जिघर्ति—घरति वाङ्मनेनेति घर्मः, निदह्यतेऽनेनेति निदाघः, स्विद्यतेऽ० नेति स्वेद इति त्रीणि प्रस्वेदहेतोस्तापस्य । प्रलयनं प्रलयः, नष्टा चेष्टा यस्य, ० भावो नष्टचेष्टतेति द्वे सात्त्विकभावस्य मूर्च्छापरपर्यायस्य वा । अवहिः स्थितिरित्यवहि० आकारस्य शोकादिजनितमुखम्लान्यादेर्गोपनमाकारगुप्तिरिति द्वे आकारगोपन० संवजनं संचलनम् संवेगः, संभ्रमणं संभ्रम उभौ समाविति द्वे हर्षादिना ० त्वरणस्य । उत्प्रासनमुत्प्रासः उत्प्रासेनाधिक्येन क्षेपणेन वा सहितः सोत्प्रासः, ० आच्छुरणमाच्छुरितं तदेवाच्छुरितकं स्यादित्येकं परस्यामर्षजनकहासस्य । स ० मनागल्पः स्मयनं स्मितं स्यादित्येकमल्पहासस्य ॥ ३३ । ३४ ॥

मध्यमहास न. पु. न.

रोमांच होना **"मध्यमः स्याद्वि"हसितं रोमाञ्चो रोमहर्षणम् ।**

रोना न. न. न. पु.स.न. न.

जँभुआना **क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु(त्रिपु)जृम्भणम् ॥ ३५**

[illegible] इति—[illegible] मध्यमो [illegible] विहसनं विहसितं स्यादित्येकं [illegible] । रोम्णामञ्चनं रोमाञ्चः, रोम्णां हर्षणं रोमहर्षणमिति द्वे रोमाञ्च०

[illegible] । [illegible] स्मितं भवेत्" ॥ [illegible]

दनं क्रन्दितम्, रोदनं रुदितम्, क्रोशनं क्रुष्टमिति त्रीणि रोदनस्य । जृम्भणं जृम्भणम्, जृम्भ्यते जृम्भणमिति द्वे मुखादिविकासस्य ॥ ३५ ॥

पु. पु. न. न.

आशाभङ्ग **विप्रलम्भो विसंवादो रिङ्गणं स्खलनं (समे)।**

करना रेंगना स. न. पु. पु. पु.

निद्रा **स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश (इत्यपि) ॥ ३६॥**

विप्रेति—विशेषेण प्रलम्भनं विप्रलम्भः, विरुद्धं सम्यग्वदनं विसंवादः इति द्वे अङ्गीकृतासंपादनस्य । रिङ्गयते रिङ्गितं वा रिङ्गणम्, रिङ्गणं वा स्खल्यते स्खलितं वा स्खलनम् उभे समे समानार्थे समानलिङ्गे चेति द्वे धर्मादेश्चलनस्य । बालानां हस्तपादगमनस्य पिच्छिलादौ पतनस्य वा । निद्राणं निन्दनं निन्द्यतेऽनयेति वा निद्रा, शय्यते शयनम्, स्वपनं स्वापः, स्वपनं स्वप्नः, संवेशनं संवेशः, स्वपनं सुप्तिरित्यपीति पञ्च निद्रायाः॥३६॥

स. स. स. स. स.

आलस्य **तन्द्रीप्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः (स्त्रियाम्)।**

भौंहें टेढ़ी करना स स. स.

टेढ़ा देखना **अदृष्टिः(स्यादसौम्येक्षिणि)संसिद्धिप्रकृती(त्विमे) ३७॥**

तन्द्रीति—तद्द्रातीति तन्द्रा, तन्द्रायाः करणं तन्द्रिः—तन्द्री वा, प्रमील्यते प्रमीलनं वा प्रमीलेति द्वे अत्यन्तश्रमादिना सर्वेन्द्रियासामर्थ्यस्य । कुटनं कुटिः, भ्रुवोः कुटिः भ्रकुटिः, भ्रुकुटिः, भ्रूकुटि., भृकुटीत्यपीति स्त्रियामिति त्रीणि क्रोधादिना ललाटसंकोचनस्य । असौम्ये अननुकूले क्षिणि विरुद्धा दृष्टिरदृष्टिरित्येकं क्रूरदृष्टेः । संसेधनं संसिद्धिः, प्रकरणं प्रकुरुते वा प्रकृतिः इमे इति द्वयोः स्त्रीत्ववोधनार्थमुक्तम् ॥ ३७ ॥

न. पु. पु. पु.

स्वभाव,कांपना **स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ।**

[illegible] पु. पु. पु. पु. पु. पु.

[illegible] **कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥ ३८ ॥**

इति नाट्यवर्गः ॥

स्वरूपमिति—स्वं रूपं स्वरूपम्, स्वो भावः स्वभावः, निसर्जनं निसर्गः "निसर्गः सृष्टौ स्वभावे च" (इति हैमः) इति त्रीणि स्वभावस्य । वेपेति—वेपनं वेपथुः, कम्पनं कम्प इति द्वे [illegible] । क्षणेति—क्षणोति दुःखमिति क्षणः "क्षणः कालविशेषे स्यात्पर्वण्यवसरे [illegible] [illegible] [illegible] वर्णा: " (इति हैमः) उद्धर्षणमिति, [illegible] उद्धर्षः, महनं [illegible] .. उद्भवति [illegible] उद्भवः उत्सु-

[illegible]

[illegible]

वतीति उत्सवः "उत्सवो मह उत्सेके इच्छापसरकोपयोरिति पञ्चोत्सवस्य ॥ ३८ ॥

इति नाट्यवर्गविवरणम् ॥

अथ पातालवर्गो व्याख्यायते ॥

न. न. न. न.

पाताल बिल अधोभुवनपातालबलिसद्म रसातलम् ।

पु न. न. न. न.

या पोलमात्र नागलोकोथ कुहरं शुषिरं विवरं बिलम् ॥ १ ॥

न न. न. न. न. स. स.

पृथ्वी मे पोल छिद्रं निर्व्यथनं रोकं रन्ध्रं स्वभ्रं वपा शुषिः ।

पु.स. पु. पु.स न.

छेदसमेत वस्तु गर्तावटौ "भुवि स्वभ्रे" सरन्ध्रे शुषिरं (त्रिषु) ॥ २ ॥

अथ इति–अधश्च तद्भुवनं च अधोभुवनम् अधः अपि "अधोऽव्ययं स्यात्पाताले" (इति त्रिकाण्डशेषः) पतन्ति पापादत्रेति पातालम्, बलेः सद्म–बलिसद्म रसायारतलं रसातलम्, नागानां लोको नागलोकः, अधोलोकफणिभुवनादयोपीमे पञ्च पातालस्य । कुं हरति कुहं रातीति वा कुहरम्, शुषिरस्यास्तीति शुषिरम्, विवृणोति विव्रियते वा विगतो वरोऽस्मात्–वीनां पक्षिणां वरं वा विवरम्, बिलति भिनत्ति बिल्यते वा बिलम्, छिद्र्यते–छिद्यते वा छिद्रम् "छिद्रं विवररन्ध्रवत् । गर्ते दोषे" (इति हैम.) निश्चयेन व्यथनं भयं चलनं वा यत्रेति निर्व्यथनम्, रोचतेऽत्रेति रोकम्, रमरम् क्रीडा तां धरति, रन्ध्रयतीति वा रन्ध्रम, श्वभ्रयतीति श्वभ्रम्, उप्यतेऽत्रेति वपा, शुष्यत्यत्रेति शुषिः, सुष्ठु स्यतीति सुषिरोपीत्येकादश बिलस्य । भुवि श्वभ्रे, गिरतीति गर्तः, अवन्त्यस्मादित्यवटः अवटिरपीति द्वे भूरन्ध्रस्य । सरन्ध्रे वस्तुनि शुषिरस्यास्तीति शुषिरं त्रिषु त्रिलिङ्गयां ज्ञेयमित्येकं सरन्ध्रवस्तुनः ॥ १ । २ ॥

पु.न. न. न. न. न.

अँधेरा वा अधेरा अन्धकारो (ऽस्त्रियां) ध्वान्तं तमिस्रं तिमिरं तमः ।

न. न.

गाढ़ा अधेरा (ध्वान्ते गाढे) ऽन्धतमसं (क्षीणे) वतमसं (तमः) ॥ ३ ॥

अन्धकार इति–अन्धानमन्धत्वं करोतीत्यन्धकारः स्त्रियां न स्यात्–ध्वन्यते इति ध्वान्तं, तमोऽन्यत्रेति तमिस्रास्त्याश्रयत्वेनास्येति वा तमिस्रम, तिम्यतीति तिमिरम्, [illegible] तमः. [illegible] तमसमपि "तमसं तु निशाचर्म" (इति त्रिकाण्डशेषः) [illegible] । गाढे घने ध्वान्ते अन्धकारे अन्धयत्यन्धं अन्धं च तत्तमश्चेत्यन्धतमसं [illegible] । क्षीणे ध्वान्ते तु अवहीनं तम. अवहीनतमसमिति [illegible] ॥ ३ ॥

[illegible] ॥

न. पु. पु.
चारों ओर अँधेरा नाग नागेश्वर
विष्वक् सन्तमसं नागाः काद्रवेयाः (स्तदीश्वरः)।
पु. पु. पु. पु. १ पु.
नागराज
शेषोऽनन्तो वासुकिस्तु सर्पराजो (ऽथ) गोनसे ॥ ४ ॥
पु. पु. पु. पु.
छोटा साँप अजगर
तिलित्सः स्या (दजगरे) शयुर्वाहस (इत्युभौ)।

विष्वगिति—विष्वक् सर्वतस्तमः समन्तात्तमः सन्तमसं स्यादित्येकं व्यापकतमसः। नगे भवा न गच्छन्तीति वा अगाः न अगाः नागाः, कद्रवा अपत्यानि काद्रवेयाः सर्पेभ्योऽन्ये देवयोनयो अमीति द्वे फणालांगूलवतो नराकारसर्पस्य। तेषामीश्वरस्तदीश्वरः, शिष्यते शेषः "शेषोऽनन्तेत्रवेसीरिण्युपयुक्तेतरेऽपि च। शेषा निर्माल्यदाने स्यात्" (इति हैमः) न अन्तोऽस्येति अनन्त इति द्वे नागाधिराजस्य। अथेति—वसु रत्नं के मूर्ध्नि यस्येति, वसु कायति वा वसुकस्तस्यापत्यं वासुकिः, सर्पाणां राजा सर्पराजः इति द्वे सर्पराजस्य। अथेति—गोरेव नासिका यस्येति तस्मिन् गोनसे, तेलनं तिल् तामेति तिलितं स्यति, तिलि गतिं त्सरतीति वा तिलित्सः स्यादिति द्वे सर्पराजस्य। गिरतीति गरः अजस्य गरः अजगरस्तस्मिन् शेते इति शयुः, वहति—वाहं गतिं स्यतीति वा वाहसः "वाहसोऽजगरेवारिनिर्यासुनिषण्णयोः" (इति हैमः) इति उभौ स्यातामिति त्रीणि अजगरसर्पस्य ॥ ४ ॥ १/२ ॥

पु. पु. पु. २ पु.
बिना विष का डेंड़हा
अलगर्दो जलव्यालः(समौ) राजिलडुण्डुभौ ॥ ५ ॥
पु. पु. पु पु.
पनिहा केंचुल त्यागा हुआ
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः।

अलेति—अलतीति अल्—अर्दतीत्यर्दः अल् चासावर्दश्च निर्विषत्वात्तद्विलः, अलगर्दः, गर्दतीति गर्दः अलश्चासौ गर्दश्चेति वा अलगर्दः अलं गृध्यतीति अलगर्धो वा जलस्थो व्यालः जलव्याल इति द्वे जलव्यालस्य। राजी रेखास्यास्ति राजिलः राजिलः "डुण्डु" इति भणति डुण्डुना भातीति वा डुण्डुभः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे निर्विषहिमुक्तसर्पस्य। मालुरोपर्धा तत्र धानमस्येति मालुधानः "मालुर्नारीभिदजनपे महापद्मे च दृश्यते" (इत्युत्पलिनी) मातुलयतीति

वतीति उत्सवः "उत्सवो मह उत्सेके इच्छाप्रसरकोपयोरिति पञ्चोत्सवस्य ॥ ३८ ॥

इति नाट्यवर्गविवरणम् ॥

अथ पातालवर्गो व्याख्यायते ॥

न. न. न. न.

पाताल बिल **अधोभुवनपातालबलिसद्म रसातलम् ।**

पु न. न. न. न.

या पोलमात्र **नागलोकोऽथ कुहरं शुषिरं विवरं बिलम् ॥ १ ॥**

न न. न. न. न. स. स.

पृथ्वी में पोल **छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।**

पु. स. पु. पु स.न.

छेदसमेत वस्तु **गर्तावटौ "भुवि श्वभ्रे" सरन्ध्रे शुषिरं (त्रिषु) ॥ २ ॥**

अध इति—अधश्च तद्भुवनं च अधोभुवनम् अव. अपि "अधोऽव्ययं स्यात्पाताले" (इति त्रिकाण्डशेषः) पतन्ति पापादत्रेति पातालम्, बलेः सद्म—बलिसद्म, रसायास्तलं रसातलम्, नागानां लोको नागलोकः, अधोलोकफणिभुवनादयोऽपि पञ्च पातालस्य । कुं हरति कुहं रातीति वा कुहरम्, शुषिरस्यास्तीति शुषिरम्, विवृणोति व्रियते वा विगतो वरोऽस्मात्—वीनां पक्षिणां वरं वा विवरम्, बिलति भिनत्ति बिल्यते वा बिलम्, छिद्र्यते—छिद्यते वा छिद्रम् "छिद्रं विवररन्ध्रवत् । गर्ते दोषे" (इति हैमः) निश्चयेन व्यथनं भयं चलनं वा यत्रेति निर्व्यथनम्, रोचतेऽत्रेति रोकम्, रमणं रम् क्रीडा तां धरति, रन्धयतीति वा रन्ध्रम्, श्वभ्रयतीति श्वभ्रम्, उप्यतेऽत्रेति वपा, शुष्यत्यत्रेति शुषिः, सुष्ठु स्यतीति सुषिरोऽपीत्येकादश बिलस्य । भुवि श्वभ्रे, गिरतीति गर्तः, अवन्त्यस्मादित्यवटः अवटिरपीति द्वे भूरन्ध्रस्य । सरन्ध्रे वस्तुनि शुषिरस्यास्तीति शुषिरं त्रिषु त्रिलिङ्ग्यां ज्ञेयमित्येकं सरन्ध्रवस्तुनः ॥ १ । २ ॥

पु.न. न. न. न. न.

अँधेरा
बड़ा अँधेरा **अन्धकारो (ऽस्त्रियां) ध्वान्तं तामिस्रं तिमिरं तमः ।**

न. न.

थोड़ा अँधेरा **(ध्वान्ते गाढे) ऽन्धतमसं (क्षीणे) ऽवतमसं (तमः) ॥ ३ ॥**

अन्धकार इति—अन्धनमन्धस्तं करोतीत्यन्धकारः स्त्रियां न स्यात्—ध्वन्यते स्मेति ध्वान्तं, तमोऽस्त्यत्रेति तमिस्रास्त्याश्रयत्वेनास्येति वा तमिस्रम्, तिम्यतीति तिमिरम्, [illegible]नेति तमः सान्तोऽदन्तश्च तमसमपि "तमसं तु निशाचर्म" (इति त्रिकाण्डशेषः) [illegible] । गाढे घने ध्वान्ते अन्धकारे अन्धयत्यन्धं अन्धं च तत्तमश्चेत्यन्ध[illegible] । क्षीणे ध्वान्ते तु अवहीनं तमः अवहीनतमसमित्यर्थः [illegible] ॥ ३ ॥

[illegible]) ॥

चारों ओर अँधेरा — विष्वक् सन्तमसं नागाः काद्रवेया (स्तदीश्वरः) ।

नाग, नागेश्वर — शेषोऽनन्तो वासुकिस्तु सर्पराजो (ऽथ) गोनसे ॥ ४ ॥

नागराज, गोह्य साँप, अजगर — तिलित्सः स्या (दजगरे) शयुर्वाहस (इत्युभौ) ।

विष्वगिति—विष्वक् सर्वतस्तमः सन्तमसम् [illegible] । नगे भवा न गच्छन्तीति वा अगाः न अगाः नागाः, कद्र्वा अपत्यानि काद्रवेयाः सर्वे-भ्योऽन्ये द्वयोर्नागे [illegible] शिष्यते शेषः "शेषोऽनन्तो[illegible]" (इति हैमः) न अन्तोऽस्येति अनन्त इति [illegible] यस्येति, वसु कायति वा वसुकस्तस्यापत्यं वासुकिः, सर्पाणां राजा सर्पराजः इति द्वे सर्पराजस्य । अथेति—गौरिव नासिका [illegible] स्येति, तिलं गतिं त्सरतीति वा तिलित्सः [illegible] । [illegible] अजस्य गरः अजगरस्तस्मिन् शेते इति शयुः, वहति—वाहं गतिं [illegible] वाहसः "वाहसोऽजगरेवारि निर्यासाद्युतिषण्णकयोः" (इति हैमः) इति [illegible] अजगरसर्पस्य ॥ ४ । १ ॥

विषशून्य डेंड़हा — अलगर्दो जलव्यालः (समौ) राजिलडुण्डुभौ ॥ ५ ॥

करइत, केंचुलीहीन — मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ।

अलेति—लगतीति लग्-अर्दतीत्यर्दः लग् चासावर्दश्च निर्विषत्वात्[illegible], अल-तीत्यलः, गर्दतीति गर्दः अलश्चासौ गर्दश्चेति वा अलगर्दः अलं गृणातीति अलगर्दो वा जलस्थो व्यालः जलव्याल इति द्वे जलव्यालस्य । राजी रेखास्यास्तीति राजि लातीति वा राजिलः "डुण्डु" इति भणति डुण्डुना भातीति वा डुण्डुभः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे निर्विषद्विमुखसर्पस्य । मालुर्गोपसी तत्र धानमस्येति मालुधानः " मालुधानश्चित्रसर्पे महापद्मे च दृश्यते " (इत्युत्पालिनी) मातुलयतीति मातुलः आहन्तीति अहिः मातुलश्चासावहिश्चेति मातुलाहिरिति द्वे चित्रसर्पस्य । अमोचि मुच्यते स्मेति वा मुक्तः—कञ्चुकः नास्ति मुक्तोऽस्येति निर्मुक्तः, मुक्तः कञ्चुको येनेति मुक्तकञ्चुक इति द्वे मुक्तत्वक्सर्पस्य ॥ ५ । १ ॥

---

१ "गोनासायनियोजितागदरजाः" (इति राजशेखर.) ॥

२ "निर्मुक्तोनिर्विष. सर्पो राजिल. परिकीर्तितः" इति स्मरणात् ॥

पु.१ पु. पु. पु. पु. पु.

सर्पमात्र **सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजंगमः ॥ ६ ॥**

पु. पु. पु. पु. पु.

आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।

पु. पु. पु. पु. पु.

कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥

पु. पु. पु. पु.

दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।

पु. पु. पु. पु. पु.

उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ ८ ॥

सर्प इति—सर्पतीति सर्पः, पर्दते—पिपर्त्ति स्वमिति पृदाकुः, भुजतीति भुजः सन् गच्छतीति भुजगः, भुजेन कौटिल्येन गच्छतीति भुजङ्गः, आहन्तीत्यहिः, भुजेन गच्छतीति भुजंगमः, आशीस्तालुगतादंष्ट्रा तस्या विषमस्येति आशीविषः, धरतीति धरः, विषस्य धरः विषधरः, चक्रमस्यास्तीति चक्री, व्याडतीति व्यालः, कुटिलं सर्पतीति सरीसृपः, कुण्डलं कुण्डलाकारतास्यास्ति कुण्डली, गूढाः पादा अस्य, गूढं पादयतीति वा गूढपाद्, चक्षुः श्रवः कर्णोऽस्येति चक्षुःश्रवाः, काकस्येवोदरमस्य—ईषदकतीति काः ईषत्कुटिलगतिमदुदरमस्येति वा काकोदरः, फणास्यास्तीति फणी, दर्व्याकारः फणः करो यस्य दर्वीफणां करोतीति वा दर्वीकरः, दीर्घं पृष्ठमस्येति दीर्घपृष्ठः, गर्हितं दशतीति दन्दशूकः, बिले शेते इति बिलेशयः, उरसा गच्छतीति उरगः, पन्नं पतितं यथातथा गच्छतीति पन्नगः, भोगः फणो वक्रगतिर्वास्यास्तीति भोगी, जिह्मं कुटिलं गच्छतीति जिह्मग, पवनोऽशनं यस्येति पवनाशन इति पञ्चविंशतिः सर्पमात्रस्य ॥ ६ । ७ । ८ ।

पु.स.न. पु.स. पु.म.

सर्प सम्बन्धी फण **त्रिष्वाहेयं "विषास्थ्यादि" (स्फटायान्तु) फणा (द्वयोः)**

पु. पु. पु. पु.२ पु.

केंचुली विषमात्र **(समौ) कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ॥ ९ ॥**

त्रिष्विति—सर्पस्य विषास्थि कञ्चुकादि अहौ भवमाहेयं त्रिषु त्रिलिङ्गयां स्यादित्यर्थः सर्पविषास्थ्यादेः । स्फटतीति स्फटा, फटापि 'तस्यां' फणतीति फणा उभे द्वयोः स्त्रीपुंसयोः स्यातामिति द्वे फणायाः । कञ्चते इति कञ्चुकः, निश्चयेन मुच्यते इति निर्मोकः, उभौ समौ समानार्थौ समानलिङ्गाविति द्वे सर्पत्वचः । क्ष्वेडते मोहयति-भिन्नमनेन वा क्ष्वेडः, गिरति जीवमिति गरमं लातीति गरलम्, वेवेष्टि कायमिति विषमिति पुंसि क्लीबे चेति त्रीणि विषस्य ॥ ९ ॥

१ [illegible] ॥ २ [illegible]

पु. पु. पु.

विषभेद " पुंसि क्लीबे च " काकोलकालकूटहलाहलाः ।

पु. उ. . .

सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥

पु. उ.

दारदो वत्सनाभ (श्च विषभेदा अमी नव) ।

पुंसीति—काकोलतीति काकोलः, कालमपि कूटयति—[illegible] [illegible] कूटो राशिरिवेति वा कालकूटः, हलमिवाचरतीति [illegible] हलाहलः, [illegible] [illegible] पुंसि क्लीबे च स्युः । सुराष्ट्रभवः सौराष्ट्रिकः, [illegible] शौक्लिकेयः, ब्रह्मणः पुत्रः ब्रह्मपुत्रः, प्रदीपयतीति प्रदीपनः, [illegible] दारदः, [illegible] [illegible] नाभिरस्येति वा वत्सनाभः, अमी नव विषभेदा भवन्ति इति [illegible] भेदानाम् ॥ १० । १ ॥

विषवैद्य सांप पु. पु. उ. उ.

कापकडनेवाला विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः ॥ ११ ॥

इति पातालभोगिवर्गः ॥

विषेति—विषमस्यतीति वेत्ति वा वैद्यः विषस्य वैद्यो विषवैद्यः, जाङ्गुली विषविद्यामधीयते वेद वा जाङ्गुल्या दीव्यतीति वा जाङ्गुलिकः [illegible] व्यालं गृह्णातीति व्यालग्राही, अहेस्तुण्डं मुखं तेन दीव्यतीति अहितुण्डिकः—अहितुण्डिको वेति द्वे सर्पग्राहिणः ॥ ११ ॥

इति पातालभोगिवर्गविवरणम् ॥

अथ नरकवर्गो व्याख्यायते ॥

पु. पु. पु. स.

नरक, स्यान्नारकस्तु नरको निरयो दुर्गतिः (स्त्रियाम्) ।

पु. पु.स. पु. पु.

नरकभेद, तद्भेदास्तपनावीचिमहारौरवरौरवाः ॥ १ ॥

प्रेत, पु. न. पु.

वैतरणीनदी संहारः कालसूत्रं (चेत्याद्याः) " सत्त्वास्तु " नारकाः ।

पु. स. स. स.

अलक्ष्मी प्रेता वैतरणी (सिन्धुः) स्यादलक्ष्मीस्तु निर्ऋतिः ॥ २ ॥

---

१ " स्निग्ध भवत्यमृततुल्यमहो कलत्रं हालाहल विषमिवापगुण तदेव " यथा कामपमायिमयेन्द्रिय-कुण्डैर्यद्यपि दुष्कृतहालहलौघः " ॥

स्यादिति—नरति—नृणातीति वा नरकः स एव नारकः मुकुटस्वामिमते तु नरा. कायन्त्यत्रेति नरकः, निर्गतोऽयादिति निरयः, दुर्गमनं दुष्टा गतिर्वेति दुर्गतिः स्त्रि. स्यादिति चत्वारि नरकस्य “ तद्भेदाः तस्य नरकस्य भेदाः ” तपतीति तपनः, नास्ति वीचिः सुखमत्रेति अवीचिः, “ रुरुर्नाम हिंसको प्राणिविशेषः ” महतोरुरोरयं महारौरवः, रुरोरयं रौरवः, संहरणं सम्यग् हारोऽत्रेति वा संहारः “ सम्यग् घातोऽत्रेति संघातो वा ” कालान्ययोमयानि सूत्राण्यत्रेति कालसूत्रमिति आद्यशब्देन तामिस्रान्धतामिस्रासिपत्रवनादयः । तस्य नरकस्य भेदा ज्ञेयाः इति पृथगेकैकं नरकभेदानाम् । नरके भवा नारकाः नरकस्थाः सत्त्वाः जन्तवः प्राणुः, प्रयन्ति स्मेति वा प्रेताः परेता अपि भवन्तीत्येकं नरकस्थप्राणिनाम् । स्यदन्ते आपोऽत्रेति सिन्धुः नारकी नदी, विगतस्तरणिर्यत्र तत्रभवा, विगता तरणिर्नौ यत्रेति वा वैतरणी स्यादित्येकं नरकनद्याः । लक्ष्मीविरुद्धा अलक्ष्मी., नियता ऋतिर्घृणा यस्याः, निर्गता ऋतेः शुभादिति वा निर्ऋतिरिति द्वे अलक्ष्म्याः ॥ १ । २ ॥

१स. स. स. स. स.

नरकमें ढकेलना **विष्टिराजूः कारणा तु यातना तीव्रवेदना ।**

तीव्रपीडा स. स. स. न. न. न.

दुःख या मानसी **पीडावाधाव्यथा दुःखमासनस्यं प्रसूतिजम् ॥ ३ ॥**

व्यथा न. न. न.

शरीर पीडा **स्यात्कष्टं कृच्छ्रमाभीलं (त्रिष्वेषां भेद्यगामि यत्)।**

इति नरकवर्गः ॥

विष्टिरिति—विशति क्लेशम्—विष्णाति क्षिप्यते वेति विष्टिः, आजवत, आभज्यते वेत्याजूरिति द्वे स्त्रियाविति द्वे नरके हठात्प्रक्षेपस्य । कारणमिति कारणा, यातनमिति यातना, वेदनमिति वेदना, तीव्रा चासौ वेदना चेति तीव्रवेदनेति त्रीणि तीव्रदुःखस्य । पीडनं पीडा, बाधनं बाधा, आबाधनमाबाधेति वा “आबाधा वेदना दुःखम्” (इति हलायुधः) व्यथनं व्यथा, दुष्टानि खान्यस्मिन्, दुर्निन्दितं खनति—दुःखयतीति वा दुःखम्, मानसे साधु मानस्यं, मानस्याद्भिन्नममानस्यम्—अमनसो भाव आमनस्यमिति वा प्रसूतेर्जातं प्रसूतिजमिति षट् मनोव्यथायाः । कषति हिंसति कष्टम्, कृन्ततीति कृच्छ्रम्, आभमनाद्भियं भातीति आभीलमिति त्रीणि शरीरपीडायाः । तत्रापि दुःखं स्त्रैणे । एषां मध्ये यद्भेद्यगामि द्रव्यगामि तत्त्रिष्विति ज्ञेयम्—यथा “दुःखासेवा, दुःखमुदी निर्गुणः, सर्वं दुःखं विवेकिन इति” ॥ ३ । ३ ॥

इति नरकवर्गविवरणम् ॥

[illegible] “[illegible]”

[illegible]” (इति [illegible]) ॥

अथ वारिवर्गो व्याख्यायते ॥

पु. पु. पु. पु. पु.
समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
पु. पु. पु. पु. पु. पु.
उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः ॥ १ ॥
पु. पु. पु. पु.
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ।
पु. पु.
भेद (तस्य प्रभेदाः) क्षीरोदो लवणोद (स्तथापरे) ॥ २ ॥

समुद्र इति—समुन्दन्तीति, [illegible] सह मुद्रया वर्तत इति वा समुद्रः, आपो धीयन्तेऽस्मिन्नित्यब्धिः, कु कुत्सितं पारं [illegible] न पारोऽकूपारः, न कूपमृच्छतीति, [illegible] अकूपारः, पारावारौ [illegible] इति—पारादावारश्च [illegible] इति वा पारावारः [illegible], सरितां पतिः सरित्पतिः, उदकानि सन्त्यस्मिन्निति उदन्वान्, उदकानि धीयन्तेऽस्मिन्निति उदधिः, स्यन्दन्त आपोऽत्रेति सिन्धुः, सरो नीरं [illegible] सरस्वान्, सगरस्य [illegible] सागरः, अर्णांसि जलानि सन्त्यत्रेति अर्णवः, रत्नानामाकरो रत्नाकरः, जलानि निधीयन्तेऽस्मिन्निति जलनिधिः, यादसां जलजन्तूनां पतिरिति यादःपतिः, अपांपतिरिति [illegible] । तस्य समुद्रस्य प्रभेदाः—क्षीरमुदकं यस्येति क्षीरोदः, लवणमुदकं यस्येति लवणोदः अपरे प्रभेदाः—इक्षुरसोदः, सुरोदः, दधिमण्डोदः, स्वादूदः, घृतोदश्चेति पृथक् पृथक् [illegible] समुद्रविशेषाणाम् ॥ १ । २ ॥

स.बहु.व. न. न. न. न. न.
जलमात्र आपः[1](स्त्री भूम्नि) वार्वारि सलिलं कमलं जलम् ।
न. न. न. न. न. न.
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
न. न. न. न. न.
कबन्धमुदकं[2] पाथः पुष्करः सर्वतोमुखम् ।
न. न. न. न. न. न. न. न.
अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशंबरम् ॥ ४ ॥
न. पु.न. पु.स.न. पु.स.न.
जलविकार मेघपुष्पं घनरस (स्त्रिपुंसे) आप्यमम्मयम् ।

---

१ आपोभिर्मार्जनं कृत्वेति स्मृते ॥

२ उदकशब्दसमानार्थं उदशब्दो विद्यते । तथा च 'प्रसन्नोदम्' इत्यसंज्ञायामप्युदशब्दः प्रयुज्यते इति कैयट. । 'प्रोक्तं प्राज्ञैर्भुवनममृतं जीवनीयं दकं चेति' हलायुध ॥

आप इति—आप्नुवन्ति—आप्यन्ते वा आपः स्त्रियां बहुत्वेषु आपः सान्तं वारयतीति वार्, वार्य्यतेऽनेनेति वारि, सलतीति सलिलम्, कम्यत इति कमलम्, तीति जलम्, पयते, पीयते वा पयः, कीलां ज्वालामलति वारयति और्वाग्नेः लातीति वा कीलालम्, न मृतं मरणमस्त्यस्मिन्निति अमृतम्, जीव्यतेऽनेनेति भूयते—भवन्त्युत्पद्यन्तेऽनेनेति भुवनम्, वन्यते संभज्यते सेव्यते वा वनम्, कं सुखं तीति कबन्धम्, कमन्धमिति पठित्वा द्वे नामनीति केचिदाहुः—उनत्तीति उदकं दकं वा पातीति पाथः, पुष्णातीति पुष्करम्, सर्वतो मुखान्यस्येति आप्नोति, आप्यते, अम्भते वा अम्भः, ऋच्छतीत्यर्णः, तौतीति तोयम्, पीयते-वेति पानीयम्, नीयते निश्चयेन राति सुखमिति—निर्गतं रादग्नेर्वेति नीरम्, घस्यते वेति क्षीरम्, अम्बते इत्यम्बु, शं वृणोति—शंवं संवरणं रातीति शंवरम्, पुष्पमिवेति मेघपुष्पम्, घनस्य रसो घनरसो घनरसं वेति सप्तविंशतिर्जलस्य। विकारोयमित्याप्यमाप्या वा, अपां विकारोऽम्मयम्—अम्मयीति वा द्वे त्रिपु स्यातां द्वे जलविकारस्य ॥ ३ । ४ । ½ ॥

पु. पु. पु.स. पु.स.

लहर — भङ्गस्तरङ्ग ऊर्मिर्वा (स्त्रियां)वीचि "रथोर्मिषु" ॥ ५

हिलकोरा पुं. पु. पु.

भँवर — महत्सूल्लोलकल्लोलौ स्यादावर्तो (ऽम्भसां भ्रमः)

न. पु. पु. स.

बूंद — पृषन्तिबिन्दुपृषताः (पुमांसो) विप्रुषः(स्त्रियः) ॥ ६

भङ्ग इति—भज्यते इति भङ्गः, तरतीति तरङ्गः, ऋच्छतीत्यूर्मिः, वयति, ऊयते वीचिः उभे वा स्त्रियां स्यातामिति चत्वारि तरङ्गस्य । अथेति—महत्सु ऊर्मिषु वा उत्लोलयन्ति, लोलयतीति वा लोलं, उद्गतश्चासौ लोलश्चेति वा उल्लोलः, कं जलं लोलः कल्लन्तेऽनेनेति वा कल्लोल इति द्वे महातरङ्गस्य । अम्भसां जलानां भ्रमः, आवर्तनमावर्तः स्यादित्येकं जलभ्रमणस्य। पर्षतीति पृषत् बहुत्वे पृषन्ति "अ न्तमनन्त्यम्" बिन्दतीति बिन्दुर्बहुत्वे बिन्दवः, पर्षतीति पृषतः बहुत्वे पृषताः "पृ बिन्दुपृषताः" इति त्रिभिर्द्वन्द्व इत्यन्ये । एते पुमांसः, विगता रुद्धा वा प्रुट् दाहोऽ दिति, विप्रोषणं वा विप्रुट् बहुत्वे विप्रुष. स्त्रियः स्युरिति चत्वारि जलकणस्य ॥५॥

न. पु. पु. पु.

[illegible] चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ।

[illegible] न. न. न. न. पु.स.न

[illegible] कूलं रोधश्च तीरं (च) प्रतीरं (च) तटं (त्रिषु) ॥ ७

[illegible] चक्राणि, [illegible] चक्राणीति वा पुटं [illegible]

[illegible] ([illegible])

[illegible]द्न्तीति पुटभेदाः [illegible] । [illegible]

[illegible]त्रिति भ्रमाः. निर्गमनानि निर्गमाः, [illegible]

[illegible]कस्य, [illegible] वा । [illegible]

[illegible] सान्तोऽदन्तश्च, [illegible]

[illegible] लिङ्गयां स्यादिति पथ्य [illegible] ॥ ७ ॥

न. न. न.

[illegible] पारावारे (परार्वाची तीरे) पात्रं (तदन्तरम्) ।

पु.न. पु.न.

[illegible] द्वीपोऽस्त्रियामन्तरीपं (यदन्तर्वारिणस्तटम्) ॥ ८ ॥

पारेति—परार्वाची तीरे पारावारं [illegible] । [illegible]

[illegible]वार्यत इत्यावारम् [illegible] वा [illegible]

[illegible]तोः पारावारयोरन्तरं मध्यं, [illegible]

[illegible]च । वारिणो [illegible]

[illegible]त्रिति अन्तरीपम् [illegible] अस्त्रियां पुंनपुंसकयोः [illegible] ॥८॥

न. न. न.

जल मध्यका स्थल, बालू का स्थल, कीचड़ (तोयोत्थितं) तत्पुलिनं सैकतं सिकतामयम् ।

पु. पु. पु.न. पु. पु.

निषद्वरस्तु जम्बालः पङ्को (ऽस्त्री) शादकर्दमौ ॥ ९ ॥

तोयेति—तोयोत्थितं यत्स्थलं तत्पुलतीति पुलिनं [illegible]

सिकताः सन्त्यस्मिन्निति सैकतम्, सिकतानां विकारः [illegible]

[illegible]स्य । निषीदन्त्यत्र—निषदनं निषद्यमनं तस्य [illegible] वा निषद्वरः । जमति—[illegible]

जम्बमालातीति वा जम्बालः, पच्यते [illegible] पङ्कः अस्त्री स्यात् । [illegible]

ऽस्मिन्ननेन—शीयते—नश्यति—श्यतीति वा शादः, [illegible] कर्दम इति पञ्च कर्दमस्य ॥ ९ ॥

पु. पु. पु. पु.

नहर, गड्ढा, जल, नाव जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ।

पु.स.न. न. स. न.

नाव्यं (त्रिलिङ्गं नौतार्ये) स्त्रियां नौस्तरणिस्तरिः ॥१०॥

जलेति—जलान्युच्छ्वसन्त्येभिः, जलानामुच्छ्वसनं वेति जलोच्छ्वासाः, परिवह-न्त्येभिः, परिवहनं वेति परीवाहाः परिवाहाश्चेति द्वे प्रवृद्धजलस्य निर्गममार्गस्य सम-धिकजलस्य सर्वतोवहनस्य वा । नौतार्ये नौतरणार्हे नावा तार्यं नाव्यं त्रिलिङ्गं स्यादि-त्येकं नौतरणायोग्यजलस्य । नुद्यते—नयतीति नमनमनतीति वा नौः, नौरेव नौका, तर-

१ उपार्जितानामर्थानां त्याग एव हि रक्षणम् । तडागोदरसंस्थानां परीवाह इवाम्भसामिति दीर्घस्य दीर्घाभावे 'परिवाहो जगतः करोति किमिति माघः' ॥

न्त्यनयेति तरणिः, तरणी वा तरन्त्यनयेति—तरि. तरी चैते त्रयः स्त्रियां स्युरिति नौकायाः ॥ १० ॥

बेड़ा पु.न. पु. पु. पु.न.
सोता
उडुपं (तु) प्लवः कोलः स्रोतो (ऽम्बुसरणं स्वतः)।
उतराई पु. न. स. स.
डोंगी
आतरस्तरपण्यं स्याद् द्रोणी काष्ठाम्बुवाहिनी ॥ ११ ॥

उडुपमिति—उडुनो जलात्पाति—उडूनीव पातीति वा उडुपम्, "उडुपश्चन्द्रभेल" (इति धरणिः) प्लवत इति प्लवः, कोलतीति कोल इति त्रीणि तृणादिनिर्मि तरणसाधनस्य। स्वतोऽम्बु सरणं स्रवतीति स्रोतः स्रोतोपि स्यादित्येकमकृत्रिमजल नस्य। आतरन्त्यनेनेत्यातरः, तरणं तरस्तस्य पण्यं तरपण्यं स्यादिति द्वे नद्यादि देयमूल्यस्य। द्रवतीति द्रोणी द्रोणिर्वा द्रुणातीति द्रुणी द्रुणिर्वा काष्ठा का पुनः पुनरम्बु वहतीति अम्बुवाहिनी, काष्ठा चासावम्बुवाहिनी चेति द्वे काष्ठ काकाराम्बुसेचन्याः ॥ ११ ॥

नाविक याजहाजी पु. पु. पु. पु.
पतवार पकड़ने
सांयात्रिकः पोतवणिक् कर्णधारस्तु नाविकः।
वाला खेवैया पु. पु. पु. पु.
मस्तूल
नियामकाः पोतवाहाः कूपको गुणवृक्षकः ॥ १२ ॥

सामिति—समुदितानां गमनं द्वीपान्तरगमनं वा संयात्रा सा प्रयोजनमस्येति सां यात्रिकः, पोतेनोपलक्षितो वणिक् पोतवणिगिति द्वे वहित्रगामिनो वणिजः। कर्णं श्रोत्रमरित्रं (चेति दुर्गः) तं धरतीति कर्णधारः, नावा तरतीति नाविक इति द्वे नावि कस्य नौपृष्ठदण्डधारकस्य वा। नियच्छन्ति पोतमिति नियामकाः, पोतं वहन्तीति पोतवाहा इति द्वे वहित्रवाहकस्य। कूपं कायतीति कूपकः, गुणानां रज्जूनां वृक्ष इव एव गुणवृक्षक इति द्वे नौमध्यस्थरज्जुबन्धनकाष्ठस्य नौबन्धनकीलकस्य वा ॥ १२ ॥

[illegible] पु. स. न. पु.
[illegible]
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः।
[illegible] न. पु. न. न.
[illegible]
अभ्रिः (स्त्री) काष्ठकुद्दालः सेकपात्रं (तु)सेचनम् ॥ १३ ॥

नौकेति—नौकायां दण्डो नौकादण्डः, क्षिप्यतेऽनयेति क्षेपणी—क्षेपणिः—[illegible] [illegible]दिति द्वे नौकाप्रान्त[illegible]चालनकाष्ठस्य। ऋच्छत्यनेनेत्यरित्रम्, के जले नि[illegible] [illegible] केनिपातक इति द्वे नौ[illegible]चालनकाष्ठस्य। अभ्रतीत्यभ्रिः स्त्री स्यात् [illegible]ति [illegible], काष्ठस्य कुद्दालः काष्ठकुद्दाल इति द्वे पोतादिमलापनय[illegible]

[illegible] ॥
[illegible] ॥

काष्ठादिनिर्मितमुदञ्चनम् । सेचनाय पात्रं सेचनम्, सिच्यतेऽनेनेति सेकपात्रमिति द्वे नौ-स्थजलनिःसारणपात्रस्य ॥ १३ ॥

न.   पु.स्त्री.न.

आधीनाव, (क्लीबे)ऽर्धनावं(नावोऽर्धे)"अतीतनौके"ऽतिनु (त्रिषु) ।

उतरनेवाला,   पु.स्त्री.न.पु.स्त्री.न. पु.स्त्री.न. पु.स्त्री.न.   पु.स्त्री.न.

निर्मल,गन्दा त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ॥ १४ ॥

क्लीब इति—नावोऽर्धे [illegible] । [illegible] [illegible] । अतः [illegible] । [illegible] प्रसन्नः, न [illegible] इति द्वे [illegible] । [illegible] लुषः, कस्य जलस्य [illegible] कलुषः, [illegible] इति त्रीणि मलिनजलस्य ॥ १४ ॥

पु.स्त्री.न. पु.स्त्री.न. पु.स्त्री.न.   पु.स्त्री.न.

गहरा उथला निम्नं गभीरं गम्भीरमुत्तानं (तद्विपर्यये) ।

बड़ा गहरा पु.स्त्री.न.   पु.स्त्री.न पु.   पु.   पु.

मलाह   अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ॥ १५ ॥

निम्नमिति—निमनतीति निम्नम्, गच्छति [illegible] वा गभीरम्—गम्भीरं वेति त्रीणि गम्भीरस्य । तस्य गम्भीरस्य विपर्यये [illegible] दुत्तानमित्येकमुत्तानस्य । अतलस्पर्शे तलस्याधोभागस्य स्पर्शः न [illegible] नास्ति गाधः स्थितिरत्रेत्यगाधमिति द्वे अतिनिम्नस्य । के जले वर्तते [illegible] घातकः कैवर्तस्तस्मिन्—दशति मत्स्यान्, दाश्यते मूल्यमस्मै वेति दाशः [illegible] मत्स्यानिति धीवर इति त्रीणि कैवर्तस्य ॥ १५ ॥

पु.   न.   न.   न.

जाल छतरी   आनायः (पुंसि) जालं स्याच्छणसूत्रं पवित्रकम्[१] ।

स.   स.   न.   न.

टोकरी बसी   मत्स्याधानी कुवेणी स्याद् बलिशं मत्स्यवेधनम् ॥ १६ ॥

आनाय इति—आनयन्ति मत्स्याननेन—आरामन्तान्नायोऽनेनेति वा आनायः पुंसि स्यात् । जले शिष्यते, जलति घनीभवतीति वा जालमिति द्वे जालस्य । शणानीति शणास्तस्य सूत्रम् शणसूत्रम्, पवित्रमुपवीतं तद्वदिवेति पवित्रकमिति द्वे शणसूत्रजालस्य । मत्स्या आधीयन्तेऽत्रेति मत्स्याधानी, कुत्सितं वेणन्ते मत्स्या अस्यामिति कुवेणी स्यादिति द्वे मत्स्यस्थापनपात्रस्य । बलिनो मत्स्यान्छ्यतीति बलिशं डलयोरैक्याद्बडिशमपि विध्यतेऽनेनेति वेधनं मत्स्यानां वेधनं मत्स्यवेधनमिति द्वे बडिशस्य ॥ १६ ॥

१ "इवे प्रतिकृतौ" इति कन् । पवित्राद्विपरीतलक्षणाया सञ्ज्ञाया कः ॥

पु. पु. पु. पु. पु. पु.

मछली / गलफटी मछली — पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।

पु. पु. पु. पु.

या बच्चे — विसारः शकली (चाथ) गडकः शकुलार्भकः ॥ १७ ॥

पृथ्विति–पृथूनि रोमाण्यस्येति पृथुरोमा, झषति–झष्यते वेति झषः, माद्यतीति मत्स्यः, मीनाति–मीयते वेति मीनः, विविधं सरतीति विसारी स एव वैसारिणः, अण्डाज्जायते स्मेत्यण्डजः, विशेषेण सरतीति विसारः, शकलमस्यास्तीति शकलीत्यष्टौ सामान्यमत्स्यानाम् । अथेति–गडतीति गडकः गडोपि वा, शकुलस्यार्भकः शकुलार्भक इति द्वे शकुलार्भकस्य ॥ १७ ॥

पु. पु. पु. पु.

पढिना / सूस — सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः (समौ) ।

पु. पु. पु.स. पु.स.

झिंगना / सहरी — नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी (द्वयोः) ॥ १८

सहस्रेति–सहस्रं दंष्ट्रा यस्येति सहस्रदंष्ट्रः, पाठी पृष्ठं नमयतीति पाठीनः, अवश्यं पठति पाठी द्विजस्तस्येन इवापेक्षितः, हव्यकव्ययोः प्रशस्तत्वाद्वेति द्वे पाठीनमत्स्यस्य । उ विस्म यजनकं रूपमस्यास्ति, ओः शम्भोः रूपमुरूपमस्यास्तीति वा उलूपी, शिशुः शिशुमार स्तस्य प्रतिकृतिरिव शिशुकः उभौ समाविति द्वे सूस इतिख्यातमत्स्यविशेषस्य । नल वनस्थो मीनः नडाभो मीन इति वा नलमीनः तलमीनोपि वा चिलिं विलिं विलाप मिमीते चिलचिमः–चिलीचिमः–चिलीचिमिरिति द्वे नलवनचारिणो मत्स्यविशेषस्य । प्रकृष्ट ओष्ठोऽस्या इति प्रोष्ठी, शफं रातीति शफरी उभे द्वयोः स्त्रीपुंसयोः स्यातामिति द्वे सहरीइतिख्यातमत्स्यस्य ॥ १८ ॥

पु. न. पु.

छोटी मछली / बहुत सी छोटी — क्षुद्राण्डमत्स्यसंघातः पोताधानमथो झषाः ।

पु. पु. पु. पु. पु. पु.

तिमिंगिल — रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥ १९ ॥

पु. न. पु

जलजन्तु — तिमिंगिलादयश्चाथ यादांसि जलजन्तवः ।

पु. पु. पु. पु.

जलजीव भेद — (तद्भेदाः) शिशुमारोद्रशङ्कवो मकरा "दयः" ॥ २० ॥

[illegible]ति– क्षुद्राण्ड[illegible] मत्स्याः क्षुद्राण्ड[illegible]मत्स्यास्तेषां संघातः समूहः पोते[illegible] [illegible]पोतो[illegible] आधीयते[illegible] पोताधानमिति द्वे अण्डादचिरनिर्गतमत्स्यसंघस्य ।

[illegible]

[illegible] ॥

[illegible] इति [illegible] ॥

अप्युदिति—[illegible] मत्स्यविशेषाः [illegible]। [illegible] मज्जतीति मद्गुः [illegible] इति नाम, [illegible] तन्तुं वेष्टयतीति [illegible], [illegible] तिमिङ्गिलगिलतन्दुलादयो [illegible] यादस्तीति, [illegible] जन्तूनाम् । "[illegible]" [illegible] नक्रः, शङ्कोऽस्मादिति [illegible] मकरः [illegible]

पु. पु. पु. पु. पु.

केकडा, कछुआ स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ।

पु. पु. पु. पु. स्त्री.

घड़ियाल, नाक ग्राहोऽवहारो नक्रस्तु कुम्भीरोऽथ महीलता ॥ २१ ॥

पु. पु. स्त्री. स्त्री.

केंचुआ, गोह गण्डूपदः किञ्चुलको निहाका गोधिका (समे) ।

स्यादिति—कुलति, कौलीरेण, [illegible] लोस्तां रातीति वा कुलीरः, [illegible] वर्णाटलतीति वा कर्कटः स एव कर्कटकः इति [illegible] । [illegible]ऽन्येति कूर्मस्तस्मिन्, काम्यते, के जले मठतीति वा कमठः, [illegible] इति त्रीणि कच्छपस्य । गृह्णातीति ग्राहः, [illegible] इति द्वे ग्राहस्य । न क्रामति दूरस्थलमिति नक्रः, [illegible] इति द्वे नक्रस्य । अथेति—[illegible] महीलता, गण्डौ [illegible] पदान्यस्येति गण्डूपदः, किञ्चित्कुलुस्पतीति किञ्चुलः स एव किञ्चुलकः इति त्रीणि 'केचुआ' इति ख्यातस्य । नियतं [illegible] निहाका, [illegible] गोधा सैव गोधिका इति द्वे 'गोह' इति ख्यातायाः ॥ २१ । ३ ॥

स्त्री. स्त्री.

जोंक रक्तपा तु (जलौकायां) "स्त्रियां भूम्नि" जलौकसः २२॥

पु. स्त्री. पु.न. पु.न.

सीपी, शंख मुक्तास्फोटः (स्त्रियां) शुक्तिः शङ्खः स्यात्कम्बु (रस्त्रियाम्)

पु. पु. पु.स्त्री. स्त्री.

छोटाशंख, घोंघा क्षुद्रशङ्खाः शङ्खनकाः शम्बूका जलशुक्तयः ॥ २३ ॥

१ "ग्राहो ग्रहे जलचरे" (इति हैमः) ॥
२ "नक्र नासाग्रदारुणोः" नक्रो यादसि (इति हैमः) ॥
३ "जलौकापि जलौका स्याज्जलूका जलजन्तुका" (इति तारपालः) ॥

रक्तपेति—जलमोकोऽस्या जलौका—जलोका—जलूकापि तस्यां रक्तं पिवतीति रक्तपा, जलमोको यासामिति जलौकसः स्त्रियां भूम्नि बहुत्वे जलं तदोकश्चास्तीति जलौकस एकवचनमदन्तत्वं चोपपाद्यमिति मुकुटादयोपीति त्रीणि जलौकायाः। मुक्ताः स्फुट न्त्यत्रेति मुक्तास्फोटः, शुच्यति, शोचति, शोकतीति वा शुक्तिः स्त्रियां स्यादिति द्वे शुक्तिकायाः। शं खनति, शङ्खमस्य, शाम्यत्यलक्ष्मीमिति वा शङ्खः, काम्यते इति कम्बुरेता वस्त्रियां पुंनपुंसके स्यातामिति द्वे शङ्खस्य। क्षुद्राश्च ते शङ्खाश्चेति क्षुद्रशङ्खाः, शङ्खं शङ्खनास्त एव शङ्खनकाः,शङ्खस्य नखा इव शङ्खनखा अपि शं खनन्तीति शङ्खनास्तए शङ्खनका वेति द्वे क्षुद्रशङ्खस्य। शाम्यन्तीति शम्बूकाः, जलजाः शुक्तयो जलशुक्तयइ द्वे शम्बूकानाम् ॥ २२ । २३ ॥

मेंढा या मेंढक, पु. पु. पु. पु. पु. पु.
छोटे कीड़े, **भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः।**
मेंढकी, स. स. स स. स. स.
कछुई **शिली गण्डूपदी भेकी वर्षाभ्वी कमठी दुलिः ॥ २४ ॥**

भेक इति—बिभेतीति भेकस्तस्मिन्, मण्डति, मण्डयति जलाशयमिति वा मण्डूक वर्षासु भवतीति वर्षाभूः, शाडते, शालते वा शालूरः सालूरश्च, प्लवते इति प्लव, दृणाति शब्दैः कर्णाविति दर्दुरइति षट् मण्डूकस्य। शिलतीति शिलस्तज्जातीयातद्भार्या वेति शिली, गण्डो ग्रन्थयः पदान्यस्य तद्भार्या तज्जातीया वेति गण्डूपदी इति द्वे किंचुलकभार्यायाः, क्षुद्रकिञ्चुलकजातेर्वा। भेकस्य भार्या तज्जातीया वेति भेकी, वर्षाभ्वी इत्यसाधु ङीन्विधायकाभावात्स्त्रियामपि वर्षाभूरित्येव अन्ये तु गौरादित्वान्ङीप- मिच्छन्ति अतएव भागुर्यमरमालयो. 'वर्षाभ्वी' इति दृश्यते, इति द्वे मण्डूक्याः क्षुद्रमण्डूकस्य वा। कमठजातीया कमठस्य भार्या वेति कमठी, दोलतीति दुलिरिति द्वे कच्छप्याः ॥ २४ ॥

स. पु. स.
मद्गुरी जोंकभेद **(मद्गुरस्य प्रिया)शृङ्गी दुर्नामा दीर्घकोशिका।**
जलाशय पु. पु. पु.
कुण्ड: **जलाशया जलाधारा (स्तत्रागाधजलो)ह्रदः ॥ २५ ॥**

मद्गुरस्येति—मद्गुरो मत्स्यभेदः योग्यतया सादृश्याद्वा तस्य प्रिया भार्या शृणातीति शृङ्गी, मद्गुरप्रियापीत्येके मद्गुर्याः। दुर्निन्दितं नामास्या इति दुर्नामा—दुर्नाम—दुर्नाम्नी, दीर्घः कोशो यस्या दीर्घकोशिका, दीर्घकोषिका वा इति द्वे 'फिनाई' इति ख्यातायाः। जलमाशेरते यस्मिन्निति, जलान्याशेरते निपुन्त्यत्रेति वा जलाशयाः, जलानि [illegible] जलाधाराः जलस्याधारा जलाधारा इति द्वे जलाशयस्य। तत्र तेषु मध्ये अगाधं जलं यत्र स तत्रागाधजलः ह्रादते शब्दायते, पृषोदरादित्वाद्ध्रस्वे च ह्रदः इत्येकं [illegible] ॥ २५ ॥

पु. न.

चरही या आहावस्तु निपानं (स्यादुपकूपजलाशये) ।

पु. पु. पु. पु.न.

घाऊ कूयां पुंस्येवान्धुः प्रहिः कूप उदपानं तु (पुंसि वा) ॥ २६ ॥

आहाव इति—उपकूपजलाशये [illegible] आहूयन्तेऽस्मिन्नित्याहावः, निपिबन्ति-न्त्यस्मिन्निति निपानं स्यादिति द्वे कूपसमीपस्थितजलाधारस्य । [illegible] अन्धुः, प्रहियत इति प्रहिः, [illegible] कूपः एते त्रयः पुंस्येव भवन्ति । [illegible] पुंसि स्यादिति चत्वारि कूपस्य ॥ २६ ॥

गड़ारी
जगति
मुखरिया
बिना बनाया
तालाब

स्त्री. स्त्री. पु.

नेमिस्त्रिकास्य वीनाहो (मुखबन्धनमस्य यत्) ।

न. न. न.न. न.न.

पुष्करिण्यान्तु खातं स्यादखातं देवखातकम् ॥ २७ ॥

नेमिरिति—अस्य कूपस्य [illegible] नेमिः, [illegible] इति द्वे कूपस्यान्तरे रज्ज्वादिधारणार्थदारुयन्त्रस्य । अस्य कूपस्य मुखबन्धनं यत्, [illegible]-नेति वीनाहः विनाहश्चेत्येकं कूपमुखे इष्टकादिभिर्बन्धनस्य । पुष्कराणि [illegible] पुष्करिणी तस्यान्तु अखानीति खातं स्यादिति द्वे [illegible] । [illegible]-खातम्, देवेन खातं देवखातं तदेव देवखातकम् "अखातो देवखातकः" इति पुंस्का-ण्डेऽमरदत्तात्पुंस्यपीति द्वे अकृत्रिमजलाशयस्य [illegible] वा ॥ २७ ॥

पु. पु.न. पु. स्त्री. न.

तलाव
बड़ा सरोवर
छोटा सरोवर
बावड़ी

पद्माकरस्तडागो (ऽस्त्री) कासारः सरसी सरः ।

पु. पु.न. न. स्त्री. स्त्री.

वेशन्तः पल्वलं चाल्पसरो वापी (तु) दीर्घिका ॥ २८ ॥

पद्मेति—पद्मानामाकरः पद्माकरः, तडयते तडागः, तडाकश्च अस्त्री स्यात् । तटम् अकति, अगति वा तटाकः तटागश्चेति द्वे सपद्मागाधजलाशयस्य । कासते, ईषत्सारो-ऽस्य, कासमृच्छतीति वा कासारः, स्रियते इति सरसी, सरतीति सरः "सरो नीर-तडागयोः" (इति कोषान्तरम्) । इति त्रीणि कृत्रिमपद्माकरस्य । पञ्चापि सरो-मात्रस्येत्यन्ये । विशन्ति भेकादयोऽत्रेति वेशन्तः, पलतीति पल्वलम्—पल्वलश्च । अल्पं च तत्सरश्च अल्पसरः इति त्रीणि पल्वलस्य । उप्यन्ते पद्माद्यस्यामिति वापी—वापिरपि दीर्घा इव दीर्घिकेति द्वे वापिकायाः ॥ २८ ॥

न. स. पु.

खाई बाँध **खेयन्तु परिखाधार(स्त्वम्भसां यत्र धारणम्) ।**

न. न. पु. स. स.

थावला **स्यादालवालमावालमावापोऽथ नदी सरित् ॥ २९ ॥**

स. स. स. स. स.

नदी **तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।**

स. स. स. स. —स.

स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा ॥ ३० ॥

खेयमिति—खन्यते इति खेयम्, परितः खन्यत इति परिखेति द्वे दुर्गादिपरितः र तस्य । यत्र अम्भसां जलानां धारणं भवति तत्र आध्रियते जलमस्मिन्नित्याधारः दित्येकं बाँध इतिख्यातस्य । आसमन्ताज्जलस्य लवमालातीति आलवालम्, लव लाति तद्भिन्नं नञ्समासे अलवालो ह्रस्वादिरित्यन्ये। आवलतेऽम्भोऽनेन, आईषत्वा वृक्षा अत्रेति आवालम्, आवपन्ति जलमत्रेत्यावाप इति त्रीणि वृक्षमूलकृतजला रस्य । अथेति—नदतीति पचाद्यचि 'नदट्' इति टित्त्वनिपातनात् 'टिड्ढेति' ङाप नदी, सरतीति सरित्, तरङ्गाः सन्त्यस्यामिति तरङ्गिणी, शैवलमस्त्यस्यामिति शैवलिनी, तटमस्त्यस्या इति तटिनी, ह्रदाः सन्त्यस्यामिति ह्रदिनी, ह्रादिन्यपि। धुनोतीति धुनी, स्रोतांसि सन्त्यस्या इति स्रोतस्वती, स्रोतस्विन्यपि । द्वीपमस्त्यस्यामिति द्वीपवती, स्रवतीति स्रवन्ती, निम्नं गच्छतीति निम्नगा, अपां समूह आपं तेन गच्छतीत्यापगा—अपगापीति द्वादश नद्याः ॥ २९ । ३० ॥

स. स. स. स.

गंगा **गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।**

स. २ स. स. स.

भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥ ३१ ॥

गङ्गेति—गच्छन्ति पापान्यनयेति गङ्गा, विष्णुः पदं स्थानं यस्या इति विष्णुपदी, जह्नोः राजर्षेस्तनया जह्नुतनया, सुराणां निम्नगा सुरनिम्नगा, भगीरथस्येयं भागीरथी, त्रीन्पथो गच्छति—त्रयाणां पथां समाहारस्त्रिपथं तेन गच्छतीति वा त्रिपथगा त्रीणि स्रोतांसि यस्यास्त्रिस्रोता, भीष्मं सूते इति भीष्मसूरपीत्यष्टौ गङ्गायाः ॥ ३१ ॥

---

१ "[illegible]" इति प्रयोगादर्शनादिः । [illegible] " इति [illegible]रिति ॥

२ [illegible] । [illegible] त्रिपथगा [illegible]"

स. स. स. स.
यमुना — कालिन्दी सूर्यतनया यमुना शमनस्वसा ।
स. स. स. स.
नर्मदा — रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥ ३२ ॥

कालिन्दीति—कलिन्दस्येयं कालिन्दी, सूर्यस्य तनया सूर्यतनया, [illegible] शमनस्य स्वसा शमनस्वसेति चत्वारि यमुनायाः । [illegible] नर्मदा, सोमात्सोमवंशजात्पुरूरवस उद्भवति, सोमोद्भवा [illegible] वा सोमोद्भवा, मेकलस्य [illegible] ॥ ३२ ॥

नदी विशेष स. स. स. स.
कार्तवीर्य की — करतोया सदानीरा बाहुदा सितवाहिनी[1] ।
नदी सतलज स. स. स. स.
व्यासनदी — शतद्रुस्तु शुतुद्रिः स्याद्विपाशा तु विपाट् (स्त्रियाम्) ॥ ३३ ॥

केति—करस्य तोयं तदत्रास्तीति करतोया, सदा नीरं यस्याः, सदानीरेति [illegible] यायाः । [illegible] बाहुं ददातीति [illegible] बाहुदा, सिताश्च ते वाहाश्च ते सन्त्यस्यामिति सितवाही अर्जुनस्येयं [illegible] द्वे बाहुदायाः । वसिष्ठभयात् शतधा द्रवतीति शतद्रुः, [illegible] शुतुद्रिः स्यादिति द्वे शतद्रोः । विपाशयति वसिष्ठस्य पाशं मोचयतीति विपाशा, विपाशयतीति विपाट् [illegible] स्त्रियां स्यातामिति द्वे विपाशायाः ॥ ३३ ॥

शोणभद्र पु. पु. स्त्री.
नहर — शोणो हिरण्यवाहुः स्यात्कुल्या (ल्पा कृत्रिमा सरित्) ।
शरावती, वेत्रवती स. स स. स.
चन्द्रभागा, सरस्वती — शरावती वेत्रवती चान्द्रभागी[2] सरस्वती ॥ ३४ ॥
कावेरी, नद्यादि स. पु. पु.
संगम — कावेरी (सरितोऽन्याश्च) संभेदः सिन्धुसंगमः ।

शोण इति—शोणतीति शोणः, हिरण्यं वाहावस्य, हिरण्यं वहतीति वा हिरण्यवाहुः—हिरण्यवाहश्चेति द्वे शोणभद्रस्य । अल्पा कृत्रिमा सरित् नदी कुले प्राणिगणे, कुटुम्बे, दाम्पत्ये वा साधुरिति कुल्येत्येकं कृत्रिमस्वल्पनद्याः । शरा: सन्त्यस्यामिति

---

१ "प्रथमं कर्कटे देवी त्र्यहं गङ्गा रजस्वला । सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी" (इति स्मृतेः)॥

२ चन्द्रभागयोः पर्वतयोरियम्, तत्प्रभवत्वात् "तस्येदमित्यणि" टिड्ढेति ङीप् प्राप्तः चन्द्रभागाभ्यामिति बह्वादिगणसूत्रान्न भवति स्वरूपयोरविशेषादिति ॥

शरावती, वेत्राणि सन्त्यस्यामिति वेत्रवती, चन्द्रभागयोः पर्वतयोरियं चान्द्रभागा चन्द्रभागा, चान्द्रभागी—चन्द्रभागी, "चन्द्रभागा चान्द्रभागा चान्द्रभागी सा मता । चन्द्रभागी च सैवोक्ता" (इति द्विरूपकोषः) सरांसि सन्त्यस्यामिति सरस्वती, कस्य जलस्य वेरं शरीरं तस्येयम्, ईषद्वेरमस्या वेति कावेरी, अन्याः कौशिकी गण्डकी, चर्मण्वती, तापी, तपती, गोदावर्यादयः सरितो नद्यः सन्तीति । संभिद्य मिलन्त्यत्रेति संभेदः, सिन्ध्वोः संगमः सिन्धुसंगम इति द्वे नद्यादिसंगमस्य ॥ ३४।३

पु.स.

पनारा (द्वयोः)प्रणाली(पयसःपदव्यां) त्रिषु तूत्तरौ ॥ ३५ ॥

दाविक पु.स.न. पु.स.न.

सारव (देविकायां सरय्वां च) भवेदाविकसारवौ ।

द्वयोरिति—पयसो जलस्य पदव्यां निर्गमनमार्गे प्रणल्यत इति प्रणाली द्वयोः स्त्रीपुंसयोः स्यादित्येकं प्रणालस्य । इतः परमुत्तरौ देविकायां सरय्वां च भवेऽर्थे वर्तमानौ दाविकसारवाविति । दीव्यतीति देविका तस्यां भवो दाविकः,सरतीति सरयुः—सरयूः तस्यां भवः सारवः उभौ त्रिषु त्रिलिङ्गयां स्यातामित्येकैकं क्रमेण ॥ ३५ । ३ ॥

न. न. न. न.

कुई, सफेद कमल, सौगन्धिकन्तु कह्लारं हल्लकं रक्तसन्ध्यकम् ॥ ३६ ॥

न. न. न.

लालकमल, कफूला, स्यादुत्पलं कुवलय (मथ) नीलाम्बुजन्म (च) ।

नील कमल, न न. न.

सफेद कमल इन्दीवरं (च) नीलेऽस्मिन् (सिते) कुमुदकैरवे ॥ ३७ ॥

सौगन्धिकमिति—सुगन्ध्येव, शोभनो गन्धः प्रयोजनमस्येति वा सौगन्धिकम्, कस्य जलस्य हार इव, के ह्लादते वेति कह्लारमिति द्वे शुक्लकह्लारस्य । हल्लति, हल्लनं हल्लं कातीति वा हल्लं तदेव हल्लकम्, रक्तं सन्ध्येव, रक्तान्सन्धीनकतीति वा रक्तसन्ध्यकमिति द्वे रक्तकह्लारस्य रक्तवर्णत्रिकालविकासिपुष्पस्य वा । उत्पलतीति उत्पलम्, कोर्वलयमिव कुवलयम् चन्द्रविकाशि, "इन्दोरस्य च मण्डलं कुवलयालंकारकारि भुवनं" [illegible] । कौ वलते "कुवलम्" कुवलं कुवमपि "कुवलं तूत्पलं कुवम्" (इति [illegible]) इति द्वे सामान्येन कमलकुमुदादीनाम् । अथेति—अस्मिन्नीले उत्पले नीलं च तदम्बुजन्म चेति नीलाम्बुजन्म, इन्दतीति इन्दिरिन्दी वा लक्ष्मीस्तस्या वरमिष्टमिति [illegible] इन्दीवरमपीति द्वे नीलोत्पलस्य । सिते उत्पले कौ मोदत इति कुमुदम्, [illegible] कैरवम् "कैरवं चन्द्रकान्तं गर्दभं कुमुदं [illegible]" (इति [illegible]) इति द्वे श्वेतोत्पलस्य ॥ ३६।३७ ॥

न. स्त्री. स्त्री.

...रन्द या ...मलकन्द — शालूक(मेषां कन्दः) स्याद्वारिपर्णी तु कुम्भिका ।

स्त्री. न. पु. स्त्री.

...इन ...वार — जलनीली तु शैवालं शैवलोऽथ कुमुद्वती ॥ ३८ ॥

...मुदिनी ...मलिनी — स्त्री. स्त्री. स्त्री. स्त्री.

कुमुदिन्यां नलिन्यां बिसिनी पद्मिनी (मुखाः) ।

शालूकमिति—एषां सौगन्धिकादीनां कन्दो मूलं शालूकं स्यादित्येकं कमलकन्दस्य । वारिणि पर्णान्यस्याः, वारि पिपर्तीति वारिपर्णी, कुम्भोऽस्त्यस्याः कुम्भिका इति द्वे जलकुम्भिकायाः । जलं नीलयतीति जलनीली, जले शेते लिङ्गमिति शैवालम्—शैवलः—शेवलः—शेवालः—शैवालमिति त्रीणि शैवालस्य । अथेति—कुमुदिन्यां कुमुदान्यत्र देशे सन्तीति कुमुद्वती, कुमुदिनीति द्वे कुमुदपुष्पदेशस्य कुमुदलताया वा । नडाः सन्त्यत्र, नलमत्रास्तीति वा नलिनी तस्यां बिसमस्त्यस्या बिसिनी, पद्ममस्त्यस्याः पद्मिनी, मुख-शब्दादाद्यर्थान्मृणालिनी—कमलिनी—पुटकिनीत्यादयो ग्राह्याः । इति त्रीणि पद्मसंघातस्य कमलिन्या वा ॥ ३८ । ३ ॥

पु.न. न. न. न.

कमल — (वा पुंसि) पद्मं नलिनमरविन्दं महोत्पलम् ॥ ३९ ॥

न. न. न. न.

सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।

न. न. न. न.

पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥ ४० ॥

न. न. न. न.

बिसप्रसूनराजीवपुष्कराम्भोरुहाणि (च) ।

वेति—पद्यत इति पद्मं वा पुंसि स्यात् । नलतीति नलिनम्, अरं शीघ्रं क्षिप्तता विन्दति अराकाराणि पत्राणि विन्दति वेत्यरविन्दम्, महच्च तदुत्पलं चेति महोत्पलम्, सहस्रं पत्राण्यस्येति सहस्रपत्रम्, काम्यते, कं जलमलतीति वा कमलम्, शतं पत्राण्य-

---

१ " शेवलश्चैव शेवालः शैवलो जलनीलिका " (इति वाचस्पतिः) ॥

२ " कुमुद्वती कैरविण्यां दयितायां कुशस्य च " (इति कोशान्तरम्) ॥

३ " नलःपोटगलेऽराजि पितृदेवे कपीश्वरे । नली मन शिलायां तु नलिनेऽपि नल मतम् " (इति विश्व) नलिनी पुनः । " पद्माकरे गङ्गाब्जिन्यो. " (इति हैमः) ॥

४ " पद्मिनी पद्मसंघाते स्त्रीविशेषे सरोऽम्बुजे " (इति मेदिनी) ॥

५ सरसिरोहतीति विग्रहे " तत्पुरुषे कृति बहुलम् (६ । ३ । १४) इत्यलुकि ह्रस्वे कारोऽपि । तथा च भारविः " अयमच्युतस्य वचने. सरसिरुहजन्मनः " इति मुकुट. ॥

स्येति शतपत्रम् "शतपत्रः शिखण्डिनि, दार्वाघाटे सारसे च कमले तु नपुंसकम्" (इति विश्वः) कुशे जले शेते कुशेशयम्, पङ्के रोहतीति पङ्केरुहम्, "तामरं ... " (इति रुद्रः). तामरे जले सस्तीति, ताम्यते वेति तामरसम्, सरसि भवं सारसम्, सरस्यां रोहतीति सरसीरुहम्—सरसि रोहतीति-विग्रहे सरसिरुहम्, सरोरुहमपि। बिस-प्रसूनम् विसप्रसूनम्, केसरस्य राज्यस्यास्तीति राजीवम्, पुष्णातीति पुष्करम् "पुष्करं द्वीपितीर्थाहिखगरागौपधान्तरे। तूर्य्यास्येऽसिफले काण्डे शुण्डाग्रे खे जलेऽम्बुजे" (इति हैमः) अम्भसि रोहत्यम्भोरुहमिति षोडश पद्मसामान्यस्य ॥ ३६ । ४० ॥

सफेद कमल, लाल कमल,
न. न. न.
पुण्डरीकं सिताम्भोज (मथ) रक्तसरोरुहे ॥ ४१ ॥

कमलदण्ड, भसीड़ा,
न. न. स. न.
रक्तोत्पलं कोकनदं नालानाल (मथास्त्रियाम्)।

कमल समूह
पु.न. न. पु.न.
मृणालं विस (मब्जादिकदम्बे) षण्ड (मस्त्रियाम्) ॥ ४२ ॥

पुण्डरीकमिति—पुण्डयतीति पुण्डरीकम्, सितं शुक्लं च तदम्भोजं चेति सिताम्भोजमिति द्वे श्वेतसरोरुहस्य। अथेति—रक्तं तत्सरोरुहं च रक्तसरोरुहं तस्मिन्, रक्तं तदुत्पलं चेति रक्तोत्पलम्, कोकांश्चक्रवाकान्नदति—नादयतीति वा कोकनदमिति त्रीणि रक्तसरोरुहस्य। नलतीति नाला—नाली, नालमिति द्वे उत्पलादिदण्डस्य। अथो. मृण्यते मृणालम्, मृणालीत्यपि "मृणालं नलदे क्लीबं स्त्रीनपुंसकयोर्बिसे" (इति मेदिनी) विस्यति—विशति—विष्णातीति वा विसम्—विशम्—विषमपि "मृणाले तु बिसं विशम्" (इति द्विरूपकोषः) उभे अस्त्रियां पुंनपुंसकयोः स्यातामिति द्वे अब्जादीनां मूलस्य। अब्जादिकदम्बे पद्मादिसंघाते सनोतीति षण्डम् अस्त्रियां पुंनपुंसके स्यात् षण्डः—शण्डनं शण्डस्तालव्यादिरपीत्येकमब्जादीनां समूहस्य ॥ ४१ । ४२ ॥

कमल की जड़, कमल की धूलि, कमल आदि के नये पत्ते, कमलगट्टा
पु. पु. पु. पु.न.
करहाटः शिफाकन्दः किञ्जल्कः केसरो (ऽस्त्रियाम्)।
न. न. पु. पु.
संवर्तिका नवदलं बीजकोषो वराटकः ॥ ४३ ॥

इति वारिवर्गः ॥

करेति—करं हाटयति, कं जलं रहति त्यजति करहं पद्ममटति बहिर्गच्छतीति वा करहाटः "करहाटः पद्मकन्दे देशद्रुमविशेषयोः" (इति हैमः) शिफामूलतरप्ररोहस्तत्सदृशः कन्दो मूलविशेषः। शिफाकन्दः, शिफेति कन्दमिति चेति पृथङ्नामनीत्यन्ये—इति द्वे पद्म...

* "[illegible]" (इति [illegible]) ॥

स्य । किञ्चिज्जलतीति किञ्जल्कः, कं जले लगति, के शीर्यते वा किञ्जल्कः—'किञ्जल्क-केशरौ पुंनपुंसकयोः स्यातु' इति द्वे केशरस्य । संवर्तते संवर्तिः सा एव संवर्तिका "संवर्तिका पत्त्रिका" (इति शोपालितः) संवर्तिका, नवं च तद्दलं चेति नवदलम्, नवाद्यि-रपीति द्वे पद्मादीनां नूतनपत्त्रस्य । बीजस्य कोशः पात्रम् आधारो वा बीजकोशः—'बीजको-शान्व्याप्नोति । निर्गतं दलैः, वरं इलयत्नमतीति वा वराटस्य एव वराटकः स्यात् वराटकः पद्मबीजकोशस्त्रीलिङ्गपदे" (इति शोपालितः) इति द्वे पद्मबीजकोशस्य ॥४३॥

इति वारिवर्गविवरणम् ॥

उक्तवर्गसंग्रहेणोपसंहरन्नाह—

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम् ।
पातालभोगिनरकं वारि चैषां च संगतम् ॥ ४४ ॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ॥ ४५ ॥

उक्तमिति—स्वर्व्योमदिक्कालधीशब्दादिसनाट्यकम् । पातालभोगिनरकं वारि चोक्तम्, एषां स्वर्गादीनां संगतं सम्बन्धवशात्प्राप्तं देवासुरप्रभृतिकं तथोक्तं कथितमिति द्वाभ्यां सम्बन्धः । इत्यमरसिंहकृतौ नामलिङ्गानुशासने नामलिङ्गप्रतिपादके शास्त्रे साङ्गः अङ्गोपाङ्ग-समेतः प्रथमः स्वरादिकाण्डः स्वर्गादिवर्गसमूहः समर्थितः संवर्णित एव आदिशब्देन पातालस्य ग्रहणम् अत्रायं भावः—अस्मिन्काण्डे द्वावेव मुख्यवर्गौ स्वर्गः पातालश्च तत्र नाट्यवर्गपर्यन्तं स्वर्गसाधारणपदार्थानां निरूपणात्स्वर्गवर्गत्वम् । तदुत्तरं पाताल-संगतार्थनिरूपणात्पातालवर्गत्वमिति बोध्यम् ॥ ४४ । ४५ ॥

इति श्रीमदमरसिंहविरचितेऽमरकोषे श्रीमद्रायबहादुरभार्गवप्रयागनारायणाज्ञया द्विजवरशक्तिधरविरचितायां रसालाख्यायां व्याख्यायां प्रथमःकाण्डः समाप्तिमगादिति शिवम् ॥ १ ॥

ॐ परमात्मने नमः ॥

श्रीमदमरसिंहविरचितः
अमरकोषः ।

रसालाख्यया व्याख्यया समेतः ॥

द्वितीयं काण्डम् ।

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

वर्गा इति—इह वक्ष्यमाणे द्वितीयकाण्डे साङ्गोपाङ्गैः अङ्गैर्मृच्छाखानगरादिभिरु[illegible] पाङ्गैर्मृत्स्नावशादिभिः समेतैः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः, नृब्रह्मक्षत्रविट्शूद्रैरुप[illegible] लक्षिताः वर्गाः उदिता वदितुमारब्धा इति ॥ १ ॥

स. स. स. स. स. स. स.
पृथ्वी — भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा ।
स. स. स. स. स. स. स.
धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः ॥ २ ॥
स. स. स. स. स.
सर्वंसहा वसुमती वसुधोर्वी वसुंधरा ।
स. स. स. स. स. स. स. स.
गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही ॥ ३ ॥

भूरिति—भवति, भवत्यस्यां सर्वमिति वा भूः, भवतीति भूमिः—भूमी वा, न च[illegible] अचलाः सन्त्यस्यामिति वा अचला, नास्त्यन्तोऽस्याः, अनन्तो धारकोऽस्त्यस्या [illegible] अनन्ता, रसने, रसोऽस्त्यस्यामिति वा रसा, विश्वं बिभर्तीति विश्वंभरा, तिष्ठती[illegible] स्थिरा, धरति विश्वम्, धरास्सन्त्यस्यामिति वा धरा, धरतीति धरित्री, धरति, ध्रि[illegible] सा धरणी—धरणिर्वा क्षौतीति क्षोणी—क्षोणिर्वा, जिनातीति ज्या, कश्यपस्येयं काश्यपी, क्षियन्तीति क्षितिः, सर्वं सहत इति सर्वंसहा, वसुधनमस्त्यस्यामिति वसुमती, वसु द[illegible] [illegible] वसुधा, उर्वीति—ऊर्णूयते वोर्वी, वसु धारयतीति वसुंधरा, गां जलं त्रायते—[illegible]

१ [illegible] "[illegible] पशवो मृगाः" (इति स्मृतेः) [illegible]
[illegible] । मृगानपि [illegible] मृगादी [illegible]

शैलाः सन्त्यस्यामिति वा गोत्रा, कौति—[illegible]—पृथ्वी चेति [illegible] पृथवी—पृथ्वी, क्षमते क्ष्मा—क्षमापि, क्षरति, [illegible] वा [illegible] भूः, [illegible] मस्त्यस्यामिति, मेद्यतीति वा मेदिनी, महती, महीयते वा मही—मही—[illegible] सप्तविंशतिर्भूमिकायाः ॥ २ । ३ ॥

स. स. स. स.

मिट्टी — मृन्मृत्तिका(प्रशस्ता तु)मृत्सा मृत्स्ना च मृत्तिका ।

अच्छी मिट्टी

स. पु. स.

सर्वसस्ययुक्त खार मिट्टी — उर्वरा "सर्वसस्याढ्या"स्यादूषःक्षारमृत्तिका ॥ ४ ॥

मृदिति—मृद्यते मृत्, मृदा, मृत्तिः, मृदेव मृत्तिकेति द्वे मृदायाः । प्रशस्ता मृत्तिका मृत्सा—मृत्स्ना चेति द्वे प्रशस्तमृदायाः । [illegible] ऋच्छति, ईर्यते वा ऊरा उरूणामरा, [illegible] वेति उर्वरा स्यादित्येकं सर्वसस्याढ्यमृदः । ऊषतीति ऊषः, क्षारयतीति क्षारः, क्षार चासौ मृत्तिका चेति द्वे क्षारमृदायाः ॥ ४ ॥

पु.स.न. पु.स.न. न. स.

ऊसर — ऊषवानूषरो(द्वावप्यन्यलिङ्गौ) स्थलं स्थली ।

कृत्रिम स्थान

पु. पु. पु.स.न. पु.स.न.

मरुस्थल जंगल — (समानौ)मरुधन्वानौ द्वे खिलाप्रहते(समे) ॥ ५ ॥

स. पु. न. न. न.

जगत् या भूतल — (त्रिष्वथो) जगतीलोको विष्टपं भुवनं जगत् ।

ऊषवानिति—ऊषोऽस्त्यस्मिन्निति ऊषवान्, ऊषोऽस्त्यस्येति ऊषर. द्वावपि अन्यलिङ्गौ स्यातामिति द्वे ऊषरस्य । स्थलतीति स्थलम्, स्थली अकृत्रिमा कृत्रिमास्थलेति द्वे स्थलस्य । म्रियन्ते भूतान्यस्मिन्निति मरुः, धन्व्यतेऽस्मादिति धन्वा उभौ समानौ समानार्थौ समानलिङ्गाविति द्वे निर्जलदेशस्य । खिलति खिल्यते वास्मिन्निति खिलम्, न प्रहन्यते स्मेति अप्रहतम् द्वे समे समानार्थे त्रिषु त्रिलिङ्ग्यां स्यातामिति द्वे [illegible]कृष्टस्य । अथविति—गच्छतीति जगती, लोक्यत इति लोकः, विशन्त्यत्रेति विष्टपम्, पादिपाठे तु पिश्यते, पिष्यते वात्रेति पिष्टपः पुमानिति । भवन्त्यस्मिन्निति भुवनम्, गच्छतीति जगदिति पञ्च भूतलस्य ॥ ५ । ६ ॥

न.

भारत या वर्ष — (लोकोऽयं)भारतं वर्षं शरावत्यास्तु योऽवधेः ॥ ६ ॥

पु. पु.

सब देश पूर्व उत्तर — देशः (प्राग् दक्षिणः) प्राच्य उदीच्यः(पश्चिमोत्तरः) ।

पु. पु. पु.

म्लेच्छदेश मध्यदेश — प्रत्यन्तो म्लेच्छदेशः स्यान्मध्यदेश(स्तु)मध्यमः ॥७॥

लोक इति—अयं जम्बूद्वीपनवमांशो लोकः भरतस्य राज्ञः इदं भारतम्, वृष्यते वर्षं वा वर्षम् "उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र सन्ततिः" रित्येकं भारतवर्षस्य । शरावत्या नद्या अवधेर्मर्यादायाः यः प्राग्दक्षिणः प्राचा सहितो दक्षिणो देशः प्राच्यां भवः प्राच्यः कथ्यत इत्येकं शरावतीपूर्वदक्षिणदेशस्य । तत एवावधेः पश्चिमोत्तरः पश्चिमेन सहितः उत्तरो देशः उदीच्यां भवः उदीच्यो भण्यते इत्येकं शरावतीपश्चिमोत्तरदेशस्य । प्रतिगतोऽन्तम्—प्रत्यन्तः, म्लेच्छानां देशो म्लेच्छदेशः "चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते । तं म्लेच्छविषयं प्राहुरार्यावर्तात्परं" मिति द्वे शिष्टाचाररहितखशादिदेशस्य । मध्यश्चासौ देशश्चेति मध्यदेशः, मध्ये भवः मध्यमः "हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तित" इति द्वे मध्यदेशस्य ॥ ६ । ७ ॥

पु. पु.

आर्यावर्त — **आर्यावर्तः पुण्यभूमि (र्मध्यं विन्ध्यहिमागयोः)।**

राज्य या देश — स. पु. पु. पु. न.

देश या नगर ग्राम — **नीवृज्जनपदो देशविषयौ तूपवर्तनम् ॥ ८ ॥**

आर्येति—विन्ध्यहिमागयोर्विन्ध्यहिमालययोर्मध्यं मध्यस्थलं आर्या आसमन्ताद्वर्तन्तेऽत्रेति आर्यावर्तः, पुण्या चासौ भूमिश्च, पुण्यस्य भूमिः, पुण्या भूमिर्यस्येति वा पुण्यभूमिः "आसमुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः" इति विन्ध्यहिमागमध्यदेशस्य । नियतो वर्तते—नियतं वा वर्तन्ते जना अत्रेति वा नीवृत्, जनः पदं वस्तु यत्रेति जनपदः इति द्वे जननिवासस्थानस्य । दिशति, दिश्यते वेति देशः, विसिनोति, विसीयन्तेऽत्रेति वा विषयः, उपवर्तन्तेऽत्रेति उपवर्तनमिति त्रीणि स्थानमात्रस्य ॥ ८ ॥

पु.स.न. पु.स.न.

नरसलकादेश — **(त्रिष्वागोष्टान्नडप्राये) नड्वान्नड्वल (इत्यपि)।**

कमलाकादेश पु.स.न. पु.स.न.

बहुबेतस — **कुमुद्वान् (कुमुदप्राये) वेतस्वान् (बहुवेतसे) ॥ ९ ॥**

त्रिष्विति—आगोष्टात् गोष्टमभिव्याप्य त्रिषु त्रिलिङ्गयां ज्ञेयमिति । नडाः प्राया यत्र नडप्रायस्तस्मिन्, नडाः सन्त्यस्मिन्निति नड्वान्, नडाः सन्त्यत्रेति नड्वल इत्यपीति द्वे नडनिकटदेशस्य । कुमुदानि प्रायाणि यत्रेति कुमुदप्रायस्तस्मिन्देशे कुमुदानि सन्त्यत्रेति कुमुद्वानित्येकं कुमुदनिकटदेशस्य । बहवो वेतसा यत्रेति तस्मिन्देशे वेतसाः सन्त्यत्रेति वेतस्वानित्येकं बहुवेतसदेशस्य ॥ ९ ॥

पु.स.न. पु.स.न.

[illegible] — **शाद्वलः (शादहरिते) (सजम्बाले तु) पङ्किलः ।**

[illegible] पु.स.न. पु.स.न. पु.

जलप्रायमनूपं स्यात्पुंसि कच्छ (स्तथाविधः) ॥ १० ॥

शाद्वल इति—शादहरिते शादैर्बालतृणैर्हरि[illegible], [illegible] [illegible]दो बालतृणमस्मिन्निति शाद्वल इत्येकं नवतृणप्रचुरस्य । [illegible] [illegible]ालस्तस्मिन्देशे पङ्कोऽस्त्यस्मिन्निति पङ्किल इत्येकं सकर्दमदेशस्य । [illegible] [illegible]यम्, अनुगता आपोऽत्रेति अनूपमिति द्वे जलाधिकदेशस्य । [illegible] [illegible] जलं छ्यति परिच्छिनत्तीति कच्छः पुंलिङ्गं [illegible] ॥ १० ॥

स. पु.स.न. पु.स.न. पु.स.न.

बालुयुक्त स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।

कंकड़युक्त पु.स.न.

बालूवाला 'देशएवादि' मावेवमुन्नेयाः सिकतावति ॥ ११ ॥

स्त्रीति—शृणाति शीर्यते वेति शर्करा ([illegible]) [illegible] स्यात् । शर्करास्त्यत्रेति शर्करिलः—शार्करः, शर्करावानिति [illegible] । तत्रादौ भवावाद्यिमौ शर्करा—शर्करिलौ देशे एव [illegible] मौ तु देशादेशयोः । एवं सिच्यते सिकता [illegible] 'सिकतिलः' [illegible] सिकतावति देश एवोन्नेयाविति सैकतः, सिकतावान् इति तु [illegible] वालुकाबहुलदेशस्य ॥ ११ ॥

नदीमातृक (देशो) नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः ।

पु.स.न. पु.स.न.

देवमातृक स्यान्नदीमातृको देवमातृकश्च (यथाक्रमम्) ॥ १२ ॥

देश इति—नद्यम्बुभिर्वृष्ट्यम्बुभिश्च सम्पन्नैः व्रीहिभिर्धान्यैः पालितो देशः नदीमाता-स्येति नदीमातृकः, देवो मातास्येति देवमातृकश्च यथाक्रमं स्यादित्येकैकम् ॥ १२ ॥

पु.स.न. पु.स.न.

नीतिमान्राजा सुराज्ञि देशे राजन्वान् स्या(त्ततोऽन्यत्र) राजवान् ।
राजाज्ञायुक्त

गैयों का स्थान न. न. न.

पहला स्थान गोष्ठं गोस्थानकं (तत्तु) गौष्ठीनं (भूतपूर्वकम्) ॥ १३ ॥

सुराज्ञीति—शोभनो राजा यत्रेति सुराजा तस्मिन् देशे शोभनो राजास्त्यत्रेति राजन्वान् स्यादित्येकं सुराजयुक्तदेशस्य । ततोऽन्यत्र राजमात्रयुक्तदेशे राजास्त्यत्रेति राजवानित्येकं सामान्यराजयुक्तदेशस्य । गावस्तिष्ठन्ति यत्रेति गोष्ठम्, गवां स्थानं गोस्थानं तदेव गोस्थानकमिति द्वे गोष्ठस्य । भूतपूर्वकं पूर्वं भूतं यद्गोष्ठं तत् गौष्ठीनं स्यादित्येकं भूतपूर्वगोस्थानकस्य ॥ १३ ॥

स. पु. पु. स.

नदी पहाड़ के पर्यन्तभूः परिसरः सेतुरालौ (स्त्रियां पुमान्) ।
निकटकी भूमि

पु. पु पु.न.

पुल
ब्यमौर वामलूरश्च नाकुश्च वल्मीकं (पुंनपुंसकम्) ॥ १४ ॥

पर्यन्तेति—पर्यन्ते भूः पर्यन्तभूः, परितः सरन्त्यत्रेति परिसर इति द्वे नद्यादिसमीपभूमेः । स्त्रियां वर्तमानायामालौ सिनोति—सीयते वेति सेतुः पुमान्स्यात् । आ अलन्त्वम् । अल्यतेऽनयेति आलिः, आली वेति द्वे पुलस्य । वामैर्वामं वा लूयते-वामलूर, न अकति, नम्यते भूरनेन वेति नाकुः, वलन्ते प्राणिनोऽत्रेति वल्मीकं पुंनपुंसकं स्यादिति त्रीणि पिपीलिकादिनिष्कासितमृत्पुञ्जस्य ॥ १४ ॥

न. न. पु. पु. पु. स. स.

सड़क या रास्ता **अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।**

स. स. स. स. स.

सरणिः पद्धतिः पद्यावर्तन्येकपदीति च ॥ १५ ॥

अयनमिति—अयन्ते ईयतेऽनेन वेत्ययनम, वर्तन्तेऽनेनेति वर्त्म, मार्ग्यते, मृज्यते वा तृणीक्रियते पादैरिति वा मार्गः, अत्ति पथिकबलमिति अध्वा, पतन्त्यनेन—पथन्तेऽनेनेति वा पन्थाः, वाटः पथश्च मार्गश्चेति त्रिकाण्डशेषात् पथइत्यदन्तोपि । पद्यतेऽनयेति पदवी, पदविर्वा । सरन्त्यनयेति सृतिः, सरति, स्रियते, शृणाति, शीर्यते वेति सरणिः शरणिस्तालव्यादिरपि, पादाभ्यां हन्यते पद्धतिः, पादाय हिता पद्या, वर्तन्तेऽनयेति वर्तनी—वर्त्मनी च । एकः पादोऽस्यामिति एकपदी, एकपादपीति द्वादश मार्गस्य॥१५

पु. पु. पु.

अच्छी रास्ता **अतिपन्थाः सुपन्थाश्च सत्पथ(श्चार्चितेऽध्वनि) ।**

पु. पु. पु. पु. पु.

कुमार्ग **व्यध्वो दुरध्वो विपथः कदध्वा कापथः (समाः) ॥१६॥**

अतीति—अर्चिते पूजिते अध्वनि मार्गे अत्यर्चितः पन्थाः अतिपन्थाः, शोभनः सुपूजितः पन्थाः सुपन्थाः, सँश्चासौ पन्थाश्चेति सत्पथ इति त्रीणि शोभनमार्गस्य । विरुद्धोऽध्वा व्यध्वः, दुष्टोऽध्वा दुरध्वः—विरुद्धः पथो विपथः, कुत्सितोऽध्वा कदध्वा कुत्सितः पथः कापथः—कुपथोपि एते समाः समानार्थाः समानलिङ्गकाश्चेति पञ्च कुपथस्य ॥ १६ ॥

अमार्ग पु. न. न. न.

चौराहा **अपन्थास्त्वपथं तुल्ये शृङ्गाटकचतुष्पथे ।**

दूर का रस्ता न. पु. न.

दुर्गममार्ग **प्रान्तरं(दूरशून्योऽध्वा)कान्तारं (वर्त्मदुर्गमम्) ॥१७॥**

अपन्था इति—पथोऽभावः अपन्थाः, अपथम् उभे तुल्ये समानार्थे स्यातामिति द्वे मार्गाभावस्य । शृङ्गं प्राधान्यमटतीति शृङ्गाटकम्, चतुर्णां पथां समाहारश्चतुष्पथम् [illegible] इति द्वे चतुष्पथस्य । दूरमार्गो शून्यश्चेति दूरशून्योऽध्वा मार्गः [illegible] प्रान्तरमित्येकं दूरशून्यमार्गस्य । दुर्गमं वर्त्म मार्गः कस्य जलस्य सुखेन [illegible] कान्तारमिति [illegible] दुर्गममार्गस्य ॥ १७ ॥

दो कोस गव्यूतिः (स्त्री) क्रोशयुगं नल्वः किष्कुचतुःशतम् ।
चार सौ हाथ
राजमार्ग घण्टापथः संसरणं तत्पुरस्योपनिष्करम् ॥ १८ ॥
पुरमार्ग

इति भूमिवर्गः ॥

गव्यूतिरिति—क्रोशयुगं क्रोशद्वयं यत्र गोयूतिः गोर्यूतिः गव्यूतिः स्त्री स्यात् [illegible] । अथवा गव्यूतिः स्त्री स्यात्, क्रोशयोर्युगं क्रोशयुगमिति द्वे क्रोशद्वयस्य । किष्कूणां हस्तानां चतुःशतं चतुर्गुणं शतमिति वा नल्यते इति नल्वः स्यादित्येकं धनुःशतचतुष्टयस्य । घण्टोपलक्षितः पन्थाः, घण्टानां पन्था इति वा घण्टापथः, संसरन्त्यनेन पु॰ संसरणमिति द्वे राजमार्गस्य । तत्संसरणं पुरस्य [illegible] सैन्यान्यत्र, उपनिःक्रीयते सैन्यादन्यत्र येन पुरनिष्क्रमणमित्येकं पुरमार्गस्य ॥ १८ ॥

इति भूमिवर्गविवरणम् ॥

अथ पुरवर्गो व्याख्यायते ॥

नगर या नगरी, पूः (स्त्री) पुरी नगर्यौ (वा) पत्तनं पुटभेदनम् ।
उपनगर या
शाखानगर, स्थानीयं निगमो "ऽन्यत्तु यन्मूलनगरात्पुरम्" ॥ १ ॥

वेश्या का घर तच्छाखानगरं वेशो वेश्याजनसमाश्रयः ।

पूरिति—पिपर्ति—पूर्यते वेति पूः स्त्री स्यात्, पुरतीति पुरी, नगाः सन्त्यत्रेति नगरी उभे वा स्त्रियौ स्याताम् पक्षे पुरम्, नगरम्, पतन्ति जना यत्रेति—पत्तनम्, पटन्तीति त्रिमते तु पट्टनमपि । पुटानि पात्राणि भिद्यन्तेऽत्रेति पुटभेदनम्, स्थानाय हितं स्थानीयम्, नितरां गच्छन्तीति निगम इति सप्त नगरस्य । मूलनगरं राजधानी ततोऽन्यत् यत् पुरं तत् शाखेव नगरं शाखानगरमित्येकं शाखानगरस्योपनगरस्य वा । विशन्त्यत्रेति वेशः, वेश्याजनस्य समाश्रयो वासस्थानं वेश्याजनसमाश्रय इति द्वे वेश्यानिवासस्य ॥१।३॥

बाजार हाट आदि आपणस्तु निषद्यायां विपणिः पण्यवीथिका ॥ २ ॥
भीतरकीरास्ता
खाई रथ्या प्रतोली विशिखा स्याच्चयोवप्र (मस्त्रियाम्) ।

---

१ धनुर्हस्तचतुष्टयम्, द्वाभ्यां धनुस्सहस्राभ्यां गव्यूतिः पुंसि भाषित (इति शब्दार्णवः) ॥

२ पट्टन पुटभेदनमिति वाचस्पति ॥

३ "निगमाः पूर्वणिग्वेदनिश्चयाध्ववाणिक्पथाः (इति हैमः) ॥

आपण इति—आसमन्तात्पणायन्तेऽत्र, पणन्तेऽत्र वेत्यापणः, निषीदन्ति जना अस्यामिति निषद्या तस्यामिति द्वे हट्टस्य । विपणन्तेऽत्रेति विपणिः, पण्यानां वीथी सैव पण्यवीथिकेति द्वे हट्टशून्यविक्रयस्थानस्य । रथं वहतीति रथ्या, प्रतोलयतीति प्रतोली, विशेते इति विशिखेति त्रीणि ग्राममध्यमार्गस्य । चीयते इति चयः, उप्यतेऽत्रेति वप्रम् अस्त्रियां पुंनपुंसके स्यादिति द्वे प्राकाराधारस्य ॥ २ । ½ ॥

पु. पु. पु. न.

घेर घिरा भीति **प्राकारो वरणः सालः प्राचीनं (प्रान्ततो वृतिः)** ॥ ३ ॥

या दीवाल स. न. न.

पत्थर वा हड्डी आदि की **भित्तिः (स्त्री) कुड्यमेडूकं (यदन्तर्न्यस्तकीकसम्)** ।

प्राकार इति—प्रक्रियत इति प्राकारः, वृणोतीति वरणः, सल्यते—शल्यते वा सालः शालश्चेति त्रीणि प्राकारस्य । प्रान्ततो वरणं वृतिः प्रागेव प्राचीनम्, प्राचीयत इति प्राचीरमिति वेत्येकं ग्रामादेरन्ते कण्टकादिवेष्टनस्य । भिद्यते इति भित्तिः स्त्री स्यात् । कुडयते इति कुड्विस्तस्यां साधु कुड्यम्, कौ द्योतत इति वा कुद्यमिति द्वे कुडयस्य । अन्तर्न्यस्तानि कीकसानि अस्थीनि दाढ्यार्थं यत्रेति अन्तर्न्यस्तकीकसं यत्तत् ईडयते एडूकम्, एडुकम्—एडोकं चेत्येकमस्थ्यादिमयकुडयस्य ॥ ३ । ½ ॥

न. पु. न. न. न. न. न.

घर **गृहं गेहोदवसितं वेश्म सद्मनिकेतनम्** ॥ ४ ॥

न. न. न. न. न. न.

निशान्तवस्त्यसदनं भवनाऽऽगारमन्दिरम् ।

पु. पु. पु. पु.

गृहाः(पुंसि च भूम्न्येव)निकाय्यनिलयाऽऽलयाः ॥ ५ ॥

पु. पु.स. स. स. न.

कचहरी चौक **वासः कुटी (द्वयोः) शाला सभा संजवनं (त्विदम्)** ।

न. स. पु. न.स.

कोठरी **चतुःशालं (मुनीनां तु) पर्णशालोटजो (ऽस्त्रियाम्)** ॥ ६ ॥

गृहमिति—गृह्णाति धान्यादिकमिति गृहम्, गेन गणेशेन ईह्यते काम्यते, गो गणेशो गन्धर्वो वा ईहा ईप्सिता यस्मिन्वेति गेहमस्त्रीति । उदूर्ध्वमवसीयते स्मेति उदवसितम्, विशन्त्यत्रेति वेश्म, सीदन्त्यत्रेति सद्म, निकेत्यतेऽस्मिन्निति निकेतनम्, निशाम्यन्तेऽस्मिन्निति निशान्तम्, वसनं वसितमत्र साधु वस्त्यम्, सीदन्त्यत्रेति सदनं सादनमपि । भवन्त्यत्र भवन्त्यस्मिन्निति वा भवनम्, आगच्छन्ति आगास्तानृच्छतीत्यागारम् अगारं च "गृहमन्दिरं भूम्न्येव पुंसि चान्तःपुरे" निर्वाचने धान्यादिकमत्रेति निकायो—निकाय्यते वा निलीनन्तेऽस्मिन्निति निलयः, आलीयतेऽत्रेत्यालयः, वसन्त्यत्रेति वासः, कुटति

कुटिलीभवतीति कुटी, कुटिर्वा द्वयोः स्त्रीपुंसयोः स्यात्, [illegible]
न्त्यत्रेति सभा इति विशनि. सदनम् । इदं [illegible]
समाहृता इति चतुःशालम्—चतुःशाला [illegible]
मुनीनान्तु पर्णनिर्मिता शाला पर्णशाला, " [illegible] "
अस्त्रियां पुंनपुंसकयोः स्यादिति द्वे मुनीनां कुटेः ॥ ५ । ६ ॥

न. न. स्त्री.
यज्ञवेदी अश्वशाला **चैत्यमायतनं (तुल्ये) वाजिशाला (तु) मन्दुरा ।**
सुनार आदिका न. स्त्री. स्त्री. स्त्री.
घर जलशाला प्याऊ **आवेशनं शिल्पिशाला प्रपा पानीयशालिका ॥ ७ ॥**

चैत्यमिति—चीयत इति चित्या तस्या इदं चैत्यम्, [illegible]
तुल्ये समानार्थे समानलिङ्गके चेति द्वे यज्ञस्थानस्य [illegible] वा । [illegible]
वाजिशाला, मदन्तेऽत्रेति मन्दुरेति द्वे अश्वशालायाः । [illegible] आवेशनम्,
शिल्पिनां शाला शिल्पिशाला, शिल्पस्य शाला चेति द्वे शिल्पिशालायाः । [illegible]
मिति प्रपा, पानीयस्य शाला सैव पानीयशालिकेति द्वे पानीयशालायाः ॥ ७ ॥

पु. स्त्री. न.
पाठशाला मद्यघर **मठ (श्छात्रादिनिलयो) गञ्जा (तु) मदिरागृहम् ।**
घर का मध्य सौवरि न. न. न. न.
गर्भागारं वासगृहमरिष्टं सूतिकागृहम् ॥ ८ ॥

मठ इति—छात्रोऽन्तेवासि आदिर्येषां परिव्राजकक्षपणकादीनां तेषां निलयः स्थानं मठन्त्यत्रेति मठः कथ्यत इत्येकं छात्रादिगृहस्य । गजन्त्यस्यामिति गञ्जा, मदिराया गृहं मदिरागृहमिति द्वे मद्यसन्धानगृहस्य । गर्भ इवागारं गर्भागारम्, वासस्य गृहं वासगृहमिति द्वे गृहमध्यभागस्य । नास्ति रिष्टमत्र, न रिष्यते स्म हिंस्रेरिति वा अरिष्टम्, सूतेव सूतिका, सूतका वा तस्या गृहं सूतिकागृहमिति द्वे सूतिकानिवासस्य । चत्वारः पर्य्याया इत्यन्ये ॥ ८ ॥

न. पु. पु.न. पु.
झरोखा मण्डप **वातायनं गवाक्षोऽथ मण्डपो (ऽस्त्री) जनाश्रयः ।**
धनियों का घर न. पु.
देवालय, महल **हर्म्यादि "धनिनां वासः" प्रासादो (देवभूभुजाम्) ९॥**

वातायनमिति—ईयतेऽनेनेत्ययनं वातस्यायनं वातायनम्, गवामक्षीव गावो जलानि किरणा वाक्षन्ति व्याप्नुवन्त्येतमनेन वा गवाक्ष इति द्वे जालकस्य । अथेति—मण्डनं मण्ड-स्तं पाति पिबतीति वा मण्डपः अस्त्री स्यात् । जनानामाश्रयो जनाश्रय इति द्वे मण्ड

१ भाष्येतु वा सूतक,पुत्रिकावृन्दारकाणामित्युपलभ्यते ॥

पस्य । धनिनां धनवतां वासो निवासः हरति मनोहर्म्यम् आदिना स्वस्तिकाद्येकंधनवद्गृहस्य । देवानां भूभुजां च गृहं । प्रसीदति मनोऽत्रेति प्रासाद इत्येकं देवनृपालयस्य॥९॥

पु.न. न. स. स.

राजघर — सौधो(ऽस्त्री)राजसदनमुपकार्योपकारिका ।

डेरा या तंबू — पु.न. पु.न. पु.न.

गृह भेद — स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोपि च ॥ १० ॥

पु.न.

विच्छन्दक "प्रभेदा हि भवन्तीश्वरसद्मनाम्" ।

सौध इति—सुधालेपोऽस्यास्तीति सौधः अस्त्री स्यात् । राज्ञः सदनं सदनानां राजेति वा राजसदनमिति द्वे राजगृहस्य । उपक्रियते इत्युपकार्या उपकारयतीति विग्रहे तु उपकारीत्यपि, उपकरोतीति उपकारिकेति द्वे राजगृहसामान्यस्य । स्वस्ति क्षेमं कायतीति स्वस्तिकः सर्वतोभद्रमत्रेति सर्वतोभद्रः, नन्दयतीति नन्दी आवर्तोऽत्रेति नन्द्यावर्तः आदिना रुचकवर्धमानादिपरिग्रहः । विशिष्टं छन्दोऽत्र, विशिष्टाञ्छन्दयतीति विच्छन्दकः, विच्छर्दयतीति विच्छर्दकोपि एते ईश्वरसद्मनां प्रभेदा भवन्ति हीतीश्वरगृहविशेषाणां पृथगेकैकम् ॥ १० । ½ ॥

न. न.

रनिवास — "स्त्र्यगारं भूभुजा"मन्तःपुरं स्यादवरोधनम् ॥ ११ ॥

पु. पु. पु. पु.न.

अटा — शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियाम् ।

दरवाजे के बाहर का चौतरा या चौपार — पु. पु. पु.

प्रघाणप्रघणालिन्दा 'बहिर्द्वारप्रकोष्ठके' ॥ १२ ॥

स्त्रीति—भूभुजां भूपालानां स्त्र्यगारम्, स्त्रीणामागारं अन्तरभ्यन्तरे पुरं गृहमन्तःपुरम्, अवरुध्यन्तेऽत्रेत्यवरोधनम्, शुद्धा उपधा शुद्धा रक्षका अन्ते समीपेऽस्येति शुद्धान्तः, अवरुध्यन्तेऽत्रेत्यवरोधः स्यादिति चत्वार्यन्तःपुरस्य । अट्यते, अट्टयति वा अट्टः, क्षुवन्त्यत्रेति क्षौममस्त्रियां स्यात् क्षौममेव क्षौमोपीति द्वे हर्म्याद्युपरिगृहस्य बहिर्द्वारप्रकोष्ठके प्रघाणः—प्रघणाश्च । अल्यते भूष्यत इत्यलिन्दः—आलिन्दोपीति त्रीणि द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्कस्य ॥ ११ । १२ ॥

स. स. न. न. न.

देहली, आंगन — गृहावग्रहणी देहल्यङ्गनं चत्वराजिरे ।

स.

[illegible] — 'अधस्ताद्दारुणि' शिला नासा 'दारूपरिस्थितम्' ॥१३॥

---

* "[illegible]" इति [illegible] ॥

गृहेति–गृह्यमवगृह्यतेऽनयेति गृहावग्रहणी, [illegible] देहलीति द्वे देहल्याः । अङ्गत्यत्रेति अङ्गणम्, [illegible] चत्वरम्, अजन्त्यत्रेत्यजिरमिति त्रीणि चत्वरस्य । [illegible] शिलः–शिलीत्यपि द्वारस्तम्भाधस्थकाष्ठस्य, [illegible] स्भोपरिस्थकाष्ठस्य ॥ १३ ॥

स. न. [illegible]

खिड़की, गुप्तद्वार **प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारन्तु पक्षकः ।**

परके छाने का सामान, छाजना — पु.न. न. पु. [illegible]

वलीकनीध्रे पटलप्रान्ते(ऽथ) पटलं छदिः ॥ १४ ॥

प्रच्छन्नमिति–प्रकर्षेण छन्नं द्वारमिति प्रच्छन्नम्, [illegible] द्वे गुप्तद्वारस्य । पक्षे पार्श्वे द्वारम्पक्षद्वारम्, [illegible] वृणोति भित्त्यादि वलीकं वलीकम्य । [illegible] नीध्रम्, पटलस्य छदिषः प्रान्तस्तस्मिन्निति द्वौ [illegible] दकमिति वा पटलम्, छादयतीति छदिः, पटम् [illegible] ॥ १४ ॥

स. स.

धरनि, कूवा या **गोपानसी (तु) वलभी (छादने वक्रदारुणि) ।**

छज्जा, कबूतरों का घर — स. पु.न.

कपोतपालिकायान्तु विटङ्कं (पुंनपुंसकम्) ॥ १५ ॥

गोपेति–गोपायति, गवां गोभिर्वा पानं गोपानं तस्यानि निवर्तयति वा गोपानसी [illegible] वलतीति वलभी, वलभिरपीति उभे वक्राणि दारूणि यस्मिन् [illegible] इति द्वे कुड्येषु छादनार्थं दत्तस्य वक्रकाष्ठस्य, पटलाधारवंशपञ्जरस्य वा । पालयती [illegible] पालिका, कपोतानां पालिका तस्याम्, विशेषेण टङ्क्यन्तेऽत्रेति विटङ्कं पुंनपुंसकं स्या- दिति द्वे गृहप्रान्ते रचितकपोतस्थानस्य ॥ १५ ॥

मोहरा या द्वार, वेदी या चौतरा — स. न. पु. स. स.

(स्त्री) द्वाद्वारं प्रतीहारः स्याद्वितर्दिस्तु वेदिका ।

बाहिरी फाटक, नगरका फाटक — पु.न. न. न. न.

तोरणो(ऽस्त्री) बहिर्द्वारं पुरद्वारन्तु गोपुरम् ॥ १६ ॥

स्त्रीति–द्वारयति द्वार्यते वा द्वाः स्त्री स्यात्, द्वारयतीति द्वारम्, प्रतिह्रियते [illegible] इति प्रतीहारः स्यादिति त्रीणि द्वारस्य । विगतातर्दिर्हिंसाऽस्या इति वितर्दिः, विदन्त्य[illegible] मिति वेदी–वेदिर्वा सैव वेदिकेति द्वे प्राङ्गणादिकृतस्योपवेशस्थानस्य । तुरन्त्यत्र, नेति वा तोरणः अस्त्री स्यात् । बहिश्च तद्द्वारं चेति बहिर्द्वारमिति द्वे द्वा [illegible] पुरस्य द्वारं पुरद्वारम्, गोभिः पुरं गाः पुरतीति वा गोपुरमिति द्वे

मुखसे आनेजाने के लिये बनी मिट्टीकीसीढी केवार, बेंवडा

पु.
'कूटं पूर्द्वारि य' द्धस्तिनखस्तस्मि(न्नथ त्रिषु)।
पु.स.न. पु.स.न. न.स
कपाटमररं(तुल्ये)तद्विष्कम्भोऽर्गलं (न ना)॥ १७॥

कूटमिति—पूर्द्वारि यत्कूटं तस्मिन् हस्तिनो नख इवहास्तिना न खन्यत इति वा हस्तिनख इत्येकं पुरद्वारे अवतरणार्थं कृतस्य क्रमनिम्नस्य मृत्कूटस्य । अथेति—त्रिषु भवन्ति कं वातं शिरो वा पाटयति कपाटम्, कं वातं वटतीति कवाटमिति वा ऋच्छति, इयर्ति वा अररम् अरमृच्छतीति अररिर्वा उभे तुल्ये समानार्थे समानलिङ्गे च स्यातामिति द्वे कपाटस्य । तत्कपाटं विष्कम्नातीति तद्विष्कम्भः, अर्ग्यत इत्यर्गलं ना पुंलिङ्गे नेत्येकं कपाटरोधनकाष्ठस्य ॥ १७ ॥

सीढ़ी काठआदि की सीढी

न. न. स. स.
आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहणी ।

बढ़नी या झाड़ू कूड़ा, करकट

स. स. पु. पु.
संमार्जनी शोधनी स्यात्संकरोवकर (स्तथा) ॥ १८ ॥

आरोहेति—आरुह्यतेऽनेनेत्यारोहणम्, सह विद्यमान उपऽउपरि आनो गमनमनेनेति सोपानमिति द्वे पाषाणादिकृतसौधाद्यारोहणमार्गस्य । नियता श्रेणिः पंक्तिरत्रेति निश्रेणिः, अधिरुह्यतेऽनयेत्यधिरोहणीति द्वे काष्ठादिकृतारोहणमार्गस्य । संमृज्यतेऽनयेति संमार्जनी, शोध्यतेऽनयेति शोधनी स्यादिति द्वे संमार्जन्याः । संकीर्यते संकरः संकारश्च तथा अवकीर्यत इत्यवकरः, अवकारश्चेति उभौ क्षिप्ते धूल्यादौ स्यातामिति द्वे अवकरस्य ॥ १८ ॥

निकलनेके द्वार अच्छा स्थान ग्राम या गाव घर बनाने की भूमि

न. न. पु. पु.
'क्षिप्ते' मुखं निःसरणं संनिवेशो निकर्षणः ।
पु. पु. स. पु.न.
(समौ) संवसथग्रामौ वेश्मभूर्वास्तु (रस्त्रियाम्)॥१९॥

मुखमिति—खन्यते इति मुखम्, निःसरन्त्यनेनेति निःसरणमिति द्वे निर्गमनप्रवेशमार्गस्य । संनिविशन्तेऽत्रेति संनिवेशः, कर्षणान्निर्गतो निकर्षण इति द्वे पुरादौ गृहादिरचनापरिच्छिन्नदेशस्य । संवसन्त्यत्रेति संवसथः, ग्रसते इति ग्रामः उभौ समौ समानार्थौ समानलिङ्गौ चेति द्वे ग्रामस्य । वेश्मनो भूः वेश्मभूः, वसन्त्यत्रेति वास्तुः अस्त्रियां पुंनपुंसके स्यादिति द्वे गृहरचनावच्छिन्नभूमेः ॥ १९ ॥

[illegible]

पु. न. म. स.
ग्रामान्त उपशल्यं स्यात्सीमसीमे (स्त्रियामुभे) ।
पु. म. प. पु.
घोष आभीरपल्ली स्यात्पक्कणः शबरालयः ॥ २० ॥

इति पुरवर्गः ॥

[illegible]

ग्रामेति—ग्रामस्य अन्तो ग्रामान्तः, शल्यमुपगतमुपशल्यम्, [illegible] इति द्वे ग्रामादिसमीपदेशस्य। सीयते इति सीमा, सीमानौ, डाबुभाभ्यामिति पक्षे डाप् सीमा, सीमे रमावत्। (आघाटोऽप्यत्र) उभे स्त्रियां स्यातामिति द्वे सीमायाः। घोषन्ति गावोऽत्रेति घोषः, आभीराणां पल्ली (ग्रामः) आभीरपल्ली—आभीरपल्लिस्त्विति द्वे घोषग्रामस्य। पचन्तीति पचः, कणन्तीति कणाः पचः कणा यत्रेति पक्कणः, शवं शवन्तीति शवरास्तेषामालयः शबरालय इति द्वे शबरालयस्य ॥ २० ॥

इति पुरवर्गविवरणम् ॥

अथ शैलवर्गो व्याख्यायते ॥

पु. पु. पु. पु. पु. पु.

पर्वत **महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।**

पु. पु. पु. पु. पु. पु. पु.

अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥

महीध्र इति—महीं धरतीति महीध्रस्तम्मिन्, शिखरमस्यास्तीति शिखरी, क्ष्मां बिभर्तीति क्ष्माभृत्, ह्रियते हार्यः न हार्योऽहार्यः, धरतीति धरः, पर्वाणि सन्त्यत्र, पर्वतीति वा पर्वतः, अत्ति अद्यते वेत्यद्रिः, गा त्रायते इति गोत्रः, गिरतीति गिरिः, ग्रसत इति ग्रावा, न चलतीत्यचलः, प्रचुराः शिलाः सन्त्यत्रेति शैलः, शिलाभिरुच्चीयत इति शिलोच्चय इति त्रयोदश पर्वतस्य ॥ १ ॥

पृथ्वीको घेरेहुआ पु. पु. पु. पु.

पर्वत, त्रिकूट जिसपर लंका बसती है **लोकालोकश्चक्रवालस्त्रिकूटस्त्रिककु (त्समौ) ।**

पु. पु. पु.

अस्ताचल, उदयाचल **अस्तस्तु चरमक्ष्माभृदुदयः (पूर्वपर्वतः) ॥ २ ॥**

लोक इति—लोकनं लोकः, न लोकोऽलोक. लोकालोकौ प्रकाशान्धकारावत्र स्तो लोकालोकः, चक्रं भूमण्डलं वलते, चक्राकारेण वाडते, चक्रवालमस्यास्तीति वा चक्रवालः, चक्रवाडोपीति द्वे लोकालोकस्य। त्रीणि कूटान्यस्येति त्रिकूटः, त्रीणि ककुत्सदृशानि शृङ्गाण्यस्येति त्रिककुत्, उभौ समौ समानार्थौ समानलिङ्गौ चेति द्वे लङ्काधिष्ठानपर्वतस्य । असति स्म, अस्यते स्मेति वा अस्तः, चरन्त्यत्रेति चरमः पश्चिमः चरमश्चासौ क्ष्माभृदिति द्वे अस्ताचलस्य। उद्यन्ति ग्रहा अस्मादित्युदयः, पूर्वश्चासौ पर्वतश्चेति द्वे उदयाचलस्य ॥ २ ॥

पु. पु. पु. पु. पु.

पर्वतोंके भेद **हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रकः ।**

न. पु.

गन्धमादन (मन्ये च हेमकूटादयो) नगाः ॥ ३ ॥

हिमेति—हिममस्मिन्नस्तीति हिमवान्, निपीडतीति निषधः, विरुद्धं ध्यायति वीक्ष्यते वेति विन्ध्यः, माल्याकारस्तास्यास्तीति माल्यवान्, परितो यात्रया दृश्यते पारियात्रः स एव पारियात्रकः, गन्धेन मादयतीति गन्धमादनम् । अन्ये चेति—हेम्नः कूटो राशिः हेमकूटः आदिशब्दान्मलय-दर्दुर-चित्रकूट-मैनाक-सह्यादयो नगाः पर्वता ज्ञेया इति पर्वतभेदाः ॥ ३ ॥

पत्थर पहाड की चोटी बीहड या पर्वत से पानी गिरनेका स्थान

पु. कु. पु. पु. पु. स. स.
पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।
पु.न. न. न. पु. पु. पु.
कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्त्वतटोभृगुः ॥ ४ ॥

पाषाणेति—पिनष्टि, पषत्यनेन पाषः, अणतीति अणः पाषश्चासावणश्चेति पाषाणः, प्रस्तृणातीति प्रस्तरः, गिरति—गृणाति, गरतीति ग्रः, अवतीति अवा, ग्रश्चासावशा चेति ग्रावा, उपलाति, पलतीति पलः ओः शम्भोः पलो बोधको वेत्युपलः, अश्नुते अश्मा, शिजतीति शिला, दृणातीति दृषदिति सप्त पाषाणस्य । कूटयति, कूटयते वेति कूट. अस्त्री स्यादिति पूर्वोत्तराभ्यां संबध्यते । शिखां राति, शिखास्यास्तीति वा शिखरम्, शृणातीति शृङ्गमिति त्रीणि शिखरस्य । प्रपतन्त्यस्मादिति प्रपातः, न तटमत्रेत्यतटः, भृज्जति, भृज्ज्यते वेति भृगुः "प्रपातस्तु तटो भृगु" रिति पाठे तु प्रपत्यते यतस्तटात्स मृगुरिति त्रीणि प्रपातस्य ॥ ४ ॥

पर्वतका बीच पर्वतोंकासमभू भागया किनारा झरनाकास्थान झरना

पु.न. पु.न. पु.न. पु.न.
कटकोऽस्त्री (नितम्बोऽद्रेः) स्नुःप्रस्थः सानु (रस्त्रियौ)।
पु. न. पु. पु. पु.
उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः ॥ ५ ॥

कटक इति—अद्रेः पर्वतस्य नितम्बो मध्यभागः कटति, कट्यते वेति कटक इत्येकं मे-खलाख्यस्य पर्वतमध्यभागस्य । स्नौति जलम्, स्नातीति वा स्नुः 'पुमानेव' स्नुः, इति मर्त्त्यरः । प्रतिष्ठन्तेऽत्रेति प्रस्थः, सनोति ददाति सुखमिति सानुरुभावस्त्रियौ स्यातामिति त्रीणि पर्वतसमभूभागस्य । उनत्ति जलेनेति उत्सः, प्रस्रवन्त्यापोऽस्मादिति प्रस्रवणमिति द्वे यतो जलं स्रवति तस्य स्थानस्य । वारिणः प्रवाहो वारिप्रवाहः, निर्झरणं नि-र्झरः, झरणं झर.—झरा, झरी—झरिश्चेति त्रीणि उत्सान्निर्गतजलप्रवाहस्य पर्याणि पर्याया वा ॥ ५ ॥

[illegible]

न. पु.न. न. न. न.
दरी तु कन्दरो (वा स्त्री) देवखातबिले गुहा ।
पु.न. पु.
गह्वरं गण्डशैलास्तु "च्युताःस्थूलोपलागिरेः" ॥६॥

[illegible]

दरीति—दृणातीति दरी, कं जलेन दीर्यत इति कन्दरो वा स्त्रियां कन्दरी स्यात् कन्दरा, कन्दर्यपीति द्वे कृत्रिमगृहाकारगिरिविवरस्य। खन्यते खनित्रेणेति खातम्, देवैः खातं देवखातम्, बिलतीति बिलम्, गूहति, गुह्यतेऽनयेति गुहा, गाहन इति गह्वरम्—गह्वरमिति चत्वारि अकृत्रिमगिरिबिलस्य। गिरेः पर्वतात् च्युताः पतिताः स्थूलाश्च ते उपलाश्चेति गण्डइव शैलाः शैलानां गण्डा इवेति वा गण्डशैला भवन्ति इत्येकं गण्डशैलस्य॥६॥

खानि पर्वतसमीपके पर्वत — स्त्री. पु. पु. पु.

खनिः स्त्रियामाकरः स्यात्पादाः प्रत्यन्तपर्वताः।

पहाड़ की निचलीभूमि, ऊपर की भूमि — स्त्री. स्त्री.

उपत्यका "द्रेरासन्ना भूमि" "रूर्ध्व"मधित्यका॥७॥

खनिरिति—खन्यत इति खनिः—खनी—खानिश्च स्त्रियां स्यात् आकुर्वन्त्यस्मिन्, आकीर्यन्ते धातवोऽत्रेति वा आकर इति द्वे खानेः। पद्यन्ते गम्यन्त इति पादाः, प्रत्यन्ते महाद्रीणां समीपे ये क्षुद्राः पर्वतास्ते प्रत्यन्तपर्वता इति द्वे पर्वतसमीपवर्तिक्षुद्रपर्वतस्य। अद्रेः आसन्ना भूमिः उप आसन्ना उपत्यकेत्येकं पर्वतासन्नभूमेः। अद्रेरूर्ध्वं भूमिः अधि आरूढा अधित्यकेत्येकं पर्वतोर्ध्वभूमेः "उपाधिभ्यां त्यकन्नासन्नारूढयोः" इति पाणिनिसूत्रेण सिद्धावेताविति॥ ७॥

पहाड़से उपजी वस्तु मन:शिला आदि व गेरू कुञ्ज — पु. पु.न. पु.न.

धातु'र्मनःशिलाद्यद्रे' गैरिक'न्तु' विशेषतः।

निकुञ्जकुञ्जौ (वा क्लीबे लतादिपिहितोदरे)॥ ८॥

इति शैलवर्गः॥

धातुरिति—अद्रेः मनश्शिलादि "सुवर्णरूप्यताम्राणि हरितालं मनःशिला। गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः॥ गन्धकोऽभ्रकमित्याद्या धातवो गिरिसंभवाः" दधाति शोभामिति धातुरित्येकं पर्वतोत्पन्नवस्तुनः। गिरौ भवमिति गैरिकं विशेषतो विशेषेण धातुः, धातुशब्देनैव प्रसिद्धत्वादित्येकं गैरिकस्य। लतादिपिहितोदरे नितरां कुञ्जन्त्यत्रेति निकुञ्जः, कावजनीति कुञ्जत्यत्रेति वा कुञ्जः उभौ क्लीबे वा स्यातामिति द्वे लतादिभिः पिहितस्थानस्य॥ ८॥

इति शैलवर्गविवरणम्॥

---

१ "अधित्यकायामिव धातुमय्यामिति" रघु॰॥

अथ वनौषधिवर्गो व्याख्यायते ॥

वन या जंगल — स. न. न न. न. न.

बड़ावन — **अटव्यरण्यं विपिनं गहनं काननं वनम् ।**

घर के समीपी — न. स. पु. पु.

बाग — **महारण्यमरण्यानी गृहारामास्तु निष्कुटाः ॥ १ ॥**

अटवीति—अटन्त्यत्रेति अटवी, अर्य्यत इत्यरण्यम्, विशेषेण पियन्त्यत्र, वेपन्तेऽत्रेति वा विपिनम्, गाह्यत इति गहनम्, कानयति दीपयतीति काननम्, वनतीति वनमिति षट् वनस्य । महच्च तदरण्यं च महारण्यम्, महदरण्यमरण्यानीति द्वे महावनस्य गृहस्यारामाः गृहारामाः, कुटाद्गृहान्निष्क्रान्ताः निष्कुटा इति द्वे गृहोपवनस्य ॥ १

पु. न. न.

बनाया बाग — **आरामः स्यादुपवनं (कृत्रिमं वनमेव यत्) ।**

स.

राजमन्त्री व वेश्या का बाग — **"अमात्यगणिकागेहोपवने" वृक्षवाटिका ॥ २ ॥**

आराम इति—यत् कृत्रिमं वनं तदेव आरमन्त्यत्रेत्यारामः, उपगतं वनं उपवनं स्यदिति द्वे कृत्रिमवृक्षसमूहस्य । अमात्यो मन्त्री, गणिका वेश्या तयोर्गेहोपवनं तस्मि वटति, वट्यते वा वाटिका, वृक्षाणां वाटिका वृक्षवाटिकेत्येकं मन्त्रिणो वेश्याया गृहस्थोपवनस्य ॥ २ ॥

पु. न.

राजा का बाग — **(पुमानाऽ)ऽक्रीड उद्यानं "राज्ञःसाधारणं वनम्" ।**

न.

रानी का बाग — **'स्यादेतदेवं' प्रमदवन "मन्तःपुरोचितम्" ॥ ३ ॥**

पुमानिति—राज्ञो यत्साधारणं वनं तत् आक्रीडन्त्यत्रेति आक्रीडः पुमान् स्यात्, उद्यान्त्यत्रेत्युद्यानमिति द्वे राज्ञः सर्वोपभोग्यवनस्य । अन्तःपुरोचितं यद्वनं तदेव प्रमदानां वनं प्रमदवनं स्यादित्येकं यत्र सस्त्रीको राजा क्रीडति तस्य वनस्य ॥ ३ ॥

पंक्ति या पाति — स. स. स. स. स स. स.

[illegible] — **वीथ्यालिरावलिः पंक्तिः श्रेणीलेखास्तु राजयः ।**

वन समूह — स. पु. पु. पु.

अंकुर — **वन्या (वनसमूहे)स्यादङ्कुरो (ऽभिनवोद्भिदि) ॥ ४ ॥**

वीथीति—[illegible] इति वीथी—वीथिर्वा, [illegible], आवलतीति आवलिः, [illegible] इति पंक्तिः, [illegible] इति श्रेणीति [illegible] । [illegible] इति [illegible], [illegible] इति द्वे [illegible] । वनसमूहः वनानां [illegible]

१ इति [illegible]

नानां समूहो वन्येत्येकं वनसमुदायस्य। अथवा वनानां समूहो वन्या. वनानां समूहो वनसमूह इति द्वे वनसमूहस्य। अङ्कुयत अङ्कुरः, नविनमीति डीत्, अभिनवश्चासावुद्भिञ्चाभिनवोद्भिद् तस्मिन्निति द्वे अङ्कुरस्य ॥ ४ ॥

पु. पु. पु. पु. पु. पु.

वृक्ष या पेड़ **वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।**

पु. पु. पु. पु. पु. पु. पु.

अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ॥ ५ ॥

वृक्ष इति—वृक्षति, वृश्च्यते वा वृक्षः, मह्यां रोहतीति महीरुहः, शाखास्त्यस्मिन्नस्य शाखतीति वा शाखी, विटप. शाखा विस्तारोऽस्यास्तीति विटपी, पादैः पिबतीति पादपः, तरति, तरन्त्यनेन वा तरुः, अनसः शकटस्याकं गतिं हन्तीति अनोकहः, कुटतीति कुटः, सलति वायुना चलति, सल्यते वा सालः, पलाशानि सन्त्यस्येति पलाशी, द्रवत्यूर्ध्वमिति द्रुः, 'समुदाये वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते' इति न्यायात् द्रुः शाखास्यास्तीति द्रुमः, न गच्छतीत्यगम इति त्रयोदश वृक्षस्य ॥ ५ ॥

वानस्पत्य पु. पु.

वनस्पति **वानस्पत्यः "फलैः पुष्पा" त्तैरपुष्पाद्वनस्पतिः।**

ओषधी स. पु. पु.

फलवान् **ओषध्यः ('फलपाकान्ताः')स्यादवन्ध्यः फलेग्रहिः॥६॥**

वानेति—पुष्पाज्जातैः फलैः वनस्य पतिर्वनस्पतिस्तस्मिन्भवो वानस्पत्यः स्यादित्येकं वानस्पत्यस्य। अपुष्पाज्जातैस्तैःफलैः वनस्पति. स्यादित्येकं वनस्पतः। फलपाक एव अन्तो यासां ताः ओषाः सोपा दीप्तयो वा धीयन्तेऽत्रेति ओषध्यः स्युरित्येकमोषध्याः। वन्धे साधुः वन्ध्यः, न वन्ध्योऽवन्ध्यः, फलानि गृह्णातीति फलेग्रहिः—फलग्रहिश्चेति द्वे फलसमये फलग्राहकस्य ॥ ६ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

वाझ **वन्ध्योऽफलोऽवकेशी च फलवान् फलिनः फली।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

सफल **प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥**

पु.स.न. पु.स.न.

फूले हुए **फुल्लश्चैते विकसिते स्यु "रवन्ध्यादयस्त्रिषु"।**

वन्ध्य इति—वन्धे साधुरिति वन्ध्यः, न फलान्यस्येति अफल., अवसन्नाः केशा यस्य सोवकेशो निष्केशोऽस्यास्तीति, अवकं शून्यमीष्टे तच्छीलो वेत्यवकेशीति त्रीणि वन्ध्यस्य। फलानि सन्त्यस्येति फलवान्, फलिनः, फली चेति त्रीणि फलसहितवृक्षस्य। फलति स्म फुल्लः प्रकर्षेण फुल्लः, प्रफुल्लतीति वा प्रफुल्लः, उत्फुल्लति उत्फलति स्म

१ अनोकहा कम्पितपुष्पगन्धिरिति रघुः ॥ २ यत्रान्या ओषधयो म्लायन्त इति श्रुति ॥

वेत्युत्फुल्लः, संफुल्लति संफलति स्म वेति संफुल्लः, व्यावृत्तः कोशः संकोचोऽस्मादिति व्याकोशः, कचतीति कचः, विगतः कचोऽस्मादिति विकचः, स्फुटतीति स्फुटः, अफालीदिति फुल्लः, व्यकासीदिति विकासित इत्यष्टौ प्रफुल्लवृक्षस्य। अबन्ध्यादयो विकसितान्तास्त्रिषु त्रिलिङ्ग्यां स्युरिति ॥ ७ । ३ ॥

शाखापत्रशून्य पु.न. पु. पु. पु.
छोटा वृक्ष **स्थाणु(र्वा ना)ध्रुवः शङ्कु(र्ह्रस्वशाखाशिफः)क्षुपः॥८॥**
शाखाशून्य या पु. पु. स. स. स.
ठूठ लता या **(अप्रकाण्डे) स्तम्बगुल्मौ वल्ली(तु)व्रततिर्लता।**
बेल, स. स. पु.
फैली लता **(लता प्रतानिनी) वीरुद्गुल्मिन्युलप (इत्यपि) ॥ ९ ॥**

स्थेति—तिष्ठतीति स्थाणुः वा विकल्पेन ना पुमान्स्यात्, ध्रुवतीति ध्रुवः, शङ्कतेऽस्मादिति शङ्कुरिति त्रीणि शाखापत्ररहितवृक्षस्य। शाखा च शिफा च ते ह्रस्वे शाखाशिफे यस्यैस क्षौतीति क्षुपः कथ्यत इत्येकं सूक्ष्मशाखामूलस्य शाखोटकादेः । न प्रकाण्डोऽस्येति तस्मिन् तिष्ठतीति स्तम्बः, गुडतीति गुल्म इति द्वे स्कन्धरहितस्य। वल्लते इति वल्ली वल्लिरपि—वेल्लिश्च प्रतनोति, व्रतमिव करोतीति वा व्रततिः, लततीति लतेति त्रीणि लतामात्रस्य। शाखापत्रसंचयः प्रतानः सोऽस्त्यस्याः सा प्रतानिनी एतादृशी लता वीरुदादिशब्दत्रयवाच्या भवतीति। विरोचते विरुणद्धीति वा वीरुत्, गुल्मः प्रतानोऽस्त्यस्या गुल्मिनी, वलतीति उलप इति त्रीणि महालतायाः ॥ ८ । ९ ॥

वृक्ष व पर्वत पु. पु. पु.
की उँचाई **नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च (सः)।**
पु.न. पु.
वृक्षका भाग **अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः १०**

नगेति—नगादयो वृक्षगिरिदेवालयादयस्तेषामारोहणमारोहो दैर्घ्यं स उच्छ्रयणमुच्छ्रायः, उत्सेधनमुत्सेधः, उच्छ्रयणमुच्छ्रयश्चेति त्रीणि वृक्षादिदैर्घ्यस्य। तरोर्वृक्षस्य मूलादारभ्य शाखावधिः प्रकाण्डयते, प्रकाम्यते वेति पृषोदरादित्वात् प्रकाण्डः अस्त्री स्यात् स्कन्द्यते इति स्कन्धः "स्कन्धः स्यान्नृपतावंसे संपरायसमूहयोः। काये तरुप्रकाण्डे च आचार्ये छन्दसोऽभिदि इति धान्तेषु मेदिनी" ति द्वे स्कन्धस्य ॥ १० ॥

शाखा स स. स. स. स. स.
बड़ी शाखा व्रण(समे) शाखालते स्कन्धशाखाशाले शिफाजटे।
ड़ व और पु. स.
[illegible](शाखाशिफा)वरोहः स्या"न्मूलाच्चाग्रंगता" लता॥११॥

[illegible] इति—शाखयति, शाखते वृक्षोऽनयेति शाखा, लततीति लता इति द्वे [illegible] [illegible] इति द्वे शाखायाः। स्कन्धस्य शाखा स्कन्धशाखा, शालतीति शाले [illegible]

द्वे स्कन्धात्प्रथमोत्पन्नशाखायाः । शेते इति शिफा, [illegible]
वटादेः शाखाया अवलम्बिनी शिफा (मूलम्) [illegible]
रोहस्य । मूलादूर्ध्वंगता शिफा जटा स्यात् [illegible]
ाह—तरुमूलात्प्रभृतिवृक्षाग्रपर्यन्तंगता [illegible]
ततायाः ॥ ११ ॥

वृक्षकी चोटी
वृक्ष की जड़   न. न. पु.न. न. पु. पु.
शिरोऽग्रं शिखरं (वा ना) मूलं बुध्नोऽङ्घ्रिनामकः ।

सार या हीर
वकला या
छिलका   पु. पु. स्त्री. पु.न. पु.न.
सारो मज्जा (नरि) त्वक् (स्त्री) वल्कं वल्कलमस्त्रियाम् ॥१२॥

शिर इति—श्रीयन्त इति शिरः, अग्रतीत्यग्रम्, [illegible]
स्यादिति त्रीणि शिखरस्य । मूलतीति मूलम्, [illegible]
यस्येत्यंघ्रिनामक इति त्रीणि मूलमात्रस्य । [illegible]
नान्तो नरि पुंसि स्यात् [illegible]
मज्जोक्ता मज्जया सहेति द्विरूपकोशाद्गेति द्वे [illegible] । [illegible]
त्वक् स्त्री स्यात् । वलते, वल्कयतीति वा वल्कम्, [illegible]
उभे अस्त्रियां पुंनपुंसके स्यातामिति त्रीणि वल्कलस्य ॥ १२ ॥

काठ
इन्धन   न. पु.न. न. न. न. न. स्त्री.
काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् (स्त्रियाम्) ।

खोखला
मंजरी   पु. पु.न. स्त्री. स्त्री.
निष्कुहः कोटरं (वा ना) वल्लरिर्मञ्जरिः (स्त्रियौ) ॥१३॥

काष्ठमिति—काश्यत इति काष्ठम्, दीर्यत इति दारु (पुंनपुंसकयोर्दारुरिति त्रिकाण्डशेषः) इति द्वे काष्ठमात्रस्य । इन्धेऽग्निरनेनेतीन्धनम्, एधतेऽनेनेत्येधः, इध्यतेऽनेनेतीध्मम्, इध्यतेनेनेति एधः, समिध्यतेऽनयेति समित् स्त्रियां स्यादिति त्रीण्यग्निसन्दीपनतृणकाष्ठादेः । द्वे यागादौ हूयमानकाष्ठस्य । (पञ्चापि पर्याया इति स्वामी) निष्क्रम्येन कुहयते इति निष्कुहः, कुटनं कोटस्तं रातीति कोटरं वा ना पुमान्स्यादिति द्वे वृक्षादिरन्ध्रस्य । वल्लत इति वल्ल्—ऋच्छतीत्यरिः वल्लू चासावरिश्च वल्लनं वल्लू तामृच्छतीति वा वल्लरिः—वल्लरी च, मञ्जुत्वमृच्छतीति मञ्जरिः—मञ्जरी चेत्युभे स्त्रियौ स्यातामिति द्वे वल्लरेः ॥ १३ ॥

पत्ता नया पत्ता   न. न. न. न. न. पु.
पत्रं पलाशं छदनं दलं पर्णं छदः (पुमान्) ।

डालोंका फैलना   पु.न. न. पु. पु.न.
पल्लवोऽ(स्त्री) किसलयं विस्तारो विटपो(ऽस्त्रियाम्) ॥१४॥

१ शिखरोऽस्त्रीद्रुमाग्रे चाद्रिशृङ्गपुलकाग्रयोः ॥ (इति कोषान्तरम्)

पत्रमिति–पततीति पत्रम्, पलं मांसमश्नातीति पलाशम्, छद्यतेऽनेनेति छदनम्, दलतीति दलम्, पृणाति, पर्णयति, पिपर्तीति वा पर्णम्, छद्यते-छाद्यते वानेनेति छदः पुमान्स्यादिति षट् पत्रस्य । पल्लवः लूयते, पल्यते इति पल्, लूयत इति लवः, पल् चासौ लवश्चेति वा पल्लवः अस्त्री स्यात् (पुंसि क्लीबे च पल्लव इति व्याडिः) किञ्चित्त लतीति किसलयमिति द्वे नवपत्रस्य । विस्तरणं विस्तारः, विटानां पानम् विटान्पातीति वा विटपः अस्त्रियां पुंनपुंसके स्यादिति द्वे शाखादिविस्तारस्य ॥ १४ ॥

न न. न. न.

फल, गुच्छा, गोला (वृक्षादीनां) फलं सस्यं वृन्तं प्रसवबन्धनम् ।

पु.स.न. पु.स.न.

फल, सूखाफल (आमे फले)शलाटुः स्या'च्छुष्के'वान (उभे त्रिषु)॥१५

वृक्षेति–वृक्षादीनां फलतीति फलम्,सस्तीति सस्यम्, तालव्यादिपाठे तु शस्यत इ शस्यमिति द्वे फलस्य । वृणोतीति वृन्तम्, प्रसूयत इति प्रसवः, वध्यतेऽनेनेति बन्धनम् प्रसवस्य पुष्पफलपत्रस्य बन्धनमिति द्वे पुष्पफलपत्रबन्धनस्य । आमे फले शलती शलः, अटतीति अटुः शलश्चासावटुश्चेति शलाटुः स्यादित्येकमामफलस्य । शुष्के फले वायति स्मेति वान्यते वा वानं स्यादित्येकं शुष्कफलस्य । उभे शलाटुवाने त्रिषु लिङ्गेषु स्यातामिति ॥ १५ ॥

नई कली, पु. न. स. पु.

कली, फूलका क्षारको जालकं 'क्लीबे' कलिका कोरकः (पुमान्)

गुच्छा, पु. पु. पु.न. पु.न.

फूलती कली स्याद्गुच्छकस्तु स्तबकः कुड्मलो मुकुलो(ऽस्त्रियाम्)॥१६

क्षारक इति–क्षरतीति क्षारकः, जलति, जालयति वा जालम्, जालमिवेति जालकं क्लीबे स्यादिति द्वे नवकलिकावृन्दस्य । कलयतीति कलिः सैव कलिका, कुर्यत इति कोरकः पुमान् " कोरकोऽस्त्रीकुड्मले स्यात्कक्कोलकमृणालयोः " इत्यादि दर्शना क्लीबेऽपि स्यादिति द्वे अविकसितकलिकायाः । गुच्छतीति गुच्छः स एव गुच्छकः गुच्छ [illegible], स्तूयते, तिष्ठतीति वा स्तबक इति द्वे विकासोन्मुखकलिकायाः, कलिकादि [illegible] [illegible] वा । कुटति, कुड्यते वा कुड्मलः कुटति कुट्यते वा कुट्मलश्च, मुञ्चति कलि [illegible] मिति मुकुलः उभौ अस्त्रियां पुंनपुंसके स्यातामिति द्वे ईषद्विकासोन्मुखकलिकायाः ॥ १६

स. न. न. न. न.

[illegible] (स्त्रियः) सुमनसः पुष्पं प्रसूनं कुसुमं समम् ।

पु. पु. पु. न.

[illegible] मकरन्दः पुष्परसः परागः सुमनोरजः ॥ १७ ॥

[illegible] ([illegible]) । [illegible]
[illegible] ॥

स्त्रिय इति—पुष्पे मन्यन्ते आभिरिति सुमनसः स्त्रियः स्युः (" भूम्नि स्त्रिया सुमनस इति रत्नकोषः " सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोरिति मेदिन्यादिरेकवचनमाह ।) पुष्यतीति पुष्पम्, प्रसूयते स्मेति प्रसूनम्, कुस्यतीति कुसुमम्, सुमनांसि सुमनः इति पञ्च प्रसूनस्य । मकरमपि याति, मकरमप्यन्दनीति वा मकरन्दः, पुष्पस्य रसः पुष्परस इति द्वे मकरन्दस्य । परागच्छतीति परागः, सुमनसां रजः सुमनोरज इति द्वे परागस्य ॥ १७ ॥

वृक्षों का फल द्विहीनं प्रसवे सर्वं हरीतक्यादयः (स्त्रियाम्) ।[1]

न. न. न. न. न.

आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं (फले) ॥ १८ ॥

द्वीति—प्रसवे फलपुष्पादिषु वर्तमानं सर्वं वक्ष्यमाणमश्वत्थादि द्विहीनं द्वाभ्यां स्त्रीपुंसाभ्यां हीनं नपुंसकलिङ्गं ज्ञेयमिति । हरीतक्याः फलं हरीतकी आदिना कोशातकी-बदरी—कण्टकारिकादयः प्रसवेपि स्त्रियां स्युरिति । फले अश्वत्थस्य फलमाश्वत्थम्, वेणोः फलं वैणवम्, प्लक्षस्य फलं प्लाक्षम्, न्यग्रोधस्य फलं नैयग्रोधम्, इङ्गुद्याः फलमैङ्गुदमिति पृथक् पृथगेकैकम् ॥ १८ ॥

भटकटैयाका बार्हतं च (फले जम्ब्वा) जम्बूः (स्त्री) जम्बु जाम्बवम् ।

फल जामुन (पुष्पे) जातिप्रभृतयः स्वलिङ्गाः व्रीहयः (फले) ॥ १९ ॥

बार्हतमिति—बृहत्याः फलं बार्हतमित्येकं बृहतीफलस्य । जमतीति जम्बूस्तस्याःफले जम्बूः स्त्री स्यात् जम्ब्वाः फलं जम्बु, जाम्बवमिति त्रीणि जम्बूफलस्य। पुष्पे वर्तमानाः जातिप्रभृतयः जातीयूथिका शेफालिकामल्लिकाद्याः स्वलिङ्गा भवन्ति जात्याः पुष्पं जातिः यूथिकायाः पुष्पं यूथिका, शेफालिकायाः पुष्पं शेफालिका, मल्लिकायाः पुष्पं मल्लिकेत्यादयो ज्ञेयाः फले वर्तमाना व्रीहयः स्वलिङ्गा भवन्ति यवाना फलानि यवाः, माषाणां फलानि माषाः, मुद्गानां फलानि मुद्गा इत्यादयोवगन्तव्याः ॥ १९ ॥

स.

कुम्हड़ा आदि "विदार्याद्यास्तु मूलेपि पुष्पे क्लीबेऽपि" पाटला ।[3]

पु. पु. पु. पु.

बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ २० ॥

पु. पु. पु. पु. पु.

पीपर अश्वत्थे (ऽथ) कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।

पु. पु. पु.

कैथा "तस्मि" न्दधिफलः पुष्पफलदन्तशठावपि ॥ २१ ॥

---

१ हरीतक्यादिभ्यश्च (४ । ३ । १६७) २ प्लक्षादिभ्योऽण् (४ । ३ । १६४)

३ पाटल कुसुमे वर्णेष्याशुव्रीहिश्च पाटल-इति शाश्वतात्पुलिङ्गोपि ॥

वीति—मूलेऽपि वर्तमाना विदार्याद्यास्तु स्वलिङ्गा भवन्तीति विदार्या भूकूष्माण्ड्याः मूलं पुष्पं फलमपि विदारी आदिना गम्भारी, शालपर्णीत्यादयो ज्ञेयाः, पुष्पे वर्तमाना पाटला क्लीबे स्यादपिशब्दात्स्वलिङ्गा भवतीति । पाटलायाः पुष्पं पाटलम्, पाटलापि "पाटलापाटलौ स्त्री स्यादस्य पुष्पे पुनर्न नेति मेदिन्यां पुंस्त्वस्य निषेधान्न पुंलिङ्गः" बुध्यत इति बोधिः, द्रुः शाखास्यास्तीति द्रुमः बोधिश्चासौ द्रुमश्चेति बोधिद्रुमः, चलं दलमस्येति चलदलः, पिप्पलं जलमस्यास्तीति पिप्पलः, कुञ्जरेणाश्यत इति कुञ्जराशनः, शाल्मलिवटाद्यपेक्षया न श्वश्चिरं तिष्ठति, अश्वत्थं जलमस्यास्तीति वा अश्वत्थ इति पञ्च पिप्पलस्य । अथेति—कपयस्तिष्ठन्त्यत्रेति पृषोदरादित्वात् कपित्थः, कवित्थोपि, तस्मिन्, दधिवर्णोद्रवस्तिष्ठत्यत्रेति दधित्थः, गृह्णातीति ग्राही, मननं मत्, मथतीति मथः मतो मथो मन्मथः, तस्मिन्निति दधिफलेऽस्येति दधिफलः, पुष्पयुक्तं फलमस्येति दधिफलः, दन्तानां शठ इवेति दन्तशठ इति सप्त कपित्थस्य ॥ २० । २१ ॥

पु. पु. पु. पु.

गूलर **उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।**

पु. पु. पु. पु.

कचनार **कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥ २२ ॥**

उद्विति—उल्लङ्घितमम्बरमनेनेति, उदतिशयेनाम्बते वा उदुम्बरः, जन्तवः फलेऽस्येति जन्तुफलः, यज्ञमङ्गतीति यज्ञाङ्गः, हेमवर्णं दुग्धमस्येति हेमदुग्धक इति चत्वारि उदुम्बरस्य । कुं भूमिं विदृणातीति पृषोदरादित्वात् कोविदारः, चमरमस्यास्तीति चमरिकः, कुमुद्दालयतीति शकन्ध्वादित्वात् कुद्दालः युगं युग्मं पत्रमस्येति युगपत्रक इति चत्वारि कोविदारस्य ॥ २२ ॥

पु. पु. पु.स. पु.

[illegible] **सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।**

पु. पु. पु. पु.

[illegible] **आरग्वधे राजवृक्षसंपाकचतुरङ्गुलाः ॥ २३ ॥**

पु. पु पु. पु.

अमिलतास(?) **आरेवतव्याधिघातकृतमालसुवर्णकाः ।**

पु. पु. पु. पु. पु.

जम्बीरी नींबू(?) **(स्युः) जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २४ ॥**

सप्तेति—सप्त सप्त पर्णान्यस्येति सप्तपर्णस्तस्मिन्, विशाला त्वगस्येति विशालत्वक्, शरदि पुष्प्यतीति शारदः शारद्यपि, विषमाश्छदा यस्येति विषमच्छद इति चत्वारि [illegible] । आरग्वधेति—[illegible] तां हन्तीति आरग्वं रोगसमूहं [illegible] वा आरग्वधस्तस्मिन्, राजा चासौ वृक्षश्च रोगाणां राजानं [illegible] [illegible], [illegible] पाकोऽस्येति संपाकः [illegible] पाकोऽस्येति वा [illegible]

न्तालव्यादिरपि। स्वामिमते शमीशिविम् अकतीति शम्याकोपि, चतस्रोऽङ्गुलयः प्रमाणमस्येति चतुरङ्गुलः, आरेवयति निस्सारयति मलं सारकत्वादिति आरेवः, अमतीति अतः आरेवः चासावतश्चेति आरेवतः, व्याधीन्हन्तीति व्याधिघातः, कृता माला पुष्पैरिति कृतमालः, शोभनो वर्णोऽस्येति सुवर्णकः, सुष्ठु पर्णान्यस्येति निघण्टौ तु सुपर्णोपीत्यष्टावारग्वधस्य। जम्यत इति जम्बीरस्तस्मिन्, दन्तानां शठ इव दन्तशठः, जम्भयत्यम्लत्वादिति जम्भः, जम्भयतीति जम्भीरः जम्भयतीति जम्भलः एते स्त्रीति पञ्च जम्भीरस्य ॥ २३ । २४ ॥

पु. पु. पु. पु. पु.

वरना **वरणे वरुणः सेतुस्तिक्तशाकः कुमारकः।**

पु. पु. पु. पु. पु.

नागकेसर **पुंनागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ २५ ॥**

वरण इति—वृणोतीति वरणस्तस्मिन्, व्रियते वृणोति वा वरुणः, सिनोति, सीयते वा सेतुः, तिक्तः शाकोऽस्येति तिक्तशाकः, कुमारयतीति कुमारः कुमार इव कुमारक इति पञ्च वरणस्य। पुमान् नाग इव पुन्नागस्तस्मिन्, पुरतीति पुरुषः, तुङ्ग्यते इति तुङ्गः, प्रशस्ताः केसरा अस्येति केसरः, देवानां वल्लभ इति देववल्लभ इति पञ्च नागकेसरस्य ॥ २५ ॥

पु. पु. पु. पु.

नींव बड़ा तेंदुआ **पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः।**

पु. पु. पु. पु. पु.

या तिनिस **तिनिशे स्यन्दनो नेमीरथद्रुरतिमुक्तकः ॥ २६ ॥**

पु. पु. पु. पु.

अम्बाडा या **वञ्जुलश्चित्रकृच्चाथ (द्वौ) पीतनकपीतनौ।**

पु. पु. पु. पु.

अमरा महुआ **आम्रातके मधूके (तु) गुडपुष्पमधुद्रुमौ ॥ २७ ॥**

पहाड़ी या पु. पु. पु.

जली महुआ **वानप्रस्थमधुष्ठीलौ (जलजेऽत्र) मधूलकः।**

पारीति—पारमस्यास्तीति पारि पारंगतं भद्रमस्य, परितोभद्रमस्येति वा परिभद्रः स एव पारिभद्रस्तस्मिन्, नियमयति, निम्बतीति वा निम्बः निम्बसंज्ञकस्तरुर्निम्बतरुः, मन्दते, मन्दा अरा यस्य, मन्दमृच्छतीति वा मन्दारः, पारि पारंगतं जातं जन्मास्य, पारिणः समुद्राज्जातो वा स एव पारिजातक इति चत्वारि 'बकायनी' इत्याख्यातस्य। अतिक्रान्तो निशाः, अतिशयेन नेशतीति वा पृषोदरादित्वात् तिनिशस्तस्मिन्, स्यन्दत इति स्यन्दनः, नयतीति नेमिः, रथस्य द्रुः रथद्रुः, अतिशयितो मुक्तो [illegible] अतिमुक्तकः, वञ्च्यत इति वञ्जुलः, चित्रं करोतीति चित्रकृदिति सप्त तिनिशस्य।

ततीति आम्रातकः अम्रातकश्च तस्मिन्, पीतं करोति पीतयतीति पीतनः, कपीतं कपेर्वर्णोस्य तनः ईर्लक्ष्मीस्तस्यास्तन ईतनः कपीनां कपेर्वा ईतनः कपीतनः इमौ द्वौ स्यातामिति त्रीणि आम्रातकस्य । मह्यते, मन्यते वा मधूकस्तस्मिन्, गुड इव पुष्पमस्येति गुडपुष्पः, मधुनामा द्रुमो मधुद्रुमः, वनप्रस्थे वनैकदेशे भवो वानप्रस्थः, मधु ष्ठीवति, मधुष्ठीलं गर्भेऽस्येति वा मधुष्ठील इति पञ्च मधूकस्य । अत्र जलजे मधूके मधुलातीति मधूलस्स एव मधूलक इत्येकं जलजमधूकस्य ॥ २६ । २७ । १ ॥

पु. पु. पु.
पीलुआ पहाड़ी **पीलौ गुडफलः स्रंसी (तस्मिंस्तु गिरिसंभवे)** ॥ २८ ॥
पीलुआ पु. पु. पु. पु
अकुहर या पिस्त **अक्षोटकर्परालौ द्वावङ्कोटे तु निकोचकः ।**

पीलाविति—पीलतीति पीलुस्तस्मिन्, गुड इव फलमस्येति गुडफलः, अवश्यं स्रंसयति मलमिति स्रंसीति त्रीणि पीलोः। तस्मिन्पीलौ गिरिसंभवे गिरिजे सति अक्ष्णोरिव अक्षस्येवोटाः पर्णान्यस्येति वा अक्षोटः, कर्परमालतीति, कर्परास्यास्ति वा कर्परालः कन्दरालोपि इमौ द्वौ स्यातामिति द्वे पर्वतपीलोः । अङ्कयत इत्यङ्कोटस्तस्मिन्, निकुच्यते इति निकोचकः लिकोचकोपीति द्वे अङ्कोलस्य ॥ २८ । १ ॥

पु. पु. पु. पु. पु.
ढाख या छिउल **पलाशे किंशुकः पर्णो वातपोथो (ऽथवेतसे)** ॥ २९ ॥
पु. पु. पु. पु. पु. पु.
बेत **रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः ।**
पु. पु. स. पु.
जलबेत **(द्वौ) परिव्याधविदुलौ नादेयी (चाम्बुवेतसे)** ॥ ३० ॥

पलेति—प्रशस्तानि पलाशान्यस्य, पलं मांसमश्नातीति वा पलाशस्तस्मिन्, किंचिन्नशुक इव शुकतुण्डाभपुष्पत्वात्किंशुकः, पृणाति, पिपर्त्ति, प्रशस्तानि पर्णान्यस्येति वा पर्णः, वातं पोथयतीति वातपोथ इति चत्वारि पलाशस्य । अथेति—अयनमितम् वा कित्वरश्चैनं ज्ञानं स्यतीति, इयते वा वेतसस्तस्मिन्, रम्यतेऽत्रेति रथः, अभ्रमिव अभ्रसमये वा पुष्पमस्येति अभ्रपुष्पः, वेत्ति, विन्दते वा विदुलः, शीतमस्यास्तीति शीतः, वनीं नीरं समन्तान्नीरमस्येति वानीरः, वञ्जतीति वञ्जुल इति सप्त वेतसस्य । अम्बुजातो वेतसोऽम्बुवेतसस्तस्मिन्, परिविध्यते परिव्याधः, विदल इति विदुलः इमौ द्वौ पुंसि, नद्यां भवा नादेयीति चत्वारि जलजातवेतसस्य ॥ २९ । ३० ॥

१ [illegible] 'निकोचकः' (इति क्षीरः) ॥

पु. पु. पु. पु. पु.

सहँजना लाल शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः।

पु. पु. पु.

फूलका सहेजना रीठा (रक्तोऽसौ) मधुशिग्रुः स्यादरिष्टः फेनिलः (समौ)॥३१॥

शोभेति–शोभामनक्तीति शोभाञ्जनः स एव शोभाञ्जनो वा सुष्ठुभातामनक्तीति द्विग्रहे तु सुभाञ्जनः सएव सौभाञ्जनो दन्त्यादिरपि तस्मिन्, शिनोतीति शिग्रुः, तीक्ष्णो गन्धोऽस्येति तीक्ष्णगन्धकः, आक्षीवते, आक्षीवयति वा आक्षीवः. आक्षीवोऽपि, मोचयति मोचः स एव मोचक इति पञ्च सौभाञ्जनस्य। असौ शोभाञ्जनः रक्तः रक्तपुष्पश्चेत्तदा मधुप्रधानः शिग्रुः मधुर्मधुरः शिग्रुर्वा मधुशिग्रुः स्यादित्येकं रक्तशोभाञ्जनस्य। न रिष्टमस्मादिति अरिष्टः, फेनोऽस्यास्तीति फेनिलः उभौ समाविति द्वे 'रीठा' इति ख्यातस्य॥ ३१॥

पु. पु. पु. पु. पु.

बेल, पाभरि बिल्वेशाण्डिल्यशैलूषौ मालूरश्रीफलावपि।

पु. पु.स. पु.स. पु. पु. पु.

बरगद प्लक्षो जटी पर्कटी स्यान्न्यग्रोधो बहुपाद्वटः॥ ३२॥

बीति–बिलतीति बिल्वः (बिल्वं फले श्रीफले ना) तस्मिन्, शण्डते, शण्डयति शाण्डिलयस्य गोत्रापत्यं वा शाण्डिल्यः शिलूषस्यापत्यं, शैलूष इवेति वा शैलूषः, मां लक्ष्मीं परेषां लुनातीति मालूरः, श्रीप्रदं श्रीप्रियं वा फलमस्येति श्रीफलोपीति पञ्च बिल्ववृक्षस्य। प्लक्षत्यधोगच्छति, प्लक्ष्यते वा प्लक्षः, जटतीति जटी–जटिः–जटी वा पृच्यत इति पर्कटी स्यादिति त्रीणि पर्कट्याः 'पाकर' इतिख्यातस्य। न्यक्रुणद्धीति न्यग्रोधः, बहवः पादा अस्येति बहुपाद्, वटतीति वट इति त्रीणि वटस्य॥३२॥

पु. पु. पु. पु. पु. पु.

लोध, आँव, खुशबूदार गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनौ।

पु. पु. पु. पु.

आँव आम्रश्चूतो रसालो (सौ) सहकारो (ऽतिसौरभः)॥३३॥

गालेति–गालं नेत्रस्रवं वायति, गालवस्यापत्यमिति वा गालवः, शबराणामयं शाबरः, साबरो दन्त्यादिरपि। रुणद्धीति लोध्रः, लत्वाभावे रोध्रोपि, तीर्यते मलमनेनेति तिरीटः, तिलत्यङ्गमनेनेति तिल्वः मार्ष्टयनेनेति मार्जन इति षट्लोध्रस्य। आद्यौ श्वेतलोध्रे, शेषा रक्तलोध्रे, (इति स्वामी) अम्यत इति आम्रः, चूष्यते स्म, च्योतति रसमिति वा चूतः, रसमलतीति रसाल इति त्रीण्याम्रस्य। असावाम्रोऽतिशयितं सौरभमस्येत्यतिसौरभश्चेत्तदा सहकारयति मेलयति द्वन्द्वमिति सहकारः स्यादित्येकमतिसुगन्धाम्रस्य॥ ३३॥

पु. न. पु. पु. पु.

गुग्गुल **कुम्भोलूखलकं (क्लीबे) कौशिको गुग्गुलुः पुरः ।**

पु. पु. पु. पु. पु.

लसोड़ा **शेलुः श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ ३४ ॥**

कुम्भेति—कमुम्भति (शकन्ध्वादित्वात्) कुम्भः, ऊर्ध्वं खम् उलूखं तल्लातीति उलूखलन्तदेव उलूखलकं क्लीबे स्यात्, कोशे भवः कौशिकः, गोजतीति गुज् व्याधिस्तस्माद्गुडति “ डलयोरेकत्वात् ” गुग्गुलुः, पुरतीति पुरः “ पुरं पाटलिपुत्रेऽङ्गे गुग्गुलौ तु पुमानयमिति ” (रभसः) इति पञ्च गुग्गुलोः । शिलतीति शेलुः, श्लेष्माणामतनीति श्लेष्मातकः, श्यायते स्मेति शीतः, उद्दालयतीति उद्दालः, बहून्वारयति, बहून्वृणोतीति बहुवारः स एव वा बहुवारकः इति पञ्च बहुवारस्य ॥ ३४ ॥

पु.न. पु. पु. पु.

चिरौंजी **राजादनं पियालः “स्यात्सन्नकद्रुर्धनुष्पटः ।**

खभारी या स. स. स. स.

कभारी **गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ ३५ ॥**

स. स. पु.

श्रीपर्णी भद्रपर्णी (च) काश्मर्यश्चा (प्यथ द्वयोः) ।

राजेति—राजभिरद्यत इति राजादनम्, राजानमततीति विग्रहे तु राजातनोपि “राजादनं प्रसरको राजातन”(इति वाचस्पतिः) पीयत इति पियालः प्रीणातीति विग्रहे तु प्रियालश्च प्रियालश्च पियालकः (इति माधवः) सन्नोलीनः कद्रुर्वर्णोऽस्येति सन्नकद्रुः सन्नः, कद्रुश्चेति द्वे नामनीति सोमनन्दीति (मुकुटः) दधन्ति धारयतीति धनुः, पटतीति पटः, धनुष इव पटो विस्तारोऽस्येति धनुष्पट इति समस्तं नाम वेति चत्वारि राजादनस्य । कं जलं बिभर्तीति गम्भारी, कम्भारीत्यपि, सर्वतो भद्रं यस्याः सर्वतोभद्रा, काशत इति काश्मरी, मधु इव पर्णान्यस्याः सैव मधुपर्णिका, श्रीयुक्तानि पर्णान्यस्याः श्रीपर्णी, भद्राणि पर्णान्यस्या भद्रपर्णी, काश्मरीशब्दोऽस्त्यस्येति काश्मर्य इति सप्त खम्भार्याः । अथेति—द्वयोर्भवन्तीत्यग्रे सम्बध्यते ॥ ३५ । १ ॥

पु.स. स. स. न. न. न.

बेर **कर्कन्धूर्बदरीकोली कोलं कुवलफेनिले ॥ ३६ ॥**

बेर का न. न. न. पु.

[illegible] **सौवीरं बदरं घोण्टा “प्यथ स्या” त्स्वादुकण्टकः ।**

पु. पु पु. पु.

विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपा(दपि) ॥ ३७ ॥

[illegible] ॥

कर्कमिति—कर्कं कण्टकं दधातीति कर्कन्धूः द्वयोः स्त्रीपुंसयोः स्यात्, बदतीति बदरी, ोलति घनीभवतीति कोली, कौ वलतीति विग्रहे तु कुवल्यपीति त्रीणि बदर्याः। कोया: फलं कोलम्, कुवल्याः फलं कुवलम्, फेनोऽस्यास्तीति फेनिलम्, सुवीरदेशे भवं ौवीरम्, बदर्याः फलं बदरम्, घोणात इति घोण्टा "घोण्टा तु बदरी पूगवृक्षयोरपि ोषितीति" (मेदिनी) इति षट् कर्कन्धूफलस्य। स्वाद्विति—कण्टकोऽस्यास्तीति कण्टकः, ादुश्चासौ कण्टकश्चेति स्वादुकण्टकः स्यात्, विकङ्कते इति विकङ्कतः, स्रुवायाः वृक्षः ्रुवावृक्षः, ग्रन्थिरस्यास्तीति ग्रन्थिलः, व्याघ्रस्य पादा इव पादा मूलान्यस्येति व्याघ्रादपीति पञ्च कठेरस्य ॥ ३६ । ३७ ॥

पु. पु. स. न.

नारगी ऐरावतो नागरङ्गो नादेयी भूमिजम्बुका।

पु. पु. पु. पु.

तेंदुश्रा तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ॥ ३८ ॥

ऐरेति—इरावत्या विद्युत इवायमैरावतः, नागा रजन्त्यत्र, नागस्य सिन्दूरस्येव रङ्गोऽस्येति वा नागरङ्गः, नृणातीति नारङ्गोपि "नागरङ्गे तु नारङ्गो नार्यङ्गस्त्वक्सुगन्धनः" (इति वाचस्पतिः) नद्यां भवा नादेयी, भूमेर्जम्बूः सैव भूमिजम्बुकेति चत्वारि नागरङ्गस्य। शितिः कालः सारो मज्जा यस्येति शितिसारकस्तस्मिन्, तिम्यतीति तिन्दुकः, स्फूर्जतीति स्फूर्जकः, कालः स्कन्धो यस्येति कालस्कन्धः "कालस्कन्धस्तमाले स्यात्तिन्दुके जीवकद्रुमे" (इति विश्वः) इति चत्वारि तिन्दुकस्य ॥ ३८ ॥

पु. पु. पु. पु.

कड़वा तेंदुश्रा काकेन्दुः कुलकः काकपीलुकः काकतिन्दुके।

पु. पु. पु.स. पु. पु.

काली पाढरि गोलीढो झाटलो घण्टापाटलिर्मोक्षमुष्ककौ ॥ ३९ ॥

काकेति—काकानां काकवर्णो वा तिन्दुकः पृषोदरादित्वात् काकेन्दुः, कुलस्य प्रतिकृतिरिवकुलकः "कुलकं तु पटोले स्यात्सम्बद्धश्लोकसंहतौ। पुंसि वल्मीककाकेन्दुकुलश्रेष्ठेषु कथ्यते" (इति विश्वमेदिन्यौ) काकैः पील्यते, काकानां पीलुरिवेति वा काकपीलुकः, काकानां तिन्दुकः काकतिन्दुकस्तस्मिन्निति चत्वारि कटुतिन्दुकस्य कुचिलाख्यस्य वा। गोभिर्लिह्यते स्म गोलीढः, झाटं संघातं लातीति झाटलः, घण्टानीति घण्टा, पटनं पाटस्तं लातीति पाटलिः, घण्टा चासौ पाटलिश्चेति घण्टापाटलिः स्वामी तु (घण्टा, पाटलिरितिनामद्वयमाह) मोक्षयतिरोगमिति मोक्षः "मोक्षस्तु मुक्तिपाटलिमोचने" मुष्णातीति मुष्कः स एव मुष्कक इति पञ्च लोध्रविशेषस्य ॥ ३९ ॥

---

१ उक्तं च समन्वयप्रदीपे—यत्र वाक्यार्थविश्रान्तिः श्लोकेनैकेन जायते। तन्मुक्तकं युगं द्वाभ्यां त्रिभिः स्यात्तिलकं पुनः। चतुर्भिः स्याच्च कलकं पञ्चभिः कुलकं ततः। महाकुलकमित्यार्याः कथयन्ति ततः परमिति ॥

पु. पु. पु. पु. पु.

तिलक, झाऊ **तिलकः क्षुरकः श्रीमा (न्समौ) पिचुलझावुकौ ।**

स. स. स. पु. पु.

कायफर **श्रीपर्णिका कुमुदिका कुम्भी कैटर्यकट्फलौ ॥ ४० ॥**

तिलेति—तिलतीति, तिल इवेति वा तिलकः, "तिलको द्रुमभेदे स्यत्तिलके च तिल-कालके । क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु विशेषके" क्षुरतीति क्षुरकः, श्रीरस्त्यस्येति श्रीमानिति त्रीणि तिलकवृक्षस्य । पिचुं तूलं लातीति पिचुलः, 'झा' इति शब्दं वेति गच्छतीति झावुः झावुरिवेति झावुकः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे झावुकस्य । श्रीः पर्णेषु यस्या इति श्रीपर्णी सैव श्रीपर्णिका, कौ मोदते कुमुदा सैव कुमुदिका, कमुम्भतीति कुम्भी, कुम्भीव कुम्भी रसाधारत्वाद्वेति, केटनं केटस्त्रासस्तं रातीति केटरः स एव कैटर्य्यः कैडर्य्यश्च, (अत्र स्वार्थे ष्यञ्) कटतीति कट् फलतीति फलम् कट्फलमस्येति कट्फल इति पञ्च कट्फलस्य ॥ ४० ॥

पु. पु, स. पु.

लाल लोध **क्रमुकः पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ।**

पु. पु. पु. पु. न.

शहतूत **नूद (स्तु) यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु (च) ॥ ४१ ॥**

न. पु. पु. पु. पु.

कदम्ब **तूलं (च) नीपप्रियककदम्बास्तु हलिप्रिये ।**

पु. पु. स. पु.स.न.

भिलावा **वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी (त्रिषु) ॥ ४२ ॥**

क्रमुक इति—क्रामतीति क्रमुकः, पट्टिका आख्या यस्येति पट्टिकाख्यः, पट्टोऽस्यास्तीति, पटतीति वा पट्टी पट्टिश्च, लाक्षाप्रसीदत्यनेन, लाक्षां प्रसादयति वा लाक्षाप्रसादन इति चत्वारि पट्टिकाख्यलोध्रस्य । नुदति पापम, नु वदति, नूयते वा नूदः तुदतीति तूदोऽपि, युवन्त्यनेनेति यूपः, क्रामतीति क्रमुकः, ब्रह्मणि वेदिके साधु ब्रह्मण्यः, ब्रह्मणो ब्रह्मणि वा दारु ब्रह्मदारु, तूलयति, तूल्यते वा तूलमिति षट् अश्वत्थाकारस्य, पार्श्वपिप्पलाख्यस्य, नूदस्य वा । नयति, नीयते वा नीपः, प्रीणातीति प्रियकः, कदतीति कदम्बः हलिनः प्रियः सुरायाः अभिधाननादिति हलिप्रिय इति चत्वारि कदम्बस्य । वीर इव वृक्षो वीरवृक्षः, अरुषं करोतीति अरुष्करः, अग्निरिव मुखमस्या अग्निमुखी, भल्ल इवाऽऽचरतीति भल्लातकी त्रिषु त्रिलिङ्गया स्यादिति चत्वारि भल्लातकस्य ॥ ४१ । ४२ ॥

पु. पु. पु. पु.

गर्दभाण्डे कन्दरालकपीतनसुपार्श्वकाः ।

पु. स्त्री. स्त्री. स्त्री. पु.

प्लक्षश्च तिन्तिडी चिञ्चाम्लिकाथो पीतसालके ॥ ४३ ॥

पु. पु. पु. पु. पु.

खुआ या **सर्जकासनबन्धूकपुष्पप्रियकजीवकाः ।**

पु. पु. पु. पु. पु.

साल या कोरों **साले (तु) सर्जकार्श्याश्वकर्णकाः सस्यसंवरः ॥४४॥**

गर्देति—"गर्दभो गन्धभिदपि" गर्दभमत्तीति गर्दभाण्डः, कन्दरां लातीति कन्दरालः, या लक्ष्म्यास्तत ईतनः कपीनां कपीतनः, शोभनं पार्श्वमस्येति सुपार्श्वकः, प्लक्षतीति प्लक्ष इति पञ्च गर्दभाण्डस्य । चिञ्चमिति चिञ्चम् इत्यव्यक्तं शब्दं चिनोतीति चिञ्चा, अम्लोरसोऽस्यास्तीति अम्लिका, अम्लीकाचेति त्रीणि चिञ्चायाः । अथविनि—पीतः सारोऽस्यति पीतसारकः, सृज्यते वा सर्जकः, अस्यति रुजमिति असन. "प्रियकां जीवकोऽसनः" इति (रत्नकोषः) बन्धूकस्येव पुष्पाण्यस्येति बन्धूकपुष्पः, प्रीणातीति प्रियकः, जीवयतीति जीवक इति षट् विजयसारस्य । सल्यते, सालोदार्ढ्यमतिशयितमस्येति वा सालः, सर्जत इति सर्जः, कृषतीति कृषः स एव कार्श्यः, अश्वकर्ण इव पत्रमस्येति अश्वकर्णकः, सस्यैः संव्रियते, सस्यसंवर इति पञ्च सालस्य ॥ ४३ । ४४ ॥

पु. पु. पु. पु. पु.

अर्जुन, खिनी **नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।**

पु.न. पु. स.

-या खिरिणी **राजादनः फलाध्यक्षः क्षीरिकायामथ (द्वयोः) ॥४५॥**

पु.स. पु पु. पु. पु.

गोंदी, या पाखी **इङ्गुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ ।**

स. स. स. पु. पु.स.

भोजपत्र, सेमर **पिच्छिला पूरणी मोचा स्थिरायुःशाल्मलि "र्द्वयोः" ४६**

नदीति—नद्याः सर्जो नदीसर्जः, वीरश्चासौ तरुश्चेति वीरतरुः, इन्द्रस्य इन्द्र इव वा द्रुरितीन्द्रद्रुः, ककुभो दिशः सन्त्यस्येति ककुभः, अर्ज्यत इत्यर्जुनः इति पञ्च अर्जुनवृक्षस्य । राजभिरद्यत इति राजादनः, राजादनमपि, फलानामध्यक्ष. फलाध्यक्षः, क्षीरमस्त्यस्याः क्षीरिका तस्यामिति त्रीणि क्षीरिकायाः । अथेति इङ्गनमिङ्गस्तं द्यति खण्डयतीति इङ्गुदी द्वयोः स्यात्, तापसस्य तपस्विन उपयुक्तस्तरुस्तापसतरुरिति द्वे इङ्गुदस्य । ऊर्जनमूर्जः भूरूर्जोऽस्येति भूर्जः, प्रशस्तं चर्मास्यास्तीति चर्मी, मृदुस्त्वगस्येति मृदुत्वच इति त्रीणि भोजपत्रवृक्षस्य । पिच्छा शाल्मलिनिर्यासोऽस्त्यस्याः पिच्छिला, पूरयतीति पूरणी, मुञ्चति रसमिति मोचा, स्थिरमायुर्यस्याः स्थिरायुः "षष्टिवर्षसहस्राणि वने जीवति शाल्मलिरिति वचनात्" शालयतीति शाल, मलते इति मलिः शालश्चासौ मलिश्चेति शाल्मलिः द्वयोः स्यादिति पञ्च शाल्मलेः ॥ ४५ ॥

स. पु. पु. पु.

सेमर का गोंद **पिच्छा (तु) शाल्मलीवेष्टे रोचनः कूटशाल्मलिः**

पु. पु. पु. पु.

काला सेमर कंजा या करंज **चिरबिल्वो नक्तमालः करज (श्च) करञ्जके ॥ ४**

पिच्छेति—पतितुमिच्छति, पिच्छयाति, पिच्छयते वा पिच्छा, शाल्मल्य शाल्मलीवेष्ट इति द्वे शाल्मलीनिर्यासस्य । रोचत इति रोचनः, कूटश्चासौ शाल श्चेति कूटशाल्मलिरिति द्वे कृष्णशाल्मलेः । चिरं चिरि वा विलतीति चिर चिरिबिल्वोपि, नक्तं मालो धारणमस्य, नक्तमालतीति वा नक्तमालः, 'रक्तमाल' (स्वामी) करेण जन्यते, कं सुखं ज (वा रञ्जयतीति वा करजः, कं रञ्जयतीति व सएव करञ्जक इति चत्वारि करञ्जस्य ॥ ४७ ॥

पु. पु. पु. पु.

काटेदार कंजा **प्रकीर्यः पूतिकरजः पूतीकः कलिमारकः ।**

पु. स. स.

कंजा के भेद **(करञ्जभेदाः) षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ॥ ४**

प्रेति—प्रकीर्यते इति प्रकीर्यः, पूतिश्चासौ करजश्चेति पूतिकरजः, पुनातीति पू पूतिक इति पाठे तु पूतिं कायतीति पूतिकोपि, कलिं मारयतीति कलिमारः सएव मारकः, कलिकारक इति पाठे तु कलिं करोतीति कलिकारः स एव कलिकारक चत्वारि कण्टकवत्करञ्जस्य । भिद्यन्त इति भेदाः करञ्जानां भेदाः करञ्जभेदाः षड् ग्रन्थयो ग्रन्था वा यस्येति षड्ग्रन्थः मर्कतीति मर्कटी, अङ्गारवर्णपर्णा वल्लरीति अङ्गारवल्लरीत्येकैकं करञ्जभेदानाम् ॥ ४८ ॥

पु. पु. पु. पु.

लालकंजा **रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ।**

पु.म. पु. पु. पु.

खैर या कत्था **गायत्री बालतनयः खदिरो दन्तधावनः ॥ ४९ ॥**

रोहीति—अवश्यं रोहतीति रोही, रोहितो वर्णोऽस्यास्तीति रोहितः स एव रोहितकः प्लीह्नः शत्रुः प्लीहशत्रुः, दाडिमस्य पुष्पमिव पुष्पमस्येति दाडिमपुष्पक इति चत्वारि रोहितकस्य । गायन्तं त्रायत इति, गायत्र्योऽस्त्यस्यास्मिन्वा गायत्री, बालानां तनयः [illegible] यस्येति बालतनयः, खदतीति खदिरः, दन्तान्धावतीति दन्तधावन इति चत्वारि खदिरस्य ॥ ४९ ॥

१ " [illegible] वेणुकन्यका " (इति स्मृतः) ॥

२ " खदिरे रक्तसारश्च [illegible] दन्तधावनः । कण्टकी बालपत्रश्च [illegible] सिलिद्रुमः " ॥

पु. पु. पु.
दुर्गन्धवाला खैर अरिमेदो विट्खदिरे कदरः (खदिरेसिते) ।
पु. पु. पु.
सफेद कत्था सोमवल्कोऽप्यथ व्याघ्रपुच्छगन्धर्वहस्तकौ ॥ ५० ॥
पु. पु. पु. पु.
एरण्ड एरण्ड उरुबूकश्च रुचकश्चित्रकश्च (सः) ।
पु. पु. पु. पु. पु.
चञ्चुः पञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः ॥ ५१ ॥

अरीति—अरिरिव मेदो यस्येति अरिमेदः, विड्गन्धिः खादिरो विट्खदिरस्तस्मिन्निति द्वे दुर्गन्धिखदिरस्य । सिते खदिरे दृणातीति दरः कस्य जलस्य दरः कदरः, सोम इव वल्कोऽस्येति सोमवल्कोपीति द्वे श्वेतखदिरस्य । अथेति—व्याघ्रस्य पुच्छमिव पुच्छमस्येति व्याघ्रपुच्छः, गन्धर्वस्य मृगभेदस्य हस्त इव हस्तः पत्रमस्येति गन्धर्वहस्तकः, आईरयति वायुमिति एरण्डः, उरुं महान्तं वायुं वायतीति उरुबूकः, रोचत इति रुचकः, 'स' चित्रयतीति चित्रकः, चञ्चतीति चञ्चुः पञ्चाङ्गुलयोऽस्येति पञ्चाङ्गुलः, मण्डयतीति मण्डः, अमण्डः, आमण्डोपि, आदण्ड इत्येके, वर्धत इति वर्धमानः, व्यडं मलमम्चयतीति व्यडम्बकः, व्यडम्बनश्चेत्येकादश एरण्डस्य ॥ ५० । ५१ ॥

पु. स. स. स.
छोटी शामी (अल्पाशमी) शमीरः "स्या" च्छमी सक्तुफला शिवा ।
पु. पु. पु. पु.
शमी या छौंकरा पिण्डीतको मरुबकः श्वसनः करहाटकः ॥ ५२ ॥
पु. पु. पु. पु.
मयनफर शल्यश्च मदने शक्रपादपः पारिभद्रकः ।
पु.न. न. न. न.
देवदारु भद्रदारु द्रुकिलिमं पीतदारु (च) दारु (च) ॥ ५३ ॥
पु.न.
पूतिकाष्ठं च (सप्त स्यु) देवदारुण्यथ (द्वयोः) ॥ $\frac{?}{?}$ ॥

अल्पेति—अल्पाशमी, शमीरः स्यादित्येकमल्पशम्याः । शमयति रोगानिति शमी, सक्तुवत्फलमस्याः सक्तुफला, शिवं करोति शिवयतीति शिवेति त्रीणि शम्याः । पिण्डीं तनोति पिण्डीत. पिण्डीतइव पिण्डीतकः, मरुं वातीति मरुबकः, निर्जलेपि श्वसितीति श्वसनः, करं हाटयतीति करहाटः स एव करहाटकः, शलतीति शल्यः, मदयतीति मदन इति षट् मयनफलाख्यवृक्षस्य । शक्रस्य पादपः शक्रपादपः, पारिनिष्ठां पारं भद्रमस्येति पारिभद्रकः, भद्रं च तत् दारु चेति भद्रदारु, किलतीति किलिमम्, द्रुयुक्तं तत्किलिमं

चेति द्रुकिलिमम्, पीतं च तद्दारु चेति पीतदारु, दीर्यत इति दारु "पुंनपुंसकयोर्दार्विति त्रिकाण्डशेषः" पूति च तत्काष्ठं च पूतिकाष्ठम्, एते सप्त देवस्य दारु देवदार तस्मिन्स्युरित्यष्टौ देवदारोः ॥ ५२ । ५३ । १/२ ॥

पु.स. स. स. स. स.

पाढरि पाटलिः पाटलामोघा काचस्थाली फलेरुहा ॥ ५४ ॥

स. स. स. स.

काकुनि कृष्णवृन्ता कुबेराक्षी श्यामा (तु) महिलाह्वया ।

स. स. स. स. स. स.

लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ॥ ५५ ॥

स. स. स. पु.

विष्वक्सेना गन्धफली कारम्भा प्रियक (श्च सा) ।

अथेति—पातीति पाः, टलतीति टलिः, पाश्चासौ टलिश्चेति पाटलिः, पाटलीति द्वयोः स्त्रीपुंसयोः स्यात्, पाटं लातीति पाटला, मोहयतीति मोघा न मोघा अमोघा, "मोघा स्त्री पाटलावृक्षे मोघं त्रिषु निरर्थके" इति रुद्रात् 'मोघा' अपि, काचस्य कार्ष्णस्य स्थालीपात्रम् काचस्थाली, स्वामी तु कालो वर्णोऽस्त्यस्याः 'काला' तिष्ठतीति स्थाली "स्थाली स्यात्पाटलोखयोरिति" फले रोहतीति फलेरुहा, कृष्णं वृन्तमस्याः कृष्णवृन्ता, कुबेरस्येवाक्षि यस्याः कुबेराक्षीति सप्त पाटलायाः । श्यामो वर्णोऽस्त्यस्याः श्यामा, महिलाया आह्वय आह्वयो यस्या महिलाह्वया, लततीति लता, गवि भूमौ वन्द्यत इति गोवन्दनी, गुन्द्रयतीति गुन्द्रा, प्रियं गच्छतीति प्रियङ्गुः, फलमस्त्यस्याः फलिनी, फलं विद्यते यस्याः फली, विष्वक्सिनोतीति विष्वक्सेना, गन्धवत्फलमस्या गन्धफली, ईरं-द्रम्भा कारम्भा, प्रीणातीति प्रियकः "प्रियकः पीतसारके । नीपे चित्रमृगे चासौ प्रियङ्गौ कुङ्कुमेऽपि चेति" द्वादश कङ्गुसस्यस्य ॥ ५४ । ५५ । १/२ ॥

पु. पु. पु. पु. पु.

मण्डूकपर्णपत्रोर्णनटकट्वङ्गटुण्टुकाः ॥ ५६ ॥

पु. पु. पु. पु. पु.

स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः ।

पु. पु. स. पु.स.न.

शोणकश्चारलौ तिष्यफला त्वामलकी (त्रिषु) ॥ ५७ ॥

म. म. पु.

अमृता (च) वयस्था (च) 'त्रिलिङ्गस्तु' विभीतकः ।

पु. पु. पु. पु.

नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥ ५८ ॥

मण्डूकेति—मण्डूक इव पर्णमस्येति मण्डूकपर्णः, पत्रे ऊर्णाऽस्येति पत्रोर्णः, नटतीति नटः, कट्वन्यङ्गान्यस्येति कट्वङ्गः, टुण्टु इति कायतीति टुण्टुकः. सीव्यतीति स्योन. "स्योनः किरणसूर्ययोः" तेनाकति, अक्यते वा स्योनाकः, श्यायन इति, विग्रहे तु 'श्योनाकः' तालव्यादिरपि, शुकनासा इव पुष्पमस्यास्तीति शुकनासः, ऋृगतीति ऋक्ष., दीर्घं वृन्तमस्येति दीर्घवृन्तः, कुटन्वक्रीभवन् नटतीति कुटन्नटः, शोणतीति शोणः स एव शोणकः, "स्वामिमते शोनकोपि" इयर्तीति अरलः, अरलुः अरटुश्चेति द्वादश श्योनाकस्य । तिष्यं मङ्गल्यं फलमस्यास्ति-त्यफला, आमलत इत्यामलकी त्रिषु त्रिलिङ्गयां स्यात्, न म्रियन्तेऽनयेति अमृता, वयोयौवनं तिष्ठत्यनयेति वयस्था, "कायस्था तु हरीतक्यामलक्योश्च प्रकीर्तिता" (इति रभसः) कायस्थापीति चत्वार्यामलक्याः । विगतं भीतं रोगभयमस्मादिति, विशिष्टं भीनमस्माद्वा भूतकल्योराश्रयत्वादिति बिभीतकस्त्रिलिङ्गः स्यात्, अक्षतीति अक्षः ना पुमान्स्यात् "अक्षोज्ञानात्मशकटव्यवहारेषु पाशके । रुद्राक्षे रावणौ सर्पे विभीतकतरावपि । चक्रे कर्षे पुमान् क्लीवं तुत्थे सौवर्चलेन्द्रिये" तुष्यतीति तुषः, कर्षं फलमस्येति कर्षफलः, भूतानामावासो भूतावासः कलेर्द्रुमः कलिद्रुम इति षट्विभीतकस्य ॥ ५६ । ५७ । ५८ ॥

स. स. स. स. स. स.

हड़ **अभया त्वव्यथा पथ्या कायस्था पूतनामृता ।**

स. स. स. स. स.

हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥ ५९ ॥

अभयेति—न भयमस्या अभया, न व्यथा यस्या अव्यथा, पथोऽनपेता पथ्या, कायस्तिष्ठत्यनयेति कायस्था, पूतं करोति पूतयति, पूतयतीति पूतना, न म्रियन्तेऽनयेति अमृता, हरिर्वर्णो यस्यामिति हरीतकी, हिमवति जाता हैमवती, चेतयतीति चेतकी, अतिप्रशस्तेति श्रेयसी, शिवंकरोति शिवयति. शिवयतीति शिवा "शिवो मोक्षे महादेवे कीलकग्रहयोगयोः । वालुके गुग्गुलौ वेदे पुण्डरीकद्रुमे पुमान् ॥ सुखे क्षेमे जले क्लीवं शिवाम्काटामलोपयौ ॥ अभयामलकी गौरी फेरुसक्तुफलासु चेति" (मेदनी) इत्येका दश हरीतक्याः ॥ ५९ ॥

पु. पु. न. पु.

सरल **पीतद्रुः सरलः पूतिकाष्ठं (चाथ) द्रुमोत्पलः ।**

कठचम्पा पु. पु. पु. पु. पु.

नड़हल **कर्णिकारः परिव्याधे लकुचो लिकुचोऽडहुः ॥ ६० ॥**

पीति—पिबति, पीयते वर्णान्तरमिति पीतः, द्रवत्यूर्ध्वं गच्छतीति द्रुः पीतश्चासौ द्रुश्चेति पीतद्रुः, सरतीति सरलः, पूतेः पावनस्य काष्ठं पूतिकाष्ठम् "पूतिकाष्ठं च सरलदेवदारुमहीरुहो" रिति मेदिनीति त्रीणि सरलायाः । अथेति द्रुमे उत्पलं तदाकारं उ

१ नित्यमामलके लक्ष्मीर्नित्य हरितगोमये । नित्य शङ्खे च पद्मे च नित्य शुक्ले च वाससांति ५

मस्येति द्रुमोत्पलः, कर्णिकामियर्तीति कर्णिकारः, परिविध्यतीति परिव्याधस्तस्मिन्निति त्रीणि कर्णिकारस्य। लक्ष्यत इति लकुचः, लक्ष्यत इति लिकुचः, दहति, तोहति डहुः, स्वामिमते तु अडहुरपीति त्रीणि 'बड़हर' इति ख्यातस्य ॥ ६० ॥

पु. पु. पु. पु. पु.

कटहल **पनसः कण्टकिफलो निचुलोहिज्जलोम्बुजः।**

समुद्रफल स. स. स. स.

कठूवरि **काकोदुम्बरिका फल्गुर्मलपूर्जघनेफला ॥ ६१ ॥**

पनस इति—पनाय्यते स्तूयत इति पनसः, पणसोपि, कण्टकिफलमस्येति कण्टकिफ इति द्वे पनसस्य। निचोलतीति निचुलः, हिनोतीति हित्, जलतीति जलम् हिज्जल स्येति हिज्जलः, इज्जल इति पाठे तु एतीति इत्, जलमस्येति इज्जलः "निचुलेज्जल ज्जला" (इति रभसः) अम्बुनि जातोम्बुज इति त्रीणि स्थलवेतसस्य, समुद्रफलस्य व काकप्रिया उदुम्बरी काकोदुम्बरी इव काकोदुम्बरिका फलतीति फल्गुः, मलात्पा त्पुनातीति मलपूः मलयूरितिपाठे तु मलं यवते, मलते वा मलयूरपि, जघने फलं य जघनेफलेति चत्वारि काकोदुम्बरिकायाः ॥ ६१ ॥

पु. पु. पु. पु.

नींब **अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः।**

पु. पु. स. न. स.

शीशम **पिचुमर्दश्च निम्बे(ऽथ) पिच्छिलागुरु शिंशपा ॥६२॥**

अरीति—न रिष्टमशुभमस्मादिति अरिष्टः,"अरिष्टो लशुने निम्बे फेनिले काककङ्कयोः। अरिष्टमशुभे तक्रे सूतिकागार आसवे ॥ शुभे मरणचिह्ने चेति मेदिनी" सर्वतोभद्रं यस्मा दिति सर्वतोभद्रः, हिङ्ग्वाकारोहिङ्गुगन्धो वा निर्यासोऽस्येति हिङ्गुनिर्यासः, मलते इति मालकः, पिचुं कुष्ठभेदं मर्दयतीति पिचुमर्दकः, 'स्वामिमते तु पिचुं मन्दयतीति पिचुमन्दोपि' निम्बति स्वास्थ्यमिति निम्बस्तस्मिन्निति षट् निम्बाख्यस्य। अथेति—पिच्छा ऽस्त्यस्याः पिच्छिला, न गुरुरस्मादिति अगुरु "अगुरु क्लीबे शिंशपायां जोङ्गके लघुनि त्रिष्विति" (रुद्रः) शिम् इत्यव्यक्तं शब्दं शब्देन वा शपति, शीघ्रं शीर्ष वा पातीति शिंशपा इति त्रीणि शिंशपायाः ॥ ६२ ॥

स. स. पु. पु.

[illegible] शीशम **कपिला भस्मगर्भा (सा) शिरीष(स्तु) कपीतनः।**

[illegible] स. पु. पु. पु.

[illegible] **भण्डिलो(ऽप्यथ) चाम्पेयश्चम्पके हिमपुष्पकः ॥ ६३ ॥**

[illegible]—[illegible]पुष्पाणि सन्त्यस्याः कपिला, सैव भस्मगर्भं यस्याः भस्मगर्भेति द्वे [illegible]। [illegible] कपिलादिकमपि शिंशपासामान्यपर्यायमेव [illegible]

तीति युक्तम्। शृणातीति शिरीषः, तमोतीति तनः, या लक्ष्म्यास्तनः ईतनः कपीनां कपेर्वर्णस्य वा ईतनः कपीतनः, भण्डतीति भण्डिलः, रलयोरेकत्वात् भण्डिरोपि "भण्डिरो भण्डिलो नेति" (वाचस्पतिः) इति त्रीणि शिरीषस्य। अथेति—चम्पाया अपत्यं चाम्पेयः, चम्पयति, चम्प्यते वा चम्पकः, हेमवर्णं पुष्पमस्येति हेमपुष्पक इति त्रीणि चम्पकस्य ॥ ६३ ॥

चम्पा की कली, मौलसिरी — **(एतस्य कलिका) गन्धफली[1] स्यादथ केसरे।**

अशोक, अनार — **वकुलो[2] वञ्जुलोशोके (समौ) करकदाडिमौ ॥ ६४ ॥**

एतेति—एतस्य चम्पकस्य कलिका-गन्धः फलं साध्यमस्या गन्धफली स्यादित्येकं चम्पककलिकायाः। अथेति—के जले सरति, केसराः सन्त्यस्येति वा केसरस्तस्मिन्, वङ्कत इति वकुल इति द्वे वकुलस्य। वजतीति वञ्जुलः, न शोकोऽस्मादिति अशोकस्तस्मिन्निति द्वे अशोकस्य। करोति दोषाभावमिति करकः, दलनं दालः, दालेन निर्वृत्तो डलयोरैक्याद् दाडिमः—दाडिम्बोपि उभौ समौ समानार्थौ समानलिङ्गाविति द्वे दाडिमस्य ॥ ६४ ॥

नागकेसर — **चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः।**

जाही — **जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥ ६५ ॥**

चेति—चम्पाया अपत्यं चाम्पेयः, केसराः सन्त्यस्येति केसरः, नागाख्यः केसरः नागकेसरः, काञ्चनस्याह्वय आह्वयो यस्येति काञ्चनाह्वय इति चत्वारि नागकेसरस्य। जयतीति जया, जयतीति जयन्ती, तर्कमृच्छतीति तर्कारी, नद्यां भवा नादेयी, वैजयन्ती पताकेव, विजयन्तस्येयं वा वैजयन्ती सैव वैजयन्तिकेति पञ्च "जाही" इति ख्यातायाः॥ ६५॥

अरणी — **श्रीपर्णमग्निमन्थः 'स्या'त्कणिकागणिकारिका।**

कुरैया — **जया(ऽथ)कुटजः शक्रो वत्सको गिरिमल्लिका ॥ ६६ ॥**

श्रीति—श्रीःपर्णेषु यस्येति श्रीपर्णम्, अग्निं मथ्नातीति अग्निमन्थः स्यात्, कणतीति कणिका, गणनं गणस्तं करोति सैव, गणयतीति गणिका, ऋच्छतीति आरिका गणिका चासावारिका चेति वा गणिकारिका, जयतीति जया स्यादिति पञ्च जयपर्णस्य अरण्याख्यस्य वा। अथेति—कूटे शृङ्गे जायते स्मपृषोदरादित्वात् कुटजः ए

---

[1] न षट्पदो गन्धफलीमजिघ्रदिति सगच्छते ॥
[2] मुकुटमते वकुलशब्दोऽन्तस्थादिरन्येषां मते तु पवर्गादिरपि ॥

एव कौटजश्च "कौटजः कुटजः कोटीति" (चन्द्रः) शक्नोतीति शक्रः, वदतीति वत्स स एव वत्सकः, गिरिमल्लीव गिरिमल्लिकेति चत्वारि कुटजस्य ॥ ६६ ॥

पु.स.न. पु.स.न. पु.स.न.

इन्द्रयव (एतस्यैव) कलिङ्गेन्द्रयवभद्रयवं (फले)।

पु. पु. पु. पु.

करौंदा कृष्णपाकफलाविग्नसुषेणाः (करमर्दके) ॥ ६७ ॥

एतेति—एतस्य कुटजस्यैव फले कलिं गच्छति गायतीति वा कलिङ्गम्, इन्द्रसंज्ञवृक्षस्य यवम् इन्द्रयवम्, भद्रं च तद्यवं चेति भद्रयवमिति त्रीणीन्द्रयवस्य। कृष्णः पाकोऽस्य कृष्णपाकं फलमस्येति कृष्णपाकफलः, आविजते इमेति आविग्नः न विजते इमेति अविग्नोपि, शोभना सेना यस्येति, सुष्ठु सिनोतीति वा सुषेणः, करं मृद्नातीति करमर्दः स एव करमर्दकस्तस्मिन्निति चत्वारि करमर्दकस्य ॥ ६७ ॥

पु. पु. पु. पु.

तमाल कालस्कन्धस्तमालः 'स्यात्' तापिच्छो(ऽप्यथ)सिन्दुकः।

पुं. पु. स. स.

स्योंढी सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिके (त्यपि) ॥ ६८ ॥

कालेति—कालस्कन्धोऽस्यति कालस्कन्धः, ताम्यतीति तमालः स्यात्। तापिनं छादयतीति तापिच्छः, तापिंजोपि "तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे" (इति मेदिनीति) त्रीणि तमालस्य। अथेति—स्यन्दत इति सिन्दुः—सिन्धुश्च स एव सिन्दुकः सिन्धुकश्च, सिन्दुं वृणोति वारयति वा सिन्दुवारः—सिन्धुवारः, शोभनो रसोऽस्येति सुरसः इन्द्रस्य सुरसः इन्द्रसुरसः, (स्वामिमते तु) इन्द्रसुरिसोपि, निर्गुडति-गुडाद्वेष्टनान्निर्गता वेति पृषोदरादित्वान्निर्गुण्डी, इन्द्रस्य जन्या, इन्द्रमानयतीति वा इन्द्राणी सैव इन्द्राणिकेत्यपीति पञ्च निर्गुण्ड्याः ॥ ६८ ॥

स. स. न. पु. पु.

मन्दार,हाथी वेणी खरागरी देवताडो जीमूत (इत्यपि)।

स. स. न. स.

[illegible] श्रीहस्तिनी (तु) शूरुण्डी तृणशून्यं (तु) मल्लिका ॥ ६९ ॥

[illegible] स. पु. स.

[illegible] भूपदी शीतभीरुश्च (सैवा)ऽऽस्फोता (वनोद्भवा)।

वेणीति—वेणतीति वेणी—वेणिका, खमिन्द्रियं रात्यभिभवतीति खरा, गृणातीति गरी, गरं विषमाकिरतीति गरागरीत्येकमाहुः, स्वामिमते तु गरमागिरतीति गरागरी। [illegible] देवताडः "देवताडः सैंहिकेये जीमूते च हुताशने" (इ[illegible]

[illegible]

(दिनी) जिया वयोहान्या मूतो वद्धो जीमूतः जीनूत इवेति जीमूतकोपीति पथ्य देव-ताडस्य । श्रीहस्तोऽस्त्यस्याः, हस्तं गृह्णाति हस्तयति श्रुद्रश्यं, श्रेयं हस्तयतीति वा श्री-हस्तिनी, भुव रुण्डयतीति भूरुण्डी इति द्वे हस्तिकर्णपत्रशाकविशेषस्य, "घुइत्री" इति ख्यातायाः, मापादिक्षेत्रभवाया वकलपुष्पभलोहितपुष्पाया वा 'शिगीहथिनी' इति ख्याताया वा । तृणशून्य स्थाने साधु तृणशून्यम्, स्वामिमत तु तृणशून्ये शुल्मे साधु तृणशून्यमपि, मल्लते गन्धं, मल्ल्यते वा मल्ली सैव मल्लिका, भुवि पदगस्या भूपदी, शीताङ्गीरुः शीतभीरुः शतभीरुरिति पाठे तु शतं विगोगिनो भीरवोऽस्याः शतभीरुरपि "मल्लिका शतभीरुश्च गवाक्षी भद्रमल्लिका । शीतभीरुर्मदयन्ती भूपदी तृणशून्यक-मिति" (वाचस्पतिः) इति चत्वारि 'वेला' इति ख्यातायाः । सैव वनोद्भवा चेत्तदा आस्फोटयतीति आस्फोता स्यादित्येकं वनमल्लिकायाः ॥ ६९ । ३ ॥

स्याह फूल वाली नेवारी	स. स. स. स. शेफालिका (तु) सुवहा निर्गुण्डी नीलिका (च सा) ॥७०॥
सफेद फूल वाली नेवारी	स. स. स. (सितासौ) श्वेतसुरसा भूतवेश्यथ मागधी ।
जूही पीले फूल वाली जूही	स. स. स. गणिका यूथिकाम्बष्ठा (सा पीता) हेमपुष्पिका ॥७१॥

शेफेति—शेरत इति शेफा अलयो यस्यामिति शेफाली सैव शेफालिका, कनभावे शे-फालीत्यपि, सुष्ठु वहत्यामोदमिति सुवहा, निर्गुण्डतीति निर्गुण्डी, "निर्गुण्डी नील-शेफाल्यां सिन्धुवारद्रुमेपि चति" (मेदिनी) सा च नीलवर्णा नीली सैव नीलिका "नी-लिका नीलिर्नी क्षुद्ररोगशफालिकासु चेति"(मेदिनी) चत्वारि नेवारी इति ख्यातायाः । असौ सिता श्वेतवर्णपुष्पा चत्तदा शोभनो रसोऽस्याः सुरसा श्वेता चासौ सुरसा चेति श्वेतसुरसा, भूतानि विशतीति भूतवेशीति द्वे श्वेतशेफालिकायाः । अथेति—मगधे देशे भवा मागधी, गणयतीति गणिका "गणिका यूथी वेश्येभीतकारीपु नानुदेवज्ञे" (इति मेदिनी) यूथमस्त्यस्या यूथिका, अम्बा माता इव तिष्ठतीति अम्बष्ठा "अम्बष्ठो देशभे-देपि विप्राद्वैश्यासुतेपि च । अम्बष्ठाप्यम्ललोण्यां स्यात्पाठायूथिकयोरपीति" (विश्व-मेदिन्यावति) चत्वारि यूथिकायाः । सा यूथिका पीला पीतवर्णपुष्पा चेत्तदा हेमवर्णं पुष्पमस्या हेमपुष्पिका स्यादित्येकं पीतपुष्पयूथिकायाः ॥ ७० । ७१ ॥

वासन्ती लता या वेल मालती	पु. पु. स. स. स. अतिमुक्तः पुण्ड्रकः "स्याद्वा" सन्ती माधवी लता ।
या चमेली, नेवारी या वर्षाकी वेल	स स. स. स स. सुमना मालती जातिः सप्तला नवमालिका ॥ ७२ ॥

१ कथमितरथाशेफालीषु स्खलत्कुसुमास्वपीति प्रयोगदर्शनात् ॥

अतीति—अतिक्रान्तो मुक्तां शौक्ल्यादतिरक्तत्वाद्वेति अतिमुक्तः, पुण्डति, पुण्ड्रो वा पुण्ड्रः स एव पुण्ड्रकः, वसन्ते पुष्यतीति वासन्ती, मधौ पुष्यतीति माधवी, लततीति लतेति पञ्च वासन्तीलतायाः। सुष्ठु मन्यते, शोभनो मनोऽस्यामिति सुमनाः "स्त्रियां सुमनसो भूम्नि पुष्पे जातौ तु भेदतः। विदुष्यपि यदादृष्टस्तदा भेदेन शिष्यते" (इति व्याडिः) "सुमनायाश्च पत्रेणेति सुश्रुतदर्शनात्" टाबन्तापि, मां लक्ष्मीं लतति, मालं तनोति वा मालती, जायते प्रीतिरनयेति वा जातिरिति त्रीणि मालत्याः "चमली" इति ख्यातायाः। सप्त पर्णानि मनोबुद्धीन्द्रियाणि वा लातीति सप्तला, नवास्तुल्यामल्लास्या नवमालिकेति द्वे नवमालिकायाः॥ ७२॥

पु.न. पु.न. पु पु. पु.

कुन्द,दुपहरिया **माध्यं कुन्द (रक्तक) (स्तु) बन्धूको बन्धुजीवकः।**

घीकुआरि स. स. स. पु. स.

कटसरैया **सहा कुमारी तरणिरम्लान (स्तु) महासहा॥ ७३॥**

मेति—माघे साधु माघ्यम्, कुं भुवं दायति, द्यति, कुणातीति वा कुन्दम् "माघ्य कुन्द. कुरुण्टक" इति पुंस्काण्डे (रत्नकोषात्पुंस्त्वमपि) "कुन्दो माघ्येऽस्त्री मुकुन्दभ्रमि निध्यन्तरपु ना" (इति मेदिनीति) द्वे कुन्दस्य। रक्तं रक्तवर्णं पुष्पमस्त्यस्येति रक्तः स एव रक्तकः, बध्नाति चित्तमिति बन्धूकः बन्धुरिव जीवं जलमस्येति बन्धुजीवक इति त्रीणि "दुपहरिया" इति ख्यातस्य। आतपं सहत इति सहा कुमारीव, कुमारयति, कामयते वेति कुमारी, तरन्त्यनयेति तरणिरिति त्रीणि कुमार्याः, 'घीकुवारीति' ख्यातायाः। न म्लायति स्मेति 'अम्लानः' "अम्लानं त्वमले झिण्टाभद" (इति हैमः) महती चासौ सहा च, महतो विमर्दस्य सहा वेति द्वे 'कटसरैया' सामान्यस्य॥ ७३॥

लालफूलवाली पीलफूलवाली **(तत्र शोणे) कुरवक (स्तत्र पीते) कुरुण्टकः।**

पु स स. पु.

कालिफूलवाली या झिण्टी **(नीलाझिण्टीद्वयो) र्बाणा दासी चार्तगलश्च (सा) ७४॥**

तत्रेति—तस्मिन् अम्लाने शोणे रक्ते सति, कुत्सितो रवोऽत्रेति 'कुरवकः' शुद्ध‑ नीति विमर्दे तु कुरवकः स्यादित्यर्क 'रक्तकटसरैया' इति ख्यातायाः। तत्र अम्लाने पीते सति कुरण्टानि कुरण्टकः कोः कुत्सितो वा कुरण्टकः, कुर्यत इति वा कुरुण्ट. स एव कुरुण्टकः कुरुण्टीत्यपि "कुरण्टी दारु पुत्र्यां ना झिण्ट्यम्लानप्रभेदयोरिति" (मेदिनी) द्वयेकं "पीतपुष्पकुष्पकटसरैया" इति ख्यातायाः। नीला नीलपुष्पयुता झिण्टी चे‑ त्तदा बाणः इति बाणा सा द्वयोः स्त्रीपुंसयो. स्यात्। दस्यते इति दासी. "दासी बाण‑ झिण्टयोरिति" (मेदिनी) आर्तः क्षीणो गलतीति आर्तगल इति त्रीणि नीलझि‑ ण्टिकायाः॥ ७४॥

पियावासामात्र या झिण्टीमात्र लालफूलवाली बैंजनी सोनहरी

पु. स. पु.
सैरीयक (स्तु) झिराटी (स्यात्तस्मि) न्कुरबको (ऽरुणे)।
पु. पु स.
(पीता) कुरण्टको (झिण्टी) तस्मिन्सहचरी (द्वयोः) ७५॥

सैरीति—सीरे भवः सैरः कर्पस्तत्र भवः सैरीयः स एव सैरीयकः, सैरेयक इति पाठे तु सीर्यां भवः सैरेयः स एव सैरेयकः, झिमिति रटतीति पृषोदरादित्वात् झिण्टी स्यादिति द्वे झिण्टासामान्यस्य। तस्मिन्सैरीयके अरुणे रक्ते सति कुत्सितो रवोऽत्रेति 'कुरबकः' स्यादित्यकं रक्तझिण्ट्याः। पीता पीतपुष्पयुता झिण्टी चेत्तदा कुर्यते इति कुरण्टः स एव कुरण्टकः स्यात्, तस्मिन्कुरण्टके सहचरतीति 'सहचरी' द्वयोः स्त्रीपुंसयोः स्यादिति द्वे पीतझिण्ट्याः॥ ७५॥

न. न. न.
गुड़हर ओड्रपुष्पं जवापुष्पं वज्रपुष्पं (तिलस्य यत्)।
तिलपुष्प पु. पु. पु. पु.
कनेर प्रतिहासशतप्रासचण्डातहयमारकाः॥ ७६॥
पु. पु. पु. पु.
करील करवीरे करीरे (तु) क्रकरग्रन्थिला (वुभौ)

ओड्रेति—आ ईषदुनत्तीति ओड्रम्, ओड्रं पुष्पमस्येति ओड्रपुष्पम्, जवतीति जवा "ओड्रपुष्पेपि वृक्षेपि जवाशब्दः प्रकीर्तित" (इति त्रिकाण्डशेष) जपा इति पाठे तु जपतीति जपा "जवायान्तु जपा स्मृता" (इति धर्मदासः) इति द्वे जवाकुसुमस्य। तिलस्य यत् पुष्पं तत् वज्रपुष्पं स्यादित्येकं तिलपुष्पस्य। प्रतीपो हासो विकासोऽस्येति प्रतिहासः, शतं प्रासाः कुन्ताइव पत्राण्यस्यति, शतं पुष्पाणि प्रास्यतीति वा शतप्रासः, चण्डमततीति चण्डातः, हयानां मारको हयमारकः, कर वीरयतीति करवीरस्तस्मिन्निति पञ्च करवीरस्य। किरति, करिणामीरयति वा करीरस्तस्मिन्, क्रइति करोतीति क्रकरः, ग्रन्थिरस्यास्ति, ग्रन्थिं लातीति वा ग्रन्थिल उभौ स्यातामिति त्रीणि करीरस्य 'करील' इति ख्यातस्य॥ ७६। ३/२॥

पु. पु. पु. पु. पु.
धतूरा उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः॥ ७७॥
पु. पु. पु.
धतूरा का फल मातुलो मदनश्चा (स्य फले) मातुलपुत्रकः।

उन्निति—उन्मत्तयतीति उन्मत्तः, कितवाः सन्त्यस्येति, कितान् वञ्चतीति वा कितवः, "कितवो धूर्तवन्मत्त वञ्चके कनकाह्वये" (इति विश्वः) धूर्व्यते स्मेति, धूर्वणं धूर्तं तदस्यास्तीति वा धूर्तः, धयति धातूनिति पृषोदरादित्वाद् धत्तूरः, "धत्तूरस्तु स्मृतो धूर्तो देविता कितव. शठ." (इति स्वामी) धूसयतीति धूः, तूर्यत इति तूरः धूश्चासौ

धूस्तूरः धुस्तुरोपि “धुस्तुरस्तु पुण्डरी शोधूस्तूरः कनकाह्वयः” (इति शब्दार्णव.) कनक-माह्वयो यस्येति कनकाह्वयः, मास्ति नास्ति तुला यस्येति, मा श्रीस्तुलास्येति वा मातुलः, मदयतीति मदनः “मदनः स्मरवसन्तद्रु सिक्थधूस्तूरसिह्लके” (इति मेदिनी) इति सप्त धस्तूरस्य। अस्य धत्तूरस्य फले मातुलस्य पुत्र इव मातुलपुत्रकः इत्येकं कनकाह्वयफलस्य॥ ७७॥

पु. पु. पु. पु.

विजौरा नींबू **फलपूरो बीजपूरो रुचको मातुलुङ्गके ॥ ७८ ॥**

पु. पु. पु. पु.

मरुआ या दवना **समीरणो मरुवकः प्रस्थपुष्पः फणिज्जकः ।**

पु. पु. पु. पु.

बबई या पर्णास **जंबीरो (प्यथ) पर्णासे कठिंजरकुठेरकौ ॥ ७९ ॥**

फलेति—फलेन पूर्यते, फलं पूरयति वा फलपूरः, बीजेन पूर्यते, बीजं पूरयति वा बीजपूरः, रोचत इति रुचकः “रुचको बीजपूरे च निष्के दन्तकपोतयोः । न द्वयोः सर्जिकाक्षारेप्यश्वाभरणमाल्ययोः । सौवर्चलेपि मङ्गल्यद्रव्येपि कटकेपि चेति” (मेदिनी) मीनात्यरुचिमिति मातुः, लुञ्च्यत इति लुङ्गः स एव लुङ्गकः मातुश्चासौ लुङ्गकश्चेति मातुलुङ्गकस्तस्मिन्निति चत्वारि “बिजौरा” इति ख्यातायाः । समीरयतीति समीरणः, मरौ वातीति मरुवकः, प्रस्थे सानौ पुष्प्यतीति प्रस्थपुष्पः, फणिजातोऽस्मात् फणाभपत्रपुष्पत्वात्, फणी उज्झको वर्जकोऽस्येति फणिज्झकः, फणिज्झकोपि जम्यत इति जम्, वीरयतीति वीरः जम् चासौ वीरश्चेति जंबीरः जम्बीरोपीति पञ्च “मरुआ” इति ख्यातस्य । अथेति—पर्णान्यस्यति, पर्णैरसतीति वा पर्णासस्तस्मिन्, कठिनं जरयतीति कठिञ्जरः, कुण्ठतीति कुठेरः स एव कुठेरक इति त्रीणि पर्णासस्य ॥ ७८।७९॥

पु. पु. पु. पु.

उजली बनई तुलसी चीता **(सिते)ऽर्जको (ऽत्र) पाठी (तु) चित्रको वह्निसंज्ञकः ।**

पु. पु. पु. पु. पु.

मदार **अर्काह्ववसुकास्फोतगणरूपविकीरणाः ॥ ८० ॥**

पु. पु. पु. पु.

सफेद मदार **मन्दारश्चार्कपर्णौ (ऽत्रशुक्लेऽ)लर्कप्रतापसौ ।**

सितेति—अत्र पर्णासे सिते सति अर्जयतीति अर्जकः स्यादित्येकं श्वेतपर्णासस्य। पाठोऽस्यास्तीति पाठी, चित्रं बुद्धिमानयति इति चित्रः स एव चित्रकः “चित्रकं तिलके ना तु व्याघ्रभिद्धन्तुरादिषु” (इति मेदिनी) वह्निः संज्ञा यस्येति वह्निसंज्ञः इति त्रीणि चित्रकस्य । अर्कं आह्वा यस्येति अर्काह्वः, वसतीति वसुः स एव वसुकः, आस्फोटयतीति आस्फोतः, [illegible] गणरूपः, विकिरति, [illegible] विकीरणः, [illegible], मन्दारयति वा मन्दारः “मन्दारः स्यात्सुरद्रुमे । पारि-

* [illegible] ॥

भद्रेऽर्कपर्णो च मन्दारो हस्तिधूर्तयो" (रिति मेदिनी) अर्कभानि पर्णानि पत्राण्यस्येत्यर्कपर्णः इति सप्तार्कोह्वस्य । अत्र अर्काह्वे शुक्ले सति अलतीति अल्, अर्च्यत इत्यर्कः अल् चासावर्कश्चेति अलर्कः "अलर्को धवलार्के स्याद्योगोन्मादितकुक्कुरे" (इति मेदिनी) प्रतापं चक्षुस्तेजः स्यति, प्रकृतास्तापला यनेति वा प्रतापस इति द्वे श्वेतार्कस्य ॥ ८० । ३ ॥

स. पु. पु. पु. पु.

बक या गूमा **शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ॥ ८१ ॥**

स. स. स. स.

बादा **वन्दा वृक्षादनी वृक्षरुहा जीवन्तिके (त्यपि) ।**

शिवेति—शिवप्रिया मल्ली शिवमल्ली, पशुपतेरयं पाशुपतः, एकमष्ठि लातीति एकाष्ठीला, "एकाष्ठीलावनतिक्तिकौषधौ पुंसि वकपुष्पे" (इति मेदिनी) वातीति बुकः बकोपि "बकस्तु वकपुष्पे स्यात्कङ्क श्रीदे च रक्षसि" (इति मेदिनी) वस्ते, वसति वा वसुरिति पञ्च वकपुष्पस्य । वन्यते इति वन्दा, बवयोरैक्याद्बन्दापि वृक्षमत्तीति वृक्षादनी, वृक्षं रोहति, वृक्षे रोहति वा वृक्षरुहा, जीवतीति जीवन्ती सैव जीवन्तिकेति चत्वारि वृक्षोपरि जातलताविशेषस्य ॥ ८१ । ३ ॥

स. स. स. स. स.

नींब गिलोय **वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता ॥ ८२ ॥**

स. स. स. स.

या गुडुच **जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।**

वत्सेति—वत्सैरद्यते इति वत्सादनी, छिन्ना रोहतीति छिन्नरुहा, गुडतीति गुडीची, तन्त्रयतीति तन्त्रिका, न मृतमस्याः अमृता, जीवतीति जीवन्ती सैव जीवन्तिका "जीवन्तिका गुडूच्यां च जीवाख्या शाकवन्दयोरिति" (मेदिनी) सोमस्य वल्ली सोमवल्ली, विगतं शल्यमस्या विशल्या, "विशल्याग्निशिखादन्ती गुडूची त्रिपुटासु चेति" (मेदिनी) मधुमयानि पर्णान्यस्या मधुपर्णीति नव गुडूच्याः ॥ ८२ । ३/२ ॥

स. स स. स. स. स.

मूर्वा-मुहार **मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ॥ ८३ ॥**

स. स. स. स.

या चिनार **मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्य(पि) ।**

मूर्वेति—मूर्वतीति मूर्वा, दीव्यतीति देवी, मधुरसोऽस्या मधुरसा, मुरतीति मोरटा, तेजतीति तेजनी, स्रवतीति स्रवा, स्रुवापि "स्रुवा द्वयोर्होमपात्रे सल्लकीमूर्वयोः स्त्रियामिति" (मेदिनी) मधु लातीति मधूला सैव मधूलिका, मधुनः श्रेणिरत्रेति मधुश्रेणी, गोःकर्ण इव गौःकर्णो यस्या इति वा गोकर्णी, पीलोरिव पर्णान्यस्याः पीलुपर्णीति दश मूर्वायाः ॥ ८३ । ३ ॥

स. स. स. स. स. स.

पाढा या **पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ॥ ८४ ॥**

स. स. स. स.

पाढरि **एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।**

पाठेति—पठ्यते इति पाठा, अम्बेव मातेव तिष्ठतीति अम्बष्ठा, विद्धौ कर्णौ यथो अविद्धोऽच्छिद्रः पर्णरूपः कर्णोऽस्या चेति विद्धकर्णी, अविद्धकर्णी, स्थापयतीति स्थापनी, अतिशयेन प्रशस्ता श्रेयसी, रस्यत इति रसा, एकमस्थि लातीति एकाष्ठीला पापे चलति, पापक्तीति पापचो वायुस्तमीरयति वा पापचेली, प्राचि भवा प्राचीना वने तिक्ता वनतिक्ता सैव वनतिक्तिकेति दश पाठायाः ॥ ८४ । १/२ ॥

स. स. स. स.

कुटकी **कटुः कटंवराशोकरोहिणी कटुरोहिणी ॥ ८५ ॥**

स. स. स. स.

मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।

कटुरिति—कटतीति कटुः, कटतीति कटस्तं वृणोतीति कटंवरा, कटंभरा इति पाठे तु कटं विभर्तीति कटम्भरा, अशोक इव रोहतीति अशोकरोहिणी, व्यस्तमपीदं नाम " अशोकः कटुरोहिण्यामशोको वञ्जुलद्रुमे " (इति रभसः) कटतीति कटुः, रोहतीति रोहिणी, कटुश्चासौ रोहिणी चेति कटुरोहिणी, मत्स्यपित्तमिवेति मत्स्यपित्ता, कृष्णो वर्णेन भेदश्छेदोऽस्याः कृष्णं मलं भिनत्तीति वा कृष्णभेदी, चक्राकारमङ्गं यस्याश्चक्राङ्गी " चक्राङ्गी कटुरोहिण्यामिति " (मेदिनी) शकुलैर्मत्स्यभेदैरद्यते इति शकुलादनीत्यष्टौ ' कुटकी ' इति ख्यातायाः ॥ ८५ । १/२ ॥

स. स. स. स. स.

कपराच **आत्मगुप्ता जडाव्यण्डा कण्डूरा प्रावृषायणी ॥ ८६ ॥**

स. स. स. स.

ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छूश्च मर्कटी ।

आत्मेति—आत्मना गुप्ता आत्मगुप्ता, जडयतीति जडा, न जहाति शूकानिति अजहापि " शया जाङ्गलिका मेव साजहा प्रावृषायिणी " (इतीन्दुः) न विगतमण्डमस्याः अव्यण्डा, कण्डूं रातीति कण्डूरा कण्डुरापि, प्रवर्षणं प्रावृषा नामेतीति, अयते वा प्रावृषायणी, ऋष्यैर्मृगैः प्रोक्ता, ऋषिभिर्प्रोक्ता वा ऋष्यप्रोक्ता शूकयुक्ता शिम्बिः शूकशिम्बिः " शूकशिम्बा चेति " (वाचस्पतिः) कपीनां कच्छूः कपिकच्छूः मर्कटीनां वर्तते मर्कटीयते इति मर्कटीति नव "कवांच" इति ख्यातायाः ॥ ८६ । १/२ ॥

स. स. स. स. स. स.

चित्रोपचित्रान्यग्रोधी द्रवन्ती शंवरी वृषा ॥ ८७ ॥

स. स. स. स.

प्रत्यक्श्रेणी सुतश्रेणी रण्डामूषिकपर्ण्यपि ।

चित्रेति—चित्रं रूपमस्याश्चित्रा, उपगता चित्रमित्युपचित्रा, न्यग्रूरुणाद्धि, न्यर्थं रुणा-द्धीति वा न्यग्रोधी, "न्यग्रोधी तूपचित्रायामिति"(मेदिनी)द्रवतीति द्रवन्ती, शं वृणोतीति शंवरी, वर्षतीति वृषा, प्रतीची श्रेणी यस्याः प्रत्यक्श्रेणी, सुतानां श्रेणी यस्याः सुत-श्रेणी, रमन्तेऽत्रेति रण्डा, स्वामिमते तु चण्ड्यत इति चण्डापि, मूषिकः पर्णमस्या मूषिकपर्णी, आखुपर्णिकेत्यपीति दश 'मूसाकर्णी' इति ख्यातायाः ॥ ८७ । ३ ॥

पु पु. पु. पु.

अपामार्ग **अपामार्गः शैखरिको धामार्गवमयूरकौ ॥ ८८ ॥**

चिचिड़ा या स. स. स. स.

ओंधीझाड़ा **प्रत्यक्पर्णी कीशपर्णी किणिही खरमञ्जरिः ।**

अपेति—अपमार्जन्त्यनेनेति अपामार्गः, शिखरे प्रायेण भवतीति शैखरिकः, धाम्नो-ऽर्गः, धामार्गस्तं वातीति धामार्गवः, अधामार्गवोपि, मयूरप्रतिकृतिः मयूरकः, प्र-त्यञ्चि पर्णान्यस्याः प्रत्यक्पर्णी, कपिलोमतुल्यानि लोमशानि पर्णान्यस्याः कपिपर्णी, स्वामिमते तु कीशपर्ण्यपि, किणिनो व्रणान् जिहीते, किणिनो व्रणान् हन्तीति वा किणिही, खरा मञ्जरिरस्याः खरमञ्जरिरित्यष्टावपामार्गस्य ॥ ८८ । ३ ॥

स. स. स. स. स.

भँगरा या भँगरैया **हञ्जिकाब्राह्मणीपद्माभार्गीब्राह्मणयष्टिकाः ॥ ८९ ॥**

स. पु. पु. पु.

अङ्गारवल्लीवालेयशाकवर्वरवर्धकाः ।

हञ्जीति—हन्ति, भनक्ति वा रोगानिति पृषोदरादित्वात् हञ्जिका, फञ्जिकापि, ब्र-ह्मण इयं ब्राह्मणी, पद्माभं पुष्पमस्याः पद्मा, भर्ज्जनं भर्गः सोऽस्त्यस्या भार्गी, ब्राह्मणय-ष्टिरिव ब्राह्मणयष्टिका, अङ्गारवद्वल्ल्यस्या अङ्गारवल्ली, वालेयस्य शाको वालेयशाकः, वर्वर्तीति वर्वरः, वर्धत इति वर्धक इति नव भार्ग्याः ॥ ८९ । ३ ॥

स. स. स. स. स.

मजीठ **मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेशिका ॥ ९० ॥**

स. स स. स.

मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।

मञ्जीति-मञ्जौ शोभने वर्णे तिष्ठति, अतिशयेन मञ्जुरिति वा मञ्जिष्ठा, विकसति, विकषति वा विकसा, विकषा, जिङ्गतीति जिङ्गी, समन्ततोऽङ्गतीति समङ्गा, काले मि-श्यते कालमेशी सैव कालमेशिका, कालं वर्णं मिषतीति वा कालमेषी सैव कालमे-षिका, मण्डूकवत्पर्णान्यस्या मण्डूकपर्णी, भण्डतीति भण्डीरी, भाण्डीरी, भण्डी-रिका, भण्डतीति भण्डी, योजनगामिनी वल्ली योजनवल्लीत्यपीति नव मञ्जि-ष्ठायाः ॥ ९० । ३ ॥

पु. पु. पु. पु. पु.

यवासा या धमासा **यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥ ९१**

स. स. स. स. स.

रोदनी कच्छुरानन्ता समुद्रान्ता दुरालभा ।

यास इति–याति, यसनं वा यासः, यौतीति यवासः, दुःखेन स्पृश्यते इति दुःस्पर्शः, धन्वनो यासो धन्वयासः, कुं नाशयतीति कुनाशः स एव कुनाशकः, रोदयतीति रोदनी, स्वामिमते तु चोदनीत्यपि, कच्छूं रातीति कच्छुरा, नास्ति अन्तो यस्या अनन्ता, समुद्रान्तोऽस्त्यस्याः समुद्रान्ता, दुःखेनालभ्यत इति दुरालभा इति दश यवासस्य ॥ ९१ ॥

स. स. स. स.

पिठवन **पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्णिका ॥ ९२**

स. स. स. स. स.

क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ।

पृश्नीति–पृश्निरल्पं पर्णमस्याः पृश्निपर्णी, पृथगसक्तं पर्णमस्याः पृथक्पर्णी, चित्रं पर्णमस्याश्चित्रपर्णी, अङ्घ्रेरारभ्य पर्णान्यस्या अङ्घ्रिपर्णी सैव अङ्घ्रिपर्णिका, मुकुटमते तु अङ्घ्रिमूलमारभ्य वल्लिरस्या अङ्घ्रिवल्ली सैवाङ्घ्रिवल्लिकेत्यपि क्रोष्टुभिर्विन्ना विचारिता, दत्तेवेति वा कोष्टुविन्ना, सिंहपुच्छमस्याः सिंहपुच्छी, कलं श्यतीति कलशिः, धावतीति धावनिः, गूहतीति गुहा इति नव पृश्निपर्ण्याः ॥ ९२ ॥ १/२ ॥

स. स. स. स. स.

भटकटैया **निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ॥ ९३ ॥**

स. स. स. स. स.

प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।

नीति–निदिह्यते स्म निदिग्धा सैव निदिग्धिका, स्पृशतीति स्पृशी, व्याजिघ्रतीति व्याघ्री, बृंहतीति बृहती, "क्षुद्राया क्षुद्रवार्ताक्या बृहती छन्दसि क्वचिदिति" (शाश्वतः) कण्टकानियर्तीति कण्टकारी सैव कण्टकारिका, प्रचोदयतीति प्रचोदनी, कोलतीति कुली, क्षुणत्तीति क्षुद्रा "क्षुद्राव्यङ्गानटीकण्टकारिकासरघासु च । चाङ्गेरीवेश्ययोर्हिंस्राऽल्पिकामात्रयोरपीति" (मेदिनी) दुःस्पृश्यत इति दुःस्पर्शा, राष्ट्रमस्त्यस्या राष्ट्रिकेत्यपीति दश कण्टकार्याः ॥ ९३ ॥ १/२ ॥

स. १ स. स. स. स.

नील **नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ॥ ९४ ॥**

स. स. स. स. स. स.

रञ्जनी श्रीफली तुत्था द्रोणी दोला (च) नीलिनी ।

[illegible]

नीलीति—नीलतीति नीली "नीलीरुग्भेदनीलिन्योरिति" (मेदिनी) कल्यत इति काला, क्लीतकं क्रयोऽस्त्यस्याः क्लीतकिका, ग्रामे भवा ग्रामीणा, मधुराणि पर्णान्यस्यामधुपर्णी सैव मधुपर्णिका, रञ्जयतीति रञ्जनी, श्रीमत्फलमस्त्यस्याः श्रीफली, तुथ्यते तुत्थयति वा तुत्था, द्रवतीति द्रोणी, स्वामिमते तु तूयतेऽनयेति तूणीत्यपि, दोलयतीति दोला, 'मेलापि' "तुत्था श्रीफलिका मेला सारवाही च रञ्जनी"(इति निघण्टुः) नीलो वर्णोऽस्त्यस्याः नीलिनीत्येकादश नीलयाः नील इति ख्यातस्य ॥ ९४ । १ ॥

पु. पु. स. स. स.
बकुची **अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥९५॥**
स. स. स. स.
कालमेषी कृष्णफला वाकूची पूतिफल्यपि ।

अवेति—अवलगोरशोभनाज्जातोऽवल्गुजः, सोम इव सोमेन वा राजतीति सोमराजी, शोभना वल्लिरस्याः सुवल्लिः, सोमस्य वल्लिः सोमवल्लिः सैव सोमवल्लिका, कालं मिषतीति कालमेषी, कृष्णं फलमस्याः कृष्णफला, वातं कूचयतीति पृषोदरादित्वाद् वाकूची, मुकुटमते तु वाचं गुञ्जतीति वागुजीत्यपि, पूतिः फलेष्वस्याः पूतिफलीत्यष्टौ वाकूच्याः ॥ ९५ । १ ॥

स. स. स. स. स. स.
गजपीपरि **कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥ ९६ ॥**
स. स. स. स. स.
छोटी पीपरि **उषणा पिप्पली शौण्डी कोला(थ) करिपिप्पली ।**
स. स. स.
कपिवल्ली कोलवल्ली श्रेयसी वसिरः (पुमान्)॥ ९७॥

कृष्णेति—कृष्णो वर्णोऽस्त्यस्याःकृष्णा "कृष्णा स्याद्द्रौपदीनीलीकणाद्राक्षासु योषितीति" (मेदिनी) उपकोलति, उपगता कुल्यामिति वा उपकुल्या, विदेहेषु भवा वैदेही, "वैदेही रोचनासीतावणिक्स्त्रीपिप्पलीषु चेति" (मेदिनी) मगधेषु भवा मागधी, चपतीति चपला, कणति शब्दयतीति कणा, ओषति, ऊषति वा उषणा; ऊषणा दीर्घादिरपि, पिपर्तीति पिप्पली, शुण्डायां मद्यपानगृहे भवा शौण्डी "शौण्डो मत्ते च विख्याते पिप्पल्यां तु भवेत्स्त्रियामिति" (मेदिनी) इति दश पिप्पल्याः। अथेति—करीव पिप्पली करिपिप्पली, कपिरिव वल्ली कपिवल्ली, कोल इव वल्ली कोलवल्ली, अतिशयेन प्रशस्ता श्रेयसी, वस्ते इति वसिरः तालव्यपाठे तु वष्टीति वशिरः पुमान्स्यादिति पञ्च गजपिप्पल्याः ॥ ९६ । ९७ ॥

न. १ न. स. स. स.
चव्य या **चव्यं (तु) चविकं काकचिञ्चागुञ्जे(तु)कृष्णला ।**

१ केचित्तु पूर्वान्वयमाहुः, यदाह चन्द्रनन्दनः— "चव्या कोलाथ चविका श्रेयसी गजपिप्पली । कोलवल्ली तु चव्य कुञ्जरपिप्पली" अत्र पक्षे तुस्थाने चः पाठ्यः ॥

स. स. पु.स. पु.
पीपरि की ल- फलंकषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ॥ ९८ ॥
कड़ी घुंघुची पु. पु. पु.
गोखुरू गोकण्टको गोक्षुरको वनशृङ्गाट (इत्यपि)।

चव्यमिति—चर्व्यत इति चव्यम्, चर्व्यत इति चविकम्, स्त्रियामपि "चव्या कोला च चविका चव्यं कुञ्जरपिप्पलीति" (हट्टचन्द्रः) इति द्वे चव्यस्य। काकवर्णा चिञ्चा काकचिञ्चा, गुञ्जतीति गुञ्जा "गुञ्जा तु काकचिञ्चायां पटहे च कलध्वनाविति" (मेदिनी) कृष्णं वर्णं लातीति कृष्णला इति त्रीणि गुञ्जायाः। पलं मांसं कषतीति पलंकषा, इक्षुगन्ध इव गन्धोऽस्या इक्षुगन्धा, शुनो दंष्ट्रा इव श्वदंष्ट्रा, स्वादुः कण्टकोऽस्य स्वादुकण्टकः, गोर्धेनोः पृथिव्या वा कण्टकः गोकण्टकः, "गोकण्टको गोक्षुरके स्थपुटे च गवांखुरे" (इति मेदिनी) गोर्गौर्वा क्षुरतीति गोक्षुरः स एव गोक्षुरकः, वनस्य शृङ्गाट इव वनशृङ्गाटः इति सप्त गोक्षुरकस्य "गुखुरू" इति ख्यातस्य ॥ ९८ । ३ ॥

स. स. स. स. स. स.
अतीस विश्वा विषा प्रतिविषातिविषोपविषारुणा ॥ ९९ ॥
स. न. स. स.
दुधिया शृङ्गी महौषधं (चाथ) क्षीरावी दुग्धिका (समे)।

विश्वेति—विशतीति विश्वम्, "विश्वं समस्ते जगति विश्वेदेवेषु नागरे। विश्वा चातिविषायां स्यादिति" (विश्वः) वेवेष्टीति विषा, प्रतीपं विषमस्याः प्रतिविषा, विषमतिक्रान्ता अतिविषा, विषमुपगता उपविषा, अरुणो वर्णोऽस्त्यस्या अरुणा, शृणातीति शृङ्गी, महच्च तदौषधं चेति महौषधम् "महौषधन्तु शुण्ठ्यां स्याद्विषायां लशुनेपि चेति" (मेदिनी) इत्यष्टावतिविषायाः। अथेति—क्षीरमवतीति क्षीरावी, दुग्धमस्त्यस्या दुग्धिका उभे समे समानार्थे समानलिङ्गे च स्यातामिति द्वे "दूधी" इति ख्यातायाः ॥ ९९ । ३ ॥

स. स. स. स. स.
शतावरि शतमूली बहुसुता भीरुरिन्दीवरी वरी ॥ १०० ॥
स. स. स. स.
दारुहल्दी ऋष्यप्रोक्ताभीरुपत्री नारायण्यः शतावरी।
स. पु. पु. पु.
अहेरु (रथ) पीतद्रुकालेयकहरिद्रवः ॥ १०१ ॥
स. स. स. स.
दार्वी पचंपचा दारुहरिद्रा पर्जनी (त्यपि)।

शतेति—शतं मूलान्यस्याः शतमूली, बहवः सुता यस्या बहुसुता, न भीरुर्भीरुः [illegible] इन्दीवरमस्त्यस्याः इन्दीवरी, वृणोतीति वरी, [illegible] [illegible], अभीरुणि पत्राण्यस्या अभीरुपत्री, नारायणाज्जाता नारायणी

नारायणोऽच्युतेऽभीरुगौर्योर्नारायणी मतेति" (मेदिनी) शतेनाधृणोतीति शतावरी, हिनोतीति अहेरुरिति दश शतावर्याः। अथेति—पीतं द्रवतीति पीतद्रुः, कलेरयं कालेयः एव कालेयकः, कालीयकोपि "निर्दिष्टा वै कटकिनी स च कालेयकः स्मृतः। कालीयको दारुनिशेति" (रुद्रः) हरिः पिङ्गः पीतो वा द्रुरस्य हरिद्रुः "हरिद्रुः पीतचन्दनमिति" (निघण्टुः) दीर्यत इति दार्वी, पचतीति पचंपचा "पीतदारुपचंपचा" (इति निघण्टुः) दारुश्चासौ हरिद्रा चेति दारुहरिद्रा, परं पालकं स्वास्थ्यं जनयतीति परश्चासौ जनी चेति वा पर्जनीति सप्त दारुहरिद्रायाः॥ १००। १०१। ३॥

स. स. स. स. स.
खुरासानीवच **वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका॥ १०२॥**

स. स. स. स.
सफ़ेदवच **(शुक्ला) हैमवती वैद्यमातृसिंह्यौ (तु) वाशिका।**
पु. पु. पु. पु. पु.
रूसा **वृषोटरूषः सिंहास्यो वासको वाजिदन्तकः॥ १०३॥**

वचेति—वक्तीति वचा, उग्रोगन्धोऽस्या उग्रगन्धा, षड्ग्रन्था ग्रन्थयो यस्याः षड्ग्रन्था, गौर्लोमास्या गोलोमी, शतं पर्वाणि सन्त्यस्याः शतपर्विका "शतपर्विका तु दूर्वायां वचायामपि योषितीति" (मेदिनी) इति पञ्च वचायाः। सा वचा शुक्ला श्वेतवर्णा चेत्तदा हिमवति भवा हैमवती स्यादित्येकं श्वेतमूलवचायाः। वैद्यस्य मातेव वैद्यमाता, हिनस्तीति सिंही, वाश्यते, उश्यते वा वाशिका, वासयतीति विग्रहे तु वासा दन्त्यान्तोपि "वासो गृहेऽप्यवस्थाने वासा स्यादटरूषके" (इति रुद्रः) वर्षति मधु इति वृषः, अटान् गच्छतो रोषतीति अटरुषः, अटैरूषतीति विग्रहे तु अटरूषो दीर्घोकारवानपि "वैद्यमाताटरूषकः" (इति रभसः) सिंहआस्यमस्येति सिंहास्यः "सिंहास्यो वाजिदन्तकः" (इति रभसः,) वस्ते आच्छादयति, वासयति वा वासकः, वाजीदन्तोऽस्येति वाजिदन्तक इत्यष्टावटरूषस्य॥ १०२। १०३॥

स. स. स. स.
विष्णुक्रान्ता **आस्फोता गिरिकर्णी "स्या" द्विष्णुक्रान्तापराजिता।**
स. पु. पु. पु. पु.
तालमखाना **इक्षुगन्धा (तु) काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः॥ १०४॥**

आसिति—आस्फोटयतीति आस्फोता, गिरिर्बालमूषिकाकर्णोऽस्या गिरिकर्णी, विष्णुना क्रान्ता विष्णुक्रान्ता, न पराजिता अपराजिता इति चत्वारि विष्णुक्रान्तायाः। इक्षुः गन्धोऽस्या इक्षुगन्धा, "इक्षुगन्धा कोकिलाक्षे क्रोष्ट्र्याकाशे च गोक्षुरे" (इति मेदिनी) काण्डेन इक्षुरिव काण्डेक्षुः, कोकिलोऽक्षि यस्येति कोकिलाक्षः, इक्षुमिक्षुगन्धं रातीति इक्षुरः, क्षुरइव क्षुर. "क्षुरःस्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुर इति" (विश्वः) इति पञ्च "तालमखाना" इति ख्यातस्य॥ १०४॥

पु. पु. स. स. स.

सौंफ **शालेयः'स्या'च्छीतशिवश्छत्रा मधुरिका मिसिः।**

स. पु. पु. स. स. स.

सेहुँड **मिश्रेया(प्यथ)सीहुण्डो वज्रद्रुःस्नुक्स्नुहीगुडा॥१०५॥**

स. पु.न. स. स.

वायविडङ्ग **समन्तदुग्धा(थो)वेल्लममोघा चित्रतण्डुला।**

पु. पु. पु.न.

तण्डुलश्च कृमिघ्नश्च विडङ्गं(पुंनपुंसकम्)॥ १०६॥

शेति—शालीनां भवनं क्षेत्रं शालेयं तदस्यास्तीति शालेयः, शीतमस्यास्तीति शीतं शिवमस्यास्तीति शिवः शीतश्चासौ शिवश्चेति शीतशिवः, छत्रमस्यास्तीति छत्रा, मधुरो रसोऽस्त्यस्या मधुरा सैव मधुरिका, मस्यते इति मिसिः, मिसी वा, मेशति, मिशती विग्रहे तु मिशी, मिशिरपि तालव्यान्तः, मिश्रयतीति मिश्रा, ईयत इत्येया, मिश्रा चासावेया चेति शकन्ध्वादित्वान्मिश्रेया इति षट् 'सौंफ' इति ख्यातायाः। अथेति—'सी' इति हुण्डते सीहुण्डः "वज्रद्रुमः सिहुण्डोथ" इति रभसात्सिहुण्डो ह्रस्वादिरपि, वज्रश्चासौ द्रुश्चेति वज्रद्रुः, स्वामी तु "वज्रः स्नुक् स्त्री स्नुही गुडा" इति पठति, स्नुह्यतीति स्नुक्, स्नुही, भागुरिमते स्नुहापि, गुडतीति गुडा, समन्ताद्दुग्धमस्याः समन्तदुग्धा इति षट् सीहुण्डस्य। अथविति—वेल्लतीति वेल्लम्, न मोघा अमोघा, मोघापि "कृमिघ्नं तण्डुलं मोघा" (इति वाचस्पतिः) चित्रास्तण्डुला अस्याश्चित्रतण्डुला, तड्यत इति तण्डुलः, मुकुटमते तु तन्तुं कृमिसूत्रं लातीति तन्तुलोऽपि, कृमीन् हन्तीति कृमिघ्नः, विडतीति विडङ्गं पुंनपुंसकं स्यादिति षट् विडङ्गस्य॥ १०५। १०६॥

स. पु. स. स.

बरियारा गनई **बला वाट्यालको घण्टारवा(तु)शणपुष्पिका।**

स. स. स. स. स.

दाख **मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति(च)॥१०७॥**

बलेति—बलति, बलमस्त्यस्या इति वा बला, वाटीमलतीति वाट्यालः, स एव वाट्यालकः इति द्वे बलायाः। घण्टयारौतीति घण्टारवा, शणः पुष्पं यस्याः शणपुष्पी सैव शणपुष्पिका, इति द्वे घण्टारवायाः। मृद्नाति, मृद्यते वा मृद्वीका, गौ स्तनोऽस्या गोस्तनी, "गोस्तनो हारभेदे ना द्राक्षायां गोस्तनी स्त्रियामिति" (मेदिनी) द्राक्षन्त इति द्राक्षा, स्वदत इति स्वाद्वी, मधुरो रसोऽस्या मधुरसा, "भवेन्मधुरसा द्राक्षा मूर्वादुग्धिकयोरपि" (मेदिनी) इति पञ्च द्राक्षायाः॥ १०७॥

स. स. स. स. स.

सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत्।

स. स. स. स. स.

त्रिधारा त्रिभण्डीरोचनीश्यामापालिन्द्यौ(तु)सुषेणिका१०८॥

स. स. स. स.

कालानिसोत कालामसूरविदलार्धचन्द्रा कालमेषिका ।

सर्वेति—सर्वा अनुभूतयोऽस्यामिति सर्वानुभूतिः, सरतीति सरला, सरणापि, "सर्वानुभूतिः सरणा त्रिपुटा रेचनी सरा" (इति वाचस्पतिः) त्रयःपुटा यस्यास्त्रिपुटा, त्रिपुटीत्यपि "त्रिपुटी महतीस्वाशा" (इति वाचस्पतिः) त्रिभिरवयवैर्वृता त्रिवृता, त्रीनवयवान् वृणोतीति त्रिवृत, त्रीन् दोषान्भण्डत इति त्रिभण्डी, रोचत इति रोचनी "रोचनी कर्कशे स्मृता" रेचनी इति पाठे तु रिणक्तीति रेचनी "रेचनी त्रिवृतादन्त्योरिति" (मेदिनी) इति सप्त शुक्लत्रिवृतायाः । श्यायत इति श्यामा, पालयतीति पालिन्दी, सुष्ठु सेनया यातीति सुषेणा सैव सुषेणिका, कालयतीति काला, मसूरवद्विदलमस्या मसूरविदला, अर्धश्चन्द्रो यस्या अर्धचन्द्रा, कालं मिषतीति कालमेषी सैव कालमेषिकेति सप्त श्यामत्रिवृतायाः ॥ १०८ । ६ ॥

न. न. स. स.

मुलेठी मधुकं क्लीतकं यष्टिमधुका मधुयष्टिका ॥ १०९ ॥

काला गगा फल स. स. स. स.

विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री (च या सिता) ।

उजला गगा फल स. स. स.

(अन्या)क्षीरविदारी'स्या'न्महाश्वेतर्क्षगन्धिका ११०॥

मेति—मन्यत इति मधु, मध्विव मधुकम्, क्लीबत्वं क्लीतमधाष्टर्यं करोति, क्ली क्लीवत्वं तकतीति वा क्लीतकम्, यष्टी मध्विवास्या यष्टिमधुका, मधुयष्टीव मधुयष्टिका "मधुयष्टी च यष्टी च यष्टीमधुकमेव चेति" (वाचस्पतिः) इति चत्वारि मधुयष्टिकायाः । विदारयतीति विदारी, क्षीरमिव शुक्ला क्षीरशुक्ला, इक्षुर्गन्धोऽस्या इक्षुगन्धेति त्रीणि शुक्लभूकूष्माण्डस्य । तथा च अन्या या असिता कृष्णा सा तु क्रोशतीति क्रोष्ट्री "क्रोष्ट्री शृगालिका-क्षीरविदारीलाङ्गलीषु चेति" (विश्वः) क्षीरवती विदारी, क्षीरविदारी, महती चासावश्वेता च महाश्वेता, ऋक्षो गन्धोऽस्याः, ऋक्षान् गन्धयतीति वा सैव ऋक्षगन्धिका स्यादिति चत्वारि कृष्णभूकूष्माण्डस्य ॥ १०९ । ११० ॥

स. स. स. स.

जलपीपरि लाङ्गली शारदी तोयपिप्पली शकुलादनी ।

अजमोद या स. स पु. पु. पु.

मोरशिखा खराश्वाकारवीदीप्यो मयूरोलोचमस्तकः ॥ १११ ॥

---

१ एवं च विदार्यादित्रयं शुक्लवाचकम् । क्रोष्ट्र्यादिचतुष्टयं कृष्णवाचकमिति मन्तव्यम् ॥

लेति—लाङ्गलाकारोऽस्त्यस्या लाङ्गली, "लाङ्गलीतोयपिप्पल्यां क्लीबन्तु कुसुमान्तरे। गोदारणे तृणराजगृहदारुविशेषयोरिति" (मेदिनी) शरदि भवा शारदी, तोयम् पिप्पलीव तोयपिप्पली, शकुलैरद्यत इति शकुलादनीति चत्वारि जलपिप्पल्याः। खरमश्नुते, खरैरश्यते वा खराश्वा, केन जलेन रौतीति करवो मयूरस्तस्येयं कारवी, "कारवीमधुरादीप्यत्वक्पत्री कृष्णजीरके" (इति मेदिनी) दीपनं दीपस्तत्र साधुर्दीप्यः, दीपकोपि "अलंकारे यवान्यां च दीपको लोचमस्तके" (इति रभस,) मीनाति रोगमिति मयूरः, लोच्यते, लोचयति वा लोचो दर्शनीयो भासमानो वा मस्तकोऽस्तीति लोचमस्तकः, स्वामिमते तु लोचमर्कटोपीति पञ्च मयूरशिखायाः ॥ १११ ॥

स. स. स. स. स.

काली सारिवा गोपी श्यामा शारिवा (स्या) दनन्तोत्पलशारिवा।

ऋद्धि न. स. स. स. [१]

वृद्धि योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धे (रप्याह्वया इमे) ॥ ११२ ॥

गोपीति—गोपायतीति गोपी, गोपापि, "गोपीश्यामा गोपवल्ली गोपा गोपालिका च सा" (इति वाचस्पतिः) श्यायत इति श्यामा, शरणं शारिरस्त्यस्या इति शारिवा, नास्त्यन्तोऽस्या अनन्ता, "अनन्ता च विशल्यायां शारिवादूर्वयोरपीति" (मेदिनी) उत्पलं पलमनया, उत्पलमस्त्यस्या वा उत्पला, उत्पला चासौ शारिवा चेति उत्पलशारिवा इति पञ्च शारिवायाः। युज्यते, योगाय प्रभवति वा योग्यम्, ऋध्नोतीति ऋद्धिः, "ऋद्धिः स्यादौषधीभेदे समृद्धावपि योषिति" (इति मेदिनी) सिध्यतीति सिद्धिः "सिद्धिस्तु मोक्षे निष्पत्तियोगयोरिति" (हैमः) लक्षयति, लक्ष्यते वा लक्ष्मीः, "लक्ष्मीः संपत्तिशोभयोः" (इति मेदिनी) इति चत्वारि ऋद्ध्याख्यौषधेः। इमे उक्ताश्चत्वारो वृद्ध्याख्यौषधेरप्याह्वया नामानि, वर्धतेऽनयेति वृद्धिरिति पञ्च वृद्ध्याख्यौषधेः ॥ ११२ ॥

स. स. स. स. स.

केला कदली वारणवुसा रम्भा मोचांशुमत्फला।

स. स. स. स.

वनमूंग काष्ठीला मुद्गपर्णी (तु) काकमुद्गा सहे (त्यपि) ॥ ११३ ॥

कदलीति—कन्दते, कन्यते वा केन वायुना दल्यते वा, कदली, कदलापि, वुस्यति, वुस्यते वा वुसा, वुषेति मूर्धन्यान्तोपि, वारणानां वुसा वारणवुसा, रमते, रम्भते वा रम्भा, "रम्भा कदल्यप्सरसोर्ना वेणौ वारणान्तरे" (इति मेदिनी) मुच्यतीति मोचा, अंशुमन्ति सूर्याच्च च्यवन्ति फलान्यस्याः, अंशुमानिव फलान्यस्या वा अंशुमत्फला, [illegible] काष्ठिना [illegible] इति काष्ठीला, इति षट् कदल्याः। मुद्गःपर्णमस्या मुद्गपर्णी, [illegible] मुद्गं गच्छतीति, काकमुद्गा, [illegible] मस्यामिति वा [illegible]

[१] [illegible] । [illegible] समृद्धावपि योषिति" [illegible]

हते इति सहा "सहो बले न स्त्रियां स्यात् स्त्रियान्तु नखभेपजे। दण्डोत्पला मुद्ग-
र्णी कुमारी पृथिवीषु चेति" (मेदिनी) इति त्रीणि "मुंगौनी" इति ख्यातस्य॥ ११३॥

स. स. स. स. स.
गिन या भाटा **वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षणी।**
स. स. स. स. स.
रासन या **नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली॥११४॥**
स. स. स. स.
लताविशेष **नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा (च सा)।**

वार्तेति—वार्तमारोग्यमाकयति, वार्तं फल्गु अकं यस्या वा वार्ताकी, "वातिङ्गणस्तु ...र्ताङ्गो वार्ताकः शाकबिल्वकः" इति रभसात्पुंस्यपि, "वार्ता वातिङ्गणे वृत्ताविति" ...वेश्वाद् वार्तापि, "वातिङ्गणश्च वार्ताकुरिति" (त्रिकाण्डशेषाच्च) वार्ताकुरपि, हिङ्गु ...र्तातीति हिङ्गुली, हिनस्तीति सिंही, भण्यते, भण्यते वा भण्टाकी, दुःखेन प्रधृ-...यत इति दुष्प्रधर्षणी, दुष्प्रधर्षिणीत्यपि इति पञ्च भण्टाक्याः। नकुलानां प्रियं, न ...श्राकुलत्वं यया वेति नाकुली, शोभनो रसोऽस्याः सुरसा, राति, रायते, रस्यते वा रास्ना, ...शोभनो गन्धः सुगन्धः, सुगन्धोऽस्त्यस्याः सुगन्धा, गन्धवती नाकुली गन्धनाकुली, न-...कुलानामिष्टा नकुलेष्टा, भुजङ्गानक्षति, भुजङ्गोऽक्षि यस्या भुजङ्गाक्षी, छत्रमकतीति ...छत्राकी, सा च सुष्ठु वहतीति सुवहा स्यादिति नव रास्नायाः॥ ११४। ½॥

स. स. स. स. स.
सरिवन **विदारिगन्धांशुमती सालपर्णी स्थिरा ध्रुवा॥ ११५॥**
स. स. स. स.
कपास **तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति (च)।**

विदेति—विदार्या गन्धो विदारिगन्धः, अंशवः सन्त्यस्या अंशुमती, साल. पर्ण-मस्याः सालपर्णी, शालपर्णी तालव्यादिरपि, तिष्ठतीति स्थिरा, ध्रुवतीति ध्रुवा इति पञ्च शालपर्ण्याः। तुण्डिकाञ्शरीराणि ईरयतीति तुण्डिकेरी, समुद्रोऽन्तो यस्याः, मु-द्रया सह वर्तमानोऽन्तः समीपं यस्या वा समुद्रान्ता, करोति क्रियते वा कर्पासी, कार्पासी, बदतीति बदरा इति चत्वारि कार्पास्याः॥ ११५। ½॥

स. स. पु. पु.
नर्माकपास **भारद्वाजी (तु सा वन्या) शृङ्गी (तु) ऋषभो वृषः॥११६॥**
काकड़ासिंगी
स. स. स. स.
ककही या गंगेरन **गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका।**

भारेति—सा कर्पासी वन्या वनोद्भवा चेत्तदा भरद्वाजस्य मुनेरियं भारद्वाजी स्या-दित्येकं वनकर्पास्याः "नर्मा" इति ख्यातायाः। शृणाति गदमिति शृङ्गी, ...

ऋषभः, वर्षतीति वृषः इति त्रीणि शृङ्ग्याः "काकड़ासिंगी" इति ख्यातायाः। गाङ्गं जलमीरयति गाङ्गेरुः सैव गाङ्गेरुकी, नागानां हस्तिनां बला नागबला, झपति वातमिति झषा, गवि भूमावेधते गवेधुः सैव गवेधुका ह्रस्वा चासौ गवेधुका चेति चत्वारि "कंघही" "गंगेरन" इति ख्यातायाः ॥ ११६ । ३/१ ॥

सफ़ेद फूल की तुरई — पु. पु. स.
धामार्गवो घोषकः "स्या"न्महाजाली (स पीतकः) ११७॥
पीले फूल की तुरई, चचेड़ा, भूमिजामुन — स. स. स. स. स.
ज्यौत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका।
कलिहारी, कौआठोढी — स. स. स. स.
स्याल्लाङ्गलिक्यग्निशिखा काकाङ्गी काकनासिका ॥११८॥

धामेति—धाम ऋच्छति धामार्, गच्छति, गम्यते वा गौः धामार् चासौ गौश्चेति धामार्गवः, घोषतीति घोषः स एव घोषकः स्यादिति द्वे "श्वेतपुष्पतोरई" इति ख्यातायाः। स घोषकः पीतकश्चेत्तदा जालयतीति जाली, महती चासौ जाली चेति महाजाली स्यादित्येकं "पियातोरई" इति ख्यातायाः। ज्योत्स्नास्त्यस्या ज्यौत्स्नी, पटतीति पटोली सैव पटोलिका, जलतीति जाली इति त्रीणि "चचेड़ा" इति ख्यातस्य। नद्यां भवा नादेयी, भूमिलग्ना जम्बुका, भूमिजम्बुका इति द्वे भूमिजम्बुकायाः। लाङ्गलं पुष्पविशेषोऽस्त्यस्याः, लाङ्गलवत्खनति भूमिमिति वा लाङ्गलकी, अग्नेरिव शिखास्या अग्निशिखा इति द्वे "कलिहारी" इति ख्यातायाः। काकस्येवाङ्गं नासारूपं फलमस्याः काकाङ्गी, काकस्येव नासिका यस्याः काकनासिका इति द्वे काकजङ्घायाः "कौआठोढ़ी" इति ख्यातायाः ॥ ११७ । ११८ ॥

हंसपदी या लाजालू, मुसली, मेढ़ासिंगी, गोभी — स. स. स. स. / स. स. स. स
गोधापदी (तु) सुवहा मुसली तालमूलिका।
अजशृङ्गी विषाणी (स्याद्) गोजिह्वादार्विके (समे) ११९॥

गोधेति—गोधाया इव पादो मूलमस्या गोधापदी, सुवहतीति सुवहा "गोधापदी तु सुवहा [illegible] हंसपद्यपि" (इति कोषान्तरम्) इति द्वे हंसपद्याः। मुस्यतीति मुसली, [illegible], तालो मूलमस्यास्तालमूली सैव तालमूलिकेति द्वे "मुसली" इति ख्यातायाः। [illegible] अजशृङ्गी, विषाणमस्त्यस्या विषाणी स्यात् "[illegible] [illegible] च योषिति। कुष्ठनामौषधे क्लीबं त्रिषु [illegible]" (मेदिनी) इति द्वे "मेढ़ासिंगी" इति ख्यातायाः। गोजिह्वेव [illegible] [illegible] समानार्थे समानलिङ्गे चेति द्वे "गोभी" इति [illegible] ॥ ११९ ॥

स. स. स. रा.
ताम्बूल या पान ताम्बूलवल्ली ताम्बूली नागवल्ल्य(प्यथ) द्विजा।
स. स. स. स. स.
गगनधूरि हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥ १२० ॥

तामिति—ताम्यतीति ताम्, वोलतीति वुली ताँश्चासौ वुली चेति पृषोदरादित्वात्ताम्बूली, ताम्बूल्याख्या वल्ली ताम्बूलवल्ली, तामं वोलतीति ताम्बूली, नागलोकस्य वल्ली नागवल्ली इति त्रीणि "नागवेलि" इति ख्याताया:। अथेति—द्विर्जाता द्विजा, "द्विजाभार्गीरेणुकयोरिति" (हेमचन्द्रः) हरतीति हरेणुः, "कपायेऽपि हरेणुर्ना रेणुकायां स्त्रियां भवेदिति" (रुद्रः) रिणाति, रीयते वा रेणुः रेणुरस्त्यस्याः, रेणुरेवेति वा रेणुका, "रेणुकापि हरेणौ च जामदग्न्यस्य मातरीति" (मेदिनी) कुन्तिषु देशेषु भवा कौन्ती, कपिलो वर्णोऽस्त्यस्याः कपिला, भस्मनो गन्धो भस्मगन्धोऽस्त्यस्या भस्मगन्धिनी इति षट् हरेणुकायाः ॥ १२० ॥

न. न. न. न.
एलुवा एलवालुकमैलेयं सुगन्धि हरिवालुकम्।
पालक न. स. पु. पु. पु.स.न.
या कुदरू वालुकं (चाथ) पालङ्क्या मुकुन्दः कुन्दकुन्दुरू ॥१२१॥

एलेति—एलयतीति, एला इव वलतीति एलावालु तदेव एलावालुकम् स्वामिमते एलवालुकम्, इलाया अपत्यमैलेयम्, शोभनो गन्धोऽस्य सुगन्धि, हरिवर्णं वालुकम् हरिवालुकम्, वलतीति वालु तदेव वालुकमिति पञ्च "एलुवा" इति ख्यातस्य। अथेति—पालनं पालतया अङ्क्यते पालङ्क्या, मुकुं मुक्तिं ददातीति मुकुन्दः, कुं भूमिमुनत्तीति कुन्द, कुमुन्दयतीति कुन्दरु इति चत्वारि "पालक" इति ख्यातशाकस्य, कुन्दरू इति ख्यातस्य वा ॥ १२१ ॥

न. न. न. न. न.
नेत्रवाला वालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम (च)।
न. न. न. न.
शिलाजीत कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ॥ १२२ ॥
न. स. स. स. स.
तालीसपत्र शैलेयं तालपर्णी (तु) दैत्या गन्धकुटी मुरा।
स. स. स. स. स.
साल या गन्धिनी गजभक्ष्या (तु) सुवहा सुरभी रसा ॥ १२३॥
स. स. स. स.
सालई महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति (च)।

वेति—वालयतीति वालम्, ह्रीयुक्तं वेरमस्येति ह्रीवेरम्, बर्हिषि तिष्ठतीति बर्हिष्ठम्, उदीचि जातमुदीच्यम्, केशाम्बुनोर्नाम यस्येति केशाम्बुनाम इति पञ्च "नेत्रबाला" इति ख्यातस्य। कालेनानुस्रियते कालानुसार्यम्, वर्धते स्म वृद्धम्, अश्मनः पुष्पमिव अश्मपुष्पम्, शीतं च तच्छिवं च शीतशिवम्, शिलायां भवं शैलेयमिति पञ्च "शिलाजित" इति ख्यातस्य। तालः पर्णमस्यास्तालपर्णी, दितेरयं दैत्या, गन्धस्य कुटीव गन्धकुटी, मुरतीति मुरा, प्रशस्तो गन्धोऽस्याः गन्धिनी इति पञ्च मुराख्यसुगन्धिद्रव्यस्य। गजैर्भक्ष्यते गजभक्ष्या-गजभक्षापि, सुवहतीति सुवहा, सुष्ठु रमते सुरभिः, रस्यते रसा महदीरणमस्याः, महमुत्सवमीरयति वा महेरणा, कुन्दुरुरिवप्रतिकृतिः कुन्दुरुकी सलति, सल्करय लक्यते वा सल्लकी "सल्लकी सिल्लकी ह्लादा," (इति रुद्रः) शल्लकी तालव्यादिरपि, ह्लादयत्यवश्यमिति ह्लादिनी इत्यष्टौ सल्लक्याः, "सालई" इति ख्यातायाः ॥ १२२ । १२३ । ½ ॥

स. स. स. स.

धवई या धाय अग्निज्वाला सुभिक्षे(तु)धातकी धातृपुष्पिका॥१२४॥

स. स. स. स. स.

बड़ी इलायची पृथ्वीका चन्द्रवालैला निष्कुटिर्बहुला (थ सा)।

स. स. स. स. स.

छोटी इलायची (सूक्ष्मो)पकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः॥१२५॥

अग्नीति—अग्नेर्ज्वालेव अग्निज्वाला, सुष्ठु भिक्ष्यते इति सुभिक्षा, धातुं करोति धातयतीति धातकी, धातृ पुष्पमस्याः धातृपुष्पिका इति चत्वारि धातक्याः "धवा" इति ख्यातस्य। प्रथते इति पृथ्वीका, चन्द्रस्य कर्पूरस्य बालेव चन्द्रवाला, एलयतीति एला, निश्चिता कुटिः कौटिल्यमस्याः, निष्क्रान्ता कुटेर्वेति निष्कुटिः, "निष्कुटी" बहूनि बीजानि लातीति बहुला इति पञ्च एलायाः। अथेति—सा सूक्ष्मा चेत्तदा उपकुञ्चतीति उपकुञ्चिका, तुदतीति तुत्था, कुरतीति कोरङ्गी, त्रयः पुटा यस्यास्त्रिपुटा, त्रुट्यतीति त्रुटिरिति पञ्च सूक्ष्मैलायाः ॥ १२४ । १२५ ॥

पु. न. न. न. न. न.

कूठ व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम्।

स. स. स. पु.

[illegible] शङ्खिनी चोरपुष्पी(स्यात्)केशि(न्यथ)वितुन्नकः॥१२६॥

न. स. स. न. स. स.

[illegible] झटाऽमलाऽज्झटा ताली शिवातामलकीति (च)।

व्येति—विगत आधिरनेन व्याधिः, "व्याधिः कुष्ठे च रोगेऽपि" (मेदिनी) कुष्णाति [illegible] कुष्ठम्, परिभावे साधु परिभाव्यं तदेव पारिभाव्यम्, व्याप्यत इति व्याप्यम्, [illegible] "[illegible]" पाकं मार्ष्टीति पाकलम्, उत्पलतीति

उत्पलमिति षट् "कूट" इति ख्यातस्य । शङ्खाः सन्त्यस्याः शङ्खिनी, चोरइव पुष्पं यस्याश्चोरपुष्पी, केशाः सन्त्यस्याः केशिनी इति त्रीणि "शङ्खाहूली" इति ख्यातायाः। अथेति—वितुद्यते स्म वितुन्नः स एव वितुन्नकः, झटति, झट्यते वा झटा, न मलो यस्याः अमला, अत आश्चर्यस्य झटः संघातोऽस्यामिति, अत्तीति अत्, झटतीति झटा, अश्वासौ झटा चेति अज्झटा, तालयतीति ताली, शिवमस्त्यस्यामिति शिवा, तनुश्चासावामलकी चेति षट् (सप्त) भूम्यामलक्याः ॥ १२६ । ३ ॥

न. न. पु. पु.

गुलाब या स्थल **प्रपौण्डरीकं पुण्डर्यं (मथ) तुन्नः कुबेरकः ॥ १२७ ॥**

पु. पु. पु. पु. स.

कमल तून या **कुणिः कच्छः कान्तलको नन्दिवृक्षो (थ) राक्षसी ।**

स. स. पु. पु. पु.

तूनी धनहरी **चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ॥ १२८ ॥**

प्रेति—पुण्डरीकेण सदृशम् पौण्डरीकं, प्रकृष्टं पौण्डरीकं प्रपौण्डरीकम "साधुपुष्पं स्थलपद्मं द्विश्रिकुरपुण्डरीककमिति" (रभसः) पुण्डस्य अयं प्रधानं पुण्डर्यमिति द्वे "पुण्डरीया" इति ख्यातस्य । अथेति—तुद्यते स्म तुन्नः, कुत्सितं वेरमस्येति कुबेरकः, कुणातीति कुणिः, तूणायतीति तुणिरपि, कचति, केन छृणत्तीति वा कच्छः, काम्यत इति कान्तः, लकतीति लकः, कान्तश्चासौ लकश्चेति कान्तलकः, नन्दनं नन्दी तस्या वृक्षो नन्दिवृक्षः इति षट् "तुणी" इति ख्यातस्य । अथेति—रक्षस इयं राक्षसी, चण्डत इति चण्डा, धनं हरतीति धनहरी, क्षिणोतीति क्षेम., दुष्टानि पत्राण्यस्येति दुष्पत्रः, गणं हासयतीति गणहासकः गणोपि, "गणः प्रमथसंख्यौघे चण्डासैन्यप्रभेदयोः"(इति रुद्रः) इति षट् चोराख्यगन्धद्रव्यस्य ॥ १२७ । १२८ ॥

नखनामक गन्ध न. न. न. न.

द्रव्य माल- **व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ।**

कागनी,पवारी या स. स. स. स. स.

नलीनामक गन्धद्रव्य **शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ॥ १२९ ॥**

व्याडेति—व्याडस्य व्याघ्रस्य आयुधमिव व्याडायुधम्, व्याघ्रस्य नखमिव व्याघ्रनखम्, "भवेद्व्याघ्रनखं कन्दगन्धद्रव्यविशेषयो. । नखक्षतान्तरे क्लीबमिति" (मेदिनी) करजं नखं तदिव करजम्, चक्रस्य कारकं चक्रकारकमिति चत्वारि नखाख्यगन्धद्रव्यस्य । शुषिरस्त्यस्याः, शुषिरमस्त्यस्यां वेति शुषिरा, विद्रुमस्येव लता विद्रुमलता, कपोतस्याङ्घ्रिरिव कपोताङ्घ्रिः, नटतीति नटी, नलतीति नली इति पञ्च "मालकांगनी" इति ख्यातायाः ॥ १२९ ॥

स. स. स स.

कृ]दनि **धमन्यञ्जनकेशी (च) हनुर्हट्टविलासिनी ।**

स. पु. पु. न. न. स.

अरहर या अढ़ी **शुक्तिः शङ्खः खुरः कोलदलं नख (मथा) ढकी ॥ १३० ॥**

स. स. स. न. न.

काक्षी मृत्स्ना तुवरिका मृतालकसुराष्ट्रजे ।

धमेति—धम्यत इति धमनी, धमनिरपि, अञ्जनमिव केशा अस्या अञ्जनकेशी "केचित्त्विदं द्वयं पूर्वान्वयीत्याहुः" हन्तीति हनुः, हट्टे विलसति तच्छीला हट्टविलासिनी इति चत्वारि 'कक्कुन्दनी' इति ख्यातायाः । शोचतीति शुक्तिः, शाम्यतीति शङ्खः, खुरतीति खुरः, कौलस्य बदर्या इव दलमिति कोलदलम्, न खनतीति नखमिति पञ्च नखाख्यगन्धद्रव्यस्य । अथेति—आढकमस्त्यस्याः परिच्छेदकत्वेन, आढौकते वा आढकी, कक्षे भवा काक्षी, मृत्स्नाऽस्त्यस्याः क्षेत्रत्वेन मृत्स्ना, तुवरोऽस्त्यस्यास्तुवरिका, "वर्विका मल्लिका तूवर्याढकी कच्छुराशटी" इति वोपालितात् तूवरी च, मृतमालयतीति मृतालं तदेव मृतालकम्, मृदि तालः प्रतिष्ठा अस्येति विग्रहे तु मृत्तालकमिति द्विककारमपि, सुराष्ट्रे जातं सुराष्ट्रजमिति षट् "तूवरी" इति ख्यातायाः ॥ १३० । १/२ ॥

न. न. न. न.

नागरमोथा **कुटन्नटं दाशपुरं वानेयं परिपेलवम् ॥ १३१ ॥**

जलमोथा

न. न. न.

गोया या छोटा गोथा **प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि (च) ।**

कुटन्निति—कुटन् वक्रीभवन् नटतीति कुटन्नटम्, दाशान् कैवर्तान् पिपर्तीति दाशपुरम्, दशपुरं—दशपूरं चेति क्वचित्पाठः, दश पूरयति, दश पुरो वाऽस्याः "दशपूरं दशपुरं सवनं जीविताह्वयमिति" (वाचस्पति.) वने पानीये जायते इति वानेयम्, वन्यमपि, परितः पेलवं मृदु परिपेलवम्, प्लवते इति प्लवम् "प्लवं गन्धतृणे प्रोक्तं कैवर्तीमुस्तकेऽपि चेति" (विश्व.) गां जलं पिपर्ति, गौर्जलं पुरमस्येति वा गोपुरम्, गा जलं नर्दयतीति गोनर्दम्, कैवर्तानां जातिः कैवर्ती तस्या मुस्तकं कैवर्तीमुस्तकम्, कैवर्तमुस्तकमपीत्यष्टौ "मोथा" इति ख्यातस्य ॥ १३१ । १/२ ॥

न. न. न. न. न.

[illegible] **ग्रन्थिपर्णं शुकं बर्हिपुष्पं स्थौणेयकुक्कुरे ॥ १३२ ॥**

स. स. स. स. स. स.

[illegible] **मरुन्माला (तु) पिशुना स्पृक्का देवी लता लघुः ।**

स. स. स. स.

समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिका (इत्यपि) ॥ १३३ ॥

ग्रन्थीति—ग्रन्थी पर्णान्यस्य, ग्रन्थय इव पर्णान्यस्येति वा ग्रन्थिपर्णम्, [illegible] [illegible] पर्णान्यस्येति [illegible] तु [illegible] [illegible]

प्रशस्तमस्येति बर्हि, पुष्यतीति पुष्पम्, बर्हि च तत्पुष्पं चेति बर्हिपुष्पम्, बर्हपुष्प-मित्यन्ये, बर्हमपि, स्थूणाया अपत्यं स्थौणेयम्, कुकुरोऽस्यास्तीति कुकुरमिति पञ्च "कुकुरौंधा" इति ख्यातस्य । मरुद्भिर्मल्यते इति मरुन्माला व्यस्तं समस्तं च नामेदम्, म्रियत इति मरुत्, मल्यत इति माला, पिंशतीति पिशुना, स्पृश्यत इति स्पृक्का, पृक्कापि, दीव्यतीति देवी, लततीति लता, लङ्घत इति लघुः, समुद्रोऽन्तोऽस्याः समुद्रान्ता, व-हति, उह्यते वा वधूः, " पृक्का च महिला वधूः " कोटिभिरग्रैर्वर्षति मध्विति कोटि-वर्षा, लङ्कायामुप्यते लङ्कोपिका इति दश "असरक" इति ख्यातस्य ॥ १३२ । १३३ ॥

स. स स. स. स.

जटामासी तपस्विनी जटामांसी जटिला लोमशा मिसी ।

दालचीनी न. न. न. न. न. न.

या तज त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ॥ १३४ ॥

तपेति—तपोऽस्त्यस्यास्तपस्विनी, जटास्त्यस्या जटतीति वा जटा, मन्यते इति मांसी, जटामांस्यपि जटास्त्यस्या जटिला, लोमानि सन्त्यस्याः लोमशा, मस्यतीति मिसी, मिसिरपि, मसी, मसिर्वा इति षट् "जटामांसी" इति ख्याताया: । त्वगिव पत्रमस्य त्वक्-पत्रम्, त्वगपि, उत्कटतीति उत्कटम्, बिभर्तीति भृङ्गम्, प्रशस्ता त्वगस्यास्तीति त्वचम्, प्रशस्तं चोचमस्यास्तीति चोचम् -"त्वक्त्वचचोचशब्दाः स्युर्वल्के चर्मणि पत्रके" (इति धरणिः) वरमङ्गमस्येति वराङ्गकमिति षट् त्वक्पत्रस्य ॥ १३४ ॥

कचूर कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ।

अन्नमात्र

औषध ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधम् ॥ १३५ ॥

केति—कर्चतीति पृषोदरादित्वात्कर्चूरः स एव कर्चूरकः—कर्बूरकोपि वा, द्रविडे देशे जातो द्राविडः स एव द्राविडकः, कल्पे विधौ भवः काल्पः सएव काल्पकः, काल्यकोपि, वेधे मुख्यः वेधमुख्यः स एव वेधमुख्यकः, इति चत्वारि कर्चूरकस्य । जातिमात्रे जातिमात्र-विवक्षायां ओषाः स्रोषा दीप्तयो वा धीयन्तेऽत्रेति "ओषध्यः" स्युः "ओषधी" शब्दप्र-योगो भवतीति यावत्, अजातौ द्रव्यमात्रविवक्षायां तु "औषध" शब्दप्रयोगः, "ओषधे-रजातावित्यण्" सर्वमित्यनेन घृततैलादिकमप्यौषधशब्दवाच्यं भवतीति विज्ञेयम् ॥ १३५ ॥

न. पु. पु.

साग या तर-शाकाख्यं (पत्रपुष्पादि) तण्डुलीयोऽल्पमारिषः ।

कारी,चौराई, स. स. स. स. स.

इन्द्रपुष्पी विशल्याग्निशिखानन्ता फलिनी शक्रपुष्प्यपि ॥ १३६ ॥

शाकेति—शक्यते भोक्तुम्, स्यतीति वा शाकम् पत्रपुष्पादिशाकाख्यं शाकनामकं स्यात् " मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् । त्वक्पुष्पं कवकं चैव शाकं दशविधं

स्मृतम्" मूलं मूलकादेः, पत्रं वास्तुकादेः, करीरं वंशांकुरम्, अग्रं वेत्रादेः, फलं कूष्माण्डादेः, काण्डमुत्पलादेर्नालम् अधिरूढकं तालवीजांकुरास्थिमज्जादि, त्वक् मातुलुङ्गादेः पुष्पं तिन्तिडी कोविदारादेः, कवकं छत्रिका इति दशविधं शाकं स्मृतमिति। तण्डुलाहितस्तण्डुलीयः, मारिषतीति मारिषः, अल्पश्चासौ मारिषश्चेत्यल्पमारिषः इति "चौराई" इति ख्यातस्य। विगतं शल्यमनयेति विशल्या, अग्नेरिव शिखा संतापो यस्य अग्निशिखा, न अन्तो यस्या अनन्ता, फलानि सन्त्यस्याः फलिनी, शक्रः पुष्पमस्य शक्रपुष्पीति पञ्च इन्द्रपुष्प्याः ॥ १३६ ॥

स. स. स पु.

विधारा (स्यादृ)क्षगन्धा छगलान्त्र्यावेगी वृद्धदारकः।

ब्राह्मी, क्ष्योटा पु. स. स. स. स.

या उजली दूब जुङ्गो ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी ॥१३७॥

स्यादिति—ऋक्षस्येव गन्धोऽस्याः ऋक्षगन्धा, ऋष्यगन्धापि, छगलस्येवान्त्रमस्याश्छगलान्त्री, छगलापि आवेगोऽस्त्यस्याः आवेगी, वृद्धो दारकोऽस्मात्, वृद्धत्वं दारयति वा वृद्धदारकः, जुङ्गति, जुङ्गयते वा जुङ्गः इति पञ्च वृद्धदारकस्य। ब्रह्मण इयं ब्राह्मी मत्स्याक्षीव पुष्पमस्याः मत्स्याक्षी, वयसि तिष्ठत्यनयेति वयस्था, सोमस्य वल्लरी इति चत्वारि ब्राह्मयाः ॥ १३७ ॥

स. स. स स.

मकोय पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती।

स. स. स. स.

माषपर्णी हयपुच्छी (तु) काम्बोजी माषपर्णी महासहा ॥१३८॥

पट्विति—पटूनि पर्णान्यस्याः पटुपर्णी, हिमवति जाता हैमवती, स्वर्णमिव क्षीरमस्याः स्वर्णक्षीरी, हिममस्त्यस्या हिमावती इति चत्वारि "मकोय" इति ख्यातायाः। हयपुच्छमिव पर्णान्यस्या हयपुच्छी, कम्बोजदेशे भवा काम्बोजी, माषस्य इव पर्णान्यस्या माषपर्णी, महती चासौ सहा चेति महासहा इति चत्वारि माषपर्ण्याः ॥ १३८ ॥

स. स. स. स.

कुन्दरू तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्य(पि)।

स. स. स. स. स.

बर्बरा बर्बरा कवरी तुङ्गी खरपुष्पाजगन्धिका ॥ १३९ ॥

तुण्डीति—तुण्डं चञ्चुरिव येषामिति तुण्डिकास्तानीरयतीति तुण्डिकेरी, तुण्डकेरीति पाठान्तरे प्रशस्तं तुण्डं तुण्डकमीर्ते तुण्डकेरी, रक्तं फलमस्या रक्तफला, बिम्बमिवाचरतीति बिम्बिका, पीलोरिव पर्णमस्याः पीलुपर्णी इति चत्वारि "कुन्दरू" इति ख्यातायाः। वृणोतीति वर्वरा, कवतीति कवी कस्य शिरसो वरी कवरी, तुङ्गति

तुङ्गी, खरं पुष्पमस्याः खरपुष्पा, अजस्येव गन्धोऽस्या अजगन्धिका इति पञ्च वर्वरायाः "बबई" इति ख्यातायाः ॥ १३९ ॥

स. स. स. स.

कौलिन्दरण **एलापर्णी(तु) सुवहा रास्ना युक्तरसा (च सा)।**

अम्लोनियां स. स. स. स. स.

या चूक **चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ॥ १४० ॥**

एलेति—एलाया एव पर्णान्यस्या एलापर्णी, सुवहतीति सुवहा, रासत इति रास्ना, सा च युक्तो रसो यस्या युक्तरसा इति चत्वारि एलापर्यायाः। "चाङ्गस्तु शोभने दक्षे" (इति मेदनी) चाङ्गमीरयतीति चाङ्गेरी, चकते, चक्यतेऽनेनेति वा चुक्रा सैव चुक्रमिवेति वा चुक्रिका, शठतीति शठा-दन्तानां शठा दन्तशठा, अम्बे तिष्ठतीति अम्बष्ठा, अम्ललेभ्य ऊना पृषोदरादित्वात् अम्ललोणा सैव अम्ललोणिका इति पञ्च "अम्लोनिया" इति ख्यातायाः ॥ १४० ॥

पु. पु. पु. पु.

अम्लवेतस **सहस्रवेधी चुक्रोम्लवेतसः शतवेध्य(पि)।**

लजालू स. स. स. स.

नमस्कारी गण्डकाली समङ्गा खदिरे (त्यपि) ॥ १४१ ॥

सहस्रेति—सहस्रं वेधितुं शीलमस्येति सहस्रवेधी, चकतेऽनेनेति चुक्रः, अम्लश्चासौ वेतसश्च अम्लवेतसः, शतं वेधितुं शीलमस्येति शतवेधी इति चत्वारि अम्लवेतसस्य "नवलजालू" इति ख्यातस्येति वा मुकुटः। नमस्करणशीला नमस्कारी, गण्डेषु ग्रन्थिषु काली गण्डकाली, समङ्गतीति समङ्गा, खदतीति खदिरा इति चत्वारि "हाताजोड़ी" इति ख्यातायाः ॥ १४१ ॥

स. स. स. स. स.

जीवन्ती या **जीवन्ती जीवनी जीवा जीवनीया मधुः स्रवा।**

पु. पु. पु. पु. पु.

डोडी जीवक **कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः ॥ १४२ ॥**

जीवेति—जीवतीति जीवन्ती, जीव्यतेऽनयेति जीवनी, जीवयतीति जीवा, जीवितुमर्हा, जीवनाय हिता वेति जीवनीया, मन्यते इति मधुः, स्रवतीति स्रवा, "मधुस्रवा" इत्येकं नामेत्यन्ये इति षट् गुर्जरदेशीय "दोड़ी" इति ख्यातायाः। कूर्चमिव शीर्षं यस्येति कूर्चशीर्षः, मधु माधुर्यं रातीति मधुरः स एव मधुरकः, शृणातीति शृङ्गः, ह्रस्वान्यङ्गान्यस्येति ह्रस्वाङ्गः, जीवयतीति जीवकः इति पञ्च जीवकस्य ॥ १४२ ॥

---

१ "खदिरा शाकभेदे स्त्री ना चन्द्रे दन्तधावने" (इति मेदिनी)॥

पु. पु. पु. स.

चिरायता **किराततिक्तो भूनिम्बोऽनार्यतिक्तो (ऽथ) सप्तला ।**

स. स. स. स.

सेहुँड़ के भेद **विमला सातला भूरिफेना चर्मकषे (त्यपि) ॥ १४३ ॥**

किरेति—किरातदेशोऽस्ति जन्मस्थानमस्येति किरातः, तेजयति स्म तिक्तः, किरातश्चासौ तिक्तश्चेति किराततिक्तः, भुवो निम्ब इव भूनिम्बः, अनार्यप्रियश्चासौ तिक्तश्चेति अनार्यतिक्तः, चिरात्तिक्तोपि "किरातश्चिरात्तिक्तश्च भूनिम्बहिमकावपीति" (रभसः) इति त्रीणि " चिरायता " इति ख्यातस्य । अथेति—सप्त लातीति सप्तला, विगता मला ययेति विमला, सातं सुखं लातीति सातला, भूरयः फेना यस्य भूरिफेना, चर्मणि कषा चर्मकषेति पञ्च सीहुण्डभेदस्य, चर्मघासस्येत्यन्ये ॥ १४३ ॥

स. स. स. पु.

काकोली या ककोड़ी दँतिया **वायसोली स्वादुरसा वयस्था (थ) मकूलकः ।**

पु. स. स. स.

या जयपाल **निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्य(पि)॥१४४॥**

वायेति—वायसान् ओलण्डतीति वायसोली, स्वादुरसोऽस्याः स्वादुरसा, वयसि स्थीयतेऽनयेति वयस्था इति त्रीणि "ककोड़ी" इति ख्याताया: । अथेति—मङ्कत इति मकूलः स एव मकूलकः, मुकूलकोपि, निभृशं स्कुभ्नाति विस्तारयतीति निकुम्भः, दाम्यति, दम्यते वा दन्ता सैव दन्तिका, प्रत्यञ्ची श्रेण्यस्याः प्रत्यक्श्रेणी, उदुम्बरस्येव पर्णान्यस्या उदुम्बरपर्णी इति पञ्च वज्रदन्त्याः ॥ १४४ ॥

स. स. स. स.

अजवाइन **अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका ।**

न. न. न.

पुष्करमूल **(मूले) पुष्करकाश्मीरपद्मपत्राणि (पौष्करे)॥१४५॥**

अजेति—अजेन मोदते, मोद्यते, अजं मोदयतीति वा अजमोदा, उग्रो गन्धोऽस्याः उग्रगन्धा इति द्वे अजमोदायाः । ब्रह्मणा दृभ्यते इति ब्रह्मदर्भा, दुष्टो यवो यवानी, सैव यवानिका, सप्तकाण्डपाठे तु यमनातीति यमानी इति द्वे यवानिकायाः। चत्वारि पर्याया इत्येके । पौष्करे मूले पुष्यति पुष्णाति वा पुष्करम्, कश्मीरेषु भवं काश्मीरम्, पद्मस्येव पत्रमस्येति पद्मपत्रम्, " पद्मपर्णमिति वा पाठ. " इति त्रीणि पुष्करमूलस्य ॥ १४५ ॥

स. स. स. स. स.

[illegible] **अव्यथातिचरा पद्मा चारटी पद्मचारिणी ।**

[illegible] पु. पु. पु. पु. स.

[illegible] **काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनी(त्यपि)॥१४६॥**

अव्यथेति—न व्यथते इति अव्यथा, अति चरतीति अतिचरा, पद्यत इति पद्मा, चारयतीति चारटा, पद्मे चरितुं शीलमस्याः पद्मचारिणी इति पञ्च पद्माकस्य। काम्पिलाया अदूरभवः काम्पिल्यः, कम्पते कम्पिल्लः स एव काम्पिल्लः इत्थं निर्यकारोपि, कृणातीति कर् कशत इति कशः कर् चासौ कशश्चेति कर्कशः, चन्दतीति चन्द्रः, रक्तमङ्गमस्येति रक्ताङ्गः, रोचत इति रोचनी, रिणक्तीति विग्रहे तु रेचनीत्यपीति पञ्च "कबीला" इति ख्यातस्य॥ १४६ ॥

चकवड **प्रपुन्नाडस्त्वेडगजो दद्रुघ्नचक्रमर्दकः।**
प्याज **पद्माट उरणाख्य(श्च)पलाण्डु(स्तु)सुकन्दकः॥ १४७॥**

प्रेति—पुमांसं नाडयतीति पुन्नाडः प्रकृष्टः प्रगतो वा पुन्नाडः प्रपुन्नाडः, एडो मेष एव गजो यस्य, एडे स्वप्ने गजतीति वा एडगजः, दद्रुं हन्तीति दद्रुघ्नः, चक्रं दद्रुं मृद्नातीति चक्रमर्दः स एव चक्रमर्दकः, पद्ममिव पद्मां वा पद्मसमूहं वा अटतीति पद्माटः, उरणस्य मेषस्य आख्याऽस्येति उरणाख्यः, उरणस्याक्षीवाक्षि यस्येति उरणाक्षः इति षट् "चकवड़" इति ख्यातस्य। पलतीति पलाण्डुः, शोभनमतीव वा कन्दयति, सुकन्दः स एव सुकन्दकः इति द्वे "प्याज़" इति ख्यातस्य॥ १४७ ॥

हराप्याज **लतार्कदुर्द्रुमौ (तत्र हरिते) 'थ' महौषधम्।**
लहसुन **[१]लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः॥ १४८ ॥**

लतेति—तत्र पलाण्डौ हरिते पालाशे सति लतासु अर्च्यते, अर्च्यते विरुद्धलक्षणाया निन्द्यते वा लतार्कः, दुष्टो द्रुमो दुर्द्रुमः उभौ स्यातामिति द्वे हरिद्वर्णपलाण्डोः। अथेति—महच्च तदौषधं चात महौषधम्, "महौषधं तु शुण्ठ्यां स्याद्विपायां लशुनेपि च" (इति मेदिनी) अश्नुते, अश्नाति वा लशुनम्, गृञ्ज्यते रोगेषु भक्ष्यत्वेन कथ्यत इति गृञ्जनः, न रिष्टमशुभमस्मात् अरिष्टः, महत् कन्दमस्येति महाकन्दः, रसे आस्वादने ऊनयते पातकहेतुत्वात् रसोनः स एव रसोनकः इति षट् "लशुन" इति ख्यातस्य॥ १४८ ॥

गदहपुन्ना विसखपरिया **पुनर्नवा (तु) शोथघ्नी वितुन्नं सुनिषण्णकम्।**
पटसन या पटुआ **स्याद्वातकः शीतलोऽपराजिता शणपर्ण्य(पि)॥१४९॥**

---

१ लशुन गृञ्जन चैव पलाण्डु कवकानि च। वृत्ताकारालिकालाबुजातीया जातिदूषितमिति। श्वेतकन्द. पलाण्डुविशेषो गृञ्जनम्। लशुन दीर्घपत्रश्च पिच्छगन्धो महौषधम्। फरणश्च पलाण्डुश्च लतार्कश्चापराजितः। गृञ्जन यवनेष्टश्च पलाण्डोर्दश जातयः" इति सुश्रुतेनोक्तत्वात्॥

पुनरिति—पुनरभीक्ष्णं नूयत इति पुनर्नवा, शोथं हन्तीति शोथघ्नी इति द्वे "गदहपूर्णा" इति ख्यातायाः। तुद्यते स्म तुन्नं विगतं तुन्नं व्यथनमस्मात् वितुन्नम्, सुष्ठु निषण्णमस्मात्सुनिषण्णकमिति द्वे "विषखपरिया" इति ख्यातस्य। वातं करोति, वातयतीति, वातकः शीतं लातीति शीतलः, "शीतलवातलः" इत्यपि नाम "शणपर्णी शीतलवातकः" (इति धन्वन्तरिः) न पराजिता अपराजिता, शणाः पर्णान्यस्याः शणपर्णी, अशन इव पर्णमस्या अशनपर्णीत्यपीति चत्वारि "पटशण" इति ख्यातस्य ॥ १४९ ॥

स. स. स. स. स.
मालकांगनी **पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता।**
चिरायता के न. स. स. स.
बीज **वार्षिकं त्रायमाणा (स्यात्) त्रायन्ती बलभद्रिका॥१५०**

पारेति—पारावत इव अङ्घ्रिरस्याः पारावताङ्घ्रिः, कटवद्भातीति कटभी, पण्य इति पण्या, पिण्यापि, ज्योतिरस्त्यस्या ज्योतिष्मती, लततीति लता इति पञ्च "मालकांगनी" इति ख्यातायाः। वर्षासु भवं जातं वेति वार्षिकम्, त्रायत इति त्रायमाणा त्राणं त्रास्तामयतीति त्रायन्ती, बलेन भद्रा बलभद्रा सैव बलभद्रिका इति चत्वारि "त्रायमाणा" इति ख्यातायाः ॥ १५० ॥

स. स. स. स.
बिलाईकन्द **विष्वक्सेनप्रिया गृष्टिर्वाराही बदरेति (च)।**
भँगरा,काकजंघा पु. पु. स. स.
या काकमाची **मार्कवो भृङ्गराजः (स्यात्) काकमाची (तु) वायसी १५१**

वीति—विष्वक्सेनस्य प्रिया विष्वक्सेनाप्रिया, गृह्णातीति गृष्टिः, घर्षतीति विग्रहे घृष्टिरिति पाठान्तरम्, वराहस्येयं वाराही, वदतीति वदरा इति चत्वारि "वाराहीकन्द" इति ख्यातायाः। मार्ष्यतीति मास्तस्यां शौक्लथनासिकायां कूयत इति मार्कवः, भृङ्ग इव राजते भृङ्गराजः "भृङ्गरजः" इति पाठे तु भृङ्ग इव रजोऽस्येति भृङ्गरजः "स्यान्मार्कवो भृङ्गरजो भृङ्गराजः सुजागरः" (इति रभसः) इति द्वे भृङ्गराजस्य। काकान् मच्यते इति काकमाची, वायसानामियं वायसी इति द्वे काकमाच्याः "काकप्रिया" इति ख्यातायाः ॥ १५१ ॥

स. स. स. स. स.
[illegible] **शतपुष्पा सितच्छत्राऽतिच्छत्रा मधुरा मिसिः।**
[illegible] स. स. स. स.
[illegible] **अवाक्पुष्पी कारवी (च) सरणा (तु) प्रसारिणी ॥१५२॥**
स. स. स.
[illegible] **(तस्यां) कटंभरा राजबला भद्रबले (ति च)।**

शतेति—शतं पुष्पाणयस्याः शतपुष्पा, सितं बद्धं शुभ्रं वा छत्रमस्याः सितच्छत्रा, त्रमतिक्रान्ता अतिच्छत्रा, मधुरस्त्यस्या मधुरा, मस्यतीति मिसिः, अवाञ्चि पुष्पा- ग्स्या अवाक्पुष्पी, के आरौतीति कारवी इति सप्त " सौंफ " इति ख्यातायाः । रतीति सरणा, सरणीत्यपि, प्रसार्यतेऽङ्गमनयेति प्रसारिणी, सर्तुं शीलमस्या वेति गारिणी सारणीत्यपि " रुग्भेदे ना प्रसारण्यां स्वल्पनद्यां च सारिणी " (इति देनी) " तस्यां " कटं बिभर्तीति कटम्भरा, बलानां बलप्रदानां राजा राजबला, ई बलमस्या भद्रबला इति पञ्च " कुब्जप्रसारिणी " इति ख्यातायाः ॥ १५२ । ६ ॥

स. स. स. स. स.
चकवत ना- **जनी जतूका रजनी जातुकृच्चक्रवर्तिनी ॥ १५३ ॥**
मक औषध स. स. स. स.
कचूर या **संस्पर्शा (थ) शटी गन्धमूली षड्ग्रन्थिकेत्यपि ।**
आँबा हल्दी पु. पु. पु. पु.
करेला **कर्चूरो (पि) पलाशो (थ) कारवेल्लः कटिल्लकः ॥१५४॥**
स. न. पु. पु. पु.
परवर **सुषवी (चाथ) कुलकं पटोलस्तिक्तकः पटुः ।**

जनीति—जायते आरोग्यमनयेति जनी, जायते जतूका, जतुकापि, रजति, रज्यते- नयेति वा रजनी, जातु करोतीति जातुकृत्, चक्रमिव वर्तितुं शीलमस्याश्चक्रवर्तिनी, म्यक् स्पृशति, स्पृश्यते वा संस्पर्शा इति षट् " चकवत " इति ख्यातस्य । अथेति— टतीति शटी, शठतीति शठीत्यपि, गन्धं मूलमस्या गन्धमूली, षट् बहवो ग्रन्थयोऽस्याः ग्रन्थिका, कर्चतीति कर्चूरः, कर्बूरोपि, पले मांसे आशा यस्येति पलाशः इति पञ्च गधुकर्चूरस्य " आँबाहल्दी " इति वा ख्यातायाः । अथेति—कारं वेल्लतीति कार- वेल्लः, कटतीति कटिल्लः स एव कटिल्लकः, कठिल्लकोपि, सु सुवतीति सुषवी इति त्रीणि " करेला " इति ख्यातस्य । अथाते—कोलतीति कुलकम्, पटतीति पटोलः, तेजयति स्म तिक्तः स एव तिक्तकः, पाटयतीति पटुः "पटुर्दक्षे च नीरोगे चतुरेऽप्यभि- धेयवत् । पटोले तु पुमान् क्लीबे छत्रालवणयोरपि " (इति मेदिनी) इति चत्वारि " परवर " इति ख्यातस्य ॥ १५३ । १५४ । ३ ॥

पु. पु. पु.स. स.
कुम्हड़ा ककड़ी **कूष्माण्डक (स्तु) कर्कारुरीर्वारुः कर्कटी (स्त्रियौ) १५५॥**
कड़ुईलौकी स. स. स. स.
लौकी जेठऊ **इक्ष्वाकुः कटुतुम्बी (स्यात्) तुम्ब्यलाबू (रुभे समे) ।**

---

१ " रजेः क्युन् " (उ. २ । ७६) इति क्युनि कित्वान्नलोपः गौरादित्वान्ङीप्—इति बोध्यम् ॥

२ कारोवधे निश्चये च बलौयने यतावपि । तुषारशैलेपि पुमान् स्त्रिया दूत्या प्रसेवके । सुवर्णकारि- कायां च बन्धनागारबन्धयोः (इति मेदिनी) ॥

ककड़ी स. स. स. स. स.

इन्द्रायनि **चित्रा गवाक्षी गोडुम्बा विशाला (त्वि) न्द्रवारुणी१५६**

कूषिति—कु ईषत् ऊष्मा अण्डेषु बीजेषु यस्येति कूष्माण्डस्स एव कूष्माण्डकः, शुक्लवर्णमृच्छतीति कर्कारुरिति द्वे कूष्माण्डस्य । ईरणमीरस्तं वृणोतीति,वारयति 'ईर्वारुः' "तुर्यस्वरादिरीर्वारुः कर्कट्या पठ्यते बुधैः" 'ह्रस्वादिरपि' "उन्मत्तोध्रुस्तुरि कर्कटिः स्यादिति" (रत्नकोषः) एर्वारुरिति पाठे आङ्भ्रोध्यः "उर्वारुकमिव बन्धनात् श्रुतेः पृषोदरादित्वेनादेरुत्वे " उर्वारुः " इति च, कृणातीति कस्तं कटति, ककमर्दते वा कर्कटी उभे स्त्रियौ स्यातामिति द्वे " काकडी " इति ख्यातायाः । इक्षुमाकरोति क्रियायां जातमिक्षु इति शब्दमकतीति वा इक्ष्वाकुः, कटतीति कटुः, तुम्बति रुचिमिति तुम्बी, कटु चासौ तुम्बी चेति कटुतुम्बी, इति द्वे कटुतुम्ब्याः । तुम्बति रुचिमितितुम्बिः, तुम्बिः, न लम्बते इत्यलाबुः "अलाबुस्तु पिण्डफला तुम्बिस्तुम्बी महाफला ।तुम्बा वर्तुलालाबुनिम्बचूर्णा तु लाबुका " (-इति वाचस्पतिः) उभे समे समानार्थे समलिङ्गे च स्यातामिति द्वे " तुम्बा " इति ख्यातायाः । चीयत इति चित्रा, गां भूमक्ष्णोतीति गवाक्षी, गां भुवं तुम्बतीति पृषोदरादित्वाद्गोडुम्बा इति त्रीणि कर्कटीविशेषस्य । विशलति, विशल्यत्रेति वा विशाला, इन्द्रं वारयतीति इन्द्रवारुणी इति द्वे " इन्द्रारुणी " इत्याख्यातायाः ॥ १५५ । १५६ ॥

पु. पु. पु. पु स.

जिमींकन्द या **अर्शोघ्नः सूरणः कन्दो गण्डीर (स्तु) समष्ठिला ।**

स. स. पु.न. स.

सूरन गाडरि **कलम्ब्युपोदिका (स्त्री तु) मूलकं हिलमोचिका १५७॥**

अरिति—अर्शांसि गुदव्याधीन् हन्तीति अर्शोघ्नः, शूर्यते, सूर्यते वा शूरणः, सूरणो दन्त्यादिरपि, कन्दति, कन्दयति, कन्द्यते वा कन्द. इति त्रीणि सूरणस्य । गण्डति, गण्ड्यते वा गण्डीरः, समे तिष्ठति, सम्यगष्ठिलाबीजं यस्या वेति समष्ठिला इति द्वे गण्डीरस्य " गाण्डरदूबी " इति ख्यातानूपजशाकभेदस्य । कडति, कं जले लम्बते वा कलम्बीत्येकं " करमुवा " इति ख्यातस्य । उपाधिकमुदकमस्यामिति उपोदिका स्यामिमते तु अपगतोदका जाङ्गलत्वान् अपोदिका इत्येकं "पोई" इति ख्यातस्य । मूलति, मूलयति वा मूलं तदेव मूलकम् इत्येकं "मूली" इति ख्यातस्य । हिलतीति हिला, मोचयतीति मोचिका हिला चासौ मोचिका चेति हिलमोचिका इत्येकं "हिलमाज" इति ख्यातस्य ॥ १५७ ॥

बथुआ [illegible] स. स.

[illegible] **वास्तूकं (शाकभेदाःस्यु) दूर्वा (तु) शतपर्विका ।**

१ [illegible] उपोदिका । [illegible] हिलमोचा [illegible]

[illegible]

पाच शाकों के भेद — स. स. स. स.
सहस्रवीर्या भार्गव्यौ रुहानन्ता (थसा सिता)॥१५८॥
दूब — स. स. स. स.
उजली दूब **गोलोमी शतवीर्या (च) गण्डाली शकुलाक्षकः ।**

वेति—वसति देहे, वसन्त्यस्मिन्गुणा वेति वास्तूकम्, वास्तौ भवं वास्तुकं ह्रस्वमध्यमपि, इत्येकं "बथुवा" इति ख्यातस्य। कलम्ब्याद्याः पञ्च शाकभेदाः स्युः, दूर्वति, दूर्व्यते वा दूर्वा दूर्विकापि, शतं पर्वाण्यस्याः, शतं पर्वतीति वा शतपर्विका, सहस्रं वीर्याण्यस्याः सहस्रवीर्या, भृगोरियं भार्गवी, छिन्नापि रोहतीति रुहा, न अन्तो यस्या अनन्ता इति षट् दूर्वायाः । अथेति—सा दूर्वा सिता शुक्ला चेत्तदा गोलोमसु जाता गोलोमी, शतं वीर्याण्यस्याः शतवीर्या, गण्डति, गण्डमलति वा गण्डाली, शकुलस्य मत्स्यस्येवाक्षि यस्येति शकुलाक्षः स एव शकुलाक्षकः इति चत्वारि शुक्लदूर्वायाः ॥ १५८ । $\frac{१}{२}$ ॥

मोथा नागर- — पु. पु. स पु न.
मोथा या **कुरुविन्दो मेघनामा मुस्तामस्तक(मस्त्रियाम्)॥१५९॥**
पु. स. स. स. स.
निर्विषी घास **(स्याद्भद्र) द्रमुस्तको गुन्द्रा चूडाला चक्रलोच्चटा ।**

कुर्विति—कुरून् विन्दतीति कुरुविन्दः, मेघनामानि नामान्यस्येति मेघनामा, मुस्तयतीति मुस्ता, मुस्तयतीति मुस्तकम् अस्त्रियां पुंनपुंसकयोः स्यादिति चत्वारि "मोथा" इति ख्यातायाः । भन्दते, भद्रं करोति भद्रयतीति वा भद्रः, मुस्तयतीति मुस्तकः, भद्रश्चासौ मुस्तकश्चेति भद्रमुस्तकः, भद्रमपि नाम "भद्रं स्यान्मङ्गले हेम्नि मुस्तके करणान्तरे" (इति रुद्रः) गा जलं द्रातीति गुन्द्रा इति द्वे "नागरमोथा" इति ख्यातस्य । चूडास्त्यस्याः चूडाला, चक्रं लातीति चक्रला, उच्चटतीति उच्चटा इति त्रीणि मुस्ताविशेषस्य ॥ १५९ । $\frac{१}{२}$ ॥

पु. पु. पु. पु. पु.
बांस **वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः ॥ १६० ॥**
पु. पु. पु. पु. पु.
शतपर्वा यवफलो वेणुमस्करतेजनाः ।

वमिति—वमति, वनति, वन्यते, उश्यते, वष्टीति वा वंशस्तस्मिन्, त्वक् सारोऽस्येति त्वक्सारः, कर्म क्रियामृच्छतीति कर्मारः, त्वचि सारोऽस्येति त्वचिसारः, तृणेषु ध्वज इव तृणध्वजः, शतं पर्वाण्यस्येति शतपर्वा, यव इव फलान्यस्येति यवफलः, वेणतीति वेणुः, मङ्कते, मस्कते वानेन मस्करः, तेजयति शास्त्रमग्निं वेति तेजनः इति दश वंशस्य ॥ १६० । $\frac{१}{२}$ ॥

हवासे बजने पु.
वाले बांस गांठि **वेणवः कीचका (स्ते स्युर्ये स्वनन्त्यनिलोद्धताः)॥१६**
या पोर रामसर, पु. न. न. पु. पु. पु.
सरकण्डा या सरई **ग्रन्थि (र्ना) पर्वपरुषी गुन्द्रस्तेजनकः शरः ॥**

वेणेति—ये वेणवोऽनिलेनोद्धतास्ताडिताश्चालिता वा सन्तः स्वनन्ति शब्दायन्ते चीकन्ति, चीकयन्ते, की इत्यव्यक्तं चकन्ते, कीचइत्यव्यक्तं कायन्तीति वा "कीचकाः स्युरित्येकं वाताहतसस्वनवंशस्य । ग्रन्थत इति ग्रन्थिः ना पुमान् स्यात् "ग्रन्थिः ग्रन्थिपर्णे ना-बन्धे रुग्भेदपर्वणोरिति" (मेदिनी) पर्वतीति पर्व, "पर्व क्लीबं मह प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि " (इति मेदिनी) पिपर्तीति परुः "मज्जासारो ग्रन्थिः परुः" परागः कुसुमरेणुरिति (पुंस्काण्डे) रा पाद्धुदन्तोपि इति त्रीणि ग्रन्थेः । गोदत इति गुन्द्रः, तेजयतीति तेजनः स एव तेजनकः, शृणातीति शरः, सरतीति सरो दन्त्यादिरपि "सरस्तु मुञ्जो बाणाख्यो गुन्द्रस्तेजनकः शर " (इति वाचस्पतिः) इति त्रीणि "सरहरी" इति ख्यातस्य ॥१६१

पु. पु. पु. पु.न.
नरकुल या नरई **नडस्तु धमनः पोटगलो (ऽथो) काशमस्त्रियाम्॥१६२॥**
काश या कास
बगई या वेद स. पु. पु.
इंख या ऊख **इक्षुगन्धा पोटगलः (पुंभूमनि तु) वल्वजाः ।**
पौंड़ा पु. पु.
काला पौंड़ा **रसाल इक्षु (स्तद्भेदाः) पुण्ड्रकान्तारकादयः ॥१६३॥**

नड इति—नडतीति नडः, धमति, धम्यते वा धमनः, पोटेन संश्लेषेण गलतीति पोटगलः इति त्रीणि नडस्य " नल " इति ख्यातस्य । अथविति—काशत इति काशम्, अस्त्रियां पुंनपुंसके स्यात्, इक्षुवद्गन्धोऽस्या इक्षुगन्धा, पोटेन गलतीति पोटगलः इति त्रीणि काशस्य । वलन्त इति वलाः, वजन्तीति वजाः, वलाश्च ते वजाश्चेति वल्वजाः पुंभूमनि तु भवन्तीति " एको वल्वजः " इति सूत्रे भाष्यकारवचनादेकत्वेऽपि इत्येकं वल्वजस्य " बगई " इति ख्यातस्य । रसेन अलति, अल्यते वा रसालः, इष्यत इति इक्षुरिति द्वे इक्षोः । पुण्डति, पुण्डयते वा पुण्ड्रः स एव पौण्ड्रोऽपि, कान्तं रसमृच्छतीति कान्तारः स एव कान्तारकः आदिना कोपकाराद्या गृह्यन्त इति भेदा भवन्तीति ॥ १६२ । १६३ ॥

---

१ [illegible] ॥

२ " [illegible] । [illegible] । [illegible] (भारतकथा) ॥

न. न. पु.न.

गांडर (स्या)द्वीरणं वीरतरं (मूलेऽस्योशीरमस्त्रियाम्)।

न. न. न. न. न.

खस अभयं नलदं सेव्यममृणालं जलाशयम्॥ १६४॥

न. न. न. न. न.

लामज्जकं लघुलयमवदाहेष्टकापथे।

स्यादिति—विं पक्षिणामीरयति, विशिष्टजनमीरयति वा वीरणम्, अतिशयितं वीरं वीरतरमिति द्वे वीरणस्य "गाडर" इति ख्यातस्य। अस्य वीरणस्य मूले उश्यत इति उशीरम् अस्त्रियां पुंनपुंसके स्यात्, न भयमस्मादित्यभयम्, नलं गन्धं ददाति, दयते वा नलदम्, सेवितुमर्हं सेव्यम्, मृणालमिव अमृणालम्, मृणालमपि, "मृणालं नलदे क्लीवं पुंनपुंसकयोर्बिसे" (इति मेदिनी) जले आशेते, जलो जड आशयो यस्येति वा जलाशयम्, लाति दोषानिति ला, मज्जतीति मज्जा ला मज्जासारोऽस्येति लामज्जकम्, लङ्घते रोगानिति लघु, लीयत इति लयम्, लघु च लयं चेति लघुलयं समस्तं नाम, व्यस्तमपि "लामज्जकं सुवासं स्यादमृणालं लयं लघु" (इति सुश्रुतः) अवलीयते दाहोऽस्मादिति अवदाहम्, अवदीयतेऽनेनेत्यवदानमपि "अवदानमिन्द्रगुप्तमवदाहेष्टकापथे" (इति वाचस्पतिः) "अवदाहेष्टम्, कापथम्" इति नामद्वयं केचिदाहुः इष्टं कापथमस्येति, इष्टकेव दृढः पन्था यस्य, इष्टकायामपि पन्था यस्येति वा कापथमिति दश वीरणमूलस्य "खस" इति ख्यातस्य॥ १६४। १/२॥

न. स. स.

तृणजातियां 'नलादय' स्तृणं गर्मुच्छ्यामाकप्रमुखा(अपि)॥१६५॥

न. पु. पु. न. न.

कुश या डाभ(अस्त्री) कुशं कुथो दर्भः पवित्र (मथ) कत्तृणम्।

सुगन्धतृण न. न. न. न. न.

या रोहिष पौरसौगन्धिकध्यामदेवजग्धकरौहिषम्॥ १६६॥

नलेति—नल आदिर्येषान्ते नलादयः तृणयत इति तृणम्, तृणजातयः स्युः गिरति, गीर्यते वा गर्मुत्, श्यायते, श्यामं वर्णमकतीति वा श्यामाकः "श्यामाकः श्यामकोऽपि चेति"(हलायुधः) उभौ गर्मुच्छ्यामाकौ प्रमुखौ आद्यौ येषान्तेऽपि तृणजातयः स्युः, प्रमुखशब्दान्नीवाराद्या., मुकुटस्तु अनन्तरा. कुशादयो व्यवहिताश्च कङ्गुकोद्रवादयो गृहीताः—इत्याह कोद्रवादीनामेवं सति हविष्यत्वापातादित्येकं नडादिगर्मुच्छ्यामादिकानाम्। कौ शेते, कुश्यतीति वा कुशमस्त्रियां पुंनपुंसकयोः स्यात्, कुथ्यतीति कुथः, दृभ्यत इति दर्भं, पूयतेऽनेनेति पवित्रमिति चत्वारि कुशस्य। अथेति—कुत्सितं तृणं कत्तृणम्, पुरे भवं पौरम्, शोभनो गन्धः सुगन्धः प्रयोजनमस्येति सौगन्धि

कम्, ध्यायन्ते पशुभिरिति ध्यामम्, देवैरद्यते स्म देवजग्धं तदेव देवजग्धकम्, रोहतीति रौहिषमिति षट् रोहिषाख्यतृणविशेषस्य ॥ १६५ । १६६ ॥

स. पु. पु. न. न.
पानी के तृण या खर — छत्रातिच्छत्रपालघ्नौ मालातृणकभूस्तृणे ।
न. न. पु. न. न. न.
नये तृण या खर घास तृणमात्र — शष्पं बालतृणं घासो यवासं तृणमर्जुनम् ॥ १६७ ॥

छत्रेति—छदति, छादयति वा छत्रम्, छत्रमतिक्रान्तोऽतिच्छत्रः, पालं क्षेत्रं हन्तीति पालघ्नः इति त्रीणि जलजतृणविशेषस्य । मालाकाराणि तृणान्यस्येति मालातृणकम्, भुवस्तृणं भूस्तृणमिति द्वे तृणविशेषस्य । शस्यते, शुष्यति वा शष्पम्, बालं च तत्तृणं चेति बालतृणमिति द्वे नवतृणस्य । अद्यते, घस्यते वा घासः, यौति यूयते वा यवासम्, इति द्वे गवाद्यदनीयतृणविशेषस्य । तृणयते इति तृणम्, अर्ज्यत इति अर्जुनमिति द्वे तृणमात्रस्य ॥ १६७ ॥

स. स.
खरही या घूर नरई का ढेर — (तृणानां संहति)स्तृण्या नड्या(तु नडसंहतिः) ।
पु. पु. पु. स.
ताड़ वृक्ष नारियल — तृणराजाह्वयस्तालो नालिकेर(स्तु)लाङ्गली ॥ १६८ ॥

तृणेति—तृणानां संहतिः समूहः तृण्या स्यादित्येकं तृणसमुदायस्य । नडानां संहतिः नड्या स्यादित्येकं नडसमुदायस्य । तृणानां राजा, तृणराज इत्याह्वयो यस्येति तृणराजाह्वयः, तालयतीति तालः इति द्वे तृणराजस्य । नलति, नल्यते वा नालिः, केन वायुना ईर्यते इति केरः, नालिश्चासौ केरश्च नालिकेरः, नारिकेलोऽपि लङ्गतीति लाङ्गली इति द्वे नारिकेलस्य ॥ १६८ ॥

स. पु. पु. पु. पु.
सुपारी सुपारी — घोरटा तु पूगः क्रमुको गुवाकः खपुरो (ऽस्य तु) ।
न. पु.
[illegible] फल [illegible] — (फल)मुद्वेगमेते च हिन्तालसहितास्त्रयः) ॥
पु. पु.स. न. स. पु.
केतकी खजूर ताल भेद [illegible] — खर्जुरः केतकी ताली खर्जूरी (च)तृणद्रुमाः ॥१६९ ।

इति वनौषधिवर्गः ॥

घोरटेति—घोणते इति घोरटा, पवते, पुनाति वा पूगः, क्रामतीति क्रमुः स एव क्रमुकः, गुवन्त्यनेन गुवाकः, गूवाकोऽपि, "गुवाकोऽपि च गूवाकः" (इति वाचस्पतिः), खमाकाशं पुरमिवास्य वा पिपर्तीति खपुरः इति पञ्च पूगस्य "सुपारी" इति ख्यातस्य । अस्य पूगस्य फलं तु उद्वेगः उद्वेगोऽस्मादिति, उद्विजन्तेऽनेनेति वा "उद्वेग" इत्येकं

क्रमुकफलस्य। एते नालिकेराद्यास्त्रयो हिन्तालेन चतुर्थेन सहिताः, खर्जूराद्याश्च-त्वारोऽष्टौ तृणद्रुमाः तृणजातीया द्रुमा भवन्तीति, हीनोऽल्पस्तालः हिन्तालः इत्येकमल्पतालस्य। खर्जतीति खर्जूरः इत्येकं खर्जूरस्य। केतयतीति केतकी इत्येकं केतक्याः। तालयतीति ताली, तालिरित्येकं तालभेदस्य। खर्जतीति खर्जूरी इत्येकं "वनखजूरी" इति ख्यातायाः॥ १६६॥

इति वनौषधिवर्गविवरणम्॥

अथ सिंहवर्गो व्याख्यायते॥

पु. पु. पु. पु. पु. पु.

सिंह बाघ **सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः।**

पु. पु. पु. पु. पु.

चीता **शार्दूलद्वीपिनौ व्याघ्रे तरक्षस्तु मृगादनः॥ १॥**

सिंह इति—सिञ्चति, हिनस्तीति सिंहः, मृगाणामिन्द्रो मृगेन्द्रः, पञ्चत इति, पञ्चं विस्तृतमास्यमस्येति, मुखं, पादाश्च पञ्च आस्यानीव यस्येति वा पञ्चास्यः, हरिणी पिङ्गले अक्षिणी यस्येति हर्यक्षः, केसराः स्कन्धबालाः सन्त्यस्येति केसरी, के वारि शृणाति, शीर्यते वा केशरः सोऽस्त्यस्येति विग्रहे तु केशरी तालव्यमध्यमपि, हरतीति हरिः "हरिश्चन्द्रार्कवाताश्वशुकभेकयमाहिषु। कपौ सिंहे हरेऽजेऽशौ शक्रे लोकान्तरे पुमान्। वाच्यवत्पिङ्गहरितोरिति" (इति मेदिनी) इति षट् सिंहस्य। शारयतीति शार्, दूयते परितापयतीति दूलः, शार् चासौ दूलश्चेति, शृणातीति वा शार्दूलः, द्वौ वर्णौ ईयते, द्वीपाकाररेखावत्त्वाद् द्वीपं चर्मास्त्यस्येति वा द्वीपी, व्याजिघ्रतीति व्याघ्रः "व्याघ्रः स्यात्पुंसि शार्दूले रक्तैरण्डकरञ्जयोः। श्रेष्ठेनराद्युत्तरस्थः कण्टकार्यां तु योषितीति" (मेदिनी) इति त्रीणि व्याघ्रस्य "बाघ" इति ख्यातस्य। तरं गतिं मार्गं वा क्षिणोतीति तरक्षुः, मृगमत्तीति मृगादनः इति द्वे "तेंदुवाबाघ" इति ख्यातस्य, मुकुटमते तु "हुण्डार" इति ख्यातस्य॥ १॥

पु. पु. पु. पु पु. पु. पु.

सूअर **वराहः शूकरो घृष्टिः कोलःपोत्री किरःकिटिः।**

पु. पु. पु. पु. पु.

दंष्ट्री घोणीस्तब्धरोमा क्रोडो भूदार (इत्यपि)॥ २॥

वरेति—वरं श्रेष्ठमाहन्तीति वराहः, सवनं सूस्तां करोतीति सूकरः "तालव्या अपि दन्त्याश्च शम्बसूकरपांशवः." (इति शभेद.) शूकोऽस्त्यस्य, शूकं राति, शूइति ध्वनिं करोतीति वा शूकरः, घर्षतीति घृष्टिः, गृह्णातीति विग्रहे तु गृष्टिरपि, कोलति संन्त्वात् कोलः, पोत्रं मुखाग्रमस्त्यस्येति पोत्री, किरतीति किरः, किरिरपि, केटतीति किटिः,

दंष्ट्रास्त्यस्येति दंष्ट्री, घोणा नासास्त्यस्येति घोणी, स्तब्धानि रोमाणि यस्येति स्तब्ध-रोमा, क्रुडनं क्रोडः सोऽस्त्यस्येति क्रोडः, भुवं दारयतीति भूदार इति द्वादश शूकरस्य॥२॥

पु. पु. पु. पु. पु.

वानर या बन्दर कपिप्लवंगप्लवगशाखामृगबलीमुखाः ।

पु. पु. पु. पु. पु.

भालू मर्कटो वानरःकीशो वनौका(अथ)भल्लुके ॥ ३ ॥

पु. पु. पु. पु. पु. पु.

गैंड़ा ऋक्षाच्छभल्लभालूका गण्डके खड्गखड्गिनौ ।

कपीति—कम्पते इति कपिः, प्लवनं प्लवस्तेन गच्छतीति प्लवंगः, प्लवंगमश्च, प्लवेन गच्छतीति प्लवगः, शाखाचारी मृगः पशुः शाखामृगः, वलीयुक्तं मुखमस्येति, वली मुखेऽस्येति वा वलीमुखः, मर्कतीति मर्कटः, वने भवं फलादि वानं तद्राति, वानं वा गमनं तस्मिन्नपि नृणाति वालकम्, वा किंचिन्नरो वेति वानरः, की इति शब्दमीष्टे कस्य वायोरपत्यं किर्हनुमान् ईशो यस्येति वा कीशः, वनमोकोऽस्येति वनौकाः इति नव वानरस्य । अथेति—भल्लत इति भल्लुः स एव भल्लुकस्तस्मिन्, भल्लूको दीर्घमध्योपि, स एव भाल्लुकः, भाल्लूकश्च, ऋक्षणोतीति ऋक्षः, 'अच्छ' आभिमुख्येन भल्लते इति अच्छभल्लः, भालयते इति भालूकः इति चत्वारि भल्लुकस्य "भालू" इति ख्यातस्य । गच्छतीति गण्डः स एव गण्डति संहतो भवतीति वा गण्डकस्तस्मिन्, खडतीति खड्गः, खड्गः शृङ्गमस्त्यस्येति खड्गी इति त्रीणि "गैंड़ा" इति ख्यातस्य॥३॥[illegible]॥

पु. पु. पु. पु. पु.

भैंसा लुलापो महिषोवाहद्विषत्कासरसैरिभाः ॥ ४ ॥

स. पु. पु. पु.

सियार (स्त्रियां) शिवा भूरिमायगोमायुमृगधूर्तकाः ।

पु. पु. पु. पु. पु. पु.

सृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥ ५ ॥

लुलेति—लुडति पङ्के डलयोरैक्यत्वात् लुलः, आप्नोतीति आपः, लुलश्चासावापश्च, लुल्यन्ते, लुलाविलोडिना आपो येनेति वा लुलापः, लुलतीति लुलः, अयते इति अयः लुलश्चासावयश्चेति विग्रहे तु लुलायोपि, महति, मह्यते, मंहते वा महिषः, वाहानां पार्श्वे वा द्विषन्निति वाहद्विषन्, के जले आसरति, ईषत्सरतीति वा कासरः,

[illegible] "[illegible] ऋक्षाच्छभल्लभालूकनिर्मले[illegible]मव्ययम् । आभिमुख्ये" ([illegible]) [illegible] ॥ २ [illegible] चित्रकायां [illegible] इति ॥

[illegible] । [illegible] न [illegible] [illegible] ।

सीरोऽस्त्येषां सीरिणः कर्षका तेषामिभ इव, सीरस्य सूर्यस्य इभ इवेति वा सीरिभः स एव सैरिभ इति पञ्च महिषस्य। शिवो देवतास्त्यस्याः शिवा स्त्रियां स्यात्, भूरयो माया यस्येति भूरिमायः, गां विकृतां वाचं मिनोतीति गोमायुः, मृगेषु धूर्त इव मृगधूर्तकः, सृजति मायाम्, असृग्आलाति वा सृगालः, शृङ्गं न लातीति विग्रहे तु शृगालस्ताल-व्यादिरपि, वञ्चयते इति वञ्चकः, क्रोशतीति क्रोष्टा, "फे" इत्यव्यक्तं रौतीति फेरुः, "फे" इत्यव्यक्तो रवोऽस्येति फेरवः, जमतीति जम्बुकः, उलूकादित्वाद् जम्बूकोपि इति दश जम्बूकस्य "सियार" इति ख्यातस्य ॥ ४ । ५ ॥

पु. पु. पु. पु. पु.

बिलार गोह **ओतुर्विडालो मार्जारो वृषदंशक आखुभुक्।**

पु. पु. पु.

बिषखोपड़ा **(त्रयो) गौधारगौधेरगौधेया (गोधिकात्मजे) ॥ ६ ॥**

ओतुरिति—अवति विष्ठाम्, आखुभ्यो गृहं वेति ओतुः, वेडति, विड्यते वा विडालः, मार्ष्टि मुखमिति मार्जारः, वृषान् मूषकान् दशतीति वृषदंशः स एव वृषदंशकः, आखून् भुङ्क्ते, आखुभ्यो भुनक्ति वा आखुभुक् इति पञ्च मार्जारस्य। गोधाया अपत्यम् गौधारः, गौधेरः, गौधेयः एते त्रयो गोधिकात्मजे भवन्तीति त्रीणि सर्पाद्गोधायां जातस्य "चन्दनगोहा" इति ख्यातस्य ॥ ६ ॥

साही साही पु. पु. स. न. न.

के लोम **श्वावित्तु शल्य (स्तल्लोम्नि) शलली शललं शलम्।**

वातचारी मृग पु. पु. पु. पु. पु.

भेड़िया या बीग **वातप्रमीर्वातमृगः कोक ईहामृगो वृकः ॥ ७ ॥**

श्वेति—श्वानं विध्यतीति श्वावित्, शलतीति शल्यः इति द्वे शल्यस्य "सेही" इति ख्यातस्य। तस्य श्वाविधो लोमनि शलतीति शलली, स्त्रीत्वाविवक्षायां शललम्, पचाद्यचि, शलमिति त्रीणि शल्लकीलोम्नः। वातं प्रमिमीते—वाताभिमुखधावनात् वातप्रमी. "वातप्रमीर्वातमृगः" (इति पुंस्काण्डेऽमरमाला) "योषिति वातप्रमीः समीरमृगः" इति वोपालितात्स्त्रीत्वमप्यस्य, वात इव वातस्य वा मृगो वातमृगः इति द्वे मृगभेदस्य। कोकत इति कोकः, ईहा मृगेष्वस्य, ईहां मृगयते, ईहाप्रधानो मृगो वा ईहामृगः, वर्कते, वृणोति वा वृकः इति त्रीणि वृकस्य "विग" इति ख्यातस्य ॥ ७ ॥

हरिण हरिणी पु. पु. पु. पु. पु.

के नाम आदि **मृगे कुरङ्गवातायुहरिणाजिनयोनयः।**

हरिण के नाम पु.स.न. पु. स.न.

आदि **ऐणेयमेण्याश्चर्माद्यमेणस्यैण (मुभे त्रिषु) ॥ ८ ॥**

मृग इति—मृग्यते व्याधैरिति मृगः, कौ रङ्गति, कौ रङ्गोस्त्यस्येति वा कुरङ्गः, वातमयत इति वातायुः, वातमयते इति वानायुरपि, हरति मनः, ह्रियते गीतेन वा हरिणः, अजिनस्य

पु. पु. पु. पु. पु.

उल्लू, भर्दूल, पत्त्री श्येन उलूके तु वायसारातिपेचकौ ।

पु. पु. पु. पु.

खँड़रैचा व्याघ्राटः (स्याद्भ)रद्वाजः खञ्जरीट (स्तु)खञ्जनः॥१५॥

वृश्चिक इति—वृश्चतीति वृश्चिकः, शूकयुक्तः कीटः शूककीटः स्यादिति द्वे उर्णा-दिभक्षककृमिविशेषस्य । अलति दंशे समर्थो भवति अलिः बाहुलकादिण्प्रत्यये दीर्घादिरपि " वृश्चिको द्रुण आलिः स्यादिति "(वोपालितः) द्रुणातीति द्रुणः, स्वामिमते द्रोणोऽपि, उभौ वृश्चतीति वृश्चिकस्तस्मिन्स्यातामिति त्रीणि वृश्चिकस्य "वीछी" इति ख्यातस्य । परं जीवं, पराच्छत्रोरहंकाराद्वा ज्ञानोपदेशेन अवतीति, परावतो दत्तात्रेयस्यायं गुरुरिति वा पारावतः, पारादप्यापतति प्रेम्णेति विग्रहे तु पारापतः "पारावतश्च छेद्यश्च कपोतो रक्तलोचनः । पारायतः कलरव."(इति रभसः)कलो रवोऽस्येति कलरवः, को वायुः पोतो नौरिवास्य, कस्य वायोः पोत इवेति वा कपोतः इति त्रीणि कपोतस्य "परेवा" इति ख्यातस्य । अथेति—शशमत्तीति शशादनः, अतिशयितं प्रशस्तं वा पत्रमस्येति वा पत्री, श्यायत इति श्येनः इति त्रीणि श्येनस्य "बाज" इति ख्यातस्य । उच्यतीति उलूकस्तस्मिन् , वायसस्य काकस्यारातिः वायसारातिः, पचति संतापं पच्यते दुःखेनेति वा पेचकः उभौ स्यातामिति त्रीणि घूकस्य उल्लूइति ख्यातस्य । व्याघ्रमटति, व्याघ्र इवाटतीति वा व्याघ्राटः, भरद्वाजस्यापत्यं,भरन्धारको वाजोऽस्येति वा भरद्वाजः स्यादिति द्वे भर्दूलस्य । खञ्ज इव ऋच्छतीति खञ्जरीटः, खञ्जतीति खञ्जन इति द्वे खञ्जनस्य ॥ १४ । १५ ॥

पु. पु. पु. पु.

उजली चील्ह नीलकण्ठ लोहपृष्ठ(स्तु)कङ्कः(स्यादथ)चाषः किकीदिविः ।

पु. पु. पु. पु.

भुजँगा कलिङ्गभृङ्गधूम्याटा(अथ)स्याच्छतपत्रकः ॥ १६ ॥

पु. पु. पु. पु.

कठफोरवा पपीहा दार्वाघाटो(थ)शारङ्गः स्तोककश्चातकः(समाः) ।

पु. पु. पु. पु.

मुर्गा कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १७ ॥

लोहेति—लोहमिव पृष्ठमस्येति लोहपृष्ठः, कङ्कते इति कङ्कः स्यादिति द्वे कंकस्य [illegible] अथेति—चाषयतीति चाषः, " इक्षुपक्षिभिदोश्चासः " इति दन्त्यान्तेषु रभसप्रामाण्यात् चासोऽपि, 'किकी' इति दीव्यति वाशत इति किकीदिविः " चाषो दिविः किकि [illegible]" (इति व्याडिः) इति द्वे चाषस्य " नीलकण्ठ " इति ख्यातस्य । [illegible]

[illegible]

च्छति, के मूर्ध्नि लिङ्गं चूडास्येति वा कलिङ्गः, बिभर्ति कुलमिति भृङ्गः "भृङ्गो धूम्याटपिङ्गयोः। मधुव्रते भृङ्गराजे पुंसि भृङ्गं गुडत्वचि" (इति मेदिनी) धूम्या धूमसमूहस्तामाटतीति धूम्याटः इति त्रीणि भुजंगाख्यस्य "भुजैटा" इति ख्यातस्य। अथेति—शतं पत्राण्यस्येति शतपत्रकः, दारु आहन्तीति दार्वाघाटः "काष्ठकूटः शतच्छदः" (इति त्रिकाण्डशेषः) इति द्वे दार्वाघाटस्य "कठफोरवा" इति ख्यातस्य। अथेति—शारयति, शार्यते वा तपादिना शारङ्गः "शारङ्गश्चातके ख्यातः शवले हरिणोपि चेति" (तालव्यादावजयः) सरतीति सारङ्गः "चातके हरिणे पुंसि सारङ्गः शवले त्रिषु" (इति दन्त्यादौ रभसात्) सारमङ्गमस्येति शकन्ध्वादित्वाद्वा सारङ्गः, स्तोकं कायति, स्तोकं कं जलमस्येति वा स्तोकककः, चततीति चातकः एते समाः समानार्थाः समानलिङ्गकाश्चेति त्रीणि चातकस्य "पिपिहा" इति ख्यातस्य। कृकेन गलेन वक्तीति कृकवाकुः, ताम्रा चूडास्येति ताम्रचूडः, कोकनं कुक्, कुटतीति कुटः कुका कुटः, कुत्सितः कुटः कोः पृथिव्याः कुटो वेति कुक्कुटः, चरणा आयुधमस्येति चरणायुधः इति चत्वारि कुक्कुटस्य "मुर्गा" इति ख्यातस्य॥ १६। १७॥

पु. पु. स.
गर्गौवा, गगैया **चटकः कलविङ्कः "स्या" "त्तस्य स्त्री" चटका (तयोः)।**
पु. स.
बचा, बची **(पुमपत्ये) चाटकैरः (स्त्र्यपत्ये) चटकैव (हि)॥ १८॥**

चटेति—चटतीति चटकः, कलं वङ्कते इति कलविङ्कः स्यादिति द्वे चटकस्य। तस्य चटकस्य स्त्री चटका इत्येकं चटकायाः। तयोः चटकायाश्चटकस्य वा पुमपत्ये चाटकैरः इत्येकं चाटकैरस्य। स्त्री च तदपत्यं च स्त्र्यपत्यं तस्मिन् चटका एवेत्येकं चटकायाः॥ १८॥

पु.स. पु. पु. पु.
कोडिला **कर्करेटुः करेटुः (स्यात्) कृकणक्रकरौ (समौ)।**
मुआचिड़ी पु. पु. पु. पु.
कोयल **वनप्रियः परभृतः कोकिलः पिक (इत्यपि)॥ १९॥**

कर्केति—'कर्क' इति रेटतीति कर्करेटुः, के वायौ जले वा रेटतीति करेटुः स्यादिति द्वे देशान्तरीयसारसस्य कौडिलाख्यस्य वा। 'कृ' इति कणति, कृकेण कण्ठेन अणतीति वा कृकणः, 'क्र' इति शब्दकरणशीलः क्रकरः उभौ समौ समानार्थौ समानलिङ्गौ चेति द्वे तित्तिरविशेषस्य "मुआचिड़ी" इति ख्यातस्य वा। वनं प्रियमस्येति वनप्रियः, परेण भृतः परभृतः, कोकत इति कोकिलः, अपि कायतीति पिक इत्यपीति चत्वारि कोकिलस्य॥ १९॥

---

१ वर्टिगाग्रिरियल्लोपः॥

पु. पु. पु. पु. पु.
कौवा **काके (तु) करटारिष्टबलिपुष्टसकृत्प्रजाः ।**
पु. पु. पु. पु. पु.
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा (अपि) ॥ २०॥

काक इति—कायतीति काकस्तस्मिन् , करोति शकुनमिति करटः, न रिष्टमस्मा अरिष्टः, बलिना पुष्टो बलिपुष्टः, सकृत्प्रजा यस्येति सकृत्प्रजः, ध्वाङ्क्षतीति ध्वाङ्क्षः "ध्वाङ्क्षः काके बकेऽर्थिनि । गृहे ध्वाङ्क्षी तु काकोल्यामिति" (हैमः) कां कां इति शब्दनादात्मानं घोषयतीति आत्मघोषः, परं बिभर्तीति परभृत्, बलिं भुङ्क्ते इति बलिभुक्, वयते इति वायस इति दश काकस्य ॥ २० ॥

पु. पु. पु. पु.
वनकौवा **द्रोणकाक'स्तु' काकोलो दात्यूहः कालकण्ठकः ।**
काला कौवा पु. पु. पु. पु. पु. पु.
चील, गीध, सुआ **आतायिचिल्लौ दाक्षाय्यगृध्रौ कीरशुकौ (समौ) ॥ २१ ॥**

द्रोण इति—द्रुणातीति द्रोणः, द्रोणाख्यः काकः द्रोणकाकः, काकयतीति काकोलः "द्रोणकाको दग्धकाको वृद्धकाको वनाश्रयः" (इति त्रिकाण्डशेषः) इति द्वे वन्यकाकस्य "डोंडकाक" इति ख्यातस्य वा । दानं दातिर्मारणं तामूहते, दित्यौहोऽस्येति वा दात्यूहः, काले वर्षाकाले कण्ठोऽस्येति कालकण्ठकः इति द्वे जलकाकस्य श्यामकाकस्य वा । आतायते तच्छीलः आतायी, स्वामिमते तु आतपतीति 'आतापी' चिल्लतीति चिल्लः इति द्वे चिल्लस्य "चील्ह" इति ख्यातस्य । दक्षते दक्षाय्यस्तस्य दाक्षाय्यः, गृध्यतीति गृध्रः "गृध्रः खगान्तरे पुंसि वाच्यलिङ्गस्तु लुब्धके" (इति मेदिनी) इति द्वे गृध्रस्य "गीध" इति ख्यातस्य 'कि' इति ईरयतीति कीरः, शोकति, शोभं जयतीति वा शुकः. उभौ समौ समानार्थौ समानलिङ्गौ चेति द्वे शुकस्य । समाविति चिल्लादित्रयेषु योजनीयम् ॥ २१ ॥

पु पु. पु. पु. पु. पु.
बगुला, **कुङ् क्रौञ्चो (थ) बकः कह्वः पुष्कराह्वस्तु सारसः ।**
बगला, पु. पु. पु. पु.
सारस, **कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ॥ २२ ॥**
चकवा

क्रुङिति—क्रुञ्चतीति क्रुङ् 'पचाद्यचि' क्रुञ्चः, स एव क्रौञ्चः इति द्वे क्रौञ्चस्य "[illegible]" इति ख्यातस्य । बक इति—वङ्क्ते, वाति, वायति, 'व' इति कायति [illegible] [illegible] "[illegible] [illegible] स्यात् [illegible] [illegible] च [illegible]" (मेदिनी) 'क' इति शब्दं

१ [illegible] ॥

जले वा ह्वयतीति कह्वः इति द्वे बकस्य। पुष्करं पद्मं तस्मात्ह्वा आह्वा यस्येति पुष्कराह्वः, सरसि भवः सारस इति द्वे सारसस्य। कोकत इति कोकः, क्रियते निशया वियोगी, चकते वा चक्रः, चक्रेण चक्रशब्देनोच्यते इति चक्रवाकः, रथाङ्गस्य चक्रस्याह्वयो नाम यस्येति रथाङ्गाह्वयनामकः इति चत्वारि चक्रवाकस्य "चकवा" इति ख्यातस्य॥ २२॥

बत्तख, कुररी, हंस

पु. पु. पु. पु.
कादम्बः कलहंसः स्यादुत्क्रोशकुररौ (समौ)।
पु. पु. पु. पु.
हंसा (स्तु) श्वेतगरुतश्चक्राङ्गा मानसौकसः॥ २३॥

कादेति—कदम्बे समूहे भवः कादम्बः, कलो मधुरवाक्हंसः कलहंसः स्यादिति द्वे कलहंसस्य "बत्तक" इति ख्यातस्य। उत्क्रोशतीति उत्क्रोशः, कवते इति कुररः उभौ समौ समानार्थौ समानलिङ्गौ चेति द्वे कुररस्य। हन्ति गच्छतीति हंसः बहुत्वे हंसाः, श्वेता गरुतः पक्षा अस्येति श्वेतगरुत् बहुत्वे श्वेतगरुतः, चक्राण्यङ्गान्यस्येति चक्राङ्गः बहुत्वे चक्राङ्गाः, मानसं सर ओकोऽस्येति मानसौका बहुत्वे मानसौकसः इति चत्वारि हंसस्य॥ २३॥

राजहस, हंसभेद, हंसविशेष

पु.
राजहंसा (स्तु ते चञ्चुचरणैर्लोहितैः सिताः)।
पु. पु.
(मलिनै)र्मल्लिका(ख्यास्ते)धार्तराष्ट्राः(सितेतरैः)॥२४॥

राजेति—लोहितैः रक्तवर्णैः चञ्चुचरणैः चञ्चुभिः सहितैश्चरणैरुपलक्षिता ये सिताः शुक्ला हंसास्ते राजहंसाः कथ्यन्त इत्येकं राजहंसस्य। मलिनैः किञ्चिद्धूम्रवर्णैश्चञ्चुचरणैरुपलक्षिता ये हंसास्ते 'मल्लिक' आख्या येषामिति मल्लिकाख्या उच्यन्त इत्येकं हंसभेदस्य। सितेतरैः कृष्णचञ्चुचरणैरुपलक्षिता ये हंसास्ते धृतराष्ट्रे भवाः धार्तराष्ट्राः प्रोच्यन्त इत्येकं श्यामचञ्चुचरणयुतहंसस्य॥ २४॥

आडी, बगुला भेद, हंसी, सारसी

स. स. स. स. स.
शरारिराटिराडिश्च बलाकाविसकण्ठिका।
स. स.
(हंसस्य योषिद्व)रटा (सारसस्य तु) लक्ष्मणा॥२५॥

शरेति—शरं नीरं हिंसां वा ऋच्छतीति शरारिः, कपिलिकादित्वाल्लत्वे 'शरालिरपि' "शरमततीति शराति, शरमटतीति शराटिः, शरमडतीति शराडिः" इति पाठान्तरम्, आअटतीति आटिः, आअडतीति आडिः "आडिः शरालिर्वरटी गन्धोली वानरी कपी" इति स्त्रीलिङ्गकाण्डे रत्नकोषात्त्रयोऽपि स्त्रीलिङ्गा ज्ञातव्याः। इति त्रीणि शरारेः "आडी" इति ख्यातायाः। बलते, बलेनाकतीति वा बलाका, बिस-

वक्रकण्ठोऽस्या विसकण्ठिका इति द्वे बकभेदस्य । हंसस्य योषित्स्त्री वृणीते सेवते स्व इति वरटा स्यादित्येकं हंसयोषितायाः । सारसस्य योषित् लक्ष्मीरस्त्यस्याः लक्ष्मण इत्येकं सारसयोषितायाः ॥ २५ ॥

स. स. स. स.

चमगीदड़ी, गीदड़ — जतुकाऽजिनपत्त्रा 'स्या'त्परोष्णी तैलपायिका ।

स. स. स. स. स.

मक्खी मधुमक्खी — वर्वणा मक्षिका नीला सरघा मधुमक्षिका ॥ २६ ॥

जत्विति—जत्विव जतुका, दीर्घमध्या जतूकापि, अजिनमिव पत्त्रमस्याः अजिनपत्त्रा स्यादिति द्वे जतूकायाः "चमगीदड़ी" इति ख्यातायाः। परं शत्रु उष्णं यस्याः परोष्णी तैलं पिबतीति तैलपायिका इति द्वे "मुखविष्ठा" वागुलिकादिनामिकायाः "गीदड़" इति ख्यातस्य वा । वर इति वणति, वर्वतीति वा वर्वणा, मशति, मक्षतीति वा मक्षिका नीलतीति नीला इति त्रीणि नीलमक्षिकायाः । सरं गतिमन्तं घातयतीति सरघा, मधुनो मक्षिका, मधुकर्त्री मक्षिका वा मधुमक्षिका इति द्वे मधुमक्षिकायाः ॥ २६ ॥

स. स. पु. स.

पतङ्ग, — पतङ्गिका पुत्तिका 'स्या' द्दंश 'स्तु' वनमक्षिका ।

स. स. पु.स.

वनमक्खी, मसा, बैंर — दंशी(तज्जातिरल्पास्याद्)गन्धोली वरटा(द्वयोः)॥२७॥

पतेति—पततीति पतङ्गिका, पुत् कुत्सितं तायते, पुत् कुत्सितं शब्दं तनोतीति वा पुत्ती सैव पुत्तिका स्यादिति द्वे पतङ्गिकायाः " पांखी " इति ख्यातायाः । दशतीति दंशः, "दंशःकीटविशेषे च वर्मदंशनयोः पुमानिति" (मेदिनी) वनस्य मक्षिका वनमक्षिका इति द्वे वनमक्षिकायाः । अल्पा तज्जातिः दंशजातिः दशतीति दंशी स्यादित्येकं "डांस" इति ख्यातायाः । गन्धयत इति गन्धोली " गन्धोली वरटाशुण्ठ्योर्भद्रायामिति " (हैमः) वृणोतीति वरटा—वरटी अपि " वरटा वरटीहंस्योस्तत्पत्नी वारम्रनः " (इति ताम्पाजः) वरटो द्वयोः स्त्रीपुंसयोः स्यादिति द्वे वरटस्य "वर्र" इति ख्यातस्य ॥ २७ ॥

स. स. स. स.

[illegible] — भृङ्गारी चीरुका चीरी झिल्लिका (च समा इमाः)।

पु. पु. पु. पु.

(समौ) पतङ्गशलभौ खद्योतो ज्योतिरिङ्गणः ॥ २८ ॥

भृङ्गेति—भृङ्गं भृङ्गकायमाचरति, बिभर्त्ति, [illegible] भृङ्गमृच्छतीति वा भृङ्गारी, "ची" [illegible] चीरुका, [illegible] चीरुकापि, चिनोतीति चीरी, चिल्कतीति [illegible] [illegible] झिल्लिका इमाः [illegible] समानार्थाः [illegible]

झिल्लिकायाः "झिंगुरी" इति ख्यातायाः । पततीति पतङ्गः, "पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः । क्लीबं सूते" (इति विश्वमेदिन्योः) शलतीति शलभः उभौ समाविति द्वे पतङ्गस्य "फनिगा" इति ख्यातस्य । खं द्योतते, द्योतयति वा खद्योतः, ज्योतिर्नक्षत्रमिवेङ्गतीति ज्योतिरिङ्गणः इति द्वे खद्योतस्य "जुगुनू" इति ख्यातस्य ॥ २८ ॥

पु. पु. पु. पु. पु.

भौंरा **मधुव्रतो मधुकरो मधुलिण्मधुपालिनः ।**

पु. पु. पु. पु. पु. पु.

द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥ २९ ॥

मध्विति—मधु व्रतं भक्ष्यं यस्येति मधुव्रतः, मधु करोत्येवंशीलो मधुकरः, मधु लेढीति मधुलिट्, मधु पिबतीति मधुपा अलो वृश्चिकलांगूलं तदिवास्येति अली, द्वौ रेफौ नाम्नि यस्येति द्विरेफः, पुष्पाणि लेढीति पुष्पलिट्, बिभर्तीति भृङ्गः षट् पदान्यस्येति षट्पदः, भ्रमतीति भ्रमरः, अलतीति अलिरित्येकादश भ्रमरस्य ॥ २९ ॥

पु. पु. पु. पु. पु.

मोर या **मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।**

पु. पु. पु. पु.

मुरैला **शिखावलः शिखीकेकीमेघनादानुलास्यपि ॥ ३० ॥**

मेति—मयते, मह्यां रौतीति वा मयूरः, बर्हमस्त्यस्येति बर्हिणः, बर्ही, नीलः कण्ठोऽस्येति नीलकण्ठः, भुजङ्गं भुङ्क्ते इति भुजङ्गभुक्, शिखास्त्यस्येति शिखावलः, पक्षे शिखी, केकास्त्यस्येति केकी, मेघनादेनानुलसत्येवंशीलो मेघनादानुलासी इति नव मयूरस्य ॥ ३० ॥

मोर की बोली स. पु. पु.

चन्द्रिका **केका (वाणी मयूरस्य) (समौ) चन्द्रकमेचकौ ।**

चोटी स. स. पु. न. न.

पख **शिखा चूडा शिखण्डश्च पिच्छबर्हे (नपुंसके) ॥ ३१ ॥**

केकेति—मयूरस्य वाणी के मूर्धनि कायते इति केका स्यादित्येकं मयूरवाण्याः । चन्द्र इव चन्द्रकः, मेचको वर्णोऽस्त्यस्येति मेचकः "बर्हिकण्ठसमं वर्णं मेचकं ब्रुवते बुधा" (इति कात्यः) उभौ समौ समानार्थौ समानलिङ्गाविति द्वे पिच्छस्य चन्द्राकृतेः । शेत इति शिखा, चुडयत इति चूडा इति द्वे मयूरशिखायाः । शिखिनाम्यते शिखण्डः "शिखण्डो बर्हचूडयोरिति" (हेमचन्द्रः) पिच्छयति, पिच्छ्यते वा पिच्छम्, बर्हतीति र्हं उभे नपुंसके स्यातामिति त्रीणि मयूरपिच्छस्य ॥ ३१ ॥

पु. पु. पु. पु. पु.

पक्षिमात्र खगे विहंगविहगविहंगमविहायसः ।

पु. पु. पु. पु. पु. पु.

शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ॥ ३२ ॥

पु. पु. पु. पु. पु. पु.

पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ।

पु. पु. पु. पु. पु. पु.

नगौको वाजिविकिरविविष्किरपतत्रयः ॥ ३३ ॥

पु. पु. पु. पु.

नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसंगमाः ।

खग इति—खे गच्छतीति खगः, विहायसि गच्छतीति विहङ्गः, विहगः, विहंगमः विजहाति भुवम्, विहापयतीति वा विहायाः, शक्नोतीति शकुन्तिः, पक्षौ स्तोऽस्येति पक्षी, शक्नोतीति शकुनिः, शकुन्तः, शकुनः, द्विर्जायत इति द्विजः, पतत्त्रमस्त्यस्येति पतत्री, पत्त्रमस्त्यस्येति पत्त्री, पतेन पक्षेण गच्छतीति पतगः, पततीति पतन्, पत्त्रं पतत्-रथ इव यस्येति पत्त्ररथः, अण्डाज्जायते स्मेति अण्डजः, नगो वृक्षः नगे वा ओकः यस्येति नगौकाः, वाजाः पक्षाः सन्त्यस्येति वाजी, विकिरतीति विकिरः, वातीति विः विकिरतीति विष्किरः, पततीति पतत्रिः, नीडे उद्भवो येषामिति नीडोद्भवाः, गरुतः पक्षाः सन्त्येषामिति गरुत्मन्तः, पतितुमिच्छवः पित्सन्तः, नभसं गच्छन्तीति नभसंगमाः इति सप्तविंशतिः पक्षिणाम् ॥ ३२ । ३३ । ३ ॥

पु. पु. पु. पु.

हारिल, जलमुर्गी (तेषां विशेषाः) हारीतो मद्गुः कारण्डवः प्लवः ॥ ३४ ॥

पु. पु. पु. पु. पु.

बतख तीतर,वनमुर्गी, तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ।

लवा, चकोर, पु. पु. पु. स.

बटेर आदि कोयष्टिकष्टिट्टिभको वर्तको वर्तिका (द्वयः) ॥ ३५ ॥

तेषामिति—"तेषां पक्षिणामेते विशेषाः भेदा उच्यन्ते" हरिमित ईतो वा हारी-तस्मिन् हारि मनोहरमितं गमनमस्य, हारयतीति हारः—इति स्मेति ईतः हारश्चासौ ईतश्चेति हारीतः इत्येकं हारीतस्य "हरियाल" इति ख्यातस्य। मज्जतीति न्यङ्क्वादित्वात् मद्गुः "मद्गुः पानीयकाकिका" (इति रभसः) इत्येकं जलकाकस्य "जलमुर्ग" इति ख्यातस्य वा। करणं रवः इन्द्रगणः कारण्डस्तं वातीति कारण्डवः, प्लवते इति प्लवः इति द्वे कारण्डवस्य "बतख" इति ख्यातस्य। तित्तिरिशब्दं गायति ति-त्तिरिः "तित्तिरिः पक्षिभित् कुलान्तिके" (हैमः) इत्येकं तित्तिरस्य 'कुक' इति शब्दं कौति,

कुक्कुशब्दं भाषते वा कुकुभः इत्येकं वनकुक्कुटस्य "वनमुर्ग" इति ख्यातस्य। लावयतीति लावः इत्येकं लवाख्यस्य । जीवं जीवयतीति जीवंजीवः "जीवंजीवः खगान्तरे । द्रुमभेदे चकोरे चेति" (हैमः) तद्दर्शनेन विषनाशित्वादित्येकं मयूरपक्षपक्षिणः । अथवा जीवंजीवः, चकतीति चकोरः स एव चकोरक इति द्वे चकोरस्य । कं जलं यष्टिरिवास्येति कोयष्टिकः 'टिट्टि' शब्दं भाषते, टिट्टिशब्देन भातीति वा टिट्टिभः स एव टिट्टिभकः इति द्वे टिट्टिभकस्य "टिटहरी" इति ख्यातस्य । वर्तते इति वर्तकः, वर्तिका "वर्तकस्तु खुरेऽश्वस्य विहगे वर्तिकाद्वयोरिति" (मेदिनी) इति द्वे वर्त्तिकाया. "वटेर" इति ख्यातस्य आदिना सारिकाकपिंजलादयो ज्ञेयाः ॥ ३४ । ३५ ॥

पु. पु पु.न. न. न. न.

पख, पल की **गरुत्पक्षच्छदाः पत्रं पतत्रं (च) तनूरुहम् ।**

स. न. स. स.

जड चोंच **(स्त्री) पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे (स्त्रियौ)॥३६॥**

गरुदिति—गिरति, गृणातीति वा गरुत्, पक्षयति, पक्ष्यते वा पक्षः "पक्षस्तु मासार्धेगृहसाध्ययोः । चुल्लीरन्ध्रे बले पार्श्वे वर्गे केशात्परश्चये । पिच्छे विरोधे देहाङ्गे सहाये राजकुञ्जर" (इति हैमः) सान्तोपि "पक्षसी च स्मृतौ पक्षाविति शुभाङ्कः,छाद्यतेऽनेनाङ्गमिति छदः "गरुत्पक्षौ नरौ छदमिति वोपालितात्क्लीबमपि, पतत्यनेन पत्त्रम्, पतन्तं त्रायत इति पतत्त्रम्, तन्वां रोहतीति तनूरुहम् इति षट् पक्षस्य । पक्षस्य मूलं पक्षतिः स्त्री स्यात्, पक्षस्य मूलं पक्षमूलमिति द्वे पक्षमूलस्य । चञ्चतीति चञ्चुः, त्रोटयते इति त्रोटिः उभे स्त्रियौ स्यातामिति द्वे चञ्च्वोः " चोंच " इति ख्यातस्य ॥ ३६ ॥

न. न. न.

उड़ना **प्रडीनोड्डीनसंडीनान्येताः (खगगतिक्रियाः) ।**

अण्डा स. पु. न. पु. पु.न.

घोंसला **पेशीकोषो(द्विहीनो)ऽण्डं कुलायो नीड (मस्त्रियाम्)३७॥**

प्रेति—प्रथमं डयनं प्रडीनम्, तिर्य्यग्गमनमित्यन्ये, उदूर्ध्वं डयनं उड्डीनम्, संगतं डयनं संडीनम्—एताः खगानां पक्षिणां गतेः गमनस्य क्रियाः बोद्धव्याः इति पक्षिणां गतिविशेषाणां पृथक् पृथगेकैकम् । पिंशतीति पेशी, कुष्यति निष्क्रामत्यस्मात्स्वयमेव कोषः " कोषोऽस्त्रीति मेदिनीकोषात्तालव्यान्तोप्ययम् " अमत्यस्मादिति अण्डम्, द्विहीने द्वाभ्यां हीने क्लीबे ज्ञेयमिति त्रीणि अण्डस्य " अण्डा " इति ख्यातस्य । कुलं पक्षिसन्तानोऽयतेऽत्र, कौ लायो गतिरस्मादिति वा कुलायः " कुलायस्तु पुमान्स्थानमात्रे स्यात्पक्षिवासके " (इति मेदिनी) नितरामीड्यते, निश्चिता इलन्त्यत्रेति वा नीडम् अस्त्रियां पुंनपुंसकयोः स्यादिति द्वे पक्षिवासस्य ॥ ३७ ॥

पु. पु. पु. पु. पु. पु. पु.

बच्चे **पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।**

नर मादा न. न. न. न. न.

दो **(स्त्रीपुंसौ) मिथुनं द्वन्द्वं युग्मं (तु) युगलं युगम् ॥ ३८॥**

पोत इति—पुनाति, पवते वा पोतः स्त्रियां पोती, पायते, पिबति वा पाकः अजादित्वात्पाका, अर्य्यते वृद्धिं प्राप्यते इति अर्भकः, डिम्भयतीति डिम्भः, "डिम्भोऽपि बालिशे बाले" (इति मेदिनी) पर्थयति, पर्थ्यते, प्रथते वा पृथुकः "पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवदिति" (मेदिनी) शव्यत इति शावः, स एव शावकः, श्यति, शायते वा शिशुरिति सप्त शावकस्य । स्त्री च पुमांश्चेति स्त्रीपुंसौ, मेथतीति मिथुनम्, द्वौ द्वाविति द्वन्द्वम् "द्वन्द्वं रहस्येति साधुः" इति त्रीणि मिथुनस्य । युज्यत इति युग्मम्, युज्यते, युगं लाति, युगमस्त्यस्येति वा युगलम्, युज्यत इति युगमिति त्रीणि यमलस्य ॥ ३८ ॥

पु. पु. पु. पु. पु. पु.

समूह या झुण्ड **समूहनिवहव्यूहसन्दोहविसरव्रजाः ।**

पु. पु. पु. पु. पु. पु. पु.

स्तोमौघनिकरव्रातवारसंघातसंचयाः ॥ ३९ ॥

पु. पु. पु. पु. पु.

समुदायः समुदयः समवायश्चयो गणः ।

स. न. न. न.

(स्त्रियान्तु) संहतिर्वृन्दं निकुरम्बं कदम्बकम् ॥ ४०॥

समूहेति—समूह्यत इति समूहः, नितरामुह्यते, वहतीति वा निवहः, व्यूह्यत इति व्यूहः, संदुह्यत इति संदोहः, विसरतीति विसरः "विसरः प्रसरे व्रजे" (इति मेदिनी) व्रजतीति व्रजः "व्रजो गोष्ठाध्ववृन्देष्विति" (मेदिनी) स्तूयत इति स्तोमः, आउह्यतेऽनेनेति ओघः "ओघो वेगे जलस्य च । वृन्दे परंपरायां च द्रुतनृत्योपदेशयोरिति" (मेदिनी) निकीर्यत इति निकरः "निकरो निवहे सारे न्यायदेयधने निधाविति" (मेदिनी) व्रत्यते नियम्यते इति व्रातः, वार्यते आच्छाद्यतेऽनेनेति वारः "वारः सूर्यादिवासरे। द्वारे हरे कुक्कुटके वृन्दावसरयोः क्षणे" (इति मेदिनी) संहन्यत इति संघातः, संचीयत इति संचयः, समुदायत इति समुदायः, समुदीयत इति समुदयः, समवयन्त्यनेनास्मिन्निति समवायः, चीयत इति चयः, गण्यत इति गणः, संहन्यत इति संहतिः, स्त्रियां स्मृता । वृणोति, वृणुतेऽनेनेति वृन्दम्, निकुरति, निकुर्यते वा निकुरम्बम्, कुत्सितं करोति, कम्यते वा, कदति, कदो वा कदम्बं तदेव कदम्बकमिति द्वाविंशतिः समूहस्य ॥ ३९ । ४० ॥

पु. पु. पु.
समूहविशेष (वृन्दभेदाः) समैर्वर्गः सङ्घसार्थौ (तु) (जन्तुभिः)।
न. पु.न.
(सजातीयैः) कुलं यूथं (तिरश्चां) पुंनपुंसकम्॥ ४१॥

वृन्देति—वृन्दस्य समूहस्य भेदा विशेषा उच्यन्ते—समैः सजातीयैः प्राणिभिरप्राणिभिश्चोपलक्षितं वृन्दं वृज्यत इति वर्गः कथ्यते यथा मनुष्यवर्गः, शैलवर्गश्च। जन्तुभिस्सजातीयविजातीयप्राणिभिरुपलक्षितः समूहः संहन्यते इति सङ्घः, सरतीति सार्थः, सङ्घश्च सार्थश्च तौ कथ्येते यथा पशुसङ्घः, वणिक्सार्थः। सजातीयैरेव जन्तुभिरुपलक्षितः समूहः कोलतीति कुलं प्रोच्यते। तिरश्चां समूहो यौति, यूयते वा यूथं पुंनपुंसकं विज्ञेयमिति ॥ ४१ ॥

पु. पु.
पशुसमूह (पशूनां)समजो (न्येषां) समाजो (थ सधर्मिणाम्)।
अन्यसमूह पु. पु. पु.स. पु. पु न.
सधर्मिसमूह अनाज का ढेर (स्या)न्निकायःपुञ्जराशी तूत्करःकूट (मस्त्रियाम्)॥४२॥

पेति—पशूनां समूहः संवीयतेऽत्रेति समजः कथ्यते "समजः पशुवृन्दे ना विपिने तु नपुंसकमिति" (मेदिनी) अन्येषां समूहः संवीयतेऽत्रेति समाजः प्रोच्यते। अथेति—सधर्मिणां समूहः निकायः स्यादिति वृन्दभेदानां पृथक् पृथक्। पिञ्जयति-पिञ्ज्यते वा उन्नत्या पुमांसं जयतीति वा पुञ्जः, अश्नुते, रश्यते वा राशिः, उत्कीर्यत इति उत्करः, कूटयति, कूट्यते वा कूटम् अस्त्रियां पुंनपुंसके स्यात् "कूटं पूर्द्वारयन्त्रयोः। मायादम्भाद्रिशृङ्गेषुसीराङ्गेनृत्ततुच्छयोः। निश्चलेऽयोधने राशाविति" (हेमचन्द्रः) इति चत्वारि धान्यादेरुच्छ्रितवृन्दस्य ॥ ४२ ॥

कबूतर,सुवा,मोर, न. न. न. न.
तीतर आदि का कापोतशौकमायूरतैत्तिरा (दीनि तद्गणे)।
समुदाय पलाऊपक्षी,हिरन (गृहासक्ताः पक्षिमृगा) श्छेका (स्ते)गृह्यका(श्च ते)४३॥

इति सिंहादिवर्गः॥

केति—तद्गणे तेषा कपोतशुकमयूरतित्तिरीणां गणे समुदाये कपोतानां समूहः कापोतम्, शुकानां समूहः शौकम्, मयूराणां समूहो मायूरम्, तित्तिरीणां समूहस्तैत्तिरम् आदिना काकानां समूहः काकम्, वर्त्तकानां समूहो वार्त्तकम्, उलूकानां समूह औलूकमित्यादीनि भवन्ति इति कपोतादीनां पृथक् पृथगेकैकम्—ये गृहेषु आसक्ता पक्षिमृगास्ते छ्यन्ति, छायन्ते वा छेकाः ते च गृह्यन्ते इति गृह्याः अनुकम्पिता गृह्याः गृह्यकाः कथ्यन्त इति द्वे गृहासक्तपक्षिमृगाणाम् ॥ ४३ ॥

इति सिंहादिवर्गविवरणम् ॥

अथ मनुष्यवर्गो व्याख्यायते ।

पु. पु. पु. पु. पु. पु.

मनुष्य या मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।

पुरुषमात्र पु. पु. पु. पु. पु.

(स्युः) पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥

मनुष्या इति—मनोरपत्यं मनुष्यः, बहुत्वे मनुष्याः, स्त्रियां मनुषी, मानुषा, बहुत्वे मानुषाः, स्त्रियां मानुषी, म्रियत इति मर्तः स एव मर्त्यः, बहुत्वे मर्त्याः, मनोर्जातो मनुजः, बहुत्वे मनुजाः, मनोरयं, मनोरपत्यं वा मानवः, बहुत्वे मानवाः, नरति, नृणाति वा नरः, बहुत्वे नराः, इति षट् मनुष्यमात्रस्य । पाति, पुनाति वा पुमान्, बहुत्वे तु पुमांसः, पञ्चजना उत्पादका यस्य, पञ्चभिर्भूतैर्जन्यते वा पञ्चजनः, बहुत्वे पञ्चजनाः, पुरतीति पुरुषः, बहुत्वे पुरुषाः, पूर्य्यत इति पूरुषः, बहुत्वे पूरुषाः, नरतीति ना, बहुत्वे नरः इति पञ्च मनुष्यजातौ पुरुषस्य ॥ १ ॥

स. स. स. स. स. स. स.

स्रीमात्र स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।

स. स. स. स.

प्रतीपदर्शिनी वामा वनिता महिला(तथा) ॥ २ ॥

स्त्रीति—स्त्यायति गर्भोऽस्यामिति स्त्री, योषति, जुष्यते वा योषित्, योष्यते स्मेति योषिता "स्त्री वधूर्योषिता रामा" (इति त्रिकाण्डशेषः) अल्पं बलमस्या अबला, जुष्यते, योष्यते वा योषा, चवर्गादिपाठे तु जुषते, जुष्यते वा जोषापि, नुर्नरस्य वा स्त्री "नृनरयोर्वृद्धिश्च" इति शार्ङ्गरवादिगणे पाठान्ङीन् जातिलक्षणस्य ङीषोऽपवादः, ङीन्सं-नियोगेन वृद्धिश्चेति नारी मुकुटमते तु नुर्नरस्य वा धर्म आचारोऽस्याः, नुर्नरस्य वेयं नारी, सीम्नोऽन्तः सीमन्तोऽस्त्यस्याः सीमन्तिनी, वहति, उह्यते वा वधूः, प्रतीपं द्रष्टुं शीलमस्या अपाङ्गनिरीक्षणान् प्रतीपदर्शिनी, वमति स्नेहम्, वामः कामोऽस्त्यस्या वा वामा, वन्यते स्म, वनति वा वनिता, महति, मह्यते वा महिला "महिला फलिनी स्त्रियोरिति" (मेदिनी) महत्योत्सवस्य इला भूमिरिति विग्रहे तु महेलापि इत्येकादश स्त्रीमात्रस्य ॥ २ ॥

स. स. स. स.

विशेष स्त्रिया (विशेषा)स्त्वङ्गना भीरुः कामिनी वामलोचना ।

स. स. स. स. स.

प्रमदा मानिनी कान्ता ललना(च)नितम्बिनी ॥ ३ ॥

स. स. स. स. स.

सौन्दर्यार्थ सुन्दरी रमणी रामा कोपना(सैव)भामिनी ।

स. स. स. स.

बहुत उत्तम **वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी[1] ॥ ४ ॥**

वीति—स्त्रीणां विशेषा भेदाः कथ्यन्ते— प्रशस्तान्यङ्गान्यस्या इति अङ्गना, भयशीला इति भीरुः, भूयान्कामोऽस्याः कामिनी, "कामिनी भीरुपन्दयोरिति" (मेदिनी) वामः कामो लोचने आलोचने नेत्रे यस्याः, वामे सुन्दरे लोचने चक्षुषी यस्या वा वामलोचना, प्रमदो हर्षोऽस्त्यस्या इति प्रमदा, मानोऽस्त्यस्या इति मानिनी, मुकुटमते भावः शृङ्गारचेष्टाविशेषस्तद्युक्ता भाविनी, कम्यते स्म इति कान्ता, ललते, लडति वा ललना, अतिशयितो नितम्बो यस्यास्सा नितम्बिनी । सु द्रियते, सु=अतीव उनत्ति चित्तं द्रवीकरोतीति वा पृषोदरादित्वात्सुन्दरी, सुन्दरा वा, रमयति, रम्यते वास्यामिति रमणी, रमत इति रामा इति पृथक् पृथगेकैकमुत्कृष्टस्त्रीविशेषाणाम् । कुप्यति तच्छीला कोपना, सैव अवश्यं भामते इति भामिनी इति द्वे कोपनस्त्रियाः । वर आरोहो नितम्बोऽस्या वरारोहा, मत्ता क्षीबेव काशते भातीति मत्तकाशिनी, दन्त्यसपक्षे मत्तकासिनी, अतिशयेनोत्कृष्टा, उत्ताम्यति, उत्तम्यते वा उत्तमा, वरवर्णोऽस्त्यस्या वरवर्णिनी इति चत्वार्यत्यन्तोत्कृष्टस्त्रियाः ॥ ३ । ४ ॥

स. स.

पटरानी अन्यरानी **(कृताभिषेका) महिषी भोगिन्यो (ऽन्या नृपस्त्रियः) ।**

कृतेति—कृतोऽभिषेकोऽस्याः कृताभिषेका, मह्यते पूज्यत इति महिषी, "महिषी नृपयोषिति । सैरिभ्यामौषधीभेदे" (इति हेमचन्द्र.) इत्येकं महिष्याः । अन्या नृपस्त्रियः अतिशयितो भोगो यासां ता भोगिन्यः स्युरित्येकं भोगिन्याः ॥ ३ ॥

स. स. स. स.

व्याही **पत्नी पाणिगृहीती(च)द्वितीया सहधर्मिणी ॥ ५ ॥**

स. स. पु. व. स.

पतिपुत्रवती **भार्या जाया (थ पुंभूम्नि) दाराः(स्यात्तु)कुटुम्बिनी ।**

स. स. स. स. स.

पतिव्रता **पुरन्ध्री सुचरित्रा (तु) सती साध्वी पतिव्रता ॥ ६ ॥**

पत्नीति—पत्युर्यज्ञे संयोगो ययेति पत्नी दम्पत्योः सहाधिकारात्, पाणिर्गृहीतोऽस्याः पाणिगृहीती, द्वयोःपूरणी द्वितीया, सहधर्मोऽस्त्यस्याः सहधर्मिणी सधर्मिणी वा पत्या सह कर्मस्वधिकारात्, भ्रियते, भूर्य्यते वा भार्य्या, जायतेऽस्यामिति जाया "जायायास्तद्धि जायात्वं यदस्यां जायते पुनरिति"(मनुः)दारयन्ति भ्रातॄन्,कामजं दुःखं दारयन्तीति वा "दाराः" पुंभूम्नि स्यात् टावन्तोऽपि "क्रोडा हारा तथा दारा त्रय एते यथाक्रमम् । क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिरिति व्याडिशुभाङ्कौ" इति सप्त विवाहित-

[1] शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला । भर्तृभक्ता च या नारी सा भवेद्वरवर्णिनी (इति रुद्रः)॥

भार्यायाः । कुटुम्बं पोष्यवर्गमस्त्यस्या इति कुटुम्बिनी, पुरं गेहं धारयति, धरतीति वा पुरन्ध्री, पुरन्ध्रिर्ह्रस्वान्तापि इति द्वे पुत्रादिमत्याः सधवायाः । शोभनं चरित्रमस्याः सुचरित्रा, अस्ति एकस्मिन् पत्याविति सती, साध्नोति पतिकार्यमिति साध्वी, पत्यौ व्रतं नियमोऽस्याः, पतिर्व्रतमस्या वा पतिव्रता पतिशब्दः पतिसेवायां लाक्षणिको ज्ञेय इति चत्वारि पतिव्रतायाः ॥ ५ । ६ ॥

स. स. स. स.
सवति स्वय पतिकी **कृतसपत्निकाऽध्यूढाऽधिविन्ना(थ) स्वयंवरा ।**
स. स. स. स.
चाहनेवाली कुलवती **पतिंवरा(च)वर्या(च) कुलस्त्री कुलपालिका ॥ ७ ॥**

कृतेति—सपत्न्येव सपत्निका कृता सपत्निका यस्याः कृतसपत्निका, "कृतसापत्निका" इति काचित्कपाठे तु सपत्न्या भावः सापत्नी सैव सापत्निका कृता सापत्निका यस्याः, कृतसापत्नका इति पाठे तु सपत्न्या आगतं सापत्नं तदेव सापत्नकं कृतं सापत्नकमस्याः कृतसापत्नका, अधि उपरि ऊढमुद्वहनमस्याः अध्यूढा, अधि उपरि विन्नं लाभोस्याः, अधिका विन्ना लब्धा यस्या वेति अधिविन्ना इति त्रीणि अनेकभार्यस्य प्रथमभूढायाः । अथेति—स्वयं वृणीते इति स्वयंवरा, पतिं वृणोतीति पतिंवरा, व्रियतेऽनयेति वर्या इति त्रीणि स्वेच्छाकृतपतिवरणायाः । कुलपालिका स्त्री शाकपार्थिवादित्वात् कुलस्त्री, कुलं पालयतीति कुलपालिका इति द्वे व्यभिचारवारणेन कृतकुलरक्षायाः ॥ ७ ॥

स. स. स. स. स.
कन्या **कन्या कुमारी गौरी (तु) नग्निकाऽनागतार्तवा ।**
अदृष्ट रजोवती
स. स. स. स.
दृष्टरजोवतीयुवती **(स्या) न्मध्यमा दृष्टरजास्तरुणी युवतिः (समे) ॥ ८ ॥**

केति—कनति, कन्यते वा कन्या, "कन्या एव कन्यका" कन्यते, कुमारयति, कुत्सितो मारोऽस्या वेति कुमारी "कुमारी रामतरुणी नवमाल्योर्नदीभिदि । कन्या पराजिता गौरी जम्बूद्वीपेषु च स्मृता" (इति विश्वः) इति द्वे कुमार्याः । गूयत इति गौरी, "गौरी स्वसंजातरजः कन्याशंकरभार्ययोः । रोचनी रजनी पिङ्गा प्रियङ्गुवसुधासु च । आपगाया विशेषेऽपि यादसांपतियोपिति" (इति मेदिनी) नजते स्म इति नग्ना सैव नग्निका "नग्निका तु कुमार्यां स्यात्पुमान् क्षपणवन्दिनोः" (इति मेदिनी) अनागतमार्तवं रजोऽस्या अनागतार्तवा इति त्रीणि गौर्याः । बालयौवनयोर्मध्ये भवा, मध्ये भा शोभा यस्यामिति वा मध्यमा, दृष्टं रजो यस्याः, यया वेति दृष्टरजाः इति द्वे मध्यमायाः । तरतीति तरुणी "तरुणी तरुणीति च" (इति शब्दभेदः) "युवतिः पवने यूनि युवत्यां तरुणी स्मृता" (इति मेदिनी) यौतीति युवतिः यौतेः ... 'युवती' उभे समे समानार्थे समानलिङ्गे चेति द्वे युवत्याः ॥ ८ ॥

...द्, सुवासिनी, ...धनादीच्छा- ...वती मैथुनेच्छा- ...वती

स. स. स. स. स.

(समाः) स्नुषा जनी वध्वश्चिरण्टी (तु) सुवासिनी।

स. स. स. स.

इच्छावती कामुका (स्याद्) वृषस्यन्ती (तु) कामुकी॥९॥

सेति—स्नौतीति स्नुषा, जायते वंशोऽस्यामिति जनी "जनी स्नुषावनितयोरिति" (हैमः) वहतीति वधू "वधूः पत्न्यां स्नुषानार्योः स्पृक्कासारिवयोरपि। नवपरिणीतायां चेति" (हैमः) एताः समाः समानार्थाः समानलिङ्गाश्चेति त्रीणि पुत्रभार्यायाः। चिरेणाटति पितृगेहाद्भर्तृगेहमिति चिरण्टी, मुकुटमते तु पितृकुलस्नेहाच्चिरमिटति गच्छतीति चिरिण्टी, हैमे तु चिरिणोतीति "चिरिण्टी, चरिण्टी" च सु अतीव वसति पितृगृहे तच्छीला 'सुवासिनी' स्ववासिनी इति पाठे तु स्वेषु पित्रादिषु वस्तुं शीलमस्याः स्ववासिनी इति द्वे पितृगेहस्थप्राप्तयौवनायाः। इच्छास्त्यस्या इति इच्छावती, कामयत इति कामुका स्यादिति द्वे धनादीच्छावत्याः। आत्मनो वृषं नरं शुक्रं वेच्छतीति वृषस्यन्ती, कामयत इति कामुकी इति द्वे मैथुनेच्छावत्याः॥ ९॥

स.

संकेतगामिनी (कान्तार्थिनी तु या याति संकेतं सा) ऽभिसारिका।

स. स. स. स. स. स.

स्वैरिणी अपुत्रा पुंश्चली चर्षिणी बन्धक्यसती कुलटेत्वरी॥ १०॥

स. स. स.

पतिपुत्रवती स्वैरिणी पांशुला (च) स्यादशिश्वी (शिशुना विना)।

स. स. स.

विधवा अवीरा (निष्पतिसुता) विश्वस्ताविधवे (समे)॥११॥

कान्तेति—या तु कान्तार्थिनी सती संकेतं याति सा अभिसरतीति अभिसारिका कथ्यत इत्येकं भर्त्रिच्छया रतिस्थानं गच्छन्त्याः। पुंसो भर्तुः सकाशाच्चलति पुरुषान्तरं गच्छतीति पुंश्चली, कर्षति मन इति चर्षिणी, धर्षयतीति विग्रहे तु धर्षणी इति वा पाठः, अवश्यं धृष्णोतीति व्युत्पत्त्या तु धर्षिणीत्यपि क्वचित्पाठः, बध्नाति मनोऽत्रेति बन्धकी, सत्याभिन्ना असती, अटतीति अटा कुलस्य अटा शकन्ध्वादित्वात् कुलटा, एति तच्छीला इत्वरी, स्वया इच्छया स्वेन स्वातन्त्र्येण वा ईरितुं शीलमस्याः स्वैरिणी, पांशु पापमस्त्यस्याः, पांशु लाति वा पांशुला इत्यष्टावसत्याः। शिशुना विना न शिशुर्यस्याः "अशिश्वी" स्यादित्येकमपत्यरहितायाः। या निष्पतिसुता सा वीरयति वीरा तस्या भिन्ना 'अवीरा' स्यादित्येकं पतिपुत्ररहितायाः। विफलं श्वसिति स्म विश्वस्ता, विगतो धवोऽस्याः विधवा उभे समे समानार्थे समानलिङ्गे चेति द्वे रण्डायाः॥ १०। ११॥

१ "विश्वस्ताविधवे तुल्ये निशङ्का पतिनी च सा" (इति वाचस्पतिः)॥

सखी सुहागिन स. स. स. स. स.
बूढ़ी बुद्धिमती **आलिः सखी वयस्या (च) पतिवत्नी सभर्तृका।**
स. स. स. स. स. स.
महामतिमती **वृद्धा पलिक्नी प्रज्ञा (तु) प्राज्ञी प्राज्ञा (तु) धीमती॥१२॥**

आलिरिति—आलयतीति आलिः, आली च समानं ख्यायते जनैः, सनोतिद्दाति सुखमिति वा सखी, वयसा तुल्या वयस्या इति त्रीणि सख्याः। पतिरस्त्यस्याः पतिवत्नी, सह भर्त्रास्तीति सभर्तृका इति द्वे जीवद्भर्तृकायाः। वर्धते स्म इति वृद्धा, पलितमस्त्यस्याः पलिक्नी इति द्वे वृद्धायाः। प्रजानातीति प्रज्ञा, प्रज्ञा एव प्राज्ञा इति द्वे स्वयंज्ञायाः। प्रज्ञास्त्यस्याः प्राज्ञी, धीरस्त्यस्या धीमती इति द्वे प्रशस्तबुद्धेः॥ १२॥

स. स.
सजातीय **शूद्री (शूद्रस्य भार्या स्यात्) शूद्रा (तज्जातिरेव च)।**
विजातीय स. स.
अहिरिन **आभीरी (तु) महाशूद्री (जातिपुंयोगयोः समा)॥१३॥**

शूद्रीति—शूद्रस्य भार्या शूद्री स्यादित्येकं भिन्नजातीयाया अपि शूद्रभार्यायाः। तज्जातिरेव शूद्रा स्यादित्येकमन्यभार्याया अपि शूद्रजातीयायाः। आभीरस्य भार्या, तज्जातीया वा आभीरी, महाशूद्रस्य भार्या, तज्जातीया वा 'महाशूद्री' एतद्द्वयीजातिपुंयोगयोः समा समानार्था समानलिङ्गा च या तु महती शूद्रा तत्र 'महाशूद्रा' इत्येवेति द्वे आभीर्याः॥ १३॥

स. स. स. स.
बनियाइनि
क्षत्रियाइनि **अर्याणीस्वयमर्या (स्यात्) क्षत्रिया क्षत्रियाण्यपि।**
स. स. स.
पढ़ानेवाली
स्वयंव्याख्यात्री **उपाध्यायाप्युपाध्यायी स्यादाचार्यापि (च स्वतः)॥१४॥**

अर्येति—स्वयं पुंयोगं विना जातिमात्रे अर्यत्वजातिविशिष्टा भार्या अर्याणी, अर्या च स्यादिति द्वे वैश्यजातीयायाः। क्षत्रियत्वजातिविशिष्टा भार्या क्षत्रिया क्षत्रियाणी अपीति द्वे क्षत्रियजातीयायाः। उपेत्याधीयतेऽस्या उपाध्याया, उपाध्यायी अपीति द्वे विद्योपदेशिन्याः। स्वतः आचर्यत इति आचार्या अपि च स्यादित्येकं स्वयं मन्त्रव्याख्यात्र्याः॥ १४॥

आचार्यपत्नी ग.
वैश्यपत्नी ग. ग.
क्षत्रियपत्नी **आचार्यानी (तु पुंयोगे) स्यादर्यी क्षत्रियी (तथा)।**
पढ़िदृ[illegible] ग. ग. ग.
[illegible] **उपाध्यायान्युपाध्यायी पोटा (स्त्रीपुंसलक्षणा)॥ १५॥**

आचार्येति—पुंयोगे तु आचार्यस्य भार्या इत्यस्मिन्नर्थे तु 'आचार्यानी' स्यादित्येकमाचार्य[illegible]

र्यायाः । अर्यस्य वैश्यस्य भार्या 'अर्यी' स्यादित्येकं वैश्यपत्न्या अन्यजातीयाया पि । क्षत्रियस्य भार्या 'क्षत्रियी' स्यादित्येकमन्यजातीयाया अपि क्षत्रियपत्न्याः । पाध्यायस्य भार्या उपाध्यायानी, उपाध्यायी इति द्वे विद्योपदेष्टृभार्यायाः । स्त्रीपुंस-क्षणा स्त्रीपुंसयोः स्तनश्मश्र्वादिचिह्नयुता स्त्री पोटयतीति पोटा स्यादित्येकं स्त्रीपुंस-क्षणवत्याः ॥ १५ ॥

वीर की स्त्री, वीर की माता, लड़के की उपजानेवाली

स. स. स. स.
वीरपत्नी वीरभार्या वीरमाता (तु) वीरसूः।
स. स. स. स.
जातापत्या प्रजाता (च) प्रसूता (च) प्रसूतिका॥१६॥

वीरेति—वीरः पतिरस्या वीरपत्नी, वीरस्य भार्या वीरभार्या इति द्वे वीरपत्न्याः । वीरस्य माता वीरमाता, वीरं सूते इति वीरसूरिति द्वे वीरमातुः । जातमपत्यमस्याः जातापत्या, प्रजायते स्म प्रजाता, प्रासविष्ट इति प्रसूता, प्रसूता एव प्रसूतिका इति चत्वारि प्रसूतायाः ॥ १६ ॥

नङ्गी दूती

स. स. स. स.
(स्त्री) नग्निका कोटवी (स्याद्) दूती संचारिके (समे)।
स.
आधी बूढ़ी राँड़ **कात्याय (न्यर्धवृद्धा या कषायवसनाधवा) ॥ १७ ॥**

स्त्रीति—नजते स्म नग्ना सैव नग्निका, कोटनं कोटस्तं वातीति कोटवी, कुट्टनं कोट्टस्तं वातीति विग्रहे तु कोट्टवी, कोटं रातीति विग्रहे तु कोटरी, कोटरा वा स्यादिति द्वे नग्नायाः । दवति, दुनोति, दूयते, दूयन्तेऽनया वेति दूतिः दूती वा संचरति, संचारयति वा संचारिका उभे समे समानार्थे समानलिङ्गे च स्यातामिति द्वे दूत्याः । अर्धवृद्धा अर्धजरती कषायवसना कषायाम्बरधारिणी अधवा पतिहीना या स्त्री सा कतस्यापत्यं कात्यायनस्येयं वेति कात्यायनी स्यादित्येकं विशेषणत्रयवत्याः ॥ १७ ॥

लौंडी

स.
सैरन्ध्री (परवेश्मस्था स्ववशा शिल्पकारिका)।
स.
जवान लौंडी **असिक्नी (स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी)॥ १८॥**

सैरमिति—परस्य वेश्म गृहं तस्मिंस्तिष्ठतीति परवेश्मस्था स्वे आत्मनि वशो यस्याः स्ववशा स्वतन्त्रा शिल्पकारिका कर्षकस्य स्त्रीव या स्त्री सा सीरं धरतीति सीरन्ध्रस्तस्येयं, स्वैरं स्वाच्छन्द्यं धरतीति स्वैरन्ध्रस्तस्येयं वा सैरन्ध्री, स्वैरन्ध्री वा कथ्यते इकारमध्यपाठे तु पृषोदरादित्वात्सैरिन्ध्रीत्यपि इत्येकं विशेषणत्रयवत्याः "लौंडी" इति ख्यातायाः । प्रेष्यते राज्ञीभिरिति प्रेष्या अन्तःपुरं चरितुं शीलमस्याः अन्तःपुरचारिणी अवृद्धा १

१ "चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी। प्रसाधनोपचारज्ञा सैरन्ध्री परिकीर्तिता" (इति शब्द०)

स्त्री सा सिनोति, सीयते स्म सिता शुक्लकेशा तद्भिन्ना असिक्नी, असिता वेति इत्येकं कृष्णकेशादित्रिविशेषणायाः ॥ १८ ॥

स. स. स. स.

वेश्या — वारस्त्री गणिका वेश्या रूपाजीवा(ऽथ)साजनैः।

स. स. स.

प्रधानवेश्या, कुट्टनी — सत्कृता वारमुख्या(स्यात्) कुट्टनी शम्भली(समे)॥१९॥

वारेति—वारस्य वृन्दस्य स्त्री वारस्त्री, गणः समूहोऽस्त्यस्याः,गणयतीति वा गणिका, वेशेन नेपथ्येन शोभते, वेशे वेश्यावाटे भवा, वेशः प्रवेशोस्त्यस्या वा वेश्या, वेष्टीति वि ग्रहे तु वेष्यापि रूपमाजीवोऽस्या रूपाजीवा इति चत्वारि वेश्यायाः। अथेति—साजनैः सत्कृता सती वारे वेश्यावृन्दे मुख्या वारमुख्या स्यादित्येकं प्रधानवेश्यायाः। कुट्टयतीति कुट्टनी, शं सुखं भलत इति शम्भली, सम्यक् भलत इति विग्रहे तु संभली दन्त्यादिरि उभे समे समानार्थे समानलिङ्गे चेति द्वे परनारीं पुंसा संयोजयित्र्याः ॥ १९ ॥

स. स. स. स.

शुभाशुभज्ञा, विप्रश्निका त्वीक्षणिका दैवज्ञा(थ)रजस्वला।

स. स. स. स. स.

रजस्वला — स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥

स. स. न. न. न.

स्त्रीरज — ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्तवम्।

विप्रेति—विविधः प्रश्नोऽस्त्यस्या विप्रश्निका, शुभाशुभयोरीक्षणमस्त्यस्याः ईक्षणिका, दैवं शुभाशुभं जानातीति दैवज्ञा इति त्रीणि लक्षणादिना शुभाशुभज्ञायाः अथेति—रजोऽस्त्यस्या रजस्वला, स्त्रीधर्मो रजोऽस्त्यस्याः स्त्रीधर्मिणी, अवति लज्जयैव आवीः "अवि स्त्रीधर्मिणीं विद्यादिति कात्यात्" "अविः" ह्रस्वान्तापि, अत्रेरपत्यम् आत्रेयी, मलमस्त्यस्या मलिनी, पुष्पं रजोऽस्त्यस्याः पुष्पवती, ऋतुरस्त्यस्या ऋतुमती, उदकमर्हतीति उदक्या इत्यष्टौ रजस्वलायाः। रज्यतेऽनेनेति रजः, पुष्यते इति पुष्पम् ऋतुरेव ऋतोरिदं वा आर्तवमिति त्रीणि स्त्रीपुष्पस्य ॥ २० । ३ ॥

स. स. स. स.

गर्भिणी की अभिलाषा, बिना रजकी — श्रद्धालुर्दोहदवती निष्कला विगतार्तवा ॥ २१ ॥

श्रद्धेति—श्रद्धत्ते तच्छीला श्रद्धालुः, दोहदं गर्भिण्यभिलाषोऽस्त्यस्या दोहदवती इति द्वे अभिलाषविशेषवत्याः। कलान्निष्कान्ता, निर्गतं कलं शुक्रमस्या वा निष्कला विगतमार्तवं रजोऽस्या विगतार्तवा इति द्वे रजोहीनायाः ॥ २१ ॥

स. स. स. स.

गर्भिणी, गणिकासमूह, गर्भिणीसमूह, युवतिसमूह — आपन्नसत्त्वा (स्याद्) गुर्विण्यन्तर्वत्नी (च) गर्भिणी

न. न. न.

(गणिकादेस्तु) गाणिक्यं गार्भिणं यौवनं(गणे)॥२२

आपेति—आपन्नः सत्त्वो जन्तुरनया, अस्यां वा आपन्नसत्त्वा, गुरुर्दुर्जरोऽलघुर्वा गर्भोऽस्त्यस्याः, गर्वतीति वा गुर्विणी, अन्तरस्ति गर्भोऽस्यामिति अन्तर्वत्नी, गर्भोऽस्त्यस्या गर्भिणी इति चत्वारि गर्भिण्याः । गणिकादेस्तु गणे समूहे गणिकानां समूहो गाणिक्यम्, इत्येकं गणिकासमूहस्य । गर्भिणीनां समूहो गार्भिणम् इत्येकं गर्भिणीसमूहस्य । युवतीनां समूहो यौवतमित्येकं युवतीसमूहस्य ॥ २२ ॥

स. स. पु.

उढरी **पुनर्भूर्दिधिषू (रूढा द्विः) स्तस्या दिधिषूः (पतिः) ।**

उढरा पु.

उढरा विशेष **(स तु द्विजो)ऽग्रे[1]दिधिषूः (सैव यस्य कुटुम्बिनी) ॥ २३ ॥**

पुनरिति—द्विः द्वौ वारौ ऊढा विवाहिता या स्त्री सा पुनर्भवतीति पुनर्भूः, दधाति पापम्, धिष्यते, दिधि धैर्यं स्यतीति वा दिधिषूः मुकुटमते तु दिधिषुर्ह्रस्वान्तमपीति द्वे दिधिष्वाः "उढरी" इति ख्यातायाः । तस्या दिधिष्वाः पतिः आत्मनो दिधिषूमिच्छतीति दिधिषूरित्येकं पुनर्भूपतेः । सैव यस्य कुटुम्बिनी पोष्यवर्गपालिका स्यात् स तु द्विजः क्षत्रियादिरपि अग्रे प्रधानं दिधिषूर्यस्येति अग्रेदिधिषूः स्यादित्येकं पुनर्भूप्रधानभार्यस्य ॥ २३ ॥

पु. पु. पु.

कन्यापुत्र **कानीनः कन्यकाजातः (सुतोऽथ) सुभगासुतः ।**

पु. पु.

सुभगासुत परस्त्रीसुत **सौभागिनेयः स्यात्पारस्त्रैणेय (स्तु परस्त्रियाः) ॥ २४ ॥**

कानीति—कन्याया अपत्यं कानीनः "कानीनः कन्यकासुते । कर्णे व्यासे" (इति हैमः) कन्यकया जातः सुतः कन्यकाजातः इति द्वे अनूढापत्यस्य । अथेति—सुभगायाः सुतः सुभगासुतः, सुभगाया अपत्यं सौभागिनेयः इति द्वे सुभगापत्यस्य । परस्त्रिया अपत्यं पारस्त्रैणेयः स्यादित्येकं परभार्यापुत्रस्य ॥ २४ ॥

पु. पु.

बुआ के पुत्र मौसी के पुत्र **पैतृष्वसेयः "स्या"त्पैतृष्वस्रीयश्च (पितृष्वसुः) ।**

पु. पु.

सौतेली मा के पुत्र **सुतो (मातृष्वसुश्चैवं) वैमात्रेयो विमातृजः ॥ २५ ॥**

पैत्रिति—पितृष्वसुः सुतः पितृष्वसुरपत्यं पैतृष्वसेयः, पैतृष्वस्रीयः, इति द्वे पितृष्वसुरपत्यस्य । एवं मातृष्वसुः सुतः मातृष्वसुरपत्यं मातृष्वसेयः, मातृष्वस्रीयः इति द्वे मातृष्वसुरपत्यस्य । विरुद्धा माता विमाता तस्या अपत्यं वैमात्रेयः, विमातुर्जातो विमातृज इति द्वे अपरमातृसुतस्य ॥ २५ ॥

---

१ ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा । सा चाग्रे दिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता इति

पु. पु. पु.

कुलटापुत्र (अथ)बान्धकिनेयः(स्याद्ब)न्धुलश्चासतीसुतः।

पु. पु.

भिक्षुकीपुत्र कौलटेयः कौलटेरो(भिक्षुकी तु सती यदि) ॥ २६॥

पु. पु.

तदा कौलटिनेयो(ऽस्याः)कौलटेयो(पि चात्मजः)।

अथेति—बन्धक्या अपत्यं बान्धकिनेयः, बन्धून्लातीति बन्धुलः, असत्याः सुतः असतीसुतः, कुलटाया अपत्यं कौलटेयः, कौलटेरः इति पञ्च कुलटापुत्रस्य। यदि तु सती भिक्षुकी स्यात्तदा अस्या आत्मजः कुलटाया अपत्यं कौलटिनेयः, कौलटेयोऽपि स्यादिति द्वे भिक्षार्थं गेहं गेहमटन्त्याः सत्याः पुत्रस्य ॥ २६ । १/२ ॥

पु. पु. पु. पु. पु.

पुत्र आत्मजस्तनयःसूनुः सुतः पुत्रः स्त्रियां त्वमी ॥ २७॥

पुत्री

स. न. न.

अपत्य (आहु)र्दुहितरं (सर्वे)ऽपत्यं तोकं(तयोःसमे)।

औरसपुत्र

पु. पु. पु. पु. पु.

बाप (स्वजाते) त्वौरसोरस्यौ तातस्तु जनकः पिता ॥२८॥

आत्मेति—आत्मनो देहाज्जातः आत्मजः, तनोति कुलं, तन्यते वा तनयः, सूयत इति सूनुः, सूयते स्म सुतः, पुनाति, पूयते, पुन्नाम्नो नरकात्त्रायते वा पुत्रः पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा" (इति मनुः ९।१३८) इति पञ्च पुत्रस्य। अमी आत्मजाद्याः सर्वे स्त्रियां वर्तमानाः सन्तो दुहितरं वदन्ति यथा "आत्मजा, तनया, सूनुः, सुता, पुत्री, पुत्रिका, पुत्रका" दोग्धि दुहतीति वा दुहिता इति षट् पुत्रिकायाः। न पतन्ति पितरोऽनेनेति अपत्यम्, तौतीति तोकम् उभे एतयोस्तनयदुहित्रोः समे समानलिङ्गे स्यातामिति द्वे पुत्रकन्ययोः। स्वजाते स्वस्मात्स्वपाणिगृहीतायां जाते उरसा निर्मितः औरसः, उरस्यः, औरस्योऽपि स्यादिति द्वे स्वस्माज्जातपुत्रस्य। तनोतीति तातः, जनयतीति जनकः, पातीति पिता इति त्रीणि जनकस्य ॥२७।२८॥

स. स. स. स. स. स.

माता, जनयित्री प्रसूर्माता जननी भगिनी स्वसा।

भगिनि,

न. स. स. स.

ननन्द, ननन्दा(तु स्वसा पत्युः)नप्त्री पौत्री सुतात्मजा ॥२९॥

जनेति—जनयतीति जनयित्री, अन्तर्भावितण्यर्थात् 'जनित्री' प्रसूरपि इति प्रसूः [illegible] माति गर्भोऽस्यां वेति माता, जनयतीति जननी इति चत्वारि जनयित्र्याः। [illegible] भगिनी, सुष्ठु अस्यति, अस्यते वा स्वसा इति द्वे भगिन्याः।

[illegible]

पत्युः स्वसा ननन्दति—न तुष्यति न नन्दयति भ्रातृजायामिति वा ननन्दा वृद्धौ ननान्दापि "ननन्दा तु स्वसा पत्युर्ननान्दा नन्दना च सा" (इति रभसः) इत्येकं भर्तृभगिन्याः "ननंद" इति ख्यातायाः। न पतन्ति पितरोऽनयेति नप्त्री, पुत्रस्य पुत्र्याश्चापत्यं स्त्री पौत्री, सुतस्य सुतायाश्चात्मजा सुतात्मजा इति त्रीणि नप्त्र्याः ॥ २९ ॥

स.

देवरान जेठानी (भार्यास्तु भ्रातृवर्गस्य) यातरः (स्युः परस्परम्)।

स. स. स. स.

भौजाई मामी प्रजावती भ्रातृजाया मातुलानी 'तु' मातुली ॥ ३० ॥

भेति—भ्रातृवर्गस्य भार्याः पत्न्यः परस्परं यतन्ते इति यातरः स्युरित्येकं भ्रातृवर्गभार्यायाः। प्रजास्त्यस्या इति प्रजावती, भ्रातुर्जायेति भ्रातृजाया इति द्वे भ्रातृपत्न्याः, मातुलस्य भार्या मातुलानी, मातुली इति द्वे मातुलपत्न्या. ॥ ३० ॥

स. पु.

सास श्वशुर (पतिपत्न्योः प्रसूः) श्वश्रूः श्वसुर (स्तु पिता तयोः)।

पु पु.

चाचा मामा (पितुर्भ्राता) पितृव्यः स्या (न्मातुर्भ्राता) तु मातुलः ३१॥

पतीति—पतिश्च पत्नी च पतिपत्न्यौ तयोः प्रसूः माताश्वश्रूः, पत्युर्माता पत्न्याः श्वश्रूः, पत्न्या माता पत्युः श्वश्रूः श्वशुरस्य भार्या इत्येकं श्वशुरपत्न्याः। तयोः पतिपत्न्योः पिता श्वशुरः 'शु' इति आश्वर्थे पूजायां वा शु, आशु अश्नुते, अश्यते वा श्वशुरः इत्येकं श्वशुरस्य। पितुर्भ्राता पितृव्यः स्यादित्येकं पितृव्यस्य। मातुर्भ्राता मातुलः स्यादित्येकं मातुलस्य " मामा " इति ख्यातस्य ॥ ३१ ॥

पु. पु. पु.

साला देवर श्यालाःस्यु (र्भ्रातरःपत्न्याः) (स्वामिनो) देवृदेवरौ।

पु. पु. पु. पु

भानजा दामाद स्वस्रीयो भागिनेयःस्याज्जामाता दुहितुःपतिः ॥ ३२ ॥

श्येति—पत्न्याः भ्रातरः पत्युः श्यालाः स्युः श्यायते, उच्छिष्टमधुपर्कवाची 'श्या' शब्दस्तं लातीति वा श्यालः वहुत्वे श्यालाः स्यामयतीति स्यालो दन्त्यादिरपि वहुत्वे स्यालाः इत्येकं श्यालस्य। स्वामिनः पत्युर्भ्रातरः पत्न्याः देवरः स्युः दीव्यतीति देवा, देवते इति देवरः "देवृदेवरदेवान" (इति शब्दार्णव.) इति द्वे देवरस्य पत्युः कनिष्ठभ्रातुरिति स्वामी, ज्येष्ठस्तु श्वसुर एवेति सुभूत्यादयः। स्वसुरपत्यं स्वस्रीयः, भगिन्या अपत्यं भागिनेयः स्यादिति द्वे भगिनीसुतस्य। जायां मिमीते, मिनोति वा [illegible] दुहितुः पतिरिति द्वे जामातुः ॥ ३२ ॥

दादा, दादी, परदादा, परदादी, नाना, नानी, परनाना, परनानी, भाई बन्धु

पु. पु. पु.
पितामहः पितृपिता (तत्पिता) प्रपितामहः ।
पु. पु. पु.
(मातु) र्मातामहाद्येवं सपिण्डा (स्तु) सनाभयः ॥ ३३ ॥

पितेति—पितुः पिता पितामहः, स्त्रियां 'पितामही' पितुः पिता पितृपिता इति। पितामहस्य । तत्पिता तस्य पितामहस्य पिता प्रकर्षेण पितामहः प्रपितामह इत्येकं प्रपितामहस्य । एवं मातुर्मातामहादिः, मातुः पिता मातामहः इत्येकं मातामहस्य । प्रकृष्टः मातामहः प्रमातामहः इत्येकं प्रमातामहस्य । समानः पिण्डो देहो मूलपुरुषो निर्वाप्यो वास्य सह पिण्डेन वर्ततेवेति सपिण्डः वहुत्वे तु सपिण्डाः, समानो नाभिर्मूलपुरुषोऽस्येति सनाभिः वहुत्वे तु सनाभय. इति द्वे सपिण्डस्य ॥ ३३ ॥

सगेभाई

पु. पु. पु. पु.
समानोदर्यसोदर्यसगर्भ्यसहजाः (समाः) ।

सगोत्री भाई

पु. पु. पु. पु. पु. पु.
सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः (समाः) ॥ ३४ ॥

समेति—समाने उदरे शयितः समानोदर्यः, सोदर्यः, समाने गर्भे भवः सह तुल्ये गर्भे कुक्षौ भवो वेति सगर्भ्यः, सह तुल्य उदरे जात. सहजः, सह उदरेण वर्तते सोदरः सहोदरश्चात्र " भ्राता तु स्यात्सहोदरः । समानोदर्यसोदर्यसगर्भ्यसहजा अपि । सोदरश्चेति " (नाममाला) एते समाः समानार्थाः समानलिङ्गाश्चेति चत्वारि एकोदरोत्पन्नभ्रातुः । समानं गोत्रं कुलमस्येति सगोत्रः, बध्नातीति बन्धु स एव बान्धवः, जानातीति ज्ञातिः, बध्नातीति बन्धुः, स्वनतीति स्वः, स्व आत्मीयश्चासौ जनश्चेति स्वजनः एते समाः समानार्थाः समानलिङ्गाश्चेति षट् बान्धवस्य ॥ ३४ ॥

ज्ञातिभाव, बन्धुसमूह, मुख्यपति, जारपति

न. स.
ज्ञातेयं बन्धुता (तेषां क्रमाद्भावसमूहयोः) ।
पु. पु. पु. पु. पु. पु.
धवः प्रियः पतिर्भर्ता जारस्तूपपतिः (समौ) ॥ ३५ ॥

ज्ञातेति—तेषां सगोत्राणां भावसमूहयोः क्रमात् ज्ञातेयम्, वन्धुता स्यात्, यथा ज्ञातेर्भावो ज्ञातेयम् इत्येकं ज्ञातिभावस्य । वन्धूनां समूहो वन्धुता इत्येकं वन्धुसमूहस्य । धवति, धूनोति वा धवः, प्रीणातीति प्रियः, पातीति पतिः, बिभर्तीति भर्ता इति चत्वारि पत्युः । जारयतीति जारः, उपमितः पत्या, उपकृष्टः पतिरनेन वा उपपतिः उभौ समौ समानार्थौ समानलिङ्गौ चेति द्वे जारपतेः ॥ ३५ ॥

पु. पु.
[illegible] (अमृते जारजः) कुण्डो (मृते भर्तरि) गोलकः ।
पु. पु. पु. पु.
[illegible] भ्रात्रीयो भ्रातृजो भ्रातृभगिन्यौ भ्रातरौ (उभौ) ॥ ३६ ॥

अमृत इति–भर्तरि अमृते जाराज्जातो जारजः पुत्रः कुण्ड्यते कुलमनेनेति कुण्डः "कुण्डमग्न्यालये मानभेदे देवजलाशये। कुण्डी कमण्डलौ जारात्पतिवत्नीसुते पुमान्। पिठरे नना" (इति मेदिनी) सुते पुमान्, सुतायां जातिलक्षणो ङीष् भवत्येवैकं कुण्डस्य। भर्तरि मृते सति जाराज्जातः पुत्रो गुड्यत इति गोलः स एव गोलकः "गोलको विधवापुत्रे जारात्स्यान्मणिके गुडे" (इति मेदिनी) इत्येकं गोलकस्य। भ्रातुरपत्यं भ्रात्रीयः, भ्रातुर्जातो भ्रातृजः इति द्वे भ्रातृपुत्रस्य। भ्राता च भगिनी च भ्रातृभगिन्यौ, उभौ स्वसा च भ्राता च भ्रातरौ स्यातामिति द्वे भ्रातृभगिन्योः॥ ३६॥

पु. पु. पु. पु.

मा बाप **मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ।**

पु. पु. पु.

सासु ससुर / कन्या पुत्र **श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ (पुत्रश्च दुहिता च)॥ ३७॥**

मातेति–माता च पिता च मातापितरौ, पितरौ, मातरपितरौ, प्रसूश्च जनयिता च प्रसूजनयितारौ इति चत्वारि मातापित्रोः। श्वश्रूश्च श्वशुरश्च श्वश्रूश्वशुरौ, श्वशुरौ, इति द्वे श्वश्रूश्वशुरयोः। पुत्रश्च दुहिता चेत्यत्र भ्रातृपुत्रावित्येकशेषे 'पुत्रौ' इत्येकं कन्यापुत्रयोः॥ ३७॥

पु. १ पु. पु पु.

स्त्रीपुरुष / जोरू-भर्ता या **दम्पती जम्पती जायापती भार्यापती (च तौ)।**

पु. पु. पु.न. पु.न.

जेर, रजवीज का मेल **गर्भाशयो जरायुः 'स्या' दुल्वं (च) कललो (ऽस्त्रियाम्) ३८॥**

दमिति–जाया च पतिश्च दम्पती, जम्पती, जायापती, भार्या च पतिश्च भार्यापती तावित्यनेन पुंस्त्वमुक्तम् "शाल्मली मैथिली मैत्री दम्पती जम्पती च सा" (इति वाचस्पतौ) स्त्रीत्वमप्युक्तमिति चत्वारि जायापत्योः। गर्भ आशेतेऽत्रेति गर्भाशयः, जरामेतीति 'जरायुः' स्यादिति द्वे गर्भवेष्टनचर्मणः। उल्लीयते, ओलति, उल्यते, वल्यते वा उल्वम्, कल्यत इति कललः उभौ अस्त्रियां पुंनपुंसके स्यातामिति द्वे शुक्रशोणितसंपातस्य चत्वारि गर्भवेष्टनस्येत्यन्ये॥ ३८॥

पु. पु. पु. पु.

जन्ममास **सूतिमासो वैजननो गर्भो भ्रूण (इमौ समौ)।**

स. पु. पु.न. पु. पु.न

गर्भ / हिजरा **तृतीयाप्रकृतिः शण्ढः क्लीबः पण्डो नपुंसकम्॥ ३९॥**

---

१ राजदन्तादि (२।२।३१) गणपाठाज्जायाशब्दस्य दंभावो वा निपात्यते। दारा पुंसि बहुत्वे च इदं मन्ते नपुंसकमित्यमरमाला "पत्नी जदमलिङ्गके" इति नामप्रपञ्चः॥

सूतीति—सूतेः प्रसवस्य मासः सूतिमासः, विजायतेऽस्मिन्निति विजननः स एव, विजननस्यायं वैजननः " नवमे दशमे वापि प्रबलैः सूतिमारुतैः । निस्सार्यते बाण इव जन्तुश्छिद्रेण सज्वरः " इति द्वे जन्ममासस्य । गीर्यते, उद्गीर्यते, शब्द्यते वेति गर्भः, भ्रूयते इति भ्रूणः " भ्रूणः स्त्रीगर्भडिम्भयोः " (इति मेदिनी) इति द्वे कुक्षिस्थबालस्य । स्त्रीपुंसावपेक्ष्य तृतीया प्रकृतिः तृतीयः प्रकारः असमस्तमेतत् समासे तु तृतीयप्रकृतिः, शाम्यतीति शण्ढः "क्लीबं शण्ढश्च कञ्चुकीति" (तालव्यादौरभसः) शण्ढषण्ढौ तु सौविदाविति" (हैमः) क्लीबत इति क्लीबः "अस्त्रीनपुंसके क्लीबं वाच्यलिङ्गस्त्वविक्रमे " (इति रुद्रः) पण्डते, पणते वा पण्डः " पण्डः षण्ढेऽपि च स्यात् " (इति मेदिनी) न स्त्री पुमानिति नपुंसकम् "स नपुंसको भवेदिति भाष्यानुस्यत्ययमिति पञ्च नपुंसकस्य ॥ ३९ ॥

न. न. न. न. न.
बालपन
युवापन
शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं (समे) ।

न. न. पु. न.
बूढ़ापन
बूढ़ोंका समूह स्यात्स्थाविरं(तु)वृद्धत्वं वृद्धसंघे (ऽपि)वार्धकम् ॥ ४० ॥

शिश्विति—शिशोर्भावः शिशुत्वम् , शैशवम् , बालस्य भावो बाल्यमिति त्रीणि शैशवस्य । तरुणस्य भावस्तारुण्यम् , यूनो भावो यौवनम् , उभे समे समानार्थे समानलिङ्गे चेति द्वे यौवनस्य । स्थविरस्य भावः स्थाविरम् , वृद्धस्य भावो वृद्धत्वं स्यादिति द्वे स्थाविरस्य । वृद्धानां संघो वृद्धसंघस्तस्मिन्नपि, वृद्धानां समूहो वार्धकम् " वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणीति " (विश्वः) स्वार्थे ष्यञि वार्धक्यमपीति द्वे वार्धकस्य ॥ ४० ॥

पु.न. स. स.
अति बुढ़ापा
बुढ़ाई पलितं(जरसा शौक्ल्यं केशादौ) विस्रसा जरा ।

स. स. स. स.
दूध पीनेवाले
बच्चे स्यादुत्तानशयाडिम्भा स्तनपा (च)स्तनन्धयी ॥ ४१ ॥

पलितमिति—केशादौ जरसा जरया शौक्ल्यं शुक्लत्वं फलति, फलनं, पलति गम, पलनं वेति ' पलितम् ' " पलितं शैलजे तापे केशपाके च कर्दमे " (इति मेदिनी) इत्येकं पलितस्य । विस्रस्यतेऽनयेति विस्रसा, जीर्यतेऽनया, जरणं वेति जरा इति द्वे जरायाः । उत्ताना शेत इति उत्तानशया, डिम्भयति, डिम्भते वा डिम्भा, स्तनौ पिबतीति स्तनपा, स्तनं धयतीति स्तनंधयी एषु त्रिलिङ्गता " त्रिषु [illegible] " इति [illegible] स्त्रीलिङ्गनिर्देशः स्त्रीप्रत्ययप्रदर्शनार्थः इति चत्वार्युत्तान[illegible] [illegible] ॥ ४१ ॥

पु. पु पु. पु. पु.
बालक बाल'स्तु स्या'न्माणवको वयस्थस्तरुणो युवा ।
युवापुरुष पु. पु. पु. पु. पु. पु.
वृद्धपुरुष प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्न'पि' ॥ ४२ ॥

बाल इति–बलते, वल्यते वा बालः "बालोऽश्वेऽश्वेभपुच्छयोः । शिशौ ह्रीवेरकचयो-र्बाला तु त्रुटियोषितोः । बाली भूषान्तरे मेधाविति" (हैमः) मनोरथं माणवः अल्पो माणवो माणवकः "हारभेदे च माणवको बाले कुपुरुषेऽपि चेति" (रभसः) इति द्वे बालस्य । वयसि यौवनमात्रके तिष्ठतीति वयस्थः, तरतीति तरुणः "तरुणं कुब्जपुष्पेना रुचकेमूनि तु त्रिपु" (इति विश्वः) यौतीति युवा इति त्रीणि तरुणस्य । प्रगतं वयोऽस्येति प्रवयाः, तिष्ठतीति स्थविरः, वर्धत स्म इति वृद्धः, जिनाति स्म इति जीनः, जीर्यति स्म इति जीर्णः, जीर्यतीति जरन् इति षट् वृद्धस्य ॥ ४२ ॥

बड़ावूढा वर्षीयान्दशमी ज्यायान् पूर्वजस्त्वग्रियोऽग्रजः ।
जेठाभाई
छोटा भाई जघन्यजे स्युः कनिष्ठयवीयो वरजानुजाः ॥ ४३ ॥

वरिति–अतिशयेन वृद्ध इति वर्षीयान्, दशमोऽवस्थाविशेषोऽस्यास्तीति दशमी, अतिशयेन वृद्धइति ज्यायान् इति त्रीण्यतिवृद्धस्य । पूर्वस्मिन्काले जातः पूर्वजः, अग्रे जात इति अग्रियः अग्रिमो वा अग्रे जात इति अग्रजः इति त्रीणि प्रथमजातस्य । जघन्यजेऽवरकाले जातो जघन्यजस्तस्मिन्, अतिशयेन युवा इति कनिष्ठः, कनीयानपि, पक्षे यवीयाः, अवरस्मिन् काले जातोऽवरजः, अनुपश्चाज्जातोऽनुजः इति पञ्च पश्चाज्जातस्य ॥ ४३ ॥

पु. पु. पु पु. पु. पु.
दुर्बल, अमांसो दुर्बलश्छातो बलवान्मांसलोंसलः ।
बलवान्, पु. पु. पु. पु. पु.
तुन्दीला, तुन्दिलस्तुन्दिकस्तुन्दी बृहत्कुक्षिः पिचिण्डिलः ॥४४॥

अमेति–अल्पं मांसमस्येति अमांसः, दुष्टं बलमस्येति दुर्बलः, छायते स्म इति छातः, शायते स्म इति विग्रहे तु शातोपि "दुर्बले निशिते स्यातां शितशाताविमौ त्रिपु" (इति तालव्यादौ रभसः) इति त्रीणि दुर्बलस्य । बलमस्यास्तीति बलवान्, मांसमस्त्यस्येति मांसलः, अंसो बलमस्यास्तीति अंसलः इति त्रीणि मांसलस्य "बलवान्" इति ख्यातस्य । अतिशयितं तुन्दमुदरमस्येति तुन्दिलः, तुन्दिकः, तुन्दी, 'तुन्दिभोपि, बृहत्कुक्षिरस्येति बृहत्कुक्षिः, अतिशयितं पिचिण्डमुदरमस्येति पिचिण्डिलः इति पञ्च स्थूलोदरस्य ॥ ४४ ॥

---

१ "वयःपक्षिणि बाल्यादौ वयो यौवनमात्रके" (इति विश्व.) ॥

पु. पु. पु. पु.

नकचपटा सुन्दर केश-वाला सिमटी खालवाला

अवटीटोऽवनाटश्चावभ्रटो (नतनासिके)।

पु. पु. पु. पु. पु.

केशवः केशिकः केशी बलिनो वलिभः (समौ) ॥ ४५ ॥

अवेति—नता नासिकाऽस्येति नतनासिकस्तस्मिन्, अवटीटं, अवनाटं, अवभ्रटं च नासिकाया नतमस्त्यस्याः अवटीटा, अवनाटा, अवभ्रटा च नासिकास्त्यस्य पुरुषस्य अवटीटः, अवनाटः, अवभ्रटः इति त्रीणि चिपिटनासस्य । प्रशस्ताः केशा यस्येति केशवः, केशिकः, केशी इति त्रीणि प्रशस्तकेशस्य स्थूलकेशस्य वा । वलिस्त्वक्संकोचोऽस्यास्तीति वलिनः, वलिभः उभौ समाविति द्वे श्लथचर्मवतः ॥ ४५ ॥

पु. पु. पु. पु. पु.

विकल अङ्ग-वाला वामन, तीखी नाक-वाला, नकटा

विकलाङ्ग(स्तु)पोगण्डः खर्वो ह्रस्व (श्च)वामनः ।

पु. पु. पु.

खरणाःस्यात्खरणसः विग्र (स्तु गतनासिकः) ॥ ४६ ॥

वीति—विकलमङ्गमस्येति विकलाङ्गः, पवते, पुनाति वा पौः, पौर्गण्ड एकदेशोऽस्य, अपकृष्टं गच्छतीति वा पृषोदरादित्वात् पोगण्डः “पोगण्डो विकलाङ्गकः” (इति रत्नकोषः) “पोगण्डो विकलाङ्गः स्यात्” (इति हलायुधः) अपोगण्ड इति पाठे नञ्समासः “अपोगण्डस्तु शिशुके विकलाङ्गे च भीरुके” (इति विश्वः) इति द्वे स्वभावन्यूनाधिकाङ्गस्य । खर्वतीति खर्वः “खर्व संख्यान्तरे नीचवामनके त्रिषु” (इति मेदिनी) ह्रसति, ह्रस्यते वा ह्रस्वः “ह्रस्वो न्यक्खर्वयोस्त्रिषु” (इति मेदिनी) वामयतीति, वामोऽस्यास्तीति वा वामनः स्त्रियान्तु वामनी इति त्रीणि खर्वपुरुषस्य । खरा तीक्ष्णा नासिकास्येति खरणाः पक्षे खरणसः स्यादिति द्वे तीक्ष्णनासिकस्य । विगता नासिकास्येति विग्रः “विखु, विखूः, विख्यः” विग्रो विखुर्विनासिकः” (इति रभसः) गता नासिका यस्येति गतनासिकः इति द्वे गतनासिकस्य ॥ ४६ ॥

पु. पु. पु. पु.

खुरसमान नाकवाला, नरचरा ऊँचीजाँघवाला मिलीजाँघवाला

खुरणाः(स्या)त्खुरणसः प्रज्ञुः प्रगतजानुकः ।

पु. पु. पु. पु.

ऊर्ध्वज्ञुरूर्ध्वजानुः (स्या) त्संज्ञुः संहतजानुकः ॥ ४७ ॥

खुरेति—खुर इव नासिकाऽस्येति खुरणाः पक्षे खुरणसः स्यादिति द्वे पशुखुरसदृश-नासिकस्य । प्रगते विरले जानुनी यस्येति प्रज्ञुः, पक्षे प्रगतजानुकः इति द्वे वाताद्विना विरलजानुकस्य । ऊर्ध्वे जानुनी यस्येति ऊर्ध्वज्ञुः, पक्षे ऊर्ध्वजानुः स्यादिति द्वे ऊर्ध्व-जानुकस्य । संहते जानुनी यस्येति संज्ञुः, पक्षे संहतजानुकः स्यादिति द्वे संहत-जानुकस्य ॥ ४७ ॥

पु.　पु.　पु.　पु.　पु.　पु.

बहिरा, कुबड़ा, टुंडा छोटी देह वाला, पँगुला, मुण्डा

स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः।

पु.　पु.　पु.　पु.　पु.　पु.

पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते[२] ॥ ४८ ॥

स्यादिति—आ इलति, आसर्वतः ईड्यते, ईट्टे वेति एडस्तस्मिन्, बध्नाति कर्णम्, बध्यते वा बधिरः इति द्वे श्रवणशक्तिहीनस्य। कौ उब्जति, कुईषदुब्जमार्जवमस्येति शकन्ध्वादित्वात् कुब्जस्तस्मिन्, गडति, गड्यते वा गडुः सोऽस्त्यस्येति गडुलः इति द्वे कुब्जस्य। कुत्सितः करोऽस्येति कुकरस्तस्मिन्, कुणति, कुण्यते वा कुणिः, कूणिरपि इति द्वे रोगादिना वक्रकरस्य। अल्पा तनुरस्येति अल्पतनुस्तस्मिन्, स्पृशति, स्पृश्यते, पृच्छति, पृच्छ्यते, पर्षति, पृष्यते वा पृश्निरिति द्वे अल्पशरीरस्य। पनते इति पङ्गुस्तस्मिन्, श्रोणतीति श्रोणः इति द्वे जङ्घाहीनस्य "पँगुला" इति ख्यातस्य। मुण्ड्यते स्म मुण्डितस्तस्मिन्, मुण्ड्यत इति मुण्डः इति द्वे खण्डितकेशस्य ॥ ४८ ॥

पु.　पु.　पु.　पु.

कञ्जा लँगड़ा लहसन तिल

वलिरः केकरे खोडे खञ्ज(स्त्रिषु जरावराः)।

पु.　पु.　पु.　पु.　पु.

जडुलःकालकःपिप्लुस्तिलकस्तिलकालकः ॥ ४९ ॥

वेति—के मूर्ध्नि कर्तुं शीलमस्येति केकरस्तस्मिन्, वलते इति वलिरः इति द्वे केकरस्य "कञ्जा" इति ख्यातस्य। खोडतीति खोडस्तस्मिन्, खञ्जतीति खञ्जः "अथ खञ्जके खोडखोराविति" (रभसः) इति द्वे खञ्जस्य "लँगडा" इति ख्यातस्य। जराशब्दादवरा अर्वाचीना उत्तानशयाद्यास्त्रिषु त्रिलिङ्गयां भवन्तीति। जलतीति जडुलः "मुकुटमते तु जटुलः" कालयतीति कालकः, अपिप्लवते इति पिप्लुरिति त्रीणि जटुलस्य "लसुन" इति ख्यातस्य। तिल इव तिलकः, तिल इव कालकः तिलकालकः इति द्वे देहस्थतिलस्य ॥ ४९ ॥

न.　न.　स.　स.

आरोग्य उपाय औषध

अनामयं (स्यादा)ऽऽरोग्यं चिकित्सा रुक्प्रतिक्रिया।

न.　न.　न.　पु.　पु.

भेषजौषधभैषज्यान्यगदो जायु(रित्यपि) ॥ ५० ॥

अनेति—आमयस्याभावोऽनामयम्, न रोगोऽस्येत्यरोगस्तस्य भाव आरोग्यमिति द्वे अरोगस्य। चिकित्सनं चिकित्सा, रुजः प्रतिक्रिया रुक्प्रतिक्रिया इति द्वे रोगनिवारणस्य। भेषयतीति भेषो रोगस्तं जयति, भेषं जायति, भिषज इदं वेति भेषजम्,

---

१ "निर्गत. पृश्निपङ्गश्रोणरता" इति नाममालायामार्यापाठाद्दीर्घोकारान्तानपि ॥

२ "मुण्डे मुण्डितशीर्षः । ...वैश्यान्तरे" (इति हैमः) ॥

२४

ओषधेरिदमौषधम् , भेषजमेव भैषज्यम् , न गदोऽस्मादित्यगदः, जयति रोगानिति जायुरिति पञ्च औषधस्य ॥ ५० ॥

स. स. पु. पु. पु. पु. पु.

रोग **(स्त्री)रुग्रुजा चोपतापरोगव्याधिगदामयाः ।**

क्षयी पु. पु. पु. पु. पु.

पीनस **क्षयःशोषश्च यक्ष्मा(च) प्रतिश्यायस्तु पीनसः ॥५१॥**

स्त्रीति–रुजति देहम् , रोजनं वेति रुक् रोजनं रुजा च स्त्री स्यात् "रुजा त्वामयभङ्गयोरिति" (हैमः) उपतापयति, उपतपनं वेति उपतापः "उपतापो गदे तापे" (इति हैमः) रुजति, रोजनं वेति रोग, विविधा आधयोऽस्मात्, व्याधानं वेति व्याधिः, गदतीति गद. " गदः कृष्णानुजे रोगे गदा प्रहरणान्तरे " (इति हैमः) अमनमामस्तं यान्त्यनेन, आमयनं वेति आमयः इति सप्त रोगस्य । क्षयति नाशयति देहमिति क्षय " क्षयो गेहे कल्पान्तेऽपचये रुजि " (इति हैमः) शोषयतीति शोषः, " शोष. शोषणयक्ष्मणोरिति" (हैमः) यक्ष्यते, यक्ष्यते वा यक्ष्मा इति त्रीणि राजयक्ष्मणः । प्रतिक्षणं श्यायते इति प्रतिश्याय., प्रतिश्यायतेऽनयेति व्युत्पत्त्या प्रतिश्या अपि, पीनं स्यति, सायति वा पीनसः " आपीनस. प्रतिश्या स्यादिति " (रभसः) इति द्वे नासारोगस्य ॥ ५१ ॥

स. न. पु. पु. पु.

छींक, खांसी **(स्त्री) क्षुत् क्षुतं क्षवः(पुंसि)कास(स्तु) क्षवथुः(पुमान्)।**

पु. पु. पु. पु. पु.

सूजन, बिवाई **शोफ (स्तु) श्वयथुःशोथःपादस्फोटो विपादिका॥५२॥**

त्रीणि–क्षवणं क्षुत, स्त्री स्यात् , क्षवणं क्षुतम् , क्षवणं क्षवः पुंसि स्यादिति त्रीणि छिक्कायाः । कासतेऽनेनेति कासः काशत इति काशस्तालव्यान्तोपि " काशस्तृणे रोगभेदे " (इति हैमः) "वागणास्या भवेत्काशी क्षवथौ ना तृणेऽस्त्रियामिति नानार्थे रभसाच्च तालव्यान्तोपि " क्षवणं, क्षौत्यनेन ना क्षवथुः पुमान्स्यात " क्षवथुः कासे छिक्कायामिति " (हेमचन्द्रः) शवतीति शोफः, श्वयत्यनेनेति श्वयथुः, शवतीति शोथः इति त्रीणि शोथस्य । स्फुटनं स्फोटः, पादस्य स्फोटः, पादौ स्फोटयतीति वा पादस्फोट., विपद्यतेऽनयेति विपादिका इति द्वे पादस्फोटनरोगस्य ॥ ५२ ॥

न. न. न. न. न.

[illegible] **किलासमिध्मे कच्छ्वां (तु) पाम पामा विचर्चिका ।**

[illegible] पु. पु. पु. पु.न.न.

[illegible] **कण्डूः खर्जूश्च कण्डूया विस्फोटः पिटक (स्त्रियाम्)॥५३॥**

कीति—किलतीति किलम्, अस्यत्यसम् किलं च तदसं च, केलनं किला तामस्यति, किलेन श्वैत्येन असतीति वा किलासम्, सिध्यतीति सिध्मं सिध्म इति वा इति द्वे किलासस्य "सेहुवां" इति ख्यातस्य। कषतीति कच्छूस्तस्याम, पायत्यङ्गम्, पायते देहोऽस्मात्, पिबति देहमिति वा पाम स्त्रियान्तु "मन." इति न ङीप् पामा द्वित्वे पामानौ बहुत्वे पामानः "डाबुभाभ्यामिति" डापि पामा द्वित्वे पामे बहुत्वे पामाः रमावत्, विचर्च्यत इति विचर्चिका इति चत्वारि 'खसु' रोगस्य। कण्डूयनं कण्डूः, खर्जनं खर्जूः, कण्डूयनं कण्डूया इति त्रीणि गात्रविघर्षणस्य। विस्फोटतीति विस्फोटः, पेटतीति पिटकः त्रिषु त्रिलिङ्गया स्यात् "पिटकः स्यात्तु विस्फोटे मञ्जूषायामपीष्यते" (इति हेमचन्द्र.) स्त्रियां पिटका क्षिपकादित्वान्नेत्त्वम् "विस्फोटा विटिका स्त्रिया-मित्यमरमालायां" वकारादिरपि इति द्वे विस्फोटस्य "फोड़ा" इति ख्यातस्य ॥ ५३ ॥

घाव नसूर मण्डलाकार कोढ सफेदकोढ बवासीर

पु.न. न. न. पु.
व्रणो (ऽस्त्रिया) ईर्ममरुः (क्लीबे) नाडीव्रणः (पुमान्)।
पु. न. न. न. न. न.
कोठो मण्डलकं कुष्ठश्वित्रे दुर्नामकार्शसी ॥ ५४ ॥

व्रेति—व्रणति, व्रणयतीति वा व्रण अस्त्रिया पुंनपुंसके स्यात् ईरयति सुखमिति ईर्मम्, इयर्तीति अरु. क्लीबे नपुंसके स्यादिति त्रीणि व्रणस्य। नाड्यां व्रणः नाडी-व्रणः पुमान्स्यादित्येकं सदागलतोव्रणस्य। कुणठतीति कोठः, मण्डलमिव मण्डलक-मिति द्वे मण्डलाकारकुष्ठस्य। कुष्णात्यङ्गम्, कुत्सितं तिष्ठतीति वा कुष्ठम् "कुष्ठं भे-षजरोगयोरिति" (हैम.) श्वेतत इति श्वित्रमिति द्वे श्वेतकुष्ठस्य। दुष्टं नामास्येति दुर्नामकम्, ऋच्छतीति अर्शः इति द्वे गुदरोगस्य ॥ ५४ ॥

कब्जियत संग्रहणी वमन

पु. पु. स. स.
आनाहस्तु विबन्धः (स्याद्) ग्रहणी रुक् प्रवाहिका।
स. स. पु.
प्रच्छर्दिका वमिश्च (स्त्री) "पुमांस्तु" वमथुः (समाः) ५५॥

आनेति—आनह्यतेऽनेन, आनहनं वा आनाहः, विबध्यतेऽनेन विबन्धनं वा वि-बन्धः स्यादिति द्वे आध्मानस्य। गृह्णाति जठराग्निमिति ग्रहणी, प्रवहति बहु स्रवति गुदमस्याम्, प्रवहणं वेति प्रवाहिका रुक्रोगः प्रवाहिकारोगो ग्रहणी स्यादिति द्वे संग्र-हणीरोगस्य। प्रच्छर्दनं प्रच्छर्दिका, वमनं वमिः स्त्री स्यात्, वमनं वमथुः पुमान्स्यात् "वमथुः पुंसि वमने गजस्य करशीकरे" (इति मेदिनी) एते समाः समानार्थाः तानभ्राः इति त्रीणि वमनस्य ॥ ५५ ॥

१ स. पु. पु. पु.

रोगविशेष (व्याधिभेदा) विद्रधिः(स्त्री) ज्वरमेहभगन्दराः ।

स. न.

पथरी अश्मरी मूत्रकृच्छ्रं 'स्यात्' (पूर्वे शुक्रावधेस्त्रिषु)॥५६॥

व्येति—"व्याधिभेदाः रोगप्रभेदाः कथ्यन्ते"—वेदनं, विद्रातीति वा विद्रं तद्धीयतेऽस्याम्, विद्रस्य धानं वेति विद्रधिः स्त्री स्यादित्येकं विद्रधेः "व्यराथिया" इति ख्यातस्य । ज्वरति, ज्वरणं वेति ज्वरः इत्येकं ज्वरस्य । मेहति, मेहनं वेति मेहः इत्येकं प्रमेहस्य । भगं दारयतीति भगन्दरः इत्येकं भगन्दरस्य । अश्मानं राति, अश्माकारं शुक्रं राति ददातीति वा अश्मरी, मूत्रे कृच्छ्रमत्रेति मूत्रकृच्छ्रं स्यादिति द्वे अश्मर्याः "पथरी" इति ख्यातायाः । इतः परं शुक्रावधेः पूर्वं पठिताः शब्दाः त्रिषु त्रिलिङ्गयां भवन्ति वाच्यलिङ्गा इति यावत्॥५६॥

पु. पु. पु. पु. पु.

वैद्य=हकीम, डाक्टर रोगहार्यगदंकारो भिषग्वैद्यौ चिकित्सके ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

नीरोगी वार्तो निरामयःकल्य उल्लाघो(निर्गतोगदात्) ॥ ५७॥

रोगेति—रोगं हरति तच्छीलो रोगहारी, अगदमरोगं जन्तुं करोतीति अगदंकारः, भिषज्यतीति भिषक्, विद्यामधीते वैद्यः, चिकित्सतीति चिकित्सकः इति पञ्च वैद्यस्य । वृत्तिरस्यास्तीति वार्तः । निष्क्रान्त आमयादिति निरामयः, "निरामयस्तु पुंसि स्यात् [illegible] दिडिके त्रिषु नीरुजे" (इति विश्वमेदिन्यौ) कलासु साधुरिति कल्यः "कल्यं प्रभाते मधुनि सज्ज दक्षे निरामये । कल्या कल्याणवाचि स्यादिति" (हैमः) उल्लाघते स्म, उल्लाघ्यते स्म इति वा उल्लाघः गदाद्रोगान्निर्गतो निर्मुक्तः उल्लाघः कथ्यते "उल्लाघो निपुणे हृष्टे शुचिनीरोगयोरपि" (इति हैमः) इति चत्वारि रोगनिर्मुक्तस्य ॥ ५७ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

रोगक्षीण रोगी ग्लानग्लास्नू आमयावी विकृतो व्याधितोऽपटुः ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

खाजवाला आतुरोऽभ्यमितोऽभ्यान्तः(समौ)पामनकच्छुरौ॥५८॥

ग्लेति—ग्लायति स्म इति ग्लानः, ग्लानशीलो ग्लास्नुरिति द्वे रोगेण क्षीणस्य । आमयोऽस्यास्तीति आमयावी, विक्रियते स्म इति विकृतः, व्याधिः संजातोऽस्येति व्याधितः "पटुर्दक्षे च नीरोगे" (इति मेदिनी) पटोरन्यः अपटुः, आतौतीति आतुरः, अभ्यम्यते स्म, अभ्यमति स्म इति वा अभ्यमितः इडभावे अभ्यान्तः इति सप्त रोगिणः

१ [illegible] । दोपा- शोथ शनैर्गौर [illegible] ॥२॥ [illegible] । ३ [illegible] ॥४॥ इति [illegible]

पामास्यास्तीति पामनः, कच्छूरस्यास्तीति कच्छुरः उभौ समौ स्यातामिति द्वे विचर्चिकायुक्तस्य ॥ ५८ ॥

पु.स न. पु.स.न. पु.स.न. पु.स न.
दादवाला बवासीरवाला **दद्रुणो दद्रुरोगी 'स्याद' र्शोरोगयुतोऽर्शसः ।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न.
वातरोगी अतीसारवाला **वातकी वातरोगी 'स्या' त्सातिसारोऽतिसारकी ॥ ५९ ॥**

द्वेति—दरिद्रातीति दद्रूः, दद्रूरस्यास्तीति दद्रुणः, दद्रूश्चासौ रोगश्चेति दद्रुरोगः स एवास्यास्तीति दद्रुरोगी स्यादिति द्वे दद्रुरोगिणः । अर्शोरोगेण युतः अर्शोरोगयुतः, अर्शांसि सन्त्यस्येति अर्शसः इति द्वे मूलव्याधिमतः । वातोऽतिशयितोऽस्येति वातकी, वातरोगोऽस्यास्तीति वातरोगी स्यादिति द्वे वातरोगिणः । सहातिसारेण वर्तते सातिसारः, अतिसारोऽस्यास्तीति अतिसारकी इति द्वे अतिसारवतः ॥ ५९ ॥

पु.स.न. पु.स.न. पु.स न. पु.स.न.
चिपड़ा चौंधरा चिपडी आखें **(स्युः) क्लिन्नाक्षे चुल्लचिल्लपिल्लाः (क्लिन्नेऽक्ष्णि चाप्यमी)**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
पागल कफी **उन्मत्त उन्मादवति श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥**

स्युरिति—क्लिन्ने अक्षिणी यस्येति क्लिन्नाक्षस्तस्मिन्, चुल्लचिल्लपिल्लाः स्युः क्लिन्ने चक्षुषी अस्येति चुल्लः, चिल्लः, पिल्लः "अमी चुल्लाद्याः क्लिन्ने अक्षिणि च स्युरिति त्रीणि क्लिन्ननेत्रतद्वतोः । उन्माद्यति स्म इत्युन्मत्तः, उन्मदनमुन्मादः सोऽस्यास्तीति उन्मादवान् इति द्वे वातकृतचित्तविभ्रमस्य अथवा उन्मादवति पुरुषे "उन्मत्तः" स्यात् "उन्मत्तो मुचुकुन्दे स्याद्धत्तूरोन्मादयुक्तयोरिति" (हैमः) इत्येकमुन्मत्तस्य । श्लेष्माऽस्यास्तीति श्लेष्मलः, पामादित्वात् श्लेष्मणः, कफोऽस्यास्तीति कफी इति त्रीणि कफवतः ॥ ६० ॥

पु.स.न. पु.स.न. पु.स.न.
कुबड़ा तुन्दीला **न्युब्जो (भुग्नेरुजा) "वृद्धनाभौ" तुण्डिभतुण्डिलौ ।**
पु.स न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
सेहुवावाला अन्धा मूर्च्छित **किलासी सिध्मलोऽन्धोऽदृङ्मूर्च्छाले मूर्त्तमूर्च्छितौ ॥ ६१ ॥**

न्युब्जेति—रुजा रोगेण भुग्ने पुरुषे न्युब्जनं न्युब्जः स्यात् "न्युब्जः कुब्जे कुशस्रुचि । अधोमुखेऽपि च न्युब्जं कर्मरङ्गतरोः फले" (इति हैमः) इत्येकं न्युब्जस्य । वृद्धा उन्नता नाभिरस्येति वृद्धनाभिस्तस्मिन्, तुण्डयत्ते इति तुण्डिः स एवास्यास्तीति तुण्डिभः, तुण्डिरस्यास्तीति तुण्डिलः, तुन्दिल इति पाठे तु तुन्दोऽस्यास्तीति "तुन्दिलः" इति त्रीणि उन्नतनाभियुक्तपुरुषस्य । किलासमस्यास्तीति किलासी, सिध्ममस्यास्तीति सिध्मलः इति द्वे सिध्मलस्य । अन्धयतीति अन्धः, न दृगस्येति अदृक्

इति द्वे अचक्षुषः । मूर्च्छास्यास्तीति मूर्च्छालः, मूर्च्छति स्म इति मूर्तः, मूर्च्छा संजाताऽस्येति मूर्च्छितः, मूर्तमूर्च्छितौ मूर्च्छाले स्यातामिति त्रीणि मूर्च्छावतः ॥ ६१ ॥

न. न. न. न. न. न.

बीज पित्त **शुक्रं तेजोरेतसी (च) बीजवीर्येन्द्रियाणि (च)।**

पु. न. पु. पु. स. म.

कफ खाल **मायुः पित्तं कफः श्लेष्मा (स्त्रियां तु) त्वगसृग्धरा ॥ ६२ ॥**

शुक्रमिति—शोचत्यनेन, शोचयति वा शुक्रम्, "शुक्रं तु रेतोक्षिरुजोरिति" (हैम॰) तेजयतीति तेजः, रिणातीति रेतः, विशेषेण ईजते, बीजयति, बीज्यतेऽनेनेति वा बीजम्" "बीजन्तु रेतसि । स्यादाधाने च तत्त्वे च हेतावङ्कुरकारणे" (इति हैम॰) वीरेऽक्लीबे साधुः वीरयति, वीर्यतेऽनेनेति वा वीर्यम् "वीर्यं तेजःप्रभावयोः शुक्रे शक्तौ चेति" (हैम) इन्द्रस्यात्मनो लिङ्गमिन्द्रियमिति षट् बीजस्य । मिनोति देहे ऊष्माणमिति मायुः, अपि दीयते स्म इति पित्तमिति द्वे पित्तस्य । केन जलेन फलति, के शिरसि फणति, फक्कति वा कफः, श्लिष्यतीति श्लेष्मा इति द्वे कफस्य । त्वचति, तनोति वा त्वक् स्त्रियां स्यात् "त्वक् स्त्री चर्मणि वल्के च गुडत्वचि विशेषतः" (इति मेदिनी) पुंसीति घे त्वच इत्यदन्तोऽपि "त्वक्त्वचचोचशब्दाः स्युर्वल्के चर्मणि पत्रके" (इति धरणि.) असृजो रक्तस्य धरा "असृग्धरा" इत्येके इति द्वे संचाया. ॥ ६२ ॥

न. न. न. न. न. न.

मांस **पिशितं तरसं मांसं पललं क्रव्यमाऽऽमिषम् ।**

न. न. पु.स.न.

शुष्कमांस **उत्तप्तं शुष्कमांसं (स्यात्तद्वल्लूरं त्रिलिङ्गकम्) ॥ ६३ ॥**

पिशीति—पिंशति, पिश्यते स्म वा पिशितम्, "पिशितं मांसं पिशिता मांसिका" (इति हैम॰) तरोबलमस्त्यस्मिन्निति तरसम्, मन्यत इति मांसम्, पलति, पल्यतेऽनेनेति पललम् "पललं तिलमिश्रे स्यात्पललं पिशितेऽपि च" (इति शाश्वतः) क्रव्यते, कर्त्यतेऽस्माद्वेति क्रव्यम्, आमिषतीत्यामिषमिति षट् मांसस्य । उत्ताप्यते स्म इति उत्तप्तम्, शुष्कं च तन्मांसं चेति शुष्कमांसम्, वल्लते, वल्ल्यते वा वल्लूरं तत् त्रिलिङ्गकं स्यादिति त्रीणि शुष्कमांसस्य ॥ ६३ ॥

न. न. न. न. न. न. न

रुधिर **रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणितम् ।**

पु.स.न. न. न. न. न. म. म.

वुक्का हृद **बुक्काऽग्रमांसं हृदयं हृन्मेद (स्तु) वपा वसा ॥ ६४ ॥**

रुधीति—रुणद्धि, रुध्यते वा रुधिरं तस्मिन् . असृज्यते, न सृजति वा असृक् . [illegible] ([illegible]) ॥

रोहति, रुह्यते वा लोहितम् "लोहितं रक्तगोशीर्षे कुङ्कुमे रक्तचन्दने । पुमान्नदान्तरे भौमे वर्णे च त्रिषु तद्वति" (इति मेदिनी) अस्यत इत्यस्रम् "अस्रः कोणे कचे पुंसि क्लीबमस्रुणि शोणित" (इति मेदिनी) रज्यते स्म इति रक्तम्, क्षताज्जातं क्षतजम्, शोणति स्म शोणितमिति सप्त रुधिरस्य । वुक्कयते स्वादुत्वान्मृग्यते इति वुक्का, "शोणितेषु स्त्रियां वृक्कावुक्कासुरसमद्वयो." (इति रभस.) अग्रं मुख्यं मांसमित्यग्रमांसमिति द्वे हृदयान्तर्गतमांसविशेषस्य । हरति, ह्रियते वा हृदयम्, हृत् "पद्मकोशप्रतीकाशं रुचिरं चाप्यधोमुखम् । हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्"इति द्वे हृदयकमलस्य । चत्वारि पर्याया इत्येके । मेद्यतीति मेदः, वपति, उप्यते वा वपा "वपा विवरमेदसो-रिति" (हैमः) वसति, वस्ते वा वसा इति त्रीणि शुद्धमांसस्नेहस्य ॥ ६४ ॥

गले की　　　　　　　　　　स.　स.　　　स.　स.
पिछली नस, (पश्चाद्ग्रीवा शिरा) मन्या नाडी (तु) धमनिः(शिरा)।
नाड़ी, फेफड़ा　न.　न　　न.　　न　न.　पु.न.
मैल　　तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलो(ऽस्त्रियाम्)॥६५॥

पेति—पश्चाद्भागे ग्रीवायाः शिरा, मन्यतेऽनयेति मन्या कथ्यत इत्येकं ग्रीवायाः पश्चाद्भागस्थितशिरायाः । नाडयति, नाडयते वा नाडी "नाडी नाले व्रणान्तरे । शिरायां गण्डदूर्वायां चर्याया कुहनस्य च । तथा षट् क्षणकालेपीति" (मेदिनी) धमतीति धमनि., धमनीति वा "धमनी तु शिराहट्टविलासिन्योश्च योषितीति" (मेदिनी) सिनोतीति सिरा, शिनोतीति विग्रहे तु तालव्यादिरपि "शिरो ना पिप्पलीमूले स्याद्धमन्या च योषितीति" तालव्यादौ रभसादिति त्रीणि धमन्याः । तलति, तिलतीति वा तिलं तदेव तिलकम्, "तिलको द्रुमरोगाश्वभेदेषु तिलकालके । क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियान्तु विशेषके" (इति विश्वमेदिन्यौ) क्लवत इति क्लोम इति द्वे उदर्यजलाशयस्य । मस्यते, मसनं वेति मस्तिस्ता मस्कते पृषोदरादित्वात् मस्तिष्कम्, गुरते, गूर्यते वा गोर्दमिति द्वे मस्तकभवस्नेहस्य । केटति स्म किट्टम्, मलत इति मल. अस्त्रिया पुंनपुंसके स्यादिति द्वे मलस्य ॥ ६५ ॥

न.　पु.न.　पु.　　　पु.　　　　स.
आंत पिलही अन्त्रं पुरीतद् गुल्म (स्तु) प्लीहा पुंस्य (थ) वस्नसा ।
नस कलेजा　स.　　　न.　　न.
या जिगर　स्नायुः (स्त्रियां) कालखण्डयकृती (तु समे इमे) ॥ ६६ ॥

अन्त्रमिति—अमत्यनेनेति अन्त्रम, पुरी शरीरं तनोतीति पुरीतत् "पुरीतदस्त्रियामिति" वाचस्पतिरिति द्वे अन्त्रस्य "आंत" इति ख्यातस्य । गुड्यतेऽस्मादिति गुल्मः, प्लेहत इति प्लीहा पुंसि स्यात् मुकुटमते तु प्लीहा टाबन्ता चेति द्वे कुक्षिवामपार्श्व

१ [illegible]

मासखण्डस्य । अथेति—वस्ते शरीरमिति वस्नं चर्म तत्स्यतीति वस्नसा, स्नातीति स्नायु उभे स्त्रिया स्यातामिति द्वे वायुवाहिनीनाड्याः । कालं च तत्खण्डम् च कालखण्डं यमनं यः संयमस्तं करोतीति यकृत् इमें समे समानार्थे समानलिङ्गे चेति द्वे कुक्षेर्दक्षिण भागस्थमांसखण्डस्य "कलेजा" इति ख्यातस्य ॥ ६६ ॥

स. स. स. स.

लार, कीचड **स्तृणिका स्यन्दिनी लाला दूषिका (नेत्रयोर्मलम्)।**

न. पु. पु. पु. न. न.

मूत्र **मूत्रं प्रस्रावउच्चारावस्करौ शमलं शकृत् ॥ ६७ ॥**

न. न. पु.न. स. स.

विष्ठा **गूथं पुरीषं वर्चस्क (मस्त्री) विष्ठाविषे (स्त्रियौ) ।**

सृणीति—सरतीति सृणिः सैव सृणिका "सृणीका दीर्घमध्यापि" अवश्यं स्यन्दते इति स्यन्दिनी, लालयत इति लाला इति त्रीणि लालायाः "लार" इति ख्यातायाः । नेत्रयोर्मलं दूषयति दूषिरेवेति वा दूषिका "पिचोण्डकं नेत्रमलं दूषी च पिकापि चेति" (वाचस्पतिः) 'दूषीका' अपीत्येकं नेत्रमलस्य । मूत्र्यत इति मूत्रं प्रस्रयत इति प्रस्रावः इति द्वे मूत्रस्य । उच्चार्यते त्यज्यते इति उच्चारः, अवकीर्यते अक्षिप्यत इति अवस्करः, शाम्यति, शम्यते वा शमलम्, शक्नोति, शक्यते वा निःसारयितुं वेति शकृत्, गूयत इति गूथम्, पिपर्ति शरीरमिति पुरीषम्, वर्चते, वर्च्यते वा वर्चः, कुत्सितं वर्चो वर्चस्कम् अस्त्री पुंनपुंसकं स्यात्, वितिष्ठते उदरे अनया पुरीषं वेति विष्ठा, वेवेष्टीति विट् तालव्यान्तपाठे तु विशतीति विट् उभे स्त्रियौ स्यातामिति नव पुरीषस्य ॥ ६७ । ½ ॥

कपाल हड्डी पु पु.न. न. न. न.

(स्या)त्कर्परःकपालो(ऽस्त्री)कीकसंकुल्यमस्थि(च)॥ ६८ ॥

पांजर रीढ़ पु स.

(स्याच्छरीरास्थ्नि) कङ्कालः (पृष्ठास्थ्नि तु) कशेरुका।

खोपड़ी पसुरी स. स.

(शिरोस्थानि)करोटिः(स्त्री)पार्श्वास्थनि(तु)पर्शुका॥ ६६ ॥

स्यादिति—कल्पत इति कर्परः, "कर्परस्तु कटाहे स्याच्छस्त्रभेदकपालयोः" (इति हैमः) कं पालयति, कम्प्यते वा कपालः अस्त्री पुंनपुंसकं स्यात् "कपालोऽस्त्री शिरोऽस्थ्नि स्याद् घटादेः शकले व्रजे" (इति मेदिनी) इति द्वे शिरोस्थिखण्डस्य । की इति [illegible] कीकसम् "कीकसः कृमिजातौ स्यात्पुंसि कुल्ये नपुंसकमिति" (मेदिनी) कुलं [illegible] स्यात्, [illegible], कुल्यते चेति कुल्यम् "कुल्यः कुलोद्भवे मान्ये कुल्यास्थिनि [illegible] [illegible] सूर्पामिषेषु च । पयः प्रणाल्यां सरितोः कुल्या [illegible] [illegible]" (निरु) अस्यते [illegible] इति [illegible] । [illegible]

ङ्क्यते वेति कङ्कालः, शरीरास्थ्नि स्यादित्येकं त्वङ्मांसरहितशरीरास्थ्नः। कं वायुं शृणाति, केन शीर्यते वा कशेरुः सैव कशेरुका अथवा कशति, कश्यते वा कशेरुः, ल 'कशेरुका' पृष्ठास्थ्नि स्यादित्येकं पृष्ठवंशास्थ्नः। कं वायुं रोटते, केन रुध्यते, कं रोटयतीति वा करोटिः, करोटी वा शिरोऽस्थनि स्त्री स्यादित्येकं शिरोऽस्थ्नः। स्पृशति, स्पृश्यते वा पर्शुः, सैव पर्शुका अथवा परं शृणातीति पर्शुः, पर्शुरिव पर्शुका पार्श्वास्थनि स्यात् अप्राणिष्वात्केऽस्त्यूङि पर्शूरपीत्येकं पार्श्वास्थ्नः ॥ ६८ । ६९ ॥

न. पु. पु. पु. न.

अङ्ग अङ्गं प्रतीकोऽवयवोऽपघनो (ऽथ) कलेवरम्।

न. न. न. न. न. पु.

गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥ ७० ॥

पु. पु.न. स. स. स.

देह कायो देहः (क्लीबपुंसोः) स्त्रियां मूर्तिस्तनुस्तनूः।

अङ्गमिति—अङ्गतीति अङ्गम्, "अङ्गं गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति। क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके" (इति मेदिनी) प्रत्येति, प्रतीयते वा प्रतीकः "प्रतीकोऽवयवेऽपि स्यात्प्रतिकूलविलोमयोः" (इति मेदिनी) अवयौतीति अवयवः, अपहन्यते इत्यपघनः इति चत्वार्यङ्गस्य। अथेति—कले शुक्रे मधुराव्यक्तध्वनौ वा धरं श्रेष्ठमिति कलेवरम्, एति, गच्छति, गाते नेति गात्रम्, वपति, उप्यते वा वपुः "वपुः क्लीबं तनौ शस्तावपीति" (मेदिनी) संहन्ति, संहन्यतेऽस्मिन्भूतानीति वा संहननम्, शृणाति, शीर्यते वा शरीरम्, वर्षति, वृष्यते वा वर्ष्म, विविधं सुखादि गृह्णाति, विविधैर्व्याधिभिर्गृह्यते चेति विग्रहः, "विग्रहः कायविस्तारविभागे ना रणोऽस्त्रियामिति" (मेदिनी) चीयतेऽन्नादिभिरिति कायः, "कायः स्वेदवने मूर्तौ संघे लक्षस्वभावयोः। मनुष्यतीर्थे काये स्यादिति" (मेदिनी) दिह्यत इति देहः क्लीबपुंसोः स्यात्, मूर्च्छतीति मूर्तिः "मूर्तिः पुनः प्रतिमायां कायकाठिन्ययोरपीति" (हेम.) तनोति, तन्यते कर्मपाशोऽनयेति वा तनुः "तनुर्वे तनुरेकमिति वासवदत्तायमकात्सान्तापि, "अप्राणि-जातेरित्यूङि औणादिके कृणिचमितनीत्यूप्रत्यये वा तनूरेते त्रयः स्त्रिया स्युरिति द्वादश गात्रस्य ॥ ७० । ½ ॥

न. न. पु. पु. पु. पु.न.

पादाग्र पैर पादाग्रं प्रपदं पादः पदङ्घ्रिश्चरणो (ऽस्त्रियाम्) ॥ ७१ ॥

स. पु.न. पु.

(तद्ग्रन्थी) घुटिके गुल्फौ (पुमा)न्पार्ष्णि (स्तयोरधः)।

स. स. पु.न. पु.न. पु.न.

जङ्घा (तु) प्रसृता जानूरुपर्वाष्ठीव (दस्त्रियाम्) ॥ ७२ ॥

पेति—पादस्याग्रं पादाग्रं, प्रगतं पादं प्रगतं वा पदम् प्रपदमिति द्वे पादाग्र-

पद्यत इति पादः " पादो बुध्ने तुरीयांशे शैलप्रत्यन्तपर्वते । चरणे च मयूखे च" (मेदिनी) पद्यते पद्, स्वामिमते तु पद्यतेऽनेनेति पदोऽदन्तः, अंहतेऽनेनेति अं अङ्घतेऽनेनेति विग्रहे तु अङ्घ्रिरपि, चरत्यनेनेति चरणः अस्त्रियां पुंनपुंसके । "चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च। भ्रमणे भक्षणे चापि नपुंसक उदाहृ (इति मेदिनी) इति चत्वारि चरणस्य । तस्य पादस्य ग्रन्थी, घोटतेऽनयेति घु द्वित्वे घुटिके, गलति, गल्यते वा गुल्फः द्वित्वे गुल्फाविति द्वे पादग्रन्थ्योः । त लफयोरधः पृष्यतेऽनेनेति पार्ष्णिः पुमान्स्यात् " पार्ष्णिः स्त्रीपुंसयोः पादमूले दृष्वजिनी कटाविति " (रन्तिदेवः) इत्येकं पादपश्चाद्भागस्य । जायते, जङ्घन्यते, गच्छतीति वा जङ्घा, प्रसरतिस्म, प्रस्रियते स्म, प्रकृष्टं सृतं गमनमनयेति वा प्रसृता द्वे जङ्घायाः । जायत इति जानु, ऊर्णूयते इत्यूरुस्तस्य पर्व, ऊरुपर्व, अतिशयित यस्मिन्निति अष्ठीवत् एते त्रयोऽस्त्रियां पुंनपुंसके स्युरिति त्रीणि जान्वोः ॥७१॥

न. पु. पु.

जाँघ का सक्थि (क्लीबे पुमा) नूरु (स्तत्सन्धिः पुंसि) वङ्क्षण

जोड़ गुदा न. न. पु. पु.स.

मूत्राशय गुदं त्वपानं पायु (र्ना) बस्ति (र्नाभेरधो द्वयोः) ॥७

सेति—सजति, सज्यते वा सक्थि क्लीबे नपुंसके स्यात्, ऊर्णूयते इति ऊरुः न्स्यादिति द्वे जानूपरिभागस्य । तस्य ऊरोः सन्धिः वाङ्क्षति, वाङ्क्ष्यते, वङ्क्षते, तीति वा वङ्क्षणः पुंसि स्यादित्येकमूरुसन्धेः । गोदते, गवते, गूयतेऽनेनेति दम्, अपानित्यनेनेत्यपानम्, पाति मलनिःसारणेन—पिबति वस्त्यौपधमिति वा पायु ना पुमान्स्यादिति त्रीणि विष्ठानिर्गममार्गस्य । नाभेरधोभागो वसति मूत्रमत्र वस्ते, वस्यते वेति वस्तिः द्वयोः स्त्रीपुंसयोः स्यात् " नाभेरधो मूत्रपुटं बस्तिर्मूत्राशयोऽपि चेति " (हैमीयनाममालायाम्) इत्येकं नाभ्यधोभागस्य ॥ ७३ ॥

कमर स्त्री के पु. न. स. स. स.

कमरकापिछला कटो (ना) श्रोणिफलकं कटिः श्रोणिः ककुद्मती ।

भाग कमर का पु. न.

अगिला भाग (पश्चा)न्नितम्बः(स्त्रीकट्याः)(क्लीबेतु)जघनं(पुरः) ७४ ॥

कटेति—कट्यत इति कटः ना पुमान्स्यात्, श्रोणेः फलकमिव चर्माकारत्वादिति श्रोणिफलकम्, कट्यत इति कटिः, श्रोणातीति श्रोणिः, ककुद वृषांस इव मांसपिण्डः ककुत्सोऽस्त्यस्यामिति ककुद्मती यवादित्वान्मत्वं नेति पञ्च कट्याः । स्त्रीकट्याः पश्चाद्भागो नितम्बति, नितम्ब्यते, निभृतं नम्यते कामुकैरिति वा नितम्बः, कट्याः इत्येकं स्त्रीकट्याः पश्चाद्भागस्य । स्त्रीकट्याः पुरोभागः हन्यते इति जघनं क्लीबे [illegible] स्त्रीकट्याः अग्रभागस्य ॥ ७४ ॥

नं.

तम्बोके गढ्ढे (कूपकौ तु नितम्बस्थौ द्वयहीने) ककुन्दरे ।

स. पु. पु.

ते भग, लिङ्ग (स्त्रियां) स्फिचौ कटिप्रोथावुपस्थो (वक्ष्यमाणयोः) ७५॥

कूपेति—नितम्बे तिष्ठतो नितम्बस्थौ, कूपाविव कूपकौ, कुं भूमिं दारयतः कुन्दरे कुत्सिते कुन्दरे ककुन्दरे कुकुन्दरे वा द्वयेन हीने स्यातामित्येकं पृष्ठवंशादधोगर्तयोः । स्फायेते, स्फेटयतो वेति स्फिचौ स्त्रियां स्याताम्, प्रोथतः प्रोथौ कट्याः प्रोथौ मांसपिण्डावेति कटिप्रोथौ "कटी" प्रोथाविति नामद्वयं वा "स्त्रियां स्फिचौ कटिप्रोथौ कटीप्रोथौ च पूलकाविति" (रभसः) "प्रोथोऽश्वघोणाध्वगयोः कट्यामिति" (हैमः) इति द्वे कटिप्रोथयोः । वक्ष्येते वक्ष्यमाणौ तयोः भगशिश्नयोः उपतिष्ठते इति उपस्थः "उपस्थः क्रोफसि क्रोडे तथा मदनमन्दिरे" (इति विश्वमेदिन्यौ) इत्येकं भगलिङ्गयोः ॥ ७५ ॥

न. पु,स. पु न. न. न.

भग लिङ्ग भगं योनि (र्द्वयोः) शिश्नो मेढ्रं मेहनशेफसी ।

पु. पु. पु. न.

वृषण मेकड मुष्कोऽण्डकोशो वृषणः (पृष्ठवंशाधरे) त्रिकम् ॥ ७६ ॥

भेति—भज्यत इति भगम् "भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु । माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षे च ना रवाविति" (विश्वमेदिन्यौ) यौतीति योनिः द्वयोः स्त्रीपुंसयोः स्यात् "योनिः स्त्रीपुंसयोश्च स्यादाकारे स्मरमन्दिरे" (इति मेदिनी) "योनिः कारणे भगतोययोरिति" (हैमः) इति द्वे भगस्य । शशति, शिनोति वा शिश्नम्, मेहत्यनेनेति मेढ्रम् मिह्यतेऽनेनेति मेहनम्, शेते रेतः पाते इति शेफः, शेपश्च सान्तोऽदन्तश्चेति चत्वारि लिङ्गस्य । मुष्णाति रेत इति मुष्कः, अण्डयोः कोशः अण्डकोशः अण्डकोषश्च, वर्षतीति वृषणः इति त्रीणि वृषणस्य । पृष्ठवंशस्य अधरे अधोभागे त्रयाणां संघस्त्रिकमित्येकं पृष्ठवंशाधरस्य "मेकड़"-इति ख्यातस्य ॥ ७६ ॥

१ पु. पु. पु.न. न. न. पु. पु.

पेट कुच पिचण्डकुक्षी जठरोदरतुन्दं स्तनौ कुचौ ।

पु.न. न. स.न. न.

कुचाग्र गोद चूचुकं (तु) कुचाग्रं स्या(न्न ना) क्रोडं भुजान्तरम् ॥७७॥

पीति—अपि चमत्यन्नम्, अपि चण्ड्यतेऽनेन हेतुनेति वा पिचण्डः पृषोदरादित्वात्पिचिण्डोऽपि, कुष्यते निष्कास्यते मलोऽस्मादिति कुक्षिः, जायते जन्तुर्मलो वाऽत्रेति 'जठरः' "जठरो न स्त्रियां कुक्षौ बद्धकक्ष्यटयोस्त्रिष्विति" (मेदिनी) उद्गृणाति, उद्गच्छति, उद्दियति वा उदरम् "उदरं तुन्दरणयोरिति" (हैमः) तुदति, नगौल्यक्षमिति वा तुन्दमिति

१ नदि भार्गाविस्मृतस्त्वात् ॥

पश्चोदरस्य । स्तनति कथयति यौवनोदयम्, स्तन्यते शब्द्यते कामुकैरिति स्तनः द्वित्वे स्तनौ, कुचतीति कुचः द्वित्वे कुचाविति द्वे स्तनयोः । चूष्यते, 'चूष इत्यव्यक्तं कायतीति वा चूचकम्, कुचस्य कुचयोर्वाग्रं कुचाग्रं स्यादिति द्वे कुचाग्रस्य क्रुश्यते इति क्रोडं ना पुमान् न स्यात् "क्रोडः कोले शनौ क्रोडमङ्के" (इति हैम. भुजयोरन्तरं भुजान्तरमिति द्वे अङ्कस्य ॥ ७७ ॥

न. न. न. न.

छाती पीठ **उरो वत्सं (च) वक्ष (श्च) पृष्ठन्तु (चरमं तनोः)।**

पु. न. पु.न. न.

कन्धे हँसुली **स्कन्धो भुजशिरोंऽसो(ऽस्त्री)(सन्धी तस्यैव)जत्रुणी ७८**

उरविति—इयर्तीति उरः "उरो वक्षसि मुख्ये स्यादिति" (हैमः) वदति साम मिति वत्सः, "वत्सः पुत्रादिवर्षयोः। तर्णके नोरसि क्लीबमिति" (मेदिनी) "पुत्रे तर्णके वर्षे वत्सो वत्सं तु वक्षसीति" (रुद्रः) वक्षतीति वक्षः इति त्रीणि वक्षसः। पश्चापि वत्सस्येत्यन्ये । तनोर्देहस्य चरमं पृष्यत इति पृष्ठं स्यात् "पृष्ठं चरममात्रे स्याद्देहस्यावयवान्तरे" (इति मेदिनी) इत्येकं देहपश्चाद्भागस्य । स्कन्द्यते, इति स्कन्धः "स्कन्ध. प्रकाण्डे कायांसे विज्ञानादिपु पञ्चसु। नृपे समूहे व्यूहे चेति" (हैम.) भुजस्य शिरो भुजशिरः, अस्यते समाहन्यते भारादिना, अमति, अम्यते वा अंसः "अंसः स्कन्धे विभागे स्यादिति" (हैम.) अस्त्री पुंनपुंसकं स्यादिति त्रीणि स्कन्धस्य। तस्यैव सन्धी जायते बाहुरस्मादिति जत्रु द्वित्वे जत्रुणी इत्येकमंसकक्षयोः सन्धेः॥७८॥

न. पु. पु.न

काँख बगल **बाहुमूले (उभौ)कक्षौ पार्श्व (मस्त्री तयोरधः)।**

पु.न. पु.न. पु.न.

शरीर का मध्य **मध्यमं चावलग्नं (च) मध्यो(ऽस्त्री)द्वौ परौ द्वयोः॥७९॥**

बेति—उभौ कक्षौ बाहुमूले स्याताम्—बाह्वोर्मूलं बाहुमूलम्, कष्यत इति कक्षः, द्वित्वे कक्षौ "कक्षा स्यादन्तरीयस्य पश्चादञ्चलपल्लवे । स्पर्द्धापदेनादोर्मूलकच्छवीरुत्तृणेषु चेति" (मेदिनी) इति द्वे बाहुमूलस्य । तयोः कक्षयोरधोभागः स्पृश्यते, पर्शूनां समूहो वेति पार्श्वम् अस्त्री पुंनपुंसकं स्यात् "पार्श्वमन्तिके । कक्षाधोऽवयवे चक्रोपान्ते पर्शुगणेऽपि चेति" (हैमः) इत्येकं कक्षयोरधोभागस्य । मध्ये भवं मध्यमम् "मध्यमं मध्यजेऽवयवे । पुमान्स्वरे मध्यदेशेऽप्यवलग्ने तु न स्त्रियाम् । स्त्रियां दृष्टरजो नार्यां कर्णिकाङ्गुलिभेदयोः । व्यक्षरच्छन्दसि तथेति" (मेदिनी) लग्यते स्म, लग्नं लग्नम्, अवकृष्टं, अवमग्नं वा लग्नम् अवलग्नम् "अवलग्नोऽस्त्रियां मध्ये [illegible] स्याल्लग्नमात्रके" (इति मेदिनी) मध्ये शरीरस्य भवं, मां शोभां भत्ते येति मध्यः [illegible] [illegible] स्यात् "मध्यं विलग्ने न स्त्री स्यान्न्याय्येऽन्तरेऽधमे त्रिलिङ्गि" (मेदिनी [illegible]) [illegible] ॥ ७९ ॥

पु.म. पु.स. पु. पु. पु.स. पु.स.

भुजा कोहनी **भुजबाहू प्रवेष्टो दोः(स्यात्)कफोणिस्तु कूर्परः।**

ऊपरला भाग पु. पु.

निचला भाग **(अस्योपरि)प्रगण्डः(स्यात्)प्रकोष्ठ(स्तस्यचाप्यधः)॥८०॥**

द्वाविति–परौ द्वौ भुजबाहू द्वयोः स्त्रीपुंसयोः स्याताम्–भुजति, भुज्यतेऽनेनेति भुजः, टापि भुजा, "अथोभुजा द्वयोर्बाहौ करे" (इति मेदिनी) बाधते, वहत्यनेनेति वा बाहुः वाहत इति व्युत्पत्त्या तु वाहोपि "वाहोश्वभुजयोः पुमानिति" (दामोदरः) "वाहोऽवाहुरिति स्मृतः" (इति देशीकोषः) बाहोऽश्वमानयोः, वृषे वाहा तु वाहौ स्यादिति" (हैमः) प्रवेष्टत इति प्रवेष्टः, दाम्यत्यनेनेन दोः भागुरिमते टाप् दोषा "दोर्दोषा च भुजो बाहू पाणिर्हस्तः करस्तथा" (इति धनञ्जयः) इति चत्वारि भुजस्य। कं सुखं स्फोरयति, केन सुखेन फणति, स्फुरति वा कफोणिः, कुरतीति कूः, पिपर्तीति परः कूश्चासौ परश्च, कुरा शब्देन परः, कुप्यत्यनेनेति वा कूर्परः इति द्वे कूर्परस्य "कोहनी" इति ख्यातस्य। अस्य कूर्परस्य उपरि ऊर्ध्वभागे प्रत्यासन्नो गण्डः कपोलोऽस्येति 'प्रगण्डः' स्यादित्येकं प्रगण्डस्य। तस्य प्रगण्डस्याप्यधोभागः प्रकुष्यतेऽनेन कुसूलादन्नम्, प्रविष्टः कोष्ठं कुसूलमिति वा प्रकोष्ठः स्यादित्येकं कफोणेरधोमणिबन्धपर्यन्तस्य॥ ८०॥

पु.

पहुँचा बाहिरी **(मणिबन्धादाकनिष्ठं करस्य) करभो (बहिः)।**

भाग हाथ पु. पु. पु. स. स.

तर्जनी **पञ्चशाखः शयःपाणिस्तर्जनी (स्यात्)प्रदेशिनी॥८१॥**

मणीति–मणिर्बध्यतेऽत्रेति मणिबन्धः "मणिबन्धः पाणिमूलमिति" (हलायुधः) तस्मादाकनिष्ठं कनिष्ठापर्यन्तं करस्य बहिर्भागः कृणाति, किरत्यनेनं, करे भातीति वा करभः स्यादित्येकं करबहिर्भागस्य। पञ्चशाखा इवाङ्गुलयोऽस्येति पञ्चशाखः, शेते सर्वमस्मिन्निति शयः, शाम्यति कण्डुर्मलो वानेनेति "शमः" इति पाठान्तरम्। पणायन्त्यनेनेति पाणिः "पाणिः शमः शयो हस्तः" (इत्यमरमाला) इति त्रीणि हस्तस्य। तर्ज्यतेऽनयेति तर्जनी, प्रदिश्यतेऽनयेति प्रदेशनी, प्रदेशोऽस्त्यस्या इति विग्रहे तु प्रदेशिनीति पाठान्तरमिति द्वे अङ्गुष्ठसमीपाङ्गुल्याः॥ ८१॥

स. स. पु. स.

अंगुलियां अ- **अङ्गुल्यः करशाखाः (स्युः) पुंस्यङ्गुष्ठः प्रदेशिनी।**

गूठा समस्त स. स. स.

अंगुली **मध्यमानामिका(चापि)कनिष्ठा(चेति ताःक्रमात्)॥८२॥**

"करशुकहा शयो मतः" ([illegible]) "अङ्गुष्ठो ना ऽङ्गुष्ठमानमिति" (वाचस्पतिः) [illegible] [illegible]॥

अङ्गुलिरिति–अङ्गति, अङ्गुं पाणिपादमवयवं लातीति वा अङ्गुलिः ङीपि अङ्गुली "अङ्गुलिः करशाखायां कर्णिकायां गजस्य चेति" (हैमविश्वप्रकाशौ) अङ्गुरिः, अङ्गुरी वहुत्वे अङ्गुल्यः, करस्य शाखा इव करशाखाः स्युरिति द्वे अङ्गुलीनाम् । अङ्गुशब्दोऽङ्गवाची अङ्गौ पाणौ तिष्ठतीति अङ्गुष्ठः पुंलि स्यात् , प्रदेशोऽस्त्यस्याः प्रदेशिनी उक्तापि यथासंख्यबोधाय पुनरुक्ता, मध्ये भवा मध्यमा, न नामग्रहणयोग्य-मस्याः ब्रह्मणोऽनया शिरश्छेदनादत एवास्यां पवित्रीक्रियते, अनामा सैव अनामिका, अतिशयेनाल्पा कनिष्ठा "कनिष्ठोऽल्पेऽनुजे यूनि कनिष्ठा त्वन्तिमाङ्गुलाविति" (हैम.)इति ताः पञ्चाङ्गुलयः क्रमाज्ज्ञातव्याः इत्येकैकं क्रमेण समस्ताङ्गुलीनाम् ॥८२॥

पु. पु. पु.न. पु.न.

नख=नह तीन **पुनर्भवः कररुहो नखो(ऽस्त्री)नखरो(ऽस्त्रियाम्) ।**

पु. पु. पु.

प्रमाण विशेष **प्रादेशतालगोकर्णा (स्तर्जन्यादियुते तते) ॥ ८३ ॥**

पुनरिति–पुनर्भवतीति पुनर्भवः, "पुनर्नौतीति पुनर्नवः" इति वा पाठः । करे रोहतीति कररुहः, नखमस्येति नखोऽस्त्री पुंनपुंसकं स्यात् "नखी स्त्रीपुंसयोः शुक्तौ नखो पुंनपुंसकमिति" (मेदिनी) न खनति, खन्यते वा नखं रातीति वा नखरोऽस्त्रियां स्यात् "नखरं त्रिषु" (इत्यमरमाला) इति चत्वारि नखस्य । तर्जन्यादियुते तते विस्तृते प्रादेशतालगोकर्णाः क्रमात्स्युः प्रदिश्यत इति प्रदेशः "प्रदेशो देशमात्रे स्यात्तर्जन्यङ्गुष्ठसंमिते" (इति मेदिनी) इत्येकं तर्जनीसमेतविततांगुष्ठस्य । तलत्यत्रेति तालः "तालःकरतलेऽङ्गुष्ठमध्यमाभ्यां च सम्मिते । गीतकालक्रियामाने करस्फाले द्रुमान्तरे" (इति मेदिनी) इत्येकं मध्यमासहितविततांगुष्ठस्य । गोःकर्ण इव गोकर्णः "गोकर्णोऽश्वतरे सर्पे सारङ्गे प्रमथान्तरे । अङ्गुष्ठानामिकोन्माने गोकर्णी मूर्विकौषधाविति" (विश्वः) इत्येकमनामिकासहितविततांगुष्ठस्य ॥ ८३ ॥

पु.म. पु.

बित्ता **(अङ्गुष्ठे सकनिष्ठे स्या) द्वितस्तिर्द्वादशाङ्गुलः ।**

थप्पड़ **(पाणौ) चपेटप्रतलप्रहस्ता (विस्तृताङ्गुलौ) ॥ ८४ ॥**

अङ्गुष्ठ इति–सकनिष्ठे कनिष्ठया समेते विततेऽङ्गुष्ठे वितस्यतीति वितस्तिः, द्वादश अङ्गुलयः प्रमाणमस्येति द्वादशाङ्गुलः स्यादिति द्वे वितस्तेः "वित्ता" इति ख्यातस्य । विस्तृता अङ्गुलयो यस्मिंस्तस्मिन् पाणौ हस्ते चपेटप्रतलप्रहस्ताः स्युः चपतीति चपः, पेटतीति टः चपश्चासौ पेटश्च चपेटः, चर्पटोऽप्यत्र "चर्पटः स्फार[illegible] [illegible] चर्पटेऽपि चेति" (विश्वमेदिन्यौ) प्रतलतीति प्रतलः "प्रतलं पातालभेदे [illegible] [illegible]" (मेदिनी) [illegible] " [illegible] [illegible], [illegible]

चपेटयोरिति" (विश्व·) " तलश्चपेटे तालद्रावितिं" (हैम:) पुंसि तालमहीरुहे चपेटे चेति मेदिनीतश्च पुंस्ययम्, प्रसृतो हस्तः प्रहस्तः इति त्रीणि विस्तृताङ्गुलिहस्तस्य ॥८४ ॥

दुहत्था चटकना (द्वौ संहतौ) सिंहतलः (प्रतलौ वामदक्षिणौ) ।

पसर अँजुरी (पाणिर्निकुब्जः) प्रसृति (स्तौ युता) वञ्जलिः (पुमान्) ८५॥

द्वाविति—द्वौ वामदक्षिणौ प्रतलौ संहतौ मिलितौ सिंहस्येव तलमत्रेति सिंहतलः, संहतं संघट्टं लातीति विग्रहे तु संहतलो वेत्येकं वामदक्षिणयोः पाणयोर्मिलितयोर्विस्तृताङ्गुल्योः । नितरां कुब्जाप्रकृतिरस्येति निकुब्जः, पाणिर्हस्तः प्रसरत्यनेन प्रसृतिः, प्रकृष्टं सृतमस्येति विग्रहे तु प्रसृतो वा "प्रसृतः सम्प्रसारे स्याद्विनीते वेगिते त्रिपु । अर्धाञ्जलौ तु पुंलिङ्गो जङ्घायां प्रसृता मता" (इति मेदिनी) इत्येकं प्रसृतस्य "पसर" इति ख्यातस्य । तौ प्रसृतौ, युतौ मिलितौ अज्यतेऽनेनेत्यञ्जलिः पुमान्स्यात् "अञ्जलिस्तु पुमान् हस्तसंपुटे कुडवेऽपि च" (इति मेदिनी) इत्येकमञ्जलेः ॥ ८५ ॥

हाथ मुण्डाहाथ कनिष्ठारहित (प्रकोष्ठे विस्तृतकरे) हस्तो (मुष्ट्या तु बद्धया) ।

मूठीवाला हाथ सरत्निः स्याद्रत्नि (स्तु निष्कनिष्ठेन मुष्टिना) ॥ ८६ ॥

प्रेति—विस्तृतकरे विस्तृतः करो यस्य यस्मिन्वा तस्मिन् प्रकोष्ठे कूर्परादधः प्रदेशे हसति, हस्यतेऽनेनेति वा हस्तः स्यात् "चतुर्विंशत्यङ्गुलो हस्तः" सकलसिद्धान्तोक्तत्वादित्येकं हस्तस्य । वध्यते स्म, वद्धा तया मुष्णाति, मुष्यतेऽनयेति वा मुष्टिस्तयोपलक्षितः सहरत्नः ऋच्छति, अर्यतेऽनेनेति वा रत्निः स्यात् "रत्न्यरत्नी स्त्रियौ वद्धमुष्टिततांगुली" (इत्यमरमाला) इत्येकं रत्नेः । निर्गता कनिष्ठा यस्मात्तेन मुष्टिनोपलक्षितो हस्तः रत्निभिन्नोऽरत्निः स्यात् "नारत्निः कफोणौ हस्ते सप्रकोष्ठे चाङ्गुलाविति" (रुद्रः) इत्येकमरत्नेः ॥ ८६ ॥

फैला हाथ व्यामो (वाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्) ।

ऊपर उठा हाथ (ऊर्ध्वविस्तृतदोःपाणि नृमाने) पौरुषं (त्रिपु) ॥ ८७ ॥

व्येति—तिर्यक् ततयोः सकरयोः बाह्वोरन्तरं मध्यं विशेषेण अम्यतेऽनेनेति व्यामः स्यात् इत्येकं स्वे स्वे पार्श्वे प्रसारितयोर्बाह्वोर्मध्यस्य । दोषौ च पाणी चैषां समाहारो दोःपाणि ऊर्ध्वं विस्तृतं दोःपाणि येन सः तादृशो ना पुरुषस्तस्य यन्मानं परिमाणं तेन पुंसा वा यन्मीयते तत्र पुरुषः प्रमाणमस्येति पौरुषं त्रिपु त्रिलिङ्गः स्यात् यथा पौरुषो नदः, पौरुषी नदी, पौरुषं सरः "पौरुषं पुरुषस्य स्याद्भावे कर्मणि तेजसि । ऊर्ध्वविस्तृतदोःपाणि नृमाने त्वभिधेयवत्" (इति मेदिनी) इत्येकं पौरुषस्य ॥८७॥

कण्ठ ग्रीवा पु.स.न. पु. स. स. स.
तीन रेखावाली कण्ठो गलो (थ) ग्रीवायां शिरोधिः कन्धरे (त्यपि)।
स. पु.स. स. स.
ग्रीवा वाटी कम्बुग्रीवा (त्रिरेखा सा) ऽवटुर्घाटा कृकाटिका ॥ ८८॥

केति—कणति, कणठते वा कण्ठः "समीपगलशब्देषु त्रिषु कण्ठं विदुर्बुधाः" (इति शाश्वतः) कण्ठो गले संनिधाने ध्वनौ मदनपादपे" (इति विश्वः) गलति, गिलति, गीर्यतेऽनेनेति वा गलः "गलः कण्ठे सर्जरसे" (इति मेदिनी) इति द्वे ग्रीवाग्रभागस्य । अथेति—गीर्यतेऽनयेति ग्रीवा तस्याम् , शिरो धीयतेऽस्यामिति शिरोधिः, कं शिरो धरति, धारयति वा कन्धरा इति त्रीणि ग्रीवायाः । तिस्रो रेखा यस्यामिति त्रिरेखा सा कम्बुः शङ्ख इव ग्रीवेति 'कम्बुग्रीवा' इत्येकं कम्बुग्रीवायाः। अवटलति, अवटीकते, न वटतीति वा अवटुः, "अवटुः पुंसि कृकाटिका घाटा" (इति वोपालितः) घाटयति, घाट्यते वा घाटा, कृकं कण्ठमटतीति कृकाटा सैव कृकाटिका इति त्रीणि ग्रीवायामुन्नतभागस्य "घांटी" इति ख्यातस्य ॥ ८८ ॥

न. न. न. न. न. न न.
मुख वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।
न. म. स. स. स.
नासिका (क्लीबे)घ्राणं गन्धवहा घोणा नासा (च)नासिका॥८९॥

वेति—उच्यतेऽनेनेति वक्त्रम्, आस्यन्दते प्रस्रवत्यस्माल्लादिना, आस्यन्दते प्रक्रियते वान्नादिना अस्यन्ते वर्णा येनेति, अस्यते ग्रासोऽस्मिन्निति आस्यम् "मुखं मुखान्तरालं च द्वयमास्यमितीरितम्" (इति शाश्वत.) वदत्यनेनेति वदनम्, तुण्डतीति तुण्डम्, आनन्त्यनेनेति आननम्, लप्यतेऽनेनेति लपनम्, खन्यतेऽनेनेति मुखम् "प्राक् खनो मुडागमश्च ततोऽच् प्रत्ययो भवेत् । प्रत्नासूत्रा यत स्यात् तस्मादाहुर्मुखं बुधाः" इति मत्र मुखनिलम्य । घ्रायतेऽनेनेति घ्राणम् "घ्राणं क्लीवं नासिकायां घ्राते स्यात्त्रिलिङ्गकमिति" (मेदिनी) वहतीति वहा, गन्धस्य वहा गन्धवहा "गन्धवाहा नासायां पुंलिङ्गे मातरिश्वनि" (इति मेदिनी) घोणत्यनयेति घोणा, नासतेऽनयेति नासा, नासत इति नासिका "घ्राणं गन्धवहा नासा नसा नस्या च नासिका" (इति शब्दार्णव.) इति पञ्च नासिकायाः ॥ ८९ ॥

पु. पु. न.
ओष्ठ ओष्ठाधरौ (तु) रदनच्छदौ दशनवाससी ।
न पु पु. पु.स.
ठोड़ी (अधस्ता)च्चिबुकं गण्डौ कपोलौ (तत्परो) हनुः ॥ ९०॥

ओष्ठेति—... ओष्ठ ... ओष्ठो न ... इति ...

अधरौ ओष्ठौ च अधरौ चेति ओष्ठाधरौ "द्वन्द्वश्च प्राणीत्येकत्वं न भवति अनित्यत्वात्" ओष्ठाभ्यां युतावधराविति शाकपार्थिवादिर्वा रदनाः छाद्यन्ते आभ्यामिति रदनच्छदौ, दशनानां वाससी इव आवरकत्वादिति चत्वार्युत्तराधरोष्ठमात्रस्य । अधरोष्ठस्य अधस्तात् चीवति, चीव्यते, चिनोति शोभां वेति चिवु तदेव चिवुकमित्येकमोष्ठाधोभागस्य । गण्डतीति गण्डः द्वित्वे गण्डौ, "गण्डः स्यात्पुंसि खड्गिनि । ग्रहयोगे प्रभेदे च वीथ्यङ्गे पिटकेऽपि च । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे" (इति मेदिनी) कम्यते, कं सुखं पोलतीति वा कपोलः द्वित्वे कपोलाविति द्वे कपोलस्य । ताभ्यां कपोलाभ्यां परः हन्तीति हनुः "हनुर्हट्टविलासिन्यां मृत्यावस्त्रे गदे स्त्रियाम् । द्वयोः कपोलावयवे" (इति मेदिनी) इत्येकं कपोलाधोभागस्य ॥ ९० ॥

पु. पु.न. पु. पु. न. न.

दात, तालु, **रदना दशना दन्ता रदास्तालु (तु) काकुदम् ।**

जीभ स स. स. न.

ओठका किनारा **रसज्ञा रसना जिह्वा (प्रान्तावोष्ठस्य) सृक्कणी ॥ ९१ ॥**

रेति—रद्यतेऽनेनेति रदनः बहुत्वे रदनाः, दशन्तीति दशनाः, दाम्यन्तीति दन्ताः, रदन्तीति रदाः इति चत्वारि दन्तानाम् । तालयति, तरन्त्यनेन वर्णा इतिवा तालु, काकुर्जिह्वा उद्यतेऽनुद्यतेऽस्मिन्, ईषत्कवते, "निश्चेष्टं ककुदं शिरः" ककुदे भवं वा काकुदमिति द्वे तालुनः । रसं जानातीति रसज्ञा, रसति, रसयति, रसन्त्यनयेति वा रसना "तालव्या अपि दन्त्याश्च" इत्यादौ "जिह्वायां रशना तथा" इत्युक्तेर्दन्त्यतालव्यमध्येयम् । लेढि, लिहन्त्यनयेति वा जिह्वा इति त्रीणि जिह्वायाः । ओष्ठस्य प्रान्तौ सृजति लालादिकमिति सृक्कणी "प्रान्तावोष्ठस्य सृक्कणीति क्लीबकाण्डेऽमरदत्तः" कवयुक्तं (सृक्वणी) इत्यन्ये (सृक्कणी) ङयन्ता इत्येके अदन्तं सृक्कमित्यपरे 'सृक्किशब्दो ह्रस्वेकारान्तोऽपि क्लीब इत्यपरे' इत्येकमोष्ठान्तयोः ॥ ९१ ॥

न. न. पु. स.

भाल, भौंह, **ललाटमलिकं गोधि (रूर्ध्वे दृग्भ्यां) भ्रुवौ (स्त्रियौ) ।**

भ्रूमध्य, पु.न. स. स.

नेत्र, तिल **कूर्च (मस्त्री भ्रुवोर्मध्यं) तारका (क्ष्णः) कनीनिका ॥ ९२ ॥**

लेति—ललनं ललो विलासस्तमटतीति ललाटम्, अलति—अल्यते वा अलिकम्—अलीकमपि "अलिकं ह्रस्वदीर्घमध्यमिति राजदेव." गुध्यति, गावौ नेत्रे धीयते यस्मिन्निति गोधिः "भाले गोध्यलिकालीकललाटानीति" नाममालायामिति त्रीणि ललाटस्य । दृग्भ्यामूर्ध्वभागे भ्रमति, भ्राम्यतीति भ्रूः द्वित्वे भ्रुवौ स्त्रियौ स्यातामित्येकं नेत्रोपरिभागस्थरोमराजेः । भ्रुवोर्मध्यं कुरति, कूर्दते वा कूर्चमस्त्री पुन्नपुंसकं स्यात् "कूर्चमस्त्री भ्रुवोर्मध्ये कत्थनश्मश्रुकैतवे" (इति मेदिनी) अक्ष्णो मध्यं तारयतीति तारका "तारकोदन्त्यभित्कनीनिकयोर्न द्वयोर्दृशि । कनीनिकायामङ्गुले च न पुमांस्त्रा-

तरि त्रिषु" (इति मेदनी) कनतीति कनीना सैव कनीनिका "कनीनिका तारकेऽक्ष्णः स्यात्कनिष्ठाङ्गुलावपि" (इति मेदिनी) इति द्वे अक्षितारकायाः ॥ ९२ ॥

न. न. न. न. न. न.

आँख **लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।**

स. स. न. न. न. न. न.

आँसू **दृग्दृष्टी चास्रु नेत्राम्बु रोदनं चास्रमश्रु (च) ॥ ९३॥**

लविति—लोच्यतेऽनेनेति लोचनम्, नीयतेऽनेनेति नयनम्, नीयतेऽनेनेति नेत्रम् "नेत्रं मथिगुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां तु नेत्री नेतरि वाच्यवदिति" (मेदिनी) ईक्ष्यतेऽनेनेति ईक्षणम् । चष्टे, चक्षतेऽनेनेति वा चक्षुः, अश्नुते, अश्नुतेऽनेनेति वा अक्षि अक्षं वा, पश्यतीति दृक्, दृश्यतेऽनयेति दृष्टिः "दृष्टिर्ज्ञानेऽक्ष्णि दर्शने" (इति हैमः) इत्यष्टौ लोचनस्य । अस्यतीति अस्रु, नेत्रयोरम्बु नेत्राम्बु, रुद्यत इति रोदनम्, अस्यतीति अस्रम् "अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते" (इति मेदिनी) अश्नुते कण्ठमिति अश्रु "जागरे चाश्रुणीत्यूष्मभेदात्तालव्यप्रकरणोक्तेश्च" तालव्यशमपीति पञ्च रोदनस्य "आँसू" इति ख्यातस्य ॥ ९३ ॥

आँखों के किनारे

पु. पु.

अपाङ्गौ (नेत्रयोरन्तौ) कटाक्षो (ऽपाङ्गदर्शने) ।

किनारों से देखना

पु. पु. न. स. पु.न. न.

कान **कर्णशब्दग्रहौ श्रोत्रं श्रुतिः(स्त्री)श्रवणं श्रवः ॥ ९४ ॥**

अपेति—नेत्रयोरन्तौ अपाङ्गति, अपकृष्टोऽङ्गात्, अपकृष्टान्यङ्गान्यस्माद्वेति 'अपाङ्गः' द्वित्वे अपाङ्गौ स्याताम् "अपाङ्गस्त्वङ्गहीने स्यान्नेत्रान्ते तिलकेऽपि च" (इति त्रिक) इत्येकमपाङ्गस्य । अपाङ्गेन दर्शनम् अपाङ्गदर्शनं तस्मिन्, कटावतिशयितावक्षिणी यत्र, कटं गण्डमक्षनीति वा कटाक्षः "कटाक्षकाक्षाविविस्मसान्" कालोति इति द्वे कटाक्षस्य । कीर्यते शब्दग्रहणाय क्षिप्यते, कीर्यते शब्दो यस्मिन्, किरति शरीरं सुखमः, कर्णयतीति वा कर्णः "कर्णः पृथासुते ज्येष्ठे सुवर्णालौ श्रुतावपि" (इति मेदिनी) शब्दो गृह्यतेऽनेनेति शब्दग्रहः, श्रूयतेऽनेनेति श्रोत्रम्, श्रूयतेऽनयेति श्रुतिःस्त्री स्यात् श्रवणि, श्रूयतेऽनेनेति वा श्रवणम्, "श्रवणं श्रुतौ" श्रूयतेऽनेनेति श्रवः इति षट् कर्णस्य ॥ ९४ ॥

न. न. न. पु. पु.न.

[illegible] **उत्तमाङ्गं शिरःशीर्षं मूर्धा(ना)मस्तको(ऽस्त्रियाम्) ।**

पु. पु. पु. पु. पु. पु.

[illegible] **चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥ ९५ ॥**

[illegible] । [illegible] उत्तमाङ्गम्, [illegible] शिरः [illegible]

प्रधाने सेनाग्रे शिखरे मस्तकेऽपि च" (इति मेदिनी) शिरोवाची शिरोऽदन्तो रजोवाचीरजस्तथा, "कुमारशीर्षयोरिति ज्ञापका"च्छिरःशब्दस्य शीर्षादेशे शीर्षम्, मुह्यत्यस्मिन्नाहते मूर्धा ना पुमान्स्यात्, मस्यतेस्म मस्तः स एव मस्तकः अस्त्रिया पुन्नपुंसके स्यादिति पञ्चशिरसः। 'चि' इति अव्यक्तं कुरतीति चिकुरः, कुन्तं कुन्ताकारं लातीति कुन्तलः, "कुन्तलश्चषके बाले यवे ना भूम्निनीवृति" (इति मेदिनी) वलतीति बालः, कच्यते, कचयत्यात्मानं वेति कचः "कचःशुष्कव्रणे केशे वन्धे पुत्रे च गीर्पतेः। कचाकरेणवामिति"(हैमः)क्लिश्नाति, क्लिश्यते, केशेते वा केशः "केशःस्यात्पुंसि वरुणे ह्रीबेरे कुन्तलेपि च"(इति मेदिनी) शिरसि रोहतीति शिरोरुहः इति षट् केशस्य॥९५॥

न. न. पु. पु.

केशसमूह (तद्वृन्दे) कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः।

टेढे बाल ललाट पर पु. पु. पु.

झुके जुल्फें (ते ललाटे) भ्रमरकाः काकपक्षः शिखण्डकः॥ ९६॥

तदिति—तेषां केशानां वृन्दे समूहे कैशिकम्, कैश्यं च स्यात् केशानां समूहः कैशिकम्, पक्षे कैश्यमिति द्वे केशवृन्दस्य। अलति, अल्यते वेति अलकः, बहुत्वे अलकाः "अलका कुबेरपुर्यामस्त्रिया चूर्णकुन्तले" (इति मेदिनी) चूर्णस्य कर्पूरादिक्षोदस्य कुन्तलाः इति द्वे वक्रकेशानाम्। ते अलकाः ललाटे स्युस्तदा भ्रमर इव भ्रमरकः बहुत्वे 'भ्रमरकाः' भवन्ति "अथ भ्रमरको भृङ्गे गेरिके चूर्णकुन्तले" (इति मेदिनी) इत्येकं ललाटनतकेशानाम्। काकस्य पक्षइव काकपक्षः, शिखाया अण्ड इव शकन्ध्वादित्वात् शिखण्डकः "शिखण्डो तु शिखा बर्हाविति तालव्यादौ" (रभसः) "शिखण्डो बर्हचूडयोः" (इति मेदिनी) शकन्ध्वादित्वं केचिन्नेच्छन्ति "शिखाण्डकशिखण्डकाविति" (वाचस्पतिसुभूती) इति द्वे सामान्येन शिखायाः, बालानां शिखाया वा॥ ९६॥

स. पु. पु.

चोटिया जूड़ा कवरी केशवेशो (ऽथ) धम्मिल्लः (संयताः कचाः)।

स. स. स. स. स.

चोटी लट शिखा चूडा केशपाशी (व्रतिनस्तु) जटा सटा॥९७॥

केति—कूयते, कंशिरो वृणोत्याच्छादयतीति वा कवरी "कवरी केशविन्यासशाकयोरिति" (हैम.) केशानां वेशो मार्जनाबन्धविशेषः केशवेशः इति द्वे केशवेशस्य। ध्रियेति संयताः स्वस्थाः मुक्तादिभिर्ग्रथिता वा कचाश्चेत्तदा धमतीति धम, मिल्लतीति मिल्लः, धम् चासौ मिल्लश्चेति धम्मिल्लः इत्येकं चूडायाः "जूडा" इति ख्यातायाः। शेते इति शिखा "शिखा शाखा बर्हिचूडा लाङ्गलिक्यग्निचूडके। चूडामात्रे शिफायां च ज्वालायां प्रपदेऽपि च" (इति मेदिनी) चूडयते इति चूडा "चूडा शिख-

श्रयोः । बाहुभूपावलभ्योश्चेति" (हैमः) केशानां पाशो यस्यामिति केशपाशी इति त्रीणि शिरोमध्यस्थचूडायाः "चोटी" इति ख्यातायाः । व्रतिनः शिखा जटी, जन्यते, जायते वेति जटा "जटा लग्नकचे मूले मांस्यां प्लक्षे पुनर्जटी" (इति मेदिनी) सटतीति सटा "सटा जटाकेसरयोरिति" (मेदिनी) "कोटीरस्तु जटा सटेति" (रभसः) इति द्वे तपस्विजटायाः ॥ ९७ ॥

स. स. पु. पु.
वेनी लुटरी **वेणिः प्रवेणी शीर्षण्यशिरस्यौ (विशदे कचे)।**
साफ पु. पु. पु.
केशसमूह **पाशः पक्ष(श्च)हस्त(श्च कलापार्थाः कचात्परे)॥९८॥**

वेणीति—वेणातीति वेणिः, वेणी वा "वेणी सेतुप्रवाहयोः । देवताडे केशबन्धे" (इति हैमः) प्रवेणातीति, प्रकृष्टा वेणिर्वेति प्रवेणिः प्रवेणी वा इति द्वे प्रोषितभर्तृकादिधार्यकेशरचनाविशेषस्य । विशदे स्नानादिनिर्मले कचे केशे शिरसि भवः शीर्षण्यः पक्षे शिरस्यः उभौ स्यातामिति द्वे विशदकचस्य । कचात्कचवाचकात्परे सन्तः पाशाद्यास्त्रयः कलापोऽर्थो येषामिति कलापार्था भवन्तीति यथा पाश्यत इति पाशः "पाशस्तु मृगपश्वादिबन्धने । कर्णान्ते शोभनार्थः स्यात्कचान्ते निकरार्थकः । छात्राद्यन्ते च निन्दार्थः" (इति हैमः) पक्ष्यत इति पक्षः "पक्षो मासार्धके गेहपार्श्वसाध्यविरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः" (इति मेदिनी) हसति, हस्यते वा हस्तः "हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च । ऋक्षे केशात्परो व्राते" (इति मेदिनी) कचपाशः, केशपाशः, केशपक्षः, कुन्तलहस्त इत्यादयः स्युरिति त्रीणि केशसमूहस्य ॥ ९८ ॥

पु.न. न. न. न.
रोम दाढ़ी **तनूरुहं रोम लोम (तद्वृद्धौ) श्मश्रु (पुंमुखे)।**
भोगश्रृंगार पु. पु. न न. न
की शोभा **आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥ ९९ ॥**

तनूरुहमिति—तन्वां रोहतीति तनूरुहम्, "तनूरुहं तु लोम्नि स्यात्पतत्रे च नपुंसकमिति" (मेदिनी) "तनूरुहस्तु पुत्रे गरुति लोम्नि चेति" (हैमः) रोहतीति रोम, लूयत इति लोम इति त्रीणि तनूरुहस्य । पुंसो मुखे तथा लोम्नां वृद्धिस्तस्यां श्मश्रु ... श्मश्रु स्यादित्येकं दाढिकायाः । आकल्पयति, आकल्प्यते वा आकल्पः, वेवेष्टि, विष्यते, वेषणं वा वेषः, ... "नेपथ्ये चेति" (मेदिनी) ... नेपथ्यम् "नेपथ्यन्तु प्रसाधने । ... " (इति हैमः) ... प्रतिकर्म ...

प्रसाध्यतेऽङ्गमनेनेति प्रसाधनमिति पञ्चालङ्काररचनादिकृतशोभायाः ॥ ९९ ॥

पु.स.न. पु.स.न. पु.स.न.
अलङ्कार करने (दशैते त्रिष्व) लंकर्तालंकरिष्णुश्च मण्डितः ।
वाला पु.स.न. पु.स.न. पु.स.न. पु.स.न.
अलङ्कारयुत प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः ॥ १०० ॥

देति—एते वक्ष्यमाणा रोचिष्णुपर्यन्ताः दश त्रिषु त्रिलिङ्गयां भवन्ति । अलं करोतीति अलंकर्ता, अलंकरणशीलोऽलंकरिष्णुरिति द्वे अलंकरणशीलस्य । मण्ड्यते स्म मण्डितः, प्रसाध्यते स्म प्रसाधितः, अलं क्रियते स्म अलंकृतः, भूष्यते स्म भूषितः, परिष्क्रियते स्म परिष्कृतः इति पञ्च भूषितस्य ॥ १०० ॥

पु.स.न. पु.स.न. पु.स.न. स. स.
अलङ्कारादिको विभ्राड्भ्राजिष्णुरोचिष्णूभूषा (तु स्या) दलंक्रिया ।
से अतिशोभित पु. न. पु. न.
अलंकारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥
शृङ्गार गहना न. न. पु.न.
मुकुट मण्डनं (चाथ) मकुटं किरीटं (पुन्नपुंसकम्) ।

वीति—विभ्राजते तच्छीलो विभ्राट्, भ्राजनशीलोभ्राजिष्णुः, रोचितुं शीलमस्येति रोचिष्णुरिति त्रीण्यलंकारादिना शोभमानस्य । भूषणं भूषा, अलंकरणमलंक्रिया स्यादिति द्वे भूषायाः । अलंक्रियतेऽनेनेति अलंकारः "अलंकारः कङ्कणादिषु । उपमादाविति" (हैमः) आभ्रियतेऽनेनेति आभरणम्, परिष्क्रियतऽनेनेति परिष्कारः, विभूष्यतेऽनेनेति विभूषणम्, मण्ड्यतेऽनेनेति मण्डनमिति पञ्च विभूषणानाम् । अथेति मङ्कतेऽनेनेति मकुटम्, द्युकारपाठे तु वाहुलकाद्धातोरत उः मुकुटमपि, किरति, कीर्यतेऽनेनवा किरीटं पुन्नपुंसकं स्यादिति द्वे किरीटस्य ॥ १०१ । ३/४ ॥

चोटी की मणि पु. न. पु.
हारके बीच की चूडामणिः शिरोरत्नं तरलो (हारमध्यगः) ॥ १०२ ॥
बड़ी मणि चोटी स. स. स. स.
की सोनेकी पट्टी बालपाश्या पारितथ्या पत्रपाश्या ललाटिका ।
कर्णभूषण या स. न. न. न.
तर्ण कुण्डल कर्णिका तालपत्रं (स्या)त्कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥

चूडेति—चूडायामणिश्चूडामणिः, "चूडामणिः काकचिञ्चाफले मूर्धमणावपि" (इति हैमः) शिरसो रत्नं शिरोरत्नमिति द्वे चूडामणेः । हारस्य मध्यं हारमध्यं गच्छतीति हारमध्यगोमणिः तरं तरणं लातीति तरलः कथ्यते "तरलं चञ्चलेपिद्धे भास्वरेऽपि [illegible] । [illegible] पुंसि यवागूसुरयोः स्त्रियामिति" (मेदिनी) इत्येवं

कङ्कणम् "कङ्कणं करभूषायां सूत्रमण्डनयोरपि" (इति मेदिनी) करं भूषयति, क्रो भूष्यतेऽनेन वा करभूषणम् "हस्तमण्डनसूत्रे स्यात्कङ्कणोना प्रतीसरः" (इति रत्नकोषः) इति द्वे करभूषणस्य । स्त्रीणां कटिस्तस्यां मखं गतिं लातीति पृषोदरादित्वान्मेखला काञ्चत इति काञ्ची काञ्चिर्वा "काञ्ची स्यान्मेखला दाम्नि प्रभेदे नगरस्य च" (इति मेदिनी) सप्तभिरनेकाभिः किङ्किणीभिः, सप्तस्वरान् कायतीति वा सप्तकी, अश्नुते अश्नाति, रशतीति वा रशना, रसयतीति विग्रहे तु 'रसना' दन्त्यमध्यापि, सारमुत्कृष्टं सनमस्येति सारसनम् "मेखलायां सारसनमुरस्त्रे च तनुत्रिणामिति दन्त्यादौ रभसः' क्लीबे नपुंसके स्यादिति पञ्चस्त्रीकटिभूषणस्य । अथेति पुंसां कट्यां चेत् काञ्ची शृङ्खलतीति पृषोदरादित्वात् शृङ्खलं त्रिषु त्रिलिङ्गयां स्यात् "शृङ्खलं पुंस्कटी काञ्च्यां लोहरज्जौ च बन्धने" इति हैमः । इत्येकं पुरुषकटिकाञ्चिकायाः ॥ १०८ । ३ ॥

न. पु. पु.न. पु.न.

बिछिया या पायजेब **पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरो(ऽस्त्रियाम्)** ॥ १०९ ।

पु. पु. स. स.

घुंघुरू **हंसकः पादकटकः किङ्किणी क्षुद्रघण्टिका ।**

स.

वस्त्रों के बनाने का कारण **(त्वक्फलकृमिरोमाणि) वस्त्रयोनि(र्दशत्रिषु)** ॥ ११० ॥

पेति—पादस्याङ्गदमिव, पादएवाङ्गं, पादाङ्गं दायति, दयते, द्यति वा पादाङ्गदम् तुलां तुलया वा कोटयति, तुलाकारं कोटिरग्रमस्येति वा तुलाकोटिः "तुलाकोटिर्मान भेदेऽम्बुदे स्यान्नूपुरेपि च" (इति हैम.) मञ्जतीति मञ्जीरः, नुवनं नूयते वा नूः तस्य पुरतीति नूपुरः उभावस्त्रियां पुन्नपुंसके स्याताम् "मञ्जीरोऽस्त्रीस नूपुरः (इति रभसः) हंसइव, हंसइव कायतीति वा हंसकः, पादस्य पादयोर्वा कटको वलयः पादकटकः इति पट् नूपुरस्य । किञ्चित्किणां शब्दं करोति, किङ्किणयति वा किङ्किणी, स्वामिमतेतु पदे गता कणतीति, कं सुखं कणति वा कङ्कणी "कङ्कणः स्यात्प्रतिसरः कङ्कणी क्षुद्रघण्टिका" (इति भागुरिः) घण्टति, घण्टयति, घण्टेव वा घण्टिका क्षुद्रा चासौ घण्टिका चेति क्षुद्रघण्टिका इति द्वे किङ्किण्या. "घुंघुरू" इति ख्यातायाः । त्वक्फलकृमिरोमाणि वस्त्राणां योनिः कारणं वस्त्रयोनिरित्येकं वस्त्रकारणस्य । वक्ष्यमाणानि क्षौमादियर्न्ते वाल्कादीनि निष्प्रवाणयन्तानि दश त्रिषु त्रिलिङ्गया भवन्ति चकारादेकादशं तन्त्रकमपि त्रिषु स्यादिति ॥ १०९ । ११० ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] **वाल्कं(क्षौमादि)फालं'तु' कार्पासं बादरं (च तत्) ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] **कौशेयं कृमिकोशोत्थं राङ्कवं मृगरोमजम्** ॥ १११ ॥

[illegible] मुख्याः ॥

वेति—क्षुमाया अतस्याः विकारः क्षौमं तदेवादि यस्येति क्षौमादि वस्त्रं वल्कस्य विकारो वाल्कं स्यादित्येकमतस्यादिरचितवस्त्रस्य । फलस्य विकारः फालम्, कर्पास्याः कर्पासस्य वा विकारः कार्पासम्, वदराया वदरस्य वा विकारो बादरमिति त्रीणि कर्पासरचितवस्त्रस्य । कोशे, कोषे वा संभूतं कौशेयम्, कौषेयं वा कृमीणां कोशस्तस्मादुत्थं जातं कृमिकोशोत्थमिति द्वे कृमिकोशोद्भववस्त्रस्य । रङ्कौ भवं राङ्कवम्, मृगाणां रोमाणि तेभ्यो जातं मृगरोमजम्, मृगशब्देनात्र पशुमात्रं ग्राह्यं तेन कम्वलाद्यपि राङ्कवं ज्ञेयमिति द्वे पशुरोमरचितवस्त्रस्य ॥ १११ ॥

पु.स.न. पु.स.न. पु.स.न. न.

नवीन वस्त्र, **अनाहतं निष्प्रवाणि तन्त्रकं (च) नवाम्बरे ।**

न.

धोये वस्त्र **(तत्स्याद्) उद्गमनीयं (यद्धौतयोर्वस्त्रयोर्युगम्) ॥ ११२ ॥**

अनेति—न आहतमनाहतम्, प्रोयतेऽनयेति प्रवाणी, निर्गता प्रवाणी तन्तुवायशलाकाऽस्मादिति निष्प्रवाणि, तन्त्रादचिरापहृतम् तन्त्रकम्, नवं च तदम्बरं चेति नवाम्बरमिति चत्वारि क्षेदभोगक्षालनरहितवस्त्रस्य । धौतयोः प्रक्षालितयोर्वस्त्रयोर्यद्युगं तत् उद्गम्यतेऽभिलष्यते इति उद्गमनीयं स्यादित्येकं धौतवस्त्रयुगस्य ॥ ११२ ॥

न. न. न न.

धोये रेशमी दुशाला आदि **पत्त्रोर्णं धौतकौशेयं बहुमूल्यं महाधनम् ।**

न. न. पु.स.न. पु.स न.

पट्ट वस्त्र वस्त्रों का किनारा **क्षौमं दुकूलं (स्याद्) द्वे तु निवीतं प्रावृतं (त्रिषु) ॥ ११३ ॥**

पेति—पत्त्रेषु कृतोर्णा पत्त्रोर्णास्यत्रेति पत्त्रोर्णम् "पत्त्रोर्णं धौतकौशेये पत्त्रोर्णः शोणकद्रुमे" (इति हैमः) धाव्यते स्म धौतम् धौतं च तत्कौशेयं च धौतकौशेयमिति द्वे प्रक्षालितकौशेयस्य । वहु मूल्यमस्येति वहुमूल्यम्, महद्धनमूल्यमस्येति महाधनमिति द्वे वहुमूल्यवस्त्रस्य । क्षौति, क्षूयते वा क्षौमम् "क्षौममट्टे दुकूलेऽस्त्रीति" (मेदिनी) क्षौममेव क्षौमम्, दुष्टं कूलति पृषोदरादित्वाद्दुकूलं स्यादिति द्वे पट्टवस्त्रस्य । निवीयते स्म निवीतम्, प्राव्रियते स्म प्रावृतम्, द्वे त्रिषु त्रिलिङ्गयां स्यातामिति द्वे वस्त्रावृतस्य, वस्त्रान्तस्य वा ॥ ११३ ॥

स. पु त.

पल्ली या छोर **(स्त्रियां बहुत्वे वस्त्रस्य) दशाः (स्युः) वस्तयो (द्वयोः) ।**

न. पु. पु. पु. स.

लम्बाई चौड़ाई **दैर्घ्यमायाम आनाहः परिणाहो विशालता ॥ ११४ ॥**

स्त्रियामिति—वस्त्रस्य दश्यन्त इति दशाः स्त्रियां बहुत्वे स्युः "दशावस्थानेकवर्त्ति-

---

१ [illegible]

वस्त्रान्ते भूम्नि पुंल्लिङ्गयोरिति " (रभसः) वस्यत इति वस्तिः बहुत्वे ' वस्तयः ' द्वयोः स्त्रीपुंसयोः स्युरिति द्वे वस्त्रान्तावयवानाम् । दीर्घस्य भावो दैर्घ्यम् , आयाति आयम्यते ऽनेन, आयमनं वा आयामः, आनह्यतेऽनेन आनाहः, आरह्यतेऽनेन " आरोहः " इति पाठान्तरम् "आरोहस्त्ववरोहे च वरयोषित्कटावपि । आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये " (इति मेदिनी) इति त्रीणि दैर्घ्यस्य । परिणह्यतेऽनेनेति परिणाहः, विशालस्य भावो विशालता इति द्वे परिणाहस्य " पनहा " इति ख्यातस्य ॥११४॥

न. न. पु. पु.

पुराना वस्त्र फटा या चिथड़ा **पटच्चरं जीर्णवस्त्रं (समौ) नक्तककर्पटौ ।**

न. न. न. न. न. न.

वस्त्रमात्र **वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ॥ ११५ ॥**

पटदिति—पटदित्यव्यक्तं शब्दं चरति, पटं इवाचरति, पटतीति पटत् पूर्वं भूतं पटदिति वा पटच्चरम्, जीर्णं च तद्वस्त्रं चेति जीर्णवस्त्रमिति द्वे जीर्णांशुकस्य । नजत इति नक्तः स एव नक्तकं सुखमस्मादिति वा नक्तकः, क्वचित् ' लक्तकः ' इति पाठः । लक्यते स्म लक्तः स एव ' लक्तकः ' किरति, कृणाति, करोति वा कर्, पटतीति पटः कर् चासौ पटश्च, करस्य पटः शकन्ध्वादित्वात् कर्पटः उभौ समौ समानार्थौ समानलिङ्गौ स्तः इति द्वे प्रस्वेदादिमार्जनार्थहस्तस्थवस्त्रखण्डस्य, मलिनत्वादिदुष्टजीर्णवस्त्रखण्डस्य वा " चिथड़ा " इति ख्यातस्य । वस्यतेऽनेनेति वस्त्रम्, आच्छाद्यतेऽनेन आच्छादनम्, वस्यतेऽनेन वासः, चिल्यतेऽनेनेति चेलं तदेव चैलं वा "चेलो नीचेऽधमे त्रिषु, नपुंसकन्तु वसने " (इति मेदिनी) वस्यतेऽनेन वसनम्, अंशुः सूत्रादिसूक्ष्मांशे किरणे चाप्यदीधितेः " (इति हैमः) अंशून् कायति, अंशुभिः काशते वा अंशुकम् "अंशुकं श्लक्ष्णवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोरिति" (मेदिनी) इति षट् वस्त्रस्य ॥ ११५ ॥

पु. पु.न. पु.न. पु.स.न.

कपड़े वस्त्र मोटे **सुचेलको पटोऽस्त्री (ना) वराशिः स्थूलशाटकः ।**

कपड़े ओढ़ार पु. पु. पु. पु.

गफ्रा **निचोलः प्रच्छदपटः (समौ) रल्लककम्बलौ ॥ ११६ ॥**

सुचेलेति—शोभनं चेलं सुचेलं कायतीति सुचेलकः, पटतीति पटः अस्त्री स्यात् "पटस्त्रिवस्त्रे वस्त्रेऽस्त्री प्रियालद्रुमे पुमानिति" (मेदिनी) इति द्वे शोभनवस्त्रस्य । वरं श्रेष्ठं वस्त्रं वा अश्नुते वराशिः ना पुमान्स्यात् "वराशिः स्यात्स्थूलपटे वरासिः स्थूलशाटके " (इति दन्त्यान्तेषु रभसः) शटतीति शाटकः, स्थूलश्चासौ शाटकश्चेति स्थूलशाटकः इति द्वे स्थूलवस्त्रस्य । निचोल्यते, निचोटयते वा निचोलः " निचोलस्तु

[illegible] ॥

[illegible] ([illegible])।

नपुंसकमिति" (रभसः) स्त्रियां निचोली इत्यपि राजदेवः, निचुलोपि "निचुलस्तु निचोले स्यादिज्जलाख्यमहीरुहे" (इति मेदिनी) प्रच्छदति, प्रच्छद्यते, प्रच्छाद्यतेऽनेन वा प्रच्छदः, प्रच्छदश्चासौ पटश्चेति प्रच्छदपटः इति द्वे डोलिकाद्यावरणपटस्य । रमते इति रत्, लातीति लाः, रत् चासौ लाश्च स एव, रमणं रत् क्रीडा लक्ष्यतेऽनेन, रतं लातीति रल्लकः "रल्लकः कम्बले स्मृतः, तथैव कम्बलमृगे" (इति हैमः) कम्बति, कम्ब्यते वा कम्बलः "कम्बलः कृमिसास्नयोः । नागप्रभेदे प्रावारे वैकक्ष्ये कम्बलं जले" (इति हैमः) उभौ समौ समानार्थौ समानलिङ्गौ स्याताभिति द्वे कम्बलस्य ॥ ११६ ॥

न. न. न.

धोती आदि अन्तरीयोपसंव्यानपरिधानान्यधोंशुके ।

पु. पु. स.

अँगोछा या (द्वौ) प्रावारोत्तरासङ्गौ (समौ) बृहतिका (तथा) ॥११७॥

दुपट्टा आदि न. न. पु.स. पु.न.

अँगिया या संव्यानमुत्तरीयं (च) चोलकूर्पासकौ (स्त्रियाः) ।

चोली रजाई या पु.

अंगरखा नीशारः (स्यात्प्रावरणे हिमानिलनिवारणे) ॥११८॥

अन्तेति— अन्तरे भवमन्तरीयम्, उपसंवीयतेऽनेन, उपसंव्यानम्, परिधीयते इति परिधानम्, अधोदेहभागस्यांशुकमधोंशुकमिति चत्वारि परिधानवस्त्रस्य । प्रव्रियतेऽनेन प्रावारः, उत्तरे ऊर्ध्वभागे आसज्यते उत्तरासङ्गः इमौ द्वौ समौ समानार्थौ समानलिङ्गौ स्तः, तथा बृहत्यैव बृहतिका, संवीयतेऽनेन संव्यानम्, उत्तरस्मिन्देहभागे भवमुत्तरीयमिति पञ्चोपरि वस्त्रस्य । चोल्यतेऽनेन चोलः गौरादित्वाच्चोली, कूर्परेऽस्यते, कूर्पेऽस्यते, कूर्परे आस्ते वा पृषोदरादित्वात् कूर्पासः स एव कूर्पासकः "कूर्पासस्त्वर्धचोलकः" (इति हारावली) इति द्वे स्त्रियाः कञ्चुलिकाख्यस्य 'स्त्रियाः' इति विशेषणोक्तं पुंसोऽप्येतावुपमानादिति सुभूतिः, द्वे स्त्रीपुंसकञ्चुलिकायाः (इति मुकुटः) हिमानिलनिवारणे प्रावरणे नितरां शीर्यते हिमानिलादनेन, या 'नीशारः' स्यादित्येकं हिमानिलविनाशकवस्त्रस्य ॥ ११७ । ११८ ॥

पु.न.

लहँगा (अर्धोरुकं वरस्त्रीणां स्या) च्चण्डातक (मंशुकम्) ।

पु.न.न.

[illegible] (स्यात्त्रिषु) प्रपदीनं (तत्प्राप्नोत्याप्रपदं हि तत्) ॥११९॥

अर्धेति—वरस्त्रीणामूरुमध्ये संलग्नमित्र [illegible]

[illegible]

इति पुंस्काण्डे वोपालितात्पुंलिङ्गोपि स्यादित्येकं चण्डातकस्य "उटंगलहँगा" इति ख्यातस्य । यत् आप्रपदं प्राप्नोति तत् आप्रपदीनं त्रिषु त्रिलिङ्गयां स्यादित्येकं पादाग्रपर्यन्तलम्बमानवस्त्रस्य ॥ ११९ ॥

पु.न. पु. न.

चँदवा तम्बू (अस्त्री) वितानमुल्लोचो दूष्या (द्यं वस्त्रवेश्मनि)।

स. स. स.

डेरा कनात प्रतिसीरा जवनिका (स्या) त्तिरस्करणी (च सा) ॥१२०॥

अस्त्रीति—वितन्यत इति वितानम् अस्त्री पुंनपुंसकं स्यात् "वितानो यज्ञ उल्लोचे वितारे पुंनपुंसकम् । क्लीवं वृत्तविशेषे स्यात्त्रिलिङ्गो मन्दतुच्छयोरिति" (मेदिनी) ऊर्ध्वं लोचति, ऊर्ध्वं लोच्यते वा उल्लोचः इति द्वे वितानस्य "चँदवा" इति ख्यातस्य । वस्त्रवेश्मनि वस्त्ररचितसद्मनि दूष्यते इति दूष्यं स्यात् आद्येन पटकुटी, पटवेश्म, पटवास, पटकुड्यादिग्रहः इत्येकं वस्त्रगेहस्य । प्रतिसिनोति, प्रतिसीयते वा प्रतिसीरा, जवत्यस्यामिति जवना सैव जवनिका "यमनिका" इति वा पाठः यमयतीति यमना सैव यमनिका सा च तिरस्क्रियतेऽनयेति तिरस्करणी स्यादिति त्रीणि व्यवधानपटयाः "क़नात" इति ख्यातायाः । क्वचित्तु पर्यङ्किका परिकरः पर्यङ्कश्चावसक्थिका । अञ्चलं त्वंशुकान्ते स्यान्नीवीसारसनश्च यः" इत्यधिकं पठन्ति ॥ १२० ॥

न. पु. स. स. स.

अङ्ग संस्कार पोंछना उबटना परिकर्माङ्गसंस्कारः (स्या) न्मार्ष्टिर्मार्जना मृजा ।

न. न. पु. पु.

नहाना चन्दनादि से उद्वर्तनोत्सादने (द्वे समे) आप्लाव आप्लवः ॥१२१॥

न. स. न. पु. न.

लेपे गये गन्ध को फिर करना स्नानं चर्चा (तु) चार्चिक्यं स्थासको (थ) प्रबोधनम् ।

पु. स. स.

स्तन, गाल आदि में कस्तूरी आदि से चित्र रचना अनुबोधः पत्त्रलेखा पत्त्राङ्गुलि (रिमे समे) ॥ १२२ ॥

परीति—परिक्रियते मलापनयनेन परिमलवर्जनार्था क्रिया परिकर्म स्नानोद्वर्तनादि, 'प्रतिकर्म' इति वा पाठः । अङ्गं संस्क्रियतेऽनेन अङ्गसंस्कारः इति द्वे शरीरशोभाधायक-[illegible] । मार्जनं मार्ष्टिः, मार्ज्यतेऽनेनेति मार्जना, मार्जनं मृजा इति त्रीणि प्रोञ्छनादिना-शुद्धिनिर्मलीकरणस्य । उद्वर्त्यतेऽनेन उद्वर्तनम्, उत्साद्यतेऽनेन उत्सादनम् "उत्सादनं समुत्क्षेपोद्वर्तनोद्वासनेषु च" (इति विश्वमेदिन्यौ) इमे द्वे समे समानार्थे स्याताम् [illegible] इति द्वे [illegible] निर्मलीकरणस्य । आप्लवनमाप्लावः पक्षे आप्लवः, [illegible] स्नानमिति त्रीणि स्नानस्य । चर्चनं चर्चा "चर्चा स्याच्चर्मसुद्रायां चिन्ता [illegible]" [illegible] ना चार्चिक्यं [illegible]

तिष्ठतीति स्थासः स एव स्थासकः "स्थासकः पुंसि चार्चिक्ये जलादेरपि बुद्बुदे" (इति मेदिनी) इति त्रीणि चन्दनादिना देहविलेपनस्य । अथेति—प्रबुध्यत इति प्रबोधनम्, अनुबोधनमनुबोधः इति द्वे गतगन्धस्य प्रयत्नेनोद्बोधनस्य (यथा कस्तूरिकादेर्मद्यादिना) पत्राकारा लेखा शाकपार्थिवादित्वात् पत्रलेखा, पत्रार्थोऽङ्गुलिरङ्गुलिव्यापारः पत्राङ्गुलिरिमे समे स्त्रियां स्यातामिति द्वे स्तनकपोलादौ केसरादिना रचिततिलकविशेषस्य ॥ १२१ । १२२ ॥

न. न. न. पु.न.

तिलक, **तमालपत्रतिलकचित्रकाणि विशेषकम् ।**

न.

(द्वितीयं च तुरीयं च न स्त्रिया)मथ कुङ्कुमम् ॥१२३॥

न. न. न. न. न.

कुंकुम **कश्मीरजन्माग्निशिखं वरं बाल्हीकपीतनम् ।**

न. न. न. न. न.

रक्तसंकोचपिशुनं धीरलोहितचन्दनम् ॥ १२४ ॥

तमेति—तमालस्य पत्रमिव तदाकृतित्वात्तमालपत्रम् "तमालपत्रं तापिच्छे तिलके पत्रके" (इति विश्वः) "तमालस्तिलके खड्गे" इति विश्वात्तमालोपि, तिलति, तेलति वा तिलकम् "तिलकोऽश्वद्रुमभिदोः पुण्ड्रके तिलकालके । तिलकं रुचके क्लोम्नि" (इति हेमः) चित्रयति, चित्रं करोति वा चित्रकम् "चित्रकं तिलके ना तु व्याघ्रभिच्चञ्चुपाटिषु" (इति हेम.) विशिनष्टि विशेषकम् "विशेषकोऽस्त्रीतिलके विशेषयितरि त्रिषु" (इति मेदिनी) द्वितीयं तिलकम्, तुरीयं विशेषकम्, च स्त्रियां न भवतः किन्तु पुंनपुंसकयोरिति चत्वारि ललाटकृततिलकस्य । अथेति—कुक्यते, कुंकु इति शब्दोऽस्ति वाचकत्वेनास्येति वा कुंकुमम्, कशति, कश्यते वा कश्मीरस्तस्मिञ्जन्मास्येति कश्मीरजन्म "काश्मीरं कुंकुमेपि स्याट्टङ्कपुष्करमूलयोरिति" (मेदिनी) अग्निरिव शिखा केसरोऽस्येति अग्निशिखम् "अथाग्निशिखमुद्दिष्टं कुसुम्भे कुंकुमेऽपि चेति" (मेदिनी) व्रियत इति वरम्, "वरो वृतौ । विटे जामातरि श्रेष्ठे देवतादेरभीप्सिते । वरं तु घुसृणे किंचिदिष्टे" (इति हेमः) वल्हते वल्हीको देशस्तस्मिन् भवं बाल्हीकम् "बाल्हीकं बाह्लिकं धीरहिङ्गुनोर्नाश्वदेशयोरिति" (त्रिकाण्डशेष) पीनयति, पीयते वा पीतनम् "पीतनं पीतदारुणि । कुङ्कुमे हरिताले च पुमानाम्रातकद्रुमः" (इति मेदिनी) रज्यते स्म रक्तम् "रक्तं नील्यादिरञ्जिते । कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽस्त्रि" (इति हेमः) संकोचति, संकोचयति, संकोच्यते वा संकोचम् "संकोचो मीनभेदे न द्वन्द्वे पत्नीवत्तु कुङ्कुमे" इति मेदिनी । पिशतीति पिशुनम् "पिशुनं कुङ्कुमे, [illegible] धीरं [illegible] ना मूत्रकृच्छ्रस्रोऽम्बिनु । [illegible]

स्यादिति" (मेदिनी) दधाति, धीयते वा धीरः "धीरो धैर्यान्विते स्वैरे क्लीबन्तु कुङ्कुमे" लोहितं च तच्चन्दनं चेति लोहितचन्दनम्, लोहितमपि "लोहितं रक्त-गोशीर्षे कुङ्कुमे रक्तचन्दने" (इति मेदिनी) इत्येकादश केसरस्य ॥ १२३।१२४॥

स. स. न. पु. पु. पु.

महावर- राक्षा लाक्षा जतु (क्लीबे) यावोऽलक्तो द्रुमामयः।

न. न. न. न.

लवङ्ग लवङ्गं देवकुसुमं श्रीसंज्ञ (मथ) जायकम् ॥ १२५ ॥

न. न.

पीत चन्दन कालीयकं (च) कालानुसार्यं (चाथ समार्थकम्)।

न. न. न. न. न. न.

अगुरु वंशकागुरुराजार्हलोहकृमिजजोङ्गकम् ॥ १२६ ॥

रेति—रक्ष्यतेऽनयेति रक्षा सैव राक्षा, लक्ष्यतेऽनयेति लक्षा सैव लाक्षा, जायते इति जतु क्लीबे स्यात्, यौति, यूयते वा यवः स एव यावः, न लज्जते स्म, न लक्ष्यते स्म, न रक्तोऽस्मादिति वा अलक्तः, द्रुमाणामामयो द्रुमामयः इति षट् अलक्तस्य "महावर" इति ख्यातस्य। लुनाति, लूयते वा लवङ्गम्, देवानां कुसुमम्, कुसुमेषु देव इवेति, देव-योग्यं कुसुमं वेति देवकुसुमम्, श्रियः संज्ञा संज्ञा यस्येति श्रीसंज्ञमिति त्रीणि लव ङ्गस्य। अथेति—जयति गन्धान्तरमिति जायकम्, कालस्य वर्णस्येदं कालीयं तदेव कालीयकम्, कलेरिदं कालेयमिति वा पाठः "कालीयकं च कालेयं वर्णकं कान्ति-दायकमिति" (व्याडिः) अनुस्त्रियतेऽनुसार्यम्—कालेन वस्तुनानुसार्यं कालानुसार्यम्, "कालानुसार्यं शैलेये कालीये शिशपाद्रुमे" (इति विश्वमेदिन्यौ) इति त्रीणि सुगन्धद्रव्यभेदस्य। अथेति—समानोऽर्थो यस्य तदिति समार्थकम्, वंश इव वंशकम्, वंशोऽस्त्यत्रेति विग्रहे तु वंशिकमपि "राजार्हं वंशिकं नतम्। वनद्रुमः परमदो वंशकं लोहनामकमिति" (वाचस्पतिः) न गुरु यस्मादिति अगुरु "अगुर्वगुरुराजार्ह-मिति" (हैम.) राजानमर्हतीति राजार्हम्, "राजार्हं जोङ्गके क्लीबं राजयोग्येऽभिधेय-वदिति" (मेदिनी) लुह्यते, रोहतीति वा लोहम् "लोहोऽस्त्री शस्त्रके लोहं जोङ्गके सर्वतैजसि" (इति मेदिनी) कृमिभिर्जन्यते कृमिजम्, जुङ्गति, जुङ्गयते वा पृषोदरा-दित्वात् जोङ्गकमिति षट् अगुरुणः ॥ १२५ । १२६ ॥

न. पु. न. स.

[illegible] कालागुर्वगुरु (स्यात्त) न्मङ्गल्या (मल्लिगन्धि यत्)।

पु. पु. पु. पु.

[illegible] यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥

[illegible] पु. पु. पु.

[illegible] बहुरूपो (ऽप्यथ) वृकधूपकृत्रिमधूपकौ।

केति—कालं च तदगुरु चेति, कालागुरु, न गुरु अगुरु "कालागुर्वग्रगुरूच्यते" (इति सुभूतिः) इति द्वे कालागुरुणः । मल्लिकापुष्पस्येव गन्धो यस्येति यदगुरुमल्लिगन्धि तत् मङ्गले साधुः मङ्गल्या स्यादित्येकमगुरुभेदस्य । यक्षान् धूपायतीति यक्षधूपः, सर्जस्य सालस्य रसः सर्जरसः, न राति दुःखमिति अरालः, स्वामिमते रालोपि "रालः सर्वरसोऽरालो धूपको वह्निवल्लभः" (इति रभसः) सर्वे रसा यस्मिन् सर्वैः रस्यते वा सर्वरसः, बहूनि रूपाण्यस्येति बहुरूपः "बहुरूपः स्मरे विष्णौ सरटे धूपके शिवे" (इति हैमः) इति पञ्च रालस्य । अथेति—वृक इव धूपो वृकधूपः, "वृकधूपस्तु सरलद्रवकृत्रिमधूपयोरिति" (मेदिनी) कृत्रिमश्चासौ धूपश्च कृत्रिमधूपः स एव कृत्रिमधूपकः इति द्वे नानासुगन्धिकृतदशाङ्गादिधूपस्य ॥ १२७ । १/२ ॥

पु. पु. पु. पु. पु.

लोबान **तुरुष्कः पिण्डकः सिह्लो यावनो (ऽप्यथ) पायसः ॥ १२८ ॥**

पु. पु. पु. पु.

देवदारु धूप **श्रीवासो वृकधूपो (ऽपि) श्रीवेष्टसरलद्रवौ ।**

तुर्विति—तुतोर्त्तीति तुरुस्स एव तुरुष्कः, "तुरुष्कः सिह्लके म्लेच्छजातौ देशान्तरेऽपि च" (इति विश्वमेदिन्यौ) पिण्डत इति पिण्डः स एव पिण्डकः "पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिह्लकयोरपि । ओड्रपुष्पे च पुंसि स्यात् क्लीवमाजीवनायसोः । पिण्डी तु पिण्डतगरेऽलाबू खर्जूरभेदयोः" (इति मेदिनी) स्निह्यतीति पृषोदरादित्वात् सिह्लः, यवनदेशे भवः याव्यते वा यावनः इति चत्वारि सिह्लकस्य "लोबान" इति ख्यातस्य । अथेति—पय एव, पयसो विकारो वा पायसः "पायसस्तु क्लीवपुंसोः श्रीवासपरमान्नयोः" (इति मेदिनी) श्रियो वासः श्रीश्चासौ वासश्चेति वा श्रीवासः, "श्रीवासो वृकधूपे स्यात्पद्मे मधुसूदने" (इति मेदिनी) धूप्यतेऽनेनेति धूपः, वृकनामा धूपः शाकपार्थिवादित्वात् वृकधूपः, श्रियः श्रीसंज्ञको वावेष्टः श्रीवेष्टः, मुकुटमते तु श्रियः सरलद्रवस्य पिष्टः श्रीपिष्टोपि सरलस्य देवदारोर्द्रवः इति पञ्च सरलद्रवस्य "देवदारुधूप" इति ख्यातस्य ॥ १२८ । १/२ ॥

पु. पु. स्त्री. न.

कस्तूरी **मृगनाभिर्मृगमदः कस्तूरी (चाथ) कोलकम् ॥ १२९ ॥**

न. न. पु न.

कङ्कोल और कपूर **कक्कोलकं कोशफल (मथ) कर्पूर (मस्त्रियाम्) ।**

पु. पु. पु. पु.

घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥ १३० ॥

मृगेति—मृगस्य नाभिः मृगनाभिः "मृगनाभिर्मृगमदो मृगः कस्तूरिकापि च"

[illegible]

(इति माधवात्) मृगोपि " मुख्यराट्क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे " (इति रभसात्) नाभिरपि, मृगस्य मदः, मृगमदः, " मदो रेतसि कस्तूर्यामिति " (मेदिनी) मदोपि, कसति गन्धोऽस्या इति कस्तूरी इति त्रीणि कस्तूरिकायाः । अथेति—कोलतीति कोलकम् " रलयोरेकत्वात् " कोरकमपि, " कोरकोऽस्त्री कुड्मले स्यात्कक्कोलकमृणालयोः " (इति मेदिनी) ककतेऽत्रेति कक्, कोलतीति कोलम्, कक् च तत्कोलं चेति कक्कोलं तदेव कक्कोलकम्, कोशे फलमस्येति कोशफलमिति त्रीणि फलकर्पूरस्य " कबावचीनी " इति ख्यातस्य । अथेति—किरति, कृणाति, करोति वा कर्, पूर्यत इति पूरः कर् चासौ पूरश्चेति कर्पूरमस्त्रियां पुंनपुंसके स्यात्, घनो दृढः सारोस्य, घनस्य सार इव वा घनसारः, चन्द्रस्य संज्ञा इव संज्ञा यस्येति चन्द्रसंज्ञः, सितं श्वैत्यं, बन्धनं, चन्द्रं वा अभ्रतीति सिताभ्रः, सिता आभा यस्येति विग्रहे तु सिताभोपि हिमा चासौ वालुका चेति हिमवालुका इति पञ्च कर्पूरस्य ॥ १२९ । १३० ॥

पु. पु. पु. पु.न.

मलयागिरि **गन्धसारो मलयजो भद्रश्रीश्चन्दनो (ऽस्त्रियाम्) ।**

न. न. पु.न.

चन्दन चन्दनों के भेद **तैलपर्णिकगोशीर्षे हरिचन्दन (मस्त्रियाम्) ॥१३१॥**

गन्धेति—गन्धवान्सारः स्थिरभागोऽस्य, गन्ध एव सारोऽस्येति वा गन्धसारः, मलये जातो मलयजः, भद्रा श्रीरस्येति भद्रश्रीः "हस्तिजात्यन्तरे भद्रो वाच्यवच्छ्रेष्ठसाधुनोरिति" (विश्व.) चन्दयतीति चन्दनम् अस्त्रियां पुंनपुंसके स्यादिति चत्वारि मलयजचन्दनस्य । तिलपर्णी वृक्षभेदे जाता तैलपर्णी सैव तैलपर्णिका तस्यां भवं तैलपर्णिकम्, गोः शीर्षमिव गोशीर्षम्, हरेरिन्द्रस्य चन्दनं, हरिः कपिलवर्णं चन्दनं वा हरिचन्दनम् "हरिचन्दनमस्त्री स्यात्त्रिदशानां महीरुहे । नपुंसकन्तु गोशीर्षे ज्योत्स्नाकुङ्कुमयोरपि" (इति मेदिनी) अस्त्रियां पुंनपुंसके स्यादिति चन्दनविशेषाणां पृथक्पृथगेकैकम् ॥ १३१ ॥

स. न. न. न.

रक्त चन्दन **तिलपर्णी (तु) पत्राङ्गं रञ्जनं रक्तचन्दनम् ।**

न. न. न.

जायफल **कुचन्दनं (चाथ) जातीकोशजातीफले (समे) ॥१३२॥**

तिलेति—तिलस्येव पर्णान्यस्याः, तिलपर्णी नदी आकरोऽस्या वा 'तिलपर्णी' पत्रेवाङ्गानि, पत्रमिवाङ्गमस्येति वा पत्राङ्गम्, "पत्राङ्गं न द्वयोर्भूर्जे पद्मके रक्तचन्दने" (इति मेदिनी) रञ्जयतीति रञ्जनम् "रञ्जनो रागजनने रञ्जनं रक्तचन्दने" (इति मेदिनी) रक्तं च तच्चन्दनं च रक्तचन्दनम्, कुत्सितमन्यचन्दनान्यस्मात्, कुत्सितं चन्दनं, चन्दनं इति कुचन्दनमिति पञ्च रक्तचन्दनस्य । जात्याः कोशम् ...

" जातिर्जातीफलेऽपि च " इति रभसाज्जातिरपि, जात्याः फलम् जातीफलम् " फलं लाभे जातिकोशे बाणाग्रे फलकेऽपि च " (इति रुद्रः) फलमपि उभे समे समानार्थे स्यातामिति द्वे जातीफलस्य "जायफल" इति ख्यातस्य ॥ १३२ ॥

महासुगन्धित लेप यानी सुगन्धित द्रव्य घिसे चन्दनादि लेप

पु.
(कर्पूरागरुकस्तूरीकक्कोलै) र्यक्षकर्दमः ।
स. स. न. न.
गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥ १३३ ॥

कर्पूरेति—समभागैः कर्पूरागरुकस्तूरीकक्कोलैः यक्षप्रियः कर्दमः यक्षकर्दमः कथ्यते " कर्पूरागरुकस्तूरीकक्कोलघुसृणानि च । एकीकृतमिदं सर्वं यक्षकर्दम इष्यते " (इति व्याडिः) कुङ्कुमागरुकस्तूरीकर्पूरं चन्दनं तथा । महासुगन्धमित्युक्तं नामतो यक्षकर्दमः (इति धन्वन्तरिः) इत्येकं यक्षकर्दमलेपस्य । गात्रमनुलिप्यते ययेति गात्रानुलेपनी, वर्त्यत इति वर्तिरिति द्वे गात्रानुलेपयोग्यस्य पिष्टसुगन्धिद्रव्यस्य । वर्णं करोति वर्णयतीति वर्णकम्, विलिप्यतेऽनेनेति विलेपनं स्यात् " गात्रानुलेपनी वर्तिर्धिगन्धश्च विलेपनम् । वर्णकं चाथ विच्छित्तिः स्त्री कषायोऽङ्गरागके "(इति रभसः) इति द्वे घृष्टचन्दनादिलेपमात्रस्य ॥ १३३ ॥

सुगन्धकारक चूर्ण वासित वस्तु गन्धमालादि का धारण

न. पु. पु.स.न. पु.स.न.
चूर्णानि वासयोगाः (स्यु) र्भावितं वासितं (त्रिषु) ।
न.
(संस्कारो गन्धमाल्याद्यैर्यः स्यात्तद) धिवासनम् १३४॥

चूरिति—चूर्ण्यत इति चूर्णम्, बहुत्वे चूर्णानि, वासे सुगन्धीकरणे योगाः उपायाः वासयोगाः स्युरिति द्वे पटवासादिक्षोदस्य । भाव्यते स्म भावितम्, " भावितं वासिते प्राप्ते " (इति हैमः) वास्यते स्म वासितम् " वासितं भाविते रुते " (इति मेदिनी) उभे त्रिषु त्रिलिङ्ग्यां स्यातामिति द्वे द्रव्यान्तरभावितस्य । गन्धमाल्याद्यैः मङ्गल्य-धूपादिभिर्वस्त्रादीनां ताम्बूलादीनां च यः संस्कारः तत् अधिकं वास्यते अधिवासनं स्यादित्येकं गन्धमाल्याद्यधारणस्य ॥ १३४ ॥

शीशमाल्य केश मध्यमाल्य शिर के चोटी तथा शिर के सुन्दर हार

न. स. स. पु.
माल्यं मालास्रजौ (मूर्ध्नि) केशमध्ये (तु) गर्भकः ।
न. न.
प्रभ्रष्टकं (शिखालम्बि) (पुरोन्यस्तं) ललामकम् १३५॥

मेति—मूर्ध्नि शिरसि [illegible]न्यत्रापि माला भवत्येव । मल्यते, मार्ल्यत वा माल्यम् "माल्यं पुष्पतत्स्रजोरिति" (मेदिनी) मल्यते, मां लातीति वा माला "माला तु पङ्क्तौ पुष्पादिदामनि" (इति हैमः) सृज्यते, सृज्यते वा स्रक् इति त्रीणि [illegible] [illegible] । केशमध्ये तु गर्भ [illegible]

शिखातो लम्बमानं माल्यं प्रभ्रश्यते स्म, प्रभ्रंशितुं प्रवृत्तमिति वा प्रभ्रष्टं तदेव प्रभ्रष्टकं स्यादित्येकं शिखालम्बिमाल्यस्य। तदेव माल्यं पुरोभागे न्यस्तं ललाटपर्यन्तं ललाममिव ललामकं स्यादित्येकं पुरस्थललाटपर्यन्तमाल्यस्य ॥ १३५ ॥

न. न.

गलस्थमाला **प्रालम्ब (मृजुलम्बि स्यात्कण्ठा) द्वैकक्षकं (तु तत्)।**

वक्षस्थ माला पु. पु.

शिखास्थ माला **(यत्तिर्यक्क्षिप्तमुरसि) (शिखास्वा) पीडशेखरौ ॥ १३६॥**

प्रेति—कण्ठादूर्ध्वमृजुलम्बितुं शीलमस्य तदेव माल्यं प्रालम्बत इति प्रालम्बं स्यादित्येकं कण्ठोर्ध्वलम्बमानमाल्यस्य । यदुरसि उपवीतवत्तिर्यक्क्षिप्तं माल्यं तत् विशिष्टकक्षोऽस्माद्विकक्षमुरस्तत्र भवं वैकक्षं तदेव वैकक्षकं स्यादित्येकं वक्षस्स्थमाल्यस्य। शिखासु क्षिप्तं माल्यम्, आपीडयतीति आपीडः, शिङ्खतीति शेखरः इति द्वे शिखास्थमाल्यस्य ॥ १३६ ॥

स. पु. पु. स.

मालादिका **रचना (स्या) त्परिस्पन्द आभोगः परिपूर्णता।**

बनाना सब न. पु. स. न.

वस्तु से पूर्ण **उपधानं तूपबर्हः शय्यायां शयनीय (वत्) ॥ १३७॥**

तकिया शय्या न. पु. पु. पु. स.

पलँग **शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया (समाः)।**

रेति—रचनमिति रचना, परिस्पन्द्यतेऽत्र, परिस्पन्दनं वा परिस्पन्दः, “परिस्पन्द” इति वा पाठः इति द्वे शिल्पादिरचनायाः । आभोजनमाभोगः “आभोगो वरुणच्छत्रे पूर्णतायत्नयोरपि” (इति विश्वमेदिन्यौ) परितः पूर्यते स्म परिपूर्णस्तस्य भावः परिपूर्णता स्यादिति द्वे समस्तसामग्रीपूर्णतायाः । उपधीयते शिरोऽत्रेति उपधानम् उप वृह्यनेऽत्रेति अनेन वा उपबर्हः इति द्वे शिरोनिधानस्य। शय्यतेऽत्रेति शय्या “शय्या स्याच्छयनीयेपि गुम्फनेपि च योषिति” (इति मेदिनी) शय्यतेऽस्मिन्निति शयनीयम् (वदित्यव्ययम्) शय्यतेऽत्रेति शयनम् “शयनं सुरते निद्राशय्ययोश्च नपुंसकमिति” (मेदिनी) इति त्रीणि तूलिकादेः शय्यामात्रस्य वा। मञ्चत इति मञ्चः, परितोऽङ्क्यते पर्यङ्कः “परेश्च घाङ्कयोरिति वा लत्वे” पल्यङ्कः “पल्यङ्को मञ्चपर्यङ्कपीपर्यस्तिकासु च” (इति मेदिनी) एते खट्यते काङ्क्ष्यते शयनार्थिभिरिति खट्वा तया समाः समानार्था ज्ञेया इति चत्वारि पल्यङ्कस्य ॥ १३७ । १ ॥

पु. पु. पु. पु. न. न.

[illegible] **गेन्दुकः कन्दुको दीपः प्रदीपः पीठमासनम् ॥ १३८॥**

---

१. “ [illegible] । [illegible] । [illegible]) ॥

तकिया, दीप, पु. पु. पु. पु.
आसन, डब्बा, **समुद्गकः संपुटकः प्रतिग्राहः पतद्ग्रहः ।**
पीकदान, कङ्घी, स. स. पु. पु.
चुकवा, **प्रसाधनी कङ्कतिका पिष्टातः पटवासकः ॥ १३९ ॥**

गयिति–गाते गा गच्छन्निन्दुरिव, गे गगने इन्दुरिवेति वा गेन्दुकः, कन्द्यते, कं सुखं ददाति, दयते, द्यति, यच्छति वा कन्दुः स एव कन्दुकः इति द्वे गेन्दुकस्य " गेंद " इति ख्यातस्य " गालमसूरिया " इति ख्यातस्य वा । दीपयति, दीप्यतेऽनेनेति वा दीपः, प्रदीपयति, प्रकृष्टो दीप इति वा प्रदीपः इति द्वे प्रदीपस्य। पेठन्त्यत्र, पीयतेऽत्रेति वा पीठम् " विष्टरः पीठमस्त्रियामिति " (त्रिकाण्डशेषः) आस्यतेऽत्रेति आसनमिति द्वे आसनस्य। समुद्गच्छति समुद्गः स एव समुद्गकः, संपुट्यते इति संपुटकः इति संपुटस्य " डब्बा " इति ख्यातस्य । प्रतिगृह्णातीति प्रतिग्राहः पक्षे प्रतिग्रहः " प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे । योग्येभ्यो विधिवद्देये तद्ग्रहे च ग्रहान्तरे " (इति मेदिनी) पततो ग्रहः पतद्ग्रहः इति द्वे पतद्ग्रहस्य " पीकदानी " इति ख्यातायाः । प्रसाध्यतेऽनयेति प्रसाधनी "प्रसाधनी तु कङ्कत्यां सिद्धौ वेशे प्रसाधनमिति" (विश्वमेदिन्यौ) कङ्कते, कस्य शिरसोऽङ्कास्तेष्वततीति वा कङ्कतिका "कङ्कती तु प्रसाधनी " (इति स्त्रीकाण्डेऽमरमाला) " कङ्कतं तु प्रसाधनमिति क्लीबकाण्डे च इति द्वे कङ्कतिकायाः " कङ्घी " इति ख्यातायाः । पिष्टमततीति पिष्टातः, पटं वासयति, पटो वास्यतेऽनेनेति वा पटवासः स एव पटवासकः इति द्वे पिष्टातस्य " चुकवा " इति ख्यातस्य ॥ १३८ । १३९ ॥

शीशा या दर्पण पु.न. पु. पु. न. न.
बेना या पखा **दर्पणे मकुरादर्शौ व्यजनं तालवृन्तकम् ॥ १४० ॥**

इति मनुष्यवर्गः ॥

दृगिति– दर्पयतीति दर्पणः, " आदर्शो दर्पणः प्रोक्तः " (इत्यमरमाला) मङ्कते मकुरः, मकुरोऽपि वा मुच्यति ज्योतिरिति विग्रहे तु मुकुरोऽप्युकारवानपि " मकुरः स्यान्मुकुरवद्दर्पणे बकुलद्रुमे " (इति मेदिनी) आदृश्यते रूपमत्रेति आदर्शः " आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि " (इति मेदिनी) इति त्रीणि दर्पणस्य । व्यजन्त्यनेन व्यजनम्, तालस्येव वृन्तमस्य, ताले करतले वृन्तमिव वृन्तमस्येति वा तालवृन्तं स एव तालवृन्तकमिति द्वे व्यजनस्य " पंखा " इति ख्यातस्य ॥ १४० ॥

इति मनुष्यवर्गविवरणम् ॥

[illegible]

वीति—वेत्तीति विद्वान् "विद्वानात्मविदि प्राज्ञे पण्डिते चाभिधेयवत्" (इति विश्वः) विप्रकृष्टं निश्चिनोति, चेतति, चिन्तयति वा पृषोदरादित्वात् विपश्चित्, दोषं जानातीति दोषज्ञः, अस्तीति सन् "सन्साधौ धीरशस्तयोः । मान्ये सते विद्यमाने त्रिषु साध्व्युभयोः स्त्रियामिति" (मेदिनी) सुष्ठुध्यायतीति सुधीः, कौति धर्मादि, कवते वा कुः, वेत्तीति विदः कोर्वेदस्य विदः "विदा ज्ञाने च निर्दिष्टा मनीषायां च योषितीति" (मेदिनी) काविवेदे विदा यस्येति वा कोविदः, बुध्यते बुधः "बुधः सौम्ये च पण्डिते" (इति मेदिनी) धियं राति ददाति, धियमीरयति वा धीरः "धीरो धैर्यान्विते स्वैरे बुधे क्लीबं तु कुङ्कुमे । स्त्रियां श्रवणातुल्यायामिति" (मेदिनी) मनीषास्यास्तीति मनीषी, जानातीति ज्ञः "ज्ञो ब्रह्मबुधविद्वत्सु" (इति मेदिनी) प्रकर्षेण जानातीति प्रज्ञः "प्रज्ञस्तु पण्डिते वाच्यलिङ्गो बुद्धौ तु योषिति" (इति मेदिनी) प्रज्ञ एव प्रज्ञास्यास्तीति वा प्राज्ञः, संख्या विचारणास्त्यस्येति संख्यावान्, पण्ड्यतेऽनयेति पण्डा "पण्डः पण्डे धियि स्त्री स्यादिति" (मेदिनी) पण्डा जातास्य, पण्ड्यते स्म वा पण्डितः "यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः" (इति गीतायाम्) कवते, कौति वा कविः "कविर्वाल्मीकिकाव्ययोः । सूरौ काव्यकरे पुंसि स्यात्खलीने तु योषिति" (इति मेदिनी) धीरस्यास्तीति धीमान् "धीमान् पण्डिते च बृहस्पतौ" (इति मेदिनी) सूते, सूयते वा सूरिः केचित्तु "सूरश्चारुभटे सूर्ये" (इति विश्वः) सूरः सूर्योऽस्त्युपास्यतयास्येति "सूरी" नान्तमाहुः "दूरदृक् कोविदः सूरी" (इति रभसः) प्रशस्तं कृतं कर्मास्य, कृतमनेन वा कृती "कृतीस्यात्पण्डिते योग्ये" (इति हैमः) कर्षतीति कृष्टिः "आकर्षणे स्त्रियां कृष्टिर्भवेज्ज्ञातु" विपश्चिति" (इति रन्तिदेवः) लब्धो वर्णः स्तुतिर्येनेति लब्धवर्णः, विचष्ट इति विचक्षणः, दूरान्दूराद्वा पश्यतीति दूरदर्शी, दीर्घं पश्यतीति दीर्घदर्शी इति द्वाविंशतिः पण्डितस्य । छन्दोऽधीते निपातनाच्छ्रोत्रियः पक्षे छान्दसः उभौ समौ समानार्थौ समानलिङ्गौ स्तः इति द्वे सम्पूर्णशाखाध्यायिनः ॥ ५ । ६ ॥

पढ़ानेवाला, उपाध्यायोऽध्यापको (थ) (सनिषेकादिकृ) द्गुरुः ।

पिता आदि, आचार्य, (मन्त्रव्याख्याकृदा) चार्य (आदेष्टा त्वध्वरे) व्रती ॥७॥

यजमान, दीक्षित, यष्टा (च) यजमान (श्च) (स सोमवति) दीक्षितः ।

यज्ञकर्ता इज्याशीलो यायजूको यज्वा (तु) विधिनेष्टवान् ॥ ८॥

[illegible]

उपेति—उपेत्याधीयतेऽस्मादित्युपाध्यायः, अध्यापयतीति अध्यापकः " एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते"(इति मनुः) इति द्वे उपाध्यायस्य । अथेति—सोऽध्यापकः निषेकादिकृत् निषेको गर्भाधानमादिर्यस्य सीमन्तोन्नयनादेस्तस्य कर्ता सन् गृणाति धर्मादि, गिरत्यज्ञानमिति वा गुरुः कथ्यते " गुरुस्त्रिलिङ्ग्यां महति दुर्जरालघुनोरपि । पुमान्निषेकादिकरे पित्रादौ सुरमन्त्रिणि " (इति मेदिनी) " निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्येन स विप्रो गुरुरुच्यते " (इति मनुरपि) इत्येकं गुरोः । मन्त्रस्य वेदस्य व्याख्यां करोतीति मन्त्रव्याख्याकृत्, आचर्यते इत्याचार्यः " उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । साङ्गं च सरहस्यं च तमाचार्यं प्रचक्षते " (इति मनुः) इति द्वे आचार्यस्य । अध्वरेयागे यः आदिशति स्वेष्टसंपादनाय ऋत्विजः प्रेरयतीति आदेष्टा, "आदिष्टी इति पाठेतु आदिष्टमनेनेत्यादिष्टी"सः व्रतं भोजनादि नियमोऽस्त्यस्य,व्रतयतीति वा व्रती, यजते यष्टा, यजते इति यजमानश्च स्यादिति त्रीणि यजमानस्य । स व्रती सोमपानवति यागे आदेष्टा सन् दीक्षते स्म, दीक्षा जातास्येति वा दीक्षितः स्यादित्येकं दीक्षितस्य । इज्याशीलमस्य,इज्यां शीलतीति वा इज्यशीलः, पुनः पुनर्भृशं वा यजत इति यायजूकः इति द्वे यायजूकस्य । यस्तु विधिना इष्टवान् स यजते स्म यज्वा स्यादित्येकं सविधियज्ञकर्तृकस्य ॥ ७ । ८ ॥

बृहस्पति यज्ञ-कर्ता सोमरस-पायी, सर्वस्व दक्षिणासे यज्ञका करनेवाला

पु. पु. पु.
(सगीर्पतीष्ट्या) स्थपतिः सोमपीती (तु) सोमपः ।
पु.
सर्ववेदाः (स येनेष्टो यागः सर्वस्वदक्षिणः) ॥ ९ ॥

स इति—स यज्वा गीर्पतीष्ट्या बृहस्पतिसवननामकयागेनेष्टवान्सन् स्थानं स्थः, पातीति पतिः स्थश्चासौ पतिश्चेति स्थपतिः स्यात् " स्थपतिः कञ्चुकिन्यपि । जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु " (इति मेदिनी) इत्येकं स्थपतेः । सोमस्य पीतं सोमपीतमस्यास्तीति सोमपीती, स्वामिमते तु सोमपीथः, सोमं पिबतीति सोमपः दीर्घपाठे तु क्विबन्तः सोमपः, इति द्वे सोमपायियजमानस्य । सर्वस्वं दक्षिणा यत्र विश्वजिदादौ स यागो येन इष्टः कृतः सः सर्वं वेदयति, सर्वं विन्दतीति वा सर्ववेदाः स्यात् इत्येकं सर्वस्वदक्षिणायागकर्तृकस्य ॥ ९ ॥

[illegible]

पु.
अनूचानः (प्रवचने साङ्गेऽधीती) गुरोस्तु यः ।
पु. पु.
(लब्धानुज्ञः) समावृत्तः सुत्वा (त्वभिषवे कृते) ॥ १० ॥

अनूचान इति—साङ्गे शिक्षाकल्पाद्युपेते प्रोच्यते प्रवचनो वेदस्तत्र अधीयानो

धीती अन्ववोचदित्यनूचानः स्यात् "अनूचानो विनीते स्यात्साङ्गवेदविचक्षणे" (इति विश्वः) इत्येकं साङ्गवेदविशारदस्य । गुरोः सकाशाद् यो लब्धानुज्ञः लब्धा प्राप्ता अनुज्ञा आज्ञा येन स समावर्त्तते स्म समावृत्तः स्यादित्येकं गुरुकुलवासान्निवृत्तस्य। अभिषवेऽवभृथस्नाने कृते सति सुतवानिति सुत्वा स्यादित्येकमवभृथस्नानकर्तृकस्य ॥१०॥

पु. पु. पु. पु. पु.

शिष्य नया छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः ।

पु.

शिष्य सपाठी (एकब्रह्मव्रताचारा मिथः) सब्रह्मचारिणः ॥ ११ ॥

छेति—गुरुदोषाच्छादनं छत्रं तच्छीलमस्येति छात्रः, अन्ते समीपे वस्तुं शीलमस्येति अन्तेवासी, "अन्तेवासी भवेच्छिष्ये चण्डाले प्रान्तगेऽपि च" (इति विश्वः) शिष्यत इति शिष्य इति त्रीणि शिष्यस्य । शिक्षामधीयते, शिक्षाया इमे, शिक्षायां भवा, शिक्षां लभन्ते वा शैक्षाः, प्रथमकल्पः आद्यारम्भः प्रयोजनं येषामिति, प्रथमकल्पमधीयते वा प्राथमकल्पिकाः इति द्वे प्रथमारब्धवेदानाम् । एकस्मिन्ब्रह्मणि व्रताचरणं येषां ते मिथः परस्परं समानं ब्रह्म चरन्तीति सब्रह्मचारिणः स्युरित्येकं सपाठिनाम्॥११॥

पु. पु. पु.

सतीर्थ्यास्त्वेकगुरव (श्चितवानग्नि) मग्निचित् ।

न.

(पारम्पर्योपदेशे) स्यादैतिह्यमितिह (ऽव्ययम्) ॥ १२॥

सेति—समाने तीर्थे वसन्तीति सतीर्थ्याः, एको गुरुर्येषान्ते एकगुरवः इति द्वे सतीर्थ्यस्य । यः अग्निं चितवान् सः अग्निमचैषीदिति अग्निचित्स्यादित्येकमग्निचितवतः । परम्पराया आगतः स एव पारम्पर्यः, उपदिश्यते उपदेशनं वा उपदेशः पारम्पर्यश्चासावुपदेशश्च पारम्पर्योपदेशस्तस्मिन् 'इतिह' इति निपातसमुदायः, तदेव ऐतिह्यम्, इत्येवं हकिल 'इतिह' अव्ययं स्यादिति द्वे पारम्पर्योपदेशस्य ॥ १२ ॥

स्त्री. पु.

प्रथम ज्ञान, उपज्ञा (ज्ञानमाद्यं स्या) (ज्ज्ञात्वारम्भ) उपक्रमः ।

जानकर आरम्भ पु. पु. पु. पु. पु. पु. पु.

करना, यज्ञ यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥

उपेति—आदौ भवमाद्यं प्राथमिकं ज्ञानं उपज्ञानम् उपज्ञा स्यात् यथोपदेशं विना रत्नाकरनिर्माणं वाल्मीकेर्ज्ञानमित्येकमाद्यज्ञानस्य । ज्ञात्वा अवबुध्य आरम्भ आरम्भः स उपक्रमः पुंलिङ्गः स्यात् " उपक्रमस्तूपधाया ज्ञात्वारम्भे च विक्रमे । चिकित्सायामिति " (मेदिनी) यथा मासेन नन्दस्य प्रथमारम्भः उपक्रमः नः इत्येकं ज्ञात्वा

[illegible]

प्रथमारम्भस्य । इज्यतेऽत्रानेन वा यज्ञः “यज्ञः स्यादात्मनि मखे नारायणहुताशयोः ” (इति हैम.) सूयते सोमोऽत्रानेन वा सवः “ सवो यज्ञे च सन्धाने ” (इति मेदिनी) न ध्वरति, अध्वानं राति वा अध्वरः “ अध्वरः सावधाने स्याद्वसुभेदे क्रतौ पुमान्” (इति मेदिनी) इज्यतेऽत्रानेन वा यागः सप्तभिश्छन्दोभिरग्निजिह्वाभिर्वा तन्यते, तानि सप्त तन्यन्तेऽत्रेति वा सप्ततन्तुः, मखन्ति देवा अत्रानेनवा मखः, करोति, क्रियतेऽ वा क्रतुः “ क्रतुर्यज्ञे मुनौ पुंसि ” (इति मेदिनी) इति सप्त यज्ञस्य ॥ १३ ॥

पु. पु. स. न. पु.

पञ्च महायज्ञ **पाठो होम(श्चातिथीनां) सपर्य्या तर्पणं बलिः ।**

पु.

(एते पञ्च) महायज्ञा (ब्रह्मयज्ञादिनामकाः) ॥ १४ ॥

पेति–पठनं, पाठनं वा पाठः, हवनं होमः, अतिथीनामदृष्टपूर्वाणां गृहमागतानां सपर्यणं सपर्य्या (पूजा) तृप्यतीति तर्पणम्, बलनं बलिः एते ब्रह्मयज्ञआदिर्येषां तानि ब्रह्मयज्ञादीनि नामानि येषान्ते ब्रह्मयज्ञादिनामकाः पञ्च महान्तश्चते यज्ञाश्च महायज्ञाः स्युः “ अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्” (इति मनुः) अध्यापनं ब्रह्मयज्ञः, तर्पणं पितृयज्ञः, होमो देवयज्ञः, बलिर्भूतयज्ञः, अतिथिपूजनं नृयज्ञः स्यादिति पञ्च महायज्ञानामेकैकम् ॥ १४ ॥

स. स. स. स. स. स.

सभा **समज्या परिषद्गोष्ठी सभासमितिसंसदः ।**

स. न. स.न.

आस्थानी (क्लीब)मास्थानं (स्त्रीनपुंसकयोः)सदः॥१५॥

सेति–समजन्त्यस्यामिति समज्या, परितः सीदन्त्यस्यामिति परिषद् बाहुलकात्परेरन्त्यलोपे ‘ पर्षद् ’ च, गावोऽनेका वाचस्तिष्ठन्त्यस्यामिति गोष्ठी “ गोष्ठी सभासंलापयोः स्त्रियाम् ” (इति मेदिनी) सह भान्त्यस्याम्, समाना भान्त्यस्यामिति वा सभा, “ सभा सामाजिके गोष्ठ्यां द्यूतमन्दिरयोरपि ” (इति मेदिनी) संयन्त्यस्याम्, सह विद्यमाना मितिर्वा मितिः प्रमास्यामिति वा समिति. “ समितिः सम्पराये स्यात्सभायां संगमेऽपि च ” (इति मेदिनी) संसीदन्त्यस्यामिति संसद्, आतिष्ठन्त्यस्यामिति आस्थानी, आस्थानं क्लीबं स्यात्, सीदन्त्यस्यामिति सदः स्त्रीनपुंसकयो स्यादिति नव सभायाः ॥ १५ ॥

[illegible], पु. पु.

सदस्य. **प्राग्वंशः (प्राग्घविर्गेहा) त्सदस्या (विधिदर्शिनः) ।**

[illegible] पु. पु. पु. पु.

सभ्य **सभासदः सभास्तारा: सभ्याः सामाजिका(श्च ते)१६॥**

१– “ [illegible] ” (इति मेदिनी) ॥

प्रागिति—हविर्गेहात् हविःशालायाः प्राक् पूर्वभागे यजमानादीनां स्थित्यर्थं गेहे प्राध्वतीति प्राङ् वंशो गोत्रं स्थूणो वात्रेति प्राग्वंशः स्यादित्येकं यज्ञगृहविशेषस्य। विधिं द्रष्टुं शीलं येषान्ते विधिदर्शिनः न्यूनाधिकविचारका ऋत्विग्विशेषाः सदसि साधवः सदस्याः स्युरित्येकं सदस्यानाम् । ते च सभायां सीदन्तीति सभासदः, सभा स्तृणन्तीति सभास्तारा:, सभायां साधवः सभ्या समाजं समवयन्ति, समाजं रक्षन्तीति वा सामाजिकाः स्युरिति चत्वारि सामाजिकानाम् ॥ १६ ॥

पु. पु. पु.
वेदत्रयी ज्ञाता, अध्वर्यूद्गातृहोतारो (यजुःसामर्ग्विदः क्रमात्) ।
पु. पु.
ऋत्विक् (आग्नीध्राद्या धनैर्वार्या) ऋत्विजो याजका(श्च ते) ॥ १७ ॥

अध्वेति—यजुश्च सामानि च ऋचश्च यजुसामर्चस्ता विदन्तीति यजुस्सामर्ग्विदः क्रमात् अध्वरमिच्छति,न ध्वरति वा अध्वर् तं याति, यौति वा अध्वर्युः,उद्गायति सामेति उद्गाता, जुहोतीति होता एते स्युः यजुर्विदध्वर्युः सामविदुद्गाता, ऋग्विद् होता भवति इति ऋत्विग्विशेषाणां क्रमादेकैकम् । धनैर्हेतुभिः वरणे करणैर्वा व्रियन्त इति वार्याः ते अग्नीनिन्धे अग्नीद्दृत्विग् अग्नीधः स्थानं तात्स्थ्यात्सोपि आग्नीध्रः स एव आद्यो येषां [illegible] होत्रध्वर्युब्राह्मणाच्छंसि अच्छावाकनेष्ट्रादीनां षोडशानां ते आग्नीध्राद्या ऋ[illegible]तीति ऋत्विजः, यजन्तीति याजकाश्च स्युः "वृताः कुर्वन्ति ये यज्ञमृत्विजो या[illegible]ते" (इति कात्यः) इति द्वे याजकानाम् ॥ १७ ॥

यज्ञवेदी यज्ञ स. न. न.
का चौतरा यज्ञ वेदि[illegible]रिष्कृता भूमिः)(समे)स्थण्डिलचत्वरे ।
स्तम्भविशेष पु. पु. स.
रक्षार्थटट्टी, चषालो यूपकटकः कुम्बा (सुगहना वृतिः) ॥ १८ ॥

वेदिरिति—परितः कृता संस्कृता भूमिः विद्यते शोधनेन ज्ञायते, विचार्यते, प्राप्यते, वेदयति, वेद्यते वा वेदिः " वेदिः स्यात्पण्डिते पुमान् । स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले " (इति मेदिनी) इत्येकं यज्ञवेदिकायाः । स्थलन्त्यस्मिन्निति स्थण्डिलम्, चतन्त्यस्मिन्निति चत्वरम् उभे समे समानार्थे समानलिङ्गे स्तः इति द्वे यागार्थं संस्कृतभूमेः । चषति, चष्यते वा चषालः, यूपस्याग्रे कृतः कटकाकारः यूपकटकः इति द्वे यज्ञस्तम्भविशेषस्य । सुगहना निविडा वृतिर्वेष्टनं कुम्ब्यतेऽनयेति कुम्बा स्यादित्येकमन्त्यशादिनिषिद्धरक्षणाय निविडावृतेः " रक्षार्थटट्टी " इति ख्यातायाः ॥ १८ ॥

न. न. पु.स.
यूपाग्रं तर्म (निर्मन्थ्यदारुणि) त्वरणि (द्वयोः) ।
पु. पु. पु.
दक्षिणाग्निर्गार्हपत्याहवनीयौ (त्रयोऽग्नयः) ॥ १९ ॥

यूपेति—यूपस्याग्रं यूपाग्रम्, तरतीति तर्म इति द्वे यूपाग्रभागस्य । निर्मथ्यते निर्मन्थ्यम्, निर्मन्थ्यं च तद्दारु चेति निर्मन्थ्यदारु तस्मिंस्तु ऋच्छतीति अरणिः द्वयोः पुंस्त्रियोः स्यात् " अरणिर्वह्निमन्थे ना द्वयोर्निर्मन्थ्यदारुणि " (इति मेदिनी) इत्येकमरण्योः । दक्षिणोऽग्निः दक्षिणाग्निः, गृहपतिना संयुक्तः गार्हपत्यः, आहूयते प्रीयते प्रक्षिप्यते वा हविरत्र, आहवनमर्हतीति वा आहवनीयः एते त्रयोऽग्नयो भवन्ति इति यज्ञाग्नित्रयाणामेकैकम् ॥ १९ ॥

तीनों अग्नि, यज्ञाग्निविशेष, यज्ञाग्निस्थल

स. पु.
(अग्नित्रयमिदं) त्रेता प्रणीतः (संस्कृतोऽनलः) ।
पु. पु. पु.
समूह्यः परिचाय्योपचाय्या (वग्नौ प्रयोगिणः) ॥२०॥

अग्नीति— इदमग्नित्रयं त्राणमिति त्रा. सदा संधुक्षणम्, त्रायन्ते त्रा आहुतयस्ताभिरिता, त्रित्वमिता वा पृषोदरादित्वात् त्रेता स्यात् "त्रेता युगेऽग्नित्रये च"(इति हैमः) इत्येकमग्नित्रयाणाम् । संस्कृतोऽनलोऽग्निः प्रकर्षं नीतः प्रणीतः स्यात् "प्रणीत उपसम्पन्ने कृते क्षिप्ते प्रवेशिते । संस्कृताग्नौ च" (इति हेमचन्द्रः) इत्येकं संस्कृतानलस्य । समुह्यते, समूह्यते वा समूह्यः, परिचीयते परिचाय्यः, उपचीयते उपचाय्यः एते त्रयोऽग्नौ प्रयोगोऽस्ति येषान्ते प्रयोगिणः प्रयोक्तव्या अग्निनामानीत्यर्थः इति त्रीणि यज्ञाग्निस्थलस्य ॥ २० ॥

अग्निविशेष, (यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
पु. स. स. स.
अग्निप्रिया तस्मि)न्नानाय्योथाग्नायी स्वाहा(च)हुतभुक्प्रिया २१॥

य इति—गार्हपत्यादानीय य. दक्षिणाग्निः प्रणीयते दक्षिणाग्नित्वेन संस्क्रियते तस्मिन् आनीयत इत्याऽऽनाय्य. स्यात् यस्तु भ्राष्ट्रवैश्यकुलयोनिः स 'आनेयः' स्यात इत्येकं गार्हपत्यानीताग्निविशेषस्य । अथेति—अग्नेः स्त्री अग्नायी, सुष्ठु आहूयन्ते देवा अनयेति, स्वाहास्त्यस्या वा स्वाहा, हुतं भुनक्तीति हुतभुक् तस्य प्रिया 'हुतभुक्प्रिया' स्यादिति त्रीणि अग्निप्रियायाः ॥ २१ ॥

अग्न्युद्दीपन मन्त्र, साम-धेनी, हविष्य, यज्ञान्न

स. स.
(ऋक्) सामधेनी धाय्या (च या स्यादग्निसमिन्धने) ।
पु.
(गायत्री प्रमुखं) छन्दो (हव्यपाके) चरुः (पुमान्) ॥२२॥

ऋगिति—अग्नेः समिन्धने सन्दुदीपने या ऋक् सा समिधामाधानी सामधेनी धीयते धाय्या च स्यादिति द्वे अग्निसन्दीपनर्चायाः । गायन्तं त्रायते, गायेन गानेन

१—[illegible]

प्रागिति—हविर्गेहात् हविःशालायाः प्राक् पूर्वभागे यजमानादीनां स्थित्यर्थं गेहे प्राञ्चतीति प्राङ् वंशो गोत्रं स्थूणो वात्रेति प्राग्वंशः स्यादित्येकं यज्ञगृहविशेषस्य। विधिं द्र॒ शीलं येषान्ते विधिदर्शिनः न्यूनाधिकविचारका ऋत्विग्विशेषाः सदसि साधवः सदस्याः स्युरित्येकं सदस्यानाम् । ते च सभायां सीदन्तीति सभासदः, सभा स्तृणान्तीति सभास्तारा:, सभायां साधवः सभ्याः समाजं समवयन्ति, समाजं रक्षन्तीति वा सामाजिकाः स्युरिति चत्वारि सामाजिकानाम् ॥ १६ ॥

पु. पु. पु.
वेदत्रयी ज्ञाता, अध्वर्यूद्गातृहोतारो (यजुःसामर्ग्विदः क्रमात्) ।
पु. पु.
ऋत्विक् (आग्नीध्राद्या धनैर्वार्या) ऋत्विजो याजका(श्च ते) ॥१७॥

अध्वेति—यजुश्च सामानि च ऋचश्च यजुसामर्चस्ता विदन्तीति यजुस्सामर्ग्विदः क्रमात् अध्वरमिच्छति, न ध्वरति वा अध्वर् तं याति, यौति वा अध्वर्युः, उद्गायति सामेति उद्गाता, जुहोतीति होता एते स्युः यजुर्विदध्वर्युः सामविदुद्गाता, ऋग्विद् होता भवति इति ऋत्विग्विशेषाणां क्रमादेकैकम् । धनैर्हेतुभिः वरणे करणैर्वा व्रियन्त इति वार्याः ते अग्नीनिन्धे अग्नीदृत्विग् अग्नीधः स्थानं तात्स्थ्यात्सोपि आग्नीध्रः स एव आद्यो येषां [illegible] होत्रध्वर्युब्राह्मणाच्छंसि अच्छावाकनेष्ट्रादीनां षोडशानां ते आग्नीध्राद्या ऋ[illegible]न्तीति ऋत्विजः, यजन्तीति याजकाश्च स्युः "वृताः कुर्वन्ति ये यज्ञमृत्विजो या[illegible]न्ते" (इति कात्यः) इति द्वे याजकानाम् ॥ १७ ॥

यज्ञवेदी यज्ञ स. न. न.
का चौतरा यज्ञ वेदि(: [illegible]ष्कृता भूमिः)(समे)स्थण्डिलचत्वरे ।
स्तम्भविशेष पु. पु. स.
रक्षार्थट्टी, चषालो यूपकटकः कुम्बा (सुगहना वृतिः) ॥ १८ ॥

वेदिरिति—परितः कृता संस्कृता भूमिः विद्यते शोधनेन ज्ञायते, विचार्यते, प्राप्यते, वेदयति, वेद्यते वा वेदिः " वेदिः स्यात्पण्डिते पुमान् । स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले " (इति मेदिनी) इत्येकं यज्ञवेदिकायाः । स्थलन्त्यस्मिन्निति स्थण्डिलम्, चतन्त्यस्मिन्निति चत्वरम् उभे समे समानार्थे समानलिङ्गे स्तः इति द्वे यागार्थं संस्कृतभूमेः । चषति, चष्यते वा चषालः, यूपस्याग्रे कृतः कटकाकारः यूपकटकः इति द्वे यज्ञस्तम्भविशेषस्य । सुगहना निविडा वृतिर्वेष्टनं कुम्ब्यतेऽनयेति कुम्बा स्यादित्येकमन्त्यआदिदृष्टिवारणाय निविडावृत्ते. " रक्षार्थट्टी " इति ख्यातायाः ॥ १८ ॥

न. न. पु.स.
यूपाग्रं तर्म (निर्मन्थ्यदारुणि) त्वरणि (र्द्वयोः) ।
पु. पु. पु.
दक्षिणाग्निर्गार्हपत्याहवनीयौ (त्रयोऽग्नयः) ॥ १९ ॥

यूपेति—यूपस्याग्रं यूपाग्रम्, तरतीति तर्म इति द्वे यूपाग्रभागस्य । निर्मथ्यते निर्मन्थ्यम्, निर्मन्थ्यं च तद्दारु चेति निर्मन्थ्यदारु तस्मिंस्तु ऋच्छतीति अरणिः द्वयोः पुंस्त्रियोः स्यात् "अरणिर्वह्निमन्थे ना द्वयोर्निर्मन्थ्यदारुणि" (इति मेदिनी) इत्येकमरण्योः । दक्षिणोऽग्निः दक्षिणाग्निः, गृहपतिना संयुक्तः गार्हपत्यः, आहूयते प्रीयते प्रक्षिप्यते वा हविरत्र, आह्वनमर्हतीति वा आहवनीयः एते त्रयोऽग्नयो भवन्ति इति यज्ञाग्नित्रयाणामेकैकम् ॥ १९ ॥

तीनों अग्नि, यज्ञाग्निविशेष, यज्ञाग्निस्थल

स.　　पु.

(अग्नित्रयमिदं) त्रेता प्रणीतः (संस्कृतोऽनलः) ।

पु.　　पु.　　पु.

समूह्यः परिचाय्योपचाय्या (वह्नौ प्रयोगिणः) ॥२०॥

अग्नीति—इदमग्नित्रयं त्राणमिति त्राः सदा संधुक्षणम्, त्रायन्ते त्रा आहुतयस्ताभिरिता, त्रित्वमिता वा पृषोदरादित्वात् त्रेता स्यात् "त्रेता युगेऽग्नित्रये च"(इति हैम:) इत्येकमग्नित्रयाणाम् । संस्कृतोऽनलोऽग्निः प्रकर्षं नीतः प्रणीतः स्यात् "प्रणीत उपसम्पन्ने कृते क्षिप्ते प्रवेशिते । संस्कृताग्नौ च" (इति हेमचन्द्रः) इत्येकं संस्कृतानलस्य । समुह्यते, समूह्यते वा समूह्यः, परिचीयते परिचाय्यः, उपचीयते उपचाय्यः एते त्रयोऽग्नौ प्रयोगोऽस्ति येषान्ते प्रयोगिणः प्रयोक्तव्या अग्निनामानीत्यर्थः इति त्रीणि यज्ञाग्निस्थलस्य ॥ २० ॥

अग्निविशेष, (यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।

पु.　　स.　　स.　　स.

अग्निप्रिया तस्मि)न्नानाय्योथाग्नायी स्वाहा(च)हुतभुक्प्रिया २१॥

य इति—गार्हपत्यादानीय यः दक्षिणाग्निः प्रणीयते दक्षिणाग्नित्वेन संस्क्रियते तस्मिन् आनीयत इत्याऽऽनाय्य. स्यात् यस्तु आष्ट्रवैश्यकुलयोनि. स 'आनेयः' कथ्यत इत्येकं गार्हपत्यानीताग्निविशेषस्य । अथेति—अग्नेः स्त्री अग्नायी, सुष्ठु आहूयन्ते देवा अनयेति, स्वाहास्त्यस्या वा स्वाहा, हुतं भुनक्तीति हुतभुक् तस्य प्रिया 'हुतभुक्प्रिया' स्यादिति त्रीणि अग्निप्रियायाः ॥ २१ ॥

अग्नि उद्दीपन मन्त्र, मन्त्र गायत्री आदि छन्द, हव्यपाक

स.　　स.

(ऋक्) सामिधेनी धाय्या (च या स्यादग्निसमिन्धने) ।

पु.

(गायत्रीप्रमुखं) छन्दो (हव्यपाके) चरुः (पुमान्) ॥२२॥

ऋगिति—अग्नेः समिन्धने सन्दीपने या ऋक् सा समिध्यतेऽनया सामिधेनी [illegible] धाय्या च स्यादिति द्वे अग्निसन्दीपनर्चः । गायन्तं त्रायते, गायेन गानेन

[illegible]

त्रायते वा गायत्री, "गायत्री त्रिपदा देवी छन्दोभित् खदिरेषु च" (इति मेदिनी) गायत्री प्रमुखा प्रधाना आद्या वा यस्मिंस्तत् 'गायत्रीप्रमुखम्' षडक्षरपदा गायत्री, "प्रमुखशब्देन उष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगतीशक्करीत्यादि एकाक्षरवृद्धया बोध्यम्" चन्दति इति छन्दः स्यादित्येकं गायत्र्यादीनाम् । पच्यते, पचनं वा पाकः हव्यस्य पाको हव्यपाकस्तस्मिन् चर्यते भक्ष्यत इति चरुः पुमान्स्यात् "चरुर्भाण्डे च हव्यान्ने" (इति विश्वप्रकाशः) इत्येकं हव्यान्नस्य ॥ २२ ॥

स.
दधिमिलादूध **आमिक्षा (साशृतोष्णेया क्षीरे स्यादधियोगतः) ।**

न.
यज्ञ का पखा **धुवित्रं (व्यजनं तद्रचितं मृगचर्मणा) ॥ २३ ॥**

आमीति—शृतोष्णे क्वथिते तप्ते च क्षीरे पयसि दधियोगतः दध्नो योजनात् या सा आमिक्षा स्यादित्येकं दधियुक्तपक्वोष्णादुग्धस्य । मृगचर्मणा रचितं विनिर्मितं यद् व्यजनं तद् धवित्रम्, धुवित्रं च स्यादित्येकमग्नेः संधुक्षणाय मृगत्वचारचितव्यजनस्य ॥ २३ ॥

न. न. पु.न.
दही समेत घी **पृषदाज्यं (सदध्याज्ये) परमान्नं (तु) पायसम् ।**
खीर देवपित्रन्न न. न. पु.न.
यज्ञपात्र **हव्यकव्ये (दैवपैत्रे अन्ने) पात्रं (स्रुवादिकम्) ॥ २४ ॥**

पृषदिति—सदध्याज्ये दध्नासहिते घृते पर्षति, पृष्यते वा पृषत्, आज्यतेऽनेन आज्यम् पृषच्च तदाज्यं च, पृषद्भिः सहितमाज्यं वा पृषदाज्यं स्यात् "पृषातकं सदध्याज्ये पृषदाज्यं तदुच्यते" इत्येकं दधिमिश्रितघृतस्य । परमं च तदन्नं च, परमाणामुत्तमानामन्नमिति वा परमान्नम्, पयसि संस्कृतं पायसम् "पायसः श्रीवासे पायसं परमान्नके" (इति हैमः) इति द्वे परमान्नस्य । देवानामिदं दैवम्, पितॄणामिदं पैत्रम् दैवं च पैत्रं च दैवपैत्रे अर्थेतस्मिन्नन्ने हूयन्ते प्रीणयन्ते देवा येन, हूयते प्रक्षिप्यते वा हव्यम्, कूयते पितृभ्यः कव्यम् देवान्नं हव्यम्, पित्रन्नं कव्यम् हव्यं च कव्यं च हव्यकव्ये स्यातामेकैकं हव्यकव्यान्नयोः । स्रवति घृतादिकमिति स्रुवः स आदिर्यस्य तदिति स्रुवादिकं पाति, पिबत्यनेन वा पात्रं स्यादित्येकं स्रुवादिकस्य आदिना चमसोलूखलमुसलस्फ्यादीनां ग्रहणं बोध्यम ॥ २४ ॥

स. स. स. पु.स. पु.
स्रुवभेद, **ध्रुवोपभृज्जुहू(र्ना तु) स्रुवो भेदाः स्रुचः (स्त्रियः) ।**
पु.
यज्ञपशु **उपाकृतः (पशुरसौ योऽभिमन्त्र्य क्रतौ हतः) ॥ २५ ॥**

---

१ ध्रुवः [illegible] ॥
२ [illegible] (इति मेदिनी) ॥

ध्रुवेति—ध्रुवतीति ध्रुवा " ध्रुवः शङ्कौ हरे विष्णौ वटे चोत्तानपादजे । वसुयोगभिदो पुंसि क्लीवं निश्चिततर्कयोः । स्त्री मूर्वाद्योः शालपर्ण्यां गीतस्रुग्भेदयोस्त्रिषु । संतते शाश्वते च" (इति मेदिनी) उपबिभर्तीति उपभृद्, जुहोतीति जुहूः, स्रवतीति स्रुवः ना पुमान्स्यात् एते च स्रवतीति स्रुक् चान्ता तस्या भेदाः विशेषाः स्त्रियः स्त्रीलिङ्गाः स्युरिति चत्वारि स्रुवभेदानाम् । क्रतौ यागे अभिमन्त्र्य अभितो मन्त्रयित्वा यः पशुः हतो हन्तुमारब्धः असौ उपाक्रियते स्म उपाकृतः स्यात् " उपाकृतोऽध्वरहते पशौ नोपद्रुते त्रिषु " (इति विश्वमेदिन्यौ) इत्येकं क्रतावभिमन्त्रितपशोः ॥ २५ ॥

यागपशुवध न. न. न.
परम्पराकं शमनं प्रोक्षणं (च) (वधार्थकम्) ।

मारेहुए पशु पु.स.न. पु.स.न. पु.स.न.
(वाच्यलिङ्गाः) प्रमीतोपसम्पन्नप्रोक्षिता (हते)॥२६॥

परमिति—अर्कनमाकः परमतिशयेऽव्ययं परंपरः श्रेष्ठ आकोऽस्मादिति परम्पराकम्, शमयति, शम्यते वा शमनम्, " शमनं शान्तिवधयोः शमनः श्राद्धदेवते " (इति विश्वमेदिन्यौ) शसनमिति स्वामी, ससनमित्यन्ये । प्रकृष्टमुक्षणं प्रोक्षणम् "प्रोक्षणं सेकवधयोः " (इति हैमः) एतत्त्रयं वधो हिंसार्थोऽस्येति वधार्थकं स्यादिति त्रीणि यज्ञार्थपशुहननस्य । प्रमीयते स्म प्रमीतः "प्रमीतं वाच्यलिङ्गं स्यात्प्रोक्षितेऽपि मृतेऽपि च" (इति मेदिनी) उपसंपद्यते स्म उपसम्पन्नः "उपसंपन्नमुद्दिष्टं निहते च सुसंस्कृते" (इति विश्वमेदिन्यौ) प्रोक्ष्यते स्म प्रोक्षितः "प्रोक्षितं निहते सिक्ते" (इति रभसः) एते त्रयो एते वाच्यलिङ्गाः स्युरिति त्रीणि यज्ञहतपशोः ॥ २६ ॥

शाकल्यवि- न. न. पु.स.न.
शेषहुती वस्तु **सान्नाय्यं हवि (रग्नौ तु हुतं त्रिषु) वषट्कृतम् ।**

यज्ञान्तस्नान पु. न.
यज्ञीयवस्तु **(दीक्षान्तो)ऽवभृथो यज्ञ (स्तत्कर्मार्हन्तु)यज्ञियम्॥२७॥**

यज्ञकर्म न. न.
कर्मविशेष **(त्रिष्वथ क्रतुकर्मे)ष्टं पूर्तं (खातादिकर्मणि) ।**

यज्ञशेष, न. पु.
भोज्यशेष **अमृतं विघसो (यज्ञशेषभोजनशेषयोः) ॥ २८ ॥**

सान्नाय्यमिति—संनीयते सान्नाय्यम्, हूयते हविरिति द्वे हविर्विशेषस्य । अग्नौ हुतं प्रक्षिप्तं हविः वषडिति मन्त्रोपलक्षणं वषट् मन्त्रेण कृतं प्रक्षिप्तं वषट्कृतं त्रिषु त्रिलिङ्गं स्यादित्येकं हुतस्य । दीक्षाया अन्तःप्रधानकर्मसमाप्तौ क्रियमाणो यो यज्ञः स अवभृथेऽनेन अवभृथः स्यादित्येकं यज्ञविशेषस्य । तस्य यज्ञस्य कर्म क्रियामर्हतीति तत्कर्मार्हं यज्ञमर्हतीति यज्ञियं त्रिषु त्रिलिङ्गं स्यादित्येकं [illegible] ।

---

१ [illegible]

अथेति—क्रतुश्च यज्ञः कर्म च दानादि क्रतुकर्म यजनमिष्टं स्यात् "इष्टं यागे च दाने च वाञ्छितेऽपि प्रयुज्यते" (इत्यजयः) "एकाग्निकर्महवनं त्रेतायां यच्च हूयते। अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते" (इति मनुः) इत्येकं यज्ञकर्मणः। खातं पुष्करिणीखननमादिर्यस्य देवालयारामादिनिर्माणस्य खातादि च तत्कर्म च क्रिया तस्मिन् पूरणं, पूर्यते स्म वा पूर्तं स्यात् "पुष्करिण्यः सभावापीदेवतायतनानि च। आरामश्च विशेषेण पूर्तं कर्म विनिर्दिशेदिति" (स्मृतिः) "पूर्तं त्रिषु पूरिते स्यात्क्लीबं खातादिकर्मणि" (इति मेदिनी) इत्येकं खातादिकर्मणः। यज्ञस्य शेषो होमावशिष्टाज्यपुरोडाशादिः, देवपित्रतिथिगुर्वादिभुक्तस्य शेषस्तयोः अमृतमिव अमृतं स्यात् "अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते। अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः" (इति मेदिनी) इत्येकं यज्ञशेषस्य। विशिष्टैरद्यते विघसः स्यादित्येकं भोजनशेषस्य॥ २७। २८॥

पु. न. न. न. न.

दान **त्यागो विहापितं दानमुत्सर्जनविसर्जने।**

न. न. न. न.

मृतक के लिये **विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्॥ २९॥**

न. न. न. स.

दान **प्रादेशनं निर्वपनमपवर्जनमंहतिः।**

मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदैहिकम्॥ ३०॥

त्येति—त्यजनं त्यागः "त्यागो दाने च वर्जने" (इति मेदिनी) विहापनं विहापितम्, दत्तं दानम्, "दानं गजमदे त्यागे पालनच्छेदशुद्धिषु" (इति विश्वमेदिन्यौ) उत्सृष्टमुत्सर्जनम्, विसृष्टं विसर्जनम्, "विसर्जनं परित्यागे दाने संप्रेषणेऽपि च" (इति मेदिनी) विश्राणितं विश्राणनम्, वितीर्णं वितरणम्, स्पृष्टं स्पर्शनम्, "स्पर्शनो मारुते पुंसि दाने स्पर्शे नपुंसकम्" (इति मेदिनी) प्रतिपादितं प्रतिपादनम्, "प्रतिपादनं तु दाने प्रतिपत्तौ प्रबोधने" (इति मेदिनी) प्रादिष्टं प्रादेशनम्, निरुप्तं निर्वपनम्, अपवर्जितमपवर्जनम्, हन्ति दुरितमनयेति अंहतिः "अंहतिस्त्यागरोगयोः" (इति हैम) इति त्रयोदश दानस्य। मृतायेदं मृतार्थं तदहे प्रेतदिने यद्दानं तत् देहादूर्ध्वं ऊर्ध्वदेहस्तस्मिन् भवमौर्ध्वदैहिकमौर्ध्वदेहिकं वा त्रिषु त्रिलिङ्गयां स्यादित्येकं प्रेतमुद्दिश्य मरणदिनमारभ्य सपिण्डीकरणपर्यन्तं प्रत्यहं दीयमानस्य जलपिण्डादेः॥ २९। ३०॥

न. पु. न.

पितृदान, श्राद्ध, मासिक श्राद्ध, अन्वाहार्य **पितृदानं निवापः (स्या)च्छ्राद्धं (तत्कर्म शास्त्रतः)।**

न. न. पु.न.

अन्वाहार्यं मासिकं (ऽशोऽष्टमोऽह्नः) कुतपो (ऽस्त्रियाम्) ३१

पीति—पितृभ्यो दानं पितृदानम्, न्युप्यते, निवपनं वा निवापः स्यादिति द्वे पति-

१—[illegible]

ण्डनादूर्ध्वं पितृुद्देशेन दानस्य। शास्त्रतः शास्त्रविधानेन तत्कर्म तेषां पितॄणां कर्म श्राद्धा-त्यत्रेति श्राद्धमित्येकं श्राद्धस्य। अनु आह्रियते अन्वाहार्यम्, मासे भवं मासिकम् "पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्" (इति मनुः) इत्येकं मासिकश्राद्धस्य। पञ्चदश मुहूर्तात्मकस्य अह्नो दिवसस्याष्टमोऽशो भागः कुत्सितं तपति, कुं भुवं तपतीति वा कुतपोऽस्त्रियां पुंनपुंसकं स्यात् "दिवसस्याष्टमे भागे मन्दीभवति भास्करः। स कालः कुतपो ज्ञेय. पितॄणां दत्तमक्षयम्" (इति शातातपः) इत्येकं श्राद्धकालविशेषस्य॥ ३१॥

स. स. स. स.
धर्मादि का पर्येषणा परीष्टिश्चान्वेषणा (च) गवेषणा।
खोजना वि- स. स. स. स. स. स.
नय, मांगना सनिस्त्वध्येषणा याच्ञाभिषस्तिर्याचनार्थना॥ ३२॥

परीति—पर्येषणं पर्येषणा, पर्येषणं परीष्टिः, अन्वेषणं अन्वेषणा, गवेषणं गवेषणा इति चत्वारि धर्माद्यन्वेषणस्य। सननं सनिः, अध्येषणं अध्येषणा इति द्वे गुर्वाद्याराधनस्य, गुर्वादेः प्रार्थनया क्वचिदर्थे नियोजनस्य वा। याचनं याच्ञा, अभिशंसनम् अभिशस्तिः, स्वामी तु अभिषसनम् अभिषस्तिरित्यवोचत, याचनमिति याचना, अर्थनमिति वा अर्थना इति चत्वारि याचनस्य॥ ३२॥

पु.स.न. पु.स.न.
पूजार्थ जल, (षट् तु त्रिष्व) र्घ्यमर्घार्थे पाद्यं (पादाय वारिणि)।
पांव धोना
अतिथिनि- पु.स.न. पु.स.न.
मित्त कर्म क्रमादातिथ्यातिथेये (अतिथ्यर्थेऽत्र साधुनि)॥ ३३॥

षडिति—अर्घ्यादारभ्य आगन्तुपर्यन्ताः षट्शब्दाः त्रिषु त्रिलिङ्गयां स्युः अर्घार्थे वारिणि जले अर्घायेदम् अर्घ्यं स्यादित्येकमर्घ्यस्य। पादाय वारिणि पादायेदं पाद्यं स्यादित्येकं पाद्यस्य। अत्र अतिथ्यर्थे साधुनि चार्थे क्रमादातिथ्यातिथेये स्तः अतिथय इदमातिथ्यमित्येकमातिथ्यर्थकर्मकस्य। अतिथौ साधु आतिथेयमित्येकमातिथिनिमित्तसिद्धस्य॥ ३३॥

पु.स.न. पु.स.न. पु.
पाहुन. (स्युरा) वेशिक आगन्तुरतिथि (र्ना गृहागते)।
स. स. स. स. न. स.
पूजा पूजा नमस्यापचितिः सपर्यार्चार्हणाः (समाः)॥ ३४॥

स्युरिति—"वेशो वेश्यागृहे गृहे" (इति मेदिनी) आवेशे अगृहे भवः आवेशिकः, आगच्छतीति आगन्तुः, अतति, नास्ति द्वितीया तिथिर्यस्येति वा अतिथिः ना पुमान् स्यात् "अतिथिः कुशपुत्रे स्यात्पुमानागन्तुकेऽपि च" (इति विश्वमेदिन्यौ) एते त्रयः [illegible] गृहागते स्युः इमे त्रीणि गृहागतस्य। पूजनं पूजा, नमस्यनं नमस्या

वा नमस्या, अपचायनमपचितिः, सपर्यणं सपर्या, अर्चनमर्चा, अर्हणमर्हणा एताः समाः समानार्थाः समानलिङ्गाश्चेति षट् पूजनस्य ॥ ३४ ॥

स. स. स. स.
सेवा **वरिवस्या (तु) शुश्रूषा परिचर्याप्युपासना ।**
घूमना स. स. न. स.
ध्यानादि स्थिति **व्रज्याटाट्या पर्यटनं चर्या (त्वीर्यापथस्थितिः) ॥ ३५ ॥**

वरीति—'वरिवस्' शब्दः पूजार्थः वरिवस्यनं वरिवसः करणं वा वरिवस्या, शुश्रूषणं शुश्रूषा, परिचरणं परिचर्या "परिचर्यानुपसर्गैष्टिरिति" (भागुरिः) उपासनमुपासना "उपासनमिति पाठे तु भावे ल्युट्" "उपासनं शराभ्यासेऽप्युपास्ता वासनेऽपि च" (इति विश्वमेदिन्यौ) इति चत्वारि सेवायाः । व्रजनं व्रज्या, अटनमटाट्यनं वा अटाट्या, परितोऽटनं पर्यटनम्, "अटा पर्यटनं भ्रमः" (इति रत्नकोषादटापि) इति त्रीण्यटनस्य । ईर्यते ज्ञायते ईर्या तस्याः पन्था ईर्यापथो ध्यानाद्युपायस्तत्र स्थितिः चरणं चर्या कथ्यत इत्येकं ध्यानमौनादिस्थितेः ॥ ३५ ॥

पु. न. न. न.
आचमन, **उपस्पर्शस्त्वाचमन (मथ) मौनमभाषणम् ।**
स. स. स. पु.
चुपचाप, **आनुपूर्वी (स्त्रियां वा) वृत्परिपाटी अनुक्रमः ॥ ३६ ॥**
अनुक्रम, पु. पु. पु. पु.
अतिक्रम **पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः ।**

उपेति—उपस्पर्शनमुपस्पर्शः "उपस्पर्शे स्पर्शमात्रे स्नानाचमनयोरपि" (इति मेदिनी) आचम्यतेऽम्भोऽत्रेत्याचमनमिति द्वे आचमनस्य । अथेति—मुनेः कर्म, भावो वा मौनम्, न भाषणमभाषणमिति द्वे मौनस्य । पूर्वं पूर्वं, पूर्वानुक्रमेण वा अनुपूर्वं तस्य भावः आनुपूर्वी वा स्त्रियां स्यात् पक्षे आनुपूर्व्यम्, आवर्तनमत्रेत्यावृत्, परिपाटनं परिपाटिः "कृदिकारादिति" ङीपि परिपाटी च तेन "कृता लक्ष्मा भर्तुर्वदनपरिपाटीषु घटना" (इति पूर्वप्रयोगः संगच्छते) अनुक्रमणमनुक्रमः, पर्ययणं पर्यायः "पर्यायः प्रकारेऽवसरे क्रमे" (इति विश्वमेदिन्यौ) इति पञ्च क्रमस्य । अतिक्रम्य पतनमतिपातः, पर्ययणं पर्ययः, उपगतस्यातिक्रम्यायनमुपात्ययः इति त्रीणि क्रमोल्लङ्घनस्य ॥ ३६ ॥ १ ॥

धनमात्र पु. पु.न. न.
[illegible] **नियमो व्रत (मस्त्री) (तच्चोपवासादि) पुण्यकम् ॥ ३७ ॥**
[illegible] न. पु. पु. स.
उपवास [illegible] **औपवस्तं (तु) पवासो विवेकः पृथगात्मना ।**

नीति—नियमनं नियमः "नियमोऽन्यत्रगायां च प्रतिज्ञानिश्चये व्रते" (इति मेदिनी)

म्रियते, व्रजन्ति स्वर्गमनेनेति वा पृषोदरादित्वाद्व्रतम् अस्त्री पुंनपुंसकं स्यादिति द्वे व्रतमात्रस्य । उपवास आदिर्यस्य कृच्छ्रचान्द्रायणप्राजापत्यनक्तभोजनादेः, तदुपवासादि व्रतं पुण्यमेव पुण्यकं स्यादित्येकमुपवासादेर्विहितव्रतस्य । उपवसनमुपवस्तं तदेव औपवस्तम् " औपवस्त्रमिति पाठे तु उपवसतीति उपवस्ता तस्येदं कर्म औपवस्त्रं स्यात् " उपवसनमुपवासः, उपोपणमुपोषितं वा इति द्वे भोजनविरहस्य । विवेचनं विवेकः " विवेकः स्याज्जलद्रोण्यां पृथग्भावविचारयोः " (इति मेदिनी) पृथगात्मा यस्य तस्य भावः पृथगात्मता इति द्वे प्रकृतिपुरुषादिभेदज्ञानस्य ॥ ३७ ॥ १/२ ॥

सदाचार वा वेदाभ्यासफल वेदपाठ में अञ्जलि अञ्जलि या मुख से जलकण आसन विशेष विधान

न.　　स.
(स्या) द्ब्रह्मवर्चसं वृत्ताध्ययनर्धि (रथाञ्जलिः)॥३८॥
पु.　　पु.
(पाठे) ब्रह्माञ्जलिः (पाठे विप्रुषो) ब्रह्मबिन्दवः ।
न.　पु.　पु.　पु.
(ध्यानयोगासने) ब्रह्मासनं कल्पे विधिक्रमौ ॥ ३९ ॥

स्यादिति— ब्रह्मणो वेदस्य तपसो वा वर्चः ब्रह्मवर्चसम्, वृत्तं चाचारः अध्ययनं च गुरुमुखाद्वेदाक्षरग्रहणं तयोर्ऋद्धिः वृत्ताध्ययनर्धिः स्यादिति द्वे आचाराध्ययनसमृद्धेः । अथेति-पाठे वेदपाठे योऽञ्जलि. स ब्रह्मणोऽञ्जलिः ब्रह्माञ्जलिः स्यादित्येकं वेदपाठकाले कृतस्याञ्जले. । पाठे वेदपाठे विप्रुषो मुखान्निर्गतबिन्दवो ब्रह्मणो बिन्दवः ब्रह्मबिन्दवः स्युरित्येकं वेदपाठसमये मुखनिर्गतबिन्दूनाम् । ध्यानं प्रत्ययैकतानता च, योगश्चित्तवृत्तिनिरोधश्च तयोरासनं, ध्यानस्य योग उपायः ध्यानमेव योगो वा तस्यासनं स्वस्तिकसिद्धपद्मादि ब्रह्मणा. सम्बन्धि आसनं ब्रह्मासनं स्यादित्येकं ध्यानयोगासनस्य । कल्पतेऽनेन कल्पस्तस्मिन्, " कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने " (इति मेदिनी) वेधनं विधानं वा विधिः, " विधिर्ना नियतौ काले विधाने परमेष्ठिनि " क्रमणं क्रमः " क्रमश्चानुक्रमे शक्तौ कल्पे चाक्रमणेऽपि च " (इति मेदिनी) इति त्रीणि विधानस्य ॥ ३८।३९ ॥

[illegible]

पु.　　पु.
मुख्यः (स्यात्प्रथमः कल्पो) ऽनुकल्प (स्ततोऽधमः) ।
न.
(संस्कारपूर्वं ग्रहणं स्यात्तु) पाकरणं (श्रुतेः) ॥ ४० ॥

मुख्य इति—प्रथमः आद्यः कल्पो विधिः मुख्यमिव मुख्यः स्यात् यथा " [illegible] " इत्यादि[illegible] । ततोऽधमः कल्पः अनुहीनः कल्पः, अनुकल्पः स्यात् यथा " [illegible] " इत्येवं गौणविधिः । संस्कार उपनयनं पूर्वं यत्र तत्, [illegible] [illegible] ॥ ४० ॥

न. न.

नमस्कार **(समे तु) पादग्रहणमभिवादन (मित्युभे)।**

पु. पु. पु. पु. पु.

सन्यासी **भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥ ४१ ॥**

सेति—पादयोर्ग्रहणं स्पर्शः पादग्रहणम्, अभिमुखीकरणार्थं वादनम्, आभिमुख्येन वाद्यते आशीःकार्यतेऽनेनेति वा अभिवादनम् इत्युभे समे समानार्थे समानलिङ्गे स्तः इति द्वे नामोच्चारणपूर्वकसंस्कृतप्रयोगेण नमस्कारस्य । भिक्षणशीलो भिक्षुः, परित्यज्य सर्वं व्रजतीति परिव्राट्, कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीते कर्मन्दी, पराशरस्य गोत्रापत्यं पाराशर्यन्तेन प्रोक्तं भिक्षुसूत्रमधीते पाराशरी, मस्कनं मस्करो ज्ञानं गतिर्वास्यास्ति, मस्करो वेणुरस्यास्ति, माकर्तुं कर्म निषेद्धुं शीलमस्य, मकुर इव शुद्धमन्तःकरणमस्यास्ति, मङ्कते मकरो निधिभेदोऽस्त्यस्येति वा मस्करी इति पञ्च संन्यासिनः॥४१॥

तपस्वी पु. पु. पु. पु. पु.

मौनी **तपस्वी तापसः पारिकाङ्क्षी वाचंयमो मुनिः ।**

दान्त पु. पु. पु. पु.

ब्रह्मचारी **तपःक्लेशसहो दान्तो वर्णिनो ब्रह्मचारिणः ॥ ४२॥**

तेति—तपोऽस्यास्तीति तपस्वी "तपस्वी तापसे चानुकम्पे त्रिष्वथ योषिति । मांसिका कटुरोहिण्योः" (इति मेदिनी) तपोऽस्त्यस्येति तापसः, परिकाङ्क्षितुं शीलमस्य, पारमत्रास्ति पारि ब्रह्मज्ञानं काङ्क्षतीति वा पारिकाङ्क्षी इति त्रीणि तपस्विनः। वाचं यच्छतीति वाचंयमः, मन्यते इति मुनिः "मुनिः पुंसि वसिष्ठादौ वङ्गसेनतरौ जिने" (इति मेदिनी) इति द्वे मौनव्रतिनः । तपसः क्लेशस्तपःक्लेशः सहते सहः तपः क्लेशस्य सहः तपःक्लेशसहः, दाम्यति स्म दान्तः "दान्तस्तु दमितेऽपि स्यात्तपःक्लेशसहे त्रिषु" (इति मेदिनी) इति द्वे तपःक्लेशसहस्य । वर्णः स्तुतिरस्यास्तीति वर्णी "वर्णी स्याल्लेखके चित्रकरेऽपि ब्रह्मचारिणि" (इति विश्वमेदिन्यौ) द्वित्वे 'वर्णिनौ' बहुत्वे वर्णिनः स्युः। ब्रह्म वेदाध्ययनव्रतं चरति तच्छीलो वा ब्रह्मचारी, द्वित्वे ब्रह्मचारिणौ, बहुत्वे ब्रह्मचारिणः स्युरिति द्वे ब्रह्मचारिणः ॥ ४२ ॥

पु.ब. पु. पु. पु.

ऋषि **ऋषयः सत्यवचसः स्नातकस्त्वाप्लवव्रती ।**

स्नातक पु. पु. पु.

जितेन्द्रिय **(ये) निर्जितेन्द्रियग्रामा यतिनो यतयश्च (ते) ॥ ४३ ॥**

ऋषेति—ऋषन्ति जानन्तीति ऋषयः "ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयम्"

---

१ इत्यत्र "[illegible] मा कृ कर्माणि शान्तिर्वै श्रेयसी[illegible] । अतो मस्करी परिव्राजकः" इति भाष्यकृतः ॥

२ [illegible]

(इति मेदिनी) ते च सप्तविधाः "महर्षिदेवर्षिब्रह्मर्षिपरमर्षयः काण्डर्षिः श्रुतर्षिश्च क्रमवराः" (इति रत्नकोषः) स्त्रियां वा ङीप् ऋषी, द्वित्वे ऋष्यौ, बहुत्वे ऋष्यः स्युः, सत्यं वचो येषामिति सत्यवचसः इति द्वे ऋषेः । स्नाति स्म स्नातः स एव स्नातकः, आप्लुवते आप्लवः व्रतमस्यास्तीति व्रती आप्लवश्चासौ व्रती च आप्लवव्रती, आप्लुतव्रती वा इति द्वे समाप्तवेदव्रतस्याश्रमान्तरमागतस्य । इन्द्रियाणां ग्रामः, निर्जित इन्द्रियग्रामो यैस्ते, यमनं यतमुपरमणमस्ति नित्यं वा येषामिति यतिनः, यतन्ते यतयः "यतिः स्त्रीपाठविच्छेदे निकारयतिनोः पुमानिति" (इति मेदिनी) अत्र पक्षे यमः क्तिच्प्रत्ययो बोध्य इति त्रीणि निर्जितसर्वेन्द्रियस्य ॥ ४३ ॥

भूमिशायी (यः स्थण्डिले व्रतवशाच्छेते) स्थण्डिलशाय्य (सौ) । पु.
त्यागी आदि स्थाण्डिलश्चा(थ) विरजस्तमसः (स्यु)र्द्वयातिगाः॥४४॥ पु. पु. पु.

यइति—व्रतवशात्स्थण्डिले यः शेते असौ "स्थण्डिले शेते" स्थण्डिलशायी स्यात्, स्थण्डिले शेते स्थाण्डिलः इति द्वे अनास्तृतभूमिशयनव्रतिनः । अथेति—विगते रजस्तमसी येभ्यः, रजस्तमोभ्यां विगता वा विरजस्तमसः, द्वयमतिगच्छन्तीति द्वयातिगाः स्युरिति द्वे निवृत्तरजस्तमोगुणानाम् ॥ ४४ ॥

पवित्र पु. पु. पु पु. पु.
पाखण्डी पवित्रः प्रयतः पूतः पाषण्डाः सर्वलिङ्गिनः ।
पलाशदण्ड पु. पु.
बेणुदण्ड (पालाशो दण्ड)आषाढो(व्रते)राम्भ(स्तु वैणवः)॥४५॥

पेति—पवते, पुनाति वा पवित्रः " पवित्रं वर्षणे कुशे । ताम्रे पयसि च क्लीबं मेध्ये स्यादभिधेयवदिति" (मेदिनी) प्रयच्छति स्म प्रयतते वा प्रयतः, पवते स्म पूतः "पूतं त्रिपु पवित्रे च शटिते चाऽऽलीकृते" इति त्रीणि पूतस्य । पापं सन्वन्तीति पाषण्डाः कवर्गद्वितीयमध्यपाठे तु पां खण्डयन्तीति पाखण्डाः "पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते । तं खण्डयन्ति ते यस्मात्पाखण्डास्तेन हेतुना " सर्वाणि च तानि लिङ्गानि, सर्वेषां लिङ्गानि, सर्वलिङ्गानि सन्ति येषामिति वा सर्वलिङ्गिनः इति द्वे बौद्धक्षपणकादिदुष्शास्त्रवर्तिनाम् । व्रते ब्रह्मचर्ये यः पलाशस्य विकारः पालाशो दण्डः स आषाढी पूर्णिमा प्रयोजनमस्येति आषाढः स्यादित्येकं ब्रह्मचर्यपालाशदण्डस्य । यस्तु व्रते वैणवो दण्डः स "रम्भा कदल्यप्सरसोर्ना वेणौ दानवान्तरे " (इति मेदिनी) रम्भस्य वेणोर्विकारो राम्भः स्यादित्येकं वैणवदण्डस्य ॥ ४५ ॥

कमण्डलु पु. पु. पु.
आसन (अस्त्री) कमण्डलुः कुण्डी (व्रतिनामासनं) वृषी ।
मृगचर्म न. न. न.
भिक्षा (अजिनं चर्म कृत्तिः(स्त्री)भैक्षं(भिक्षाकदम्बकम्) ॥४६॥

अम्बीति—कस्य प्रजापतेर्जलस्य वा मण्डः सारस्तं लाति, लभते वा कस्य मण्डं भूषां लाति वा मितद्र्वादित्वात् कमण्डलुः अस्त्री पुंनपुंसकं स्यात्, कुण्णातीति कुण्डी "कुण्डी कमण्डलौ जारात्पतिवत्नीसुते पुमानिति" (मेदिनी) इति द्वे ऋषिपात्रस्य। व्रतिनामासनं ब्रुवन्तः सीदन्त्यस्यां, वर्षति सुखं वा वृषी स्यात् "गण्डूषा मञ्जूषा वृषी" इति मूर्धन्यान्ता, "अतसी वृषी मांसी" इत्यान्ते चन्द्रगोभिलदर्शनादन्त्यान्तापि इत्येकं ब्रह्मचर्याद्यासनस्य । अजति, अज्यते वा अजिनम्, चरति, चर्यते वा चर्म "चर्मकृत्तौ च फलके" (इति मेदिनी) कृत्यते कृत्तिः स्त्री स्यात् "कृत्तिश्चर्म त्वचोर्भूर्जे कृत्तिकायां द्वयं स्त्रियामिति" (मेदिनी) इति त्रीणि मृगचर्मणः। भिक्षाकदम्बकं भिक्ष्यन्ते भिक्षास्तासां समूहो भैक्षं स्यादित्येकं भिक्षासमूहस्य ॥ ४६ ॥

पु. पु. स. पु. न.

वेदाध्ययनसोमलताका कूटना सर्वाविनाशन मन्त्र

स्वाध्यायः (स्या)ज्जपःसुत्याभिषवः सवनं (च सा)।

न.

(सर्वैनसामपध्वंसि जप्यं) त्रिष्वघमर्षणम् ॥ ४७ ॥

स्वेति—सुष्ठु अतीव आवृत्त्या अध्ययनम्, स्वार्थमध्ययनं वा स्वाध्यायः, जपनं जपः स्यात् बाहुलकाद्घञ् 'जपनं जापः' इति रक्षितस्तेन "शूद्रस्य मन्त्रजापं प्रत्यनधिकारादित्यादिसिद्धिरिति मुकुटः" इति द्वे वेदाध्ययनस्य । सवनं सुत्या सा अभिषवणमभिषवः, सुतं सवनं च स्यादिति त्रीणि सोमलताकण्डनस्य । सर्वाणि एनांसि मानसादि पापानि अपध्वंसयितुं शीलमस्य जप्यते जप्यम्, अघं मर्षति, मृष्यति वा अघमर्षणं त्रिषु त्रिलिङ्ग्यां स्यादित्येकं सर्वपापनाशनमन्त्रस्य ॥ ४७ ॥

पु. पु.

दर्शयाग, पौर्णमासयाग, नित्यकर्म

दर्श(श्च) पौर्णमास (श्च यागौ पक्षान्तयोः पृथक्)।

पु.

(शरीरसाधनापेक्षं नित्यं यत्कर्म) तद्यमः ॥ ४८ ॥

दर्शेति—पक्षान्तयोरमावास्यापौर्णमास्योर्विहितौ यागौ पृथक्क्रमेण दर्शपौर्णमाससंज्ञकौ स्याताम् दृश्यते शास्त्रेणेति दर्शः "पक्षान्तेष्टौ दर्शने च दर्शः सूर्येन्दुसंगमे, "दर्शस्तु स्यादमावास्या यागभेदावलोकने" (इति मेदिनी) इत्येकं दर्शयागस्य। पौर्णमास्यां भवः पौर्णमासः "पौर्णमासः पुमान्यज्ञभेदे स्त्री पूर्णिमातिथौ" (इति मेदिनी) इत्येकं पौर्णमासयागस्य । शरीरसाधनापेक्षं शरीरमात्रेण साध्यं नित्यं यत् कर्म कार्यं तत् यच्छतीति यमः स्यात् "यमोऽन्यस्मिन्द्वौ यमजे ना काके शमने शनौ। शरीरसाधनापेक्षे नित्यकर्मणि संयमे" (इति मेदिनी) तथा च पातञ्जलसूत्रम् "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः २।३०" इत्येकं यमस्य ॥ ४८ ॥

पु.
कर्मविशेष, **नियम(स्तु स यत्कर्मानित्यमागन्तुसाधनम्)।**
वामस्कन्धा- न. न.
र्पित जनेऊ **उपवीतं यज्ञसूत्रं (प्रोद्धृते दक्षिणे करे)॥ ४९ ॥**

नीति—यत् कर्म अनित्यं नतु यावज्जीवं कर्तव्यम्, आगन्तुसाधनं आगन्तुभिः कादाचित्कैः कामनया समयविशेषादिभिः साधनैस्साध्यमुपवासस्नानजपादि तत् नितरां यच्छतीति नियमः स्यात् "नियमो यन्त्रणायां च प्रतिज्ञा निश्चये व्रते" (इति मेदिनी) तथा च पातञ्जलसूत्रम् "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः २।३२" इत्येकं नियमस्य। दक्षिणे करे प्रोद्धृते बहिष्कृते सति वामस्कन्धार्पितम्, उपवीयते स्म, उपाजति स्म, उपवेति स्म वा उपवीतम्, यज्ञार्थं धृतं सूत्रम्, यज्ञस्य सूत्रं वा यज्ञसूत्रमिति द्वे वामस्कन्धार्पितयज्ञोपवीतस्य ॥ ४९ ॥

दाहिने कांधेका न. न.
जनेऊ, कण्ठमें मालाकार, देव **प्राचीनावीत (मन्यस्मि)न्निवीतं(कण्ठलम्बितम्)।**
तीर्थ, प्रजा- न.
पतितीर्थ **(अङ्गुल्यग्रे तीर्थं)दैवं(स्वल्पाङ्गुल्योर्मूले)कायम् ॥ ५० ॥**

प्रेति—अन्यस्मिन् वामकरे प्रोद्धृते सति प्राचीनं प्रदक्षिणम् आवीयते स्म प्राचीनावीतं स्यादित्येकं विपरीतधृतयज्ञोपवीतस्य । कण्ठाल्लम्बितं यज्ञसूत्रं निवीयते स्म, नि= अधोभागे वीतं गमनमस्य वा 'नि' इति प्रकृते "राश्यधोभावविन्यासे" (इति मेदिनी) निवीतं स्यादित्येकं करद्वये बहिष्कृते सति ऋजुभावेन स्थापितयज्ञसूत्रस्य अङ्गुलीनामग्रे देवानामिदम्, देवो देवतास्येति वा दैवं तीर्थं स्यादित्येकं देवतीर्थस्य । स्वल्पाङ्गुल्योरनामिकाकनिष्ठिकयोः मूले अधोभागे क. प्रजापतिर्देवतास्येति कायं तीर्थं स्यादित्येकं कायतीर्थस्य ॥ ५० ॥

पितृतीर्थ, न.
ब्रह्मतीर्थ **(मध्येऽङ्गुष्ठाङ्गुल्योः) पित्र्यं (मूले त्वङ्गुष्ठस्य) ब्राह्मम् ।**
ब्रह्म में न. न. न.
लय होना **(स्याद्)ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्य(मित्यपि) ॥५१॥**

मेति—अङ्गुष्ठाङ्गुल्योरङ्गुष्ठतर्जन्योर्मध्ये पितरो देवतास्य, पित्र्यम्, पितॄणामिदं पैत्रं च स्यादित्येकं पितृतीर्थस्य । अङ्गुष्ठस्य मूले 'हि' अवधारणे ब्रह्मा देवतास्येति ब्राह्मं

---

१ [illegible] ॥

२ [illegible]
[illegible] ॥

३ [illegible]
[illegible] ।

स्यादित्येकं ब्राह्मतीर्थस्य । ब्रह्मणो भवनं ब्रह्मभूयम्, ब्रह्मणो भावो ब्रह्मत्वम्, युनक्तीति युजस्तेन सह युजः, योजनं युक् सहयुजा, सयुजस्य सयुजो वा भावः सायुज्यं ब्रह्मणः सायुज्यं ब्रह्मसायुज्यं स्यादिति त्रीणि ब्रह्मसायुज्यस्य ॥ ५१ ॥

देवताओं में मिलना, कृच्छ्र चान्द्रायणादि, संन्यासविशेष, नष्टाग्निवाला, मिथ्याधर्माश्रयी लोभी या दम्भी, संस्कार हीन, वेदाभ्यास विहीन

न. न.
देवभूयादिकं (तद्वत्) कृच्छ्रं (सान्तपनादिकम्) ।
पु. पु.
(संन्यासवत्यनशने पुमान्) प्रायो (थ) वीरहा ॥ ५२ ॥
पु. स.
नष्टाग्निः कुहना (लोभान्मिथ्येर्यापथकल्पना) ।
पु. पु. पु. पु.
व्रात्यः संस्कारहीनः (स्याद) स्वाध्यायो निराकृतिः ५३ ॥

देवेति—देवस्य भावः, देवभूयमादिर्यस्येति देवभूयादिकं तद्वद्ब्रह्मभूयादिवत् त्रिरूपात्मकं स्यात् देवस्य भवनं देवभूयम्, देवस्य भावो देवत्वम्, देवस्य सायुज्यं देवसायुज्यं स्यादिति त्रीणि देवसायुज्यस्य । संतपति संतपनं तस्येदं कर्म, सम्यक्तपनमत्रेति वा सांतपनमादिर्यस्येति सान्तपनादिकं कृन्तत्यनेन कृच्छ्रं स्यात् आदिना चान्द्रायणप्राजापत्यपराकादिग्रहः, तेषां स्वरूपाण्याह—" गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतमिति (मनुः ११।२१२) " एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरं द्विजः " इत्येकं कृच्छ्रचान्द्रायणादीनाम् । सम्यक्न्यसनं न्यास आत्यन्तिकस्त्यागस्तद्युक्ते अनशनेऽभोजने प्रकृष्टमयनं 'प्रायः' पुमान्स्यात् "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोः" (इति मेदिनी) इत्येकं संन्यासविशेषस्य । अथेति—वीरोऽग्निस्तं हन्तीति वीरहा, नष्टोऽग्निर्यस्येति नष्टाग्निरिति द्वे प्रमादादिना यस्याग्निहोत्रिणोऽग्निर्नष्टस्तस्य । लोभात् अर्थलिप्सया मिथ्येर्यापथकल्पना मिथ्यातत्त्वे ईर्यापथस्याचारभेदस्य कल्पना संपादना कुहयति, कुहनं वा कुहना स्यात् " कुहना दम्भचर्यायामीर्ष्यालौ कुहनस्त्रिषु " (इति मेदिनी) इत्येकं दम्भेन कृतध्यानमौनादेः । शरीरायासजीवी व्याधादिर्व्रातः स इव व्रातमर्हतीति वा व्रात्यः, संस्कारैर्गर्भाधानादिभिरुपनयनादिभिर्वा हीनः संस्कारहीनः स्यादिति द्वे संस्कारहीनस्य । न स्वाध्यायो वेदाध्ययनमस्येति अस्वाध्यायः, आकृतेरध्ययनचेष्टाया निर्गतः निराकृतिरिति द्वे वेदाध्ययनरहितस्य ॥ ५२ । ५३ ॥

पु. पु. पु. पु.
धर्मध्वजी लिङ्गवृत्तिरवकीर्णी क्षतव्रतः ।
(सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च) ॥ ५४ ॥

सूर्यास्त सुप्त, पु. पु.
सूर्योदय सुप्त, (अंशुमान) भिनिर्मुक्ताभ्युदितौ (च यथाक्रमम्) ।

पु.
छोटा भाई परिवेत्ता (नुजोनूढे ज्येष्ठे दारपरिग्रहात्) ॥ ५५ ॥

धर्मेति—धर्मस्य ध्वजश्चिह्नम्, धर्मो ध्वज इव वा धर्मध्वजोऽस्यास्तीति धर्मध्वजी, लिङ्गमाश्रमादिचिह्नधारणं वृत्तिर्जीविकाहेतुर्यस्येति लिङ्गवृत्तिरिति द्वे भिक्षाद्यर्थं जटादिधारिणः । अवकरणमवकीर्णं विक्षिप्तं हिंसितं वा व्रतमनेन अवकीर्णी, क्षतं खण्डितं व्रतमस्येति क्षतव्रतः इति द्वे खण्डितब्रह्मचर्यादेः । यस्मिन्सुप्ते अंशुमान्सूर्योऽस्तमेति अस्तावस्तं प्राप्नोति, यस्मिन्सुप्ते उदेति उदयं प्राप्नोति च तत्र यथाक्रमम् अभिनिर्मुक्ताभ्युदितौ स्याताम् अभि सर्वतः सायंतनेन कर्मणा निश्चयेन मुक्तः, अभिसर्वं सायंतनं कर्म निश्चयेन मुक्तं येन वा अभिनिर्मुक्तः स्यादित्येकं सूर्यास्तसमयसुप्तस्य । अभिसर्वत उद् अतिशयेन इतं गतं प्रातस्तनं कर्मास्मादिति अभ्युदितः स्यादित्येकं सूर्योदयसुप्तस्य । ज्येष्ठे भ्रातरि अनूढे विवाहरहिते सति दारपरिग्रहात् अनुजो लघुभ्राता परिविन्दति ज्येष्ठं परित्यज्य भार्यां लभते ' परिवेत्ता ' स्यादित्येकं ज्येष्ठे विवाहरहिते कृतदारपरिग्रहकनिष्ठस्य ॥ ५४ । ५५ ॥

पु.   पु.   पु.
बड़ा भाई, विवाह परिवित्तिस्तु (तज्ज्यायान्) विवाहोपयमौ (समौ) ।

पु.   पु.   पु.   न.
(तथा) परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ ५६ ॥

परीति—तज्ज्यायान् तस्य परिवेत्तुर्ज्यायान् ज्येष्ठः परिवर्जनं विन्दति लभते इति परिवित्तिः स्यादित्येकं परिवेत्तुर्ज्येष्ठभ्रातुः । विशिष्टं वहनं विवाहः, उपयमनमुपयमः उभौ समौ समानार्थौ समानलिङ्गौ स्तः तथेति—परिणयनं परिणयः, उद्वहनमुद्वाहः, उपयमनमुपयामः, पाणेः पीडनं ग्रहणं पाणिपीडनमिति पञ्च विवाहस्य ॥ ५६ ॥

पु.   पु.   न.   न.   न.
मैथुन, त्रिवर्ग. व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ।

पु.   पु.
त्रिवर्ग त्रिवर्गो (धर्मकामार्थै) श्चतुर्वर्गः (समोक्षकैः) ॥ ५७ ॥

[illegible]—[illegible] व्यवायः, ग्रामे भवा ग्राम्या [illegible] धर्मो ग्राम्यधर्मः, मिथुनस्य कर्म [illegible], [illegible] [illegible] निधुवनम्, रमणं रतमिति पञ्च [illegible] । [illegible] [illegible] धर्मकामार्थैः [illegible] [illegible] वर्गः [illegible] [illegible] । समोक्षकैः [illegible] [illegible] [illegible] [illegible] [illegible] ॥ ५७ ॥

चतुर्भद्र वर के मित्रयासहवाला आदि सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ॥ ५८ ॥

इति ब्रह्मवर्गः ॥

सेति—सबलैः बलेन सहितैस्तैर्धर्मादिभिरुपलक्षितं चत्वारि भद्राणि श्रेष्ठान्यत्र वृन्दे चत्वारि भद्राणीति वा चतुर्भद्रं स्यात् " भद्रो वाच्यवच्छ्रेष्ठसाधुनोः " (इति विश्वः) इत्येकं चतुर्भद्रस्य । वरस्य जामातुर्ये स्निग्धास्तत्पक्षा वयस्यादयः जनी वधूं वहन्तीति जन्याः स्युः " जन्यो वरवधूज्ञातिप्रियभृत्यहितेषु च " (इति विश्वः) इत्येकं वरवयस्यादीनाम् ॥ ५८ ॥

इति ब्रह्मवर्गविवरणम् ॥

अथ क्षत्रियवर्गो व्याख्यायते ॥

पु. पु. पु. पु. पु.

क्षत्रिय राजा मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।

पु. पु. पु. पु. पु. पु. पु.

राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ १ ॥

मूर्धेति— मूर्धन्यभिषिच्यत इति मूर्धाभिषिक्तः " राज्यदानसमये मूर्धन्यभिषिच्यते तत्प्रभावात्सर्वोऽपि मूर्धाभिषिक्तः स्यात् " राजति, राज्ञोऽपत्यं वा राजन्यः, बाहुभ्यां बाह्वोर्वा जातो बाहुजः " बाहुजः क्षत्रिये कीरे स्वयं जाततिलेऽपि च " (इति विश्वमेदिन्यौ) क्षदति, क्षतात्त्रायते वा पृषोदरादित्वात् क्षत्त्रस्तस्यापत्यं क्षत्रियः, विशेषेण राजतीति विराडिति पञ्च क्षत्रियस्य । राजतीति राजा, " राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ । यक्षे शक्रे च पुंसि स्यादिति" (मेदिनी) राजतीति राट्, पृथिव्या ईश्वरः, पार्थिवः, " पार्थिवो नृपतौ भूमिविकारे पार्थिवोऽन्यवत् " (इति विश्वः) क्ष्मां बिभर्तीति क्ष्माभृत्, "क्ष्माभुगिति पाठे तु क्ष्मां भुनक्ति पालयतीति क्ष्माभुक् " नॄन्पातीति नृपः, भुवं पातीति भूपः, महीं क्षियति, मह्यां क्षयतीति वा महीक्षित् इति सप्त राज्ञः ॥ १ ॥

पु.

महाराजा
महाराजाधिराज (राजा तु प्रणताशेषसामन्तः स्यात्) धीश्वरः ।

पु. पु. पु.

[illegible] चक्रवर्ती सार्वभौमो (नृपोऽन्यो) मण्डलेश्वरः ॥ २ ॥

राजेति—संलग्नोऽन्त एकदेशोऽन्याः समन्तात्समन्तायाः स्वदेशाव्यवहितभूमेरिमे राजानः सामन्ताः प्रणता अशेषाः सामन्ताः स्वदेशानन्तरराजानो यस्येति प्रणताशेषसामन्तो राजा अधीश्वरः अधीश्वरः स्यादित्येकं सर्वमंतिशिष्टनृपस्य नापकारिणः । चक्रे भूमण्डले राजमण्डले वा वर्तितुं शीलमस्य, " सर्वं गतो चक्रवर्ति" (इति विश्वः)

चक्रं सैन्यं वर्तयितुं सर्वभूमौ चालयितुं शीलमस्य अवश्यं चक्रं वर्तयतीति वा 'चक्रवर्ती' सर्वभूमेरीश्वरः सार्वभौमः " सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि " (इति विश्वमेदिन्यौ) इति द्वे समुद्रपर्यन्तभूमीश्वरस्य । सार्वभौमादन्यो नृपः नरपालः मण्डलस्य भूम्येकदेशस्य ईश्वरः मण्डलेश्वरः स्यादित्येकं मण्डलेशस्य ॥ २ ॥

राजसूयादि कर्ता (**येनेष्टं राजसूयेन मण्डलस्येश्वरश्च) यः ।**

मण्डलेश्वर, **शास्ति यश्चाज्ञया राज्ञः स) सम्राड (थ) राजकम् ॥३॥**

नृपा चक्र, दप — न.

समूह, क्षत्रिय **राजन्यकं (च) (नृपतिक्षत्रियाणां गणे क्रमात्) ।**

समूह, मन्त्री — पु. पु. पु. पु.

या वजीर, छोटा मन्त्री **मन्त्री धीसचिवोऽमात्यो(ऽन्ये)कर्मसचिवा(स्ततः)४ ॥**

येनेति—येन नृपेण राजसूयेन इष्टं यजनमकारि, यश्च मण्डलस्य ईश्वरः यश्च आज्ञया राज्ञो नृपान् शास्ति शिक्षयति सः सम्यग् राजतीति सम्राट् स्यादित्येकं सार्वभौमविशेषस्य । केचित्तु पृथक् त्रीणि नामान्याहुः। राजसूयकर्ता सम्राट्, द्वादशराजमण्डलेश्वरोऽपि सम्राट्, सर्वनृपतीनां शासकोऽपि सम्राट् स्यात् । अथेति—नृपतिक्षत्रियाणां गणे समूहे क्रमात् राज्ञां समूहो राजकम्, राजन्यानां समूहो राजन्यकं च स्यात् नृपतिसमूहात्मकं राजकं स्यादित्येकं नरपतिसमूहस्य । क्षत्रियसमूहात्मकं राजन्यकं स्यादित्येकं क्षत्रियसमूहस्य । मन्त्रो गुप्तभाषणमस्यास्ति, अवश्यं मन्त्रयते वा मन्त्री, धिया, धियां वा सचिवः सहायः, धीप्रधानः सचिवो वेति धीसचिवः, अमा सह भवोऽमात्यः स्यादिति त्रीणि धीसचिवस्य । ततो धीसचिवादन्ये कर्मसु सचिवाः सहायाः कर्मसचिवाः स्युरित्येकं कर्मसचिवस्य ॥ ३ । ४ ॥

प्रधानमन्त्री, — पु. पु.न. पु. पु.

पुरोहित, **महामात्राः प्रधानानि पुरोधा (स्तु) पुरोहितः ।**

पद या — पु. पु.

न्यायाधीश **(द्रष्टरि व्यवहाराणां) प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥**

महेति—" मात्रा वर्णत्रिभूषायां वित्ते माने परिच्छदे । अवधारणे स्वल्पे क्लीबं कात्स्न्येऽवधारणे " (इति मेदिनी) महती मात्रा येषामिति महामात्राः, "महामात्रः समृद्धे मात्रे हस्तिपकाधिपे " (इति मेदिनी) प्रकर्षेण धीयन्ते इति प्रधानानि " प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि । प्रधानमपि च [illegible] " (इति मेदिनी) इति क्लीबत्वम्, पुंलिङ्गोऽपि "महामात्रः प्रधानः स्यात्" [illegible] इति द्वे महामात्रस्य । पुरोऽग्रे धीयन्ते इति पुरोधाः, पुरोधीयते स्म पुरोहितः इति द्वे पुरोहितस्य । [illegible]

[illegible]

चतुर्भद्र वर के मित्रयासहवाला आदि सबलैस्तैश्चतुर्भद्रं जन्याः स्निग्धा वरस्य ये ॥ ५८ ॥

इति ब्रह्मवर्गः ॥

सेति—सबलैः बलेन सहितैस्तैर्धर्मादिभिरुपलक्षितं चत्वारि भद्राणि, श्रेष्ठान्यत्र वृन्दे चत्वारि भद्राणीति वा चतुर्भद्रं स्यात् "भद्रो वाच्यवच्छ्रेष्ठसाधुनोः" (इति विश्वः) इत्येकं चतुर्भद्रस्य । वरस्य जामातुर्ये स्निग्धास्तत्पक्षा वयस्यादयः जनी वधूं वहन्तीति जन्याः स्युः "जन्यो वरवधूज्ञातिप्रियभृत्यहितेषु च" (इति विश्वः) इत्येकं वरवयस्यादीनाम् ॥ ५८ ॥

इति ब्रह्मवर्गविवरणम् ॥

अथ क्षत्रियवर्गो व्याख्यायते ॥

पु. पु. पु. पु. पु.

क्षत्रिय राजा मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।

पु. पु. पु. पु. पु पु. पु.

राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ १ ॥

मूर्धेति— मूर्धन्यभिषिच्यत इति मूर्धाभिषिक्तः "राज्यदानसमये मूर्धन्यभिषिच्यते तत्प्रभावात्सर्वोऽपि मूर्धाभिषिक्त स्यात्" राजति, राज्ञोऽपत्यं वा राजन्यः, बाहुभ्यां बाह्वोर्वा जातो बाहुजः "बाहुजः क्षत्रिये कीरे स्वयं जाततिलेऽपि च" (इति विश्वमेदिन्यौ) क्षदति, क्षतात्त्रायते वा पृषोदरादित्वात् क्षत्त्रस्तस्यापत्यं क्षत्रियः, विशेषेण राजतीति विराडिति पञ्च क्षत्रियस्य । राजतीति राजा, "राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ । यक्षे शक्रे च पुंसि स्यादिति" (मेदिनी) राजतीति राट्, पृथिव्या ईश्वरः, पार्थिवः, "पार्थिवो नृपतौ भूमिविकारे पार्थिवोऽन्यवत्" (इति विश्वः) क्ष्मां बिभर्तीति क्ष्माभृत, "क्ष्माभुगिति पाठे तु क्ष्मां भुनक्ति पालयतीति क्ष्माभुक्" नॄन्पातीति नृपः, भुवं पातीति भूपः, महीं क्षियति, मह्यां क्षयतीति वा महीक्षित् इति सप्त राज्ञः ॥ १ ॥

पु.

महाराजा महाराजाधिराज (राजा तु प्रणताशेषसामन्तः स्यात्) धीश्वरः ।

पु. पु. पु.

छोटा राजा चक्रवर्ती सार्वभौमो (नृपोऽन्यो) मण्डलेश्वरः ॥ २ ॥

राजेति—सम्यक्नोऽन्त एकदेशोऽस्याः समन्तासमन्तायाः स्वदेशाव्यवहितभूमेरभि राजानः सामन्ताः प्रणता अशेषाः सामन्ता स्वदेशानन्तरराजानो यस्येति प्रणताशेषसामन्तो राजा अधिराड् ईश्वरः अधीश्वरः स्यादित्येकं सर्वमंनिद्धिनिनृपवशकारिणः । सर्वे भूमण्डले राजमण्डले वा वर्तितुं शीलमस्य, चक्रं राष्ट्रं चक्रवाके" (इति विश्वः)

चक्रं सैन्यं वर्तयितुं सर्वभूमौ चालयितुं शीलमस्य अवश्यं चक्रं वर्तयतीति वा 'चक्रवर्ती' सर्वभूमेरीश्वरः सार्वभौमः " सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि " (इति विश्वमेदिन्यौ) इति द्वे समुद्रपर्यन्तभूमीश्वरस्य । सार्वभौमादन्यो नृपः नरपालः मण्डलस्य भूम्येकदेशस्य ईश्वरः मण्डलेश्वरः स्यादित्येकं मण्डलेशस्य ॥ २ ॥

राजसूयादि कर्ता (**येनेष्टं राजसूयेन मण्डलस्येश्वरश्च) यः ।**

मण्डलेश्वर, **शास्ति यश्चाज्ञया राज्ञः स) सम्राड (थ) राजकम् ॥३॥**

नृपाध्यक्ष, नृप न.

समूह, क्षत्रिय **राजन्यकं (च) (नृपतिक्षत्रियाणां गणे क्रमात्) ।**

समूह, मन्त्री पु. पु. पु. पु.

या वज़ीर, छोटा मन्त्री **मन्त्री धीसचिवोऽमात्यो(ऽन्ये)कर्मसचिवा(स्ततः)४ ॥**

येनेति—येन नृपेण राजसूयेन इष्टं यजनमकारि, यश्च मण्डलस्य ईश्वरः यश्च आज्ञया राज्ञो नृपान् शास्ति शिक्षयति सः सम्यग् राजतीति सम्राट् स्यादित्येकं सार्वभौमविशेषस्य । केचित्तु पृथक् त्रीणि नामान्याहुः। राजसूयकर्ता सम्राट्, द्वादशराजमण्डलेश्वरोपि सम्राट्, सर्वनृपतीनां शासकोऽपि सम्राट् स्यात् । अथेति—नृपतिक्षत्रियाणां गणे समूहे क्रमात् राज्ञां समूहो राजकम्, राजन्यानां समूहो राजन्यकं च स्यात् नृपतिसमूहात्मकं राजकं स्यादित्येकं नरपतिसमूहस्य । क्षत्रियसमूहात्मकं राजन्यकं स्यादित्येकं क्षत्रियसमूहस्य । मन्त्रो गुप्तभाषणमस्यास्ति, अवश्यं मन्त्रयते वा मन्त्री, धिया, धियां वा सचिवः सहायः, धीप्रधानः सचिवो वेति धीसचिवः, अमासह समीपे वा भवोऽमात्यः स्यादिति त्रीणि धीसचिवस्य । ततो धीसचिवादन्ये कर्मसु सचिवाः सहायाः कर्मसचिवाः स्युरित्येकं कर्मसचिवस्य ॥ ३ । ४ ॥

प्रधानमन्त्री, पु. पु.न. पु. पु.

पुरोहित, **महामात्राः प्रधानानि पुरोधा (स्तु) पुरोहितः ।**

पञ्च या पु. पु.

न्यायाधीश **(द्रष्टरि व्यवहाराणां) प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥**

महेति—" मात्रा कर्णविभूषायां वित्ते माने परिच्छिदे । अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे " (इति मेदिनी) महती मात्रा येषामिति महामात्राः, "महामात्रः समृद्धे चामात्ये हस्तिपकाधिपे " (इति मेदिनी) प्रकर्षेण धीयन्ते इति प्रधानानि " प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीबमेकत्वे सूत्तमे सदा" (इति मेदिनी) इति क्लीवत्वम्, पुंलिङ्गोऽपि "महामात्रः प्रधानः स्यादिति" 'पुंस्काण्डे वोपालितात्' इति द्वे प्रधानस्य । पुरोऽग्रे धीयत इति पुरोधाः, पुरोधीयते स्म पुरोहितः इति द्वे पुरोहितस्य । ऋणादानादीन्यष्टादश विवादस्थानानि व्यवहारास्तेषां

१ सम्राट् समाराधनतत्परोभूदिति रघु ॥

द्रष्टरि निर्णेतरि प्रच्छनं प्राट्, विवचनं विवाकः प्राट् च विवाकश्च प्राड्विवाकौ प्रश्नविवेकावस्य स्तः प्राड्विवाकः "विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततः स्मृतः" अक्षन्तीत्यक्षाः "अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः" (इति विश्वः) पश्यतीति दर्शकः, अक्षाणां व्यवहाराणां दर्शकः 'अक्षदर्शकः' इति द्वे धर्माध्यक्षस्य ॥ ५ ॥

पु. पु. पु. पु. पु.

द्वारपाल, **प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।**

रखवार, पु. पु. पु. पु.

अधिकारी **रक्षिवर्ग (स्त्व) नीकस्थो(ऽथा)ध्यक्षाधिकृतौ(समौ)६॥**

प्रतीति—प्रतिहरणं प्रतीहारो जनवारणमस्त्यस्येति प्रतीहारः, "प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति" (इति विश्वमेदिन्यौ) द्वारं पालयतीति द्वारपालः, द्वारि तिष्ठतीति द्वाःस्थः, द्वारि तिष्ठति स्म द्वाःस्थितः "द्वाःस्थितो वेत्रधारकः" (इति त्रिकाण्डशेषः) पश्यतीति दर्शकः "स्याद्दर्शको दर्शयिता प्रतीहारोऽपि दर्शकः" (इति रुद्रः) द्वाःस्थितस्य दर्शक इति समस्तं नामेत्यन्ये, "द्वारपो द्वाःस्थितादर्शी" (इति रभसः) इति पञ्च द्वारपालस्य । अवश्यं रक्षन्तीति रक्षिणः, वृज्यत इति वर्गः, रक्षिणां वर्गो रक्षिवर्गः, अनीकेन, अनीके वा तिष्ठतीति अनीकस्थः "अनीकस्थो रणगते हस्तिशिक्षाविचक्षणे । राजरक्षिणि चिह्ने च वीरमर्दनकेऽपि च" (इति विश्वमेदिन्यौ) इति द्वे रक्षकगणस्य । अथेति—अध्यक्षति, अधिगतोऽक्षं व्यवहारमिति वा अध्यक्षः "अध्यक्षोऽधिकृते प्रोक्तः प्रत्यक्षे त्वभिधेयवदिति" (मेदिनी) अधि अधिकमुपरि वा क्रियते स्म अधिकृतः उभौ समौ समानार्थौ समानलिङ्गौ स्यातामिति द्वे व्यापारितस्य ॥ ६ ॥

एक ग्रामाध्यक्ष, पु. पु.

बहुग्रामाध्यक्ष, **स्थायुको (ऽधिकृतो ग्रामे) गोपो (ग्रामेषु भूरिषु) ।**

स्वर्णाधिकारी, पु. पु. पु. पु.

रूप्याधिकारी **भौरिकः कनकाध्यक्षो रूप्याध्यक्ष (स्तु) नैष्किकः॥७॥**

स्थेति—ग्रामेऽधिकृतः स्थातुं शीलमस्येति स्थायुकः स्यादित्येकमेकग्रामाधिकृतस्य । भूरिषु ग्रामेषु अधिकृतो गोपायतीति गोपः स्यात् "गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि । ग्रामौघाधिकृते शारिवाख्यौषधौ स्त्रियामिति" (मेदिनी) इत्येकं बहुग्रामाधिकृतस्य । भूरिणि सुवर्णे नियुक्तो भौरिकः, कनकस्य अध्यक्षः कनकाध्यक्षः इति द्वे स्वर्णाधिकृतस्य । आहतं प्रशस्तं वा रूपमस्येति रूप्यः "रूप्यः स्यात्सुन्दरे त्रिषु" "आहतस्वर्णरजते रजते च नपुंसकमिति" (मेदिनी) रूप्यस्याध्यक्षो रूप्याध्यक्षः,

निष्के हेम्नि नियुक्तो नैष्किकः " टङ्कपतिर्नैष्किको रजताध्यक्षः " (इति रभसः) इति द्वे टङ्कादिशालायां नियुक्तस्य ॥ ७ ॥

पु.

…निवासाधि- (अन्तः पुरे त्वधिकृतः स्या) दन्तर्वंशिको (जनः)।

…री, रनिवास पु. पु. पु. पु.

…सेवक सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च (ते)॥८॥

अन्तरिति—अन्तःपुरे अधिकृतो जनः अन्तर् अभ्यन्तरो वेशो गृहम्, अन्तर्वेस्तस्मिन्नियुक्त अन्तर्वेशोस्त्यस्येति वा 'अन्तर्वंशिकः' स्यादित्येकमन्तःपुराधि…तजनस्य। सुष्ठु विदन्तं विद्वासमपि लान्ति वशवर्तिनं कुर्वन्तीति सुविदल्लाः स्त्रिय…तासामिमे रक्षकाः सौविदल्लाः, कञ्चुकश्चोलकोऽस्त्येषामिति कञ्चुकिनः, " कञ्चुकी …ोङ्कृतरौ महल्लेपन्नगे विटे " (इति हैमः) तिष्ठन्त्येषु पुरुषाः स्थाः दारास्तेषां …न्तीति पतयः स्थपतयस्त एव स्थापत्याः, सुविदन्तीति सुविदा एव, सुवेदनं सुविद् …ज्ञानमस्त्येषामिति, सुविदश्चतुराः स्त्रियस्तासामिमे रक्षका वा सौविदा इति चत्वारि …यगारे वहीरक्षाधिकृतस्य ॥ ८ ॥

खोजा पु. पु. पु. पु. पु.

सेवक शण्ढो वर्षवर (स्तुल्यौ) सेवकार्थ्यनुजीविनः।

पड़ोसी राजा पु पु.

अन्य राजा (विषयानन्तरो राजा) शत्रुर्मित्र[1] (मतः परम्)॥ ९ ॥

शेति—शाम्यति शिश्नाभावादिति शण्ढ., " शण्ढः क्लीबस्तु कञ्चुकी " (इति तालव्यादौ रभसः) "शण्ढः स्यात्पुंसि गोपतौ। आकृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि " (इति मेदिनी) " शण्ढषण्ढौ सौविदौ। बन्ध्यपुंसीद्वरे क्लीबे " (इति हैमः) वरति, वृणोति वा वरः वर्षस्य रेतःपातस्य वरो वर्षवरः उभौ तुल्यौ समानार्थौ समानलिङ्गौ स्तः " ये त्वल्पसत्त्वाः प्रथमाः क्लीबाश्च स्त्रीस्वभाविनः। जात्या न दुष्टाः कार्येषु ते वै वर्षवराः स्मृताः " इति द्वे शण्ढस्य। सेवत इति सेवकः, " सेवकस्तु प्रसेवे ना वाच्यलिङ्गोऽनुजीविनि " (इति मेदिनी) अर्थोऽसंनिहितोऽस्यास्तीति अर्थी, " अर्थी पुमान्याचके स्यात्सेवके च विवादिनि " (इति मेदिनी) अनुजीवितुं शीलमस्येति, अनुजीवी इति त्रीणि सेवकस्य। विषयानन्तरः स्वदेशाव्यवहितदेशो राजा शातयतीति शत्रुः स्यादित्येकं स्वदेशाव्यवहितदेशीयनृपस्य। अतः शत्रोः परं मेद्यतीति मित्रं स्यादित्येकमन्यनृपस्य ॥ ९ ॥

---

१ "मित्र सुहृदि न द्वयो। सूर्ये पुंसि स्त्रिया गन्धद्रव्ये दैत्यान्तरे पुमानिति" (मेदिनी) ॥

दोनोंसे भिन्न, पु. पु.
अपने राज्य से उदासीनः (परतरः) पार्ष्णिग्राह (स्तु पृष्ठतः)।
पीछे का राजा, पु. पु. पु. पु. पु. पु. पु.
रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥ १० ॥
पु. पु. पु. पु. पु. पु.
वैरी द्विड्विपक्षाहितामित्त्रदस्युशात्रवशत्रवः।
पु. पु. पु. पु.
अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ ११ ॥

उदेति—अतिशयितः परः परतरः शत्रुमित्राभ्यां परो राजा उदास्त इति उदासीनः स्यादित्येकं शत्रुमित्रपरनृपस्य। पृष्ठतः पृष्ठभागस्थितो राजा पार्ष्णिपश्चात्पदं गृह्णातीति पार्ष्णिग्राहः "सैन्यपृष्ठे पुमान्पार्ष्णिः पश्चात्पदजिगीषयोः" (इति विश्वः) इत्येकं जिगीषुपृष्ठभागस्थितनृपस्य। रपति दोषमनिष्टमिति वा रिपुस्तस्मिन्, वीरस्य कर्म भावो वा वैरमस्यास्तीति वैरी, सपत्नीव सपत्नः, इयर्ति विरोधमिति अरिः, द्वेष्टीति द्विषन्, द्वेषणशीलो द्वेषणः, दुष्टं हृदयमस्येति दुर्हृद्, द्वेष्टीति द्विट्, विरुद्धः पक्षो विविधः पक्षो वास्येति विपक्षः, न हितमस्मादिति अहितः, अमति गच्छतीति अमित्रः, दस्यतीति दस्युः, शातयतीति शत्रुः शत्रुरेव शात्रवः, शत्रुः, अभिहन्तुं शीलमस्येति अभिघाती, "द्वेष्योऽभियातिरमित्रः" (इति रत्नकोषः) अभियातीति "अभियातिः" पिपर्ति रोषमिति परः, न राति सुखमिति अरातिः, प्रतिकूलमर्थयितुं शीलमस्येति प्रत्यर्थी, परिदोपाख्यानं पन्थयितुं शीलमस्येति परिपन्थी इत्यूनविंशतिः शत्रोः ॥ १०।११ ॥

समान वयवाले, पु पु. पु. न. पु. पु.
मित्र, वयस्यः स्निग्धः सवया (अथ) मित्त्रं सखा सुहृत्।
मित्रता या न. न. पु. न.
मिताई, भलाई सख्यं साप्तपदीनं (स्याद) नुरोधोऽनुवर्तनम् ॥ १२ ॥

वयेति—वयसा तुल्यो वयस्यः, स्निह्यतीति स्निग्धः, समानं वयोऽस्येति सवयाः इति त्रीणि समानवयस्यस्य। अथेति—मेद्यतीति मित्रम्, समानः ख्यायते लोकेरिति सखा, शोभनं हृदयमस्येति सुहृदिति त्रीणि मित्रस्य। सख्युर्भावः कर्म वा सख्यम्, सप्तभिः पदैरवाप्यत इति साप्तपदीनं स्यादिति द्वे सख्युर्धर्मकर्मणोः। अनुगम्य रोधनम् अनुरोधः, अनुगम्य वर्तनं चित्ताराधनमिति द्वे आराध्यादेरिष्टसंपादनस्य ॥ १२ ॥

पु. पु. पु. पु. पु.
दूत या यथार्हवर्णः प्रणिधिरपसर्पश्चरःस्पशः।
हलकारा, न. पु. पु. पु.
विश्वासी चार (श्च) गूढपुरुष (श्च) आप्तः प्रत्ययित (स्त्रिषु) ॥ १३ ॥

१ [illegible] "[illegible]" ॥
२ [illegible] " ([illegible]) ॥

यथेति—अर्हतीति अर्हः यो योऽर्हो यथार्हं वर्णो रूपमस्येति यथार्हवर्णः “ वर्णः स्याद्भेदरूपयो. ” (इति धरणिः) प्रकर्षेण निधीयते ज्ञेयमत्रेति प्रणिधिः, “ प्रणिधिर्याचने चरे ” (इति हैमः) अपसर्पतीति अपसर्पः, चरतीति चरः “चरोक्षद्यूतभेदे च भौमे चारे त्रसे चले ” (इति मेदिनी) स्पशति बाधते परानिति स्पशः, “ स्पशः स्यात्संपराये च प्रणिधावपि पुंस्ययम् ” (इति मेदिनी) चर एव चारः “ चारः पियालवृक्षे स्याद्गतौ बन्धापसर्पयोः ” (इति मेदिनी) गूढश्चासौ पुरुषश्चेति गूढपुरुषः इति सप्त चारस्य “ जासूस ” इति ख्यातस्य । आप्यते स्म आप्तः, प्रत्ययो विश्वासः संजातोऽस्येति प्रत्ययितः त्रिषु त्रिलिङ्गया स्यादिति द्वे विश्वासाधारस्य ॥ १३ ॥

ज्योतिर्विद् — **सांवत्सरो ज्यौतिषिको दैवज्ञ गणका (वपि) ।**
(स्यु)मौहूर्तिको मौहूर्तज्ञानिकार्तान्तिका(अपि) ॥१४॥

सामिति—संवत्सरं वेत्तीति सांवत्सरः, ज्योतिर्नक्षत्राद्यधिकृत्य कृतो ग्रन्थो ज्योतिषस्तमधीते वेद वा ज्यौतिषिकः, दैवं प्राक्तनं शुभाशुभं कर्म जानातीति दैवज्ञः, गणयतीति गणक., मुहूर्तमधिकृत्य कृतं ग्रन्थमधीते वेद वा मौहूर्तिकः (अणि) मौहूर्तः, ज्ञानमस्यास्तीति ज्ञानी “ कृतान्तोयमसिद्धान्तदैवाकुशलकर्मसु ” कृतान्तं वेत्तीति कार्तान्तिकः इत्यष्टौ ज्यौतिषस्य ॥ १४ ॥

शास्त्री, — **तान्त्रिको ज्ञातसिद्धान्तः सत्त्री गृहपतिः (समौ) ।**
मोदी, लेखक — **लिपिंकरोऽक्षरचणोऽक्षरचुञ्चु (श्च) लेखके ॥ १५ ॥**

तेति—तन्त्रं सिद्धान्तमधीते वेद वा तान्त्रिकः, ज्ञात. सिद्धान्तो येनेति ज्ञातसिद्धान्तः इति द्वे तान्त्रिकस्य तत्त्वार्थज्ञस्य वा । “ सत्रमाच्छादने यज्ञे सदादाने च कैतवे ” (इति विश्वः) सत्रमस्यास्तीति सत्री, गृहस्य पतिः गृहपतिः उभौ समौ समानार्थौ समानलिङ्गौ स्तः इति द्वे सदान्नादिदानकर्तृगृहस्थस्य । लिपिं करोतीति लिपिकरः एवं लिविकरोपि, अक्षरे वित्तोऽक्षरचणः, एवमक्षरचुञ्चुरपि । लिखतीति लेखकः इति चत्वारि लेखकस्य ॥ १५ ॥

लिखायाअक्षर — **(लिखिताक्षरविन्यासे)लिपिर्लिबि(रुभे स्त्रियौ) ।**
दूत, दूतका काम — **(स्यात्संदेशहरो दूतो दूत्यं (तद्भावकर्मणि) ॥ १६ ॥**

लिखीति—लिख्यते स्म लिखितम्, न क्षरन्तीत्यक्षराणि, विन्यसनं विन्यासः, अक्ष-

सेति—सहसि बले भवं साहसम्, "साहसं तु दमे दुष्करकर्मणि । अविमृश्य कृतौ धाष्टर्ये" (इति हैमः) दमनं दमः " दमः स्यात्कर्दमे दण्डे दमने दमथेऽपि च" (इति हेमचन्द्रः) दाम्यति, दण्डयत्यनेन वा दण्डः "दण्डः सैन्ये दमे यमे। मानव्यूहग्रहभेदेष्वश्वेऽर्कानुचरे मथि । प्रकाण्डे लगुडे कोणे चतुर्थोपायगर्वयोः" (इति हैमः) इति त्रीणि दण्डस्य । सामनम्, स्यति रोपमनेन वा साम, सान्त्वनं सान्त्वमिति द्वे सान्नः " मिलाप" इति ख्यातस्य । अथवेति—भेदनं भेदः " भेदो द्वैधे विशेषे स्यादुपजापे विदारणे " (इति विश्वमेदिन्यौ) उपांशु जपनं जापः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे भेदस्य । धर्म आद्यो येषामिति धर्माद्याः आदिना कामार्थभयग्रहः तैर्धर्मार्थकामभयैरमात्यादेर्यत्परीक्षणं तत् उपाधीयते शुद्धिज्ञानमत्रेति उपधा स्यादित्येकं राज्ञा धर्माद्यैरमात्यादेः परीक्षणस्य ॥ २१ ॥

पु.स.न.

सलाह (पञ्चत्रिष्व) षडक्षीणो (यस्तृतीयाद्यगोचरः)।

एकान्त पु.स.न. पु.स.न. पु.स.न. पु.स.न. न.

एकान्त की बात विविक्तविजनच्छन्ननिःशलाका (स्तथा) रहः ॥ २२ ॥

अ. अ. पु.स.न.

विश्वास रहश्चोपांशु (चालिङ्गे) रहस्यं (तद्भवे त्रिषु)।

पु. पु. पु.

अन्याय (समौ)विस्रम्भविश्वासौभ्रेषो(भ्रंशोयथोचितात्)२३॥

षेति—निःशलाकान्ताः पञ्च त्रिषु त्रिलिङ्गाः स्युः यः तृतीयाद्यगोचरस्तृतीयादिभिर्न ज्ञातः स अविद्यमानानि षट् अक्षीण्यत्रेति अषडक्षीणः स्यादित्येकं द्वाभ्यामेव कृतस्य मन्त्रस्य । विविञ्चन्ति जना अत्रेति विविक्तः " विविक्तं त्रिष्वसंपृक्ते रहः पूतविवेकिषु " (इति मेदिनी) विगतो जनोऽस्मादिति विजनः, छाद्यते स्म छन्नः " छन्नं तु रहसि क्लीबं छादिते वाच्यलिङ्गकम् " निर्गता शलाकाऽप्यस्मात्, शलाकाया निर्गतो येति निःशलाकः 'तथा' शब्दः समुच्चये रहाते, रमन्तेऽत्रेति वा रहः " रहस्तत्त्वे रते गुह्ये " (इति मेदिनी) रभसोऽपि, " रहो निधुवनेऽपि स्याद्रहो गुह्ये नपुंसकम् " उपगता अंशवः किरणा अत्रेति उपांशु "उपांशुर्जपभेदे स्यादुपांशु विजनेऽव्ययम् " (इति विश्वहेममेदिन्यः) अलिङ्गे द्वे अव्यये स्यातामिति समेकान्तस्य। तद्भवे रहो भवं रहस्यं त्रिषु त्रिलिङ्गया स्यात् " रहस्या स्त्री नदीभेदे गोपनीयेऽभिधेयवदिति" (मेदिनी) इत्येकं रहस्यस्य । विस्रम्भणं विस्रम्भः, तालव्यादिस्तु प्रमादे गतः " विस्रम्भः केलिकलहे विश्वासे प्रणयेऽपि च " (इति विश्वमेदिन्यौ) विश्वसनं विश्वासः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे विश्वासस्य । यथोचितात्, यथाप्राप्तात् भ्रंशोऽपगमनं भ्रेषणं भ्रेषः स्यादित्येकमन्यायस्य ॥ २२ । २३ ॥

पु. पुं. पु. न. ग.

न्याय न्याययुत अभ्रेषन्यायकल्पा (स्तु) देशरूपं समञ्जसम् ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

द्रव्ययुक्तायुक्त युक्तमौपयिकं लभ्यं भजमानाभिनीत (वत्) ॥ २४ ॥

पु.स.न. स. न.

परीक्षा न्याय्यं (च त्रिषु षट्) संप्रधारणा (तु) समर्थनम् ।

अभ्र इति—भ्रेपादन्योऽभ्रेपः, नियमेन ईयत इति न्यायः, कल्पनं कल्पः "कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने" (इति मेदिनी) दिश्यत इति देश देशो रूपमस्य, दिश्यमानस्योचितस्य रूपम्, प्रशस्तं देशनं वेति देशरूपम्, सम्यगञ्जोऽत्र, संगतमञ्जसा तत्त्वमत्रेति वा समञ्जसमिति पञ्चोचितस्य । युज्यते स्म युक्तम् "युक्तो युक्ते पृथग्भूते क्लीबं हस्तचतुष्टये" (इति मेदिनी) उपयन्त्यनेन उपायः उपाय एव औपयिकम्, लभ्यत इति लभ्यम्, "लभ्यं युक्ते च लब्धव्ये" (इति मेदिनी) भजते फलमनुबध्नातीति भजमानम्, अभिनीयते स्म अभिनीतम् तेन तुल्यमभिनीतवत् "अभिनीतं संस्कृते च न्याय्ये चामर्षिणि त्रिपु" (इति रुद्रः) न्यायादनपेतं न्याय्यम् एते युक्तादयः षट् त्रिपु त्रिलिङ्ग्या स्युरिति षट् न्यायागतस्य । संप्रधारणमिति संप्रधारणा, समर्थितं समर्थनमिति द्वे 'इदमुचितमेव' इति निश्चयस्य ॥२४ । ३॥

पु. पु. पु. न.

आज्ञा या हुक्म अववाद (स्तु) निर्देशो निदेशः शासनं (च सः) ॥ २५ ॥

मर्यादा स. स. स. स. स. स.

अपराध शिष्टि (श्चा) ज्ञा (च) संस्था (तु) मर्यादा धारणा स्थितिः ।

न. पु. पु. न. न.

कैद करना आगोऽपराधो मन्तु (श्च) (समे तू) द्दानबन्धने ॥ २६ ॥

अवेति—अवलम्ब्य वदनमत्रेति अववादः, निर्देशनं निर्देशः, निदेशनं निदेशः "निदेशः शासनोपान्तकथनेषु प्रयुज्यते" (इति विश्वः) शिष्टं शासनम्, शासनं शिष्टिः वाहुलकात्तिः शास्तिरपि आज्ञानमाज्ञापनं वा आज्ञा इति पञ्चाज्ञायाः । सम्यगवस्थानं, संतिष्ठतेऽनयेति वा संस्था "संस्थश्चरेऽवस्थिते स्त्री स्थितौ सादृश्यनाशयोः" (इति मेदिनी) 'मर्या' इति सीमार्थेऽव्ययम् तत्र दीयते इति मर्यादा, धारयति धर्ममिति धारणा "धारणाङ्गे च योगेऽस्य न पुंसि स्याद्विधारणे" स्थानं तिष्ठन्त्यत्रेति वा स्थितिरिति चत्वारि न्याय्यपथस्थितेः । एतीति आगः "आगोऽपराधे पापे स्यादिति" (मेदिनी) अपराधनमपराधः, मन्यत इति मन्तु. "मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि

१ विश्वहैमसवादप्राप्तप्रामाण्यमेदिनीपुस्तके "युत" इति पाठस्योपालम्भेन योग्यत्वेन चास्य स्योपन्यासः प्रामादिकः ॥

प्रजापतौ " (इति मेदिनी) इति त्रीण्यपराधस्य । उद्दितमुद्दानम्, बद्धमिति बन्धनम् उभे समे समानार्थे समानलिङ्गे स्यातामिति द्वे बन्धनस्य ॥ २५ । २६ ॥

पु. पु. पु. पु.
दूना दण्ड पोत या राज- भाग महसूल भेट या नजर
द्विपाद्यो (द्विगुणो दण्डो) भागधेयः करो बलिः ।
पु.न. न. न.
(घट्टादिदेयं) शुल्कोऽ(स्त्री) प्राभृत(न्तु) प्रदेशनम् ॥ २७ ॥

द्वीति—द्विगुणो दण्डः द्वौ पादौ परिमाणमस्येति द्विपाद्यः स्यादित्येकमपराधे शास्त्रेण बोधितदण्डाद्द्विगुणदण्डस्य । भाग एव भागधेयः " अर्थागमो भवेदायो भागधेयो बलिः करः " (इति हलायुधः) कीर्यत इति करः " करो वर्षोपले पाणौ रश्मौ प्रत्यायशुण्डयोः " (इति मेदिनी) कर एव कारः " कारो वधे निश्चये च बलौ रत्ने यतावपि " (इति विश्वमेदिन्यौ) बल्यत इति बलिः " बलिर्दैत्यप्रभेदे च करचामरदण्डयोः । उपहारे पुमानस्त्री जरया श्लथचर्मणि । गृहदारुप्रभेदे च जठरावयवेऽपि च " (इति मेदिनी) इति त्रीणि कर्षकादिभ्यो राजग्राह्यभागस्य । घट्टः आदिर्यस्येति घट्टादिः आदिना गुल्मप्रतोल्यादिग्रहस्तस्मिन् घट्टादौ यद्देयं द्रव्यादिकं तत् शुल्क्यत इति शुल्कः अस्त्री पुंनपुंसकं स्यात् " शुल्कं घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियामिति " (मेदिनी) इत्येकं घट्टादिदेयराजभागस्य "महसूल" इति ख्यातस्य । प्राभ्रियते स्म प्राभृतम्, प्रदिश्यत इति प्रदेशनमिति द्वे देवताभ्यो मित्रादिभ्यश्च दीयमानस्य ॥ २७ ॥

उपहार दायज या भेंट व भौंत आदि में देय धन
न. न. पु. स.
उपायनमुपग्राह्यमुपहारस्तथोपदा ।
पु. पु.
(यौतकादि तु यद्देयं) सुदायो हरणं (च तत्) ॥ २८ ॥

उपेति—उपेयते, उपानीयते वा उपायनम् "उपायनमुपग्राह्यं प्राभृतं चोपदा स्त्रियाम्" (इत्यमरमाला) उपगृह्यत इति उपग्राह्यम्, उपह्रियत इति उपहारः " तथेति समुच्चये " उपदीयत इति उपदा इति चत्वार्युपहारस्य [illegible] उपहारस्येत्यन्ये । युतकं योनिसम्बन्धस्तत्र भवम्, युवयोर्वरवध्वोरिदं वा यौतं तदेव यौतकम् " यौतकं यौतुकं च तदिति दायजमित्यपि " तदेवादिर्यस्येति यौतुकादि " आदिना व्रतभिक्षादिपरिग्रहः " [illegible] सुदीयत इति सुदायः, ह्रियत इति हरणम् " हरणं यौतकादौ [illegible] भुजे हृतावपि " (इति मेदिनी) इति द्वे कन्यादानकाले व्रतभिक्षादौ च दीयमानद्रव्यस्य ॥ २८ ॥

[illegible]

पु. न. स.
वर्तमान,भविष्य तत्काल(स्तु)तदात्वं (स्यादुत्तरः काल) आयतिः ।
शीघ्रफल, न. पु
आगामीफल सान्दृष्टिकं (फलं सद्य) उदर्कः (फलमुत्तरम्)॥२९॥

तदिति—स चासौ कालश्चेति तत्कालः, ' तदा ' इत्यस्य भावस्तदात्वं स्यादिति द्वे वर्तमानकालस्य । उत्तरः कालः आयंस्यतेऽत्र, आयास्यतीति वा आयतिः " आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयो." (इतिमेदिनी) इत्येकमुत्तरकालस्य । सद्यः फलं सन्दृष्टौ प्रत्यक्षे भवं सान्दृष्टिकं स्यादित्येकं व्यापारानन्तरं जायमानफलस्य । उत्तरं फलम् उदर्क्यते, उदर्च्यते, उदृच्यते वा उदर्कः स्यात् " उदर्क एष्यत्कालीनफले मदनकण्टके " (इति मेदिनी) इत्येकं भाविकर्मफलस्य ॥ २९ ॥

न. न.
अदृष्टभय, दृष्ट अदृष्टं (वह्नितोयादि) दृष्टं (स्वपरचक्रजम्) ।
भय, अपने न.
पक्षीयो से भय (महीभुजा) महिभयं (स्वपक्षप्रभवं भयम्) ॥३०॥

अदृति—वह्निश्च तोयं च आदिर्यस्येति भयहेतुत्वाद्भयम् आदिना " हुताशनो जलं व्याधिर्दुर्भिक्षं मरकस्तथा । अतिवृष्टिरनावृष्टिर्मूषिकाः शलभादयः " गृह्यन्ते, अदृष्टहेतुकत्वान्न दृष्टमदृष्टमित्येकमग्न्यादिकृतभयस्य । स्वश्च परश्च स्वपरौ तयोश्चक्रे सैन्ये ताभ्यां जातं स्वपरचक्रजं भयं दृश्यते स्म दृष्टं स्यादित्येकं स्वपरसैन्यात्परराष्ट्राच्चौराटविकादेः परचक्राद्दाहविलोपादेर्भयस्य । महीभुजामवनिपालानां स्वपक्षात्प्रभवतीति स्वपक्षप्रभवं भयम् अहिरिव गृहस्थत्वादावृताकारत्वाच्च स्वस्य पक्ष एव अहिस्तस्य भयं महिभयं स्यादित्येकं स्वसहायाज्जातभयस्य ॥ ३० ॥

स. पु. न. न.
व्यवस्था प्रक्रिया (त्व)धिकारः(स्याच्)चामरं(तु)प्रकीर्णकम् ।
स्थापन, चँवर, न. न. न.
राजगद्दी, नृपासनं (तु) यद्भद्रासनं सिंहासनं (तु तत्) ॥३१॥
सिंहासन,छाता, न. न. न.
राजछाता, (हैमं) छत्रं त्वातपत्रं (राज्ञस्तु) नृपलक्ष्म (तत्) ।
पूर्ण कलश, पु. पु. पु. स
झारी भद्रकुम्भः पूर्णकुम्भो भृङ्गारः कनकालुका ॥ ३२ ॥

प्रेति—प्रकर्षाय करणं प्रक्रिया " प्रक्रिया तूत्पादने स्यादधिकारप्रकारयोरिति " (हेमचन्द्रः)अधि आधिक्यस्य करणमधिकारः स्यादिति द्वे राज्ञा छत्रधारणादिव्यापारस्य । चमति, चम्यतेऽनेन वा चमरम् "चमरश्चामरे दैत्ये चमरी तु मृगान्तरे " (इति हैमः)

चमरमेव चामरम् स्त्रियामजादित्वाच्चामरापि "चामरा चामरं वालव्यजनं रोमगुच्छक-मिति" (रभसः) प्रकीर्यते स्म प्रकीर्णम् तदेव प्रकीर्णकम् " प्रकीर्णकं चामरे स्याद्विस्तारे ना तुरङ्गमे " (इति मेदिनी) इति द्वे चामरस्य । यत् नृपस्य आसनं नृपासनम् , तत् भद्रं च तदासनं चेति भद्रासनं स्यादिति द्वे मण्यादिकृतराजासनस्य । यत् हैमं हेमविकारजं नृपासनं तत् सिंहाकारमासनं सिंह इव आसनं वेति सिंहासनं स्यादित्येकं सुवर्णकृतराजासनस्य । छादयत्यनेन छत्रम् , आतपात्त्रायत इत्यातपत्रमिति द्वे छत्रस्य । तत् छत्रं राज्ञो नृपस्य लक्ष्म चिह्नं नृपलक्ष्म स्यादित्येकं नृपच्छत्रस्य । भद्रस्य भद्रो वा कुम्भः भद्रकुम्भः, पूर्णः कुम्भः पूर्णकुम्भः इति द्वे पूर्णकलशस्य । बिभर्ति जलमिति भृङ्गारः, कनकस्य आलुः कनकालुः सैव कनकालुका स्यादिति द्वे सुवर्णकृतजलपात्रस्य ॥ ३१ । ३२ ॥

पु. न. न. न.

सेनानिवास, **निवेशः शिबिरं (षण्ढे) सज्जनं (तू) परक्षणम् ।**

गश्त या पहरा, न.

सेनाङ्ग **(हस्त्यश्वरथपादातं) सेनाङ्गं (स्याच्चतुष्टयम्)** ॥ ३३ ॥

नीति—निविशन्तेऽत्रेति निवेशः "निवेशः सैन्यविन्यासे न्यासेऽङ्गविवाहयोः" (इति हैमः) शवन्त्यत्रेति शिबिरं षण्ढे क्लीबे स्यादिति द्वे आगन्तुकसैन्यवसतेः । सज्जन्त्यनेन, सच्छोभनं जन्यतेऽनेन वा सज्जनम् , उपरक्ष्यतेऽनेन उपरक्षणमिति द्वे सैन्यरक्षणाय नियुक्तप्रहरिकादिन्यासस्य । पदातीनां समूहः पादातम् , हस्तिनश्च अश्वाश्च रथाश्च पादातं चेति हस्त्यश्वरथपादातं सेनाङ्गंस्यादेकवद्भावः । चत्वारोऽवयवा यस्येति चतुष्टयं सेनाया अङ्गं सेनाङ्गं स्यादित्येकं सेनाङ्गस्य ॥ ३३ ॥

पु. पु. पु. पु. पु. पु.

हाथी, **दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।**

पु. पु. पु. पु. पु. पु

हाथियोंकाराजा, **मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥**

पु. पु. पु. पु. पु.

मदान्ध **इभः स्तम्बेरमः पद्मी यूथनाथ (स्तु) यूथपः ।**

हाथी, हाथी का पु. पु. पु. पु.

बचा **मदोत्कटो मदकलः कलभः करिशावकः ॥ ३५ ॥**

नीति—अतिशयितौ दन्तावस्येति दन्ती, दन्तौ बलावस्येति दन्तावलः, हस्तः शुण्डा-स्तमस्येति हस्ती, द्वौ रदावस्येति द्विरदः, अनेकेन करेण मुखेन च पिबतीति अनेकपः, द्वाभ्यां मुखशुण्डाभ्यां पिबतीति द्विपः, मतङ्गादृषेर्जातो मतङ्गजः, गजतीति गजः, न अगः ... नागः, " नागो मतङ्गजे सर्पे पुन्नागे नागकेशरे । कुञ्जाः

नागदन्ते मुस्तके वारिदेऽपि च। देहानिलविशेषे च श्रेष्ठे स्यादुत्तरस्थितः। नागं रङ्गे सीसपत्रे स्त्रीबन्धे करणान्तरे" (इति हैमः) अतिशयितः कुञ्जो हनुरस्येति कुञ्जरः, "कुञ्जरोऽनेकपे केशे कुञ्जरा धातकीद्रुमे। पाटलायां चेति" (हेमचन्द्रः) वारयति शत्रुबलमिति वारणः "वारणं प्रतिषेधे स्याद्वारणास्तु मतङ्गजे" (इति विश्वः) करोऽस्त्यस्येति करी, एति, ईयते वा इभः "स्तम्बो गुल्मे तृणादीनामकाण्डे द्रुमगुच्छयोरिति" (विश्वः) स्तम्बे रमते स्तम्बेरमः, पद्मं बिन्दुजालमस्त्यस्येति पद्मी इति पञ्चदशहस्तिनः। यूथस्य हस्तिवृन्दस्य नाथो यूथनाथः, यूथं पातीति यूथपः इति द्वे यूथमुख्यहस्तिनः। मदेन दानाम्बुनोत्कटो मत्तो मदोत्कटः, मदेन कलते, मदे सति कलो ध्वनिर्यस्येति वा मदकलः इति द्वे अन्तर्मदस्य हस्तिनः। कलते, कलयति, कलं भाषते वा कलभः, करिणः शावकः करिशावकः इति द्वे करिशावकस्य ॥३४।३५॥

मदस्रावीहाथी, वे मदवाला, हाथियों का झुण्ड, हथिनी

पु. पु. पु. पु. पु.
प्रभिन्नो गर्जितो मत्तः (समा)वुद्वान्तनिर्मदौ।
न. स. स. स. स.
हास्तिकं गजता (वृन्दे) करिणी धेनुका वशा ॥ ३६ ॥

प्रेति—प्रकर्षेण भिद्यते स्म प्रभिन्नः, गर्जयति, गर्जो जातोऽस्येति वा गर्जितः "गर्जितं वारिवाहादिध्वनौ ना मत्तकुञ्जरे" (इति विश्वमेदिन्यौ) माद्यति स्म मत्तः इति त्रीणि जातमदस्य। उद्गतं वान्तं मदवमनमस्मादिति उद्वान्तः, मदान्निर्गतः, मदो निर्गतोऽस्मादिति वा निर्मदः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे गतमदगजस्य। वृन्दे करिणां समुदाये हस्तिनां समूहो हास्तिकम्, गजानां समूहो गजता इति द्वे गजसमूहस्य। करोऽस्त्यस्या इति करिणी, धेनुरिव धेनुका, "स्याद्धेनुका करिण्यां च धेनावपि पुंसि दानवविशेषे" (इति मेदिनी) वष्टि, उश्यते वा वशा "वशा बन्ध्यासुता योषा स्त्री गवीकरिणीषु चेति" तालव्यान्तेषु विश्वादिति त्रीणि करिण्याः. "हस्तिनी" इति ख्यातायाः ॥ ३६ ॥

हाथी का गाल, पु. उसका मद, शूड से निकले जलकण शीश का मास पिण्ड कुभों का मध्य भाग

पु. पु. न. पु. पु.
गण्डः कटो मदो दानं वमथुः करशीकरः।
पु. पु.
कुम्भौ (तु पिण्डौ शिरस)(स्तयोर्मध्ये)विदुः(पुमान्)३७

गेति—गण्डतीति गण्डः, "गण्डः स्यात्पुंसि खड्गिनि। ग्रहयोगप्रभेदे च वीध्यङ्के पिटकेऽपि च। चिह्नवीरकपोलेषु हयभूषणबुद्बुदे" (इति मेदिनी) कटतीति कटः "कटः श्रोणौ द्वयोः पुंसि किलिञ्जेऽतिशये शवे। समये गजगण्डेऽपि पिप्पली तु कटी मता" (इति मेदिनी) माद्यत्यनेन, मदयति वा मदः "मदो रेतसि कस्तूर्यां

गर्वे हर्षेमदानयोः" (इति मेदिनी) द्यत्यनेन दानम् "दानं गजमदे त्यागे पालनच्छेद-शुद्धिषु" (इति विश्वमेदिन्यौ) इति द्वे मदपतनस्य । वम्यते वमनं वा वमथुः "वमथु-र्वमने कासे मातङ्गकरशीकरे" (इति हैमः) करस्य शुण्डादण्डस्य शीकरः कर-शीकरः इति द्वे शुण्डान्निर्गतजलस्य । शिरसो मस्तकस्य पिण्डेते पिण्डौ "पिण्डो वाले वले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिह्लकयोरपि । ओड्रपुष्पे च पुंसि स्यात्क्लीबमाजीवनायसोः । पिण्डी तु पिण्डतगरेऽलाबूखर्जूर-भेदयोः" (इति मेदिनी) कुं भुवमुम्भतः शकन्ध्वादित्वात् कुम्भौ स्याताम् "कुम्भो राश्यन्तरे हस्तिमूर्धांशे राक्षसान्तरे । कार्मुके वारनार्यां च घटे क्लीबन्तु गुग्गुलौ" (इति मेदिनी) इत्येकं गजशिरसो मांसपिण्डस्य । तयोः कुम्भयोर्मध्ये मध्यभागे वेत्ति संज्ञामत्र घातेनेति 'विदुः' पुमान्पुंलिङ्गः स्यादित्येकं कुम्भमध्यभागस्य ॥ ३७ ॥

हाथीका मत्था, नेत्रोकी गोलाई देखना, कानो की जड

पु. स.
अवग्रहो (ललाटं स्या) दिषीका (त्वक्षिकूटकम्) ।

न. स.
(अपाङ्गदेशो) निर्याणं (कर्णमूलं तु) चूलिका ॥ ३८ ॥

अवेति—गजस्य ललाटं अवगृह्यतेऽङ्कुशेनेति अवग्रहः घञि तु अवग्राहोपि स्यात् "गजालिके वृष्टिरोधे प्रतिबन्धेऽप्यवग्रहः" (इति रुद्रः) इत्येकं गजललाटस्य । अस्य अक्षिकूटकं चक्षुर्गोलकं ईष्यत इति इषीका, ईषीका दीर्घादिरपि इत्येकं हस्ति-चक्षुर्गोलकस्य । अस्य अपाङ्गस्य अपाङ्गो वा देशोऽपाङ्गदेशः निर्यात्यनेनेति निर्याणं स्यात् "निर्याणं वारणापाङ्गदेशे मोक्षेऽध्वनिर्गमे" (इति मेदिनी) इत्येकं गजापाङ्ग-देशस्य । अस्य कर्णयोर्मूलं चूल्यतेऽनयेति चूलिका स्यात् "चूलिका नाटकस्याङ्गे कर्णमूले च हस्तिनाम्" (इति मेदिनी) इत्येकं करिकर्णमूलस्य ॥ ३८ ॥

ललाट का अधोभाग, दांतो का मध्यभाग, कन्धा, बिन्दुगूढ

अधः कुम्भस्य वाहित्थं प्रतिमानमधोऽस्य यत् ।

आसनं स्कन्धदेशः स्यात् पद्मकं बिन्दुजालकम् ॥ ३९ ॥

अध इति—कुम्भस्य वातकुम्भस्य अधो ललाटाधोभागः अवश्यं वहति वाही स ति-ष्ठत्यत्रेति पृषोदरादित्वाद् वाहित्थं स्यात् "कुम्भयोरन्तरं विदुः । वातकुम्भस्तु तस्याधो वाहित्थं तु ततोऽप्यधः" (इति हैमनाममाला) इत्येकं ललाटाधोभागस्य । अस्य वाहित्थस्य यत् अधोभागस्तत् प्रतिमीयतेऽनेनेति प्रतिमानं स्यात् "प्रतिमानं प्रतिच्छायागजदन्तान्तरालयोः" (इति रुद्रः) इत्येकं वाहित्थाधोभागस्य दन्ता-न्तरस्य । आस्यतेऽत्रेति आसनम्, "आसनं द्विरदस्कन्धे पीठे यात्रानिवर्तने" (इति विश्वमेदिन्यौ) स्कन्धस्य देशः स्कन्धदेशः इति द्वे गजस्कन्धस्य । पद्मानि पद्म-

कम् "पद्मकं स्यात्पद्मकाष्ठबिन्दुजालकयोरपि" (इति मेदिनी) बिन्दूनां जालमिव बिन्दुजालकं स्यादिति द्वे गजमुखादिस्थबिन्दुसमूहस्य ॥ ३९ ॥

पार्श्वभाग, अग्र भाग, पूर्वजङ्घा भाग, अपरजङ्घा भाग

पु. पु. पु.
पक्षभागः पार्श्वभागो दन्तभाग(स्तु योऽग्रतः)।
न. न.
(द्वौ पूर्वपश्चाज्जङ्घादिदेशौ) गात्रावरे(क्रमात्) ॥४०॥

पक्षेति—पक्षयत्यनेनेति पक्षः, भज्यत इति भागः पक्षस्य, पक्ष एव वा भागः पक्षभागः, पार्श्वस्य, पार्श्वमेव वा भागः पार्श्वभागः इति द्वे गजपार्श्वस्य। अग्रतो यो भागःस तु दन्तस्य भागः, दन्तसम्बन्धी भागो वा दन्तभागः स्यात् शाकपार्थिवादित्वान्मध्यमपदलोपः इत्येकमग्रभागस्य। पूर्वा च पश्चाच्च, पूर्वापश्चाच्च ते जङ्घे च, पूर्वापश्चाज्जङ्घे आदी ययोरिति, पूर्वापश्चाजङ्घादी तौ च देशौ चेति पूर्वपश्चाजङ्घादिदेशौ यौ द्वौ ते क्रमात् क्रमेण गातेऽनेन, एत्यनेन वा गात्रम् "गात्रं गजाग्रजङ्घादिभागेऽप्यङ्गे कलेवरे" (इति मेदिनी) अवराति, न वृणोति, व्रियते वेति अवरम "अवरं गजान्त्यजङ्घादिदेशे चरमे त्रिषु" (इति मेदिनी) गात्रं च अवरं चेति गात्रावरे स्याताम् पूर्वजङ्घाभागो गात्रम्, पश्चाज्जङ्घाभागोऽवरमिति यावत् "द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे न ना" (इति रभसः) इत्येकैकं पूर्वपश्चाज्जङ्घादिदेशयोः ॥ ४० ॥

चाबुक, खूटा, आदू, अङ्कुश

न. न. न. पु. पु.स.न.
तोत्रं वैणुकमालानं बन्धस्तम्भे (ऽथ) शृङ्खला।
पु. पु.न. पु.न. पु.स.
अन्दुको[2] निगडोऽस्त्री स्यादङ्कुशोऽस्त्री सृणिः[3] स्त्रियाम् ४१

तवेति—तुद्यतेऽनेनेति तोत्रम्, "तोत्रं तु प्राजने वैणुकेऽपि च" (इति मेदिनी) वेणुना निर्वृत्तमिति वैणुकम् "वेणुकमिति पाठान्तरम्" इति द्वे तोदनदण्डस्य। आलीयतेऽत्रेति आलानम्, बन्धस्य बन्धनस्य स्तम्भो बन्धस्तम्भः इति द्वे बन्धनस्तम्भस्य। अथेति—शृङ्गं प्राधान्यं खलति, शृङ्गात्प्राधान्यात्खलत्यनेन वा पृषोदरादित्वात् शृङ्खला "शृङ्खला पुंस्कटी काञ्च्यां लोहरज्जौ च बन्धने" (इति हैमः) अन्द्यते बध्यतेऽनयेति अन्दूः "अन्दूः स्त्रिया स्यान्निगडे प्रभेदे भूषणस्य च" (इति मेदिनी) स एवान्दुकः, निगलति, निर्गतो गडः सेचनमस्मादिति वा निगडोऽस्त्री पुंनपुंसकं स्यादिति त्रीणि निगडस्य "बेड़ी" इति ख्यातस्य। अङ्क्यतेऽनेनेति अङ्कुशः अस्त्री

१ "गात्रावरे पूर्वपश्चात्पादयोः परिभाषिते" (इति भागुरिः) कश्चित्तु अष्ठीवद्भागादूर्ध्वमवरम्। अधस्तु गात्रमित्याह। अपरा पश्चाद्दिग या च। अपरं तूत्तरार्थे स्यात्पश्चाद्भागे च दन्तिनामिति" (विश्व)॥
२ अन्दुक स्वार्थे कन् "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि" इति पुंस्त्वम् ॥
३ नेन ?ारक्षमगनमवयन्यसृणि सिताग्रमिति माघवाक्य सगच्छते ॥

पुंनपुंसकं स्यात् , सरत्यन्तर्गच्छत्यनयेति सृणिः, शृणातीति विग्रहे तु शृणिस्ताल-व्यादिरपि "शृणिरङ्कुशवाची च काशश्च तृणवाचकः" (इति शभेदः) स्त्रियां स्यात 'स्त्रियामित्येकदेशेन स्त्रीपुंसशब्दसमुदायो लक्ष्यते' तेन सृणेः पुंस्त्वमपि, इति सुभूत्या-दयः स्त्रियामिति प्रायिकत्वादुक्तमिति द्वे अङ्कुशस्य ॥ ४१ ॥

कमर बांधने की स. स. स. स. स.
रस्सी पलान **दूष्या कक्ष्या वरत्रा (च) कल्पना सज्जना (समे)।**
आदिसे सजना स. न. पु. पु. पु.स.
गद्दी या झूल **प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो (द्वयोः) ॥४२॥**

द्विति—दूष्यतेऽनयेति दूष्या "दूष्यं त्रिपु दूषणीये क्लीबं वस्त्रे च तद्गृहे" (इति मेदिनी) चूष्यते पीयते पृष्ठमांसेनादृश्यतां नीयते इति चूषेति मुकुटः, कक्षे भवा कक्ष्या, "कक्ष्या बृहतिकायां स्यात्काञ्च्यां मध्येभबन्धने । हर्म्यादीना प्रकोष्ठे चेति" (मेदिनी) वरं त्रायते, व्रियतेऽनयेति वा वरत्रा इति त्रीणि गजमध्यबन्धनस्य । कल्पनं कल्पना "अथ कल्पना । करिणः सज्जनायां स्त्री क्लीबं क्लृप्तौ च कल्पने" (इति मेदिनी) सज्जनं सज्जना "सज्जनं तु भवेत्क्लीबमुपरक्षणघट्टयोः । वाच्यलिङ्गं कुलीने स्या-त्कल्पनायां च योषिति" (इति मेदिनी) उभे समे समानार्थे समानलिङ्गे स्यातामिति द्वे पल्याणाद्यारोपणेन सज्जीकरणस्य । प्रकर्षेण वीयतेऽस्यामिति प्रवेणिः "प्रवेणिः स्त्री कुथावेण्योः" (इति मेदिनी) कृदिकारादिति वा ङीपि तु प्रवेण्यपि, आस्तीर्य-तेऽनेनेति आस्तरणम्, व्रियतेऽनेन, बहवो वर्णाः सन्त्यस्येति वा वर्णः "वर्णः स्वर्णे व्रते स्तुतौ । रूपे द्विजादौ शुक्लादौ कुथायामक्षरे गुणे । भेदे गीतक्रमे चित्रे यशस्तालः-विशेषयोः । अङ्गरागे च वर्णं तु कुङ्कुमे" (इति हैमः) परिगतस्तोमोऽत्र, परिस्तूयते वा परिस्तोमः, कुथ्यति, कुथ्नाति, कुन्थत्यशोभामिति वा कुथः द्वयोः स्त्रीपुंसयोः स्यात् "कुथः स्त्रीपुंसयोर्वर्णकम्बले पुंसि बर्हिषि" (इति मेदिनी) क्लीबेऽपि, "स्त्रीप्रवेणी कुथं त्रिषु" (इति वोपालितः) इति पञ्च गजोपर्यास्तरणचित्र-कम्बलस्य ॥ ४२ ॥

न. स. स.
निर्बल हाथी, **वीतं (त्वसारं हस्त्यश्वं) वारी (तु) गजबन्धनी ।**
पु. पु. पु. पु. पु. पु.
घोड़ा, [illegible] **घोटके पीतितुरगतुरङ्गाश्वतुरङ्गमाः ॥ ४३ ॥**
[illegible] पु. पु. पु. पु. पु. पु. पु.
[illegible] **वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।**

वीतमिति—न सारो [illegible] [illegible] [illegible] [illegible]
[illegible]
[illegible]

स्याद्गजबन्धन्यां कलश्यामपि योषिति । वारिर्वाग्गजबन्धन्योः स्त्री क्लीबेऽम्बुनि वालुके "
(इति मेदिनी) बध्यतेऽस्यामिति बन्धनी गजस्य बन्धनी गजबन्धनी इति द्वे गज-
बन्धनशालायाः । घोटते इति घोटकः पचाद्यचि घोटोऽपि, " घोटसैन्धवगन्धर्वा
हयवाजितुरंगमाः " (इति रभसः) पिबतीति पीतिः " पीतिर्नाश्वे स्त्रियां पाने "
(इति मेदिनी) वेतीति व्युत्पत्त्या तु वीतिरपि " वीतिरश्वेऽशने गतौ । प्रजने धावने
दीप्ताविति " (हैमः) तोरणं तुरस्तेन (त्वरया) गच्छतीति तुरगः, तुरङ्गः,
अश्नुत इति अश्वः, तुरेण गच्छतीति तुरंगमः, अवश्यं वजति, वाजाः पक्षाः
सन्त्यस्येति वा वाजी " वाजी वाणाश्वपक्षिषु " (इति मेदिनी) वाहते, वाह्यते,
उह्यतेऽनेन वा वाहः " वाहो भुजे पुमान्मानभेदाश्ववृषवायुषु " (इति मेदिनी)
ऋच्छति, अर्वति वा ' अर्वा ' " अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिङ्गकः " गन्ध-
मर्वतीति शकन्ध्वादित्वात् गन्धर्वः " गन्धर्वस्तु नभश्चरे । पुंस्कोकिले गायने च मृग-
भेदे तुरंगमे । अन्तरा भवदेहे च " (इति हैमः) हयति, हिनोति वा हयः, सिन्धुषु
भवः सैन्धवः " सैन्धवस्तु सिन्धुदेशोद्भवे हये । मणिमन्थेऽपि " (इति हैमः)
सपति सेनायां समवैतीति सप्तिरिति त्रयोदश तुरंगमस्य ॥ ४३ । १ ॥

अच्छी जाति-वाला घोड़ा सिखलाया घोड़ा घोड़ों का भेद, अश्वमेधीय घोड़ा अधिक वेगवाला	पु. पु. पु. पु. **आजानेयाः कुलीनाः (स्यु) र्विनीताः साधुवाहिनः ॥ ४४ ॥** पु. पु. पु. पु. **वनायुजाः पारसीकाः काम्बोजा बाल्हिकाः (हयाः) ।** पु. पु. पु. पु. **ययु (रश्वो) ऽश्वमेधीयो जवन (स्तु) जवाधिकः ॥ ४५ ॥**

आजेति—अजनमाजः क्षेपणं तेन आनेयाः प्रापणीयाः आयत्ता वा आजानेयाः " शक्तिनिर्भिन्नहृदयाः स्खलन्तश्च पदे पदे । आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः " (इत्यश्वशास्त्रम्) कुलस्यापत्यानि कुलीनाः स्युरिति द्वे कुलीनाश्वस्य । विनीयन्ते स्म विनीताः, " विनीतः सुवहाश्वे स्याद्वाणिज्येऽपि पुमांस्त्रिषु । जितेन्द्रियेऽपनीते च निभृते विनयान्विते " (इति मेदिनी) साधु वहनशीलाः साधुवाहिनः इति द्वे सुशिक्षिताश्वस्य । वनायुषु देशेषु जाता हया वनायुजाः, पारसीके देशे भवाः पारसीकाः, कम्बोजेषु भवाः काम्बोजाः, बल्हिकदेशे भवा बाल्हिकाः " बाल्हीकं बाल्हिकं धीरहिङ्गुनोर्नाश्वदेशयोः " इति त्रिकाण्डशेषतो दीर्घमध्योऽपि इति हयविशेषाणामेकैकम् । अश्वमेधाय हितः अश्वमेधीयोऽश्वः, यातीति ययुः स्यात् "ययुः पुमानश्वमेधतुरगे च तुरंगमे " (इति मेदिनी) इत्येकमश्वमेधीयाश्वस्य द्वे इत्यन्ये । जवनशीलो जवनः, " जवनस्तु स्यदे वेगिहये ना वेगिनि त्रिषु " (इति मेदिनी) जवेन वेगेनाधिको जवाधिकः इति द्वे अधिकवेगशालिनोऽश्वस्य ॥ ४४ । ४५ ॥

लदुवा उजला पु. पु. पु. पु.
रथवाहीवछेडा घोडी, घो- **पृष्ठ्यः स्थौरी (सितः) कर्को रथ्यो (वोढा रथस्य यः)।**
ड़ियों का गि- पु. पु. स. स. स. न.
रोह **बालः किशोरो वाम्यश्वा वडवा वाडवं (गणे) ॥ ४६ ॥**

प्रिति—प्रशस्तमतिशयितं वा पृष्ठमस्येति पृष्ठ्यः, स्थूलस्येदं रलयोरेकत्वात्स्थौरं बलमस्यास्तीति स्थौरी " स्थौरी पृष्ठ्यः पृष्ठवहः " (इति वोपालितः) इति द्वे भारवाहिनोऽश्वस्य । सितः शुक्लोऽश्वः करोति, क्रियते वा कर्कः स्यात् " कर्कः कर्के तनौ वह्नौ शुक्लाश्वे दर्पणे घटे " (इति मेदिनी) इत्येकं शुक्लाश्वस्य । रथस्य वोढा वाहको योऽश्वः स रथं वहतीति रथ्यः स्यात् " रथ्या रथौघविशिखावर्तनीषु च योषिति । रथवोढरि पुंलिङ्गः " (इति मेदिनी) इत्येकं रथवाहकाश्वस्य । अश्वस्य बालः कशति, किञ्चिच्छ्वतीति वा किशोरः स्यात् "अथ किशोरोऽश्वस्य शावके । तैलपर्ण्योषधौ च स्यात्तरुणावस्थसूर्ययोः " (इति मेदिनी) इत्येकमश्वकिशोरस्य । वामयति, वं वरुणममति, तेनाम्यते वा गौरादित्वात् वामी " वामी शृगाली वडवा रासभीकरभीषु च " (इति मेदिनी) अश्वजातिरजादित्वादश्वा, बलं वाति, बलेन व्रजति, बलं सामर्थ्यमतिशयितमस्त्यस्या वा डलयोरेकत्वाद् वडवा " वडवा द्विजयोषिति । अश्वायां कुम्भदास्यां नारीजात्यन्तरेऽपि च " इति त्रीणि वडवायाः " घोड़ी " इति ख्यातायाः । गणे घोटिकानां समुदाये वडवानां समूहो वाडवं स्यात् " वाडवं करणे स्त्रीणां घोटिकौघे नपुंसकम् । पाताले न स्त्रियां पुंसि ब्राह्मणे वडवानले " (इति मेदिनी) इत्येकं घोटिकासमूहस्य ॥ ४६ ॥

घोड़ेकी १दिन पु.स.न.
की मंजिल, **(त्रिष्वा) श्वीनं (यदश्वेन दिनेनैकेन गम्यते)।**
घोड़ेकी बिचली न. स. स.
देह, हिनहिनाना **कश्यं (तु मध्यमश्वानां) हेषा ह्रेषा (च निस्वनः) ॥४७॥**

त्रिष्विति—अश्वेन एकेन दिनेन यद् मार्गो गम्यते तत् " अश्वेन एकाहेनाभिगम्यत इत्याश्वीनं " त्रिषु त्रिलिङ्ग्यां स्यादित्येकमश्वानामेकाह्निकयानस्य । अश्वानां मध्यम अश्वादिस्ताडनीताडनं वा कशा तामर्हतीति कश्यम् " कश्यं त्रिषु कशार्हे स्यात्क्लीबं मद्याश्वमध्ययोः " (इति मेदिनी) इत्येकमश्वानां मध्यभागस्य । अश्वानां निस्वनः शब्दः हेषणं हेषा, ह्रेषणं ह्रेषा च स्यादिति द्वे अश्वानां ध्वनेः " हिनहिनाना " इति ख्यातस्य ॥ ४७ ॥

पु. पु. न. न.
निगालस्तु गलोद्देशे (वृन्दे त्वा) श्वीयमाश्व (वत्) ।
न. न. न. न. न.
आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥ ४८ ॥

स. स. पु.न.

टाप (गतयोऽमूः पञ्च) धारा घोणा (तु) प्रोथमस्त्रियाम्।

स. पु.न. न. पु.

कविका (तु) खलीनो (ऽस्त्री) शफं (क्लीबे) खुरः (पुमान्) ४९॥

नीति—निगिरति, निगिलत्यनेन वा निगालः, गलस्य उद्देशः समीपभागो गलोद्देशः "घण्टाबन्धसमीपस्थो निगालः कीर्तितो बुधैः। तस्मिन्नेव मणिर्नाम रोमजः शुभकृन्मतः" इति द्वे ग्रीवायाः समीपभागस्य। वृन्दे अश्वानां समुदाये अश्वानां समूहः आश्वीयम्, पक्षेऽणि आश्वम्। वदिति निर्देशश्चात्रोभयत्र समत्वज्ञापनार्थः इति द्वे अश्ववृन्दस्य। आस्कन्दनम्, आस्कन्दः संजातोऽस्येति वा आस्कन्दितम् "उत्तेजितमुपकण्ठमास्कन्दितकमित्यपि। उत्लुत्योत्प्लुत्य गमनं कोपादिवाखिलैः पदैः" (इति हैमनाममाला) धोरणं धोरितं तदेव धोरितकम् धोरितमेव धौरितन्तदेव धौरितकं वा "अथ धौरितकं धौर्यं धोरणं धौरितं च तत्" (इति वाचस्पतिः) रेचनं रेचितम् "उत्तेजितं रेचितं स्यान्मध्यवेगेन या गतिः" (इति हैमनाममाला) वल्गनं वल्गितम् "वल्गितं पुनः। अग्रकाय समुल्लासात्कुञ्चितास्यं नतत्रिकम्" (इति नाममाला) प्लवनं प्लुतम् "प्लुतमश्वस्य गतौ प्लुतस्त्रिमात्रके" (इति हैमः) अमूरश्वानां पञ्च गतयो भवन्ति ता धार्यन्तेऽनयाऽत्रेति वा धाराः स्युः "धारा सैन्याग्रिमस्कन्धे तुरङ्गगतिपञ्चके" इत्येकमश्वगतिविशेषाणाम्। घोणति इति घोणा, प्रोथतीति प्रोथम् अस्त्रियां पुंनपुंसकं स्यात् "प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे त्रिषु" (इति मेदिनी) इति द्वे अश्वप्रोथस्य "थूथुन" इति ख्यातस्य। कवत इति कविका, खे मुखे लीनः खलीनः इति द्वे खलीनस्य "लगाम" इति ख्यातस्य। शं फणतीति शफं क्लीबे नपुंसके स्यात्, "शफं मूले तरूणां स्याद्गवादीनां खुरेऽपि च" (इति मेदिनी) खुरतीति खुरः पुमान्स्यात् "खुरः कोलदले शफे" (इति मेदिनी) इति द्वे अश्वखुरस्य "टाप" इति ख्यातस्य॥ ४८। ४९॥

पु.न. न. न. पु. पु.

पूंछ, वायुत पुच्छो (ऽस्त्री) लूम लाङ्गूले वालहस्त (श्च) वालधिः।

पूंछ, लोटना (त्रिषु) पावृत्तलुठितौ (परावृत्ते मुहुर्भुवि)॥ ५०॥

त्रिति—पुच्छतीति पुच्छः अस्त्री पुंनपुंसकं स्यात् "पुच्छः परचात्प्रदेशः स्याल्लाङ्गूले पुच्छमिष्यते" (इति मेदिनी) लूयत इति लूमम्, लङ्गतीति लङ्गूलं तदेव लाङ्गूलम् "लाङ्गूलं पुच्छशेफयोः" (इति मेदिनी) इति त्रीणि लाङ्गूलस्य। "वालो ना कुन्तलेऽश्वस्य गजस्यापि च वालधौ" (इति पवर्गीयादौ मेदिनी) वालो हस्त इव दंशादिनिवारकत्वात् वालानां हस्तः समूहो वेति वालहस्तः, वाला धीयन्तेऽत्रेति वालधिरिति द्वे केशवल्लाङ्गूलमात्रस्य। श्रमशान्त्यर्थं मुहुर्भुवि पुनः

पुनर्भूमौ परावृत्ते सति उपावर्तते स्म उपावृत्तः, लुठति स्म लुठितः उभौ त्रिषु त्रिलिङ्गया स्यातामिति द्वे अश्वलुठितस्य ॥ ५० ॥

पु. पु. पु.

लड़ाई का रथ, **(याने चक्रिणि युद्धार्थे) शताङ्गः स्यन्दनो रथः ।**

पु.

रथविशेष **(असौ) पुष्यरथ(श्चक्रयानं न समराय यत्) ॥ ५१ ॥**

येति—युद्धायेदं युद्धार्थं तस्मिन्युद्धार्थे युद्धप्रयोजनवति चक्रमस्यास्तीति चक्री तस्मिंश्चक्रिणि चक्रयुक्ते यान्त्यनेन यानं तस्मिन्याने सति शतमङ्गान्यवयवा यस्येति शताङ्गः, स्यन्दत इति स्यन्दनः "स्यन्दनं तु स्रुतौ नीरेतिनिशे ना रथेऽस्त्रियामिति" (मेदिनी) रमन्तेऽत्रानेन वा रथः " रथः पुमानवयवे स्यन्दने वेतसेऽपि च " (इति मेदिनी) इति त्रीणि युद्धार्थरथस्य । यत् चक्रयानं समराय संग्रामाय न स्यात् असौ पुष्य इव रथः, पुष्ये यात्रोत्सवादौ रथो वेति पुष्यरथः पकारमध्यपाठे तु सुकुमारत्वात् पुष्पमिव रथः पुष्परथः स्यादित्येकं युद्धं विना यात्रासेवादौ सुखभ्रमणार्थरथस्य ॥ ५१ ॥

पु. न. न.

जनाना रथ **कर्णीरथः प्रवहणं डयनं (च समं त्रयम्) ।**

न. पु.न. स. न.

गाड़ा, गाड़ी **(क्लीबे)ऽनःशकटोऽस्त्रीस्याद्गन्त्री(कम्बलिवाह्यकम्)५२**

केति—कर्णसाध्या श्रवणक्रियोपचारात्कर्णः कर्णोऽस्यातीति कर्णी कर्णी चासौ रथश्च शब्दमात्रेण रथो न तु वस्तुतो रथः अथवा सामीप्यात्कर्णशब्देन स्कन्धो लक्ष्यते कर्णः स्कन्धः सोऽस्त्यस्य वाहकत्वेन स्कन्धवाह्यः स चासौ रथश्चेति कर्णीरथः, प्रोह्यतेऽनेनेति प्रवहणम्, डीयतेऽनेनेति डयनम्, हीयतेऽनेनेति व्युत्पत्त्या तु हयनमपि स्यादिदं त्रयं समं समानार्थकं विज्ञेयमिति त्रीणि पुरुषस्कन्धवाह्ययानविशेषस्य "डोला" इति ख्यातस्य । अनिति चीत्करोतीति अनः क्लीबे नपुंसके स्यात्, शक्नोति भारं वोढुं जीवयितुं वेति शकटः अस्त्री पुंनपुंसकं स्यादिति द्वे शकटस्य " गाड़ा " इति ख्यातस्य । गम्यतेऽनयेति गन्त्री, कम्बलिभिः सास्नावद्भिर्वृषैरुह्यते इति कम्बलिवाह्यं सैव कम्बलिवाह्यकमिति द्वे शकटिकायाः " गाड़ी " इति ख्यातायाः ॥ ५२ ॥

स. न. स. स.

शिबिका याप्ययानं(स्याद्)दोलाप्रेङ्खा(दिकाःस्त्रियाम्)।

पु.न.न. पु.न.न.

(उभौ तु) द्वैपवैयाघ्रौ (द्वीपिचर्मावृते रथे) ॥ ५३ ॥

शीति—शिवं करोति, शिवैवेति वा शिबिका, याप्यैरधमैर्वाह्यं यानं याप्ययानं स्यादिति द्वे शिबिकायाः "पालकी" इति ख्यातायाः। दोलयति, दोल्यते वा दोला, प्रेङ्ख्यत इति प्रेङ्खा "आदिना शयनखट्वादिदोला" उभे स्त्रियां स्यातामिति द्वे दोलायाः "हिंडोला" इति ख्यातायाः "डोली" इति वा ख्यातायाः। द्वीपिचर्मावृते रथे द्वीपिनो विकारो द्वैपः, द्वैपेन चर्मणा परिवृतो रथो द्वैपः, व्याघ्रस्य विकारो वैयाघ्रः, वैयाघ्रेण चर्मणा परिवृतो रथो वैयाघ्रः उभौ (त्रिषु) स्यातामिति द्वे वैयाघ्रचर्मवेष्टितरथस्य ॥ ५३ ॥

सफेद कम्बल से घिरा रथ, कम्बल,वस्त्र व दुकूलादि से युक्त रथ

पु.
(पाण्डुकम्बलसंवीतः स्यन्दनः) पाण्डुकम्बली[१]।

पु.स.न. पु.स.न.
(रथे) काम्बलवास्त्राद्याः (कम्बलादिभिरावृते॥५४॥

पेति—पाण्डुकम्बलसंवीतः श्वेतकम्बलवेष्टितः स्यन्दनो रथः पाण्डुकम्बलेन परिवृतो रथः पाण्डुकम्बली स्यादित्येकं शुक्लकम्बलवेष्टितरथस्य। कम्बलादिभिरावृते रथे सति कम्बलेन परिवृतो रथः काम्बलः, वस्त्रेण परिवृतो रथो वास्त्रः, आदिना चार्मक्षौमदौकूलादिग्रह. इति कम्बलाद्यावृतरथानामेकैकम् ॥ ५४ ॥

स. स.
रथसमूह; **(त्रिषु द्वैपादयो) रथ्या रथकट्या (रथव्रजे)।**

न. पु.
धुरी, तागा **धूः(स्त्री)'क्लीबे'यानमुखं(स्याद्र)थाङ्गमपस्करः॥५५॥**

त्रीति—द्वैपादयो वास्त्रान्तास्त्रिषु त्रिलिङ्गयां स्युः। रथानां समूहो रथ्या "रथ्या तु रथसंघाते प्रतोल्यां पथि चत्वरे" (इति हैमः) रथानां समूहो रथकट्या, रथानां व्रजो रथव्रजः इति त्रीणि रथसमूहस्य। धूर्वतीति धूः स्त्री स्यात् "धूर्यानमुखभारयोः" (इति हैम.) यानस्य मुखं यानमुखं क्लीबे स्यादिति द्वे वोढृबन्धनस्थानस्य। रथस्य अङ्गं रथाङ्गम्, अपकीर्यते स्वस्थाने क्षिप्यत इति अपस्करः इति द्वे चक्रभिन्नरथारम्भकस्य ॥ ५५ ॥

न. न. स. पु.
पहिया, पुट्ठी **चक्रं रथाङ्गं(तस्यान्ते)नेमिः(स्त्री स्या)त्प्रधिः(पुमान्)।**

या हाल, न.इ, कुलावा
स. स. पु. पु.स.
पिण्डिका नाभिरक्षाग्रकीलके(तु द्वयो)राणिः ॥ ५६ ॥

चेति—क्रियते गतिरनेनेति चक्रम्, "चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः। जलावर्तेऽपि" (इति मेदिनी) रथस्य

---

१ "स्यात्पाण्डुकम्बलः श्वेतप्रावाराश्मभेदयोः" (इति मेदिनी) ॥

अङ्गं रथाङ्गम् " रथाङ्गं न द्वयोश्चक्रे ना चक्राङ्गविहंगमे " (इति मेदिनी) इति द्वे चक्रस्य " पहिया " इति ख्यातस्य । तस्यान्ते तस्य चक्रस्यान्तो भूमिस्पर्शिभागस्मिन्, नयति रथमिति नेमिः स्त्री स्यात् " नेमिर्नातिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम्" (इति मदिनी) प्रधीयतेऽनेनेति प्रधिः पुमान्स्यादिति द्वे नेमेः "पुट्ठी" इति ख्यातायाः। पिण्ड्यन्तेऽरा यस्यामिति गौरादित्वात् पिण्डी सैव पिण्डिका, नभ्यतेऽक्षेण, नह्यन्तेऽरा अत्रेति वा नाभिः " नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे " (इति मेदिनी) इति द्वे रथचक्रमध्ये मण्डलाकारायाः " नाह " इति ख्यातायाः । अक्षाग्रकीलके अक्षस्य नाभिक्षेप्यस्यान्ते कीलके अणतीति अणिः द्वयोः स्त्रीपुंसयोः स्यात् कृदिकारादिति वा ङीपि अणी आणी च " अणिराणिवदक्षाग्रकीले स्यादश्रिसीमयोः " (इति विश्वः) इति द्वे अक्षाग्रकीलकस्य " कुलावा " इति ख्यातस्य ॥ ५६ ॥

लोह का परदा
जूआ का काठ
रथ के नीचे का
काठ दूसरा जूआ

स. पु. पु. पु.
रथगुप्तिर्वरूथो (ना) कूबर (स्तु) युगन्धरः ।
पु. पु.
अनुकर्षो (दार्वधःस्थं) प्रासङ्गो(ना)(युगान्तरम्)॥५७॥

रथेति—रथस्य गुप्तिरावरणमिति रथगुप्तिः व्रियते रथोऽनेनेति वरूथः ना पुमान्स्यात् " वरूथो रथगुप्तौ स्याद्वरूथं चर्मवेश्मनोः " (इति मेदिनी) इति द्वे परप्रहरणाभिघातरक्षार्थं रथसंनाहवदावरणस्य । कुवते, कूयते वेति कूबरः " कूबरस्त्रिपु चार्गे ना कुब्जकेऽस्त्री युगन्धरे " युगं वोढृबन्धनकाष्ठं धारयतीति युगंधरः इति द्वे युगकाष्ठबन्धनस्थानस्य । अधस्स्थं रथस्याधःस्थं दारुकाष्ठम् अनुकृष्यत इति अनुकर्ष. स्यात् " अनुकर्षो रथाधःस्थदारुण्यप्यनुकर्षणे " (इति मेदिनी) नान्तोप्ययम " अनुकर्षा नाक्षतलदारु " (इति वोपालितः) इत्येकं रथस्याधस्तलभागदारुणः । द्वितीयं युगं युगान्तरं प्रसज्यत इति प्रासङ्गः ना पुमान्स्यादित्येकं रथाद्यङ्गयुगादन्ययुगं वृषभाणां दमनकाले यदासज्यते तस्य स्वामी तु " युगाद्युगः " इति पाठमाश्रित्य युगं अननीति युगाद्यथादिस्तस्य युगः प्रासङ्गः ना पुमान्स्यादित्याह अन्ये तु युगान्तरं बहुभ्यने तदेवत्याहुः " युगं द्वितीयं प्रासङ्गः " इति कात्योपि व्याख्यातवानिति ॥ ५७ ॥

[illegible]

न. न. न. न. न.
(सर्वं स्याद्)वाहनं यानं युग्यं पत्रं (च) धोरणम् ।
पु.न.
(परम्परावाहनं यत्त) द्वैनीतक (मस्त्रियाम्) ॥ ५८ ॥

सर्वमिति—सर्वं [illegible] दोलान्तं वाहयन्ति, वहत्यनेन वेति वाहनम् [illegible] (इति मेदिनी) युज्यतेऽनेन [illegible]

पतन्त्यनेनेति पत्रम् " पत्रं तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः " (इति मेदिनी) धोरति, धोरयत्यनेन वा धोरणं स्यादिति पश्च वाहनमात्रस्य । यत् परम्परया वहतीति परम्परावाहनं तत् विनीतकनामिदं, विनीयते स्म विनीतं तदेव विनीतकं तदेव वेति वैनीतकम् अस्त्रियां पुंनपुंसकं स्यादित्येकं परम्परावाहनस्य ॥ ५८ ॥

पु. पु. पु. पु.

फ़ीलवान आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।

पु. पु. पु. पु. पु. पु.

रथवान् या नियन्ता प्राजिता यन्ता सूतः क्षत्ता (च) सारथिः ॥ ५९ ॥

पु. पु.

गाड़ीवान सव्येष्टृदक्षिणस्थौ (च संज्ञा रथकुटुम्बिनः) ।

आधविति—आधोरयन्तीति आधोरणाः, हस्तिनं पान्तीति हस्तिपास्त एव हस्तिपकाः, हस्तिनमारोहयन्तीति हस्त्यारोहाः, निषीदन्त्यवश्यम्, निषादयन्त्युपवेशयन्ति हस्तिनमिति वा निषादिनः इति चत्वारि हस्तिपकस्य " महावत " इति ख्यातस्य । नियच्छति नितरामश्वान्प्रेरयतीति नियन्ता, प्राजति प्राजयतीति वा प्राजिता, यच्छति प्रेरयत्यश्वानिति यन्ता, सुवति गमयति स्म अश्वानिति सूतः " सूतस्तु सारथौ तक्ष्णि क्षत्रियाद्ब्राह्मणीसुते । वन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु " (इति विश्वमेदिन्यौ) क्षदति संवारयत्यश्वानिति क्षत्ता, सरति गमयत्यश्वान्, सरथस्यापत्यं वेति सारथिः, सव्ये वामे तिष्ठतीति सव्येष्ठा "सव्येष्ठा सारथिः" (इति कैयटः) "सव्येष्ठः" इत्यदन्तोपि " प्राजिता दक्षिणस्थश्च सादी सारथिरुच्यते । सूतः क्षत्ता नियन्ता च यन्ता सव्येष्ठ एव च " (इत्यमरमाला) दक्षिणे तिष्ठतीति दक्षिणस्थः एताः रथं कुटुम्बयितुं शीलमस्य, रथस्य कुटुम्बं तदस्यास्तीति रथकुटुम्बी तस्य संज्ञा ज्ञातव्या इत्यष्टौ सारथेः ॥ ५९ । ३ ॥

पु. पु. पु. पु.

रथ मे चढ़कर लड़नेवाले, रथिनः स्यन्दनारोहा अश्वारोहा (स्तु) सादिनः ॥ ६० ॥

पु. पु. पु. पु. पु.

सवार, लड़नेवाले, भटा योधा (श्च) योद्धारः सेनारक्षा (स्तु) सैनिकाः ।

पु. पु.

गश्तवाले, फ़ौज या सेना (सेनायां समवेता ये) सैन्या (स्ते) सैनिका (श्च ते) ॥ ६१ ॥

रेति—रथाः सन्त्येषामिति रथिनः, स्यन्दनमारोहन्तीति स्यन्दनारोहाः इति द्वे रथारूढयोधस्य । अश्वमारोहन्तीति अश्वारोहाः, सीदन्त्यवश्यमिति सादिनः " सादी तुरङ्गमातङ्गरथारोहेषु दृश्यते " (इति मेदिनी) इति द्वे अश्वारोहस्य " असवार " इति ख्यातस्य । भटन्तीति भटाः, " भटः स्यात्पुंसि वीरे च विशेषे पामरस्य च " (इति मेदिनी) युध्यन्त इति योधाः, युध्यन्त इति योद्धारः, इति त्रीणि भटस्य ।

सेनां रक्षन्तीति सेनारक्षाः, ठक्प्रत्यये सेनां रक्षन्तीति सैनिकाः, " सैनिकः सैन्यरक्षे च स्यात्सेनासमवेतके " (इति मेदिनी) इति द्वे सेनारक्षकस्य । ये सेनायां समवेताः संमिलिताः ते सैन्याः ते च सैनिकाः स्युः सेनायां समवयन्तीति सैन्याः पक्षे ठक्प्रत्यये सैनिकाः इति द्वे सेनायां मिलितस्यैकदेशीभूतस्य ॥ ६० । ६१ ॥

पु. पु.

सूबेदार बहादुर, सेनारक्षक, सेनापति — **(बलिनो ये सहस्रेण) साहस्रा (स्ते) सहस्रिणः ।**

पु. पु. पु. पु.

परिधिस्थः परिचरः सेनानीर्वाहिनीपतिः ॥ ६२ ॥

बेति—ये सहस्रेण बलिनो बलवन्तस्ते साहस्राः सहस्रिणश्च स्युः सहस्रं बलानि सन्ति येषामिति साहस्राः इन्प्रत्यये तु सहस्रिणः इति द्वे सहस्रसंख्याकेन गजादिना बलवतः । परिधौ सेनान्ते तिष्ठतीति परिधिस्थः, परितश्चरतीति परिचरः, इति द्वे सेनायां राज्ञो दण्डकारिणः, रथगजादेश्चक्रपादादिरक्षकस्य वा । सेनां नयतीति सेनानीः " सेनानीः स्यात्पुमान् कार्त्तिकेये सेनापतौ पुमान् " (इति मेदिनी) वाहिन्याः पतिरिति वाहिनीपतिरिति द्वे सेनापतेः ॥ ६२ ॥

पु. पु.न.

बख्तर — **कञ्चुको वारवाणो (ऽस्त्री) (यत्तु मध्ये सकञ्चुकाः)**

न. न. न.

कमरपट्टी — **(बध्नन्ति तत्) सारसनमधिकाङ्गो (ऽथ) शीर्षकम् ॥ ६३ ॥**

न. न. न. न. न.

टोप — **शीर्षण्यं (च) शिरस्त्रे (ऽथ) तनुत्रं वर्म दंशनम् ।**

पु. पु. पु. पु.

कवच — **उरश्छदः कङ्कटकोजगरः कवचो (ऽस्त्रियाम्) ॥ ६४ ॥**

केति—कच्यत इति कञ्चुकः " कञ्चुको वारवाणे स्यान्निर्मोके कवचेऽपि च । वर्णापकगुर्द्दिनाङ्गस्थितवस्त्रे च चोलके । कञ्चुक्यौपधिभेदे " (इति मेदिनी) वाणं वृणोति, वारयति वा वारमाच्छादकं वानमस्येति वा वारवाणः अस्त्री पुंनपुंसकं स्यादिति द्वे चोलकाकृतिसंनाहस्य । सकञ्चुकाः कञ्चुकसमेताः मध्ये मध्यकाये यत् बध्नन्ति तत् सारं तनोति, सारं बलमस्यते दीप्यतेऽनेनेति वा सारसनम् "सारसनं सारसनमप्युक्तं च रसनाभिधानमिति" (विश्वः) अधिकमङ्गात्त्यधिकाङ्गम् "कश्चित्तु सारसनाधिकाङ्गे " इति पाठः यत्काव्यः " अधिपाङ्गं सारसनम् " इति द्वे कञ्चुकबन्धनार्थं कटिसूत्रे निबद्धस्य । शेति—शीर्षस्य प्रतिकृतिः, शीर्षे कं सुखमस्मादिति वा शीर्षकम्, शिरसि हितं शीर्षण्यम्, " शीर्षण्यं शीर्षरक्षणे । शीर्षण्यो विशदे कचे " (इति हैमः) शिरस्त्रायते इति शिरस्त्रमिति त्रीणि शीर्षकस्य " टोप " इति ख्यातस्य ।

अथेति–तनुं त्रायत इति तनुत्रम्, वृणोति देहमिति वर्म, दंश्यतेऽनेनेति दंशनम् "दंशनं वर्मदंशयो." (इति हैमः) उरश्छाद्यतेऽनेनेति उरश्छदः, कं सुखं कटति, कङ्कते वा कङ्कट. स एव कङ्कटकः, जगता गृह्यते, जागर्तीति वा पृषोदरादित्वाद् जगरः "जगरः कङ्कटो योगः सन्नाहः स्यादुरश्छदः" (इति वोपालितः) कं वातं वञ्चतीति कवचः अस्त्रिया/पुंनपुंसकं स्यात् "कवचो गर्दभाण्डे च सन्नाहे पटहेऽपि च" (इति विश्व-मेदिन्यौ) इति सन्नाहस्य ॥ ६३ । ६४ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

झिलिम आदि **आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्ध (वत्)।**

धारे हुए मन्त्र पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

आदिसे रक्षित **सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६५ ॥**

आमुक्तेति–आमुच्यते स्म आमुक्तः, प्रतिमुच्यते स्म प्रतिमुक्तः, अपि नह्यते स्म "वष्टिभागुरिरित्यल्लोपे" पिनद्धः, अपिनद्धेन तुल्यमपिनद्धवदिति चत्वारि परहित-कवचवस्त्रादेः। संनह्यति, संनह्यते स्म वा सन्नद्धः, "सन्नद्धो वर्मिते व्यूढे" (इति मेदिनी) वर्मणा नह्यते स्म, वर्म संजातमस्येति वा वर्मितः, सज्जतीति सज्जः, "अथ सज्जः स्यात्संनद्धे संभृते त्रिषु" दश्यते स्म, दंशः संजातोऽस्येति वा दंशितः, व्यूढो धृतः कङ्कटो येनेति व्यूढकङ्कटः इति पञ्च धृतसन्नाहस्य ॥ ६५ ॥

न.

कवचधारिसमूह **(त्रिष्वामुक्तादयो) (वर्मभृतां) कावचिकं (गणे)।**

पु. पु. पु. पु. पु.

पैदल, पैदलो **पदातिपत्तिपदगपादातिकपदाजयः ॥ ६६ ॥**

पु. पु. न. स.

का गिरोह **पद्ग (श्च) पदिक (श्चाथ) पादातं पत्तिसंहतिः।**

पु. पु. पु. पु.

हथियारबन्द **शस्त्राजीवे काण्डपृष्ठायुधीया युधिकाः (समाः) ॥ ६७ ॥**

त्रीति–आमुक्तादयो व्यूढकङ्कटान्ताः शब्दास्त्रिषु त्रिलिङ्गयां स्युः यथा आमुक्ता शाटी, आमुक्तौ वारवाणः, आमुक्तं शस्त्रमिति ज्ञेयम्। वर्मभृतां कवचधारिणां गणे समुदाये कवचिनां समूहः कावचिकं स्यादित्येकं धृतसंनाहानां गणस्य। पादाभ्या-मततीति पदातिः, पद्यत इति पत्तिः, पादाभ्यां गच्छतीति पदगः, पादाभ्यामनति, पदातिरेवेति वा पादातिकः, पादाभ्यामजतीति पदाजिः बहुत्वे पदाजयः, पादाभ्या-मवतीति विग्रहे तु पादाविकोपि स्यात्, पादाभ्यां गच्छतीति पद्गः, पादाभ्यां चरतीति पदिकः स्यादिति सप्त पदातेः "पैदर" इति ख्यातस्य। अथेति–पदातीनां समूहः पादातम्, पत्तीनां संहतिरिति पत्तिसंहतिरिति द्वे पदातिवृन्दस्य। शस्त्रमाजीवत्युपजी-

वतीति शस्त्राजीवस्तस्मिन्, काण्डानि शस्त्राणि पृष्ठे यस्येति काण्डपृष्ठः मुकुट मते तु स्पृष्टं गृहीतं काण्डं शस्त्रं येनेति काण्डस्पृष्टोपि स्यात्, आयुधेन जीवतीति आयुधीयः, ठनिप्रत्यये तु आयुधिकः एते समाः समानार्थाः समानलिङ्गाश्चेति चत्वारि शस्त्रजीविनः ॥ ६६ ।६७ ॥

पु. पु. पु.

अच्छे तीरंदाज **कृतहस्तः सुप्रयोगविशिखः कृतपुङ्ख (वत्)।**

निशाना से चूके पु.

बाणवाला **अपराद्धपृषत्को (ऽसौ लक्ष्याद्यश्च्युतसायकः)॥६८॥**

कृतेति—कृतोऽभ्यस्तो हस्तो यस्येति कृतहस्तः, सुप्रयोगः शोभनप्रयोगवान् विशिखः बाणो यस्येति सुप्रयोगविशिखः, कृतोऽभ्यस्तः पुङ्खः पुङ्खवान् शरो येनेति कृतपुङ्खस्तेन तुल्यं कृतपुङ्खवदिति त्रीणि सम्यकृतशराभ्यासस्य । लक्ष्याद्वेध्याद् यः च्युतसायकः भ्रष्टबाणकः असौ अपराद्धः पृषत्को बाणोऽस्येति अपराद्धपृषत्कः स्यादित्येकं लक्ष्या प्राप्तशरस्य ॥ ६८ ॥

पु. पु. पु. पु. पु. पु.

धनुर्द्धारी **धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्धरः ।**

बाणधारी पु. पु. पु. पु.

बर्छीवाला **(स्या)त्काण्डवा(स्तु)काण्डीरःशाक्तीकःशक्तिहेतिकः६९**

धेति—"धन्वा तु मरुदेशे ना क्लीबं चापे स्थलेऽपि च" (इति मेदिनी) धन्वास्यास्तीति धन्वी, धनुरस्यास्तीति धनुष्मान्, धनुःप्रहरणमस्येति धानुष्कः निषङ्गोऽस्यास्तीति निषङ्गी, "अस्त्रं प्रहरणे चापे" (इति विश्वः) अस्त्रमस्यास्तीति अस्त्री, धरतीति धरो धनुषो धरो धनुर्धरः इति षट् धनुर्धरस्य । "काण्डःस्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः । कुत्सिते वृक्षभिन्नाडी वृन्धे रहसि न स्त्रियामिति" (मेदिनी) काण्डो बाणोऽस्यास्तीति काण्डवान्, काण्डोस्त्यस्येति काण्डीरःस्यादिति द्वे बाणधारकस्य । शक्तिः प्रहरणमस्येति शाक्तीकः, शक्तिर्हेतिर्यस्येति शक्तिहेतिरिति द्वे शक्तिधारकस्य ॥ ६९ ॥

पु. पु.

[illegible] **याष्टीकपारश्वधिकौ (यष्टिपरश्वधहेतिकौ)।**

[illegible] पु. पु.

नैस्त्रिंशिकोऽसिहेतिःस्या(त्समौ)प्रासिककौन्तिकौ ७०

यष्टीति—यष्टिश्च परश्वधश्च तौ हेती ययोस्तौ यष्टिपरश्वधहेतिकौ, यष्टिः प्रहरणमस्येति याष्टीकः, परश्वधः प्रहरणमस्येति पारश्वधिकः तौ च याष्टीकपारश्वधिकौ

स्यातामित्येकैकम् । निस्त्रिंशः प्रहरणमस्येति नैस्त्रिंशिकः, असिर्हेतिरायुधो यस्येति असिहेतिः स्यादिति द्वे खड्गायुधस्य । प्रासः प्रहरणमस्येति प्रासिकः, कुन्तः प्रहरणमस्येति कौन्तिकस्तौ च समौ समानार्थौ समानलिङ्गौ च स्यातामित्येकैकम् ॥ ७० ॥

पु. पु. पु. पु.

ढालवाला, **चर्मी फलकपाणिः (स्यात्) पताकी वैजयन्तिकः ।**

झण्डावाला, पु. पु. पु. पु.

सहायक **अनुप्लवः सहायश्चानुचरोऽभिसरः (समाः) ॥ ७१ ॥**

चेति—चर्मास्यास्तीति चर्मी, फलकं पाणावस्येति फलकपाणिः स्यादिति द्वे फलकधारकस्य । पताकास्यास्तीति पताकी, वैजयन्त्याचरति, वैजयन्त्यस्यास्तीति वा वैजयन्तिकः स्यादिति द्वे ध्वजधारकस्य । अनु पश्चात्प्लवते इति अनुप्लवः, सह एति, अयते वा सहायः, अनुचरतीति अनुचरः, अभितः सरतीति अभिसरः एते समाः समानार्थाः समानलिङ्गाश्च स्युरिति चत्वारि सहायस्य ॥ ७१ ॥

पु. पु. पु. पु. पु

अगुआ, धीरे२ **पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः ।**

पु पु. पु. पु.

चलनेवाला **पुरोगमः पुरोगामी मन्दगामी (तु) मन्थरः ॥ ७२ ॥**

पुरइति—पुरो गच्छतीति पुरोगः, अग्रे सरतीति अग्रेसरः, प्रतिष्ठते गच्छतीति प्रष्ठः "प्रष्ठस्त्रिष्वग्रगे श्रेष्ठे पुंसि चाण्डालिकौषधौ" (इति मेदिनी) अग्रतः सरतीति अग्रतःसरः, पुरःसरतीति पुरःसरः, पुरो गच्छतीति पुरोगमः, पुरोगमनशीलः पुरोगामी इति सप्ताग्रेसराणाम् । मन्दं गच्छति तच्छील इति मन्दगामी, मन्थति पादौ, मन्थं रातीति वा मन्थरः "मन्थरः कोशफलयोर्बाधमन्थानयोः पुमान् । कुसुम्भ्यां न द्वयोर्मन्दे पृथौ वक्रेऽभिधेयवत्" (इति मेदिनी) इति द्वे शनैर्गमनशीलस्य ॥ ७२ ॥

पु. पु. १ पु. पु.

जल्द चलनेवाला, हलकारा, जल्दबाज **जङ्घालोऽतिजव (स्तुल्यौ) जङ्घाकरिकजाङ्घिकौ ।**

पु. पु. पु. पु. पु. पु.

तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥ ७३ ॥

जेति—अतिशयिता जङ्घास्येति जङ्घालः, पिच्छादित्वादिलचि जङ्घिलोऽपि, "प्रज्ञालप्रज्ञिलौ तुल्यौ जङ्घालजङ्घिलादयः" (इति वाचस्पतिः) अतिशयितो जवो वेगो यस्येति अतिजवः उभौ तुल्यौ समानार्थौ समानलिङ्गाविति द्वे अतिवेगवतः । जङ्घासाध्यत्वादुपचाराद्गतिजङ्घा सैव करो राजदेयो भागः, आकरः श्रेष्ठो वा जङ्घाकरोऽस्यास्ति, जङ्घैव करी हस्ती यस्येति वा जङ्घाकरिकः, जङ्घाभ्यां जीवतीति जाङ्घिकः इमावपि

१ तुल्यावित्युभयत्रान्वयः ॥

तुल्याविति द्वे जङ्घाजीविनः। तरो वेगोऽस्यास्तीति तरस्वी, त्वरते, त्वरा संजातास्येति वा त्वरितः "त्वरितं वेगतद्वतोरिति" (हैमः) अतिशयितो वेगोऽस्येति वेगी, प्रजवतीति प्रजवी, जवतीति जवनः, जवतीति जवः " जवो वेगवति त्रिषु । पुंलिङ्गस्तु भवेद्वेगे ओड्रपुष्पे जवा मता " (इति मेदिनी) इति षट् वेगवन्मात्रस्य ॥ ७३ ॥

जीतनेशक्य, जीतनेयोग्य, जीतनेवाला, सामर्थ्य से शत्रु के सामने जाने-वाला पहलवान

जय्यो (यः शक्यते जेतुं) जेयो (जेतव्यमात्रके)।
जैत्र (स्तु) जेता (यो गच्छत्यलं विद्विषतः प्रति)॥ ७४
(सो)ऽभ्यमित्र्योऽभ्यमित्रीयोऽप्यभ्यमित्रीण (इत्यपि
ऊर्जस्वलः स्यादूर्जस्वी (य ऊर्जातिशयान्वितः)॥७५

जेति—यः जेतुं शक्यते सः जेतुं शक्यो जय्यः स्यादित्येकं जेतुंशक्यस्य। जेतव्यमात्रके जेतुं योग्यो जेयः स्यादित्येकं जेतुं योग्यस्य। जेता एव जैत्रः, जयनशीलो जेता स्यादिति द्वे जयवतः। यो विद्विषतः प्रति अलंगच्छति सः अमित्रस्याभिमुखमभ्यमित्रमलंगामी अभ्यमित्र्यः, अभ्यमित्रीयः, अभ्यमित्रीण इत्यपि स्यादिति त्रीणि सामर्थ्येन शत्रूणां संमुखं गच्छतः। यः ऊर्जस्य बलस्यातिशयस्तेन अन्वितो युक्तः स " ऊर्जस्तु कार्त्तिकोत्साहबलेषु प्राणनेपि च " (इति मेदिनी) अतिशयित ऊर्जोऽस्यास्तीति ऊर्जस्वलः, ऊर्जस्वी च स्यादिति द्वे बलातिशयवतः ॥ ७४ । ७५ ॥

चौड़े छाता-वाला रथका स्वामी यथेष्ट-गामी बार-बारगामी

(स्यादु) रस्वानुरसिलो रथिरो रथिको रथी।
कामंगाम्यनुकामीनो ह्यत्यन्तीन (स्तथा भृशम्)॥ ७६ ॥

स्यादिति—प्रशस्तमतिशयितं वा उरो यस्येति उरस्वान् इलचि प्रत्यये तु उरसिलः स्यामिमते तु उरसा बलं लक्ष्यत इत्युरसिलः स्यादिति द्वे विपुलोरस्कः। रथोऽस्यास्तीति रथिरः, रथोऽस्त्यस्येति रथिकः इनि प्रत्यये तु रथी रथस्येनः प्रभुः शाकल्यादित्वाद्रथिनोऽरीन्त्येके इति त्रीणि रथस्वामिनः। कामं यथेच्छं गमनशीलो कामंगामी, कामस्य सदृशम अनुकामं गामी अनुकामीनः इति द्वे यथेष्टं गमनशीलस्य । तथा भृशंगामी अत्यन्तस्यादयम् अत्यन्तंगामी अत्यन्तीनः स्यादित्येकमनिगमनशीलस्य ॥ ७६ ॥

शूरो वीरश्च विक्रान्तो जेता जिष्णु (श्च) जित्वरः।
सांयुगीनो (रणे साधुः) शस्त्राजीवादय (स्त्रिषु) ॥ ७७ ॥

शिवति—शूरयतीति शूरः “ शूरःस्याद्यादवे भटे ” (इति मेदिनी) वीरयतीति वीरः “ वीरो रसविशेषे स्यादुत्तरे सुभटे त्रिषु । स्त्री सुरा क्षीरकाकोली तामलक्येलवालुके । पतिपुत्रवतीरम्भा विदारीदुग्धिकासु च । मलयूक्षीरविदार्योः क्लीबं शृङ्ग्यां नतेऽपि च ” (इति पवर्गतृतीयादौ मेदिनी) विक्रामति स्म विक्रान्तः इति त्रीणि शूरस्य । जयनशीलो जेता, जयत्येवंशीलो जिष्णुः, “जिष्णुर्ना वासवेऽर्जुने । जित्वरे वाच्यवदिति” (मेदिनी) जयति तच्छीलो जित्वरः इति त्रीणि जयशीलस्य । रणे साधुः “ संयुगे संग्रामे साधुः ” सांयुगीनः स्यादित्येकं युद्धकुशलस्य । शस्त्राजीवादयः सांयुगीनान्तास्त्रिषु त्रिलिङ्ग्या स्युः ॥ ७७ ॥

स स स. स. स. स.

सेना या **ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः ।**

स न. न. न. पु.न.

फौज **वरूथिनी बलं सैन्यं चक्रं चानीक (मस्त्रियाम्) ॥ ७८ ॥**

ध्वेति—ध्वजाः सन्त्यस्यामिति ध्वजिनी, वाहाः सन्त्यस्यामिति वाहिनी, सिनोति, सह इनेन वेति सेना, प्रियत इति पृतना, “ पृतना तु स्त्रियां सेनामात्रसेनाविशेषयोः ” (इति मेदिनी) अनीकं रणोऽस्ति प्रयोजनत्वेनास्या इति अनीकिनी, “ अनीकिनी स्त्रियां सेनामात्रसेनाविशेषयोः ” (इति मेदिनी) चमति शत्रूनिति चमू. “ चमूः सेनाविशेषे च सेनामात्रे च योषिति ” (इति मेदिनी) वरूथाः सन्त्यस्यामिति वरूथिनी, वलति, बलते वा बलम्, सेनैवेति सैन्यम्, क्रियतेऽनेनेति चक्रम्, अनित्यनेन अनीकम् अस्त्रियां पुंनपुंसकं स्यादित्येकादश सेनायाः ॥ ७८ ॥

किला बाधना पु. पु.
सेना के विशेषभेद व्यूह **व्यूह (स्तु) बलविन्यासो (भेदा दण्डादयो युधि) ।**
का पीछा पु. पु. पु.
सेना का पीछा **प्रत्यासारो व्यूहपार्ष्णिः (सैन्यपृष्ठे) प्रतिग्रहः ॥ ७९ ॥**

व्यूवेति--व्यूह्यत इति व्यूहः “ व्यूहः स्याद्बलविन्यासे निर्माणे वृन्दतर्कयोः ” (इति मेदिनी) बलस्य सेनाया विन्यासो विभज्य स्थापनमिति बलविन्यास इति द्वे व्यूहस्य । युधि संग्रामे दण्डादयो भेदा विशेषाः स्युः । यदाह कामन्दकिः “ तिर्यग्वृत्तिस्तु दण्डः स्याद्भोगोन्वावृत्तिरेव च । मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः ” आदिना शकट-मकर-पताका-सर्वतोभद्र-दुर्जयादयोपि संगृह्यत इत्येकैकं सेनाविशेषभेदानाम् । प्रतीपमासारयति भग्नानिति प्रत्यासारः, व्यूहस्य पार्ष्णिः पृष्ठभाग इति व्यूहपार्ष्णिः “ पार्ष्णिः स्यादुन्मदस्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्ध्यधरेऽपि च ” (इति विश्वमेदिन्यौ) इति द्वे व्यूहस्य पृष्ठभागस्य । सैन्यस्य पृष्ठं सैन्यपृष्ठन्तस्मिन् प्रतिगृह्यतेऽनेनेति प्रतिग्रहः “ प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे । योग्येभ्यो

विधिवद्देये तद्ग्रहे च ग्रहान्तरे (इति मेदिनी) इत्येकं सैन्यपश्चाद्भिन्नसंघातानीकस्य ॥७९॥

स.

सेना विशेष (एकेभैकरथात्र्यश्वा) पत्तिः (पञ्चपदातिका)।
(पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम्)॥८०॥

एकेति—एक इभो यस्यामित्येकेभा, एको रथो यस्यामित्येकरथा, त्रयोऽश्वा यस्यामिति त्र्यश्वा, पञ्च पदातयो यस्यामिति पञ्चपदातिका सेना पद्यते, पत्यते वा पत्तिः स्यात् "पत्तिर्ना पदगे, स्त्रियाम् । गतावेकरथैकेभत्र्यश्वपञ्चपदातिके" (इति मेदिनी) भरतः—"एको रथो गजश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते" इत्येकं सेनाविशेषस्य । सर्वैः पत्त्यङ्गैः त्रिगुणैस्त्रिभिर्गुणितैः यथोत्तरं क्रमादाख्याः सेनामुखाद्याः संज्ञाः स्युरिति ॥ ८० ॥

न. पु.न. पु. स. स. स.

सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः।

स. स.

अनीकिनी (दशानीकिन्यो)ऽक्षौहिण्य(थ संपदि)८१॥

सयिति—तिस्रः पत्तयः सेनाया मुखमुपक्रमः सेनामुखं स्यात्, त्रिभिः सेनामुखैः गुडति, गुड्यते वा गुल्मः, त्रयो गुल्माः गण्यते गणयति वा गणः, त्रयो गणा वाहाः सन्त्यस्यामिति वाहिनी, तिस्रो वाहिन्यः प्रियत इति पृतना, तिस्रः पृतनाः चमति शत्रूनिति चमूः, तिस्रश्चम्वोऽनीकं रणोऽस्त्यस्यामिति अनीकिनी स्यादेकैकं सेनाविशेषस्य । दशानीकिन्यः ऊहः समूहोऽस्त्यस्या ऊहिनी अक्षाणामूहिनीति अक्षौहिणी स्यात् "अक्षौहिण्यामित्यधिकैः सप्तत्या ह्यष्टभिः शतैः । संख्यायुक्तासहस्राणि गजानामेकविंशतिः । एवमेव रथानान्तु संख्यानं कीर्तितं बुधैः । पञ्चषष्टिः सहस्राणि षट् शतानि दशैव तु । संख्यातास्तुरगास्तज्ज्ञैर्विना रथतुरंगमैः । नृणां शतसहस्रं तु सहस्राणि नवैव तु । शतानि त्रीणि चान्यानि पञ्चाशच्च पदातय." इत्येकमक्षौहिण्याः अथ संपदीत्यस्यान्वयोऽग्रे वक्ष्यते ॥ ८१ ॥

तत्तत्सेनाविशेषे गजादीनां निर्णयाय चक्रमिदम् ।

सेना	पत्तिः	सेनामुखम्	गुल्मः	गणः	वाहिनी	पृतना	चमूः	अनीकिनी	अक्षौहिणी
गजाः, रथाः	१	३	९	२७	८१	२४३	७२९	२१८७	२१८७०
अश्वाः	३	९	२७	८१	२४३	७२९	२१८७	६५६१	६५६१०
पदातयः	५	१५	४५	१३५	४०५	१२१५	३६४५	१०९३५	१०९३५०

स. स. स. स. स. स.
संपति, विपत्ति **सम्पत्तिः श्री (श्च) लक्ष्मी (श्च) विपत्तौ विपदापदौ।**
न. न. न. न.
हथियार धनुष **आयुध (न्तु) प्रहरणं शस्त्रमस्त्र (मथास्त्रियौ)॥८२॥**
पु.न. पु.न. न. न. न. न.
राजा कर्ण का **धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् ।**
पु. न.
इष्वासो (ऽप्यथ कर्णस्य) कालपृष्ठं (शरासनम्)॥८३॥

अथेति—संपदनं, सम्पद्यतेऽनयेति वा सम्पत्, सम्पत्तिः, श्रीयते सर्वैरिति श्रीः, " श्रीर्वेषरचना शोभा भारती सरलद्रुमे । लक्ष्म्यां त्रिवर्गसम्पत्तौ वेषोपकरणे मतौ " (इति विश्वमेदिन्यौ) लक्ष्यते, लक्षयति पश्यति नीतिज्ञमिति वा लक्ष्मीरिति चत्वारि धनोत्कर्षस्य । विपदनं, विपद्यतेऽनयेति वा विपत्तिः, विपत्, आपदनं, आपद्यतेऽनयेति वा आपत्, आपत्तिरिति त्रीणि विपत्तेः । आयुध्यन्तेऽनेनेति आयुधम्, प्रह्रियतेऽनेनेति प्रहरणम्, शस्यतेऽनेनेति शस्त्रम्, अस्यते, असति वा अस्त्रमिति चत्वारि प्रहरणमात्रस्य । अथेति—धनतीति धनुः " धनुः पियाले ना न स्त्री राशिभेदे शरासने । धनुर्धरे त्रिषु" (इति सान्तेषु मेदिनी) उदन्तोऽपि, "धनुः पुमान् पियालद्रौ राशिभेदे शरासने " (इति नान्तेषु मेदिनी) ऊप्रत्ययान्तः स्त्रियामपि " स्थावरन्तु धनुर्गुणी " । शरावापो धनूः स्त्री स्यात्तृणाता त्रिणाताऽपि च " (इति त्रिकाण्डशेषः) चपस्य वंशभेदस्य विकारश्चापः उभावस्त्रियौ पुंनपुंसकौ स्याताम्, धन्वतीति धन्व " धन्वा तु मरुदेशे ना क्लीवं चापे स्थलेऽपि च " (इति मेदिनी) शरा अस्यन्तेऽनेनेति शरासनम्, कौर्दण्डो वंशोऽस्येति कोदण्डम् " कोदण्डं कार्मुके देशभेदभूतलयोरपि " (इति हेमचन्द्रः) कर्मणे प्रभवतीति कार्मुकम् " अथ कार्मुकः । वंशे कार्मुकमिष्वासे कर्मठे " (इति हैमः) इषवो बाणा अस्यन्तेऽनेनेति इष्वासः " इष्वासो धन्वधन्विनोरिति" (हैमः) इति सप्त चापस्य । अथेति—कर्णस्य शरासनं कालो यम इव पृष्ठमस्य, कालवर्णं पृष्ठमस्येति वा कालपृष्ठं स्यादित्येकं कर्णधनुषः ॥ ८२ । ८३ ॥

पु.न. पु.न.
अर्जुनका धनुष **(कपिध्वजस्य) गाण्डीवगाण्डिवौ (पुंनपुंसकौ) ।**
धनुषका किनारा स. स. स.न. स.न.
दस्ताना **कोटि (रस्या) टनी गोधे तले (ज्याघातवारणे)॥८४॥**

केति—कपिर्हनुमान् ध्वजो ध्वजे वा यस्येति कपिध्वजोऽर्जुनस्तस्य शरासने गाण्डी-गाण्डिर्वा ग्रन्थिरस्यास्तीति गाण्डीवः गाण्डिवश्च उभौ पुंनपुंसकौ स्याताम्

" जिष्णोर्धनुषिकोदण्डे गाण्डीवं गाण्डिवं तथा " (इति शाश्वतः) इति द्वे अर्जुनधनुषः । अस्य धनुषोऽन्त्ये कोटयतेऽनयेति कोटी कोटिर्वा, " कोटिः स्त्री धनुषोऽग्रेऽश्रौसंख्याभेदप्रकर्षयोः " (इति मेदिनी) अटति गुणोऽत्रेति अटनी अटनिर्वा इति द्वे धनुषोऽन्त्यस्य । ज्यायागुणस्याघातस्य वारणे गुध्यते बाहुभ्यामिति गोधे, " गोधा तलनिहाकयोः " (इति मेदिनी) तलतीति तला, तलम् वा द्वित्वे तले स्यातामव्यक्तिद्वयाद् द्वित्वमिति द्वे चर्मरचितदस्तानाविशेष इति ख्यातानाम् ॥ ८४ ॥

पु. न. स. स. स. पु.

धनुष का मध्य **लस्तक (स्तु) धनुर्मध्यं मौर्वीज्याशिञ्जिनी गुणः ।**

रोदा धन्वियों के न. न.

आसन **(स्यात्)प्रत्यालीढमालीढ(मित्यादिस्थानपञ्चकम्)८५**

लेति—लस्यते स्म लस्तः स एव लस्तकः, धनुषो मध्यं धनुर्मध्यमिति द्वे धनुषो मध्यभागस्य । मूर्वाया विकारो मौर्वी, जिनातीति ज्या, शिङ्क्त इति शिञ्जिनी, गुण्यत इति गुणः "गुणोज्यासूत्रतन्तुषु । रज्जौ सत्त्वादौ सन्ध्यादौ शौर्यादौ भीमइन्द्रिये । रूपादावप्रधाने च दोषान्यस्मिन्विशेषणे " (इति हैमः) इति चत्वारि गुणस्य " रोदा " इति ख्यातस्य । प्रत्यालेहनं प्रत्यालीढम्, "प्रत्यालीढन्तु चरणन्यासभेदेऽशिते त्रिषु" (इति मेदिनी) आलेहनमालीढम् " आलीढं पादविन्यासेशिते त्रिषु " (इति विश्वमेदिन्यौ) तत्र ऊर्ध्वस्थस्य वामपादप्रसारे दक्षिणपादसंकोचे आद्यम् , विपर्ययेऽन्त्यम् आदिना समपाद-विशाख-मण्डलग्रहः वितस्त्यन्तरेण स्थिते पादद्वये विशाखः, भरतस्त्वाह " वैष्णवं समपादं च वैशाखं मण्डलं तथा, प्रत्यालीढमथालीढं स्थानान्येतानि षड् नृणाम् " इति पञ्च धन्विनां स्थानभेदानाम् ॥ ८५ ॥

न. न. न. पु. न.

निशाना बाण **लक्षं लक्ष्यं शरव्यं (च) शराभ्यास उपासनम् ।**

पु. पु. पु. पु. पु. पु.

[illegible] **पृषत्कबाणविशिखा अजिह्मग खगाशुगाः ॥ ८६ ॥**

पु. पु. पु. पु. पु. पु.न.

[illegible] **कलम्बमार्गणशराः पत्रीरोपइषु (द्वयोः) ।**

लेति—लक्ष्यत इति लक्षम् " लक्षं व्याजशरव्ययोः । संख्यायामपि " (इति हैमः) लक्षयितुमर्हं लक्ष्यम् , शरवे हिंसायै हितं ' शरान्व्ययति वा शरव्यमिति त्रीणि लक्ष्यस्य " निशाना " इति ख्यातस्य । शरस्य शरमोक्षस्याभ्यासः शराभ्यास उपास्यत [illegible] इति द्वे शराभ्यासस्य । पर्णानि पृणक्ति [illegible] पृषत्कः, वणति बाणः, [illegible] " बाणः स्याद्गोस्तने [illegible] । बाणा तु [illegible] " (इति मेदिनी) विशिखा [illegible]

त्रिशिख. "विशिखा खनित्रिकायां रथ्यायां विशिख. शरे" (इति हैम:) जिह्मस्याभाव:, अजिह्ममृजुगच्छतीति अजिह्मग:, खं गच्छतीति खग: "खगोऽर्कग्रहपक्षिषु । शरे देवेऽपि" (इति हैम:) आशु गच्छतीति आशुग: "आशुगोऽर्कशरे वायौ" (इति हेमचन्द्र:) कलयत इति कलम्ब: "कलम्बी शाकभेदेऽपि कदम्बशरयो: पुमान्" (इति मेदिनी) मार्गयति, मार्ग्यते वा मार्गण: "मार्गणं याचनेऽन्वेषे मार्गणस्तुशरेऽर्थिनि" (इति हैम:) शृणात्यनेनेति शर: "शरस्तु तेजने बाणे दध्यग्रे ना शरं जले" (इति विश्वमेदिन्यौ) दन्त्यादिपाठे तु सरतीति सर: "बाण: स्यादस्त्रकण्टक: । स्थूल क्ष्वेडो विपाटश्च चित्रपुङ्ख: शर: सर: । पत्रवाहो विकर्ष: " (इति त्रिकाण्डशेष:) पत्राणि पक्षा: सन्त्यस्येति पत्री "पत्री काण्डे खगे द्रुमे । रथेऽद्रौ रथिके श्येने" (इति हेमचन्द्र:) रोप्यते, रुप्यतेऽनेनेति वा रोप: "रोपो रोपणबाणयो." (इति विश्व:) ईष्यतेऽनेनेति इषु. द्वयो: स्त्रीपुंसयो: स्यादिति द्वादशबाणस्य ॥ ८६ । १/२ ॥

पु. पु. पु. पु.

लोहियाबाण, **प्रक्ष्वेडना (स्तु) नाराचाः पक्षो वाज (स्त्रिषूत्तरे)॥८७॥**

फोंक, फॅंकाबाण, पु.स.न. पु.स.न. पु.स.न.

बिषैलेबाण **निरस्तः (प्रहिते बाणे) (विषाक्ते) दिग्धलिप्तकौ।**

प्रेति—प्रकर्षेण क्ष्वेदन्त इति पृषोदरादित्वात् प्रक्ष्वेडना:, नरानाचामन्ति, नराणा समूहो नारमाचामन्तीति वा नाराचा इति द्वे सर्वलोहमयशरस्य । पक्षति, पक्ष्यतेऽनेनेति वा पक्ष., वजति, वाजयत्यनेन वा वाज: "वाजो निस्वनपक्षयो: । वेगे पुमानथ क्लीबे घृतयज्ञान्नवारिषु" (इति मेदिनी) इति द्वे शरपक्षस्य । उत्तरे निरस्तादयो लिप्तकान्ता: वक्ष्यमाणा: शब्दास्त्रिषु त्रिलिङ्ग्यां स्यु: । प्रहिते प्रक्षिप्ते बाणे निरस्यते स्म निरस्त:स्यादित्येकं प्रक्षिप्तबाणस्य । विपाक्ते बाणे दिह्यते स्म दिग्ध., लिप्यते स्म लिप्त. स एव लिप्तक: उभौ स्यातामिति द्वे विषसम्बद्धबाणस्य ॥८७।१/२॥

पु. पु. पु, पु. पु.स.

तरकस **तूणोपासङ्गतूणीरनिषङ्गा इषुधि (र्द्वयोः) ॥ ८८ ॥**

स. पु. पु. पु. पु. पु.

तलवार **तूण्यां खड्गे (तु) निस्त्रिंशचन्द्रहासासिरिष्टयः।**

पु. पु. पु. पु.

कौक्षेयको मण्डलाग्रः करपालः कृपाण (वत्) ॥ ८९ ॥

त्विति—तूणयति, तूण्यते शरैरिति वा तूण: स्त्रिया तूणी च "स्त्रियां तूणोपुवी उपासङ्ग:" (इति रत्नकोष:) उपासज्यन्ते शरा अत्रेति उपासङ्ग:, तूणीं तूणत्वमीर्ते, तूणीं शरै. संकोचं रातीति वा तूणीर:, नितरां सज्यन्ते शरा अत्रेति निषङ्ग:, इषवो धीयन्तेऽत्रेति इषुधि: द्वयो: स्त्रीपुंसयो: स्यात्, तूण्यते बाणैरिति गौरादित्वात् तूणी

इति पट् शराधारस्य । खण्डति परं, खण्ड्यतेऽनेनेति वा खड्गः "खड्गो गण्डक-शृङ्गासिबुद्धिभेदेषु गण्डके " (इति विश्वमेदिन्यौ) निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः निस्त्रिंशोनिर्घृणे खड्गे " (इति हैम.) चन्द्रइव हासः प्रभास्य, चन्द्रं हसति वा द्युति-मत्त्वादिति चन्द्रहासः, " चन्द्रहासोऽसिमात्रके । दशग्रीवकृपाणे च कनीयसि च गुग्गुलौ (इति हैमः) अस्यते, असति वा असिः "असिः खड्गे नदीभिदि " (इति हैमः) रेषति, रिशति वा रिष्टिः "रिष्टिः खड्गे ना शुभे स्त्री" (इति मेदिनी) शिला-शूलर्ष्टिमुद्गरमिति भट्टिप्रयोगाद् ऋषतीति ऋष्टिरपि " ऋष्टिः खड्गस्तरवारिकौक्षेयकौ च नन्दकः" (इति रभसः) कुक्षौ भवः कौक्षेयकः, मण्डलमग्रमस्येति मण्डलाग्र., करं पालयतीति करपालः करवाल इति पाठे तु करे वालो यस्य, करंवलति, करेण वल्यते वा करवालः, कृपां नुदतीति कृपाणस्तेन तुल्यं कृपाणवदिति नव खड्गस्य॥ ८८।८९ ॥

पु. स.

कब्जा,परतला, **त्सरुः(खड्गादिमुष्टौ स्यात्) मेखला (तन्निबन्धनम्)।**

पु. न. न. पु.

ढाल,हथकडा, **फलको (ऽस्त्री) फलं चर्म संग्राहो (मुष्टिरस्य यः) ॥ ९० ॥**

त्सेति—खड्गादिमुष्टौ त्सरतीति त्सरुः स्यात् आदिना कटितलच्छुरिकादिग्रहः इत्येकं खड्गादिमुष्टेः " कब्जा " इति ख्यातस्य । तन्निबन्धनं मांलक्ष्मीमीखति, मा-शब्दो निषेधे मा ईखति, माईं लक्ष्मीं खलति वा मेखला " मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयोः " (इति मेदिनी) इत्येकं खड्गादेश्चर्मादिनिर्मितकटिबन्ध-नस्य युद्धे हस्तात्पतनवारणाय मणिबन्धे प्रग्रियमाणस्य चर्मादेर्वा । फलतीति फलकः अस्त्री पुंनपुंसकं स्यात् अचि प्रत्यये फलम् " फलं हेतुकृते जातीफले फलकसस्ययो. । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयो. " (इति मेदिनी) चर्यते, चरत्यनेनेति वा चर्म " चर्म कृत्तौ च फलके " (इति विश्वः) इति त्रीणि चर्मणः " ढाल " इति ख्यातायाः । अस्य फलस्य यो मुष्टिः स संगृह्यते इति संग्राहः स्यादित्येकं चर्ममुष्टेः " हथकड़ा " इति ख्यातस्य ॥ ९० ॥

घन, घूघ, पु. पु. पु स. स.
[illegible] **द्रुघणो मुद्गरघनौ (स्यादी) ली करपालिका ।**
[illegible]
पु पु. पु.
[illegible] **भिन्दिपालः सृग (स्तुल्यौ) परिघः परिघातनः ॥ ९१ ॥**

द्रुघणेति—द्रुमैर्हन्यतेऽनेनेति द्रुघणः, "द्रुघणो मुद्गरेऽपि स्याद् द्रुहिणे च परश्वधे" (इति [illegible]) [illegible] द्रुघनोऽपि, [illegible] [illegible] मुद्गरः, [illegible] घन " घनः सान्द्रे दृढे [illegible] विस्तारे मुस्ते [illegible] [illegible] " (इति हैम.) इति [illegible]

मुद्गरस्य। ईर्ते, ईर्यते, ईड्यते वा ईली, इलतीति विग्रहे तु 'इली' ह्रस्वादिरपि, करं पालयतीति करपाली सैव करपालिका, "करवालिका" इति पाठे तु करं वलते, करेण वाल्यते वा करवाली सैव करवालिका इति द्वे करवालिकायाः "गुप्ती" इति ख्यातायाः। भिन्दतीति भिन्दिः "भिन्दिर्द्वादश तालं तु दश कुन्तोऽभिधीयते" (इति भरतः) तदवच्छिन्नः कालोऽपि भिन्दिस्तं पालयतीति भिन्दिपालः, सरतीति सृगः उभौ तुलया सम्मितौ तुल्यौ स्यातामिति द्वे सृगस्य "गोफण" इति ख्यातस्य। परितो हन्यतेऽनेनेति परिघः "परिघोऽस्त्रे योगभेदे परिघातेऽर्गलेपि च" (इति हैम.) परितो घातयत्यनेनेति परिघातनः इति द्वे लोहबद्धलगुडभेदस्य "लोहांगी" इति ख्यातायाः॥ ९१॥

पु.स.　पु.स.　पु.स　पु.

फरसा या　**(द्वयोः)कुठारः स्वधितिः परशु(श्च)परश्वधः।**

कुल्हारा छूरी　स　स.　स.　स

या चाकू　**(स्या)च्छस्त्री(चा)सिपुत्री(च)छुरिका(चा)सिधेनुका९२**

द्वे ति—कुठे गतिप्रतिघाते आरोगतिरस्य, कुठं वृक्षमृच्छतीति वा कुठारः द्वयोः स्त्रीपुंसयोः स्यात्। स्वं धियतीति स्वधितिः, परं शृणातीति परशुः, पर्शुरपि, परस्य श्वयनं परश्वस्तं धयतीति परश्वधः, पर्श्वधोऽपि 'परस्वधः' इति पाठे तु परस्य स्वंदधाति काष्ठदण्डधारकत्वात् परस्वधः "कुठारः स्त्री च स्वधितिः परशुश्च परश्वधः" (इति रभसः) इति चत्वारि कुठारस्य। शस्यतेऽनयेति शस्त्री, "लोहे शस्त्री छुरिकायामिति हैमः" असेः पुत्री असिपुत्री, छुरतीति छुरिका असेर्धेनुरिव असिधेनुका स्यादिति चत्वारि छुरिकायाः "छूरी" इति ख्यातायाः॥ ९२॥

पु.न.　पु.　स.　पु न.

बर्छी, गुर्ज,　**(वा पुंसि)शल्यं शङ्कु(र्ना)शर्वला तोमरो(ऽस्त्रियाम्)।**

साग,भाला,खड्ग-पु.　पु.　पु.　स.　स.　स.

दिको की नोक **प्रास(स्तु)कुन्तः कोण(स्तु स्त्रियः)पाल्यश्रिकोटयः९३**

वेति—शलतीति शल्यं वा पुंसि स्यात् "शल्यं तु न स्त्रियां शङ्कौ क्लीबं क्ष्वेडेपु तोमरे। मदनद्रुश्वाविधोर्ना" (इति मेदिनी) शङ्कतेऽस्मादिति शङ्कुः ना पुमान्स्यात् "शङ्कुः पत्रशिराजाले संख्याकीलकशम्भुषु। पादोऽस्त्रभेदयोर्मेढ्रे" (इति हैम.) इति द्वे शल्यस्य 'बर्छी' इति ख्यातायाः। शर्वतीति शर्वला, स्वामिमते तु सर्वं लातीति सर्वलापि, तौतीति तौः म्रियत इति मरः तौश्चासौ मरश्च, तौर्गन्ता म्रियतेऽनेनेति वा तोमरः अस्त्रियां पुंनपुंसके स्यादिति द्वे तोमरस्य 'गुर्ज' इति ख्यातस्य। प्रास्यत इति प्रासः, कुं शरीरमुनत्तीति शकन्ध्वादित्वात् कुन्तः "कुन्तः प्रासे चण्डभावे क्षुद्रजातौ गवेधुके। कुन्ती पाण्डुप्रियायां च शल्लक्यां गुग्गुलद्रुमे" (इति विश्वः) इति द्वे कुन्तस्य "भाला"

इति ख्यातस्य । कुणत्यनेनेति कोणः "कोणो वाद्यप्रभेदे स्याद्वीणादीनां च वादने । एकदेशे गृहादीनामश्रौ च लगुडेऽपि च" (इति मेदिनी) पालयतीति पालिः, ङीपि पाली वा "पालिः कर्णलताग्रेऽश्रौ पङ्क्तावङ्कप्रभेदयोः । छात्रादिदेये स्त्री पाली यूकासश्मश्रुयोषितोः" (इति मेदिनी) अश्नाति, अश्नुते, आश्रीयते प्रहारार्थमिति वा अश्रिः "अश्रिः कोणैकदेशयोः" (इति धरणिः) "अस्र, कोणे शिरसिजे" इति विश्वादस्त्रोपि, कोटयति, कोटयते वा कोटिः "कोटिः स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः" (इति मेदिनी) इति चत्वारि कोणभागस्य ॥ ९३ ॥

पु. पु. पु.
फौजकी तैयारी या जमाव **सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः ।**
पु.
शस्त्रपूजन **लोहाभिहारो(ऽस्त्रभृतां राज्ञां नीराजनाविधिः)॥९४॥**

सेति—सर्वेषामभिसरणं सर्वाभिसारः, सर्वस्य ओघः समूहः सर्वौघः, "सर्वौघो गुरुवेगे च सर्वसंनहने पुमान्" (इति मेदिनी) सर्वेषां संनहनं सर्वसंनहनमर्थो यस्येति सर्वसंनहनार्थकः इति त्रीणि सर्वसैन्यसंनहनस्य। अस्त्रभृतां शस्त्रधारिणां राज्ञां नृपाणां निःशेषेण नितरां वा राजनं नीराजना तस्या विधिः नीराजनाविधिः लोहस्य शस्त्रस्याभितो हरणं सरणं वा लोहाभिहारः, लोहाभिसारो वा स्यादित्येकं महानवम्यां प्रस्थानात्प्राक् शस्त्रवाहनादिपूजनविधेः ॥ ९४ ॥

न.
शत्रु पर चढ़ाई प्रस्थान या पयान **(यत्सेनयाभिगमनमरौ तद)भिषेणनम् ।**
स. स. न. न. न. पु.
यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः ॥ ९५ ॥

यदिति—अरौ शत्रुसमीपे सेनया यदभिगमनं तदभिषेणितमभिषेणनं स्यादित्येकं सेनया शत्रुसमीपगमनस्य। यानं यात्रा "यात्रा तु यापनेऽपि स्याद्गमनोत्सवयोः स्त्रियाम्" (इति मेदिनी) व्रजनं व्रज्या अभिनिर्यातमभिनिर्याणम्, प्रस्थितं प्रस्थानम्, गतं गमनम्, गमनं गमः "गमोनाक्षविवर्ते स्यादपर्यालोचितेऽध्वनि" (इति मेदिनी) इति षट् प्रस्थानमात्रस्य ॥ ९५ ॥

पु. न. न न.
[illegible] **(स्यादा)सारः प्रसरणं प्रचक्रं चलिता(र्थकम्) ।**
पु.
[illegible] **(अहितान्प्रत्यभीतस्य रणे यान) मभिक्रमः ॥ ९६ ॥**

स्यादिति—आसारणमासारः स्यात् "आसारः स्यात्प्रसरणे वेगवृष्टौ सुहृद्बले" (इति विश्वः) अत्र [illegible] प्रसारणी इति पाठे तु प्रसरणमपि प्रसारणः इति [illegible]

रादिति वा ङीषि प्रसरणी इति द्वे सर्वलोव्यापिसैन्यप्रसरणस्य । प्रस्थितं चक्रं सैन्यं प्रचक्रम्, चलितमेवार्थो यस्येति चलितार्थकम् चलितशब्दस्य समानार्थकम् "प्रचक्रं चलितं त्रिषु" (इत्यमरमाला) इति द्वे प्रस्थितसैन्यस्य । रणे संग्रामे अभीतस्य भयरहितस्य अहितान्प्रतियानम् अभिक्रमणमभिक्रमः स्यादित्येकमभीतयानस्य ॥ ९६ ॥

प्रभात जगाने-वाले घडि-याली यश-गायक भाट

वैतालिका बोधकराश्चाक्रिका घाण्टिका(र्थकाः)।
(स्यु)र्मागधा(स्तु मगधा वन्दिनः स्तुतिपाठकाः ॥९७॥

वायिति—विविधेन तालेन शब्देन चरन्तीति वैतालिकाः, बोधं कुर्वन्तीति बोधकरा इति द्वे प्रातर्जागरणकारिणः । चक्रेण समूहेन चरन्तीति चाक्रिकाः, घण्टया चरन्तीति घाण्टिकास्त एवार्था येषामिति घाण्टिकार्थकाः इति द्वे बहुमिलितनृपस्तुत्यादिपाठकानाम्। कचित्तु "चक्रिका घटिकार्थका इति पाठः। तत्र चक्रमस्ति वाद्यत्वेन येषामिति चक्रिकाः, घटीं कायन्तीति घटिकास्त एवार्था येषामिति घटिकार्थकाः इति द्वे घटिकावादकानाम् । मगध्यन्ति याचन्त इति मगधास्त एव मागधाः अणोऽभावे मगधा इति द्वे वंशपरम्पराशंसकानाम् । अवश्यं वन्दन्त इति वन्दिनः "वन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः" पठन्तीति पाठकाः स्तवनं स्तुतिस्तस्याः पाठकाः स्तुतिपाठकाः इति द्वे वन्दिनः "भाट" इति ख्यातस्य ॥ ९७ ॥

लड़ाई से नहीं भागनेवाला

संशप्तका(स्तु समयात्संग्रामादनिवर्तिनः)।

धूरि या धूलि

रेणु(र्द्वयोः स्त्रियां)धूलिः पांशु(र्ना न द्वयो)रजः ॥९८॥

समिति—समयाच्छपथाद्धेतोराचाराद्वा ये संग्रामात् न निवर्तितुं शीलं येषामिति अनिवर्तिनोऽपराङ्मुखास्ते संशपनं शपथं कुर्वन्ति संशप्तयन्तीति, संशप्तं सम्यक् शप्तं सत्यं येषामिति वा संशप्तकाः स्युरित्येकं रणादपराङ्मुखानाम् । रिणाति, रीयते वा रेणुः। द्वयो. स्त्रीपुंसयोः स्यात्, धुवति, धूयते, धवनं धूस्तया लीयते वा धूलिः स्त्रियां स्यात्, पंशतीति पांशुः, पांसुरिति दन्त्यान्तश्च ना पुमान् स्यात्, रजतीति रजः सान्तोऽदन्तश्च द्वयोः स्त्रीपुंसयोः न स्यादिति चत्वारि रजस. ॥ ९८ ॥

बड़ी धूलि बड़ी व्याकुल फौज झण्डा या निशाना

(चूर्णे) क्षोदः समुत्पिञ्जपिञ्जलौ (भृशमाकुले)।
पताका वैजयन्ती स्यात्केतनं ध्वज(मस्त्रियाम्)॥९९॥

१ उत्पिञ्जलकश्च । "कर्वत्पिञ्जलमातङ्गे." (इति माघ) इति मुकुट. ॥

" संख्यमाहवे । संख्यैकादौ विचारे च " (इति हैमः) समनं समीकम्, संपरायः संपरायस्तदेव संपरायकम् (ठकि) साम्परायिकोऽपि, एते समरादयः समुदायान्ताः अस्त्रियां पुंनपुंसके स्युः । समरणं समरः, अननं, ननयनं वा अनीकः "अनीकोऽस्त्री रणे सैन्ये " (इति मेदिनी) रणनं रणः " रणः कोणे कणे पुंसि समरे पुन्नपुंसकम्" (इति मेदिनी) " कलं तु मधुरध्वनौ " (इति धरणिः) कलस्य हननमिति कलहः, विग्रहणं विग्रहः " विग्रहो युधि विस्तारे प्रविभागशरीरयोः " (इति हैमः) संप्रहरणं संप्रहारः " संप्रहारो गतौ रणे " (इति हैमः) अभिसंपतनमभिसंपात, कलनं कलिः " कलिर्विभीतके शूरे विवादेऽन्त्ययुगे युधि " (इति हैमः) संस्फोटनं संस्फोटः, संयोजनं संयुगः, अभ्यामर्दनमभ्यामर्दः, अभिमर्दनमभिमर्दोऽपि, समाहननं समाघातः " समाघातो वधे युद्धे " (इति मेदिनी) संग्रामणं संग्रामः, अभ्यागमनमभ्यागमः " अभ्यागमः समरेऽन्तिके । घातेरोधेऽभ्युपगमे " (इति हैमः) आह्वानमाहवः " आहवः समरे यज्ञे " (इति हैमः) समुदयनं समुदायः, संयतनं, संयमनं वा संयत्, समयनं समितिः " समितिर्युधि संगमे । साम्ये सभायामिति " (हेमचन्द्रः,) अजनमाजिः " आजिः स्त्री समभूमौ संग्रामे " (इति मेदिनी) समयनं समित् , योधनं युद् एते संयदादयः स्त्रियः स्युरित्येकत्रिंशत्प्रहरणक्रियायाः ॥ १०३ । १०५ । $\frac{१}{२}$ ॥

बाहुयुद्ध रण व्याकुलता — न. नियुद्धं, न. बाहुयुद्धे (स्यात्तुमुलं न.) न. रणसंकुले ॥ १०६ ॥

सिंहनाद हाथियों का गिरोह वीरों को निन्दापूर्वक पुकारना हाथियों की गर्जना —

स. क्ष्वेडा (तु) पु. सिंहनादः (स्यात्करिणां) स. घटना स. घटा ।

न. क्रन्दनं पु. योधसंरावो न. बृंहितं न. करिगर्जितम् ॥ १०७ ॥

नीति—बाहुयुद्धे नियुद्धं स्यात् । निगृह्य, नितरां वा युद्धं नियुद्धम्, बाहुभिर्युद्धं बाहुयुद्धमिति द्वे बाहुयुद्धस्य । रणसंकुले रणव्याकुले तुमुलं स्यात् । तवनं तौति वा तुमुलम् " तुमुलं व्याकुले रणे " (इति त्रिकाण्डशेषः) रणस्य संकुलं रणसंकुलमिति द्वे रणव्याकुलतायाः । क्ष्वेदनं पृषोदरादित्वात् क्ष्वेडा रूपभेदात्स्त्रीत्वम् " विशेषेणाभिनः " इति परिभाषणात्त्र पुंस्त्वम् , सिंहवन्नदनं सिंहनादः स्यादिति द्वे योधानां सिंहनादस्य । करिणां हस्तिनां समुदाये घटयतीति घटना, घटनं घटा " घटः समाधिभेदेभशिरःकूटकुम्भेषु च । घटा घटनगोष्ठीभघटनासु च योषिति "

* [illegible] (इति मेदिनी) ॥

(इति मेदिनी) इति द्वे हस्तिसंघस्य । क्रन्दितं क्रन्दनं " क्रन्दनं रोदनेऽपि स्यादाह्वानेऽपि " (इति मेदिनी) संरवणं संरावः योधानां संरावः योधसंरावः इति द्वे अन्योन्यस्पर्धया योधानामाह्वानस्य । बृंहणं बृंहितम्, करिणां गर्जनं करिगर्जितं स्यादिति द्वे हस्तिगर्जनस्य ॥ १०६ । १०७ ॥

धनुषका शब्द, जुझाऊनगाड़ा, हठ धोखा देना
पु. पु. पु.
विस्फारो (धनुषः स्वानः) पटहाडम्बरौ (समौ) ।
न. पु. पु. न. न.
प्रसभं (तु) बलात्कारो हठो (ऽथ) स्खलितं छलम् ॥१०८॥

वीति—धनुषः स्वानः विस्फरणं, विस्फुरणं वा विस्फारः स्यादित्येकं धनुर्नादस्य । पटं हन्तीति पटहः "पटहो ना समारम्भे आनके पुंनपुंसकम्" (इति मेदिनी) आडम्बनमाडम्बस्तं राति, रायति वा आडम्बरः उभौ समौ समानार्थौ समानलिङ्गाविति "आडम्बरः समारम्भे गजगर्जिततूर्ययोः" (इति विश्वः) इति द्वे युद्धपटहस्य " दमदमा" इति ख्यातस्य । प्रगता सभा विचारोऽस्मात्, सभायाः प्रगतो वेति प्रसभम् " क्लीबे तु प्रसभं हठः " (इति वोपालितः) बलादिति निपातो हठार्थः बलात्करणं बलात्कारः हठनं हठ. "हठः स्यात्प्रसभे पृश्न्यामिति" (मेदिनी) इति त्रीणि हठस्य । अथेति—स्खलनं स्खलितम् " स्खलनं छलिते क्षेपे " छानं छलम् " छलं छद्म स्खलितयोः " (इति हैम.) इति द्वे युद्धमर्यादायाश्चलनस्य ॥ १०८ ॥

उत्पात मूर्च्छा देशो को उपद्रव पहुँचाना
न. पु. पु.
अजन्यं (क्लीबे) उत्पात उपसर्गः (समं त्रयम्) ।
स. न. पु. पु. न.
मूर्च्छा (तु) कश्मलं मोहोऽप्यवमर्द(स्तु)पीडनम् ॥१०९॥

अजेति—न जन्यते, न जने साधुर्वेति अजन्यं क्लीबे नपुंसके स्यात्। उत्पतनमुत्पातः, उपसृज्यते, उपसर्जनं वा उपसर्गः " उपसर्गः पुमान् रोगभेदोपप्लवयोरपि " (इति मेदिनी) इदं त्रयं समं समानार्थकं स्यादिति त्रीणि शुभाशुभसूचकमहाभूतविकारस्य । मूर्च्छनं मूर्च्छा, कशनं कश्मलम्, मोहनं मोहः "अथ मोहो नृलिङ्गः स्यादविद्यायां च मूर्च्छने " (इति मेदिनी) इति त्रीणि मूर्च्छायाः । अवमर्दनमवमर्दः, पीडितं पीडनमिति द्वे देशादेरुपद्रवदानस्य ॥ १०९ ॥

धोखे से दबाना विजय या फतेपाना वैर मिट जाना
न. न. पु. पु.
अभ्यवस्कन्दनं (त्व) भ्यासादनं विजयो जयः ।
स. पु. न.
वैरशुद्धिः प्रतीकारो वैरनिर्यातनं (च सा) ॥ ११० ॥

अभीति—अभ्यवस्कन्दितमभ्यवस्कन्दनम्, अभ्यासादितमभ्यासादनमिति द्वे प्रहारा-

दिना नि.शक्तिकरणस्य । विजयनं विजयः, " विजयः स्याज्जये पार्थे स्त्रियां तिथ्यन्तरे स्मृता । उमासख्याम् " (इति मेदिनी) जयनं जयः " जया जयन्तीतिथिभित्पथ्यो-मा तत्सखीषु च । अग्निमन्थे ना जयन्ते विजये च युधिष्ठिरे " (इति मेदिनी) इति द्वे विजयस्य । सा वैरस्य शुद्धिः वैरशुद्धिः स्यात्, प्रतिकरणं प्रतीकारः निर्यातित निर्यातनम् वैरस्य निर्यातनं वैरनिर्यातनमिति त्रीणि वैरशोधनस्य ॥ ११० ॥

पु. पु. पु. पु. पु. पु.

भागना **प्रद्रावोद्द्रावसंद्रावसंदावा विद्रवो द्रवः ।**

पु. न. पु.

हारना **अपक्रमोपयानं च (रणे भङ्गः) पराजयः ॥ १११ ॥**

प्रेति—प्रद्रवणं प्रद्रावः, उद्द्रवणमुद्द्रावः, संद्रवणं संद्रावः, संदवनं संदावः, विद्रवणं विद्रवः, द्रवणं द्रवः " द्रवः प्रद्रावनर्मणोः । विद्रवे रसगत्योश्च " (इति हैमः) अपक्रमणमपक्रमः, अपयातमपयानमित्यष्टौ पलायनस्य । रणे संग्रामे यः भङ्गः स पराजयः स्यात् । भञ्जनं भङ्गः " भङ्गो जयविपर्यये । भेदरोगतरङ्गेषु भङ्गा सस्यान्तरे स्त्रियाम् " (इति मेदिनी) पराजयनं पराजयः इति द्वे पराजयस्य ॥ १११ ॥

पु. पु. पु. पु.

हार छिपा **पराजितपराभूतौ (त्रिषु) नष्टतिरोहितौ ॥ १/२ ॥**

पेति—पराजीयते स्म, परैराजीयते स्म वा पराजितः, पराभूयते स्म पराभूतः उभौ त्रिषु त्रिलिङ्गया स्यातामिति द्वे प्राप्ताभिभवस्य । नश्यति स्म नष्टः, तिरोधीयते स्म, हिनोति स्म वा तिरोहितः नशनं नष्टं नष्टमस्यास्तीति नष्टः, तिरोहितमस्त्यस्येति तिरोहितो वा " अत्र काकाक्षिगोलकन्यायेन त्रिष्विति पदं पूर्वोत्तराभ्यां संबध्यते " इति न्यायादिमावपि त्रिलिङ्ग्यां स्यातामिति द्वे तिरोहितस्य ॥ १/२ ॥

न. न. न. न.

वधना, मारना या हत्या करना **प्रमापणं निर्बर्हणं निकारणं विशारणम् ॥ ११२ ॥**

न. न. न. न.

प्रवासनं परासनं निषूदनं निहिंसनम् ।

न. न. न. न.

निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ॥ ११३ ॥

न. न. न. न.

निस्तर्हणं निहननं क्षणनं परिवर्जनम् ।

न. न. न. न.

निर्वापणं विशसनं मारणं प्रतिघातनम् ॥ ११४ ॥

न.　न.　न.　न.

उद्वासनप्रमथनक्रथनोज्जासनानि (च) ।

पु.　पु.　पु.　पु.　पु.　पु.

आलम्भपिञ्जविशरघातोन्माथवधा (अपि) ॥ ११५ ॥

प्रेति—प्रमापितं प्रमापणम्, निर्वर्हितं निर्वर्हणम्, निकारितं निकारणम्, विशारितं विशारणम्, प्रवासितं प्रवासनम्, परास्तं परासनम्, निषूदितं निषूदनम्, निर्हिंसितं निर्हिंसनम्, निर्वासितं निर्वासनम्, संज्ञपितं संज्ञपनम्, निर्ग्रन्थितं निर्ग्रन्थनम्, निर्गन्धनमित्यन्ये अपास्तमपासनम्, निस्तर्हितं निस्तर्हणम्, निहतं निहननम्, क्षतं क्षणनम्, परिवर्जितं परिवर्जनम्, निर्वापितं निर्वापणम्, विशस्तं विशसनम्, मारितं मारणम्, प्रतिघातितं प्रतिघातनम्, उद्वासितमुद्वासनम्, प्रमथितं प्रमथनम्, क्रथितं क्रथनम्, उज्जासितमुज्जासनम्, आलम्भनमालम्भः, पिञ्जनं पिञ्जः, विशरणं विशरः, हननं घातः, उन्मथनमुन्माथः "मुकुटमते तु" "उन्मन्थनमुन्मन्थः", हननं वधोऽपीति त्रिंशन्मारणस्य ॥ ११२ । ११५ ॥

स.　पु.　पु.　पु.　पु.

मृत्यु या　**(स्यात्) पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ।**

मौत　पु.　पु.　पु.स.　न.　पु.न.

अन्तो नाशो (द्वयो) मृत्युर्मरणं निधनो (ऽस्त्रियाम्) ॥ ११६ ॥

स्यादिति—पञ्चानां भावः पञ्चता "पञ्चता पञ्चभावे स्यान्मरणेऽपि च योषिति" (इति मेदिनी) कालस्य धर्मः कालधर्मः, दिष्टस्य दैवस्यान्तो दिष्टान्तः, प्रलयनं प्रलयः अत्ययनमत्ययः, "अत्ययोऽतिक्रमे दण्डे विनाशे दोषकृच्छ्रयोः" (इति मेदिनी) अन्तनमन्तः, "अन्त. स्वरूपे निकटे प्रान्ते निश्चयनाशयोः। अवयवेऽपि" (इति हैम) नशनं नाशः "नाशः पलायने मृत्यौ परिध्वस्तावदर्शने" (इति हेमचन्द्रः) मरणं मृत्यु. द्वयोः स्त्रीपुंसयोः स्यात् "मृत्युर्ना मरणे यमे" (इति मेदिनी) मृतं मरणम्, निधानं निधनम् अस्त्रियां पुंनपुंसकं स्यात् "निधनं स्यात्कुले नाशे" (इति मेदिनी) इति दश मरणस्य ॥ ११६ ॥

पु.स.न.　पु.स.न.　पु.स.न. पु.स.न.　पु.स.न.

मुर्दा　**परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ।**

पु.स.न. पु.स.न.　स.　स.　स.

चिता　**मृतप्रमीतौ (त्रिष्वेते) चिता चित्या चितिः (स्त्रियाम्) ११७**

प्रेति—परा गता असवः प्राणा यस्मादिति परासुः, प्राप्तं पञ्चत्वं येनेति प्राप्तपञ्चत्वः परलोकगमिनः परा दूरमितो वा परेतः "परेतो वाच्यलिङ्गः स्यान्मृते भूतान्तरे पुमान्"

(इति मेदिनी) प्रकर्षेण इतः प्रेतः "प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः" (इति मेदिनी) सन्तिष्ठते स्म संस्थितः, म्रियते स्म मृतमस्त्यस्येति वा मृतः, प्रमीयते स्म प्रमीतः "प्रमीतं वाच्यलिङ्गं स्यात्प्रोषितेऽपि मृतेऽपि च" (इति मेदिनी) एते परासवादयः प्रमीतान्तास्त्रिषु त्रिलिङ्ग्यां स्युरिति सप्त परेतस्य। चीयतेऽस्यामिति चिता "चितं छन्ने त्रिषु चिता चित्यायां संहतौ स्त्रियाम्" (इति मेदिनी) चयनं चित्या "चित्यं मृतकचैत्ये स्याच्चित्या मृतचितौ स्त्रियाम्" (इति मेदिनी) चीयतेऽस्यामिति चितिः स्त्रियां स्यात् "चितिश्चित्यावृन्दयोः स्त्री" (इति मेदिनी) इति त्रीणि चितायाः ॥ ११७ ॥

मूंडकटा, श्मशान, निर्जीव या लाश

पु न. कबन्धो(ऽस्त्री क्रियायुक्तमपमूर्धकलेवरम्)।

न. न. पु. पु.न. श्मशानं(स्या)त्पितृवनं कुणपः शव(मस्त्रियाम्)॥११८॥

केति—क्रियायुक्तं नृत्यादिक्रियासम्पन्नम् अपगतो मूर्धा मस्तको यस्मात्तच्च कलेवरं शरीरं कं शिरो वध्यते छिद्यतेऽस्मात्, केन वायुना वध्यते वा कबन्धः अस्त्री पुंनपुंसके स्यात् "कबन्धमुदके रुण्डे कबन्धो राहुरक्षसोः" (इति हैमः) इत्येकं रुण्डस्य। शवाः शेरतेऽत्रेति पृषोदरादित्वात् श्मशानं द्वितालव्यम्, "वनं नपुंसकं नीरे निवासालयकानने" (इति मेदिनी) पितॄणां वनं, पितॄन् वनति वा पितृवनं स्यादिति द्वे श्मशानस्य। कणतीति कुणपः "विट्सारिकायां कुणपः पूतिगन्धे शवेऽपि च" (इति विश्वमेदिन्यौ) शवतीति शवः अस्त्रियां पुंनपुंसके स्यात् "शवः स्यात्कुणपे पुमान्। नपुंसकं तु पानीये" (इति मेदिनी) इति द्वे मृतशरीरस्य ॥ ११८ ॥

कैदी, अत-

पु. पु. स. स. पु. प्रग्रहोपग्रहौ बन्द्यां कारा(स्याद्बन्धनालये)।

जाना, मन, प्राण

पु. पु. न. (पुंसि भूम्न्य)सवः प्राणा(श्चैवं)जीवोऽसुधारणम्॥ ११९॥

प्रेति—बन्द्या प्रग्रहोपग्रहौ स्याताम् प्रगृह्यत इति प्रग्रहः "प्रग्रहस्तु तुलासूत्रे बन्द्यां नियमने भुजे। हयादिरश्मौ रश्मौ च सुवर्णालिङ्गपादपे" (इति मेदिनी) उपगृह्यत इति उपग्रहः "उपग्रहः पुमान्बन्द्यामुपयोगेऽनुकूलने" (इति मेदिनी) बन्दनं, बन्दते वा बन्दी बन्दिरपि इति त्रीणि प्रग्रहस्य "कैदी" इति ख्यातस्य। [illegible] कारा "कारो वधे निश्चये च बलौ यत्ने यतावपि। [illegible] "

[illegible]

(इति विश्वः) बन्धनस्य आलयो बन्धनालयः इति द्वे बन्धनालयस्य "जेलखान" इति ख्यातस्य । अस्यन्ति, अस्यन्ते वा असवः एवं प्राणन्त्येभिरिति प्राणाः उभौ पुंसि भूम्नि बहुत्वे स्यातामिति द्वे पञ्चवायूनाम् । जीवनं जीवः "जीवः प्राणिनि वृत्तौ च वृक्षभेदे बृहस्पतौ । जीवा जीवन्तिका मौर्वी वचा शिञ्जितभूमिषु । न स्त्री तु जीविते" (इति मेदिनी) धारितं धारणम् असूनां धारणमसुधारणमिति द्वे जीवनस्य ॥ ११९ ॥

न. पु. पु.न. न.

आयुर्दाय जीवनोपाय **आयुर्जीवितकालो (ना) जीवातुर्जीवनौषधम् ॥ १२० ॥**

इति क्षत्रियवर्गः ॥

आयुरिति—एतीति आयुः, जीवितस्य कालो जीवितकालः इति द्वे जीवावच्छिन्न-कालस्य । जीवत्यनेनेति जीवातुः ना पुमान्स्यात्, "जीवातुरस्त्रिया भक्ते जीविते जीवनौषधे" (इति मेदिनी) जीवनस्य औषधम् जीवनौषधमिति द्वे मृतसंजीवनौ-षधस्य ॥ १२० ॥

इति क्षत्रियवर्गविवरणम् ॥

अथ वैश्यवर्गो व्याख्यायते ।

पु. पु. पु. पु. पु. पु.

वैश्य **ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ।**

पु. पु. स. स. न. न.

जीविका **आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ॥ १ ॥**

विति—ब्रह्मण. ऊर्वोर्भवा ऊरव्याः, ऊरोर्जाताः ऊरुजाः, अर्यन्ते इत्यर्याः, विशन्तीति विशस्त एव वैश्याः, भूमि स्पृशन्तीति भूमिस्पृशः, विशन्तीति विश इति षड् वैश्यस्य । आजीव्यतेऽनेनेति आजीवः, जीव्यतेऽनयेति जीविका "जीवकः प्राणके पीतसारकृपणयोरपि । कूर्चशीर्षे च पुंसि स्यादाजीवे जीविका मता । त्रिषु सेविनि वृद्धयाशीर्जीविनोराहितुण्डिके" (इति मेदिनी) वृत्तिरस्त्यस्यामिति वार्ता "वार्ता तु वर्तने वार्तिङ्गणे कृष्याद्युदन्तयोः । निस्साराऽऽरोग्ययोः क्लीबे वृत्तिमन्नीरुजोस्त्रिषु" (इति मेदिनी) वर्ततेऽनयेति वृत्तिः "वृत्तिर्विवरणा जीवकैशिक्यादि प्रवर्तने (इति मेदिनी) वर्तन्ते जीवन्त्यनेनेति वर्तनं "वर्तनो वामने क्लीबं वृत्तौ स्त्री पेषणाध्वनोः । न पुंसि तूलनालायां तर्कुपिण्डे च जीवने । वर्तिष्णौ त्रिषु" (इति मेदिनी) जीवन्त्यनेनेति जीवनमिति षट् जीवनोपायस्य ॥ १ ॥

---

१ "भूमि स्पृक् पुंसि मानववैश्ययोः" (इति मेदिनी) ॥

वैश्यों की स. न. न.
जीविका (स्त्रियां) कृषिः पाशुपाल्यं वाणिज्यं (चेति वृत्तयः)
नौकरी खेती स. स. न. स. पु., न. न.
सीला बिनना सेवा श्ववृत्तिरनृतं कृषिरुञ्छशिलं (त्वृ) तम् ॥ २ ॥

स्त्रियामिति—कर्षणं कृषिः स्त्रियां स्यात्। पशून्पालयतीति पशुपालस्तस्य कर्म भावो वा पाशुपाल्यम्, वणिजां कर्म भावो वा वाणिज्यम् " वणिज्या च " " सत्यानृतं तु वाणिज्यं वणिज्या " (इति हैमनाममाला) इति वृत्तयो जीवनोपायाः स्युरिति प्रत्येकं जीवनोपायस्यैकैकम् । सेवनं सेवा, शुनो वृत्तिरिव, शुन इव वृत्तिर्वेति श्ववृत्तिरिति द्वे परचित्तानुवर्तनस्य । न ऋतमनृतम् " अनृतं कृषावसत्ये च " (इति रुद्रः) स्वामिमते तु "प्रमृतमिति पाठ. सभ्यः, प्रमृतं कर्षणं स्मृतमिति" (मनुः) कर्षणं कृषिरिति द्वे कर्षणस्य । उञ्छनमुञ्छः, शिलनं शिलं तयोः समाहारद्वन्द्वः " उञ्छः कणश आदाने कणिशाद्यर्जनं शिलम् "(इति यादवः) ऋच्छति, अर्यते वा ऋतम् " पुमानुञ्छः शिलमृतमिति " (वोपालितः) इति त्रीणि शिलोञ्छस्य ॥ २ ॥

मागने व न. न.
बिना मागने (द्वे याचितायाचितयोर्यथासंख्यं) मृतामृते ।
पे मिले न. पु. न. न.
बनियई सत्यानृतं वणिग्भावः (स्याद्) ऋणं पर्युदञ्चनम् ॥ ३ ॥
उधार लेना पु. पु. न. स.
ब्याज उद्धारोऽर्थप्रयोग (स्तु) कुसीदं वृद्धिजीविका ।
मागनेसे मिला न. न.
वादे से मिला (याच्ञयाप्तं) याचितकं (निमयादा)पमित्यकम् ॥ ४ ॥

द्वे इति—मृतं चामृतं च मृतामृते द्वे याचितायाचितयोर्यथासंख्यं स्यातामित्येकैकं प्रार्थनाऽप्रार्थनक्रियोस्तत्कर्मणोर्वा । सत्यसहितमनृतं शाकपार्थिवादित्वात् सत्यानृतम् वणिजोभावो वणिग्भावः स्यादिति द्वे वाणिज्यस्य । अर्यते स्म ऋणम्, परित उदच्यत इति पर्युदञ्चनम्, उद्ध्रियते उद्धारः " उद्धारस्त्वोद्धृतावृणे " (इति मेदिनी) इति त्रीणि ऋणस्य " कर्ज " इति ख्यातस्य । अर्थस्य प्रयोगः अर्थप्रयोगः कुस्य इति कुसीदम् " कुसीदं वृद्धिजीवने " (इति हैम.) वृद्ध्या जीविका वृद्धिजीविका इति त्रीणि कुसीदस्य " ब्याज " इति ख्यातस्य । याच्ञयाप्तं याच्ञाप्राप्तं याचितं निर्वृत्तं याचितकं स्यादित्येकं याचितस्य । निमयात्परिवर्तनादापं तत अपमित्य ... गेन आनमापमित्यकं स्यादित्येकं परिवर्तनाप्तस्य ॥ ३ ॥ ४ ॥

[illegible]

पु. पु.

महाजन,कर्जी **उत्तमर्णाधमर्णौ(द्वौप्रयोक्तृग्राहकौ क्रमात्)।**

पु. पु. पु पु.

ब्याजखोर **कुसीदिको वार्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥**

उत्तेति–प्रयोक्ता च ग्राहकश्च प्रयोक्तृग्राहकौ द्वौ क्रमात् उत्तमर्णश्च अधमर्णश्च उत्तमर्णाधमर्णौ स्याताम् उत्तममृणमस्येति उत्तमर्णः स्यादित्येकमृणव्यवहारे धनस्वामिनः । अधममृणमस्येति अधमर्णः स्यादित्येकमृणव्यवहारे ग्राहकस्य । कुसीदार्थं प्रयच्छति कुसीदिकः, वृद्धिंगर्ह्यां प्रयच्छतीति वार्धुषिकः वृद्धिराजीवो जीविकास्येति वृद्ध्याजीवः, पृषोदरादित्वात्कलोपे वार्द्धुषिरिति चत्वारि वृद्ध्याजीवस्य "ब्याजखोर" इति ख्यातस्य ॥ ५ ॥

पु. पु. पु. पु.

किसान **क्षेत्राजीवः कर्षकश्च कृषक(श्च) कृषीवलः।**

सामान्य धान्य पु स.न. पु.स.न

धान का खेत **(क्षेत्रं) व्रैहेयशालेयं (व्रीहिशाल्युद्भवोचितम्) ॥ ६ ॥**

क्षेत्रेति–क्षेत्रमाजीवोऽस्येति क्षेत्राजीवः, कर्षतीति कर्षकः क्वुनि कृषकः वृद्धिपक्षे कार्षकोपि, कर्षणं कृषि. सास्त्यस्येति कृषीवल इति चत्वारि कर्षकस्य " किसान " इति ख्यातस्य । व्रीहिशाल्युद्भवोचितं क्षेत्रं व्रैहेयशालेयं स्यात् व्रीहीणां भवनं क्षेत्रं व्रैहेयमित्येकं धान्यसामान्योद्भवोचितक्षेत्रस्य । शालीनां च भवनं क्षेत्रं शालेयं स्यादित्येकं कलमाद्युत्पत्तियोग्यक्षेत्रस्य ॥ ६ ॥

जव,सीकुररहित पु.स न पु.स.न पु.स.न

जव चौरसाठी **यव्यं यवक्यं षष्टिक्यं (यवादिभवनं हि यत्)।**

का तिल, उड़द, पु स.न. पु.स.न.

अलसी, अणुवा,

भागका **तिल्यतैलीन (वन्माषोमाणुभङ्गाद् द्विरूपता) ॥ ७ ॥**

येति–यवादिभवनं यत् क्षेत्रं तत् यव्यं, यवक्यं, षष्टिक्यं च स्यात् यवानां भवनं क्षेत्रं यव्यं स्यादित्येकं यवोद्भवोचितक्षेत्रस्य । शूकशून्या यवा यवकास्तेषां भवनं क्षेत्रं यवक्यं स्यादित्येकं शूकशून्ययवोद्भवोचितस्य । षष्टिकानां भवनं क्षेत्रं षष्टिक्यं स्यादित्येकं षष्टिकोद्भवोचितस्य । माषोमाणुभङ्गात् तिल्यतैलीनवद् द्विरूपता स्यात् तिलानां भवनं क्षेत्रं तिल्यम्, तैलीनं च स्यादिति द्वे तिलोद्भवोचितस्य । माषाणां भवनं क्षेत्रं माष्यम्, माषीणं च स्यादिति द्वे माषोद्भवोचितस्य । उमानां भवनं क्षेत्रम् उम्यम्, औमीनं च स्यादिति द्वे उमोद्भवोचितस्य । अणूनां भवनं क्षेत्रम् अणव्यम्, आणवीनं च स्यादिति द्वे अणूद्भवोचितस्य । भङ्गाया भवनं क्षेत्रं भङ्ग्यम्, भाङ्गीनं च स्यादिति द्वे भङ्गोद्भवोचितक्षेत्रस्य ॥ ७ ॥

न. न. न. न. न. न.

हँसिया, जोत, — दात्रं लवित्रमाबन्धो योत्रं योक्त्र (मथो) फलम्।

न. न. पु. पु. न. न.

फार, हर, — निरीशं कुटकं फालः कृषिको लाङ्गलं हलम् ॥ १३ ॥

न. पु. स. पु.

सैला — गोदारणं (च) सीरो (ऽथ) सम्या (स्त्री) युगकीलकः।

देति—दात्यनेनेति दात्रम्, लूयतेऽनेनेति लवित्रमिति द्वे दात्रस्य "हँसिया" इति ख्यातस्य। आबध्यतेऽनेनेति आबन्धः, यूयतेऽनेनेति योत्रम्, युज्यतेऽनेनेति योक्त्रमिति त्रीणि वृषादेर्गले युगबन्धनस्य। अथविति—फलतीति फलम् "फलं हेतुफले जातीफले फलकसस्ययोः। त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः। फली फलिन्याम्" (इति हैमः) ईशाया निर्गतं निरीशम् स्वामिमते तु निष्क्रान्ता ईषास्मादिति निरीषं मूर्धन्यान्तमपि, कुटतीति कुटकम् कूटयति छिनत्तीति विग्रहे तु कूटं तदेव कूटकमिति दीर्घाद्यमपि, फालयतीति फालः, कृषतीति कृषिकः "कृषिकः कृषिकौ फालकृषकाविति रुद्रात्स्त्रियामपि" क्वुनि तु कृषकः "कृषकः पुंसि फाले स्यात्कर्षके त्वभिधेयवत्" (इति विश्वः) इति पश्चापि फालस्य आद्यत्रयं यत्र काष्ठे फालो निबध्यते तस्य अन्त्यद्वयं तु फालस्येति स्वामी। लङ्गतीति लाङ्गलम् "लाङ्गली तोयपिप्पल्यां क्लीबन्तु कुसुमान्तरे। गोदारणे तृणराजगृहदारुविशेषयोः" (इति मेदिनी) हलतीति हलम् ज्वलादित्वात् णप्रत्यये तु हालोऽपि "हालः फालवहः सीता" (इति विक्रमादित्यः) गां भूमिं दारयति, गौर्भूमिर्दार्यतेऽनेनेति वा गोदारणम्, सिनोति, सीयते वा सीरः "सीरःस्यादंशुमालिनि। लाङ्गले" (इति हैमः) इति चत्वारि हलस्य। अथेति—शम्यते वृषादिरनयेति शम्या स्त्री स्यात्, युगस्य कीलो युगकीलः स एव युगकीलकः इति द्वे शम्यायाः "सैला" इति ख्यातायाः ॥ १३ । ६ ॥

स. पु. स. स.

हरस, कूंड़ — ईशा लाङ्गलदण्डः (स्यात्) सीता लाङ्गलपद्धतिः ॥ १४ ॥

मेढी — (पुंसि) मेधिः (खले दारु न्यस्तं यत्पशुबन्धने)।

पु. पु. पु.

[illegible] — आशुर्व्रीहिः पाटलः (स्यात्) सितशूकयवौ (समौ) ॥ १५ ॥

ईषेति—ईष्टे, ईष्यतेऽनयेति वा ईषा "ईषः स्वामिनि रुद्रे च स्यादीषा हलदण्डके" (इति शान्ते विश्वः) ईषते, ईष्यतेऽनयेति वा ईषा "ईषा पेषी च मञ्जूषा" (इति मूर्धन्यान्ते चन्द्रगोमी) लाङ्गलस्य दण्डो लाङ्गलदण्डः स्यादिति द्वे हलयुगयोर्मध्यस्थस्य "हरस" इति ख्यातस्य। सीतेति सुवद्, सीयते वा सीता "सीता लाङ्गल[illegible] [illegible] च जानकी" ([illegible]) [illegible], इति [illegible]

शीतापि "शीता नभःसरिति लाङ्गलपद्धतौ च शीता दशाननरिपोः सह धर्मिणी च। शीतं स्मृतं हिमगुणे च तदन्विते च शीतोऽलसे च बहुवारतरौ च दृष्टः" (इति तालव्यादौ धरणिः) लाङ्गलस्य पद्धतिर्लाङ्गलपद्धतिरिति द्वे लाङ्गलकृतरेखायाः "कूंड़" इति ख्यातायाः। खले पशुबन्धने यत् दारु काष्ठं न्यस्तं स्थापितं तत् मेध्यन्ते, मेथ्यन्ते च पशवोऽत्रेति मेधिः मेथिश्च पुंसि स्यादित्येकं मेधेः "मेढ़ी" इति ख्यातस्य। अश्नुत इति आशुः "आशुस्तु व्रीहिशीघ्रयोः" (इति हेमचन्द्रः)। "आशु स्याद्व्रीहिशीघ्रयोः" इति रत्नमालाप्रामाण्याच्च क्लीबमपि, व्रीयते, बर्हत्युपचयं गच्छति वा पृषोदरादित्वात् व्रीहिः, पाटं लाति, पाटलो वर्णोऽस्त्यस्येति वा पाटलः "आशु व्रीहौ पाटलो ना श्वेतरक्तेन्यलिङ्गवान्" (इति रुद्रः) इति त्रीणि षष्टिकादेः। सितं शूकं यस्येति सितशूकः, स्वामिमते तु शितशूको द्वितालव्योऽपि, यौति, यूयते वा यवः "यवो धान्येऽपृथक्कृतौ" (इति हैमः) उभौ समौ समानार्थौ समानलिङ्गाविति द्वे यवस्य ॥ १४ । १५ ॥

हरा जव पु. पु. पु.
मटर या मटरा **तोक्मस्तु (तत्र हरिते) कलायः (स्तु) सतीनकः।**

पु. पु. पु. पु.
कोदव **हरेणुखण्डिकौ (चास्मिन्)कोरदूष (स्तु) कोद्रवः ॥१६॥**

तविति—तत्र तस्मिन् हरिते यवे तकति, तुक्यते वा तोक्मः स्यात्, "तोक्मं कर्णमले पुंसि हरिते च हरिद्यवे" (इति मेदिनी) इत्येकमपकयवस्य। कलमयते कलायः, सति जीवे इनः प्रभुः सतीनो वायुस्तं करोतीति सतीनकः, प्रज्ञाद्यणि तु सातीनकोपि, अस्मिन्सतीनकेऽपि हरतीति हरेणुः "हरेणुः स्त्री रेणुकायां स तु पुंसि सतीनके" (इति रभसात्पुंस्ययम्) खण्डोऽस्त्यस्येति खण्डिकः तौ स्तः "कलायस्त्रिकटः प्रोक्तः सतीनो वर्तुलो मतः। हरेणुरङ्कटो ज्ञेयः" (इति व्याडिः) इति चत्वारि कलायस्य। कोरं रुधिरं दूषयतीति कोरदूषः, कौति, कवते वेति कौः, द्रवतीति द्रवः कौश्चासौ द्रवश्च, केन वायुना द्रवति वा पृषोदरादित्वात् कोद्रवः इति द्वे कोद्रवस्य ॥ १६ ॥

पु. पु. पु. पु.
मसूर मोठ **मङ्गल्यको मसूरो (ऽथ) मकुष्टकमयुष्टकौ।**
या वनमूग पु. पु. पु. पु.
सरसों **वनमुद्गे सर्षपे (तु द्वौ) तन्तुभकदम्बकौ ॥ १७ ॥**

मेति—मङ्गले साधुर्मङ्गल्यः स एव मङ्गल्यकः, मस्यति, मस्यते वा मसूरः, दीर्घमध्यः मसुरश्च ह्रस्वमध्योऽपि ज्ञेयः "वेश्यायां व्रीहिभेदे च मसूरा मसुरा स्त्रियाम्। मसूरमसुरौ

१ "मकुष्टो वर्तुलः प्रोक्तः सतीलश्च हरेणुकः। त्रिपुटः खण्डिकोऽपि स्यादिति" (भावप्रकाशः) ॥

पुंसि द्वावेतावपि चैतयोः " (इति रभसः) इति द्वे मसूरस्य । अथेति—मङ्कति, मङ्कयते वा मकुः, तिष्ठतीति स्थकः मकुश्चासौ स्थकश्चेति मकुष्ठकः, मकुश्चासौ स्थश्चेति विग्रहे तु मकुष्ठोऽपि पृषोदरादित्वात् मुकुष्ठश्च " मकुष्ठो व्रीहिभेदे स्यान्मकुष्ठो मन्थरेऽन्यवत् " (इति टवर्गद्वितीयान्ते विश्वमेदिन्यौ) मिनोतीति मयुः, तिष्ठतीति स्थकः मयुश्चासौ स्थकश्चेति मयुष्ठकः, उभौ वनमुद्गे स्याताम् वनस्य मुद्गो वनमुद्गः इति त्रीणि वनमुद्गस्य " मोठ " इति ख्यातस्य । सरति स्नेहोऽस्मादिति सर्षपः " सर्षपः स्यात्सरिषपः कटुस्नेहश्च तन्तुसः " (इति त्रिकाण्डशेषः) तत्र तन्तुना भातीति तन्तुभः स्वामिमते तु बाहुलकादुभचिप्रत्यये पृषोदरादित्वात् तुन्तुभोऽपि, कन्दति, कन्दयति वा कदम्बः स एव कदम्बकः उभौ द्वौ स्यातामिति त्रीणि सर्षपस्य ॥ १७ ॥

पु. पु. पु.

सफ़ेद सरसों, गेहूं — **सिद्धार्थ (स्त्वेष धवलो) गोधूमः सुमनः (समौ) ।**

पु. पु. पु. पु.

कुलथी, चना — **(स्या) द्यावक (स्तु) कुल्मास[1]श्चणको हरिमन्थकः[2] ॥ १८ ॥**

सीति—एषः सर्षपो धवलः श्वेतवर्णश्चेत्तदा सिद्धोऽर्थोऽस्मादिति सिद्धार्थः स्यात् । " सरिषपः सिते तस्मिन् रक्षोघ्नो भूतनाशनः " (इति रभसः) " सिद्धार्थस्तु पुंमाञ्शाक्यसिंहे च सितसर्षपे " (इति मेदिनी) इत्येके सितसर्षपस्य । गुध्यति, गुध्यते वा गोधूमः " गोधूमो नागरङ्गे स्यादोषधिव्रीहिभेदयोः " (इति मेदिनी) सुष्ठु मन्यते इति सुमनः " गोधूमसुमनौ समौ " (इति रभसः) उभौ समौ समानार्थौ समानलिङ्गाविति द्वे गोधूमस्य । यौतीति यवकः स एव यावकः स्यात्, कुलमस्यतीति कुल्मासः दन्त्यान्तः, कुत्सितो माष इति विग्रहे तु पृषोदरादित्वात् " कुल्माषः " मूर्धन्यान्तोपि " कुल्माषो यावकः पुंसि " (इति रभसः) इति द्वे कुल्माषस्य "अर्धस्विन्नयवादिरिति ख्यातस्य" । चयत इति चणकः, हरिभिर्वाजिभिर्मथ्यत इति हरिमन्थः स एव हरिमन्थकः इति द्वे चणकस्य " चना " इति ख्यातस्य ॥ १८ ॥

पु. पु.

बांझतिल, — **(द्वौ तिले) तिलपेज (श्च) तिलपिञ्जश्च (निष्फले) ।**

पु. पु. स. स. स.

राई — **क्षवः क्षुधाभिजननो राजिका कृष्णिकासुरी ॥ १९ ॥**

द्वाविति—निष्फले फलरहिते स्नेहविहीने तिले तिलपेजश्च तिलपिञ्जश्चेति द्वौ स्याताम्मिति [illegible] तिलपेजः, तिलपिञ्जश्च अतिलोऽपि " अतिलः कथ्यते राजि-[illegible] " इति द्वे निष्फलतिलस्य । क्षौतीति क्षवः, क्षुधामभिजनयतीति

---

१ [illegible] ॥

२ [illegible] " ([illegible]) ॥

क्षुताभिजननः, क्षुतमभिजनयतीति विग्रहे तु क्षुताभिजननोऽपि राजति, राजयति वा राजिका कृष्णो वर्णोऽस्त्यस्याः कृष्णा सैव कृष्णिका, अस्यतीति असुरस्तस्येयमासुरी इति पञ्च राजिकायाः " राई " इति ख्यातायाः ॥ १९ ॥

ककुनी, अलसी, भाग या पटुवा सामा, चीना, मेडुवा
स. स. स. स. स.
(स्त्रियौ) कङ्गुप्रियङ्गू (द्वे) अतसी (स्या) दुमा क्षुमा।
स. पु. पु.
मातुलानी (तु) भङ्गायां (व्रीहिभेद) स्त्वणुः (पुमान्) ॥२०॥

स्त्रीति—कमङ्गति, अङ्गयति, कं सुखं गच्छतीति वा कङ्गुः कङ्गूर्वा, प्रियं गच्छतीति प्रियङ्गुः प्रियङ्गूर्वा इति द्वे स्त्रियौ स्यातामिति द्वे प्रियङ्गोः "ककुनी" इति ख्यातायाः। अततीति अतसी स्यात्, उं शिवं माति, मिमीते वा अवति, ऊयते वा उमा "उमातसी हैमवतीहरिद्राकीर्तिकान्तिषु" (इति मेदिनी) क्षौति, क्षूयते वा क्षुमा "क्षुमातसी-नीलिकयोः" (इति विश्वः) इति त्रीणि क्षुमायाः "अलसी" इति ख्या-तायाः। भङ्गायान्तु मातुलानी स्यात् मायास्तुला मातुला तामानयति, मातुलस्य धत्तूरस्य स्त्रीव वेति मातुलानी, भज्यतेऽनयेति भङ्गा "तरङ्गभेदयोर्भङ्गो भङ्गाशस्य शणाह्वये" (इति रुद्रः) इति द्वे शणाख्यमस्यभेदस्य। व्रीहिभेदः व्रीहिविशेषस्तु अणतीति अणुः पुमान् स्यादित्येकमणोः "मेडुवा, चिनवावा" इति ख्यातस्य ॥२०॥

सीकुर या टूंड वाली सामान्य धान्य गुच्छा
पु. पु.न. पु.न. स.
किंशारुः शस्यशूकं (स्यात्) कणिशं शस्यमञ्जरी।
न. पु. पु. पु. पु.
धान्यं व्रीहिः स्तम्बकरिः स्तम्बो गुच्छ (स्तृणादिनः) ॥२१॥

किमिति—किञ्चित् कुत्सितं वा शृणातीति किंशारुः, "अथ किंशारुर्धान्यशूके शरेऽपि च" (इति हैमः) शस्यस्य शूकं शस्यशूकम् स्यात् "मुकुटमते तु शस्यशूको-ऽपि" इति द्वे यवाद्यग्रस्य। कणाय: कणाः सन्त्यस्य, कणिनं स्वावयवं श्यतीति वा कणिशम्, "कणिशो धान्यशीर्षके" (इति तालव्यान्ते रत्नकोषः) शस्यस्य मञ्जरी शस्यमञ्जरी इति द्वे शस्यमञ्जर्याः (वाली) इति ख्यातायाः। धाने पोषणे साधुर्धान्यम् "धान्यं तु व्रीहौ धान्याके" (इति हैमः) व्रीणाति, व्रीयते वा व्रीहिः "व्रीहिः सामान्यधान्ये स्यादाशुधान्ये च पुंस्ययम्" (इति विश्वः) स्तम्बं करो-तीति 'स्तम्बकरिः' व्रीहिसाहचर्यात्पुंस्त्वमिति त्रीणि धान्यसामान्यस्य। तृणा-दिनो गुच्छः स्तम्बः स्यात्—तिष्ठत्यत्रेति स्तम्बः, गवनं गुत् तां छयतीति गुच्छः, गुतं स्यतीति विग्रहे तु गुत्सोऽपि, आदिना व्रीहियवादिग्रहः इति द्वे यवादीनां मूलस्य ॥ २१ ॥

१ धान्यपदेन सप्तदश धान्यान्युच्यन्ते । "व्रीहि, यव, मसूर, गोधूम, मुद्ग, माष, तिल, चणक, अणु, प्रियङ्गु, कोद्रव, मकुष्टक, कलाय, कुलत्थ, षष्टिक, सर्षप, अतसीति सप्तदश" महाभाष्ये "विभाषा तिलमाषोमाभङ्गाणुभ्यः" इति सूत्रे तु "शणसप्तदशानि धान्यानीत्युक्तम्" ॥

स. न. पु. पु.न.

नरई पयार **नाडी नालं (च) काण्डो (ऽस्य) पलालो (ऽस्त्री सनिष्फलः)।**

पु. न. पु.

भूसाभूसी **कडङ्गरो बुसं (क्लीबे) (धान्यत्वचि) तुषः (पुमान्) ॥२२॥**

नेति—अस्य गुच्छस्य काण्डः नाडी, नालं च स्यात् नालयति, डलयोरेकत्वाद् गौरादित्वाच्च नाडी, "नाडी कुहनचर्यायां घटिकागण्डदूर्वयोः । नाले गुणान्तरे स्नायौ" (इति हैमः) नलतीति नालम् "नालं काण्डे मृणाले च नालीशाककलम्बके" (इति हैमः) कणति, काणयते वा काण्डः "काण्डो नालेऽधमे वर्गे द्रुस्कन्धेऽवसरे शरे । सहस्तलाघाम्बुषु स्तम्बे" (इति हैम.) इति त्रीणि नालस्य "नरई" इति ख्याताया: । स काण्डः निष्फलश्चेत्तदा पलति, पल्यते, पलमलति वा पलालः अस्त्री पुंनपुंसकं स्यादित्येकं पलालस्य "पयार" इति ख्यातस्य। गृणाति गिरति वा गरः कडस्य गरः, कडतीति कड् अङ्गतीति अङ्गम् कड् च तदङ्गं च कडङ्गं रातीति वा कडङ्गरः, बुसतीति बुसं दन्त्यान्तम् "बुषवेपतुषारतोषाः" इति षभेदान्मूर्धन्यान्तमपि क्लीबे नपुंसके स्यादिति द्वे बुसस्य "भूसा" इति ख्यातस्य। धान्यत्वचि तुषः पुमान्स्यात् धान्यस्य त्वक् धान्यत्वक् ,तुष्यतीति तुषः "तुषस्तु धान्यत्वचि विभीतके" (इति हेमचन्द्रः) इति द्वे धान्यत्वचायाः "भूसी" इति ख्याताया: ॥ २२ ॥

पु.न. स. स.

सीकुर छीमी **शूको (ऽस्त्रीश्लक्ष्णतीक्ष्णाग्रे) शमी सिम्बा (त्रिषूत्तरे)।**

पु.स.न. पु.स.न. पु.स.न.

ढेर बसाया **ऋद्धमावासितं (धान्यं) पूतं (तु) बहुलीकृतम् ॥ २३ ॥**

श्विति—श्लक्ष्णतीक्ष्णाग्रे शूकः अस्त्री पुंनपुंसकं स्यात् श्यतीति शूकः "शूकोऽनुक्रोशशुङ्गयोः" (इति विश्वः) श्लक्ष्णं कृशं च तत्तीक्ष्णं च तदग्रं चेति श्लक्ष्णतीक्ष्णाग्रमिति द्वे शूकस्य । शाम्यतीति गौरादित्वात् 'शमी' सक्तुफलायां च शिम्बिकायां च वल्गुली (इति मेदिनी) समतीति सिम्बा शिनोतीति विग्रहे तु शिम्बा शिम्बिः, शिम्बिरपि इति द्वे शिम्बाया: "छीमी" इति ख्याताया: । उत्तरे बहुलीकृतान्ताः शब्दास्त्रिषु त्रिलिङ्गया भवन्तीति । आवासितं धान्यं ऋद्धं स्यात् । ऋध्यते स्म ऋद्धम् "ऋद्धं सम्पन्नधान्ये च सुसमृद्धे तु वाच्यवत्" (इति विश्वः) राध्यते स्म विग्रहे तु पृषोदरादित्वादिद्धे रिद्धमपि, आवस्यते स्म, अवसानं, स्वार्थमाच्छादि वा आवासितम् अवसीयते स्म अवसानं प्राप्तं सम्पन्नं वा अवसितमपि "अवसितम्

* [illegible] ॥

ज्ञातेऽपि । अवसानगते च वाच्यलिङ्गं स्यात् " (इति विश्वमेदिन्यौ) इति द्वे मर्दनानन्तरमपनीततृणस्य बहुलीकरणायोग्यस्य धान्यराशेः। पूयते स्म पूतम् ,बहुमानं लातीति बहुलम् अबहुलम् बहुलमकारीति बहुलीकृतमिति द्वे राशीकृतधान्यस्य ॥ २३ ॥

न. न.
शमीधान्य शूकधान्य पु. **(माषादयः) शमीधान्ये शूकधान्ये (यवादयः) ।**

शालिधान्य **शालयः (कलमाद्याश्च षष्टिकाद्याश्च) पुंस्यमी ॥ २४॥**

मेति—" माषो मुद्गो राजमाषः कुलत्थश्चणकस्तिलः । काकाण्डश्चीवर इति शमीधान्यगणः स्मृतः " (इति रत्नकोषः) माषः आदिर्येषामिति माषादयः शमीप्रभवं धान्यं शमीधान्यं तस्मिन् भवन्तीत्येकं शमीधान्यस्य । यवः आदिर्येषामिति यवादयः शूकयुक्तं धान्यं शूकधान्यं तस्मिन्भवन्तीत्येकं शूकधान्यस्य । कल्यतेऽनेनेति कलमः "कलमः शालिचौरयोः " (इति हैमः) स आद्यो येषामिति कलमाद्याः, षष्टिरात्रेण पच्यन्ते षष्टिकास्तदाद्याश्च शाड्यन्ते, शाल्यन्ते वा शालयः स्युः "शालिस्तु गन्धोलौ कलमादिषु " (इति हैमः) इत्येकं शालिधान्यस्य अमी माषाद्याः पुंसि भवन्तीति॥२४॥

न. पु. स. स.
तिन्नी, पसाही या मुनियों का अन्न, गोहुवां **तृणधान्यानि नीवाराः (स्त्री) गवेधुर्गवेधुका ।**

त्रिति—तृणानीव धान्यानि अकृष्टोत्पन्नत्वादिति तृणधान्यानि निव्रियन्त इति नीवाराः " स्यान्नीवारो वणिजके वास्तव्येऽपि च दृश्यते " (इति विश्वः) बहुवचनेन श्यामाकादिग्रहः इति द्वे तृणधान्यस्य " तिन्नी—पसाही " इति ख्यातस्य उक्तं हि " शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् । शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम् । शालयो रक्तशाल्याद्याः व्रीहयः षष्टिकादयः । यवादिकं शूकधान्यं मुद्गाद्यं शिम्बिधान्यकम् । कङ्ग्वादिकं क्षुद्रधान्यं तृणधान्यं च तत्स्मृतम् " (इति भावप्रकाशः) गवा जलेन तत्र वा एधते गवेधुः स्त्री स्यात् ।सैव गवेधुका, गवे गवार्थं दीयते रक्ष्यतेऽसाविति नैरुक्तत्वाद्धस्य ढत्वे गवेडुरपि इति द्वे गवेधुकायाः " गोहुवां " इति ख्यातस्य ॥ [१] ॥

पु.न. पु.न. न. न.
मूसर उखली **अयोग्रो मुसलो (स्त्री) स्यादुदूखलमुलूखलम् ॥२५॥**

न. पु.न. स न. पु.न.
सूप चलनी **प्रस्फोटनं शूर्पं (मस्त्री) चालनी तितउः (पुमान्) ।**

---

१ "यवनालो यवनालशिखरी वृत्ततन्दुलः । दीर्घनालो दीर्घशिरः क्षेत्रेक्षुक्षेक्षुपत्रकः " इति सामान्ययवनालस्य । धवलो यावनालस्तु पाण्डुरस्तारतन्दुलः । नक्षत्राकृतिविस्तारो वृत्तो मौक्तिकतन्दुलः । अल्पो देवधान्यं जूर्णलो बीजपुष्पकः । जूर्नल पुष्पगन्धश्च सुगन्धः समुन्दकः (इति भावप्रकाशः)

२ "तितउ पुंसि शंभ्रे च पृथगुच्चारणे द्वयोः सामर्थ्याद्गुणो न " इति मुग्धभाष्य ॥

अयविति—अयोऽग्रेऽस्येति अयोग्रः, मुस्यत्यनेनेति मुसलः अस्त्री पुंनपुंसकं स्यादिति द्वे मुसलस्य । ऊर्ध्वं च तत्खं च, ऊर्ध्वखं लातीति पृषोदरादित्वात् उदूखलम्, उलूखलमपि "उदूखलं गुग्गुलौ स्यादुलूखलेऽपि न द्वयोः" (इति मेदिनी) इति द्वे उलूखलस्य । प्रस्फोट्यतेऽनेनेति प्रस्फोटनम्, शूर्पयति, शूर्प्यतेऽनेनेति वा शूर्पम् अस्त्री पुंनपुंसकं स्यात् "सूर्पं च" इति पाठाद्दन्त्यादिरपीति द्वे सूर्पस्य । चाल्यतेऽनयेति चालनी "क्षुद्रच्छिद्रशतोपेतं चालनं तितउः स्मृतः" (इति कात्यः) तनोति, तन्यतेऽनेनेति वा "तितउः" पुमान्स्यात् "चालनं तितउ प्रोक्तम्" (इति क्लीबकाण्डे रत्नकोषः) "न स्त्री तितउ चालनी" (इति त्रिकाण्डशेषः) इति द्वे चालन्याः "चलनी" इति ख्यातायाः ॥ २५ । १ ॥

पु. पु. पु. पु. पु. पु.
थैली या बोरा **स्यूतप्रसेवौ कण्डोलपिटौ कटकिलिञ्जकौ ॥ २६ ॥**
टेलवा या दौरा न. न.
चटाई, झापी **(समानौ) रसवत्यां (तु)पाकस्थानमहानसे ।**
रसोई का घर पु. पु. पु.
रसोई का स्वामी **पौरोगव (स्तदध्यक्षः) सूपकारास्तु बल्लवाः ॥ २७ ॥**
पु. पु. पु. पु. पु.
रसोईदार **आरालिका आन्धसिकाः सूदा औदनिका गुणाः[२] ।**

स्यूतेति—सीव्यते स्म स्यूतः औणादिके नप्रत्यये तु स्योनोऽपि, "स्योनस्यूतप्रसेवकाः" (इति रभसः) प्रसीव्यत इति प्रसेवः "प्रसेवस्तु वीणाङ्गस्यूतयोर्द्वतौ" (इति हेमचन्द्रः) इति द्वे वस्त्रशणादिनिर्मितस्य "थैला" इति ख्यातस्य । कण्ड्यत इति कण्डोलः, पिटतीति पिटः कुनि तु पिटकोऽपि पिण्डयते इति विग्रहे तु पिण्डोऽपि स्यादिति द्वे वंशादिनिर्मितभाण्डस्य । कटतीति कटः "कटः श्रोणौ द्वयोः पुंसि किलिञ्जेऽतिशये शवे । समये गजगण्डेऽपि पिप्पल्यान्तु कटी मता" (इति मेदिनी) किल्यतेऽनेनेति किलिर्वंत्रवीरणादिस्तस्माज्जातः पृषोदरादित्वात् किलिञ्जः स एव किलिञ्जकः उभौ समानौ समानार्थौ समानलिङ्गाविति द्वे कटस्य "चटाई" इति ख्यातायाः । रसाः सन्त्यस्यामिति रसवती तस्यान्तु पाकस्थानमहानसे स्याताम् पाकस्य स्थानम् पाकस्थानम् , महच्च तदनश्चेति महानसमिति त्रीणि रसवत्याः "रसोई" इति ख्यातायाः । पुरः पूजिता गौर्भूमिः पुरोगवी तस्या अयम्, पुरः प्रथमं गान्यस्मिन्तु गौर्निगमस्येति वा पुरोगुः स एव पौरोगवः, तस्य अध्यक्षस्तदध्यक्षः इति द्वे महानसाधिकृतस्य । सवति रसमिति सूपस्तं करोतीति सूपकारः बहुत्वे सूपकाराः, बलं बलः सोऽस्त्यस्य, बलं वातीति वा बल्लवः बहुत्वे बल्लवाः, "बल्ल-

१ अत्र, [illegible] ॥ २ "[illegible] मुख्ये [illegible] । [illegible] ॥" (इति मेदिनी) ॥

सूपकारे स्याद्भीमसेने च गोदुहि" (इति विश्वः) अरालं कुटिलं चरन्तीति आरालिकाः, अन्धोभक्तं शिल्पं येषामिति आन्धसिकाः, सूदन्ति छागादीनिति सूदाः "सूदस्तु कथितः सूपकारे च व्यञ्जनान्तरे" (इति विश्वः) ओदनं शिल्पं येषामिति औदनिकाः, गुणयन्त इति गुणा इति सप्त सूपकारस्य ॥ २६ । २७ । १/२ ॥

पु. पु. पु.

पूआ आदि बनानेवाले **आपूपिकः कान्दविको भक्षकार (इमे त्रिषु) ॥ २८ ॥**

न. न. स. स. स.

चूल्ही या चूल्हा **अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका।**

आपेति—अपूपाः पण्यमस्येति आपूपिकः, कन्दौ संस्कृतं कान्दवम्, कान्दवं पण्यमस्येति कान्दविकः, भक्षं करोतीति भक्षकारः इमे पौरोगवादयः त्रिषु त्रिलिङ्ग्यां भवन्तीति त्रीणि पूपादिकारस्य। अश्मनोऽप्यन्तोऽत्रेति शकन्ध्वादित्वाद् अश्मन्तम् "अश्वन्त" इति पाठे तु असूनामन्तोऽत्रेति अश्वन्तोपि, उद्धीयतेऽत्रेति उद्धानम् "उद्धानमुद्धृते वाच्यलिङ्गं चुल्ल्यां नपुंसकम्" (इति विश्वः) "उद्ध्मानमिति पाठे तु उद्ध्मायतेऽत्रेति उद्ध्मानमपि, अधिश्रीयतेऽत्रेति अधिश्रयणी, चुल्ल्यतेऽत्र, चुद्यतेऽत्राग्निरिति वा चुल्लिः ङीषि चुल्ली वा आन्त्यतेऽत्रेति अन्तिका "अन्तिकं निकटे वाच्यलिङ्गं स्त्री शीतलौषधौ। चुल्ल्यां ज्येष्ठभगिन्यां च नाट्योक्तौ कीर्त्यतेऽन्तिका" (इति मेदिनी) इति पञ्च चुल्लिकायाः ॥ २८ । १/२ ॥

स. स. स.

अगेठी, अंगार, **अङ्गारधानिकाङ्गारशकट्य (पि) हसन्त्य (पि) ॥ २९ ॥**

स. पु.न. न. न.

लुकाठ, खपरी, **हस (न्यप्यथ न स्त्री स्या) दङ्गारो लातमुल्मुकम्।**

न. पु. पु.स.

भार या भट्ठी **(क्लीबे)ऽम्बरीषं भ्राष्ट्रो (ना) कन्दुर्वा स्वेदनी (स्त्रियाम्) ३०**

अङ्गेति—अङ्गारा धीयन्तेऽस्यामिति अङ्गारधानी सैव अङ्गारधानिका, अङ्गाराणां शकटी अङ्गारशकटी, हसतीति हसन्ती "हसन्त्यङ्गारधान्यां च मल्लिकाशाकिनीभिदोः" (इति विश्वः) हराति, हस्यते वा हसनी अपीति चत्वारि हसन्याः "बरोसी" इति ख्यातायाः। अथेति—अङ्गति, अङ्गमियर्ति वा अङ्गारः स्त्री न स्यात् "अङ्गारमुल्मुके न स्त्री पुंलिङ्गस्तु महीसुते" (इति मेदिनी) इत्येकमङ्गारस्य

---

१ स च साग्निर्निरग्निश्च तत्र साग्नौ यथा—"अङ्गारचुम्बितमिव व्यथमानमास्ते" इति। निरग्नौ यथा "न सङ्गारतुल्यो भवति मलिनाङ्गारतुलनाम्" इत्यादि प्रयोगः संगच्छते ॥

२ "हसन्तीं च हमन्तीं च हसन्तीं वामलोचनाम्। हेमन्ते ये न सेवन्ते ते नराः ॥"

“ अँगार” इति ख्यातस्य । लानं लातं, न लातमस्येति अलातम्, ओपतीति उल्मुकमिति द्वे अर्धदग्धकाष्ठस्य त्रयोऽपि पर्याया इत्यन्ये। अम्ब्यतऽत्रेति अम्बरीषं क्लीबे स्यात् “ अम्बरीषं रणे भ्राष्ट्रे क्लीबं पुंसि नृपान्तरे । नरकस्य प्रभेदे च किशोरे भास्करेऽपि च । आम्रातकेऽनुतापे च ” (इति मेदिनी) भृज्ज्यतेऽत्रेति भ्राष्ट्रः ना पुमान् स्यादिति द्वे भर्जनपात्रस्य “ खपरी ” इति ख्यातायाः । स्कन्दतीति कन्दुः वा ना स्यात् पक्षे स्त्रीसाहचर्यात् स्विद्यतेऽस्यामिति स्वेदिनी वा स्त्रियां स्यात् पक्षे स्वेदनोऽपीति द्वे कन्दोः “ भट्ठी ” इति ख्यातायाः ॥ २९ । ३० ॥

पु. पु. स. स. स.

मेट्ठका, करवा, **अलिञ्जरः (स्या) न्मणिकः कर्कर्यालुर्गलन्तिका ।**

पु. स. स. न. पु.

बटलोही घडा **पिठरः स्थाल्युखा कुण्डं कलश (स्तु त्रिषु द्वयोः)** ॥३१॥

पु.स. पु.न. पु.न. पु न. पु.न.

सेरवा **घटः कुटनिपा (वस्त्री) शरावो वर्धमानकः ।**

अलतीति–अलति, अलनं वा अलिः सामर्थ्यं तज्जृणाति जरयति वा अलिञ्जरः मणतीति मणिः स एव मणिकः स्यादिति द्वे मणिकस्य “मेट्ठका” इति ख्यातस्य कर्कणं कर्कस्तं रातीति गौरादित्वात् कर्करी “ कर्करी भाण्डभेदे ना दर्पणे कठिं त्रिपु” (इति विश्व.) आलुनातीति आलूः, ह्रस्वपाठे तु आलातीति मितद्र्वादित्वा आलुरपि, “ आलुर्गलन्तिकायां स्त्री क्लीबं मूले च भेलके ” (इति मेदिनी) गलतीति गलन्ती सैव गलन्तिका इति त्रीणि कर्कर्याः “ करवती ” इति ख्यातायाः पेठतीति पिठस्तं रातीति पिठरः, तिष्ठत्योदनाद्यत्रेति, स्थलत्यत्रेति वा स्थाली “ स्थालं भाजनभेदेऽपि स्थाली स्यात्पाटलोखयोः ” (इति मेदिनी) ओखतीति उखा ओपतीति विग्रहे तु उषा मूर्धन्यान्तापि कुण्डयतीति कुण्डम् “कुण्डमग्न्यालये मानभेदे देवजलाशये । कुण्डी कमण्डलौ जारात्पतिवत्नीसुते पुमान् । पिठरे तु न ना ” (इति विश्वः) इति चत्वारि ओदनादिपचनपात्रस्य “ बटुलोही ” इति ख्यातायाः । कं शवतीति कलशः, केन जलेन लसतीति विग्रहे तु कलसो दन्त्यान्तोऽपि त्रिषु त्रिलिङ्ग्यां स्यात्, घटत इति घटः द्वयोः स्त्रीपुंसयोः स्यात्, स्त्रियां घटी “ घटः समाधिभेदेभ शिरःकूटकुटेषु च । घटा घटनगोष्ठीभघटनासु च योषिति ” (इति मेदिनी) कुटतीति कुटः, नियतं पिबत्यनेनेति निपः उभावप्यस्त्रियौ स्यातामिति पञ्चानि घटस्य “ घड़ा ” इति ख्यातस्य । शृणाति, शरणां वा शरस्तं तस्माद् अवतीति शरावः, सरति, सरणं वेति सरस्तं तस्माद्वा अवतीति विग्रहे तु सरावः दन्त्यादिरपि, वर्धत इति वर्धमानः स एव वर्धमानकः उभावप्यस्त्रियौ स्यातामिति द्वे शरावस्य “ सेरवा ” इति ख्यातस्य ॥ ३१ । ३२ ॥

न. न. पु. न.

तवा — ऋजीषं पिष्टपचनं कंसो (ऽस्त्री) पानभाजनम् ॥ ३२ ॥

आबखोरा — स.

कुप्पा — कुतूः (कृत्तेःस्नेहपात्रं) (सैवाल्पा) कुतुपः (पुमान्) ।

कुप्पी — न. न. न. न. न.

सब बर्तन — (सर्व)मावपनं भाण्डं पात्रामत्रं (च) भाजनम् ॥ ३३ ॥

ऋजीति—अर्जतीति ऋजीषम्, ऋचतीति विग्रहे तु ऋचीषमपि, पिष्यते स्म पिष्टम्, पच्यतेऽत्रेति पचनम्, पिष्टस्य पचनं पिष्टपचनमिति द्वे ऋजीषस्य "तवा" इति ख्यातस्य । कम्यते इति कंसः अस्त्री पुंनपुंसकं स्यात् "कंसोऽस्त्री तैजसद्रव्ये कांस्ये मानेऽसुरे तु ना" (इति मेदिनी) पीयते इति पानम्, भाजयतीति भाजनम् पानस्य क्षीरादिपानस्य भाजनं पानभाजनमिति द्वे क्षीरादिपानपात्रस्य "आबखोरा" इति ख्यातस्य । कृत्तेश्चर्मणः स्नेहपात्रं स्नेहस्य तैलघृतादेः पात्रम्, कौति, कुत्सितं तन्यते वा कुतूः स्यादित्येकं चर्मनिर्मितस्नेहपात्रस्य "कुप्पा" इति ख्यातस्य । सा कुतूरेव अल्पा चेत्तदा अल्पा कुतूः कुतुपः पुमान् स्यादित्येकमल्पकुत्वाः "कुप्पी" इति ख्यातायाः । स्यूतादि पिठरादि च सर्वं समस्तं आवपनादि शब्दवाच्यं स्यात् आ उप्यतेऽत्रेति आवपनम्, भणति, भन्दते वा पृषोदरादित्वात् भण्डं तदेव भाण्डम् "भाण्डं मूलवणिग्वित्ते तुरंगाणां च मण्डने । नदीकूलद्वयीमध्ये भूषणे भाजनेऽपि च" (इति हैमः) पाति, पिबत्यनेन वा पात्रम्, अमतीति अमत्रम्, भाजयतीति भाजनमिति पञ्च भाण्डस्य "बर्तन" इति ख्यातस्य ॥ ३२ । ३३ ॥

स. स. स. पु.स. पु.

करछुली — दर्विः कम्बिः खजाका (च) (स्या)त्तर्दूर्दारुहस्तकः ।

चमचा या डोवा — पु.न. न. पु. स.

साग — (अस्त्री) शाकहरितकं शिग्रु (रस्य तु) नालिका ॥ ३४ ॥

साग का डठल — पु. पु. पु. पु.

साग का मसाला — कडम्ब(श्च) कलम्ब (श्च) वेसवार उपस्करः ।

---

१ पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं यथा । शाकं षड्विधमुद्दिष्टं गुरुविद्याद्यथोत्तरम् १ प्रायः शाकानि सर्वाणि विष्टम्भीनि गुरूणि च । रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च २ शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं वर्णं विनाशयति रक्तमथापि शुक्रम् । प्रज्ञाक्षयं च कुरुते पलितं च नूनं हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ३ शाकेषु सर्वेषु वसन्ति रोगास्ते हेतवो देहविनाशनाय । तस्माद् बुधः शाकविवर्जनन्तु कुर्यात्तथाम्लेषु स एव दोषः" ॥ ४ ॥

२ "विंशतिः पलानि हरिद्रायाः, दश पलानि धान्याकस्य, पञ्च पलानि शुद्धजीरकस्य, पल सार्द्धद्वयं मेथिकायाः, एतत्तुल्यं भर्जितमेव ग्राह्यम्, त्रीणि पलानि मरिचस्य, अर्धपलं रामठस्य" एतत्सर्वं [illegible] सम्मर्दितं पेषणात् [illegible] ॥

देति—दृणातीति दर्विः, कृदिकारादिति ङीषि तु दर्वी च कम्यते इति कम्विः कम्बी च खजति मथ्नाति पाकमिति खजाका एतत्साहचर्यात्पूर्वयोः स्त्रीत्वमिति त्रीणि खजाकायाः "करछुली" इति ख्यातायाः । तरति, तर्दति, तृणत्ति वा तर्दूः स्यात्। हस्तप्रतिकृतिर्हस्तकः दारुणो हस्तको दारुहस्तकः एतत्साहचर्यात्पूर्वः पुंसि स्यादिति द्वे दारुहस्तकस्य "डौवा" इति ख्यातस्य उक्तहैमानुरोधात्पश्चापि पर्याया इत्यन्ये । श्यति, शक्नोति भोक्तुमनेनेति वा शाकम् अस्त्री पुंनपुंसकं स्यात् "शाको द्वीपान्तरेऽपि च । शक्तौ द्रुमविशेषे च पुमान् हरितके स्त्रियाम्" (इति मेदिनी) हरति, ह्रियते वा हरितवर्णोऽस्यास्तीति वा हरितं तदेव हरितकम् शिनोति, शीकते, शिक्यते वा शिग्रुः "शिग्रुर्ना शाकमात्रे च शोभाञ्जनमहीरुहे" (इति विश्वमेदिन्यौ) इति त्रीणि शाकस्य । अस्य शाकस्य तु नालिका नालयतीति नाली सैव नालिका कडतीति कडम्बः, केन लम्ब्यते इति कलम्बः स्त्रियां कलम्बी च "कलम्बः शायके नीपे नाली शाके कलम्ब्यपि" (इति विश्वः) इति त्रीणि शाकनालिकायाः । वेसनं प्रेरणं वेसस्तं वृणोति, वारयति वा वेसवारः "चित्रकं पिप्पलीमूलं पिप्पली चव्यनागरम् । धान्याकं रजनीश्वेततण्डुलाश्च समाशकाः । वेसवार इति ख्यातः शाकादिषु नियोजयेत्" (इति आत्रेयसंहितायाम्) उपस्करोति व्यञ्जनेन समवैतीति उपस्करः इति द्वे संस्कारार्थे दीयमानस्य हिङ्गुजीरकहरिद्राधान्याकशुण्ठीसर्षपादेः ॥ ३४ ॥ १ ॥

न. न. न. न.
चूक तिन्तिडीकं (च) चुक्रं (च) वृक्षाम्ल (मथ) वेल्लजम् ॥ ३५ ॥
न. न. न. न. न.
मिरच मरिचं कोलकं कृष्णमूषणं धर्मपत्तनम् ।

तीति—तिम्यतीति तिन्तिडीकम्, चकति, चकते वा चुक्रम् "चुक्रं वृक्षाम्ले चाम्रेयां स्त्री पुंस्यम्लेऽम्लवेतसे" (इति विश्वः) वृक्षस्य अम्लम् वृक्षाम्लमिति त्रीणि चुक्रस्य "चूका" इति ख्यातस्य । अथेति—वेल्लनं वेल्जस्तं जायते जनयतीति वा वेल्लजम्, म्रियते विषमनेनेति मरिचम् वाहुलकादीचि तु मरीचं दीर्घमध्यमपि, कोलतीति कोलकम्, कर्षतीति कृष्णम् "कृष्णः सत्यवतीपुत्रे वायसे केशवेऽर्जुने । कृष्णा स्याद्द्रौपदीनीलीकणाद्राक्षासु योषिति । मेचके वाच्यलिङ्गः स्यात् क्लीबे मरिचलोहयोः" (इति विश्व.) ऊषतीति ऊषणम् ह्रस्वपाठे उषतीति विग्रहे तु उषणमपि, धर्मपत्तनं जातं धर्मपत्तनम् संज्ञापूर्वकत्वान्न वृद्धिरिति षट् मरिचस्य "मिरच" इति ख्यातस्य ॥ ३५ ॥ २ ॥

पु. पु. पु. स.
[illegible] जीरको जरणोऽजाजी कणा (कृष्णे तु जीरके) ॥ ३६ ॥
स. स. स. पु. स. स.
[illegible] सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ।

जीति—जवति, जिनाति वा जीरः स एव जीरकः, जरयतीति जरणः "जरणं हिङ्गुनि स्मृतम् । जरणो जीरकेऽपि स्यात् कृष्णे सौवर्चलेऽपि च" (इति विश्वः) अजमजतीति अजाजी, कणतीति कणा "कणा जीरककुम्भीरमक्षिकापिप्पलीषु च । कणोऽतिसूक्ष्मे धान्यांशे" (इति विश्वः) इति चत्वारि श्वेतजीरकस्य । कृष्णेति कृष्णा-वर्णत्वत्ति जीरके तु सुपवर्णं सुषवः सोऽस्त्यस्या इति सुषवी, कारं वाति, कारणं काः संपदादित्वातामवतीति वा गौरादित्वादणन्तत्वाच्च कारवी "कारवी मधुरादीप्यत्व-क्पत्री कृष्णजीरके" (इति मेदिनी) प्रथते इति पृथ्वी "पृथ्वी भूमौ महत्यां च त्वक्पत्र्यां कृष्णजीरके" (इति विश्वः) ङीषोऽभावे तु पृथुः "पृथुः स्यान्महति त्रिषु । त्वक्पर्यां कृष्णजीरेऽस्त्री पुमानग्नौ नृपान्तरे" (इति मेदिनी) कालो वर्णोऽस्त्यस्याः काला, उपकुञ्चतीति उपकुञ्चिका इति षट् कृष्णजीरकस्य ॥ ३६ । १ ॥

न. न. स. न
अदरख, आर्द्रकं शृङ्गवेरं (स्यादथ) च्छत्रा वितुन्नकम् ॥ ३७ ॥

न. न. स. न.
धनियां, कुस्तुम्बुरु (च) धान्याक (मथ) शुण्ठी महौषधम् ।

स.न. न. न.
सोंठि (स्त्रीनपुंसकयो)र्विश्वं नागरं विश्वभेषजम् ॥ ३८ ॥

आर्द्रेति—आर्द्रयति जिह्वाम्, अर्दति कफम्, आर्द्रायां जातम्, आर्द्रसंज्ञकम् वा आर्द्रकम् शृङ्गमिव वेरं कलेवरमस्येति शृङ्गवेरं स्यादिति द्वे आर्द्रकस्य "अदरख" इति ख्यातस्य । अथेति—छत्रमस्त्यस्याः छत्रा "छत्रं स्यादातपत्राणे छत्रामधुरिकौषधौ । धान्याके च शिलीन्ध्रे च" (इति हेमचन्द्रः) विगतं तुन्नं दुःखमस्मात्, वितुद्यते भक्ष्यार्थ-मिति वा वितुन्नं तदेव वितुन्नकम् "वितुन्नकं तु धान्याके झाटामलमयूरके" (इति विश्वः) कुत्सितं स्तुम्बतीति बाहुलकादुरुप्रत्यये कुस्तुम्बुरु, धन्यते भक्ष्यार्थिभिः, धान्यमकतीति वा धान्याकम्, मुकुटमते तु धन्याकमपि, "धन्याकं धान्यकं धान्यं कुस्तुम्बुरु धनीयकम्" (इति रभसः) इति चत्वारि धान्याकस्य । शुण्ठतीति गौरादित्वात् शुण्ठी इनि तु शुण्ठिरपि, महच्च तदौषधं चेति महौषधम्, "महौषधं तु च शुण्ठ्यां स्याद्विषायां लशु-नेऽपि च" (इति विश्वः) विशतीति विश्वं स्त्रीनपुंसकयोः स्यात् "विश्वं कृत्स्ने च भुवने विश्वेदेवेषु नागरे । विश्वाप्यतिविषायां स्यादिति" (विश्वः) नगरे भवं नागरम् "नागरं मुस्तके शुण्ठ्यां विदग्धे नगरोद्भवे" (इति मेदिनी) विश्वस्य दोषस्य भेषज-मिति पथ्य शुण्ठिकायाः "सोंठि" इति ख्यातायाः ॥ ३७ । ३८ ॥

---

१ सधन्वा शुण्ठिरौन्यवमिति वैद्यकम् ॥

२ यदा पचादि तदा गौरादित्वकल्पनं समीचीनं भाति, यदा तु सर्वधातुभ्य इनिति इन्प्रत्ययः स्यात्तदा "कृदिकारादक्तिनः" इत्यनेनैकत्वाद्गौरादित्वकल्पनं व्यर्थमेवेति ॥

सोंचर, कालानमक, सौवर्चलेऽक्षरुचके तिलकं तत्र मेचके ।

राव, सफेद चीनी या मिश्री मत्स्यण्डी फाणितं[1] खण्डविकारे[2] शर्करा सिता ॥४३॥

सौवेति—सौवर्चले लवणे अक्षरुचके स्याताम् । सुष्ठु वर्च्यते, दीप्यते इति सुवर्चलम् तदेव सौवर्चलम्, अक्षतीति अक्षम्, "अक्षो रथस्यावयवे व्यवहारे विभीतके । पाशके शकटे कर्षे ज्ञाने चात्मनि रावणौ । अक्षं सौवर्चले तुत्थे हृषीके" (इति हेमचन्द्रः) रोचते इति रुचकम् "रुचको बीजपूरे च निष्के दन्तकपोतयोः । न द्वयोः सर्जिकाक्षारेऽश्वाभरणमाल्ययोः । सौवर्चलेऽपि मङ्गल्ये द्रव्येऽपि कटकेऽपि च" (इति विश्व.) इति त्रीणि सौवर्चलस्य "सोंचर" इति ख्यातस्य । तत्र तस्मिन् सौवर्चले मेचके कृष्णवर्णे चेत्तदा तिलति, तेलति वा तिलकम् "तिलको द्रुमरोगाश्वभेदेषु तिलकालके । क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु विशेषके" (इति मेदिनी) इत्येकं श्यामसौवर्चलस्य । मन्दं मुदं वा स्यन्दते पृषोदरादित्वात् मत्स्यण्डी, फाणयते स्म फाणितम्, इति द्वे फाणितस्य "राव" इति ख्यातस्य । खण्डविकारे खण्डविकारवति द्रव्ये शृणाति पित्तमिति शर्करा "शर्करा खण्डविकृतौ कर्परांशे रुगन्तरे । उपलायां शर्करायुक्तदेशे शकलेपि च" (इति हैमः) सितः श्वेतवर्णोऽस्त्यस्याः, सिनोति वा सिता स्यात् "सितमवसिते च बद्धे धवले त्रिषु । शर्करायां स्त्री" (इति मेदिनी) इति द्वे सितायाः "चीनी वा मिश्री" इति ख्यातायाः ॥ ४३ ॥

स. स. स. स.

खोवा कूर्चिका क्षीरविकृतिः (स्याद्) रसाला[3] (तु) मार्जिता ।

न. न.

सिखरन दही (स्या)त्तेमनं तु निष्ठानं (त्रिलिङ्गा वा सितावधेः)॥४४॥

---

१ "श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण पित्तं निहन्ति च तदेव हरीतकीभिः । शुण्ठ्या समं हरति वातमशेषमित्थं दोषत्रयक्षयकराय नमो गुडाय" (इति भावप्रकाशः)॥ २ "खण्डं तु सिकताकारं [illegible] शर्करा सिता । सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत्" (इति भावप्रकाशः)॥

३ "[illegible] शर्करा शुभ्रा [illegible] शुचिपटे [illegible] । [illegible] मृण्मयनवस्थाल्यां दृढं [illegible] एलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च [illegible] । [illegible] रचिता [illegible] रसाला [illegible] श्रीकृष्णेन पुनः पुनः पुनरियं प्रीत्या समास्वादिता । [illegible] नित्यशस्तस्य [illegible] सर्वेन्द्रियाणां बलम्" ([illegible]) [illegible] दही को ४ सेर [illegible] २ सेर [illegible] हाथों से मलें सब दही [illegible] के पात्र में इकट्ठा हो [illegible] [illegible] रसाला की [illegible] [illegible] किया है [illegible] [illegible] है [illegible]

क्विति—कूर्चो मस्त्वादिरस्त्यस्याः, कूर्चतीति वा कूर्चिका "दध्ना सह पयःपक्वं यत्त-त्स्याद्दधिकूर्चिका । तक्रेण पक्वं यत्क्षीरं सा भवेत्तक्रकूर्चिका" "कूर्चिका सूचिकायां । तूलिकायां च कुड्मले । कपाटोद्भेदने क्षीरविकृतावपि योषिति" (इति मेदिनी) ति द्वे "किलाटिकायाः" "मावा—खोवा" इति ख्यातायाः । रसानालाति साला "अर्धाढकः सुचिरपर्युषितस्य दध्नः खण्डस्य षोडश पलानि शशिप्रभस्य । र्पिः पलं मधु पलं मरिचं द्विकर्षं शुण्ठ्याः पलार्धमपि चार्धपलं चतुर्णाम् ॥ सूक्ष्मे टे ललनया मृदुपाणिघृष्टा कर्पूरधूलिसुरभीकृतपात्रसंस्था । एषा वृकोदरकृता सरसा रसाला यास्वादिता भगवता मधुसूदनेन" (इति सूदशास्त्रम्) मार्ज्यते स्म मार्जिता इति द्वे रसालायाः "शिखरन" इति ख्यातायाः । तिम्यतेऽनेन तेमनं "तेमनं व्यञ्जने क्लेदे तेमनी चुल्लिभिद्यपि" (इति हेमचन्द्रः) निष्ठीयतेऽत्रेति निष्ठानं स्यादिति द्वे व्यञ्जनस्य । इतो वक्ष्यमाणा वासितावधेः वासितपर्यन्ताश्शब्दास्त्रिलिङ्गा वाच्यलिङ्गा भवन्तीति ॥ ४४ ॥

शूल पर भुना मांस बटलोही में पका रसियाउरि घी से पका अन्न

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
शूलाकृतं भटित्रं (च) शूल्यमुख्यं तु पैठरम् ।
पु.स.न. पु.स.न. पु.स.न. पु.स.न.
प्रणीतमुपसंपन्नं प्रयस्तं (स्यात्) सुसंस्कृतम् ॥ ४५ ॥

शिवति—शूलेन कृतं शूलाकृतम्, भटति, भट्यते स्म भटित्रम्, शूले संस्कृतं शूल्यं स्यादिति त्रीणि लोहशलाकया पक्वमांसस्य । उखायां संस्कृतम् उख्यम्, पिठरे संस्कृतं पैठरमिति द्वे पिठरपकान्नादेः । प्रणीयते स्म प्रणीतम् "प्रणीतमुपसम्पन्ने कृते क्षिप्ते प्रवेशिते । संस्कृताग्नौ च" (इति हेमः) उपसम्पद्यते स्म उपसम्पन्नम् "उपसम्पन्न-मुद्दिष्टं निहते च सुसंस्कृते" (इति विश्वः) इति द्वे पाकेन संस्कृतस्य व्यञ्जनादेः । प्रयस्यते स्म प्रयस्तम्, सुष्ठु संस्क्रियते स्म सुसंस्कृतं स्यादिति द्वे द्रव्यान्तरसंस्कृतस्य पक्वस्य ॥ ४५ ॥

पनिहा व्यञ्जन बीना अन्न चिक्कना छौंका या बघारा

पु.स.न. पु.स.न. पु.स.न. पु.स.न.
(स्या)त्पिच्छिलं (तु) विजिलं संमृष्टं शोधितं (समे) ।
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
चिक्कणं मसृणं स्निग्धं (तुल्ये) भावितवासिते ॥ ४६ ॥

स्यादिति—"पिच्छा तु शाल्मलीवेष्टे मण्डे चाश्वपदामये । पङ्क्तौ पूगच्छटाकोश-मोचालिकृयुतेषु च । पिच्छः पुच्छे" (इति विश्वः) पिच्छोऽस्त्यस्येति पिच्छिलः, वेजनं विजिस्ता लातीति विजिलमिति द्वे मण्डयुक्तभक्तजलयुक्तव्यञ्जनयोः । संमृज्यते स्म संमृष्टम्, शोध्यते स्म शोधितम् उभे समे समानार्थे स्यातामिति द्वे शोधितस्य । चिक्कं चिक्कः अणतीति अणम् चिकस्य अणं शकन्ध्वादिः चित्यते वा चिक्कणम्,

मस्यति, संवृणोति वा पृषोदरादित्वात् मसृणम् "मसृणोऽकर्कशे स्निग्धे त्रिषु मायां योपिति" (इति विश्वः) स्निह्यति स्म स्निग्धमिति त्रीणि चिक्कणस्य । भाव्यते स्म भावितम् "भावितं वासिते प्राप्ते" (इति विश्वः) वास्यते स्म वासितम् "वासि करिणीनार्योर्वासितं भाविते रुते" (इति मेदिनी) उभे तुल्ये समानार्थे स्यात मिति द्वे आहितहिङ्ग्वादि गन्धस्य व्यञ्जनादेः ॥ ४६ ॥

मुरमुरा न. पु. पु. पु.बहु. पु.न. बहु.
धान का लावा **आपक्वं पौलिरभ्यूषो लाजाः (पुंभूम्नि) चाक्षताः ।**
चिउरा पु. पु. स.बहु.
बहुरी **पृथुकः (स्या)च्चिपिटको धाना (भृष्टयवे स्त्रियः) ॥४७॥**

आपेति—ईषत्पक्वम् आपक्वम्, पोलति, पोलनं वा पोलस्तेन निर्वृत्तः पौलिः अभ्यूषसाहचर्यात्पुंसि भवति, अभ्यूषति, अभ्यूष्यते वा अभ्यूषः "तोक्मं हरितो यवोऽभ्युषः" (इति वोपालितात) ह्रस्वमध्योऽपि पचाद्यचि तु अभ्युषतीति अभ्योषोऽपि इति त्रीणि भर्जितहरितयवादेः । लज्यन्ते इति लाजाः पुंभूम्नि पुंसि बहुत्वे स्युः "लाजः स्यादार्द्रतण्डुले । नपुंसकमुशीरेऽथ स्त्रियां पुंभूम्नि चाक्षते" (इति मेदिनी) चो भिन्नक्रमः—क्षणनं क्षतम् न क्षतं येषामिति अक्षताश्च पुंभूम्नि भवन्तीति "अक्षतं न द्वयोः पण्डे लाजेषु त्रिष्वहिंसिते । यवेऽपि क्वचित्" (इति मेदिनी) इति द्वे भृष्टव्रीह्यादेः । प्रथत इति पृथुकः "पृथुकश्चिपिटेऽर्भके" (इति हेमचन्द्रः) नासिकाया नतं चिपिटं तदिव चिपिटकः स्यादिति द्वे चिपिटकस्य "चिउरा" इति ख्यातस्य । भृष्टयवे धानाः स्त्रियः स्युः दधनीति "धानाः" इति बहुवचननिर्देशादयं नित्यबहुवचनान्तो भवतीति विज्ञेयम् "धाना भृष्टयवेऽङ्कुरे धान्याके चूर्णसक्तुषु" (इति हैमः) भृष्टश्चासौ यवश्चेति द्वे भृष्टयवस्य "बहुरी" इति ख्यातायाः ॥ ४७ ॥

पु. पु. पु. पु. पु. बहु.
इवा मालवा **पूपोऽपूपः पिष्टकः (स्यात्) करम्भो दधिसक्तवः ।**
दहीमाना स. न. न. न. पु.न. पु.न.
सानु भात **भिस्सा (स्त्री) भक्तमन्धोऽन्नमोदनो(ऽस्त्री)सदीदिविः ॥४८॥**

पूपेति—पवनं पूरिति संपदादित्वात् पिबति, पातीति वा पूपः, न पूप्यते, अपु

---

१ पृथुकम्—[illegible] 'अशु हिंसायाम्' इत्यतः कर्मणि क्तः । क्षत [illegible], न [illegible] [illegible] 'अक्षताः' [illegible] नित्यबहुवचनान्तेति व्याख्यातारः ॥
२ [illegible] स्थानि [illegible] ॥
३ [illegible] "[illegible]" [illegible] "[illegible]" [illegible]

पिवति पातीति वा अपूपः, पेषणं पिष्टं तस्य विकारः पिष्टकः स्यात् "पिष्टको घृतपूपादौ नेत्ररोगान्तरेऽपि च" इति त्रीणि पूपस्य । केन जलेन रभ्यते मिश्रीक्रियते केन वायुना नीयते वा करम्भः, केन जलेन रम्बते, किरति, कीर्यते वेति विग्रहे तु करम्बोऽपि, सचन्ते, सच्यन्ते वा सक्तवः "धाना चूर्णन्तु सक्तवः" (इति नाममाला) दध्युपसिक्ताः सक्तवः शाकपार्थिवादित्वाद् दधिसक्तवः इति द्वे दधिमिश्रितसक्तुकस्य । वभस्ति, भेदनं भिद् ता स्यतीति वा भिस्सा स्त्री स्यात् भज्यते स्म भक्तम् , "भक्तमन्ने तत्परे च" (इति हेमचन्द्रः) अद्यते, अन्धयति वा अन्धः, अद्यते स्म अन्नम् "अन्नं भक्ते च भुक्ते स्यात्" (इति विश्वः) सदीदिविः दीदिविसहितः ओदनः अस्त्री पुंनपुंसकं स्यात् उनत्ति, ऊर्दतेऽनेन वेति पृषोदरादित्वात् ओदनः, "ओदनं न स्त्रियां भक्ते बलायामोदनी स्त्रियाम्" (इति मेदिनी) दीव्यत्यनेन दीदिविः "दीदिविर्धिषणे पुंसि स्यादन्ने च तदस्त्रियाम्" (इति विश्वः) इति षडोदनस्य ॥ ४८ ॥

स. स. पु.न.
जलाभात **भिस्सटा दग्धिका (सर्वरसाग्रे) मण्ड (मस्त्रियाम्)।**
पसावन या मैल पु. पु. पु.
भात का मांड **मासराचामनिस्रावा (मण्डे भक्तसमुद्भवे) ॥ ४९ ॥**

भीति—भिस्सां टीकते डप्रत्यये ह्रस्वे च भिस्सटा, दह्यते स्म दग्धा कुत्सिता दग्धा दग्धिका इति द्वे दग्धौदनस्य । सर्वरसाग्रे मण्डम् अस्त्रियां पुंनपुंसकं स्यात् रसश्चासावग्रश्च, रसस्य अग्रः, अग्रो रस इति राजदन्तादिर्वा सर्वस्य रसाग्रः सर्वरसाग्रः, मण्डति, मण्ड्यते, मन्यते वा मण्डः "मण्डः पञ्चाङ्गुले शाकभेदे क्लीवन्तु मस्तुनि । आमलक्यां स्त्रिया मण्डाथास्त्रियां सारपिच्छयोः" (इति विश्वः) भक्तात्समुद्भवतीति भक्तसमुद्भवस्तस्मिन् मण्डे मासराचामनिस्रावाः स्युः मा श्रीः सरत्यत्र, मास्यते वा मासरः, आचम्यते आचामः, निस्राव्यत इति निस्रावः, विस्राव्यत इति विग्रहे तु विस्रावोऽपि इति त्रीणि भक्तमण्डस्य ॥ ४९ ॥

स. स. स. स. स.
लप्सी गौ **यवागूरुष्णिका श्राणा विलेपी तरला (च सा) ।**
का दूध पु.स.न. स.न. पु.न.
आदि गोबर **गव्यं (त्रिषु गवां सर्वं) गोविट् गोमय(मस्त्रियाम्)॥५०॥**

येति—यौति, यूयते वा यवागूः, उष्णा एव उष्णिका, श्रायते स्म श्राणा, विलिम्पतीति पचाद्यचि गौरादित्वाद् विलेपी या विलेपी सा च तरणं तरस्तं लातीति तरला स्यादिति पञ्च श्राणायाः "लप्सी" ‡ इति ख्यातायाः । गवां धेनूनां सर्वं भव-

‡ "समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत् । तस्मिन् घनीकृते न्यस्येल्लवङ्गं मरिचादिकम् । सिद्धैषा लप्सिका ख्याता" (इति भावप्रकाशः) ॥

विकारावयवादि गोरिदं गव्यं त्रिषु त्रिलिङ्गयां स्यात् " गव्यं नपुंसकं ज्यायां रागद्रव्ये ऽप्यथ स्त्रियाम् । गोसमूहे त्रिलिङ्गं तु गोदुग्धादौ च योषिति " (इति मेदिनी) इत्येकं धेनूद्भवपयोदध्यादिकस्य । वेवेष्टि विशतीति वा विट् गोर्विट् गोविट्, गो: पुरीषं गोमयम् अस्त्रियां पुंनपुंसकं स्यादिति द्वे गोमयस्य " गोबर " इति ख्यातस्य ॥५०॥

करसी दूध — (तत्तु शुष्कं) करीषो (ऽस्त्री) दुग्धं क्षीरं पयः (समम्) ।
घी, दही आदि पतला दही — पयस्य (माज्यदध्यादि) द्रप्सं (दधि घनेतरत्) ॥५१॥

तदिति–तद्गोमयन्तु शुष्कं चेत् तदा कीर्यत इति करीषः अस्त्री पुंनपुंसकं स्यादित्येकं शुष्कगोमयस्य । दुह्यते स्म दुग्धम्, क्षयणां क्षीस्तामीरयति, घस्यते वा क्षीरम् " क्षीरं पानीयदुग्धयोः " (इति हैमः) पीयते, पयते वा पयः " पयः क्षीरे च नीरे च " (इति हैमः) एतत्त्रयं समं समानार्थकं स्यादिति त्रीणि दुग्धस्य । आज्यं च दधि चादिर्यस्य आदिना तक्रं नवनीतं च गृह्यते, आज्यदध्यादिपयसो विकारः पयस्यं स्यादित्येकं घृतादेः । घनेतरत् घनात्कठिनादन्यत् दधि दृप्यत्यनेन द्रप्सं स्यात् " द्रप्सं दधिघनं तथा " (इति नाममाला) तृप्यत्यनेनेति विग्रहे तु अघ्न्यादित्वात् त्रप्स्यमपि द्रप्स्यं च केचित्तु द्रप्सस्थाने सरं पठन्तीति सरतीति सरः "बाणाद्रप्सौ सरौ " (इति दुर्गः) इत्येकं द्रप्सस्य " दगडा " इति ख्यातस्य ॥ ५१ ॥

घी — घृतमाज्यं हविः सर्पिर्नवनीतं (नवोद्धृतम्) ।
नैनू ताजा नैनू — (तत्तु) हैयंगवीनं (यद् ह्योगोदोहोद्भवं घृतम्) ॥ ५२ ॥

घ्रिति–घ्रियते इति घृतम " घृतमाज्याम्बुदीप्तेषु " (इति हेमचन्द्रः) आज्यते ऽनेनेति आज्यम्, हूयते इति हविः " हविः सर्पिषि होतव्ये " (इति हैमः) सर्पतीति सर्पिरिति चत्वारि घृतस्य । नवं च तदुद्धृतं च नवोद्धृतं घृतं नवं च तन्नीतं च नवनीतं स्यादित्येकमकृताग्निसंयोगस्य नवोद्धृतस्य । यत् ह्यो गोदोहोद्भवं घृतं तत्तु हैयंगवीनं स्यात् । दुह्यते इति दोहः गवां दोहः ह्योगोदोहः ह्योगोदोहादुद्भवतीति तस्य " हैयङ्गवीनं संज्ञायाम् " ५ । २ । २३ इति निपातः इत्येकमेकरात्रपर्युषित[illegible] ॥ ५२ ॥

[illegible] — दण्डाहतं कालशेयमरिष्ट (मपि) गोरसः ।
[illegible] — तक्रं ह्युदश्विन्मथितं (पादाम्ब्वर्धाम्बु निर्जलम्) ॥५३॥

देति—दण्डेन मथाहतं विलोडितं दण्डाहतम्, कलश्यां मन्थपात्रे भवम् कालशेयम्, न रिष्टमक्षेमं यस्मादिति अरिष्टमपि “ अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च ” (इति विश्वः) गवां रसो गोरसः इति चत्वारि गोरसस्य “ घोल ” इति ख्यातस्य । अथास्य भेदानाह—पादाम्ब्वर्धाम्बु निर्जलं क्रमेण तक्रम्, उदश्वित्, मथितं च स्यात्—तञ्चति, तञ्चयते वा तक्रं पादाम्बुयुतं तक्रं स्यादित्येकं चतुर्थांशजलघोलस्य । उदकेन श्वयति वर्धते इति उदश्वित् अर्धाम्बुयुतमुदश्वित्स्यादित्येकमर्धजलघोलस्य । मथ्यते स्म मथितम् निर्जलं मथितं स्यादित्येकं निर्जलघोलस्य ॥ ५३ ॥

दही का पानी — न. पु.
पेयुस — **(मण्डं दधिभवं) मस्तु पीयूषो (ऽभिनवं पयः) ।**
भूख — स. स. स. पु. पु.
कौर — **अशनाया बुभुक्षा क्षुद् ग्रास(स्तु)कवलः(पुमान्)॥५४॥**

मेति—दध्नो भवतीति दधिभवं मण्डं मस्यते, इति मस्तु स्यादित्येकं वस्त्रनिःसृतदधिजलस्य दध्युपरिभागस्य वा । अभिनवं पयः क्षीरं पीयति, पीयतेऽनेनेति वा पीयूषः स्यात् “ पीयूषं सप्तदिवसावधिक्षीरे तथाऽमृते ” (इति विश्वः) बाहुलकाद्गुणे पेयूषमपि इत्येकं नवप्रसूताया गोः क्षीरस्य । अशनस्य इच्छा अशनाया, भोक्तुमिच्छा बुभुक्षा क्षोधनं क्षुत् भागुरिमते टापि क्षुधा च इति त्रीणि क्षुधायाः “ भूख ” इति ख्यातायाः । ग्रस्यते, इति ग्रासः, केन वलत इति कवलः पुमान् स्यादिति द्वे कवलस्य ॥ ५४ ॥

स. न. स. न.
साथ पीना — **सपीतिः(स्त्री) तुल्यपानं सग्धिः(स्त्री) सहभोजनम् ।**
साथ खाना — स. स. स. पु. स. न.
प्यास — **उदन्या(तु)पिपासा तृट् तर्षो जग्धि(स्तु)भोजनम्॥५५॥**
न. पु. पु. पु. पु.
भोजन, अघाना — **जेमनं लेह आहारो निघसो न्याद (इत्यपि) ।**
खाने से बचा — न. न. स. स. न.
अन्न — **सौहित्यं तर्पणं तृप्तिः फेला भुक्तसमुज्झितम् ॥ ५६ ॥**

सेति—पानं पीतिः समाना पीतिः सह पीतिर्वा सपीतिः स्त्री स्यात्, तुल्यं च यत्पानं च तुल्यपानमिति द्वे बहुभिः संमिल्यपानस्य । अदनं ग्धिः समाना ग्धिः सग्धिः स्त्री स्यात्, भुक्तं भोजनं समानं भोजनं सहभोजनं वेति द्वे सहभोजनस्य । उदकस्येच्छा उदन्या, पातुमिच्छा पिपासा, तर्पणं तृट् संपदादिः “ तृट् तृष्णावतर्षश्च भवेल्लिप्सा-

१ “ दध्यग्रे च पीयूषं नवमेऽप्यमृतेऽपि च ” (इति हारावली) ॥

पिपासयोः " (इति हैमः) भागुरिमते तु टापि तृषापि "तृषा लिप्सातृषोः स्त्रियाम्" (इति विश्वः) घञि तु तर्षः इति चत्वारि तृषायाः । अदनं जग्धिः, भुक्तं भोजनम् जीन्तम्, जेमितं वा जान्तम्, जमितं वा जेमनम्, जमनं वा लेहनं लेहः ' लेप. इति पाठे तु लेपनं लेपः " लेपस्तु लेपने । अशने च सुरायां च " (इति हेमचन्द्र. आहरणमाहारः, न्यदनं निघसः ' णो ' न्यादः इत्यपि इति सप्त भोजनस्य । सुहितस्य भावः सौहित्यम्, तृप्तं तर्पणम्, तर्पणं तृप्तिरिति त्रीणि तृप्तेः । फेल्यते इति फेला पूर्वं भुक्तं पश्चात्समुज्झितम् भुक्तसमुज्झितमिति द्वे भुक्तोत्सृष्टस्य ॥ ५५ । ५६ ॥

न. न. न. न. न. न.

चाह **कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।**

पु. पु. पु. पु. पु. पु.

अहीर **गोपे गोपालगोसंख्यगोधुगाभीरबल्लवाः ॥ ५७ ॥**

केति—कमनं कामम् "विशेषैर्यद्यबाधितः" इति क्लीबत्वं ज्ञेयम् "कामं बाढेऽनुमति रेतसोः । कामः स्मरेच्छाकाम्येषु " (इति हैमः) प्रकमनं प्रकामम्, पर्यापणं पर्याप्तम् निकमनं निकामम्, एषणम् इष्टम्, " इष्टमाशंसितेऽपि स्यात्पूजिते प्रेयसि त्रिषु सप्ततन्तौ पुमान् क्लीबे संस्कारे क्रतुकर्मणि " (इति विश्वः) आप्तुमिष्टम् ईप्सितम् ईप्सितमनतिक्रम्य यथेप्सितमिति षट् इच्छानतिक्रमस्य । गां पातीति गोपः " गोपः गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि । ग्रामौघाधिकृते पुंसि सारिवाख्यौषधौ स्त्रियाम् (इति विश्वः) गां पालयतीति गोपालः, " गोपालो नृपगोपेशे " (इति मेदिनी गां संचष्टे इति गोसंख्यः, गां दोग्धीति गोधुक् (ग्) मूलविभुजादित्वात्के गोदुहः ऽपि " गोपगोदुहवल्लवाः " (इति त्रिकाण्डशेषः) आसमन्ताद्भियं राति, अ अभिईरयति वा आभीरः, वल्लनं वल्लस्तं वाति, वायति वा वल्लवः इति प आभीरस्य "अहीर" इति ख्यातस्य ॥ ५७ ॥

न. पु.

पशु या चौ- **(गोमहिष्यादिकं) पादबन्धनं (द्वौ) गवीश्वरे ।**

पाये गोपाल, पु. पु. न. न. पु.

गौओंका गरोह **गोमान् गोमी गोकुलं(तु)गोधनं(स्या)द्गवां व्रजे ॥५८**

गोमेति—गौश्च महिषी च गोमहिष्यौ आदी यस्येति गोमहिष्यादिकं पादे बन्ध यस्येति पादबन्धनं स्यात् "यादवं धनमिति" पाठे तु गोमहिष्यादिकं धनं यदूनामिदं य स्यात् " गवादि यादवं वित्तम् " (इति बोपालितः) आदिना खराजाविकादि ग्रहणं. गोमहिष्यादिकस्य । गवीश्वरे गवामधिपे गोमान्, गोमी चेति द्वौ स्यातां [illegible] गवीश्वरः, अस्यो गावोऽस्येति गोमान्, गावः सन्त्यस्येति गोमी स्यात्

ीशि गवीश्वरस्य । गवां व्रजे गोसमुदाये गवां कुलं गोकुलम् " गोकुले धनगोधने " (इति व्याडि:) गवां धनं गोधनं स्यादिति द्वे गोसंघातस्य ॥ ५८ ॥

जहा पहले गौओं ने चरा

पु.स.न
(त्रिष्वा)शितंगवीनं (तद्गावो यत्राशिताःपुरा)।

या बैल खाया

पु. पु. पु. पु. पु. पु.
उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥

बैलोंका गरोह गैया, बछड़ों

पु. पु. पु. न.
अनड्वान्सौरभेयो गौ(रुक्षणांसंहति) रौक्षकम्।

और धेनुओंका झुण्ड

स. स. न. न.
गव्या गोत्रा (गवां वत्सधेन्वो) वात्सकधैनुके ॥ ६० ॥

त्रीति—यत्र पुरा गावो धेनवः आशिता भोजिताः तत् आशितंगवीनं त्रिपु त्रिलिङ्गयां स्यात् आशिता भोजिता गावो यत्रेति आशितंगवीनमित्येकं पूर्वं गवां चारणास्थानस्य । उक्षतीति " श्वन्नुक्षन्निति कनिनन्तो निपातः " भन्दते इति भद्रः "भद्रः शिवे खञ्जरीटे वृषभे तु कदम्बके । करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः । काञ्चने च स्त्रियां रास्ना कृष्णा व्योमनदीषु च । तिथिभेदे प्रसारिण्यां कट्फलानन्वयोरपि । त्रिषु श्रेष्ठे च साधौ च न पुंसि करणान्तरे " (इति मेदिनी) वरणं वर् ईश्च वर् च ईवरौ तौ ददातीति ईवर्दः, अतिशयितं बलमस्येति बली स चासावीवर्दश्चेति बलीवर्दः, ऋषतीति ऋषभः, "ऋषभस्त्वौषधान्तरे । स्वरभिद्वृषयोः कर्णरन्ध्रकुम्भीरपुच्छयोः " (इति मेदिनी) वर्षतीति वृषभः " वृषभः श्रेष्ठवर्षयोः " (इति विश्वः) इगुपधत्वात्कप्रत्यये तु वृषः " वृषो धर्मे बलीवर्दे शृङ्गयां पुंराशिभेदयोः । श्रेष्ठे स्यादुत्तरस्थश्च वासमूपकशुक्रले । वृषा मूषिकपर्ण्यां च" (इति मेदिनी) अनः शकटं वहति " अनसि वहेः क्विबनसो डश्च " इति क्विपि सस्य डत्वे च अनड्वान्, सुरभ्या अपत्यं सौरभेयः गच्छतीति गौः " गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् । स्त्री सौरभेयी दृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च " (इति विश्वमेदिन्यौ) इति नव बलीवर्दस्य । उक्ष्णां वृषभाणां संहतिः समुदायः उक्ष्णां समूहः औक्षिकं स्यादित्येकं वृषसमूहस्य । गवां संहति. समूहः गव्या, गोत्रा च स्यात् गवां समूहो गव्या, त्रप्रत्यये तु गोत्रा स्यादिति द्वे गोसमूहस्य । वत्सधेन्वोः संहतिः वात्सकधैनुके स्याताम् । वत्सानां समूहो वात्सकमित्येकं वत्ससमुदायस्य । धेनूनां समूहो धैनुकं स्यादित्येकं धेनुसमूहस्य ॥ ५९ । ६० ॥

बड़ा बैल बूढ़ा बैल और

पु. पु. पु.
(उक्षामहान्)महोक्षः(स्याद्)वृद्धोक्ष(स्तु)जरद्गवः।

पु. पु.
(उत्पन्न उक्षा)जातोक्षः सद्योजात (स्तु)तर्णकः ॥६

वितिः—महान् उक्षा गवेन्द्रः वृषभश्चेत्तदा महांश्चासावुक्षा चेति महोक्षः स्यादित्येकं महोक्षस्य। वृद्धश्चासावुक्षा चेति वृद्धोक्षः, जरंश्चासौ गौश्चेति जरद्गवः इति द्वे वृद्धवृषभस्य। उत्पन्नो जातः उक्षा वृषश्चेत्तदा जातश्चासावुक्षा चेति जातोक्षः स्यादित्येकं भ्रष्टदम्यभावस्य। सद्योजातस्तु तत्कालसंभूतो वृषभश्चेत्तदा तृणोतीति तर्णकः स्यादित्येकं सद्योजातस्य ॥ ६१ ॥

बछड़ामात्र नाटा	पु. पु. पु. पु. **शकृत्करि(स्तु)वत्सः (स्याद्) दम्यवत्सतरौ(समौ) ।**
बधिया साँड़	पु. पु. पु. पु. **आर्षभ्यः (षण्डतायोग्यः) षण्डोगोपतिरिट्चरः ॥६२॥**

शेति—शकृत् करोतीति शकृत्करिः, वदतीति वत्सः स्यात् "वत्सः पुत्रादिवर्षयोः। तर्णकेनोरसि क्लीबम्" (इति विश्वः) इति द्वे वत्समात्रस्य। दमनार्हो दम्यः, तनुर्वत्सो वत्सतरः उभौ समौ समानार्थौ समानलिङ्गाविति द्वे वत्सभावमतीत्य द्वितीयं वयःस्पृष्टस्य। षण्डताया योग्यः षण्डतायोग्यो दम्यश्चेत्तदा ऋषभस्य प्रकृतिः आर्षभ्यः स्यादित्येकं क्लीवतायोग्यस्य। सनोति गर्भं ददाति, सन्यते गर्भो दीयते वा अमान्तादिति टे षण्डः स्यात् वाहुलकान्नात्र सत्वम् "षण्डं पद्मादिसंघाते न स्त्री स्याद्गोपतौ पुमान्" (इति मूर्धन्यादौ डान्ते मेदिनी) शाम्यतीति विग्रहे तु शमेरिति ढे शण्ढोऽपि "शण्ढः स्यात्पुंसि गोपतौ। आकृष्टाण्डे वर्षवरे तृतीयप्रकृतावपि" (इति मेदिनी) गवां पतिः गोपतिः, एषणमिट् इच्छा तया चरतीति इट्चरः एति तच्छील इति विग्रहे तु इत्वरोपि इति त्रीणि षण्डस्य "सांड़" इति ख्यातस्य ॥ ६२ ॥

कान्धा गलकंबरी	पु. स. पु. **(स्कन्धप्रदेशस्तु) वहः सास्ना(तु) गलकम्बलः ।**
नाथे बैल कांदे बैल	पु. पु. पु. पु. **(स्यान्न)स्तित(स्तु) नस्योतः प्रष्ठवाड्युगपार्श्वगः ॥६३॥**

स्केति—अस्य वृषभस्य स्कन्धयोः प्रदेशस्तु वहति युगमनेनेति वहः स्यात् "वहः स्याद्वृषभस्कन्धे वाहे गन्धवहेऽपि च" (इति विश्वः) इत्येकं वृषस्कन्धस्य। सस्तीति सास्ना, गलस्य कम्बलो गलकम्बलः "कम्बलो नागराजे स्यात्सास्ना प्रावारयोः कृमौ। कम्बलश्चोत्तरासङ्गे कम्बलं सलिले मतम्" (इति विश्वः) इति सास्नायाः "गलकंबरी" इति ख्यातायाः। नसनं नस्तं तत्कृतमस्येति नस्तितः स्यात् नासिकायां भवा नस्या नासारज्जुस्तया उतः नस्योतः "नस्नोतः" इति पाठे तु नस्य इति नस्या नस्या उतो नस्नोतोऽपि इति द्वे नासारज्जुयुक्तस्य। प्रष्ठमग्रगामिनं वहतीति प्रष्ठवाट्, स्वामी तु पष्ठमं षष्ठं वा वर्षं वहतीति विगृह्य 'पष्ठवाट्' इति पृषोदरादित्वात् [illegible] युगस्य स्कन्धकाष्ठस्य पार्श्वं गच्छतीति युगपार्श्वगः इति [illegible] ॥ ६३ ॥

पु.　पु.　पु.

जोतनिया, लदनिया, गाड़ी का बैल　(युगादीनां तु वोढारो) युग्यप्रासङ्ग्यशाकटाः ।

पु.　पु.

हलवाही　(खनति तेन तद्वोढास्येदं) हालिकसैरिकौ ॥ ६४ ॥

खिवति—युगादीनां वोढारस्तु युग्यप्रासङ्ग्यशाकटाः स्युः । युगं वहतीति युग्यः स्यादित्येकं युगवहस्य । प्रासङ्गं वहतीति प्रासङ्ग्यः स्यादित्येकं प्रासङ्गवहस्य । शकटं वहतीति शाकटः स्यादित्येकं शकटवहस्य । तेन खनति, तस्य वोढा तद्वोढा, अस्येदमेष्वर्थेषु हालिकसैरिकौ स्याताम्—हलेन खनति, हलं वहति, हलस्यायं वा हालिकः, सीरेण खनति, सीरं वहति, सीरस्यायं वा सैरिकः स्यादिति द्वे हलवहस्य ॥ ६४ ॥

पु.　पु.　पु　पु.　पु.

धुरिहा बैल, धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः ।

पु.　पु.　पु.

एक धुरावाही (उभावे) कधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥

धूरिति—धूर्वहे सधुरन्धराः धुरन्धरसमेताः धुर्यधौरेयधुरीणाः स्युः । वहतीति वहः धुरोवहो धूर्वहः, धुरं वहतीति धुर्यः, धौरेयः, धुरीणः, धुरं धारयतीति धुरन्धरः इति पञ्च धूर्वहस्य । एकधुरावहे एकधुरीणैकधुरावित्युभौ स्याताम् । एका चासौ धूश्च एकधुरा ता वहतीति एकधुरीणः लुक्पक्षे "लुक् तद्धितलुकि" इति टापो निवृत्तौ एकधुरः, एकधुराया वहः एकधुरावहः इति त्रीणि एकधुरावहस्य ॥ ६५ ॥

पु.　पु.

सर्वभारवाही　(सतु) सर्वधुरीणो (यो भवेत्) सर्वधुरावहः ।

स.　स.　स.　स.　स.　स.

गैया　माहेयी सौरभेयी गौरुस्रा माता (च) शृङ्गिणी ॥ ६६ ॥

स.　स.　स.　स.

उत्तम गैया　अर्जुन्यघ्न्या रोहिणी (स्यात्) (स्यादुत्तमा गोषु) नैचिकी ।

स इति—यो वृषभः सर्वधुरावहो भवेत सतु सर्वधुरीणः स्यात् । सर्वा चासौ धूश्चेति सर्वधुरा ता वहतीति सर्वधुरीणः, सर्वधुराया वहः सर्वधुरावहः स्यादिति द्वे सर्वभारवाहकस्य । मह्या अपत्यं स्त्री, महाया अपत्यं वा माहेयी, सुरभ्या अपत्यं स्त्री सौरभेयी, गच्छतीति गौः, स्रवति क्षीरमस्यामिति उस्रा, "गौरुस्रा प्रिया इला मही" (इति निरुक्तम्) "उस्रो रूपे च किरणेऽप्युस्रार्जुन्युपचित्रयो." (इति मेदिनी) मान्यते पूज्यते लोकैरिति माता "मातरौ गोजनन्यौ द्वे" (इति रुद्रः) शृङ्गमस्त्यस्याः शृङ्गिणी, अर्जुनवर्णत्वात् अर्जुनी स्यात् । न हन्ति दातारम् न हन्यते दातेति वा अघ्न्या, रोहितवर्णत्वात् रोहिणी स्यात् "रोहिणी सोमवल्कैभे कटरोगोसतोर्गवि" (इति

हेमचन्द्रः) इति नव गोमात्रस्य । गोषु या उत्तमा चेत्सा नैचिकी स्यात् । नीचैश्चरतीति नैचिकी अथवा " निचिः कर्णशिरोदेशे " (इति रभसः) निचिरेव निचिकं प्रशस्तं निचिकमस्त्यस्या. नैचिकी " नैचिकी गौरुत्तमा तु निचिकी सा प्रकीर्तिता" इत्येकमुत्तमायाः ॥ ६६ । ३ ॥

चितकबरी आदि
(वर्णादिभेदात्संज्ञाः स्युः) शबलीधवला (दयः) ॥ ६७ ॥
दो वर्ष की / एक वर्ष की
द्विहायनी द्विवर्षा (गौ) रेकाब्दा (त्वे) कहायनी ।
चारवर्ष की / तीनवर्ष की
चतुरब्दा चतुर्हायण्ये (वं) त्र्यब्दा त्रिहायणी ॥ ६८ ॥

वेति—वर्ण आदिर्येषामिति आदिना प्रमाणावयवादिग्रहस्तेषां भेदाद्विशेषात् (शबलयोगाद्) " अन्यतोङीषिति " ङीषि शबली, धवलयोगाद् अनुदात्तत्वाभावात् ङीप् धवला ते आदी यासामिति ताः संज्ञाः स्युः । आदिना कृष्णा, कपिला, पाटला इत्यादयः, प्रमाणभेदाद्—दीर्घा, ह्रस्वा, खर्वा, वामनी इत्यादयः, अङ्गभेदात्—पिङ्गाक्षी, लम्बकर्णी, वक्रशृङ्गीत्यादयो गृह्यन्ते इति शबलादीनामेकैकम् । गौर्द्विवर्षा चेत्तदा द्विहायनी स्यात् । द्वौ हायनौ यस्या इति द्विहायनी, द्वे वर्षे वयःप्रमाणमस्या इति द्विवर्षा इति द्वे द्विवर्षायाः । एकाब्दा एकवर्षा चेत्तदा तु एकहायनी स्यात् । एकोऽब्दो यस्या इति एकाब्दा, एकोहायनोयस्या इति एकहायनी इति द्वे एकाब्दायाः । चतुरब्दा चेत्तदा चतुर्हायणी स्यात् । चत्वारोऽब्दा यस्या इति चतुरब्दा, चत्वारो हायना यस्या इति चतुर्हायणी इति द्वे चतुर्वर्षायाः । एवं त्र्यब्दा चेत्तदा त्रिहायणी स्यात् । त्रयोऽब्दा यस्या इति त्र्यब्दा, त्रयो हायना यस्या इति त्रिहायणी इति द्वे त्रिवर्षायाः ॥ ६७ । ६८ ॥

बहिला गिरेगर्भ / वाली गर्भिणी
वशा वन्ध्यावतोका (तु) स्रवद्गर्भा (थ) संधिनी ।
[illegible] समय / [illegible] के पास / [illegible]
(आक्रान्ता वृषभेण) (थ) वेहद्गर्भोपघातिनी ॥ ६९ ॥

वेति—वष्टीति वशा " वशा नार्यां वन्ध्यगव्यां हस्तिन्यां दुहितर्यपि " (इति हैम) [illegible] इति द्वे वत्सविहीनायाः, " बहिला " इति ख्यातायाः । अवगतं तोकमपत्यं यस्या अवतोका, स्रवन्गर्भोयस्याः स्रवद्गर्भा इति द्वे स्रवद्गर्भायाः । [illegible] आक्रान्ता सा सन्धानं सन्धा गर्भाधानमस्त्यस्याः सन्धिनी स्यात् " [illegible] धिषाम् " (इति मेदिनी) इत्येकं [illegible] गर्भोपघातिनी इति द्वे [illegible] ॥

गर्भधारनेयोग्य, गाभिनकलोर या ओसर सांधी बहुतबार ब्यानी
स. स. स. म.
काल्योपसर्या (प्रजने) प्रष्ठौही बालगर्भिणी ।
स. स. स स.
(स्याद) चण्डी (तु) सुकरा बहुसूतिः परेष्टुका ॥ ७० ॥

केति—प्रजने गर्भग्रहणे काल्या प्राप्तकाला चेत्तदा उपसर्यते वृषेणेति उपसर्या स्यादित्येकं गर्भग्रहणयोग्यायाः । प्रष्ठं वहतीति प्रष्ठौही, पृषोदरादित्वाद्रलोपे पष्ठौही-त्यपि, बाला चासौ गर्भिणी चेति बालगर्भिणी इति द्वे प्रथमं गर्भं धृतवत्याः । न चण्डी अचण्डी, सु सुखं करोति, सुक्रियते वा सुकरा स्यादिति द्वे सुशीलायाः । बह्वी सूतिर्यस्या बहुसूतिः, परमिच्छति, परैरिष्यते वा परेष्टुः सैव परेष्टुका इति द्वे बहुप्रसूतायाः ॥ ७० ॥

बकेनि नई ब्यानी दुहने में सांधी मोटे थनवाली
स. स. स. स.
चिरसूता वष्कयिणी धेनुः (स्या) न्नवसूतिका ।
स. स. स. स.
सुव्रता सुखसन्दोह्या पीनोध्नी पीवरस्तनी ॥ ७१ ॥

चीति—चिरंसूता चिरसूता, वष्कते, गच्छति इति बाहुलकादयनि प्रत्यये वष्कयस्त-रुणवत्सः सोऽस्त्यस्याः वष्कयिणी स्यात् । शाकटायनमते तु वष्कयस्त्वेकहायनोवत्स-स्तेन नीयते ' संपदादित्वाद्गौरादित्वाच्च वष्कयणी इकाररहित उपान्त्योऽपि, इति द्वे वष्कयिण्याः " बकेनि " इति ख्यातायाः । धीयते, इति धेनुः, " धेनुर्गोमात्रके दोग्ध्र्याम् " (इति हेम.) नवं सूतं प्रसवोऽस्या नवसूतिका इति द्वे नवप्रसूतायाः । शोभनं व्रतमस्याः सुव्रता, सुखेन संदुह्यते, इति सुखसंदोह्या इति द्वे सुव्रतायाः । पीन-मूधोऽस्याः पीनोध्नी, पीवराः स्तना यस्याः पीवरस्तनी इति द्वे पीवरस्तनवत्याः ॥ ७१ ॥

द्रोण भर दूध देनेवाली, गिरवी धरीहुई बरसाबरस
स. स. स.
द्रोणक्षीरा द्रोणदुघा धेनुष्या (बन्धके स्थिता) ।
स.
समां समीना (सा यैव प्रतिवर्षं प्रसूयते) ॥ ७२ ॥

द्रेति—द्रोणपरिमितं क्षीरमस्या द्रोणक्षीरा, द्रोणं दोग्धीति द्रोणदुघा इति द्वे द्रोणपरिमितक्षीरायाः । या बन्धके स्थिता सा धेनुष्या स्यात् " संज्ञायां धेनुष्या " (४ । ४ । ८९) इति साधुरित्येकं बन्धकस्थितायाः । या प्रतिवर्षं प्रसूयते सा गौः समांसमीना स्यात् । समायां समायां विजायते "समां समां विजायते ५ । २ । १२" इति सूत्रेण खप्रत्यये [illegible] पूर्वपदे यलोपश्च निपात्यते ' समांसमीना ' [illegible] ॥ ७२ ॥

अयन न. न. पु.

खूंटा ऊध (स्तु क्लीब) मापीनं (समौ) शिवककीलकौ।

नोइन स.न. न. स. स.

गेराव (न पुंसि) दाम संदानं पशुरज्जु (स्तु) दामनी ॥७३॥

वितिः—वहति, उनत्ति वा असुनिप्रत्यये "ऊधसोऽनङ्" इत्यादिनिर्देशादूधादेशे च ऊधः क्लीवं स्यात्। आप्यायतेस्म आपीनं स्यादिति द्वे क्षीराशयस्य। शेतेऽत्र, श्यति गात्रकण्डूमिति वा शिवः स एव शिवकः, कील्यतेऽत्रेति कीलः स एव कीलकः उभौ समौ समानार्थौ समानलिङ्गौ च स्यातामिति द्वे "कीलकस्य" पशुबन्धनकाष्ठस्य "खूंटा" इति ख्यातस्य। द्यति, दीयते वा दाम पुंसि न स्यात्, सन्दीयते, सन्दानमिति द्वे दोहनकाले पादबन्धनरज्जोः "नोइन" इति ख्यातायाः। पशुबन्धनी रज्जुः शाकपार्थिवादित्वात् पशुरज्जुः। दामैव प्रज्ञाद्यणि, अन्निति प्रकृतिभावे, टिड्ढेति ङीपि च दामनी केषांचिन्मते तु बन्धनीति पाठः इति द्वे पशुबन्धनरज्जोः ॥ ७३ ॥

पु. पु. पु. पु. पु.

मथानी या रई वैशाखमन्थमन्थानमन्थानोमन्थदण्डके।

खंभा पु. पु. स. स.

महेड़ा कुठरो दण्डविष्कम्भे मन्थनी गर्गरी (समे) ॥ ७४ ॥

वाव्रिति—विशाखा प्रयोजनमस्येति वैशाखः "वैशाखो मासभेदेऽपि मन्थाने च प्रकीर्तितः" (इति मेदिनी) मथ्यतेऽनेनेति मन्थः "मन्थोरवौ मथि। साक्तवे नेत्ररोगे च" (इति हैमः) मन्थनशीलो मन्थानः, मथ्यतेऽनेनेति मन्था, मन्थस्य दण्डो मन्थदण्डः स एव मन्थदण्डकः इति पञ्च मन्थानस्य "मथानी" इति ख्यातायाः। दण्डविष्कम्भे कुठरः स्यात्। कुठतीति बाहुलकादरप्रत्यये कुठरः, कुटतीति विग्रहे तु कुटरोऽपि, दण्डं विष्कभ्नातीति दण्डविष्कम्भः स्यादिति द्वे मन्थबन्धनकाष्ठस्य, मन्थदण्डाधारककाष्ठस्य वा। मथ्यतेऽस्यामिति मन्थनी, गिरति बाहुलकाद्गरटि प्रत्यये 'गर्ग' इति शब्दं गतीति वा गौरादित्वात् गर्गरी उभे समे समानार्थे स्यातामिति द्वे मन्थनपात्रस्य ॥ ७४ ॥

पु. पु. पु. पु. पु.

ऊँट, ... उष्ट्रे क्रमेलकमयमहाङ्गाः करभः (शिशुः)।

[illegible]

[illegible] पु.

(करभाःस्युः) शृङ्खलका (दारवैः पादबन्धनैः) ॥७५॥

[illegible]—ओषति, उच्यते वा उष्ट्रः, [illegible] प्रत्यये क्रम, [illegible]

[illegible] मीनाति, मयते वा मयः "[illegible]

शिल्पिनि दैत्यानां करभेऽश्वतरेऽपि च" (इति मेदिनी) महान्त्यङ्गानि यस्येति महाङ्गः इति चत्वार्युष्ट्रस्य " ऊंट " इति ख्यातस्य । अस्य शिशुः सुतः किरति कीर्यते वा करभः स्यात् " करभो मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते " (इति मेदिनी) इत्येकमुष्ट्रशिशोः । दारवैः काष्ठमयैः पादबन्धनैर्युक्ताः करभाः शृङ्खलं बन्धनं येषामिति 'कनि' शृङ्खलकाः स्युरित्येकं दारुविकारशृङ्खलाप्रायबन्धनयुक्तकरभस्य ॥ ७५ ॥

स. स. पु. पु. पु. पु. पु.

बकरी बकरा **अजा छागी स्तभच्छागबस्तछगलका अजे ।**

पु. पु. पु. पु. पु. पु. पु.

भेंड़ा **मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके ॥ ७६ ॥**

अजेति–अजति, न जायते वा टापि अजा " अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे " (इति हेमः) छयति, छायते वा जातित्वात् छागी इति द्वे अजायाः " बकरी " इति ख्यातायाः । अजे स्तभच्छागबस्तछगलकाः स्युः स्तभ्नोतीति मूलविभुजादित्वात् के स्तभः तोभते, शोभते वेति विग्रहे तु इगुपधत्वात् के तुभः, शुभोऽपि, बस्तयतीति बस्तः, छायते, इति छगलः स एव छगलकः, अजतीति पचाद्यचि अजः स्यादिति पञ्च छगलस्य " छगड़ा–बकरा वा " इति ख्यातस्य । एडके मेढ्रोरभ्रोरणोर्णायुमेषवृष्णयः स्युः । मेहतीति मेढ्रः, उरुभ्रमति डे, पृषोदरादित्वात् उना शंभुनारभ्यते वा उरभ्रः, ऋच्छति, अर्यते वा उरणः, ऊर्णा अस्येति ऊर्णायुः, मिषति घचि मेषः, वर्षतीति वृष्णिः, इलति, एलयति वा ण्वुलि डलयोरैक्यात् एडकः इति सप्त मेढ्रस्य "भेड़ा" इति ख्यातस्य ॥ ७६ ॥

न. न. न.

ऊंट, भेड़, **(उष्ट्रोरभ्राजवृन्दे स्या) दौष्ट्रकौरभ्रकाजकम् ।**

बकरों का पु. पु. पु. पु. पु.

समूह गदहा **चक्रीवन्त(स्तु)वालेया रासभा गर्दभाः खराः ॥ ७७ ॥**

विति–उष्ट्रोरभ्राजवृन्दे औष्ट्रकौरभ्रकाजकं स्यात् । उष्ट्राणां समूहः 'वुञ्' औष्ट्रकं स्यादित्येकमुष्ट्रसमुदायस्य । उरभ्राणां समूह औरभ्रकं स्यादित्येकं मेषसमूहस्य । अजानां समूह आजकं स्यादित्येकं बस्तवृन्दस्य । चक्रवद्भ्रमणं चक्रं तदस्त्येषामिति चक्रीवन्तः, बलये उपसंहाराय संहिताः बलेरपत्यानि वा वालेयाः " वालेयो गर्दभे पुंसि मृदौ बलिहिते त्रिषु " (इति मेदिनी) रासन्ते रासभाः, गर्दन्तीति गर्दभाः " गर्दभं श्वेतकुमुदे गर्दभो गन्धभिद्यपि । रासभे गर्दभी क्षुद्रजन्तुरोगप्रभेदयोः " (इति विश्व.) खं मुखरिन्द्रमतिशयितमेषामिति खराः " खरो रक्षोन्तरे तीक्ष्णे [illegible] रासभेऽपि च " (इति हेमचन्द्रः) इति पञ्च गर्दभस्य ॥ ७७ ॥

[illegible] ५।१।१२६" । [illegible] अत्र छन्दांसि केचिदनुवर्तयन्ति । उक्तं चैतत् [illegible] " [illegible] ॥

पु. पु. पु. पु. पु.
बनिया या **वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्।**
पु. पु. पु.
साहूकार **पण्याजीवो(ह्या)पणिकः क्रयविक्रयिक(श्च सः) ॥७८॥**

वाणिगिति–विदेहेषु भवो, विदेग्धि, वै निश्चितो देह उपचयो यस्येति वा वैदेहक, "वैदेहको वाणिजके शूद्राद्वैश्यासुतेऽपि च" (इति विश्व.) सार्थं वहतीति सार्थवाहः, निगमे भवो नैगमः "नैगम. स्यादुपनिषद्वणिजोर्नागरेऽपि च" (इति मेदिनी) संज्ञापूर्वकत्वाद्वृद्ध्यभावे निगमोऽपि "निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे" (इति विश्वः) पणते, इति वणिक् प्रज्ञाद्यणि तु वाणिजः, अणोऽभावे तु वणिक्, पणते पण्यम् पण्यमाजीवो यस्येति पण्याजीवः, आपणनमापणो व्यवहारोऽस्यास्तीति आपणिकः, य. 'आपणिकः' स. क्रयविक्रयाभ्यां जीवतीति क्रयविक्रयिकः स्यादित्यष्टौ सार्थवाहस्य "साहूकार" इति ख्यातस्य ॥ ७८ ॥

पु. पु. पु. पु.
बेचनेवाले खरीदनेवाले **विक्रेता (स्या) द्विक्रयिकः क्रायकः क्रयिकः (समौ)।**
न. स. न. पु. पु.
बनियापन मोल **वाणिज्यं(तु)वणिज्या(स्यान्)मूल्यं वस्नोऽप्यवक्रयः॥७९॥**

वीति–विक्रीणातीति विक्रेता, विक्रयेण जीवतीति विक्रयिकः स्यादिति द्वे विक्रयिकस्य। क्रीणातीति क्रायक., क्रयेण जीवतीति क्रयिकः उभौ समौ समानार्थौ स्याताम् इति द्वे क्रयिकस्य। वणिजां कर्म वाणिज्यम्, वणिजो भावः, वणिजि साधुर्वा वणिज्या स्यात्। स्त्रीत्वं स्वभावादिति माधवः इति द्वे वणिक्कर्मणः। मूलेनानाम्यं मूल्यम्, वसत्यत्रेति वस्नः "वस्नं वस्त्रे धने मूल्ये भृतौ" (इति हेमचन्द्र.) त्रीणि मूल्यस्य ॥ ७९ ॥

स. पु. न. पु. न. न.
पूंजी या मूर लाभ या नफा **नीवी परिपणो मूलधनं लाभोऽधिकं फलम्।**
न. पु. पु. पु.
अदला बदला **परिदानं परीवर्तो नैमेयनिमया (वपि) ॥ ८० ॥**

नीवि–नितरां विन्वति, नितरां व्ययति वा "नौव्योर्यलोप. पूर्वस्य च दीर्घः" इति डिणि, यलोपे, दीर्घे च कृदिकारादिति विकल्पनान् नीवी, नीविरपि, "नीवी परिपणे ... । मूलद्रव्ये परिपणो" (इति विश्वः) परिपण्यते ...

१ ... [illegible] ॥
२ ... [illegible]

प्रयुज्यते इति परिगणाः, मूलं च तद्धनं चेति मूलधनमिति त्रीणि मूलधनस्य । लभ्यत इति लाभः, अध्यारूढम् अधिकमिति साधु, फलतीति फलम् " फलं हेतुकृते जातीफले फलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः । फली, फलिन्याम् " (इति हेमः) इति त्रीणि लाभस्य । परिवृत्य दत्तं परिदानम्, " प्रतिदानमिति वा पाठः " परिवर्तनं परीवर्तः, निमानं निमेयः प्रज्ञाद्यणि तु निमेय एव नैमेयः, निमीयते निमयः उभावपि स्यातामिति चत्वारि परिदानस्य " अदला बदला " इति ख्यातस्य ॥ ८० ॥

धरोहरि धरना, धरोहरि देना, बेचनेकी वस्तु, खरीदने की वस्तु

पु. पु. न. न.
(पुमानु) पनिधिर्न्यासः प्रतिदानं (तदर्पणम्) ।
पु.स न. पु.म.न.
(क्रये प्रसारितं) क्रय्यं क्रेयं (क्रेतव्यमात्रके) ॥ ८१ ॥

विवृति—उपनिधीयत इति उपनिधिः पुमान् स्यात् । न्यस्यते, न्यसनं वा न्यासः इति द्वे निक्षेपस्य "धरोहरि" इति ख्यातायाः । तदर्पणं प्रतिदानं स्यात् । प्रतीपं दत्तं प्रतिदानम् , अर्पितमर्पणम् तस्य अर्पणं तदर्पणमिति द्वे स्वामिने निक्षेपार्पणस्य । क्रये क्रयविक्रयस्थाने ग्राहका गृह्णीयुरिति बुद्ध्या यत् प्रसारितं वस्तु तत् क्रीयते इति क्रय्यं " क्रय्यस्तदर्थे " (६ । १ । ८२) इति साधु इत्येकं " ग्राहका गृह्णीयुः " इति बुद्ध्यापणे प्रसारितस्य । क्रेतव्यमात्रके क्रयणार्हे क्रेयं स्यादित्येकं हट्टे प्रसारणायोगस्य ॥ ८१ ॥

बिकाऊ वस्तु

पु स.न. पु.स.न. पु स.न.
विक्रेयं पणितव्यं (च) पण्यं (क्रय्यादयस्त्रिषु) ।
न. पु. स.
(क्लीबे)सत्यापनंसत्यंकारःसत्याकृतिः(स्त्रियाम्)॥८२॥

बयाना

वीति—विक्रीयते इति विक्रेयम्, पण्यते इति पणितव्यम् यति प्रत्यये तु पण्यते इति पण्यम् , 'अवद्यपण्येति' साधु इति त्रीणि विक्रयाक्रियाकर्मणः । क्रय्यादयः पण्यान्तास्त्रिषु त्रिलिङ्गयां भवन्तीति । सत्यापितं सत्यापनं क्लीबे नपुंसके स्यात् सत्यापयति विग्रहे तु ण्यासेति युचि सत्यापना स्यात् " सत्यापना सत्याकृतिः " (इति स्त्रीकाण्डे चोपालितः) सत्यस्य करणं सत्यंकार. क्तिनि, डाचि च प्रत्यये तु सत्यस्य करणं सत्याकृतिः स्त्रियां स्यादिति त्रीणि सत्याकृतेः ' साई ' इति ख्यातायाः ॥ ८२ ॥

[illegible] पु. पु.
विपणो विक्रयः(संख्याःसंख्येयेह्यादशत्रिषु) ।
विंशत्याद्याःसदैकत्वेसर्वाःसंख्येयसंख्ययोः ॥ ८३ ॥

१ [illegible], [illegible], [illegible], [illegible], [illegible], [illegible], दशलाख, करोड़, दशकरोड़, अर्ब, [illegible] [illegible], [illegible], [illegible], [illegible], [illegible], [illegible], और दशशङ्ख. आदि गिनती होती है

पु. पु. पु. पु. पु.

बनिया या — **वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।**

पु. पु पु.

साहूकार — **पण्याजीवो(ह्या)पणिकः क्रयविक्रयिक(श्च सः) ॥७८**

वायिति—विदेहेषु भवो, विदेग्वि, वै निश्चितो देह उपचयो यस्येति वा वैदेहक "वैदेहको वाणिजके शूद्राद्वैश्यासुतेऽपि च" (इति विश्व.) सार्थं वहतीति सार्थवाह., निगमे भवो नैगमः "नैगमः स्यादुपनिषद्वणिजोर्नागरेऽपि च" (इति मेदिनी) संज्ञापूर्वकत्वादवृद्ध्यभावे निगमोऽपि "निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे" (इति विश्वः) पणते, इति वणिक् प्रज्ञाद्यणि तु वाणिजः, अणोऽभावे तु वणिज पणते पण्यम् पण्यमाजीवो यस्येति पण्याजीवः, आपणनमापणो व्यवहारोऽस्यास्ति आपणिकः, यः 'आपणिकः' स. क्रयविक्रयाभ्यां जीवतीति क्रयविक्रयिकः स्यादिति सार्थवाहस्य "साहूकार" इति ख्यातस्य ॥ ७८ ॥

पु. पु. पु. पु.

बेचनेवाले, खरीदनेवाले — **विक्रेता (स्या) द्विक्रयिकः क्रायकः क्रयिकः (समौ)**

न. स. न. पु. पु.

बनियापन, मोल — **वाणिज्यं (तु) वणिज्या (स्यान्) मूल्यं वस्नोऽप्यवक्रयः ॥७**

वीति—विक्रीणातीति विक्रेता, विक्रयेण जीवतीति विक्रयिकः स्यादिति द्वे विक्रे कस्य । क्रीणातीति क्रायक., क्रयेण जीवतीति क्रयिकः उभौ समौ समानार्थौ स्यात मिति द्वे क्रयिकस्य । वणिजां कर्म वाणिज्यम्, वणिजो भावः, वणिजि साधु वणिज्या स्यात् । स्त्रीत्वं स्वभावादिति माधवः इति द्वे वणिक्कर्मणः । मूल्येनानाम्य मूल्यम्, वसत्यत्रेति वस्नः "वस्नं वस्त्रे धने मूल्ये भृतौ" (इति हेमचन्द्रः) इति त्रीणि मूल्यस्य ॥ ७९ ॥

स. पु. न. पु. न. न.

पूंजी या मूर — **नीवी परिपणो मूलधनं लाभोऽधिकं फलम् ।**

लाभ या नफा

न. पु. पु. पु.

अदला बदला — **परिदानं परीवर्तो नैमेयनिमया (वपि) ॥ ८० ॥**

नीति—निनर्गमिन्यति, नितरां व्ययति वा "नौव्योयलोपः पूर्वस्य च दीर्घः" इति इणि, यलोपे, दीर्घे च कृदिकारादितिविकल्पनात् नीवी, नीविरपि, "नीवी स्त्री [illegible] । मूलद्रव्ये परिपणो" (इति विश्वः) परिपण्यते [illegible]

[illegible] "[illegible] भाषते" ॥

[illegible]

प्रयुज्यते इति परिपणः, मूलं च तद्धनं चेति मूलधनमिति त्रीणि मूलधनस्य । लभ्यत इति लाभः, अध्यारूढम् अधिकमिति साधु, फलतीति फलम् "फलं हेतुकृते जातीफले फलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः । फली, फलिन्याम्" (इति हैमः) इति त्रीणि लाभस्य । परिवृत्य दत्तं परिदानम्, "प्रतिदानमेति वा पाठः" परिवर्तनं परीवर्तः, निमानं निमेयः प्रज्ञाद्यणि तु निमेय एव नैमेयः, नेमीयते निमयः उभावपि स्यातामिति चत्वारि परिदानस्य "अदला बदला" इति ख्यातस्य ॥ ८० ॥

धरोहरि धरना / धरोहरि देना / बेचनेकी वस्तु / खरीदने की वस्तु

पु. पु. न. न.
(पुमान्‌) उपनिधिर्न्यासः प्रतिदानं (तदर्पणम्) ।

पु.स.न. पु.म.न.
(क्रये प्रसारितं) क्रय्यं क्रेयं (क्रेतव्यमात्रके) ॥ ८१ ॥

उपेति—उपनिधीयत इति उपनिधिः पुमान् स्यात् । न्यस्यते, न्यसनं वा न्यासः इति द्वे निक्षेपस्य "धरोहरि" इति ख्यातायाः । तदर्पणं प्रतिदानं स्यात् । प्रतीपं दत्तं प्रतिदानम्, अर्पितमर्पणम् तस्य अर्पणं तदर्पणमिति द्वे स्वामिने निक्षेपार्पणस्य । क्रये क्रयविक्रयस्थाने ग्राहका गृह्णीयुरिति बुद्ध्या यत् प्रसारितं वस्तु तत् क्रीयते इति क्रय्यं "क्रय्यस्तदर्थे" (६ । १ । ८२) इति साधु इत्येकं "ग्राहका गृह्णीयुः" इति बुद्ध्यापणे प्रसारितस्य । क्रेतव्यमात्रके क्रयणार्हं क्रेयं स्यादित्येकं हट्टे प्रसारणायोगस्य ॥ ८१ ॥

पु स.न पु.स.न. पु स.न.
बिकाऊ वस्तु **विक्रेयं पणितव्यं (च) पण्यं (क्रय्यादयस्त्रिषु) ।**

न. पु. स.
बयाना **(क्लीबे)सत्यापनंसत्यंकारःसत्याकृतिः(स्त्रियाम्)॥८२॥**

वीति—विक्रीयते इति विक्रेयम्, पण्यते इति पणितव्यम् यति प्रत्यये तु पण्यते इति पण्यम्, 'अवद्यपण्येति' साधु इति त्रीणि विक्रयक्रियाकर्मणः । क्रय्यादयः पण्यान्तास्त्रिषु त्रिलिङ्गा भवन्तीति । सत्यापितं सत्यापनं क्लीबे नपुंसके स्यात् सत्यापयति विग्रहे तु णयासेति युचि सत्यापना स्यात् "सत्यापना सत्याकृतिः" (इति स्त्रीकाण्डे घोषपालितः) सत्यस्य करणं सत्यंकारः क्तिनि, डाचि च प्रत्यये तु सत्यस्य करणं सत्याकृतिः स्त्रियां स्यादिति त्रीणि सत्याकृतेः 'साई' इति ख्यातायाः ॥ ८२ ॥

बेचना बिक्री पु. पु.
१ से १८, **विपणो विक्रयः(संख्याः संख्येये ह्यादश त्रिषु) ।**
१९ से ९९ तक [illegible] **विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥ ८३ ॥**

---

१ [illegible] ॥

वीति—विपणनं विपणः संज्ञापूर्वकत्वान्न वृद्धिः, विक्रयणं विक्रयः इति द्वे विक्र- क्रियायाः । आदश-दशन्ति, दश्यन्ते वा बाहुलकात्कनिन्, दशशब्दमभिव्याप्य एकादिकाः नवदशपर्यन्ताः संख्याः त्रिषु त्रिलिङ्गयां भवन्तीति एकाद्याः दशान्ताः संख्या संख्येयेषु वर्तमानास्त्रिलिङ्गाः स्युः । यथा एकः पटः, एका शाटी, एकं कुण्डम्, दश पटाः दश स्त्रियः, दश कुण्डानि आदशेति अष्टादशान्ता (इति क्षीरस्वामी) आदशेति दश शब्दश्रुतिपर्यन्तमष्टादशं यावत् संख्या एकादिकाः संख्येये द्रव्ये वर्तन्ते, हिरवधार तेन सामानाधिकरण्ये नैव तासां वृत्तिरित्यर्थः । यथा 'एको विप्रः' 'दश विप्राः' इति, नतु वैयधिकरण्येन वृत्तिरिति, नतु एको विप्रस्य, दश विप्राणामित्यादिरिति मुकुटः । विंशतिः आद्या यासान्ताः सर्वाः संख्याः संख्येयसंख्ययोः वर्तमानाः सः एकत्वे स्युः नित्यमेकवचनान्ता भवन्तीति—विंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यायां नित्यमेकवचनान्ता एव वर्तन्ते । "यद्भाष्यम्—आदशभ्यः संख्या संख्येये वर्तते, ऊर्ध्वं संख्याने संख्येये च" इति । विंशतिः पटाः विंशतिः पटानाम् । शतं गावः, शतं गवामिति क्षीरस्वामी (वाचस्पतिरप्याह) "ऊनविंशत्यादिकास्तु सदा संख्येयसंख्ययोः" (इति हेमचन्द्रः) तथा च "मुकुटः" विंशत्याद्यास्तु संख्या शब्दा एकत्वे वर्तमानाः संख्येये संख्याने च वर्तन्ते यथा विंशतिर्घटाः, विंशतिर्घटानाम्, शतं गावः, शतं गवामिति सद्भिः सुधीभिरेवाकलनीयम् ॥ ८३ ॥

संख्यार्थे द्विबहुत्वेस्तस्तासु चानवतेः स्त्रियः ।
पङ्क्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम् ॥ ८४ ॥

समिति—विंशत्यादीनां यदा संख्यार्थस्तदा द्विबहुत्वे द्विवचनबहुवचनेऽपि स्तः । संख्यामात्रार्थे वर्तमानायाः विंशत्यादेः संख्याया द्विवचनबहुवचने अपि स्यातामित्यर्थः । यथा द्वे विंशती, तिस्रो विंशतयः । गवां विंशती, गवां विंशतयः (इति क्षीरस्वामी) यदा तु भेदविवक्षायां संख्यान्तरस्यार्थेऽभिधेये विंशत्यादयो वर्तन्ते, तदा तत्सामानाधिकरण्यादुपचारेण तेभ्यो द्विवचनबहुवचने अपि भवतः । यथा द्वे विंशती, तिस्रो विंशतयः इति । सामानाधिकरण्याभावेऽपि "गवां विंशती, गवां विंशतयः" इति मुकुटोऽपि व्याख्यातवानिति । तासु विंशत्यादिषु आनवतेः नवतिमभिव्याप्य स्त्रीलिङ्गा भवन्तीति यथा विंशत्या पुरुषैः कृतम्, विंशतिः कुण्डानीति । पङ्क्तिः दश [illegible] "पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्" (५ । १ । ५९) इति एते रूढि शब्दा निपात्यन्ते । [illegible] [illegible] क्रमात् [illegible] । यथा दश पङ्क्तयः शतम्, [illegible] [illegible] ॥ ८४ ॥

तौल या नाप न. न. न. न.
तौल के भेद **यौतवं द्रुवयं पाय्य (मिति) माना (र्थकं त्रयम्)।**
घुघुची से स. स. पु. पु.
माशातक **(मानं) तुलाङ्गुलिप्रस्थैः (गुञ्जाः पञ्च) त्वाद्यमाषकः ॥८५॥**

यावितिः—युतं, यौतीति वा योतुः शोधनं, शोधको वा तस्येदं यौतवम्, द्रोर्विकारो द्रुवयम् "माने वयः" इति साधु, मीयतेऽनेनेति पाय्यम् "पाय्यसांनाय्येति" साधु इति त्रयं मानमर्थो यस्येति मानार्थकं स्यादिति त्रीणि मानार्थकस्य । अथ मानभेदानाह— तोल्यतेऽनयेति तुला "अङि" अतुलोपमाभ्यामिति निर्देशाद्गुणाभावः, अङ्गतीति अङ्गुलिः, प्रस्थीयतेऽनेनेति प्रस्थस्तैर्मानं त्रिविधं स्यादिति तुलामानम्, अङ्गुलिमानम्, प्रस्थमानं चेति मानत्रयस्य । पञ्च गुञ्जाः मष्यतेऽनेनेति माषः "माषो व्रीह्यन्तरे मूर्खे मानत्वग्दोषभेदयोः" (इति मेदिनी) शास्त्रीयत्वात् माष एव माषकः आद्यश्चासौ मापकश्चेति आद्यमापकः स्यादित्येकं माषस्य "माशा" इति ख्यातस्य॥८५॥

तोला, चार पु. पु न. न.
तोला, अस्सी **(ते षोडशा) क्षः कर्षो (ऽस्त्री) पलं (कर्षचतुष्टयम्)।**
घुघुची भर, या पु.न. पु.न. पु.
मोहर भर, पल **सुवर्णबिस्तौ (हेम्नोऽक्षे) कुरुबिस्त (स्तु तत्पले)॥८६॥**

तयितिः—ते षोडश माषाः अक्षतीति अक्षः "अक्षो रथस्यावयवे व्यवहारे विभीतके । सायके शकटे कर्षे ज्ञाने चात्मनि रावणौ । अक्षं सौवर्चले तुत्थे हृषीके स्यात्" (इति हेमचन्द्रः) कर्षतीति कर्षः अस्त्री पुंनपुंसकं स्यात् "कर्षो ना कर्षणे मानप्रभेदे पुंनपुंसकम्" (इति मेदिनी) इति द्वे कर्षस्य । कर्षचतुष्टयं पलं स्यात् । पलतीति पलम् "पलमुन्मानमांसयोः" (इति हैमः) कर्षाणां चतुष्टयं कर्षचतुष्टयमिति द्वे पलस्य । हेम्नोऽक्षे सुवर्णबिस्तौ स्याताम् । शोभनो वर्णः, स्तुतिर्वा यस्येति सुवर्णः "सुवर्णं स्वर्णबिस्तयोः" इति रुद्रात्क्लीबमपि "सुवर्णो ना स्वर्णकर्षे सुवर्णं च सत्वान्तरे । स्त्री कृष्णागुरुणि क्लीबे काञ्चने हरिचन्दने" (इति विश्वः) बिस्यते स्म बिस्तः उभौ स्यातामिति द्वे स्वर्णकर्षस्य । तस्य हेम्नः पले तत्पले कुरुवु बिस्तः कुरुबिस्तः स्यादित्येकं स्वर्णपलस्य ॥ ८६ ॥

स्त्री. पु.
सौपल, बीसतुला **तुला (स्त्रियां पलशतं) भारः (स्याद्विंशतिस्तुला)।**
दश भार पु.न. पु.
गाडीभर भार **आचितो (दश भाराः स्युः) (शाकटो भार) आचितः॥८७॥**

१ यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः । यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते । माषो गुञ्जाभिरष्टाभिः दशभिर्वा भवेत्क्वचित् । चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च । गद्याणो माषकैः षड्भिः कर्षः [illegible] स्याद्दशमाषकः । चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः । चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मताः [illegible] पांच रत्ती का "मासा" होता है और चरक या सुश्रुत आदि के मान में [illegible] रत्ती का मासा कहा है।

त्विति—पलानां शतं पलशतं तोलति, तोलयति वा तुला स्त्रियां स्यात् "तुला सादृश्यमानयोः । गृहाणां दारुबन्धाय पीठिकायामपीष्यते । राशौ पलशते भाण्डे तुलं स्याद्ब्रह्मदारुणि । आकाशे च पिचौ न स्त्री " (इति विश्वः) इत्येकं श पलस्य । विंशतिस्तुला भ्रियते इति भारः स्यात् " भारः स्याद्वीवधे विष्णौ पल द्विसहस्रके " (इति मेदिनी) क्रादेर्दीर्घान्तादप्प्रत्यये तु भरोऽपि स्यादित्येकं विंश तुलायाः । दश भाराः आचीयते स्म आचितः स्युः "आचितः शकटोन्मेये पलानां युतद्वये " (इति विश्वः) इत्येकं दशभारस्य । शकटेन उह्यते इति शाकटः भारो 'आचितः ' स्यादित्येकं शाकटभारस्य ॥ ८७ ॥

पु. पु. पु.

रुपया-पैसा **कार्षापणः कार्षिकः (स्यात्) (कार्षिके ताम्रिके) पणः**

केति—कर्षस्यायं कार्षः, आपणनमापणः कार्षस्य कार्षेण वा आपणः कार्षापणः " कार्षापणोऽस्त्री कार्षिके पणषोडशकेऽपि च " (इति मेदिनी) कर्षस्यायं कार्षिकः स्यादिति द्वे रजतरूप्यस्य । ताम्रिके कार्षिके पणायतेऽनेनेति पणः स्यात् " पणो वराटमाने स्यान्मूल्ये कार्षापणे ग्रहे । क्रय्यशाकादिके द्यूते व्यवहारे भृतौ धने " (इति विश्वमेदिन्यौ) इत्येकं ताम्रकृतकार्षापणस्य । तुलामानमुक्तम् , अङ्गुलिमानं हस्तादि नरवर्गे प्रोक्तमेवेति द्रष्टव्यम् ॥ $\frac{1}{2}$ ॥

प्रस्थमानं त्वाह—

आढक आदि मान विशेष **अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥ ८८ ॥**
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।

१ " न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् । अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया । चरकस्य मत वैद्यैराद्यैर्यस्मान्मत ततः । विहाय सर्वमानानि मागधं मानमुच्यते । त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः । त्रसरेणुस्तु पर्यायनाम्ना वंशी निगद्यते । जालान्तरगतैः सूर्यकरैर्वंशी विलोक्यते । षड्वंशीभिर्मरीचिः स्यात्ताभिःषड्भिश्च राजिका । तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः । यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् । षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधानकौ । माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते । टङ्कः स एव कथितस्तद्द्वय कोल उच्यते । क्षुद्रको वटकश्चैव द्रंक्षणः स निगद्यते । कोलद्वयं तु कर्षः स्यात्स प्रोक्तः पाणिमानिका । अक्षः पिचुः पाणितल किंचित्पाणिश्च तिन्दुकम । बिडालपदकं चैव तथा षोडशिका मता । करमध्यो हंसपद सुवर्णं कवलग्रहः । उदुम्बरं च पर्यायैः कर्षमेव निगद्यते । स्यात्कर्षाभ्यामर्धपलं शुक्तिरष्टमिका तथा । शुक्तिभ्यां च पल ज्ञेय मुष्टिराम्रं चतुर्थिका । प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कीर्त्यते । पलाभ्यां प्रसृतिर्ज्ञेया प्रसृत च निगद्यते । प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्धशरावकः । अष्टमानं च स ज्ञेयः कुडवाभ्यां च मानिका । शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः । शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकः । भाजनं कांस्यपात्रं च चतुःषष्टिपलश्च सः । चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः । उन्मानं च घटो राशिर्द्रोणपर्यायसंज्ञितः । द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिः शरावकः । शूर्पाभ्यां च भवेद्द्रोणी वाहो गोणी च सा स्मृता । द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः । चतुःसहस्रपलिका षण्णवत्यधिका च सा । पलानां द्विसहस्रं च भार एकः प्रकीर्तितः । तुला पलशतं ज्ञेयं सर्वत्रैवैष निश्चयः । माषटङ्काक्षबिल्वानि कुडवप्रस्थमाढकम् । राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम्" (इति [illegible]

अशीति–आढौकते इति अचि पृषोदरादित्वात् आढकः अस्त्रियां पुंनपुंसके स्यात्। "आढकी च तुवर्यां स्त्री परिमाणान्तरे त्रिषु" (इति मेदिनी) इत्येकं चतुःप्रस्थस्य। द्रवतीति द्रोणः अस्त्रियां स्यात् "द्रोणोऽस्त्रियामाढके स्यादाढकादिचतुष्टये। पुमान् कृपीपतौ कृष्णकाकेऽस्त्री नीवृदन्तरे। स्त्रियां काष्ठाम्बुवाहिन्यां गवादिन्यामपीष्यते" (इति विश्वः) इत्येकं चतुराढकस्य। खमारातीति मूलविभुजादित्वात् 'के' गौरादित्वाच्च खारी स्यादित्येकं द्रोणचतुष्टयस्य। उह्यतेऽनेनेति वाहः "वाहोऽश्वमानयोः। वृषे वाहा तु वाहौ स्यात्" (इति हेमचन्द्रः) इत्येकं सूर्पद्वयस्य। नितरां कुञ्चतीति निकुञ्चः स एव निकुञ्चकः, प्रकुञ्चतीति विग्रहे तु प्रकुञ्चः स एव प्रकुञ्चकोपि स्यादित्येकमेकमुष्टिकायाः। कुण्डते, कुण्ड्यते वा बाहुलकात्कवाचि प्रत्ययेऽनित्यत्वान्नुमोऽभावेपि कुडवः स्यात्। मुकुटमते तु कुटति, कुट्यते वा कपनि प्रत्यये कुटपोऽपि स्यादित्येकं पादसेटकस्य। प्रस्थीयतेऽनेनेति प्रस्थः "प्रस्थोऽस्त्रियां मानभेदे सानावत्युच्चवस्तुनि" (इति मेदिनी) इत्येकमेकसेटकस्य। इत्याद्याः परिमाणार्थकाः पृथक् भिन्नाः सन्तीति आद्यर्थेन मानीभविकाप्रवर्त्तिकादयः संगृह्यन्ते इति ॥ ८८ ॥ $\frac{1}{2}$ ॥

पु. पु. पु. पु.

चौथाई-बांट **पाद(स्तुरीयो भागः)स्या(दंशभागौ तु) वण्टके ॥८९॥**

पेति–तुरीयो भागः पद्यते, इति घञि पादः स्यात् "पादो बुध्ने तुरीयांशे शैलप्रत्यन्तपर्वते। चरणे च मयूखे च" (इति मेदिनी) इत्येकं तुर्यभागस्य। अंश्यते, इति कर्मणि घञि कृते अंशः स्यात् "अंशो विभाजने प्रोक्त एकदेशेऽपि वस्तुनः" (इति हेमचन्द्रः) भज्यते इति भागः "भागो रूपार्धके भाग्यैकदेशयोः" (इति हेमः) वण्ट्यते इति वण्टः स एव वण्टकः स्यादिति त्रीणि वण्टकस्य "बांट" इति ख्यातस्य ॥ ८९ ॥

न. न. न. न. न. न. न.

धन **द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु।**

न. न. न. पु. पु. पु.

हिरण्यं द्रविणं द्युम्नमर्थरैविभवा (अपि) ॥ ९० ॥

द्रेति–द्रुरिव द्रव्यम् "द्रव्यं च भव्ये" इति साधुः, द्रव्यं भव्ये धने क्ष्मादौ जतुद्रुमविकारयोः। विनये भेषजे रीत्याम्" (इति हेमः) विद्यते स्म वित्तम् "वित्तो भोगप्रत्यययोरिति" साधुः "वित्तं क्लीबे धने वाच्यलिङ्गं ख्याते विचारिते" (इति मेदिनी) स्वपतौ साधु स्वापतेयम्, रिच्यते इति रिक्थम्, ऋच्यते, इति [illegible] [illegible] ऋक्थम्, धनति, दधति वा धनम्, वसति, उष्यते वाऽस्मिन्[illegible]

¹ "[illegible]" ॥

वस्यते वा वसु " वसुर्मयूखाग्निजनाधिपेषु योक्त्रेसुरे स्याद्वसु हाटके च । वृद्धौ स्थानधनेषुरत्ने शुष्के वसु स्यान्मधुरेऽन्यवच्च " (इति विश्वप्रकाशः) हय जिहीते भाग्यवन्तामिति वा हिरण्यम् " हिरण्यं रेतसि द्रव्ये शातकुम्भवराटयो अक्षये मानभेदे स्यादकुप्ये च नपुंसकमिति" (मेदिनी) द्रवति, द्रूयते वा इनानि प्र द्रविणम्, " द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे " (इति विश्वः) दिवं तीति द्युम्नम् " द्युम्नं वित्ते बलेऽपि च " (इति हेमचन्द्रः) अर्थ्यते, घञ्, ऋच्छ अर्यते वा ' थन् ' अर्थः " अर्थो विषयार्थनयोर्धनकारणवस्तुषु । अभिधेये शब्दानां निवृत्तौ च प्रयोजने " (इति मेदिनी) राति सुखम्, रायते वा रातेर्डै साधुः " राद्वयोर्विभवे स्वर्णे " (इति रुद्रः) विभवतीति 'अचि' विभवः "वि धननिर्वृत्त्योः" (इति हैमः) इति त्रयोदश धनस्य ॥ ९० ॥

सोना चादी तांबा आदि — पु. (स्या) त्कोष (श्च) हिरण्ये न. (च) (हेमरूप्ये कृताकृते,

तांबा रूपा का मेल — (ताभ्यां यदन्यत्त) त्कुप्यं न. रूप्यं न. (तद्द्वयमाहतम्) ॥ ९१

स्येति—यदा हेम च रूप्यं च हेमरूप्ये कृतं चाकृतं च कृताकृते घटिताघ स्याताम् । तदा कोषश्च हिरण्यं च स्यात् । कुष्यते इति अकर्तरीति घञ्,कोषः, कुश इति विग्रहे तु कोशस्तालव्यान्तोऽपि " तालव्या मूर्धन्याश्चैते " इत्यधिकारे " को विशदौ च " (इति शभेदः) हर्यतीति हिरण्यम् स्यादिति द्वे कृताकृतस्वर्णरूप्ययोः ताभ्यां हेमरूप्याभ्यां यदन्यत्ताम्रादि तत् कुप्यते इति कुप्यं स्यात् । राजसूयेति साधु इत्ये स्वर्णरूप्यान्यत्ताम्रादिधातोः । तद्द्वयं कुप्याकुप्यं, तयोर्हेमरूप्ययोर्द्वयं वा आहतं ताडि चेत्तदा " आहतं तु मृषार्थके । गुणिते ताडिते चापि " (इति हैमः) आहतं रू मस्येति रूप्यं स्यादित्येकं ताम्ररूप्ययोर्मेलकस्य ॥ ९१ ॥

मरकत मणि — गारुत्मतं न. मरकतम् न. अश्मगर्भो पु. हरिन्मणिः पु. ।

पद्मराग — शोणरत्नं न. लोहितकः पु. पद्मरागो पु. (ऽथ) मौक्तिकम् न. ॥ ९२

मोती मूंगा — मुक्ता न. (थ) विद्रुमः पु. (पुंसि) प्रवालं पु.न. (पुंनपुंसकम्) ।

गारु—गरुत्मतो जातत्वात् ' तस्येदमित्यण् ' गारुत्मतम्, मरकं [illegible] [illegible] मरकतम्, अश्मनो गर्भः अश्मगर्भः, हरिद्वर्णो मणिः शाकपार्थिवादि हरिन्मणिरिति चत्वारि हरिन्मणेः । शोणं च तद्रत्नं च शोणरत्नम्, लोहितमेव [illegible]

[illegible] ॥

प्रत्यये लोहितकः, पद्ममिव रागोऽस्येति पद्मरागः स्यादिति त्रीणि पद्मरागस्य। अथेति—मुच्यते शुक्तिभिरिति, मुक्तैवेति वा मौक्तिकम्, मुच्यते स्म मुक्ता "मुक्ता मौक्तिकपुंश्चल्योः" (इति हैमः) इति द्वे मुक्तायाः। अथेति—विशिष्टो द्रुमः, विशिष्टे द्रौ भवो वेति विद्रुमः पुंसि स्यात् "विद्रुमो रत्नवृक्षेऽपि प्रवालेऽपि पुमानयम्" (इति मेदिनी) प्रवल्यते, प्रवलतीति वा ज्वलादित्वाण्णप्रत्यये प्रवालं पुंनपुंसकं स्यात् "प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे" (इति विश्वः) इति द्वे प्रवालस्य "मूंगा" इति ख्यातस्य ॥ ९२ ॥ $\frac{१}{२}$ ॥

न.　पु.स.
रत्नमात्र　**रत्नं मणि (र्द्वयो) (रश्मजातौ मुक्तादिकेऽपि च)॥९३॥**

रेति—अश्मजातौ मरकतादौ मुक्तादिकेऽपि च रत्नम्, क्लीबे, मणिः द्वयोः स्त्रीपुंसयोः स्यात्। रमन्ते धनार्थिनोऽस्मिन्निति रत्नम् "धनार्थिनो जनाः सर्वे रमन्तेऽस्मिन्नतीव यत्। ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः। रत्नं क्लीबे मणिः पुंसि स्त्रियामपि निगद्यते। वस्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते। रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च। इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमित्यपि। मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव" मण्यते इति मणिर्मणी वा "मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिकेऽपि च। कण्ठदेशस्तनेऽजाया लिङ्गाग्रेऽलिञ्जरेऽपि च" (इति विश्वः) इति द्वे रत्नमात्रस्य ॥९३॥

न.　न.　न.　न.　न.　न.
सुवर्ण　**स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्।**
न.　न.　न.　न.　न.
या सोना　**तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥ ९४ ॥**
न.　न.　न.　न.
चामीकरं जातरूपं महारजतकाञ्चने।
न.　न.　न.　पु.न.
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदो(ऽस्त्रियाम्)॥९५॥

स्वमिति—सुष्ठु श्रृणोति, "अचि" अर्णानमर्णो "घञि" शोभनोऽर्णो गतिरनेनेति वा स्वर्णम्, शोभनो वर्णोऽस्य, सुष्ठु वर्ण्यते वा सुवर्णम्, कनतीति कनकम्, "कनकं हेम्नि पुंसि स्यात् किंशुके नागकेसरे। धत्तूरे काञ्चनारे च कालीये चम्पकेऽपि च" (इति मेदिनी) हिनोति, हीयते वा 'मनिनि' हेम, हटति, हाटयति वा हाटकम्, तप्यतेऽनेनेति तपनीयम्. शतकुम्भे पर्वते भवं शातकुम्भम्, स्वामिमते तु अनुशतिकादित्वादुभयपदवृद्धौ शातकौम्भमपि, गङ्गाया अपत्यं गाङ्गेयम् "यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम्। तदुल्बं पर्वतेन्यस्तं हिरण्यं समपद्यत" (इति वायुपुराणम्)

१ [illegible]

" गाङ्गेयः स्यात् पुमान् भीष्मे क्लीबं स्वर्णकसेरुणो." (इति मेदिनी) भरति, बिभर्ति वा ' मनिनि ' भर्म " भर्म स्यात्काञ्चने भृतौ " (इति मेदिनी) कर्बत्यनेन मद्गुरादित्वात् कर्बुरम् " कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः । कर्बुरा कृष्णावृन्ताके शबले पुनरन्यवत् " (इति विश्वः) चमीकरे आकरे भवम्, चमनं चामी ता करोति वा टप्रत्यये चामीकरम्, जातं रूपं यस्य, प्रशस्तं जातमिति वा जातरूपम्, महच्च तद्रजतं च आन्महत इत्यात्वे महारजतम् काञ्चति, काञ्च्यते वा नन्द्यादित्वात् काञ्चनम्, रोचते इति रुक्मम् " रुक्मं लोहे सुवर्णे च " (इति हेमचन्द्रः) कृतस्वरे आकरविशेषे भवम्, कृताः पठिताः स्वरा येन तस्मै देयमिति वा कार्तस्वरम्, जम्बूरसस्य नद्यां भवं जाम्बूनदम्, अष्टौ धातवः पदानि स्थानान्यस्येति अष्टानामपदमिति वा अष्टापदः अस्त्रियां पुंनपुंसकं स्यादित्येकोनविंशतिः स्वर्णस्य ॥ ९४।९५ ॥

सोने का ग- (अलंकारसुवर्णं य) च्छृङ्गी कनक (मित्यदः) ।
(न.)

हना-चादी दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेत (मित्यपि) ॥ ९६ ॥
(न. न. न. न. न.)

अलमिति—यत् अलंकारसुवर्णम् अलंकारसम्बन्धि सुवर्णम् अदः शृङ्गिणामीः प्रधाना लक्ष्मीर्वा शृङ्गी तां कनतीति शृङ्गीकनकम्, ' शृङ्गी ' इति पृथङ्नाम वेति केचिदाहुः " स्त्री शृङ्गी मण्डनसुवर्णम् " (इति रत्नकोषः) " भूषणं कनकं शृङ्गी " (इति नाममाला च) शृङ्गिहिस्वान्ता च तथा च " बाणः "—" वर्षपर्वतसमूहमिवान्तःस्थिता परिमाणशृङ्गिहेमकूटं राजकुलमिति मुकुटः " इत्येकं भूषणसम्बन्धिसुवर्णस्य । सुवर्णापेक्षया दुष्टो वर्णोऽस्येति दुर्वर्णम्, " दुर्वर्णं त्रिष्वसद्वर्णे क्लीबमेलेयरूप्ययोः " (इति मेदिनी) रजति, रज्यते वा रजतम् " रजतं त्रिषु शुक्ले स्यात् क्लीबं हारे च दुर्वर्णे " (इति विश्वः) रूप्यते इति रूप्यम् " रूप्यः स्यात्सुन्दरे त्रिषु । आहतस्वर्णरजते रजते च नपुंसकम् " (इति हेमचन्द्रः) खर्जतीति खर्जूरम् " खर्जूरं रूप्यफलयोः । खर्जूरं कीटवृक्षयोः " (इति हैमः) श्वेतते इति श्वेतम् "श्वेतो द्वीपाद्रिभेदयोः । श्वेतावराटिकाकाष्ठपाटलाशङ्खिनीषु च । क्लीबं रूप्येऽन्यवच्छुक्ले" (इति मेदिनी) इति पञ्च रजतस्य "चांदी" इति ख्यातस्य ॥ ९६ ॥

पीतल-नामा रीतिः (स्त्रिया) मारकूटो (न स्त्रिया) (मथ) ताम्रकम् ।
(स्त्री. पु.न. न.)

शुल्बं म्लेच्छमुखं द्व्यष्टवरिष्टोदुम्बराणि (च) ॥ ९७ ॥
(न. न. न. न. न.)

रीति—रीयते, स्रिवन्ति वा रीतिः स्त्रिया स्यात् । रीतिः स्त्रिया आरकूटकारे ...

* ... ॥

पित्तले लोहकिट्टे च" (इति मेदिनी) अरणामारस्तं कूटयते इति आरकूटः स्त्रियां न स्यात् "आरकूटोऽस्त्रियां द्रव्यं रीतिस्तु रीतिकोमलम्" (इति रभसः) इति द्वे पित्तलस्य । अथेति—ताम्यति, तम्यते वा रकि, दीर्घे च ताम्रम्, शलतीति शुल्बम् उल्बादयश्चेति वन्नन्तो निपात्यते, अथवा शुल्बयति, शुल्ब्यते वा अचि, घञि वा शुल्वं वान्तमपि, "शुल्बं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ" (इति हेमचन्द्रः) म्लेच्छदेशे मुखमुत्पत्तिरस्य, म्लेच्छस्य मुखमिवेति वा म्लेच्छमुखम्, द्वे हेमरूप्ये अश्नुते स्म द्व्यष्टम्, अतिशयेन वरम्, उरु वा वरिष्ठम् "वरिष्ठं ताम्रके क्लीबम्" (इति रुद्रः) उं शम्भुं वृणोति उंवरम् पृषोदरादित्वात् उम्बरमपि उत्कृष्टमुम्बरमुदुम्बरम् "उदुम्बरस्तु देहल्यां वृक्षभेदे च षण्डके । कुष्ठभेदेऽपि च पुमांस्ताम्रे तु स्यान्नपुंसकम्" (इति मेदिनी) प्रज्ञाद्यणि तु औदुम्बरम् "औदुम्बरं भवेत्ताम्रे फलादौ यज्ञादौ यज्ञशाखिनः" (इत्यजयः) इति षट् ताम्रस्य ॥ ९७ ॥

पु.न. न. न. न. न. न.

लोहा लोहाका **लोहो (ऽस्त्री) शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।**

पु.न. पु.न. पु.न.

मैल **अश्मसारो (ऽथ) मण्डूरं शिङ्घाण(मपि तन्मले) ॥ ९८ ॥**

लवितिलोहति, लुह्यते वा अचि, लूयतेऽनेनेति वा बाहुलकाद् हे, रोहति, रुह्यते वा अचि, घञि वा कपिलिकादित्वाल्लत्वे लोहः अस्त्री पुंनपुंसकं स्यात्, "लोहोऽस्त्री शस्त्रके लोहं जोङ्गके सर्वतैजसे" (इति मेदिनी) प्रज्ञाद्यणि तु लौहमपि, शस्यतेऽनेन शास्तीति 'ष्ट्रनि' शस्त्रम् तदेव शस्त्रकम् तेजयति, तेज्यते वा तिजेर्दीर्घश्चेति क्स्नप्रत्यये तीक्ष्णम् "तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके । क्लीबं यवाग्रके पुंसि तिग्मात्म-त्यागिनोस्त्रिषु" (इति मेदिनी) पिण्डते, पिण्ड्यते वा अचि, घञि वा पिण्डम् "पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिल्हकयोरपि । ओड्रपुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः । पिण्डी तु पिण्डतगरेऽलाबूखर्जूरभेदयोः" (इति मेदिनी) कालं च तदयश्च "अनोऽश्मायःसरसामिति टचि" कालायसम्, एति, अयने वा अयः, अश्मनः सारः अश्मसारः "अश्मसारं च शस्त्रकम्" (इत्यमरमाला) इति सप्त लोहस्य । अथेति—मण्डतीति खर्जूरादित्वात् मण्डूरम्, शिङ्घते आणकप्रत्यये पृषोदरादित्वात्कलोपे, सिङ्घमाणयति वा शिङ्घाणम् "शिङ्घाणं काचपात्रे च लोहनासिकयोर्मले" (इति मेदिनी) सिंहानमिति पाठे तु सिंहयतीति अचि, सिंहमानयति वा अणि, सिंहानमपि तस्य लोहस्य मले स्यादिति द्वे लोहकिट्टस्य ॥ ९८ ॥

न. न. न. न.

अञ्जनविशेष रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।

न. न. न.

हरिताल पिञ्जरं पीतनं तालमालं (च) हरितालके ॥ १०३ ॥

रीति–रीतेः पित्तलस्य पुष्पमिव तन्मलत्वात् रीतिपुष्पम् , पुष्पस्य केतुरिव केतुर्यस्येति नाशकत्वात् पुष्पकेतु " पुष्पकेतु कुसुमाञ्जनमिति " (रुद्रः) पुष्पस्य प्रतिकृतिः कनि, पुष्पकम् , ततः स्वार्थेऽणि पौष्पकम् , कुसुममिव कुसुमनाशकं वा अञ्जनं कुसुमाञ्जनमिति चत्वारि ध्मायमानरीतिकाजातमलस्य । पिञ्जनं पिञ्जो वर्णस्तं रातीति पिञ्जरम् , पीतं वर्णं नयते, डप्रत्यये पीतनम् " पीतनं पीतदारुणि । कुङ्कुमे हरिताले च " (इति विश्वः) तालयति, तल्यते वा तालम् " तालः करतलेऽङ्गुष्ठमध्यमाभ्यां च सम्मिते । गीतकालक्रियामाने करस्फाले द्रुमान्तरे । वाद्यभाण्डे च कांस्यस्य त्सरौ तालीजटौषधौ । क्लीबन्तु हरिताले स्यात् " (इति मेदिनी) आलयति, अचि, आलाति वा 'के' आलम् " आलं स्यादनलपहरितालयोः " (इति हेमचन्द्रः) हरितं वर्णमालाति, मूलविभुजादित्वात्कप्रत्यये, कर्मण्यणि वा हरितालम् तदेव हरितालकम् "हरितालमलं तालवर्णकं नटभूषणम्" (इति माधवः) इति पञ्च हरितालस्य॥१०३॥

न. न. न. न. न.

शिलाजित गैरेयमर्थ्यं गिरिजमश्मजं (च) शिलाजतु ।

पु. पु. पु. पु. पु.

गन्धरस बोलगन्धरसप्राणपिण्डगोपरसाः (समाः) ॥ १०४ ॥

गैरेयेति–गिरौ भवं गैरेयम् , अर्थ्यते, अर्थादनपेतं वा अर्थ्यम्, " अर्थ्यो विपश्चिति न्याय्ये त्रिष्वर्थ्यन्तु शिलाजतु" (इति रुद्रः) गिरेर्जातं गिरिजम् "गिरिजं त्वभ्रकेऽपि स्याच्छिलाजतुनि शैलजे । लोहेऽपि गिरिजा गौरी मातुलुङ्गयोश्च योषिति " (इति मेदिनी) अश्मनोजातमश्मजम् , शिलाया जत्विव शिलाजतु इति पञ्च शिलाजतुनः । बोलयति, अचि वातीति वा पिञ्जादित्वादूलचि, बोलः गन्धो गन्धवान्रसोऽस्येति गन्धरसः, स्वामिमते तु राजदन्तादित्वाद् रसगन्धोऽपि, प्राणित्यनेनेति प्राणः, पिण्डते इति पिण्डः गुरुमते तु गां जलं स्यतीति गोसः, गोशब्दात्पातीति विग्रहे तु गोपोऽपि, रसयति, रस्यते वा रसः एते समाः समानार्थकाः समानलिङ्गाश्च स्वामिमते तु गोपे उत्पत्तौ रसोऽस्येति 'गोपरसः' इति समस्तनामापीति षट् गन्धरसस्य ॥ १०४ ॥

पु. पु. पु. न. न.

समुद्रफेन हिण्डीरोऽब्धिकफः फेनः सिन्दूरं नागसंभवम् ।

न. न. न. न. न. न.

नागसीसकयोगेष्टवप्राणि त्रपु पिच्चटम् ॥ १०५ ॥

न. न. पु. पु न.

रांगा रुई **रङ्गवङ्गे (ऽप्यथ) पिचुस्तूलो (ऽथ) कमलोत्तरम् ।**

न. न. न.

कुसुम **(स्यात्) कुसुम्भं वह्निशिखं महारजन(मित्यपि)॥१०६॥**

हीति—' हिण्डी ' ' हिण्डि ' इति वा शब्दमीरयतीति अग्गि, अचि, वा हिण्डीरः ' डिण्डी ' इति शब्दमीरयतीति विग्रहे तु डिण्डीरोऽपि, अब्धेः कफ इव अब्धिकफः, स्फायते, इति फेनः, " फेनमीनाविति " साधुः । इति त्रीणि समुद्रफेनस्य । स्यन्दते, इति सिन्दूरम् " स्यन्देः संप्रसारणं च " इति साधुः, " सिन्दूरस्तरुभेदे स्यात्सिन्दूरं रक्तचूर्णके । सिन्दूरी रोचना रक्तचेलिका धातकीषु च " (इति मेदिनी) नागं सीसं संभव उत्पत्तिस्थानमस्येति नागसंभवमिति द्वे सिन्दूरस्य । नगे भवं नागम् , " नागं नपुंसके रङ्गे सीसके करणान्तरे । नागः पुन्नागमातङ्गक्रूराचारिषु तोयदे । नागकेसरपुन्नागनागदन्तप्रभेदके । देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थितः " (इति मेदिनी) सिनोतीति सि, ईस्यतीति ईसम् सिच तदीसं च सीसं तदेव सीसकम् , योगे धातुसम्बन्धे इष्टम् योगेष्टम् , उप्यते, इति रनि, वप्रम् , मुकुटमते तु वर्धते, इति वर्ध्रमपि, " वर्ध्रः सीसवरत्रयोः " (इति हैमः) इति चत्वारि सीसकस्य । त्रपते, इति त्रपु, " रङ्गसीसकयोस्त्रपुः " (इति रुद्रः) पिच्चयतीति पिच्चटम् , " पिच्चटो नेत्ररोगे स्यात् क्लवं सीसकरङ्गयोः " (इति विश्वः) रङ्गतीति रङ्गम् " रङ्गो ना रागे नृत्यरणक्षितौ । अस्त्री त्रपुणि " (इति मेदिनी) वङ्गतीति वङ्गम् " वङ्गं सीसकरङ्गयोः । वार्ताकेऽपि च कार्पासे पुंभूम्नि नीवृदन्तरे " (इति मेदिनी) इति चत्वारि रङ्गस्य " रांगा " इति ख्यातस्य । अथेति पिचति, पचति वा मृगय्वादित्वात् पिचु. " पिचुर्ना कुष्ठभेदे च कर्षे तूलेऽसुरान्तरे " (इति विश्वः) तूलयति, तूल्यते वा तूलः " तूलं स्याद्ब्रह्मदारुणि । आकाशे च पिचौ न स्त्री " (इति मेदिनी) रभसात् पिचु तूलोऽपि इति द्वे तूलस्य " रुई " इति ख्यातस्य । अथेति, कमलादुत्तरं कमलोत्तरम् , कुस्यतीति कुसुम्भं स्यात् " कुसुम्भं हेम्नि महारजनं ना कमण्डलौ " (इति मेदिनी) वह्निवच्छिखास्येति वह्निशिखम् रज्यतेऽनेनेति रजनं महच्च तद्रजनं च महारजनम् " महारजनमुद्दिष्टं शान्तकुम्भकुसुम्भयोः " इति चत्वारि कुसुम्भस्य ॥ १०५ । १०६ ॥

पुं. पु. न. न.

भेड़ा के ऊन से बना कम्बल **मेषकम्बल ऊर्णायुः शशोर्णं शशलोमनि ।**

न. पुं. न. न. न.

खरगोश के ऊन के कम्बल **मधूच्छिष्टं(तु)सिक्थकम्॥१०** **मधु(क्षौद्रं)माक्षिका(दि)**

मे[illegible] [illegible] ऊर्णातीति

सास्त्यस्येति ऊर्णायुः " ऊर्णायायुम् " इति साधुः इति द्वे कम्बलस्य । शशस्य ऊर्णाऽस्त्यस्येति शशोर्णम् , " शशोर्णं कारणांकरम् " इति चन्द्रगोमिलिङ्गानु-शासनात्क्लीबत्वम् शशस्य लोम शशलोम इति द्वे शशोर्णस्य । मन्यते, इति मधु "मधुपुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्तदैत्यभिच्चैत्रे स्याज्जीवन्त्यान्तु योषिति " (इति विश्वमेदिन्यौ) क्षुद्राभिर्मक्षिकाभिः कृतं क्षौद्रम्, " क्षौद्रन्तु मधुनीरयोः " (इति हेमचन्द्रः) मक्षिकाभिः कृतं माक्षिकम् आदिना भ्रामर, वाटक, पौतिकादयो गृह्यन्ते इति त्रीणि क्षौद्रस्य " शहद " इति ख्यातस्य । मधुना उच्छिष्टं मधूच्छिष्टम् सिच्यति, सिच्यते वा थकि, सिक्थम् तदेव सिक्थकमिति द्वे मधूच्छिष्टस्य " मोम " इति ख्यातस्य ॥ १०७ ॥

मैनशिल — स. स. स. स.
मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।

नेपालीमैनशिल — स. स. स. पु. पु.
जवाखार
नैपाली कुनटी गोला यवक्षारो यवाग्रजः ॥ १०८ ॥

सज्जी — पु. पु. पु. पु.
पाक्यो (ऽथ) स्वर्जिकाक्षारः कापोतः सुखवर्चकः ।

सोचर — न. न. स. स.
वंशलोचन
सौवर्चलं (स्या) द्रुचकं त्वक्क्षीरी वंशरोचना ॥ १०९ ॥

मेति—मनःशब्दवाच्या शिलेति शाकपार्थिवादित्वात् मनःशिला, मनसा गुप्ता मनोगुप्ता, मनःशब्देन हूयते कथ्यते "कविधौ प्रसारिणिभ्यो डः " इति डप्रत्यये मनोह्वा, नागानां जिह्वेव नागजिह्विका, नेपाले भवा नेपाली, कौनटति, अचि, गोरादिः कुत्सिता नटीव वा कुनटी, गां दीप्तिं लाति, ' के ' गुञ्यते वा घञि डलयोरैक्यात् गोला, " गोला गोदावरी सख्योः, कुनटी दुर्गयोः स्त्रियाम । पत्राञ्जने मण्डले चालिञ्जरे बालखेलने " (इति मेदिनी) इति सप्त मनःशिलायाः । यवानां क्षारः यवक्षारः, यवाग्राज्जायते स्म पञ्चम्यामिति डप्रत्यये यवाग्रजः, पाके साधुः पाक्यः इति त्रीणि यवक्षारस्य । अथेति—स्वर्जिकारसजः क्षारः शाकपार्थिवादित्वात् स्वर्जिकाक्षारः, कपोतवर्णोऽस्त्यस्येति कापोतः, सुखं वर्चयति, 'क्वुन्' सुखवर्चकः, सुवर्चलादिदं सौवर्चलम् , " अथ सौवर्चलं सर्जक्षारे च लवणान्तरे " (इति मेदिनी) रोचतेऽनेनेति 'क्वुन्' रुचकं स्यात् " रुचको बीजपूरे च निष्के दन्तकपोतयोः । न द्वयोः [illegible] सौवर्चलेऽपि मङ्गल्यद्रव्येऽपि कटकेऽपि च " (इति मेदिनी) इति पञ्च स्वर्जिकाक्षारस्य " सज्जीखार " इति ख्यातस्य । [illegible] गौरादित्वात् " [illegible] " [illegible], इति [illegible]

[illegible]

वंशस्य रोचना वंशरोचना "स्याद्वंशरोचना वांशी तुकाक्षीरी तुका शुभा । त्वक्क्षीरी ...त्ना शुभ्रा वंशक्षीरी तु वैणवी" (इति शाश्वतः) इति द्वे वंशरोचनायाः "वंशलोचन" इति ख्यातायाः ॥ १०८ । १०९ ॥

शोभाञ्जन — न. न. न.
शिग्रुजं श्वेतमरिचं मोरटं (मूलमैक्षवम्) ।
ईख की जड़ — न. न. न.
पिपरामूल — **ग्रन्थिकं पिप्पलीमूलं चटकाशिर (इत्यपि) ॥ ११० ॥**

शीति—शिग्रोर्जायतेस्म पञ्चम्यामिति डप्रत्यये शिग्रुजम्, श्वेतं मरिचमिव श्वेत-मरिचमिति द्वे शोभाञ्जनबीजस्य । इक्षोरिदमैक्षवं मूलं मुरतीति "शकादिभ्यो-ऽटन्" इत्यटनिप्रत्यये मोरटं स्यादित्येकमिक्षुमूलस्य । ग्रन्थेः प्रतिकृतिर्ग्रन्थिकम् "ग्रन्थिकं पिप्पलीमूले गुग्गुलुग्रन्थिपर्णयोः । करीरे पुंसि दैवज्ञे सहदेवाख्य-पाण्डवे" (इति विश्वः) पिप्पल्यामूलं पिप्पलीमूलम्, चटकायाः शिर इव चटका-शिरः, अपिशब्दाच्छिरोऽपि "शिरो ना पिप्पलीमूले" (इति रभसः) इति त्रीणि पिप्पलीमूलस्य "पिपरामूल" इति ख्यातस्य ॥ ११० ॥

जटामांसी, पतङ्ग — स. पु. न. न.
मिले सोंठ, — **गोलोमी भूतकेशो (ना) पत्राङ्गं रक्तचन्दनम् ।**
मिरच, पीपरि, — न. न. न. स. न.
मिल आँवरा,
हर. बहेरा — **त्रिकटु त्र्यूषणं व्योषं त्रिफला (तु) फलत्रिकम् ॥ १११ ॥**

इति वैश्यवर्गः ॥ ९ ॥

गविति—गोलोम्नामियम् "तस्येदमित्यणि" संज्ञापूर्वकत्वाद्वृद्ध्यभावेऽपि गोलोमी "गोलोमी श्वेतदूर्वायां स्याद्वचाभूतकेशयोः" (इति विश्वः) भूतानां केश इव, भूतः केशोऽस्येति वा भूतकेश. ना पुमान्स्यादिति द्वे जटामांस्याः श्वेतदूर्वाया वा । पत्रा-ण्यङ्गेऽस्येति पत्राङ्गम्, "पत्राङ्गं न द्वयोर्भूर्जे पद्मके रक्तचन्दने" (इति मेदिनी) रक्तं चन्दनमिव रक्तसारत्वाद् रक्तचन्दनमिति द्वे रक्तसारद्रव्यस्य "पतङ्ग" इति ख्यातस्य । त्रयाणां कटूनां समाहारः त्रिकटु, ऊषतीति नन्दादित्वाल्ल्युटि ऊषणम्, त्रयाणामूषणानां समाहारः पात्रादित्वात् त्र्यूषणम्, विशेषेण ओषतीति अचि, व्योषमिति त्रीणि त्र्यूषणस्य "सोंठि, मिरच, पीपरि" इति ख्यातस्य । त्रयाणां फलानां समाहारस्त्रिफला अजादिः, तृफलेति वा तृफश्चेति फले, तृफलापि "त्रि-फला तृफलापि च" (इति त्रिकाण्डशेषः) फलानां त्रिकं फलत्रिकमिति द्वे त्रिफलायाः ॥ १११ ॥

इति वैश्यवर्गविवरणम् ॥ ९ ॥

अथ शूद्रवर्गो व्याख्यायते ॥

शूद्र — पु. शूद्रा(श्चा) पु. वरवर्णा (श्च) पु. वृषला (श्च) पु. जघन्यजाः ।

वर्णसंकर — पु. (आचाण्डालात्तु) संकीर्णा (अम्बष्ठकरणादयः) ॥ १ ॥

शिवति—शोचतीति " शुचेर्दश्च " इति रकि, दीर्घे च शूद्रः द्वित्वे शूद्रौ, बहुत्वे शूद्राः, अवरोऽधमोवर्णोऽस्य, अवरश्चासौ वर्णश्चेति वा अवरवर्णः द्वित्वे अवरवर्णौ, बहुत्वे अवरवर्णाः, वर्षति, वृष्यते वा ' कलचि ' वृषं धर्मं लुनाति 'डे' वृषं लातीति के, वृषलः, द्वित्वे वृषलौ, बहुत्वे वृषलाः, जघन्यात्पादाज्जाता जघन्यजाः " जघन्यं मेहने क्लीबे चरमे गर्हितेऽन्यवत् " (इति मेदिनी) इति चत्वारि शूद्रस्य । आचाण्डालात् चाण्डालपर्यन्तम् वक्ष्यमाणाः अम्बष्ठश्च करणश्च तावादी येषामिति ते संकीर्यन्ते स्म संकीर्णाः स्युः आदिना उग्रादयो गृह्यन्ते इत्येकमाचाण्डालादम्बष्ठादीनाम् ॥ १ ॥

शूद्रा में बनियासे पैदा, बनियानी में ब्राह्मणसे उपजा, — पु. (शूद्राविशोस्तु) करणोऽम्बष्ठो पु. (वैश्याद्विजन्मनोः) ।

शूद्रा में क्षत्रिय से जना, क्षत्रिया में बनिया से हुआ — पु. (शूद्राक्षत्रिययो) रुग्रो पु. मागधः (क्षत्रियाविशोः) ॥ २ ॥

शिवति—शूद्रा च विट् च शूद्राविशौ तयोः सुतः किरति, कीर्यते वा युचि, ल्युटि वा करणः " करणं हेतुकर्मणोः । वालवादौ हसे लेपे नृत्यगीतप्रभेदयोः । क्रियाभेदेन्द्रियक्षेत्रकायसंवेशनेषु च । कायस्थे साधने क्लीबं पुंसि शूद्राविशोः सुते" (इति त्रिग्व:) इत्येकं वैश्याच्छूद्रायां जातस्य । वैश्या च द्विजन्मा च तयोः सुतः अम्बे तिष्ठतीति सुपीति के, 'अम्बाम्बेति' षत्वे च अम्बष्ठः " अम्बष्ठोदेशभेदेऽपि विप्राद्वैश्यासुतेऽपि च । अम्बष्ठाप्यम्ललोणयां स्यात्पाठायूथिकयोरपि " (इति मेदिनी) इत्येकं विप्राद्वैश्यायां जातस्य । शूद्रा च क्षत्रियश्च तयोः सुतः उच्यतीति " ऋज्रेन्द्रेति " निपातनात् उग्र "उग्र, शूद्रासुते क्षत्रात्रुद्रे पुंसि त्रिपूत्कटे । स्त्री वचाक्षुतयोः" (इति मेदिनी) इत्येकं क्षत्राच्छूद्रायां जातस्य । क्षत्रिया च विट् च तयोः सुतः मगध्यतीति, अचि, " [illegible] " इति यलोपे च मगध. 'प्रज्ञादिभ्य' तु मागध. "मागधो मगधोद्भवे शुक्लजीरकवन्दिनोः । वैश्यात् क्षत्रियापुत्रे मागधी स्यात्तु पिप्पली । यूथिकायां [illegible] " (इति [illegible]) इत्येकं वैश्यात् क्षत्रियायां जातस्य ॥ २ ॥

बनियानी में क्षत्रिय से उपजा, क्षत्रिया में शूद्र से जना, ब्राह्मणी में क्षत्रिय से हुआ, ब्राह्मणी में बनिया से उपजा

पु. पु.
माहिष्यो (ऽर्याक्षत्रिययोः) क्षत्ता (र्याशूद्रयोःसुतः) ।
पु. पु.
(ब्राह्मण्यां क्षत्रिया)त्सूत(स्तस्यां) वैदेहको(विशः)३॥

मेति—अर्या च क्षत्रियश्च तयोः सुतः महिष्यां साधुः, यति, अणि, महति मह्यते वा टिपचि, महिषः स एव चतुर्वर्णादित्वात्स्वार्थे ष्यञि माहिष्यः स्यादित्येकं क्षत्रियार्यायां जातस्य । अर्या च शूद्रश्च तयोः सुतः क्षदति, क्षद्यते वा 'शंसिक्षदेति' तृचि क्षत्ता स्यात् "क्षत्ता शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ । भुजिष्यातनयेऽपि स्यान्नियुक्तवेधसोः पुमान्" (इति मेदिनी) इत्येकं शूद्रादर्यायां जातस्य । ब्राह्मण्यां क्षत्रियाज्जातः सूयतेस्म सूतः "सूतः पारदसारथ्योः प्रसूतेरितवन्दिषु । ब्राह्मण्यां क्षत्रियाज्जाते तक्ष्णि" (इति हैमः) इत्येकं क्षत्रियाद्ब्राह्मण्यां जातस्य । तस्यां ब्राह्मण्यां विशो वैश्याज्जातः विदेहेषुभवः अणि, विदेहस्यापत्यं वा जनपदेति'अञि'वैदेहः स एव वैदेहकः "वैदेहको वाणिजके शूद्राद्वैश्यासुतेऽपि च" (इति मेदिनी) इत्येकं वैश्याद्विप्राङ्गनायां जातस्य ॥ ३ ॥

माहिष्य से करणी में जना, ब्राह्मणी में शूद्र से उपजा

पु.
रथकार(स्तु माहिष्यात् करण्यां यस्य संभवः) ।
पु.
(स्या)च्चण्डाल(स्तु जनितो ब्राह्मण्यां वृषलेन यः)॥४॥

रेति—माहिष्याद्वैश्याक्षत्रियसुतात् करण्यां शूद्रायां वैश्यादुत्पन्नायां सुतायां यस्य संभवो जन्म स्यात्सः रथं करोतीति कर्मण्यणित्यणि, रथकारः स्यात् "रथकारस्तु माहिष्यात्करणीजे च तक्षणि" (इति मेदिनी) इत्येकं माहिष्यात्करणीजस्य । ब्राह्मण्यां विप्राङ्गनायां वृषलेन शूद्रेण यो जनितः समुत्पादितः सः चण्डते, इति चण्डालः प्रज्ञाद्यणि तु चाण्डालोऽपि स्यादित्येकं वृषलाद्ब्राह्मण्यां जातस्य ॥ ४ ॥

[illegible]

पु. पु. पु.स.
कारुः शिल्पी (संहतैस्तैर्द्वयोः) श्रेणिः (सजातिभिः) ।
पु. पु. पु. पु.
कुलकः (स्यात्) कुलश्रेष्ठी मालाकार(स्तु) मालिकः ॥५॥

---

१ [illegible] "क्षत्रियायां च शूद्रजे" [illegible] ॥
२ [illegible] (१० । ११) इति [illegible]

केति—करोतीति " कृवापेत्युण् " कारुः " कारुस्तु कारके शिल्पे विश्वकर्मणि शिल्पिनि " (इति हेमचन्द्रः) शिल्पमस्यास्तीति शिल्पी " शिल्पी तु वाच्यवत्कारौ स्त्रियां कोलदलौषधौ " (इति मेदिनी) तक्षा च तन्तुवायश्च नापितो रजकस्तथा। पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः " इति द्वे शिल्पिनः । तैः सजातिभिः समानजातीयैः संहतैस्समूहैः श्रयति, श्रीयते वा ' श्रेणिः ' द्वयोः स्त्रीपुंसयोः स्यात्। " श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समानशिल्पिसंहतौ " (इति मेदिनी) इत्येकं सजातीयशिल्पिसंघस्य । कोलतीति 'कुनि' कुलकः स्यात् "कुलकं तु पटोले स्यात्सम्बद्धश्लोकसंहतौ । पुंसि वल्मीककाकेन्दुकुलश्रेष्ठेषु कथ्यते"(इति मेदिनी)" कुलिक " इति पाठे तु कुलमधीनत्वेनास्यास्तीति 'ठनि' कुलिकः " कुलिको नागभेदे स्याद्द्रुभेदे कुलसत्तमे, (इति मेदिनी) कुलश्रेष्ठत्वमस्यास्तीति इनि " कुलश्रेष्ठी " इति द्वे कारुसंघे मुख्यस्य । मालां करोतीति ' अण् ' मालाकारः, मालास्यास्तीति, माला शिल्पमस्येति वा 'ठनि' मालिकः " मालिका सप्तला पुत्री ग्रीवालंकरणेऽपि च । पुष्पमाल्ये नदीभेदे पक्षिभेदे च मालिकः " (इति मेदिनी) इति द्वे मालिकस्य " माली " इति ख्यातस्य ॥ ५ ॥

कुम्हार थवई	पु॰ कुम्भकारः पु॰ कुलालः (स्यात्) पु॰ पलगण्ड(स्तु) पु॰ लेपकः ।
कोली दर्जी	पु॰ तन्तुवायः पु॰ कुविन्दः (स्यात्) पु॰ तुन्नवाय(स्तु) पु॰ सौचिकः ॥ ६ ॥

कितिं—कुम्भं करोति कर्मण्यणित्यण्, कुम्भस्य कारः कुम्भकारः " कुम्भकारी कुलत्थ्यां च पुंसि स्याद् घटकारके " (इति विश्वः) कुं भूमिं लालयति, अण्, डलयोरैक्यात्, कुलमालाति के, कुलमलति, 'अण्' कुलमालुनातीति वा 'द्वे' कुलालः स्यादिति द्वे कुलालस्य " कुम्हार " इति ख्यातस्य । पलं मांसं तत्तुल्येन मृदादिना गण्डति वदनैकदेशमिव करोतीति 'अचि' पलगण्डः, लिम्पतीति 'ण्वुलि' लेपकः स्यादिति द्वे लेपकारस्य "राज" इति ख्यातस्य । तन्तून् वयतीति अण्, तन्तुवायः " तन्त्रवायः " इति पाठे तु तन्तवो वितन्यन्ते यस्मिंस्तत्तन्त्रम् तद्वयतीति तन्त्रवायः तन्त्रवाय इति पाठान्तरम्, कुं भुवं कुत्सितं वा विन्दतीति शे, कुयति वा [illegible] कुवि (नि) न्दः स्यादिति द्वे कुविन्दस्य " कोली " इति ख्यातस्य । तुन्नं [illegible] वयतीति 'अण्' तुन्नवायः, सूची शिल्पमस्येति 'ठक्' सौचिकः स्यादिति द्वे सौचिकस्य " दर्जी " इति ख्यातस्य ॥ ६ ॥

[illegible] (इति विश्वः) ॥

पु. पु. पु. पु.

रंगसाज सिकलीगर चमार लोहार

रङ्गाजीवश्चित्रकरः शस्त्रमार्जोऽसिधावकः ।

पु. पु. पु. पु.

पादूकृच्चर्मकारः (स्याद्) व्योकारो लोहकारकः ॥ ७ ॥

रेति—रङ्गं श्वेतपीतरक्तादिकमाजीवति, रङ्गेणाजीवति, इगुपधत्वात्के, रङ्ग आजीवोऽस्येति वा रङ्गाजीवः चित्रं करोतीति "दिवाविभेति" टे, चित्रकरः स्यादिति द्वे चित्रकरस्य "रंगसाज" इति ख्यातस्य । शस्त्रं मार्ष्टीति अणि शस्त्रमार्जः, असिं धावतीति अणि, असिधावः स एव असिधावकः स्यादिति द्वे शस्त्रमार्जस्य "सिकलीगर" इति ख्यातस्य । पद्यते अनयेति, ऊप्रत्यये पादूस्तां करोतीति क्विपि, तुकि च पादूकृत्, चर्म करोतीति अणि, चर्मकारः स्यादिति द्वे चर्मकारस्य "चमार" इति ख्यातस्य । "व्यो" इत्यव्ययं लोहबीजवाची (इति श्रीभोजः) व्यो करोतीति अणि, व्योकारः, लोहं करोतीति अणि लोहकारः स एव लोहकारकः "व्योकारोऽयस्करोऽयस्कारो लोहकारः स्यात्" (इति-रत्नकोषः) इति द्वे लोहकारस्य "लोहार" इति ख्यातस्य ॥ ७ ॥

पु. पु. पु. पु.

सोनार चुरिहार ठठेर

नाडिंधमः स्वर्णकारः कलादो रुक्मकारके ।

पु. पु. पु. पु.

(स्या)च्छाङ्खिकः काम्बविकः शौल्विकस्ताम्रकुट्टकः ॥ ८ ॥

नेति—नाडीं वंशनलीं धमतीति, खशि, ह्रस्वे, मुमि च नाडिंधमः, स्वर्णं करोतीति अणि स्वर्णकारः, कलामादत्ते इति मूलविभुजादित्वात्के कलादः रुक्मं करोतीति अणि, रुक्मकारः स एव रुक्मकारकः इति चत्वारि स्वर्णकारस्य "सोनार" इति ख्यातस्य । शङ्खः शिल्पमस्येति ठकि, शाङ्खिकः, कम्बुः शिल्पमस्येति ठकि, कम्बोर्विकारोऽस्यास्तीति वा ठनि, काम्बविकः स्यादिति द्वे शाङ्खिकस्य "चुरिहार" इति ख्यातस्य । शुल्बघट्टनं शिल्पमस्येति ठकि, शौल्विकः ताम्रं कुट्टयतीति अणि ताम्रकुट्टः स एव ताम्रकुट्टकः स्यादिति द्वे ताम्रकुट्टकस्य "ठठेर" इति ख्यातस्य ॥ ८ ॥

पु. पु. पु. पु. पु.

बढ़ई गाँव का बढ़ई स्वतन्त्र बढ़ई

तक्षा (तु) वर्धकिस्त्वष्टा रथकार (श्च) काष्ठतट् ।

पु. पु. पु. पु.

ग्रामाधीनो ग्रामतक्षः कौटतक्षोऽनधीनकः ॥ ९ ॥

तेति—तक्ष्णोतीति 'कनिन्युवृषितक्षि' कनिनि, तक्षा, वर्धते, इति अचि, वर्धस्तं कप- [illegible] कप्रत्यये, वर्धकिः, त्वक्षतीति तृचि, त्वष्टा, "त्वष्टा पुमान्देवशिल्पितक्ष्णो-

गादित्यपिच्यपि" (इति मेदिनी) रथं करोतीति अणि, रथकारः, काष्ठं तक्षति–तक्ष्णोति वा क्विपि, काष्ठतट् इति पञ्च तक्ष्णः "बढ़ई" इति ख्यातस्य । ग्रामेऽधि, "सप्तमीति" समासे, "अषडक्षेति" खप्रत्यये, ग्रामाधीनः, ग्रामस्य तक्षा, "ग्रामकौटाभ्यां चेति" टचि, ग्रामतक्षः स्यादिति द्वे ग्रामतक्षस्य । न अधीनोऽनधीनः स एव अनधीनकः स्वाधीनो यस्तक्षा स कुट्यांभवः, अणि, कौटः तक्षतीति कनिनि तक्षा कौटश्चासौ तक्षा चेति टचि, कौटतक्षः स्यादित्येकं प्रधानवर्धके: ॥ ९ ॥

पु. पु पु. पु. पु.

नाऊ या नाई क्षुरिमुण्डिदिवाकीर्तिनापितान्तावसायिनः ।

धोबी या ब- पु. पु पु. पु.

रेठा कलवार निर्णेजकः (स्या) द्रजकः शौण्डिको मण्डहारकः ॥ १० ॥

क्षिरति–क्षुरोऽस्यास्तीति इनि, क्षुरी, मुण्डं करोति मुण्डयतीति ग्रह्यादित्वाणिनि मुण्डी, दिवाकीर्तिरस्येति दिवाकीर्तिः "दिवाकीर्तिस्तु पुंसि स्यान्नापितान्तावसायिनोः" (इति विश्व.) न पियति स्म अपितः न अपितः निषेधार्थकेन न शब्देन 'सुप्सुपेति' समासे नापनं नापः स जातोऽस्येति वा नापितः, नखानामन्तमवसातुं शीलमस्य 'सुपीति' णिनि, युकि च अन्तावसायी "अन्तावसायी श्वपचे मुनिभेदे च नापिते" (इति मेदिनी) इति पञ्चनापितस्य "नाऊ" इति ख्यातस्य । निर्णेनेक्तीति, ण्वुलि, "उपसर्गादसमासे" इति णत्वे च निर्णेजकः, रजतीति क्वुनि रजकः स्यादिति द्वे रजकस्य "धोबी" इति ख्यातस्य । "शुण्डा पानगृहे मता अम्बुहस्तिनी वेश्या हस्तिहस्तसुरासु च" (इति मेदिनी) शुण्डा सुरा पण्यमस्येति ठकि, शौण्डिकः, मण्डं सुराग्रसं हरतीति अणि, मण्डहारः सएव मण्डहारकः इति द्वे शौण्डिकस्य "कलवार" इति ख्यातस्य ॥ १० ॥

गड़रिया पु. पु. पु. पु.

पुजारी या पण्डा इन्द्र- जाबालः (स्या) दजाजीवो देवाजीवी (तु) देवलः ।

जाल आदि स. स. पु. पु.

करनाली (स्या) न्माया शाम्बरी मायाकार (स्तु) प्रतिहारिकः ॥ ११ ॥

जेति–जवमन्तीति अणि, जवमालाति वा के जवालोऽजस्तस्यायं जाबालः अज आजीवो जीविकास्येति अजाजीवः स्यादिति द्वे जाबालस्य "गडरिया" इति ख्यातस्य । दैवमाजीवितुं शीलमस्येति णिनि, देवाजीवी, देवआजीवो जीविकायां यस्य देवाजीवोऽन्योऽपि, देवान् जीविकार्थं लाति, देवं लक्षणया तदर्चां लाति देवलः स्यादिति द्वे देवलस्य "पण्डा–पुजारी वा" इति ख्यातस्य । विश्वं मिमीते स्म मायेति 'माङ्माश्रित्य' इति ते टापि च मां यातीति वा "मा

ऽनुपेति " के, माया " माया स्याच्छाम्बरीबुद्ध्योर्मायः पीताम्बरेऽसुरे " (इति मेदिनी) शम्बराख्यदैत्यस्येयं " तस्येदमित्यणि " शाम्बरी स्यादिति द्वे इन्द्रजालादिमायायाः । मायां करोतीति अणि मायाकारः, प्रतिहरणं घञि, प्रतिहारो व्याजः प्रयोजनमस्येति ठकि, प्रातिहारिकः स्यादिति द्वे इन्द्रजालिकस्य ॥ ११ ॥

पु. पु. पु. पु.

नट — **शैलालिन (स्तु) शैलूषा जायाजीवाः कृशाश्विनः ।**

पु. पु. पु. पु.

कथिक या भांड — **भरता (इत्यपि) नटाश्चारणा (स्तु) कुशीलवाः ॥ १२ ॥**

शैलेति—शिलालिना प्रोक्तं नटसूत्रमधीयत इति 'पाराशर्येति' णिनि, शैलालिनः, शिलूषस्य ऋषेरपत्यानि शैलूषाः " नटे बिल्वे च शैलूषः " (इति तालव्यादिमूर्धन्यान्तेषु रभसः) जायया जीवन्तीति 'इगुपधत्वात्के' जायाजीवाः, कृशाश्वेन प्रोक्तं नटसूत्रमधीयते कर्मन्देति इनि, कृशाश्विनः भरतस्य मुनेः शिष्याः अणि, संज्ञापूर्वकत्वाद्वृद्ध्यभावे च भरताः, नटन्तीति अचि नटाः " रङ्गावतारी शैलूषो नटोभरतभारतौ " (इति वाचस्पतिः) इति षट् नटस्य । चारयन्ति कीर्तिमिति नन्द्यादित्वाल्ल्युप्रत्यये चारणाः, कुत्सितं शीलमस्त्येषां " कुगतीति " समासे " अन्यत्रापि दृश्यते " इति वप्रत्यये च कुशीलं वान्तीति वा " आतोऽनुपेति " के, कुशीलवाः स्युरिति द्वे वन्दिविशेषस्य " कथिक " इति ख्यातस्य ॥ १२ ॥

पु. पु. पु. पु.

मृदङ्ग बजाने वाला ताली बजाने वाला — **मार्दङ्गिका मौरजिकाः पाणिवादा (स्तु) पाणिघाः ।**

पु. पु. पु. पु.

बांसुरी बजाने वाला वीणा बजाने वाला — **वेणुध्माः (स्यु) र्वैणविकावीणावादा (स्तु) वैणिकाः १३ ॥**

मेति—मृदङ्गो लक्षणया तद्वादनशिल्पमेषामिति विग्रहे " शिल्पमिति " ठकि, मार्दङ्गिकाः, मुरजः शिल्पमेषामिति मौरजिकाः स्युरिति द्वे मार्दङ्गिकस्य । पाणिं वादयन्तीति कर्मण्यणि, पाणिवादाः, पाणिं घ्नन्तीति पाणिघाः "पाणिघताडघौ शिल्पिनि" इति साधुः—इति द्वे पाणिघस्य । वेणुं धमन्तीति "आतोऽनुपेति" के, वेणुध्माः, वेणोर्विकारोऽणि, वैणवम्, तच्छिल्पमेषामिति, ठकि वैणविकाः स्युरिति द्वे वैणविकस्य । वीणां वादयन्तीति कर्मण्यणि, वीणावादाः, वीणा शिल्पमेषामिति वैणिकाः स्युरिति द्वे वीणावादकस्य ॥ १३ ॥

पु. पु. पु. पु.

जीवान्तकः शाकुनिको (द्वौ) वागुरिकजालिकौ ।

पु. पु. पु.

वैतंसिकः कौटिक (श्च) मांसिक (श्च समं त्रयम्) ॥ १

जीति–जीवानामन्तको नाशको जीवान्तकः, शकुनान् हन्तीति "पक्षिमत्स्येति" ठकि, शाकुनिकः स्यादिति द्वे शाकुनिकस्य "चिड़ीमार" इति ख्यातस्य। वागुरया मृगबन्धन्या चरतीति वागुरिकः, जालेन चरतीति ठकि, जालिकः एतौ द्वौ स्याताम् इति द्वे जालिकस्य "बहेलिया" इति ख्यातस्य। वीतंसेन मृगपक्ष्यादिबन्धनोपायेन चरतीति वैतंसिकः, कूटेन मृगादिबन्धनयन्त्रेण चरतीति कौटिकः, मांसं पण्यमस्येति "तदस्य पण्यमिति" ठकि, मांसिकः एतत्त्रयं समं समानार्थकं स्यादिति त्रीणि मांसिकस्य "चिकवा" इति ख्यातस्य॥ १४॥

पु. पु. पु. पु.

मज़दूर **भृतकोभृतिभुक्कर्मकरो वैतनिको (ऽपि सः)।**

खबरिहा पु. पु. पु. पुः

बोझिया **वार्तावहो वैवधिको भारवाह (स्तु) भारिकः॥ १५॥**

भ्रिति–भ्रियते स्म भृतः स एव कनि, भृतिं करोति भृतयतीति वा क्कनि भृतकः, भृतिं वेतनं भुङ्क्ते क्विपि, भृतिभुक्, कर्म करोतीति "कर्मणि भृताविति" टे, कर्मकरः यः कर्मकरः स वेतनेन जीवति "वेतनादिभ्यो जीवतीति" ठकि वैतनिकोऽपि स्यादिति चत्वारि भृतकस्य "मज़दूर" इति ख्यातस्य। वहतीति अचि, वहः वार्तायावहो वार्तावहः, विवधं, वीवधं वा वहतीति ठनि, विवधिकः, वीवधिकः, पक्षे ठकि, वैवधिकः स्यादिति द्वे वार्तावहस्य "संदेसिहा" इति ख्यातस्य। भारं वहतीति अणि, भारवाहः भारो वाह्यत्वेनास्त्यस्येति ठनि भारिकः स्यादिति द्वे भारिकस्य "बोझिया" इति ख्यातस्य॥ १५॥

पु. पु. पु. पु. पु.

नीच **विवर्णः पामरो नीचः प्राकृत (श्च) पृथग्जनः।**

पु. पु. पु. पु. पु.

निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतर (श्च सः)॥१६॥

वीनि–विगतो वर्णो यस्य यस्माद्वेति विवर्णः, पामानं रातीति के, पा धर्मो म्रियते येनेति वा घे, पामरः, निकृष्टामीं लक्ष्मीं चिनोतीति डे, नीचः, प्रकृतौ भवः, प्रकृष्टं नकृतमकार्यमस्येति वा प्राकृतः, सज्जनेभ्यः पृथग्भूतोजनः शाकपार्थिवादित्वात् पृथग्जनः, निश्चयेन हीनः "कुगतीति" समासे निहीनः, अपकृष्टमपकृष्टे वा सीदतीति अचि, अपसदः, जालयति, जालं करोति वा बाहुलकान्मे, जाल्मः "जाल्मस्तु पामरे असमीक्ष्य कारिणि च" (इति हैमः) क्षुधं लाति, के, कनि च क्षुल्लकः, क्षुद्र वा "स्थानिवद्भावेति" ठकि, कपिलिकादित्वाल्लत्वं च, क्षुधा लक्ष्यते वा पुंसीति [illegible]

---

१ "[illegible]" (इति [illegible]) ॥

क्षुल्लकः, खदनं संपदादित्वात्क्विपि, पृषोदरादित्वादुत्वे च खुद् तां लातीति कुनि, खुल्लकः कवर्गद्वितीयादिरपि " खुल्लकस्त्रिषु नीचेऽल्पे " (इति रभसः) इना कामेन तीर्यते, ' भृदोरिति ' अपि, इतं गमनं करोति, इतेन ज्ञानेन क्षीयते वा बाहुलकादरप्रत्यये इतरः यः क्षुल्लकः स इतरः स्यादिति दश नीचस्य ॥ १६ ॥

पु. पु. पु. पु. पु. पु.

सेवक, दास **भृत्ये दासेयदासेरदासगोप्यकचेटकाः ।**

पु. पु. पु. पु. पु.

खिदमतगार **नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥ १७ ॥**

भ्रिति—भ्रियते, इति " भृञोऽसंज्ञायामिति " क्यपि, तुकि च भृत्यः, दास्या अपत्यम् " द्र्य च इति " ढकि, दासेयः, " क्षुद्राभ्यो वेति " ढ्रकि च दासेरः, दंसयति, दंस्यते वा "दंसेष्टटनाविति" टनि, नस्यात्वे च दास्यते इति विग्रहे तु 'घञि' दासः " दासः सेवकशूद्रयोः " दंशेश्चेति टनि " दाशः " तालव्यान्तोऽपि, गुप्यते गयति, कनि च गोप्यं कायति वा " आतोऽनुपेति " के गोप्यकः, चेट्यते, "कृत्वादिभ्य इति " वुनि चेटकः, नियुज्यते, इति नियोज्यः "प्रयोज्यनियोज्याविति " साधुः, किञ्चित्, कुत्सितं वा करोतीति विग्रहे " दिवाविभेत्यत्र " " कियत्तद्बहुष्विति " वार्तिकेन अचि किंकरः, प्रेष्यते, गयति, " प्रादूहविति " वृद्धौ च प्रैष्यः, भुङ्क्ते, स्वाम्युच्छिष्टम्, भुज्यते वा " रुचिभुजिभ्यामिति " किष्यनि, भुजिष्यः, परिचरतीति ण्वुलि, परिचारकः इत्येकादश भृत्यस्य ॥ १७ ॥

पु. पु. पु. पु.

दूसरे से पाला गया **पराचितपरिस्कन्दपरजातपरैधिताः ।**

पु. पु. पु. पु. पु. पु.

मन्द या सुस्त **मन्दस्तुन्दपरिमृज आलस्यःशीतकोऽलसोऽनुष्णः १८॥**

पेति—आचीयते पल्यते स्म आचितः, परैराचितः पराचितः, "पराजित" इति पाठे तु परैराजीयते स्म परैपामाजः क्षेपणं जातोऽस्येति वा पराजितः, परिस्कन्दतीति पचाद्यचि, " परेश्चेति " वा षत्वे परिस्कन्दः, परपोषितत्वात् परस्माज्जातः परजातः परैरेधितः स्म इति विग्रहे तु पराजितोऽपि, परैरेधितः संवर्धितः परैधितः इति चत्वारि [illegible] परपोषितस्य । मन्दते, स्वपितीति अचि, मन्दः, "मन्दोऽतीक्ष्णे च मूढे [illegible] । [illegible] च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ " ([illegible]) तुन्दं [illegible] परिमार्ष्टीति " तुन्दशोकयोरिति " के तुन्दपरिमृजः, न [illegible] आलस्यः, शीतं करोतीति " [illegible]

[illegible]

लिङ्गकः " (इति मेदिनी) उष्णोदक्षस्तस्मादन्योऽनुष्णः स्यादिति षट् मन्दार "सुस्त" इति ख्यातस्य ॥ १८ ॥

पु. पु. पु. पु. पु. पु.

चतुर **दक्षे (तु) चतुरपेशलपटवः सूत्थान उष्ण (श्च)**

पु. पु. पु. पु. पु.

चाण्डाल **चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः ॥ १९ ॥**

पु. पु. पु पु. पु.

निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः ।

देति—दक्षते, इति अचि दक्षः " दक्षः प्रजापतौ रुद्रवृषभे कुक्कुटे पटौ । द्रुमे दक्षा तु मेदिन्याम् " (इति विश्वः) चतति, चत्यते वा "मन्दवाशीति" उरचि, चतुरः, पेशनम्, घञि, पेशस्तं लातीति के, पेशलः, पाटयतीति पटुः " फलिपाटीति " साधुः "पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत् । पटोलि तु पुमान् क्लीबे छत्रालवणयो- रपि " (इति मेदिनी) सुष्ठु उत्थानमुद्योगोऽस्येति, सूत्थानः, उष्णत्वं शीघ्रकारित्व- मस्यास्तीति अर्श आद्यचि, उष्णः स्यादिति षट् चतुरस्य । चण्डते, इति " पति- चण्डिभ्यामिति " आलञि, चण्डालः, प्लवते, इति अचि, प्लवः " प्लवः प्लक्षे प्लवी कपौ । शब्दे कारण्डवे म्लेच्छजातौ भेकक्रमेलयोः । क्रमनिम्न महीभागे कुलकेऽजलगाय- के । जलान्तरे प्लवंगन्धतृणेमुस्तकभिद्यपि" (इति हैमः) मतङ्गस्यापत्यम्, मतङ्गस्यायं वा अणि, मातङ्गः, दिवाकीर्तिरकीर्तिर्वास्येति दिवाकीर्तिः, अधार्मिकाञ्जनान् गच्छति, जनेभ्यो गच्छतीति वा " गमेश्चेति " खचि, जनंगमः, निषीदति पापमस्मिन्निति, " हलश्चेति " घञि, निषादः " निषादः स्वरभेदेऽपि चण्डाले धीवरान्तरे " (इति मेदिनी) श्वानं पचतीति पचाद्यचि, श्वपचः, अणि तु न्यङ्क्वादित्वात्कुत्वे श्वपाकोऽपि, ग्रामादेरन्तेवसतीति " सुप्यजाताविति " णिनि " शयवासेति " अलुकि च अन्ते- वासी, चण्डाल एव स्वार्थे अञि, चाण्डालः, पुत् कुत्सितं पुण्यं, पुमांसं वा कसतीति अचि, मूलविभुजादित्वात् के, वा पृषोदरादित्वात् पुक्कसः " पुक्कसः श्वपचेऽधमे " इति दिरवेदर्शनात्पुक्कसोऽपि, हैमे तु बुक्कसी, बुक्कसशब्दात्पुक्कसो- ऽपि दश निषादस्य ॥ १९ । १/२ ॥

पु. पु. पु. पु.

म्लेच्छभेद **(भेदाः) किरातशबरपुलिन्दा म्लेच्छ (जातयः) ॥२०॥**

भयिति—किरातादयस्त्रयो म्लेच्छजातयश्चाण्डालभेदा भवन्तीति. [illegible] [illegible] के. किरः [illegible] पचाद्यचि अतः किरश्चासावतश्चेति किरातः " [illegible]

[illegible]

च्छभेदे स्यात्कूनिम्बेऽल्पतनावपि । स्त्रियां चामरवाहिन्यां कुट्टनीदुर्गयोरपि ” इति मेदिनी) शवतीति वाहुलकादरप्रत्यये, शवं रातीति, “ आतोऽनुपेति ” के शवरः “ शवरो म्लेच्छभेदे च पानीये शंकरेऽपि च ” (इति विश्वः) पोलतीति प्रदे “कुणि पुलिभ्यामिति” किन्दचि पुलिन्दः “ पुलिन्दः कथ्यते म्लेच्छे पुलि-ऽपि निगद्यते ” (इति तारपालः) म्लेच्छन्तीति म्लेच्छास्तेषां जातयोऽवान्तर-दाः स्युः “ गोमांसभक्षको यस्तु लोकवाह्यं च भाषते । सर्वाचारविहीनोऽसौ लेच्छ इत्यभिधीयते ” (सूतसंहितायामपि) “ ब्राह्मण्यां वैश्यतोजातः क्षत्ता भवति ामतः । अस्यामनेन चौर्येण म्लेच्छो विप्रात्प्रजायते ” इति त्रीणि म्लेच्छजाति-ाण्डालभेदानाम् ॥ २० ॥

वहेलिया व्याधो (पु.) मृगवधाजीवो (पु.) मृगयु (पु.) र्लुब्धको (पु.) (ऽपि सः) ।

कुत्ता कौलेयकः (पु.) सारमेयः (पु.) कुक्कुरो (पु.) मृगदंशकः (पु.) ॥ २१ ॥

पागल कुत्ता शुनको (पु.) भषकः (पु.) श्वा (पु.) (स्या) दलर्क (पु.) (स्तु स योगितः) ।

शिकारी कुत्ता (श्वा) विश्वकद्रु (पु.) (र्मृगयाकुशलः) सरमा (स.) शुनी (स.) ॥ २२ ॥

कुतिया

व्येति—विध्यति मृगानिति ‘श्याद्व्यधेति’ णे, व्याधः, मृगवधेनाजीवतीति इगुपधेतिके मृगवधाजीवः, मृगान्वधार्थं यातीति ‘ मृगय्वादयश्चेति ’ कौ, मृगयु. “ मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि ” (इति मेदिनी) यः मृगयुः सः लुभ्यते स्म लुब्धः स एव स्वार्थे कनि. लुब्धकोऽपि स्यादिति चत्वारि व्याधस्य “ वहेलिया ” इति ख्यातस्य । कुले भवः “ कुलकुक्षीति ” ढकञि, कौलेयकः, “कौलेयकः सारमेये कुलीने” (इति [illegible]) सरमाया अपत्यम् ढकि, सारमेयः, कोकते, क्विपि, कुरु, कुरतीति के, कुक्- [illegible] कुक्कुरः “ कुक्कुरः सारमेये ना ग्रन्थिपर्णो नपुंसकम् ” (इति विश्वः) [illegible] दशतीति अणि, स्वार्थे कनि च, मृगदंशकः, शुनतीति क्वुनि, शुनकः, भषतीति [illegible], भषकः. श्वयतीति “श्वन्नुक्षन्निति” कनिनि, श्वा स्यात् “कुक्कुरस्तु शुनि श्वान. [illegible] शुनः ” (इति वाचस्पतिः) इति सप्त शुनकस्य “ कुत्ता ” इति [illegible] । यः योगो मन्त्रौषधादिः जातोऽस्येति, योग्यते स्म वा योगितः स [illegible] [illegible] [illegible] अलर्कः स्यात् “अलर्को धवलार्के स्यात्यो- [illegible] ” (इति विश्व.) [illegible] । यः श्वा सारमेयः मृगया- [illegible] स विश्वकं सर्वं द्रवतीति [illegible], [illegible] कन्दतीति [illegible] [illegible] ॥ [illegible]

लिङ्गकः ” (इति मेदिनी) उष्णोदक्षस्तस्मादन्योऽनुष्णः स्यादिति षट्, मन्दस्य “ सुस्त ” इति ख्यातस्य ॥ १८ ॥

पु. पु. पु. पु. पु. पु.

चतुर दक्षे (तु) चतुरपेशलपटवः सूत्थान उष्ण (श्च) ।

पु. पु. पु. पु. पु.

चाण्डाल चण्डालप्लवमातङ्गदिवाकीर्तिजनंगमाः ॥ १९ ॥

पु. पु. पु. पु. पु.

निषादश्वपचावन्तेवासिचाण्डालपुक्कसाः ।

देति—दक्षते, इति अचि दक्षः “ दक्षः प्रजापतौ रुद्रवृषभे कुक्कुटे पटौ । द्रुमे दक्षा तु मेदिन्याम् ” (इति विश्वः) चतति, चत्यते वा “मन्दवाशीति” उरचि, चतुरः, पेशनम्, घञ्, पेशस्तं लातीति के, पेशलः, पाटयतीति पटुः “ फलिपाटीति ” साधुः “पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत् । पटोले तु पुमान् क्लीबे छत्रालवणयोरपि ” (इति मेदिनी) सुष्ठु उत्थानमुद्योगोऽस्येति, सूत्थानः, उष्णत्वं शीघ्रकारित्वमस्यास्तीति अर्श आद्यचि, उष्णः स्यादिति षट् चतुरस्य । चण्डते, इति “ पतिचण्डिभ्यामिति ” आलञ्, चण्डालः, प्लवते, इति अचि, प्लवः “ प्लवः प्लक्षे प्लुतौ कपौ । शब्दे कारण्डवे म्लेच्छजातौ भेकभेलयोः । क्रमनिम्नमहीभागे कुलकेजलवायसे । जलान्तरे सुगंधतृणेमुस्तकभिदपि” (इति हैमः) मतङ्गस्यापत्यम्, मतङ्गस्यायं वा अणि, मातङ्गः, दिवाकीर्तिरकीर्तिर्यस्येति दिवाकीर्तिः, अधार्मिकाञ्जनान् गच्छति, जनेभ्यो गच्छतीति वा “ गमेश्चेति ” खचि, जनंगमः, निषीदति पापमस्मिन्निति, “ हलश्चेति ” घञ्, निषादः “ निषादः स्वरभेदेऽपि चण्डाले धीवरान्तरे ” (इति मेदिनी) श्वानं पचतीति पचाद्यचि, श्वपचः, अणि तु न्यङ्क्वादित्वात्कुत्वे श्वपाकोऽपि, ग्रामादन्तेवसतीति “ सुप्यजाताविति ” णिनि “ शयवासेति ” अलुकि च अन्तेवासी, चण्डाल एव स्वार्थे अञि, चाण्डालः, पुन् कुत्सितं पुण्यं, पुमांसं वा कसतीति अचि, मूलविभुजादित्वात् के, वा पृषोदरादित्वात् पुक्कसः “ पुक्कसः श्वपचेऽधमे ” इति विश्वदर्शनात्पुष्कसोऽपि, हैमे तु बुक्कसो, बुक्कसशब्दात्पुक्कसोऽपि इति दश निषादस्य ॥ १९ । २ ॥

प्र. पु. पु. पु.

म्लेच्छभेद (भेदाः) किरातशवरपुलिन्दा म्लेच्छ (जातयः) ॥ २० ॥

भेदेति—किरातादयस्त्रयो म्लेच्छजातयश्चाण्डालभेदा भवन्तीति. किरतीति [illegible] के, किरः [illegible] पचाद्यचि अतः [illegible] किरातः “ किरातो

[illegible]

म्लेच्छभेदे स्यात्कृनिम्केऽल्पननावपि । स्त्रियां चामरवाहिन्यां कुट्टनीदुर्गयोरपि" (इति मेदिनी) शवतीति बाहुलकादरप्रत्यये, शवं रातीति, "आतोऽनुपेति" के वा शबर. "शबरो म्लेच्छभेदे च पानीये शंकरेऽपि च" (इति विश्व:) पोलतीति विग्रहे "कुणि पुलिभ्यामिति" किन्दचि पुलिन्द: "पुलिन्द: कथ्यते म्लेच्छे पुलिन्देऽपि निगद्यते" (इति ताग्पाल:) म्लेच्छन्तीति म्लेच्छास्तेषां जातयोऽवान्तरभेदा: स्युः "गोमांसभक्षको यस्तु लोकवाह्यं च भाषते । सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते" (सूतसंहितायामपि) "ब्राह्मण्यां वैश्यतोजात: क्षत्ता भवति नामत: । अस्यामनेन चौर्येण म्लेच्छो विप्रात्प्रजायते" इति त्रीणि म्लेच्छजातिचण्डालभेदानाम् ॥ २० ॥

बहेलिया — व्याधो (पु.) मृगवधाजीवो (पु.) मृगयुर्लुब्धको (पु.) (ऽपि सः) ।

कुत्ता — कौलेयकः (पु.) सारमेयः (पु.) कुक्कुरो (पु.) मृगदंशकः (पु.) ॥ २१ ॥

शिकारी कुत्ता — शुनको (पु.) भषकः (पु.) श्वा (पु.) (स्या) दलर्क (पु.) (स्तु स योगितः) ।

कुतिया — (श्वा) विश्वकद्रु (पु.) (मृगयाकुशलः) सरमा (स्त्री.) शुनी (स्त्री.) ॥ २२ ॥

व्यधेति—विध्यति मृगानिति 'श्याद्व्यधेति' णो, व्याधः, मृगवधेनाजीवतीति इगुपधेति कः मृगवधाजीवः, मृगान्वधार्थं यातीति 'मृगय्वादयश्चेति' कौ, मृगयु. "मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि" (इति मेदिनी) यः मृगयुः सः लुभ्यति स्म लुब्धः स एव स्वार्थे कनि. लुब्धकोऽपि स्यादिति चत्वारि व्याधस्य "बहेलिया" इति ख्यातस्य । कुले भवः "कुलकुक्षीति" ढकञि, कौलेयकः, "कौलेयकः सारमेये कुलीने" (इति हैम) सरमाया अपत्यम् ढकि, सारमेयः, कोपने. [illegible] कुक्, कुर्कुरति [illegible], [illegible] चासौ [illegible] कुक्कुरः "कुक्कुर. सारमेये ना ग्रन्थिपर्णी नपुंसकम्" (इति विश्व:) मृगान् दशतीति [illegible], स्वार्थे कनि च, मृगदंशक., शुनतीति [illegible]. शुनकः, भषतीति [illegible]. भषकः, [illegible] "[illegible]" [illegible] "[illegible] शुनि [illegible] [illegible] शुनः" (इति [illegible]) इति [illegible] "कुत्ता" इति [illegible] । [illegible] [illegible] [illegible] [illegible] "[illegible]" [illegible] "[illegible]" (इति [illegible]) [illegible] [illegible] "[illegible]" [illegible] "[illegible]"

(इति मेदिनी) इत्येकमाखेटनिपुणशुनकस्य । सरतीति बाहुलकादमप्रत्यये सरमा "सरमा कुक्कुरी देवशुन्योः स्याद्राक्षसीभिदि" (इति मेदिनी) शुनतीति "इगुपधेति" के, गौरादित्वात् शुनी स्यादिति द्वे सरमायाः "कुतिया" इति ख्यातायाः ॥ २१ । २२ ॥

पु. पु.

गांव का सूअर **विड्वरः (शूकरो ग्राम्यो) वर्कर (स्तरुणः पशुः) ।**

जवान पशु न. न. पु. स.

शिकार **आच्छोदनं मृगव्यं (स्या)दाखेटो मृगया(स्त्रियाम्)२३॥**

वीति—ग्रामे भवो ग्राम्यः शूकरः विषं विष्ठां चरतीति अचि, मूलविभुजादित्वात् के, विषश्चरो वा विड्वरः स्यादित्येकं ग्राम्यशूकरस्य । तरुणो युवा पशुः वर्कते, इति बाहुलकादरनि, वर्करः स्यात् "वर्करः परिहासे स्याच्छागे युवपशावपि" (इति विश्व.) इत्येकं तरुणपशुमात्रस्य । आच्छिद्यन्तेऽत्रेति ल्युटि, पृषोदरादित्वात् आच्छोदनम्, मृगाव्यध्यन्तेऽत्रेति "अन्येभ्योऽपीति" डे, मृगव्यम्, आखिद्यन्तेऽत्रेति "हलश्चेति" घञि आखेटः, मृग्यन्तेऽत्रेति 'मृगया' स्त्रियां स्यात "परिचर्या परिसर्या मृगयेति" साधुरिति चत्वारि आखेटस्य "शिकार" इति ख्यातस्य ॥ २३ ॥

पु.

दाहिने अङ्ग में **(दक्षिणारुर्लुब्धयोगा) दक्षिणेर्मा (कुरङ्गकः) ।**

पु. पु. पु. पु. पु. पु.

घाववाला चोर **चोरैकागारिकस्तेनदस्युतस्करमोषकाः ॥ २४ ॥**

पु. पु. पु. पु.

चोर कर्म **प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः ।**

स. न. न न. न.

चोरी का माल **चौरिका स्तैन्यचौर्ये(च)स्तेयं लोप्त्रं (तु) (तद्धनम्)२५**

देति—यः कुरङ्गको लुब्धयोगाद् दक्षिणेऽरुरस्येति दक्षिणारुः स्यात् स दक्षिणो ईर्मस्येति दक्षिणेर्मा स्यादित्येकं दक्षिणाङ्गव्रणवतो मृगस्य । चोरयां चुरा संज्ञापूर्वकत्वान्न गुणः चुराशीलमस्येति "छत्रादिभ्य इति" णे, वृद्धौ च चौरः "चौरः पाटच्चरेऽपि स्याच्चोरपुष्पौषधावपि" (इति विश्वः) पचाद्यचि तु चोरोऽपि, एकमसहायमगारं प्रयोजनमस्येति 'ऐकागारिकः' "ऐकागारिकश्चौरे" इति भानुः । स्तेनयति, पचाद्यचि स्तेनः, दस्यतीति "यजिमनीति" युच्प्रत्यये "अनुनासिकयोः" इत्युक्त्यन्तर्भावे च दस्युः "दस्युश्चौरे रिपौ पुंसि" (इति हेम) तत्करोतीति कर्मणि, सुटि, तलोपे च तस्करः, मुष्णातीति ण्वुलि, मोषकः, प्रतिरोद्धुं शीलमस्येति

'सुपीति' णिनि., प्रतिरोधी, परानास्कन्तुं शीलमस्येति परास्कन्दी, पाटयंश्चरतीति अचि, पृषोदरादित्वात् पाटच्चरः "चौरजीर्णपटयोः पटच्चरः" (इति नामानुशासनम्) मलिं धृतं म्लोचतीति मूलविभुजादित्वात्के, मलिम्लुचः "मलिम्लुचो मासभेदे चौरस्वलनयोः पुमान्" (इति विश्वः) इति दश चौरस्य। चौरस्य भावः कर्म वा मनोज्ञादित्वाद् वुञि, चौरिका, स्तेनस्य भावः कर्म वा ष्यञि, स्तैन्यम्, चोरस्य कर्म ष्यञि, चौर्यम्, स्तेनस्य भावो यति, नलोपे च स्तेयम् "स्तेयं स्तैन्यं च चौर्यं स्याच्चौरिकाचोरिकेऽस्त्रियाम्" (इति वाचस्पतिः) इति चत्वारि चोरकर्मणः। तस्य चोरस्य धनं लुप्यते ष्ट्रनि लोप्त्रम्, लूयते इति विग्रहे तु ष्ट्रनि, लोत्रमपि "लोत्रमलुणि चोरिते" (इति विश्वः) इत्येकं चौरधनस्य ॥ २४ । २५ ॥

पु.

बहेलियों वीतंस (स्तूपकरणं बन्धने मृगपक्षिणाम्)।

का सामान पु. न. स. स.

फन्दा जाल उन्माथःकूटयन्त्रं (स्या) द्वागुरा मृगबन्धनी ॥ २६ ॥

वीति—मृगाश्च पक्षिणश्च मृगपक्षिणस्तेषां बन्धने यदुपकरणं तत्र वितंस्यते घञि, "उपसर्गस्येति" दीर्घं च "वीतंसः" स्यात् "वीतंसो बन्धनोपाये मृगाणामपि पक्षिणाम्। तेषामेव च विश्रम्भहेतौ प्राजन्येऽपि च" (इति विश्वः) इत्येकं मृगादिबन्धनसाधनस्य। उन्मथ्यतेऽनेनेति "हलश्चेति" घञि, उन्माथः "उन्माथः कूटयन्त्रे स्यान्मारणे घातके पुमान्" (इति मेदिनी) कूटस्य यन्त्रं यन्त्रं कूटयन्त्रं स्यादिति द्वे मृगादिबन्धनयन्त्रस्य। अवगुरते, 'गुरी उद्यमने' क "वष्टि भागुरि" इत्यकारलोपे, दापि च वागुरा, मृगो बध्यतेऽनयेति "करणाधिकरणयोश्चेति" ल्युटि मृगबन्धनी स्यादिति द्वे जालविशेषस्य ॥ २६ ॥

न.त्रि. पु. स्त्री. पु.स्त्री.न. पु.

रस्सी शुल्बं वराटकः (स्त्री तु) रज्जु (स्त्रिषु) वटी गुणः।

न. न.

रहट उद्घाटनं घटीयन्त्रं (सलिलोद्वाहनं प्रहेः) ॥ २७ ॥

गुणो पुंसि स्यान्न्यग्रोधकपर्दयोः" (इति मेदिनी) गुणयते, अदन्तत्वादेरजित्यचि गुणः "गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागे शौर्यादिसन्ध्यादिसत्त्वाद्यावृत्ति-रज्जुषु । शुक्लादावपि वस्त्यां च" (इति मेदिनी) इति पञ्च वराटकस्य "रस्सी" इति ख्यातायाः । प्रहेः कूपात् सलिलमुद्वाह्यतेऽनेनेति सलिलोद्वाहनम्, उद्घाट्यते-ऽनेन णयन्ताल्ल्युटि उद्घाटनम्, घटीनां यन्त्रं घटीयन्त्रं च स्यादिति द्वे "अरट" इति ख्यातस्य ॥ २७ ॥

पु.न. पु. न. पु.

राछ, सूत (पुंसि) वेमा वापदण्डः सूत्राणि (नरि) तन्तवः ।

बीनना ली- स. स. न.

पना आदि वाणिर्व्यूतिः(स्त्रियौतुल्ये)पुस्तं (लेप्यादिकर्मणि)॥२८॥

पुंसीति—वयत्यनेनेति, "वेञः सर्वत्रेति" मनिनि 'वेमा' पुंसि स्यात्, वपनम्, घञि, वापः, दण्डयतीति अचि, दण्डः, वापस्य दण्डो वापदण्डः "वायदण्डः" इति पाठे तु वानं वायः, दमनम्, अमान्तादिति डे, दण्डः वायस्य दण्डो वायदण्डो-ऽपि स्यादिति द्वे वायदण्डस्य "राछ" इति ख्यातस्य । सूत्र्यते, अचि, सीव्यतेऽनेन वा "सिविमुच्योष्टेरूचेति" ष्ट्रनि, सूत्रम्, द्वित्वे सूत्रे, बहुत्वे सूत्राणि स्युः "सूत्रन्तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः" (इति हैमः) तन्यन्ते, "सितनीति" तुनि, तन्तवः नरि पुंसि भवन्तीति द्वे सूत्रस्य । वाणनम्, "अच इः" इनीप्रत्यये वाणिः वाणी वा, वानम्, 'ऊतियूतीत्यादिना' निपातिते ऊतिः विशिष्टा ऊतिर्व्यूतिः उभे स्त्रियौ भूत्वा तुल्ये समानार्थे स्यातामिति द्वे वस्त्रादिवानस्य । लेप्यमादिर्यस्य, तच्च तत्कर्म चेति तस्मिन् लेप्यादि कर्मणि पुस्त्यते णयन्तादचि पुस्तं स्यात् । आदिना काष्ठपुत्तलिका-दिग्रहः "मृदा वा दारुणावाथ वस्त्रेणाप्यथ चर्मणा । लोहरत्नैः कृतं वापि पुस्तमित्यभि-धीयते" इत्येकं मृदादिलेपकस्य ॥ २८ ॥

स. स.

गुड़िया पञ्चालिका पुत्रिका(स्याद् वस्त्रदन्तादिभिः कृता) ।

पेटी पु. पु. स. स. स.

मञ्जूषा या पिटकः पेटकः पेटा मञ्जूषा(थ) विहंगिका ॥ २९ ॥

झोली स पु. न. पु. स.

छींका भारयष्टि(स्तदालम्बि) शिक्यं काचो(ऽथ) पादुका ।

जूता स. स. स.

पादूकृपान (स्त्री सैवा) नुपदीना (पदायता) ॥ ३० ॥

पञ्चेति—[illegible] कृता पुत्तलिका पञ्चालिकेत्युच्यते

१ "[illegible] ॥

भूष्यते घनि, स्वार्थे कनि, टापि, प्रत्ययस्थादितीत्वे, संज्ञायामिति ण्वुलि वा पञ्चालिका-"पाञ्चालिका" इति पाठे तु पञ्चालदेशे भवा "जनपदतदवध्योश्चेति" वुञि वृद्धौ च 'पाञ्चालिका' "पाञ्चालिका स्त्रिया वस्त्रपुत्रिका गीतिभेदयोः" (इति मेदिनी) पुत्री इव "इवेति, यावादिभ्यश्चेति" कनि, पुत्रिका स्यात् "स्यात्पुत्रिका पुत्तलिका दुहित्रोर्यन्त्रिके । ना पुत्रे शरभे धूर्ते शजवृक्षप्रभेदयोः" (इति विश्वमेदिन्यौ) आदिना वृश्चिकलतादिकृता इति द्वे पञ्चालिकायाः "गुड़िया" इति ख्यातायाः । पेटतीति क्वुनि, पिटकः "पिटकस्त्रिषु विस्फोटे मञ्जूषायां पुनः पुमान्" (इति मेदिनी) गवुलि तु पेटकः " पेटकः पुस्तकादीनां मञ्जूषायां च कदम्बके " (इति विश्वः) मुकुटमते तु पिण्डते, अचि, अनित्यत्वान्नुमोऽभावे च 'पेडा' स्यात्, स्वामिमते तु 'पीडयतीति अचि' टापि "पीडा" मज्जत्यत्रेति, "मस्जेर्नुम् चेति" ऊषनि, मञ्जूषा स्यादिति चत्वारि पेटकस्य "पेटारी" इति ख्यातायाः । अथेति—विहायसा गच्छतीति विहंगस्तस्य प्रतिकृतिः "इवेति" यावादित्वाद्वा कनि, विहंगिका, मुकुटमते तु "विहंगमापि" भारस्य यष्टिर्भारयष्टिरिति द्वे विहंगिकायाः "बहँगी—काँवड़ी" वा इति ख्यातायाः । [illegible] शीलमस्येति "नुवीति" शितौ तत्रालम्बि, [illegible] "[illegible] शिः कुट् किच्च" इति यति, शिगादेशे, कुटि च शिक्यम् । [illegible] घञि, काचः "काच, शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे" (इति त्रिकमेदिन्यौ) इति द्वे शिक्यस्य "सिकहर" इति ख्यातस्य । अथेति—पद्यतेऽनयेति "[illegible]" [illegible], स्वार्थे कनि च 'पादुका' कनोऽभावे तु पादूः, पादनुपनह्यति, उपनह्य [illegible], [illegible] च 'उपानत्' स्त्री स्यादिति त्रीणि उपानहः "जूता" इति ख्यातायाः । [illegible] पदत्राणां पदन्यानु "[illegible]" इत्यव्ययीभावे अनुपदं पादायामप्रमाणा [illegible] "[illegible]" [illegible] 'अनुपदीना' स्यादित्येकमनुपदीनायाः "मोजा" इति ख्यातायाः ॥ २९ । ३० ॥

काम् शी नद्ध्री वर्ध्री वरत्रा (स्यादश्वादेस्ताडनी) कशा ।

सर्वा, शे त्र [illegible]

लिङ्गे चाण्डालिका (तु) कण्डोलवीणा चण्डालवल्लकी ॥३१॥

नह्यति—नह्यतेऽनयेति "दाम्नीति" ष्ट्रन्, नद्ध्री, वर्ध्री, "[illegible]" [illegible] [illegible]

लश्चण्डालस्तस्य वीणा कण्डोलवीणा "कटोलवीणा" इति पाठे तु कटतीति "कपिगडीति" ओलचि, कटोलस्तस्य वीणा कटोलवीणाऽपि, चण्डालस्य वल्लकी चण्डालवल्लकी स्यादिति त्रीणि चाण्डालिकायाः "किंगरी" इति ख्यातायाः ॥ ३१ ॥

सोनार का काटा कसौटी रेती सलाई

स. स. पु. पु. पु.
नाराची (स्या) देषणिका शाण (स्तु) निकषः कषः ।
पु. पु. स. स.
व्रश्चनः पत्रपरशुरेषिका तूलिका (समे) ॥ ३२ ॥

नेति—स्वल्पो नाराचो वाणभेदो गौरादित्वान्ङीपि नाराची, इष्यतेऽनयेति एषणी सैव एषणिका स्यादिति द्वे सुवर्णतुलायाः । शण्यते "अकर्तरीति" घञि, श्यतीति विग्रहे तु बाहुलकाण्णप्रत्यये शाणः "शाणो मासचतुष्टये । लोहादीनां च निकषे शाणी प्रावरणान्तरे" (इति मेदिनी) निकषतीति अचि, निकषः, "निकष. शाण-फलके निकषा यातुमातरि" (इति विश्वमेदिन्यौ) कषतीति 'पचाद्यचि' कषः स्यादिति त्रीणि सुवर्णपरीक्षणपाषाणस्य, खड्गादितीक्ष्णीकरणयन्त्रस्य वा । वृश्च्यतेऽनेनेति ल्युटि, व्रश्चनः, पत्रमिव परशुः पत्रपरशुः स्यादिति द्वे सुवर्णादिच्छे-दनद्रव्यस्य "लघुकरवतस्य" वा । इष्यते, "कृञादिभ्य इति" वुनि, एषिका ईषति ईष्यते वेति विग्रहे तु क्वुनि, ईषिकापि, तूलतीति, क्वुनि, तूलिका उभे समे समानार्थे स्यातामिति द्वे वीरणादिशलाकायाः ॥ ३२ ॥

घरिया धौंकनी चर्मी कतरनी

स. स. स. स.
तैजसावर्तनी मूषा भस्त्रा चर्मप्रसेविका ।
स. स. स. स.
आस्फोटनी वेधनिका कृपाणी कर्तरी (समे) ॥ ३३ ॥

तैजसेति—तेजसो विकारः सुवर्णादिरावर्त्यतेऽस्यामिति गणन्ताद्धिकरणे ल्युटि, तैजसा-वर्तनी, मूषतीति "इगुपधेति" के, टापि च मूषा, मोषणं भिदादित्वादङि, वा मुषा ह्रस्वादिरपि, गौरादित्वान्ङीपि तु मूषी, अपि "मूषा मुषा त्वावर्तनी मूषी" (इति शब्दार्णवः) इति द्वे मूषायाः "घरिया" इति ख्यातायाः । भस्यतेऽनयेति, "हुया-मेति" त्रनि, इडोऽभावे, टापि च भस्त्रा, चर्मणा प्रसीव्यते, वुनि, राहुञि वा चर्म-प्रसेविका इति द्वे भस्त्रायाः "धौंकनी" इति ख्यातायाः । आस्फोट्यतेऽनयेति ल्युटि, आस्फोटनी, कुत्सने तु लक्षन्ती स्फोटयन्तीति पृषोदरादित्वात् आस्फोटनी अपि, विध्यतेऽनयेति ल्युटि, वेधनी सैव वेधनिका "वेधनी तु आस्फोटन्या स्फोटनी मृग-शीर्षके" (इति वाचस्पतिः) इति द्वे सुक्ष्मच्छिद्रकारिण्याः "चर्मी" इति ख्यातायाः । कृपाणवदिति, कर्तयति, कृन्तति च कृपाणी, कृन्ततीति बाहुलकादरप्रत्यये, कर्तनं करोतीति वा 'आतोऽनुपसर्गे' कः, गौरादित्वान्ङीपि 'कर्तरी' उभे समे समा-नार्थे स्यातामिति द्वे कर्तरिकायाः "कतरनी" इति ख्यातायाः ॥ ३३ ॥

पु. पु. पु. पु.

बाका टांकी- वृक्षादनो वृक्षभेदी टङ्कः पाषाणदारणः ।

पु.न. न. स्त्री. न.

आरा रांपी क्रकचो (ऽस्त्री) करपत्रमारा चर्मप्रभेदिका ॥ ३४ ॥

त्रिति—वृक्षमत्तीति, “कृत्यल्युटः” इति ल्युटि, वृक्षादनः वृक्षं भेत्तुं शीलमस्येति “सुपीति” णिनौ वृक्षभेदी स्यादिति द्वे काष्ठतनूकरणसाधनस्य “बांका” इति ख्यातस्य । टङ्कयति, ‘पचाद्यचि’ टमिति शब्दं कायतीति वा “आतोऽनुपेति” ‘सुपीति’ वा के, टङ्कः, पाषाणो दार्यतेऽनेनेति, णयन्ताल्ल्युटि, पाषाणदारणः स्यादिति द्वे टङ्कस्य “टांकी” इति ख्यातायाः । ‘क’ इति कचति, पचाद्यचि, क्रकचः अस्त्री पुंनपुंसकं स्यात् । करेण, कराद्वा पततीति ष्ट्रनि, करपत्रं स्यादिति द्वे क्रकचस्य “आरा” “करोत” वेति ख्यातस्य । आइयर्ति, ऋच्छति वा अचि, आर्यतेऽनेनेति विग्रहे तु भिदाद्यङि आरा “आरा शस्त्र्यामिति” पाठात्साधुः “आरा चर्मप्रभेदिन्यां पुंसि भौमशनैश्चरे” (इति मेदिनी) चर्मणः प्रभेदिका चर्मप्रभेदिका स्यादिति द्वे आरायाः “रांपी” इति ख्यातायाः ॥ ३४ ॥

स्त्री. स्त्री. स्त्री. न.

लोहे की प्रतिमा सूर्मी स्थूणाऽयःप्रतिमा शिल्पं (कर्मकलादिकम्) ।

कारीगरी, न. न. न. न. स्त्री.

मूर्ति, प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ३५

स्त्री. स्त्री. पु. स्त्री. न.

मिसाल प्रतिकृतिरर्चा (पुंसि) प्रतिनिधिरुपमोपमानं (स्यात्) ।

त्रिति—शोभना ऊर्मिरस्याः गौरादित्वान्ङीषि, सूर्मी, तिष्ठतीति स्थूणा “[illegible]” [illegible]: “स्थूणा सूर्म्यां स्तम्भे [illegible]” (इति हैमः) अयसः प्रतिमा अयःप्रतिमा स्यादिति द्वे लोहप्रतिमायाः । [illegible] शिल्पं स्यात् [illegible] “शिल्पं स्रुवे क्रियादिके” (इति विश्वः) [illegible] । [illegible] प्रतिमानम्, [illegible] प्रतिबिम्बम्, [illegible] “[illegible]” (इति मेदिनी) [illegible] प्रतियातना, प्रतिनिधिः [illegible] प्रतिकृतिः [illegible] ॥ ३५ ॥

[illegible]

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

समानता या (वाच्यलिङ्गाः) समस्तुल्यः सदृक्षःसदृशःसदृक् ॥ ३६॥

बराबरी पु.स.न. पु.स.न.

साधारणः समान(श्च) (स्युरुत्तरपदे त्वमी) ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

निभसंकाशनीकाशप्रतीकाशोपमा(दयः) ॥ ३७ ॥

वेति–समतीति, 'पचाद्यचि' समः, तुलया संमितः "नौवयोधर्मेत्यादिना" यति, तुल्यः, समानमिव पश्यन्ति जना यं स आत्मानं समान इव पश्यतीति "समानान्ययोश्च" इति कञ्क्विनौ "दृग्दृशवतुपु" इत्यत्र "दृक्षे च" इति वार्तिकबलादनुक्तोऽपि क्सः कल्प्यते इति" क्सप्रत्यये सभावे च सदृक्षः, "कञि" सदृशः, क्विनि सदृक्, सह आधारणेन वर्तते "वोपसर्जनस्य" इति सभावे साधारणः, सह मानेन वर्तते, समानं मानमस्येति वा समानः एते सप्त वाच्यलिङ्गा विशेष्यनिघ्ना भवन्तीति सप्त समानस्य । अमी निभसंकाशनीकाशप्रतीकाशोपमादय उत्तरपदे उत्तरपदस्था एव सदृशवचनाः सन्तो वाच्यलिङ्गाः स्युः । यथा 'पितृनिभःपुत्र.' 'मातृनिभा कन्या' देवनिभमपत्यमिति । नियतं भातीति "आतश्चोपसर्गे" इति के निभः "निभस्तु कथितो व्याजे पुंलिङ्गः सदृशे त्रिषु" संकाशते, 'पचाद्यचि' संकाशः "संकाशः सदृशेऽन्तिके" (इति हैमः) नितरां काशते, अचि "इकः काशे" इति दीर्घे च नीकाशः "नीकाशो निश्चये तुल्ये" (इति विश्वः) प्रतिकाशते, अचि, दीर्घे च प्रतीकाशः उपमानम्, उपमीयतेऽनयेति वा उपमा एते शब्दा आदयो येषामिति आदिना भूतरूपकल्पादयो गृह्यन्ते यथा पितृभूतः, पितृरूपः, पितृकल्प इति पञ्चापि सदृशस्य ॥ ३६ । ३७ ॥

स. स. स. स. न. न.

मजदूरी कर्मण्या(तु)विधा भृत्या भृतयो भर्म वेतनम् ।

न. न. न. पु. पु.

कमाई भरण्यं भरणं मूल्यं निर्वेशः पण(इत्यपि) ॥ ३८ ॥

केति–कर्मणा संपद्यते, कर्मणि साधुर्वा यति, कर्मण्या, कर्माणि विधीयन्तेऽनयेति "आतश्चोपसर्गे" इत्यङि, विधा, भ्रियन्ते कर्मकरा अनयेति "संज्ञायां समजेति" क्यपि, तुकि च भृत्या, "कर्मणि भृतौ" इति निर्देशात् क्तिन्नपि भृतिः, भ्रियतेऽनेनेति मनिनि, भर्म, वीयतेऽनेनेति "वीपतिभ्यामिति" तनति, वेतनम्, भरणे साधु, यति, भरण्यम्, भ्रियतेऽनेनेति ल्युटि भरणम् "भरणं वेतने भृतौ" (इति विश्वः) मूलेनानाम्यम् "नौवयोधर्मेति" यति मूल्यम्, "मूल्यं स्याद्वेतने वस्ने" (इति विश्वः) निर्विश्यते घञि, निर्वेशः "निर्वेशस्तु पुमान् भोगे वेतने मूर्च्छनेऽपि च" (इति मेदिनी) पण्यते "नित्यं पण इति" अपि, "पुंसीति" घे वा पणः "पणो वराटमाने स्यान्मूल्ये कार्षापणे ग्लहे । क्रय्यशाकादिके द्यूतव्यवहारे भृतौ धने" (इति मेदिनी) एकादश वेतनस्य ॥ ३८ ॥

स. स. स. स. स.

मदिरा या नावें सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा ।

मद्यपीनेमें रुचि- स. स. स. स. स.

वाने भोजन गन्धोत्तमा प्रसन्नेराकादम्बर्यः परिस्रुता ॥ ३९ ॥

न. न. न. पु.

मदिरा कश्यमद्ये(चाप्य) वदंश (स्तु भक्षणम्) ।

मद्यपानस्थान न. न. पु. पु.

मद्य पीनेकास्थान शुण्डापानं मदस्थानं मधुवारा मधुक्रमाः ॥ ४० ॥

सुरेति—सुष्ठु राति ददातीति, सुष्ठु रायन्त्यनयेति वा "आतश्चोपसर्गे" इत्यादि, सुरा, हलिनो बलस्य प्रिया हलिप्रिया, हलस्यङ्म ज्वलतादित्वाण्णो, हलस्य लेऽनयेति वा पचि हाला "हाला सुरायाम्" (इति विश्वः) परितः स्रवतीति परिस्रुत्, वरुणा-लयोऽपि वरुणस्तस्यात्मजा वरुणात्मजा, गन्धेन उत्तमा, गन्ध उत्तमो यस्या वा गन्धोत्तमा, प्रसीदति स्म 'गत्यर्थेति' क्ते, 'रदाभ्यामिति' नत्वे च प्रसन्ना, इरां कामं राति, "आतोऽनुपेति" के, इरा, कुत्सितमम्बरं कदम्बरं नीलाम्बरमस्यास्ति "अर्श-आदिभ्य इति" अचि, कादम्बरस्तस्येयम् । कदम्बे जातो रसः "तत्र जातः" इत्यणि कादम्बरसं रातीति वा 'आतोऽनुपेति' के, गौरादित्वान्ङीषि, कादम्बरी "कादम्बरन्तु दध्यग्रे मद्यभेदे नपुंसकम् । स्त्री वारुणी परभृतासरस्वतीशारिकासु च" (इति मेदिनी) परितः स्रूयते स्म कोर्क्तेरिति परिस्रुता "परिस्रुता स्त्री वारुण्यां स्यात्स्रुते स्यात्-त्रिलिङ्गवत्" (इति मेदिनी) माद्यत्यनयेति "इषिमदीति" किरचि, मदिरा, कश्यते-ऽनेनेति बाहुलकात् यत् "कश्यमश्वमद्ययोः कश्यम्" (इति रन्तिदेवः) माद्यत्यनेन "गदमदचरेति" यति, मद्यमिति यथोक्तं मद्यमात्रस्य । मद्यपानस्य रुचि-जननं खादनं वा अवदंशनम्, अवदश्यते वा भावे, कर्मणि च घञि, अवदंशः स्या-द्दिदंशः पानरुचिजनकभक्षणस्य । शुण्डां, "जनसनेति" डे, शुण्डा "शुण्डा पानमदे मता" (इति मेदिनी) पिबन्त्यत्रेति, अधिकरणे 'ल्युट्' पानम् "पानं पीति-भाजनरक्षयोः" (इति मेदिनी) मदस्य स्थानं मदस्थानमिति द्वौ मद्यपानगृहस्य । मधुनो वारा मधुवाराः, मधुनः क्रमा मधुक्रमाः पुंसि द्वे मधुपानक्रमस्य ॥ ३९।४० ॥

पु. पु. न. न.

मद्य मा मध्वासवो माधवको मधुमाध्वीक(मद्वयोः) ।

[illegible] न. पु. पु. न. पु.

[illegible] मैरेयमासवः सीधुर्मेदको जगलः(समौ) ॥ ४१ ॥

[illegible]

[illegible]

मृद्वीका द्राक्षा तस्या विकारः "तस्य विकार." इत्यणि, "अनुदात्तादेः" इत्यञि वा मार्द्वीकम् "केचित्तु पृषोदरादित्वान्माध्वीकमपि पठन्ति" अद्वयोः क्लीबमिति चत्वारि मधुकपुष्पकृतमद्यस्य। स्वामी तु द्वौ द्वौ पर्यायावित्याह। मिरायां देशविशेषे ओषधिविशेषे वा भवम् "नद्यादिभ्यो ढक्" इति ढकि, मैरेयम्, आसूयते, "ऋदोरप्" इत्यपि, आसवः, शेरतेऽनेनेति "शीङो धुक्" इति धुकि, शीधुः "अर्धर्चादिः" यद्यपि "शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत्। मैरेयं धातकीपुष्पगुडधानाम्बुसंहितम्" (इति माधवः) तथापि भेदमनादृत्योक्तमिति त्रीणि मैरेयस्य। मेद्यतीति वुनि, मेदकः भृशं गलति, यङ्लुगन्तादचि संज्ञापूर्वकत्वात् "दीर्घोऽकितः" इति दीर्घाभावे च जगलः "जगलो मदनद्रुमे। मेदके पिष्टमद्ये च" (इति मेदिनी) उभौ समौ समानार्थौ समानलिङ्गौ स्यातामिति द्वे सुराकल्कस्य॥ ४१॥

न. पु. न. पु.

मद्य बनाना, सुरा बीज — **सन्धानं (स्याद) भिषवः किण्वं (पुंसि तु) नग्नहूः।**

पु. पु. न. स.

सुरा का फूल, पीने की सभा — **कारोत्तरः सुरामण्ड आपानं पानगोष्ठिका॥ ४२॥**

समिति—संधीयते, ल्युटि सन्धानम् "सन्धानं स्यादभिषवे तथा संघट्टनेऽपि च" (इति विश्वः) अभिषूयते, ऋदोरित्यपि अभिषवः स्यात् "भवेदभिषवः स्नाने मद्यसन्धानयज्ञयोः (इति विश्वः) इति द्वे आम्रादिसन्धानस्य। कृणानं कण्यते वा क्रियम् "उल्वादयश्चेति" साधुः "किण्वं पापे सुराबीजे" (इति विश्वः) हानम्, हूयते वा संपदादि क्विपि, हूः नग्नस्य हूः नग्नहूरिति पुंसि स्यादिति द्वे नानाद्रव्यकृतसुराबीजस्य मत्तनग्नकृताह्वानस्य वा। कारेण क्रियया उत्तरः कारोत्तरः स्वामिमते तु कारोत्तमोऽपि सुराया मण्डः सुरामण्डः इति द्वे सुरापुष्पस्य। आसंभूय पिबन्त्यत्रेति ल्युटि आपानम्, पानस्य गोष्ठी पानगोष्ठी सैव पानगोष्ठिका इति द्वे मद्यपानसभायाः॥ ४२॥

पु.न. न. पु न. न.

मद्यपान का पात्र — **चषको (ऽस्त्री) पानपात्रं सरको (ऽप्य) नुतर्षणम्।**

पु. पु. पु. पु. पु.

मद्य पीना, जुआरी — **धूर्त्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृ (त्समाः)॥ ४३॥**

चेति—चष्यतेऽनेनेति वुनि चषकः, अस्त्री पुंनपुंसकं स्यात् "चषकोऽस्त्री सुरापात्रे मधुमद्यप्रभेदयोः" (इति मेदिनी) पानस्य पात्रम् पानपात्रमिति द्वे पानपात्रस्य। स्रियते वुनि, सरकः "सरकः शीधुपाने स्याच्छीधुनो मद्यभाजने" (इत्यजयः) अपि शब्दात्सरकोऽप्यस्त्री स्यात् "सरकं वा नानुतर्षो ना" (इति रत्नकोषः) अनुतृष्यतेऽनेनेति ल्युटि, अनुतर्षणम् 'नञि' अनुतर्षोऽपि "चषकश्चानुतर्षश्च सरकश्च" (इति भागुरिः) इति द्वे मद्यपानस्य चत्वार्येव मद्यपानपात्रस्येति वा मुकुटः। धूर्वति

“ हसिमृग्रिणीति ” तनि, वलोपे च धूर्तः “ धूर्तं तु खण्डलवणे धत्तूरे ना विटे त्रिषु ” (इति मेदिनी) “ धार्त ” इति पाठे तु धावनम् संपदादित्वात् क्विपि, बाहुलकाद्वलोपे च धा धावनेनार्तिः, धार्तिरस्यास्तीति अर्शआद्यचि, धा धावनेनार्तो वा धार्तः, अक्षैर्दीव्यतीति ‘ सुपीति ’ णिनौ अक्षदेवी, किनं दानं वायति, कितेन वातीति वा ‘ आतोऽनुपेति ’ के, कितवः “ कितवो धूर्तवन्मत्ते वञ्चके कनकाह्वये ” (इति विश्वः) अक्षेषु धूर्तः “ सप्तमी शौण्डैरिति ” समासे अक्षधूर्तः, द्यूतं करोतीति क्विपि तुकि च द्यूतकृत् एते समाः समानार्थाः समानलिङ्गाः स्युरिति पञ्च द्यूतकारस्य ॥ ४३ ॥

पु. पु. पु. पु.
जामिन (स्यु)र्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः ।
फड़बाज पु.न. स. न. पु.
जुआ द्यूतो(ऽस्त्रिया)मक्षवती कैतवं पणः(इत्यपि) ॥ ४४ ॥

स्युरिति—लगजन्ते स्म “ गत्यर्थेति ” क्ते, स्वार्थे कनि च लग्नकाः, प्रति प्रतिनिधयो भवन्तीति क्विपि, प्रतिभुवः स्युरिति द्वे लग्नकस्य “ जामिन ” इति ख्यातस्य । “ सभा द्यूतं सभागृहम् ” (इति रुद्रः) सभा द्यूतमाश्रयत्वेनास्यास्तीति व्रीह्यादित्वात् ठनि सभिकः, द्वित्वे सभिकौ, बहुत्वे सभिकाः द्यूतं कारयन्तीति णिचि स्वार्थे कनि च ण्वुलि तु कारयन्तीति कारकाः, द्यूतस्य कारकाः द्यूतकारकाः स्युरिति द्वे सभिकस्य “ फड़बाज ” इति ख्यातस्य । दिवनं क्रीडनं द्यूतं तदेवास्मिन्निति वा द्यूतः अस्त्रियां पुंनपुंसके स्यात्, अक्षाः पाशकाः सन्त्यस्यामिति मतुपि अक्षवती ङीप्-स्त्रीत्वम्, कितवस्य कर्म युवादित्वादणि कैतवम् “ कैतवं तु छले द्यूते कैतवः कितवे रिपौ ” (इति मेदिनी) पणो व्यवहारोऽस्त्यस्मिन्निति ‘अर्शआद्यचि’ पणः इत्यपि स्यादिति चत्वारि द्यूतक्रीडनस्य ॥ ४४ ॥

पु. पु. पु. पु. पु.
बाजी पाशा पणो(ऽक्षेषु)ग्लहोऽक्षा(स्तु)देवनाः पाशका(श्च ते) ।
गोटियों का चारों ओर पु.
चलाना, परिणाय(स्तु शारीणां समन्ताल्लयने)ऽस्त्रियाम् ॥ ४५ ॥
गोटी की शारी पु.न. पु.न. न. पु.
अष्टापदं शारिफलं प्राणिद्यूतं समाह्वयः ।

पणेति—अक्षेषु पणो ग्लहः [illegible]

[illegible]

" परिन्योरिति " घञि, परिणायः स्यादित्येकं शारीणां परितो नयनस्य । पङ्क्तौ पङ्क्तौ अष्टौ पदान्यस्येति " अष्टनः संज्ञायाम् " इति दीर्घेऽष्टापदम् अस्त्रियां पुंनपुंसके स्यात् " अष्टापदोऽस्त्री कनके शारीणां फलकेऽपि च " (इति मेदिनी) " फलं हेतुसमुत्थे स्यात्फलके व्युष्टिलाभयोः " (इति विश्वः) शारीणां फलं पट्टः शारिफलमिति द्वे शारीणां खेलनाधारपट्टस्य । प्राणिभिः कृतं द्यूतं प्राणिद्यूतम्, सम्यगाहूयतेऽत्रेति विग्रहे पुंसीति घे, बाहुलकादात्वाभावे च समाह्वयः स्यादिति द्वे प्राणिद्यूतस्य ॥ ४५ । १/२ ॥

सर्वलिङ्गासंग्रहादसंपूर्णतां परिहरति—

(उक्ता भूरिप्रयोगत्वादेकस्मिन्येऽत्र यौगिकाः)॥ ४६ ॥
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥ ४७ ॥

इति शूद्रवर्गः ॥

उक्ता इति—अत्र वर्गे भूरिप्रयोगत्वात् प्रचुरप्रयोगदर्शनादेकस्मिँल्लिङ्गे पुंसि ये यौगिका मालाकार—लोहकार—मार्दङ्गिक—वैणविकादयः शब्दा उक्ताः निर्दिष्टाः ते ताद्धर्म्यात्तद्योगवशात्तेषामन्यतोऽन्यत्रजातौ वृत्तौ सत्यां लिङ्गान्तरे स्त्रियां क्लीबे चोहनीयाः । अपिशब्दाद्येऽप्ययौगिकाः करण—मालिक—कुम्भकारादयस्ते जातिवचनत्वात् लिङ्गान्तरे स्त्रीलिङ्गे क्लीबत्वेऽपि ज्ञातव्या इति यावत् यस्यावयवशक्त्य एवार्थो बुध्यते स यौगिकः । यस्यावयवशक्तिमनपेक्ष्य समुदायशक्तिमात्रेणार्थो बध्यते स रूढः, तत्र यौगिको लिङ्गान्तरे यथा कुम्भकारी स्त्री, कुम्भकारं कुलम्, एवं मालाकारी, मालाकारम्, अणन्तत्वात्स्त्रियां ङीप्, अयौगिको यथा करणी—कुलालीत्यादयः अत्र जातेरस्त्रीविषयादिति ङीष् भवतीति विज्ञेयम् ॥ ४६ । ४७ ॥

इति शूद्रवर्गविवरणम् ॥

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
भूम्यादिकाण्डो द्वितयः साङ्ग एव समर्थितः ॥ ४८ ॥

इतीति—एवममरसिंहस्य कृतौ नामलिङ्गानुशासने नामलिङ्गव्युत्पादके शास्त्रे साङ्गः अङ्गोपाङ्गैः समेतः द्वितयो द्वितीयो भूम्यादिकाण्डः पृथिव्यादिसमूहः समर्थितः संवर्णित एवेति शम् ॥ ४८ ॥

इति श्रीमदमरसिंहविरचितेऽमरकोषे श्रीमद्रायबहादुरप्रयागनारायणाज्ञया द्विजवरशक्तिधरसंकलितायां रसालाख्यायां व्याख्यायां द्वितीयः काण्डः संपूर्णतामगादिति शिवम् ॥ २ ॥

ॐ परमात्मने नमः ॥

श्रीमदमरसिंहविरचितः

अमरकोषः ।

रसालाख्यया व्याख्यया समेतः ॥

तृतीयं काण्डम् ।

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।

लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥

विशेष्येति—इह सामान्ये साधारणत्वात्सामान्याख्ये तृतीयकाण्डे विशेष्यनिघ्नैः शेष्यं स्त्रीदारादि तदधीनलिङ्गवचनैः सुकृत्यादिभिः शब्दैः, संकीर्णैः परस्परविजा-त्यार्थैः कर्मपारायणादिभिः, नानार्थैः अनेकार्थेषु वर्तमानैर्नाकलोकादिभिः, अव्ययै-श्चादिभिरपि, लिङ्गान्यादौ येषामिति तेषां संग्रहैः, आदिशब्दान्नामसंग्रहैश्च लङ्का-फालिकेत्यादिभिः शब्दैरुपलक्षितास्तन्नामकाः वर्गाः स्वर्गादयः संश्रया आश्रया षामिति ते स्वर्गादिवर्गसम्बन्धिनो वर्गाः उच्यन्ते मयेति शेषः ॥ १ ॥

लिङ्गज्ञानोपायमाह—

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः ।

गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ २ ॥

स्त्रीति—यादृशैः स्त्रीलिङ्गत्वादियुक्तैः स्त्रीदाराद्यैः पदैर्यद्विशेष्यं स्त्रीदारादिरूपं यथा स्तुतं प्रक्रान्तं तस्य विशेष्यस्य भेदका व्यावर्तका गुणद्रव्यक्रियाविशिष्टाः शब्दास्तथा युः विशेष्यस्य यादृशे लिङ्गवचने तादृशलिङ्गवचना एव भवेयुरिति । तत्र गुणः शुक्लादिस्तद्विशिष्टो यथा शुक्लिनी स्त्री, शुक्लिनो दाराः, शुक्लि कुलम् । द्रव्यं दण्डादि तद्विशिष्टो यथा दण्डिनी स्त्री, दण्डिनो दाराः, दण्डि कुलम् । क्रिया पचनादिव्यापार-स्तद्विशिष्टो यथा पाचिका स्त्री, पाचका दाराः, पाचकं कुलमित्यादि विज्ञेयम् ॥ २ ॥

सुकृती पुण्यवान्धन्यो महेच्छ (स्तु) महाशयः ।

हृदयालुः सुहृदयो महोत्साहो महोद्यमः ॥ ३ ॥

स्विति—सुकृतमस्यास्तीति ‘ अत इनिठनाविति ’ इनिः सुकृती, पुण्यमस्यास्तीति ‘ मतुप् ’ पुण्यवान्, धनं लब्धा ‘धनगणं लब्धेति’ ‘ यत् ’ धन्यः “धन्या धात्र्याम-लक्ष्योः स्याद्धन्यं पुण्यवति त्रिषु ” (इति विश्वमेदिन्यौ) इति त्रीणि सभाग्यस्य। महतीच्छा यस्येति महेच्छः, “ आशयः स्यादभिप्राये मानसाधारयोरपि ” (इति मेदिनी) महानाशयोऽस्येति महाशयः स्यादिति द्वे महाभिलापस्य । प्रशस्तं हृदय-मस्येति “ हृदयाच्चालुरन्यतरस्यामिति ” ‘आलु.’ हृदयालुः, शोभनं हृदयमस्येति (“ भिन्नत्वाविवक्षणान्न हृद्भावः ”) सुहृदयः, “ सहृदयः ” इति वा पाठः सह हृदयेन “ तेन सहेति ” बहुव्रीहिः । अत्र प्रशस्तपरत्वं हृदयशब्दस्य तेन हृदयवान्, हृदयिक इत्यपि इति द्वे प्रशस्तचित्तस्य । महानुत्साहोऽस्येति महोत्साहः, महानुद्यमो-ऽस्यति महोद्यमः स्यादिति द्वे दुःसाध्यकृत्येऽपि साधनपरस्य ॥ ३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

ज्ञाता प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

चतुर वैज्ञानिकः कृतमुखः कृती कुशल (इत्यपि) ॥ ४ ॥

प्रेति—प्रकृष्टा वीणास्य, प्रवीणयति, प्रवीणयते वा क्विप्, घञि वा प्रवीणः, निपु-णाति इगुपधेति के निपुणः, अभिजानाति “ आतश्चोपसर्गे ” इति के, अभिज्ञः, विशेषेण जानातीति विज्ञः, न्यस्नासीत् ‘गत्यर्थेति’ क्ते, ‘निनदीभ्यामिति’ षत्वे च निष्णातः, शिक्षा जाताऽस्य, अशिक्षिष्टेति वा शिक्षितः, विज्ञानं बुद्धिः “ विज्ञानं यज्ञं तनुते ” (इति श्रुतेः) विज्ञाने नियुक्तः “ तत्र नियुक्तः ” इति ठञि, विज्ञानेन जयति वा “ तेन दीव्यतीति ” वा ठञि, वैज्ञानिकः श्रीधरादिस्वामिनस्तु ‘ विज्ञानिकः ’ इत्यपि, कृतं संस्कृतं मुखमस्येति कृतमुखः, कृतं कर्म प्रशस्तमस्येति कृती, कुशान् लाति के, कौ पृथिव्या शलति, शाति, कौ शलति चालयति गज-स्कन्धादीन्, कोः पापात् शलति बुद्धिमित्यादिति वा [illegible] “ कुशलः शिक्षिते त्रिषु । क्षेमे च सुकृते चापि पर्याप्ते च नपुंसकम् ” (इति विश्वमेदिन्यौ) इति दश प्रवीणस्य ॥४॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः ।

पु.स.न. पु.स.न. पु.स.न

दक्षिणीयो दक्षिणार्हः (स्तत्र) दक्षिण्य(इत्यपि) ॥ ५ ॥

पूजेति—पूज्यते “ अचो यत् ” इति यत्. पूज्यः “ पूज्य [illegible] ” (इति मे.) [illegible] प्रतीक्ष्यः “ [illegible] प्रतिपाल्ये स्यात्पूज्ये

[illegible] (३ । १ । ९३) [illegible]

[illegible] ॥

च " (इति हैमः) इति द्वे पूज्यस्य । संशयमापन्नः " संशयमापन्न इति " ठकि सांशयिकः, संशयमापन्नं मानसं यस्य यस्मिन्निति वा संशयापन्नमानसः स्यादिति द्वे सन्देहविषयस्य, सन्देहाश्रयस्य वा । यत्र दक्षिणीयः, दक्षिणार्हश्च तत्र दक्षिण्य इत्यपि स्यात् । दक्षिणामर्हति " कडंगरदक्षिणाच्छ चेति " छे, दक्षिणीयः, दक्षिणामर्हति, " अर्हः " इत्यचि दक्षिणार्हः, दक्षिणामर्हति यति दक्षिण्यः प्रज्ञादित्वेऽणि तु " दाक्षिण्य " इत्यपि स्यादिति त्रीणि दक्षिणायोग्यस्य ॥ ५ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अतिदानी **(स्युः)र्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ।**

दीर्घायुवाला पु.स.न. पु.स.न. पु.स.न. पु.स.न.

शास्त्रज्ञाता **जैवातृकः(स्या)दायुष्मानन्तर्वाणि(स्तु)शास्त्रवित् ॥६॥**

स्युरिति—मां याचस्वेति वदति " वदेरान्यः " इत्यान्ये वदान्यः " वदान्यो दानशौण्डे स्याच्चारुवादिनि वाच्यवत् " स्थूलं कूटं लक्ष्यमस्य, स्थूलैर्महद्भिर्लक्ष्यते वा कर्मणि यति स्थूललक्ष्यः, अयकारपाठे तु घञि स्थूललक्षोपि, दाने शौण्डः "सप्तमी शौण्डैरिति" समासे दानशौण्डः " शौण्डो मत्तेऽपि विख्याते " (इति विश्व.) बहु प्रददातीति " प्रे दाज्ञः " इति के बहुप्रदः स्यादिति चत्वारि दानशूरस्य । जीवति जीवेः " आतृकन् वृद्धिश्च " इति आतृकनि वृद्धौ च जैवातृकः " जैवातृकः पुमा-न्सोमे कृषकायुष्मतोस्त्रिषु " (इति विश्वमेदिन्यौ) अतिशयितमायुरस्य मतुपि " तसौ मत्वर्थे " इति भत्वाद्रुत्वाभावे च आयुष्मान्स्यादिति द्वे स्मायुषः । " वाणि-स्त्रियुते । व्यूतौ मूल्ये मनस्यपीति " (हैमादयः) अन्तर्वाणिरस्य समासान्तविधेर-नित्यत्वान्न कप्, अन्तर्वाणयति वा 'वण शब्दे' स्वार्थणिजन्ताद्‍ इणि 'इ' प्रत्यये अन्तर्वाणिः, शास्त्रं वेत्ति " सत्सूद्विषेति " क्विप् शास्त्रवित्स्यादिति द्वे शास्त्रज्ञस्य ॥ ६ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

पारखी **परीक्षकः कारणिको वरदस्तु समर्धकः ।**

[illegible] पु.स.न. पु.स.न. पु.स.न. पु.स.न.

हर्षित मनवाला **हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥**

परीति—परीक्षते 'ण्वुलि' परीक्षकः, " कारणं हेतुकरणयोः " (इति मेदिनी) [illegible] " [illegible] " (ठकि) कारणिकः स्यादिति द्वे परीक्षाकर्तुः [illegible] । वरं [illegible] " [illegible] " [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] (इति हैमः) [illegible] 'ण्वुलि' [illegible] स्यादिति द्वे [illegible] । [illegible] " [illegible] " [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ ७ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

उदास प्रीतियुत — **दुर्मना विमना अन्तर्मनाः(स्या)दुत्क उन्मनाः ।**

सरलचित्त — पु.स.न. पु.स.न. पु.स.न. पु.स.न.

दाता भोक्ता — **दक्षिणे सरलोदारौ सुकलो (दातृभोक्तरि)॥ ८ ॥**

दुरिति—दुःस्थितं मनोऽस्येति दुर्मनाः, विगतं विविधं वा मनोऽस्येति विमनाः, अन्तर्मनोऽस्येति अन्तर्मनाः स्यादिति त्रीणि दुःखितमानसस्य । उद्गतं मनोऽस्य "उत्क उन्मनाः" इत्युद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कनि उत्कः, उद्गतं मनोऽस्येति उन्मनाः स्यादिति द्वे उत्कण्ठितमानसस्य । दक्षते "द्रुदक्षिभ्यामिति" इननि दक्षिणः, "दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु । अवामे त्रिषु यज्ञादिविविदाने दिशि स्त्रियाम्" (इति मेदिनी) सरति अलचि, सरलः "सरलः पूतिकाष्ठे नाथोदारावक्रयोक्तृषु" (इति मेदिनी) उत्कृष्टमासमन्ताद् राति "आतश्चेति" के, उदर्यते कर्मणि घञि वा उदारः "उदारो दातृमहतोर्दक्षिणेऽप्यभिधेयवत्" (इति मेदिनी) इति त्रीणि ऋज्वाशयस्य । यो दाता चासौ भोक्ता च तत्र सुकल्यते "ईषद्दुरिति" खलि—शोभना कलाऽस्येति वा सुकलः स्यादित्येकं दातृभोक्तृकस्य ॥ ८ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

आसक्तचित्त — **(तत्परे)प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः ।**

सोद्योगी — पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

विख्यात — **प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥**

तदिति—तत्परे तात्पर्ययुक्ते प्रसितासक्तौ स्याताम्—तत्परमुत्तमं यस्य, तेन पूर्यते "मृदोरित्यपि" वा तत्परः, प्रासायि—प्रसीयते स्म वा प्रसितः, आसञ्जि—आसज्यते स्म वा कर्मणि क्ते आसक्तः स्यादिति त्रीणि तात्पर्ययुक्तस्य । इष्टश्चासावर्थश्च तत्र उद्युक्तः इष्टार्थोद्युक्तः, उत् उद्योगं सवति, सुनोति वा क्विपि, संज्ञापूर्वकत्वाद्गुणाभावे क्विपि आगमशास्त्रस्यानित्यत्वात्तुगभावे वा ततस्संज्ञायां कनि, उत्सुवति वा मितद्र्वादित्वाड्डौ, "सत्सूद्विषेति" क्विपि वा कनि "केण इति" ह्रस्वे च उत्सुकः स्यादिति द्वे अभिमतार्थसोद्योगस्य । प्रसितासक्ताविष्टा उद्युक्त इति पाठे आविष्टान्तं चतुष्कमासक्ते, "पञ्चापि तत्परपर्याया" इति केप्याहुः । प्रतीयते स्म, प्रत्येकमगादिति वा गत्यर्थत्वात्कर्तरि कर्मणि वा 'क्ते' प्रतीतः, प्रथते स्म अकर्मकत्वात् कर्तरि 'क्ते' प्रथितः, अख्यायि इति ख्यातः, अवेदीति वित्तः "वित्तो भोगप्रत्यययोरिति" साधुः, व्यज्ञायि क्ते, विजानातीति विग्रहे तु "मतिबुद्धीति" वर्तमाने क्ते वा विज्ञातः, व्यश्रावीति विश्रुतः स्यादिति षट् प्रसिद्धस्य ॥ ९ ॥

पु.स.न. पु.स.न.

[illegible] — **(गुणैःप्रतीते तु)कृतलक्षणाहतलक्षणौ ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] — **इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता ॥ १० ॥**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
स्वामी **अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।**

गुणैरिति—गुणैः शौर्यादिभिः प्रतीते विख्याते तु कृतलक्षणाहतलक्षणौ स्याताम् "लक्षणं नाम्नि चिह्ने च" (इति विश्वः) कृतमुच्चरितं लक्षणं नामास्येति कृतलक्षणः "आहतं गुणितेऽपि स्यात्" (इति विश्वः) आहतमभ्यस्तं लक्षणं यस्येति आहतलक्षणः स्यादिति द्वे गुणैर्विख्यातस्य । इभमर्हति दण्डादित्वाद् यति, एः कामाद् भ्यसते वा "अन्येभ्योऽपीति" डे इभ्यः "इभ्यो धनवतीभ्या तु करेणवां सल्लकीतरौ" (इति हेमचन्द्रः) आध्यायति "आतश्चेति" के, पृषोदरादित्वाड्ढत्वे च आढ्यः, बहु धनमस्त्यस्येति "अत इनीति" इनिः धनी स्यादिति त्रीणि बहुधनस्य । स्वमैश्वर्यमस्यास्तीति स्वामी "स्वामिन्नैश्वर्ये" इति साधुः, ईष्टे "स्थेशेति" वरचि ईश्वरः "ईश्वरो मन्मथे शंभौ नाढ्ये स्वामिनि वाच्यवत्" (इति विश्वमेदिन्यौ) पाति "पातेरिति" डतिः पतिः "पतिर्धवे ना त्रिष्वीशे" (इति विश्वः) ईष्टे तृनि, तृचि वा ईशिता, अधिभवति "भुवःसंज्ञान्तरयोरिति" क्विपि अधिभूः, नयति ण्वुलि नायकः "नायको नेतरि श्रेष्ठे हारमध्यमणावपि" (इति विश्वहेमचन्द्रौ) नयति तृचि नेता, प्रभवति "विप्रसंभ्यो ड्वसंज्ञायामिति" डौ प्रभुः, परिवर्हति स्म, परिवृंहति स्म वा परिवृढः "प्रभौ परिवृढः" इति साधुः अधिपाति "आतश्चेति" के अधिपः स्यादिति दश प्रभोः ॥ १० । १/२ ॥

पु.स.न. पु.स.न. पु.
समृद्धिवाला **अधिकर्द्धिःसमृद्धः(स्यात) कुटुम्बव्यापृतस्तु यः॥११॥**
पु.न. पु.
कुटुम्बपालक **(स्याद)भ्यागारिक(स्तस्मि)न्नुपाधि(श्च पुमानयम्) ।**
पु.
रूप सुन्दर **(वराङ्गरूपोपेतो यः) सिंहसंहननो (हि सः) ॥ १२ ॥**

अधीति—अधिका ऋद्धिरस्येति अधिकर्द्धिः, समृध्नोति अकर्मकत्वात् कर्तरि 'क्तः' समृद्धः स्यादिति द्वे अतिसम्पन्नस्य । यस्तु कुटुम्बव्यापृतः कुटुम्बपोषणे संलग्नस्तस्मिन्, अभ्यागारिकः उपाधिश्च स्यात् अयमुपाधिः पुमान्स्यात्—व्याप्रियते स्म अकर्मकत्वात्कर्तरि 'क्तः' व्यापृतः "व्यापृतस्तत्परो युक्तः" (इति चोपालितः) कुटुम्बे व्यापृतः, कुटुम्बव्यापृतः अभ्यागारे नियुक्तः "अगारान्ताट्ठन्निति" ठनि, अभि अगारे अभ्यागारिको वा अभ्यागारिकः. आदधाति "उपसर्गे घोरिति" कौ उपाधिः उपनयं आधियुं "..." इति स्मरणात् उपाधिः नित्यं पुंसि "उपाधिर्धर्मचिन्तायां कुटुम्बव्यापृते छले" (इति विश्वमेदिन्यौ) इति त्रीणि कुटुम्बपोषणादिव्यापृतपुरुषस्य । वराङ्गरूपोपेतः सन् वराङ्गानि च रूपं च ... वराङ्गरूपाणि तैरुपेतो यः स हि सिंहसंहननः

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

उदास प्रीतियुत सरलचित्त दाता भोक्ता

दुर्मना विमना अन्तर्मनाः(स्या)दुत्क उन्मनाः ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

दक्षिणे सरलोदारौ सुकलो (दातृभोक्तरि)॥ ८ ॥

दुरिति—दुःस्थितं मनोऽस्येति दुर्मनाः, विगतं विविधं वा मनोऽस्येति विमनाः, अन्तर्मनोऽस्येति अन्तर्मनाः स्यादिति त्रीणि दुःखितमानसस्य । उद्गतं मनोऽस्य "उत्क उन्मनाः" इत्युद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कनि उत्कः, उद्गतं मनोऽस्येति उन्मनाः स्यादिति द्वे उत्कण्ठितमानसस्य । दक्षते "द्रुदक्षिभ्यामिति" इननि दक्षिणः, "दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु । अवामे त्रिषु यज्ञादिविविदाने दिशि स्त्रियाम्" (इति मेदिनी) सरति अलचि, सरलः "सरलः पूतिकाष्ठे नाथोदाराबक्रयोस्त्रिषु" (इति मेदिनी) उत्कृष्टमासमन्ताद् राति "आतश्चेति" के, उदर्यते कर्मणि घञि वा उदारः "उदारो दातृमहतोर्दक्षिणेऽप्यभिधेयवत्" (इति मेदिनी) इति त्रीणि ऋज्वाशयस्य । यो दाता चासौ भोक्ता च तत्र सुकलयते "ईषद्दुरिति" खलि—शोभना कलाऽस्येति वा सुकलः स्यादित्येकं दातृभोक्तृकस्य ॥ ८ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

आसक्तचित्त **(तत्परे)प्रसितासक्ताविष्टार्थोद्युक्त उत्सुकः ।**

सोद्योगी पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

विख्यात **प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥**

तदिति—तत्परे तात्पर्ययुक्ते प्रसितासक्तौ स्याताम्—तत्परमुत्तमं यस्य, तेन पूर्यते "मृदोस्त्यपि" वा तत्परः, प्रासायि—प्रसीयते स्म वा प्रसितः, आसञ्जि—आसज्यते स्म वा कर्मणि क्ते आसक्तः स्यादिति त्रीणि तात्पर्ययुक्तस्य । इष्टश्चासावर्थश्च तत्र उद्युक्तः इष्टार्थोद्युक्तः, उत् उद्योगं सवति, सुनोति वा क्विपि, संज्ञापूर्वकत्वाद् गुणाभावे क्विपि आगमशास्त्रस्यानित्यत्वात्तुगभावे वा ततस्संज्ञायां कनि, उत्सुवति वा मितद्र्वादित्वाड्डौ, "सत्सूद्विषेति" क्विपि वा कनि "केऽण इति" ह्रस्वे च उत्सुकः स्यादिति द्वे अभिमतार्थे सोद्योगस्य । प्रसितासक्ताविष्टा उद्युक्त इति पाठे आविष्टान्तं चतुष्कमासक्ते, "पञ्चापि तत्परपर्यायाः" इति केऽप्याहुः । प्रतीयते स्म, प्रत्येकमगादिति वा गत्यर्थत्वात्कर्तरि कर्मणि वा 'क्ते' प्रतीतः, प्रथते स्म अकर्मकत्वात् कर्तरि 'क्ते' प्रथितः, अख्यायि इति ख्यातः, अवेदीति वित्तः "विदो भोगप्रत्यययोरिति" साधुः, व्यज्ञायि क्ते, विजानातीति विग्रहे तु "मतिबुद्धीति" वर्तमाने क्ते वा विज्ञातः, व्यश्रावीति विश्रुतः स्यादिति षट् प्रसिद्धस्य ॥९॥

पु.स.न. पु.स.न.

[illegible] **(गुणैःप्रतीते तु)कृतलक्षणाहतलक्षणौ ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

धनी **इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता ॥१०॥**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

स्वामी **अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।**

गुणैरिति—गुणैः शौर्यादिभिः प्रतीते विख्याते तु कृतलक्षणाहतलक्षणौ स्याताम् "लक्षणं नाम्नि चिह्ने च" (इति विश्वः) कृतमुच्चरितं लक्षणं नामास्येति कृतलक्षणः "आहतं गुणितेऽपि स्यात्" (इति विश्वः) आहतमभ्यस्तं लक्षणं यस्येति आहतलक्षणः स्यादिति द्वे गुणैर्विख्यातस्य । इभमर्हति दण्डादित्वाद् यति, एःकामादुभ्यसते वा "अन्ये-भ्योऽपीति" डे इभ्यः "इभ्यो धनवतीभ्या तु करेणवां सल्लकीतरौ" (इति हेमचन्द्रः) आध्यायति "आतश्चेति" के, पृषोदरादित्वाड्ढत्वे च आढ्यः, बहु धनमस्त्यस्येति "अत इनीति" इनिः धनी स्यादिति त्रीणि बहुधनस्य । स्वमैश्वर्यमस्यास्तीति स्वामी "स्वामिन्नैश्वर्ये" इति साधुः, ईष्टे "स्थेशेति" वरचि ईश्वरः "ईश्वरो मन्मथे शंभौ नाढ्ये स्वामिनि वाच्यवत्" (इति विश्वमेदिन्यौ) पाति "पातेरिति" डतिः पतिः "पतिर्धवे ना त्रिष्वीशे" (इति विश्वः) ईष्टे तृनि, तृचि वा ईशिता, अधिभवति "भुवःसंज्ञान्तर-योरिति" क्विपि अधिभूः, नयति ण्वुलि नायकः "नायको नेतरि श्रेष्ठे हारमध्यमणा-वपि" (इति विश्वहेमचन्द्रौ) नयति तृचि नेता, प्रभवति "विप्रसंभ्यो ड्वसंज्ञायामिति" डौ प्रभुः, परिवर्हति स्म, परिवृंहति स्म वा परिवृढः "प्रभौ परिवृढः" इति साधुः अधिपाति "आतश्चेति" के अधिपः स्यादिति दश प्रभोः ॥ १० । ½ ॥

पु.स.न. पु.स.न. पु.

समृद्धिवाला **अधिकर्द्धिःसमृद्धः(स्यात) कुटुम्बव्यापृतस्तु यः॥११॥**

पु.न. पु.

कुटुम्बपालक **(स्याद)भ्यागारिक(स्तस्मि)न्नुपाधि(श्च पुमानयम्) ।**

पु.

बड़ा सुन्दर **(वराङ्गरूपोपेतो यः) सिंहसंहननो (हि सः) ॥ १२ ॥**

अधीति—अधिका ऋद्धिरस्येति अधिकर्द्धिः, समृध्नोति अकर्मकत्वात् कर्तरि 'क्ते' समृद्धः स्यादिति द्वे अतिसम्पन्नस्य । यस्तु कुटुम्बव्यावृतः कुटुम्बपोषणे संसक्तस्तस्मिन् अभ्यागारिकः उपाधिश्च स्यात् अयमुपाधिः पुमान्स्यात्-व्याप्रियते स्म अकर्मकत्वात्क-र्तरि 'क्ते' व्यापृतः "व्यापृतस्तरुणो युवा" (इति वोपालितः) कुटुम्बे व्यापृतः, कुटुम्ब-व्यापृतः अभ्यागारे नियुक्तः "अगारान्ताट्ठन्निति" ठनि, अभि अधिक आगारिको वा अभ्यागारिकः, आधानम् "उपसर्गे घोरिति" कौ आधिः उपगत आधिम् "अत्यादयः" इति समासे उपाधिः नित्यं पुंसि "उपाधिर्धर्मचिन्तायां कुटुम्बव्यापृते छले" (इति विश्व-मेदिन्यौ) इति त्रीणि कुटुम्बपोषणादिव्यापारयुक्तस्य । अङ्गान्यवयवाः रूपं लावण्यम् अङ्गानि च रूपं च अङ्गरूपाणि वराणि च तान्यङ्गरूपाणि च तैरुपेतो यः स हि सिंहं

अत्र संहननमस्य, संहनने सिंहः इति वा राजदन्तादित्वात् सिंहसंहननः स्यादित्येकं महासुन्दरस्य ॥ ११ । १२ ॥

दुःख मे भी पू.स.न.
पूर्णता से काम करनेवाला **निर्वार्यः (कार्यकर्ता यः संपतन् सत्त्वसंपदा)।**
गूंगा पिता समान पु.स.न. पु.म.न. पु.म.न. पु.म.न.
अवाचि मूको(ऽथ)मनोजवः(स)पितृसन्निभः ॥ १३ ॥

नीति—यः सत्त्वसंपदा व्यसनेऽप्यक्षुब्धं मनःसत्त्वम् " व्यसनेऽभ्युदये वापि ह्यविकारं सदा मनः । तत्तु सत्त्वमिति प्रोक्तं नयविद्भिर्बुधैः किल " (इति स्मरणात्) तत्संपत्त्या संपतन् उद्यमं कुर्वन् संयुतः सन् वा कार्यं करोति सः निश्चयेन व्रियते "वृह्लोरिति" यति निर्वार्यः स्यात् "निर्धार्य." इति पाठे तु निश्चयेन ध्रियते 'यति' निर्धार्योऽपि स्यादित्येकं निरशङ्ककार्यकर्तृकस्य । अवाचि वाग्रहिते मूकः स्यात् न वाग्यस्येति अवाक् 'मू' इति कायति "आतोऽनुपेति" के मूयते बध्यते वागस्येति वा वाहुलकात्कनि मूकः स्यादिति द्वे मूकस्य "गूंगा" इति ख्यातस्य । अथेति—जवतीति पचाद्यचि जवम् मनोजवं वेगवदस्येति मनोजवः " मनोजवपितृसधर्माणः " (इति नाममाला) स्वामिमते तु चममादिनन् मनोजवसः । पीयूषव्याख्यातो "मनोजवाः" सान्तोऽपि, पितेव सन्निभाति "आतश्चोपसर्गे" इति 'क' पितृसन्निभःस्यादिति द्वे पितृसमस्य॥१३॥

पु.स.न.
अलंकृत कन्या दाता **(सत्कृत्यालंकृतां कन्यां यो ददाति स)कुकुदः।**
लक्ष्मीवान् स्नेही पु.म.न. पु.म.न पु.म.न. पु.म.न. पु.म.न. पु.म.न.
लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान् स्निग्ध(स्तु)वत्सलः १४

सदिति—सत्कृत्य सत्कारं प्रतिपाद्य अलंकृतां सर्वालंकरणैरन्वितां कन्यां यो वराय ददाति [illegible] कुः पृथ्वी भूमिस्तां ददाति तथा [illegible] 'आतोऽनुप' [illegible] के कुकुदः स्यात् "कुकुद." इति पाठे तु [illegible] 'कुकुर्भमित' के पृषोदरादित्वात् कुकुदं ददातीति कुकुदोऽपि स्यादित्येकम् [illegible] । लक्ष्मीरस्यास्तीति मतुपि लक्ष्मीवान्, लक्ष्मी- [illegible] "लक्ष्म्या अच्च" [illegible] न लक्ष्मणः [illegible] । [illegible] पुंसि स्यात् [illegible] (इति मेदिनी) [illegible] 'सिध्मादिभ्यश्च' [illegible] श्री- [illegible]

[illegible]

स्यास्तीति श्रीमान् स्यादिति चत्वारि लक्ष्मीसंपन्नस्य। स्निह्यतिस्म अकर्मकत्वात् कर्तरि क्ते "वाद्रुहेति" घत्वे च स्निग्धः "वत्सः पुत्रादिवर्षयोः" (इति मेदिनी) वत्से पुत्रादिस्नेहपात्रेऽभिलाषोऽस्यास्ति "वत्सांसाभ्यामिति" लचि वत्सलः स्यादिति द्वे स्नेहयुक्तस्य "स्नेही" इति ख्यातस्य ॥ १४ ॥

दयावान् — (स्या) दयालुः (पु.स.न.) कारुणिकः (पु.स.न.) कृपालुः (पु.स.न.) सूरतः (पु.स.न.) (समाः)।

स्वेच्छाचारी या स्वतन्त्र — स्वतन्त्रो (पु.स.न.) ऽपावृतः (पु.स.न.) स्वैरी (पु.स.न.) स्वच्छन्दो (पु.स.न.) निरवग्रहः (पु.स.न.) ॥ १५ ॥

स्यादिति—दयते तच्छीलः "स्पृहिगृहीति" 'आलुचि' दयालुः करुणाशीलमस्येति "शीलमिति" ठकि, कारुणिकः, कृपां लातीति मितद्र्वादित्वाड्डौ कृपालुः, शोभन उः शंभुः सूस्तस्मिन् रतः, स्विरतं यस्य, सुरमते वा "सौरमेक्तो दमेः पूर्वपदस्य च दीर्घः" इति क्ते, दीर्घे च सुरतः स्यात् एते समाः समानार्थाः समानलिङ्गाः स्युरिति चत्वारि कारुणिकस्य। स्व आत्मा तन्त्रं प्रधानमस्येति स्वतन्त्रः, अपगतमावृतमावरणमस्येति अपावृतः "अपावृतस्तु पिहिते स्वतन्त्रेऽपि च वाच्यवत्" (इति विश्वमेदिन्यौ) स्वेन ईरितुं शीलमस्य "सुप्यजाताविति" 'णिनौ' "स्वादीरेरिणोरिति" वृद्धौ च स्वैरी, स्वच्छन्दोऽभिलाषो यस्येति स्वच्छन्दः, निष्क्रान्तोऽवग्रहान्नियमादिति विग्रहे "निरादयः" इति समासे निरवग्रहः स्यादिति पञ्च स्वतन्त्रस्य ॥ १५ ॥

पराधीन या पराये हुक्म में रहनेवाला — परतन्त्रः (पु.स.न.) पराधीनः (पु.स.न.) परवान् (पु.स.न.) नाथवा (पु.स.न.) (नपि)।

आधीनमात्र — अधीनो (पु.स.न.) निघ्न (पु.स.न.) आयत्तो (पु.स.न.) ऽस्वच्छन्दो (पु.स.न.) गृह्यको (पु.स.न.) ऽ(प्यसौ) ॥१६॥

पेति—परस्तन्त्रं प्रधानं यस्येति परतन्त्रः, परस्मिन्नधि "सप्तमीशौण्डैरिति" समासे, अषडक्षेति खे, ईनादेशे च पराधीनः, परः स्वाम्यस्यास्तीति 'मतुपि' परवान्, नाथोऽस्यास्तीति नाथवानपि स्यादिति चत्वारि पराधीनस्य। इनमधिगतः "अत्यादयः" इति समासे। अध्युपरिइनोऽस्येति वा अधीनः, निहन्यते निगृह्यते हन्तेः "घनर्थे कः" इति 'के' निघ्नः, आयततेस्म अकर्मकत्वात्कर्तरि क्ते आयत्तः, न स्वः छन्दोऽस्येति अस्वच्छन्दः, असौ गृह्यते "पदास्वैरीति" 'क्यपि' स्वार्थे 'कनि' गृह्यकोऽपि स्यात् "गृह्यको निघ्नके छेके" (इति विश्वमेदिन्यौ) इति पञ्चाधीनसामान्यस्य नवानामप्येकार्थत्वमिति केचिदाहुः ॥ १६ ॥

बुहारनेवाला सुस्त — खलपूः (पु.स.न.) (स्या) द्बहुकरो (पु.स.न.) दीर्घसूत्र (पु.स.न.) श्चिरक्रियः (पु.स.न.)।

अविचारी आलसी — जाल्मो (पु.स.न.) ऽसमीक्ष्यकारी (पु.स.न.) (स्यात्) कुण्ठो (पु.स.न.) (मन्दः क्रियासु यः)

खेति—" खलं भूस्थानकल्केषु " (इति विश्वः) खलं चत्वरं पुनाति मार्जयति 'क्विपि' खलपू द्वित्वे " ओः सुपीति " यणादेशे खलप्वौ बहुत्वे खलप्वः स्युः । बहु करोति, भुवं संमार्ष्टीति "कियत्तद्बहुष्वज्विधानमिति" 'अचि' बहुकरः, स्त्रियां बहुकरा स्यादिति द्वे संमार्जनादिकारिणो भुवं मार्जयतो वा । " सूत्रं तन्तुव्यवस्थयोः " (इति विश्वः) दीर्घं सूत्रं व्यवस्था यस्येति दीर्घसूत्रः, चिराच्चिरेण वा क्रिया यस्येति चिरक्रियः स्यादिति द्वे अतिविलम्बेन क्रियासंपादकस्यालसविशेषस्य वा । जालयति जाल्यते वा बाहुलकान्मे जाल्मः " जाल्मस्तु पामरे । असमीक्ष्यकारिणि च " (इति हेमः) असमीक्ष्याविचार्य कर्तुं शीलमस्येति " सुपीति " 'णिनौ' असमीक्ष्यकारी स्यादिति द्वे गुणदोषविचारशून्यस्य । यः क्रियासु मन्दोऽलसो मूढो वा सः कुण्ठति 'पचाद्यचि' कुण्ठः स्यात् " कुण्ठोऽकर्मण्यमूर्खयोः " (इति मेदिनी) इत्येकं मन्दक्रियस्य ॥ १७ ॥

काम करनेवाला. पु.स.न. पु.स.न. पु.स.न.
काम करने में लगा. हमेशा काम में लगा कामों का पूरा करनेवाला.

कर्मक्षमोऽलंकर्मीणः क्रियावान् (कर्मसूद्यतः) ।
पु.स.न. पु.स.न. पु.स.न. पु.स.न.
(स) कार्मः कर्मशीलो (यः)कर्मशूर(स्तु)कर्मठः॥१८॥

केति—कर्मसु क्षमः " सप्तमीति " योगविभागात्समासे कर्मक्षमः, कर्मणे क्रियायै अलं समर्थः " प्रामापन्नालं पूर्वेति " परवल्लिङ्गनिषेधात्समासे " पर्यादयः " इति वा "अपडक्षेति" 'खे' ईनादेशे च 'अलंकर्मीणः' स्यादिति द्वे क्रियाकरणे समर्थस्य । यः कर्मसु उद्यतः उद्युक्तः सः क्रियास्यास्तीति मतुपि क्रियावान्स्यादित्येकं कर्मोद्यतस्य । यः कर्मशीलः सः कार्मः स्यात् कर्मशीलमस्य "छत्रादिभ्यो णः" इति 'णे' वृद्धौ च कार्मः, स्त्रियां तु 'कार्मी' कर्मणि शीलमस्यास्तीति कर्मशीलः स्यादिति द्वे कर्मसु फलमनपेक्ष्य प्रवृत्तस्य । कर्मणि शूरः तत्परोऽस्य [illegible] कर्मशूरः, कर्मणि घटते " कर्मणि घटोऽठच् " इत्यठचि कर्मठः स्यादिति द्वे प्रयत्नेन प्रारब्धकर्मपरिसमापकस्य ॥ १८ ॥

[illegible] पु.स.न. पु.स.न. पु.स.न.
[illegible]

भरण्यभुक्कर्मकरः कर्मकार(स्तु तत्क्रियः) ।
पु.स.न. पु.स.न. पु.स.न. पु.स.न.
अपस्नातो मृतस्नात आमिषाशी (तु) शौष्कलः॥१९॥

भेति—भरण्यं [illegible] भुङ्क्ते इति भरण्यभुक्, क्वचित् " कर्मण्यभुक् " इति पाठः [illegible] 'क्विपि' कर्मण्यभुगपि,

कर्म करोति "कर्मणि भृतौ" इति 'टे' कर्मकरः स्यादिति 'द्वे' मूल्येन कर्मकुर्वतो वेतनं गृहीत्वा कर्मकारिणो वा। यस्तु तत्कर्मैव क्रिया यस्येति तत्क्रियः कर्मकारक्रियः सः कर्म करोति कर्मण्यणि कर्मकारः स्यादित्येकं वेतनं विना कर्मकारस्य। अपकृष्टं स्नातः "प्रादयोगताद्यर्थे" इति समासे अपस्नातः, मृते स्नातः सप्तमीसमासे मृतस्नातः स्यादिति द्वे मृतमुद्दिश्य स्नातस्य। आमिषमश्नाति "सुपीति" णिनौ आमिषाशी, "शुष्कली शुष्कमांसेऽपि मांसपात्रेऽपि सा मता" तामत्तीति विग्रहे "शेषे" 'इत्यणि' शौष्कलः स्वामिमते तु पृषोदरादित्वात् शाष्कलोऽपि संज्ञापूर्वकत्वादृवृद्ध्यभावे तु शुष्कलोऽपि "शुष्कलः शुष्कमांसस्य फणिके पिशिताशिनि" (इति हैमः) इति द्वे मांसमत्स्याशिनः ॥ १९ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

भूखा **बुभुक्षितः (स्या) त्क्षुधितः जिघत्सुरशनायितः।**

पराश्नजीवी पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

खवैया **परान्नः परपिण्डादो भक्षको घस्मरोऽद्मरः ॥ २० ॥**

विवृति—भोक्तुमिच्छा बुभुक्षा सा जाताऽस्य तारकादित्वादितचि बुभुक्षित', क्षुध्यतिस्म अकर्मकत्वात् कर्तरि 'क्ते' "वसतिक्षुधोरिति" इडागमे च क्षुधा जातास्येति तारकादित्वादितचि वा क्षुधितः, अत्तुमिच्छुः अदेः सनि "लुङ्सनोरिति" घस्लादेशे "सनाशंसेति उप्रत्यये च जिघत्सु', अशनस्येच्छा "अशनायेति" साधुः अशनाया जाताऽस्य तारकादित्वादितचि अशनायितः स्यादिति चत्वारि क्षुधितस्य। परस्य अन्नं परान्नम् तन्नित्यमस्येति "अर्श आदिभ्य" इत्यचि परान्नः, परस्य पिण्डं तदत्तीति कर्मण्यणि परपिण्डादः स्यादिति द्वे परान्नजीवनस्य। भक्षयति 'ण्वुलि' भक्षकः, घसति "सृघस्यदः क्मरच्" इति क्मरचि, घस्मरः एवमत्तीति 'क्मरचि' अद्मरः स्यादिति त्रीणि भक्षणपरस्य ॥ २० ॥

पु.स.न. पु.स.न.

मरभुखा **आद्यूनः(स्या) दौदरिको (विजिगीषाविवर्जिते)।**

पु.स.न. पु.स न.

पेट्ट **(उभौ) त्वात्मंभरिः ‡कुक्षिंभरिः (स्वोदरपूरके) ॥२१॥**

आद्यिति—विजिगीषाविवर्जिते उत्कर्षेच्छारहिते आद्यूनः, औदरिकश्च स्यात्। आदेवीन् अकर्मकत्वात्कर्तरि 'क्ते' "दिवोऽविजिगीषायामिति" निष्ठानत्वे "ग्रस्य विभाषेति" इडागमाभावे ऊठि च आद्यूनः, उदरे प्रसितः "उदराट्ठगाद्यूने" इति 'ठकि' वृद्धौ च औदरिकः स्यादिति द्वे बुभुक्षयातिपीडितस्य "मरभुखा" इति ख्यातस्य। आत्मानं

‡ चान्द्रास्तु आत्मोदरकुक्षिष्विति पेट्टः, "ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः" (इति मुरारिः)

भरति बिभर्ति वा आत्मंभरिः " फलेग्रहिरात्मंभरिश्चेति " साधुः, कुक्षिं बिभर्ति चात
" भृञः कुक्ष्यात्मनोर्मुम् च " इति मुमागमे 'कुक्षिंभरिः, उभौ स्वोदरपूरके स्याता-
मिति द्वे निजोदरपूरकस्य " पेटू " इति ख्यातस्य ॥ २१ ॥

पु.स.न. पु.स.न. पु.स.न पु.स.न.
सर्वभक्षी **सर्वान्नीन(स्तु) सर्वान्नभोजी गृध्नुस्(तु) गर्धनः ।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
लोभी
महालोभी **लुब्धोऽभिलाषुकस्तृष्णक्(समौ)लोलुपलोलुभौ ॥२२॥**

सेति—सर्वेषामन्नानि सर्वान्नानि तानि भक्षयति "अनुपदसर्वान्न" इति 'खे' तस्येना-
देशे च सर्वान्नीनः, सर्वान्नानि भोक्तुशीलमस्य " सुपीति" 'णिनौ' सर्वान्नभोजी स्या-
दिति द्वे सर्ववर्णान्नभक्षकस्य । गर्धनशीलः " त्रसिगृधीति " 'क्नौ' गृध्नुः गृध्यत्ये-
वंशीलो " जुचङ्क्रम्येति " 'युचि', अनादेशे च गर्धनः, लुभ्यतिस्म " गत्यर्थेति "
कर्तरि 'क्ते' लुब्धः " लुब्ध आकाङ्क्षिणि व्याधे " (इति हेमचन्द्रः) अभिलष्यति
" लषपतपदेति " उकञि अभिलाषुकः, तृष्यति " स्वपितृषोर्नजिङ्" नजिङि
तृष्णक्, सर्वधरमते तु तृष्णाशब्दात् " तत्करोतीति " णयन्तात्तक्विपि तृष्णा-
कोऽदन्तोपि स्यादिति पञ्च लुब्धस्य " लोभी " इति ख्यातस्य । गर्हितं लुम्पति
" लुपसदेति " 'यङन्तादचि' लोलुपः, भृशं लुभ्यति "धातोरेकाचः" इति यङन्ता-
दचि लोलुभः उभौ समौ समानार्थौ समानलिङ्गौ स्यातामिति द्वे अतिलुब्धस्य ॥ २२ ॥

सिड़ी या पागल पु.स.न. पु.स.न. पु.स.न. पु.स.न.
अन्यायी **उन्मद(स्तू)न्मदिष्णुः (स्याद) विनीतः समुद्धतः ।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
मतवाला **मत्ते शौण्डोत्कटक्षीबाः कामुके कमितानुकः ॥ २३ ॥**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
कामुक या कामी **कम्रः कामयिता भीकः कमनः कामनोऽभिकः ।**

उन्मेति—उद्गतो मदो हर्षोऽस्येति उन्मदः क्वचित् " सोन्मादः " इति पाठस्तत्र
[illegible] उन्मादेन [illegible] सोपसर्गान्मत्वर्थे [illegible] सोन्मादः, मुख्यनिशयेन उन्मादोऽस्येति
[illegible] " अलंकृञिति " 'इष्णुचि' उन्मदिष्णुः
[illegible] " सोन्मादः " [illegible] इति ख्यातस्य । नव्यनाशीति कर्मणि क्ते
[illegible] " पागल " इति ख्यातस्य । [illegible] कर्तरि, कर्मणि वा 'क्ते'
[illegible] (इति मेदिनी) इति द्वे
[illegible] " नञ्याप्येति "
[illegible] शौण्डः " शौण्डौ
[illegible] (इति विश्वमेदिन्यौ) उत्कटः फट
[illegible]

आवरणमावारकोवास्य, उद्गतमदप्रवृत्तेरुच्छब्दात्स्वार्थे " संप्रोदश्चेति " कटचि वा उत्कट " उत्कटस्तीव्रमत्तयोः " (इति हैमः) क्षीबतेस्म अकर्मकत्वात्कर्तरि क्ते " अनुपसर्गादिति " साधुः, के वा 'क्षीवः' नान्तोऽप्ययम् "क्षीवाणो समबुध्यत" इति व्यासप्रयोगात्तत्र बाहुलकात्कनिनि क्षीवाऽपि स्यादिति चत्वारि मत्तस्य " मतवाला" इति ख्यातस्य। कामयते "लषपतपदेति" 'उकञि' कामुकः "कामुकः कमने शोकपादपे चातिमुक्तके " (इति मेदिनी) णिङभावे च 'तृचि' कमिता, अनुकामयते अनुकः " अनुकाभिकेति " साधुः, कमनशीलः " नमि कम्पीति " 'रे' कम्रः, कामयते, 'तृचि' कामयिता, अभिकामयते अभीकः " अभीकः कामुके क्रूरे निर्भये त्रिषु ना कवौ" (इति मेदिनी) कमनशीलः "अनुदात्तेतश्चेति" 'युचि' कमनः " कमनः कामुके कामेऽभिरूपेऽशोकपादपे " (इति मेदिनी) कामनशीलः कामयते वा " णिङन्ताद्युचि " कामनः, अभिकामयते अभिकः स्यादिति नव कामुकस्य ॥ २३ । ३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

आज्ञाकारी **विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ २४ ॥**

वश्य पु.स.न. पु.स.न. पु.स न. पु.स.न. पु.स.न.

नम्र या सीखा **वश्यः प्रणेयो निभृतविनीतप्रश्रिताः (समाः) ।**

धृष्ट या ढीठ पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

बुद्धिमान् **धृष्टे धृष्णग्वियात (श्च) प्रगल्भः प्रतिभान्विते ॥२५॥**

वीति–विधातुं शक्यः, " अचोयत् " इति 'यति' "ईद्यति" इतीदादेशे, गुणे च विधेयः, प्रवृत्तौ निवृत्तौ वा विनयं ग्रहीतुं शीलमस्य " सुपीति " णिनौ विनयग्राही, वचने तिष्ठतिस्म "गत्यर्थेति" क्ते "तत्पुरुषे कृति" इत्यलुकि च वचनेस्थितः, आशृणोति, 'पचाद्यचि' आश्रवः " आश्रवो वचनेस्थिते । प्रतिज्ञायां च क्लेशे च " (इति हैमः) इति चत्वारि प्रवृत्तिनिवृत्त्योर्विधातुं शक्यस्य। वशमधीनत्वं गतः "वशगतः " इति यति वश्यः, "वशमायत्ततायां स्यात् " (इति विश्वः) प्रकर्षेण नेतुं शक्य " अचोयदिति " यति प्रणेयः स्यादिति द्वे वशंगतस्य। नितरामभारि निभृतः, व्यनायीति विनीतः " विनीतस्तु निभृते निर्जितेन्द्रिये। वाणिजे साधुवाह्यश्वे विनयग्राहिते हिते " (इति हैमः) प्रथममश्रायि गुणैरिति प्रश्रितः एते समाः समानार्थाः स्युरिति त्रीणि विनययुक्तस्य । धृष्टे धृष्णक्, वियातश्च स्यात् धृष्णोतिस्म 'गत्यर्थेति' कर्तरि 'क्ते' "धृषिशसीति" इडभावे च धृष्टः, "धृषेश्चेति वाच्यमिति" 'नजिङि' धृष्णक् "त्रसि गृधीति" 'क्नौ' धृष्णुरपि, विरुद्धं यातं चेष्टितं यस्य, विरुद्धमयासीद्वा 'गत्यर्थेति' 'क्ते' वियातः स्यादिति त्रीणि निर्लज्जस्य। 'प्रतिभान्विते प्रगल्भः स्यात्' प्रगल्भते 'पचाद्यचि' प्रगल्भः, प्रतिभानम् "आतश्चोपसर्गे " 'इत्यङि' प्रतिभा ' ।न

शालिनी प्रतिभा मता " (इति रुद्रः) तथा अन्वितो युक्तः प्रतिभान्वितः स्यादिति द्वे प्रत्युत्पन्नमतेः ॥ २४ । २५ ॥

सलज्ज — पु.स.न. पु.स.न. पु.स.न. पु.स.न.
आश्चर्यी **(स्याद्) धृष्टे (तु) शालीनो विलक्षो विस्मयान्विते ।**
व्याकुल — पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
डरपोक **अधीरे कातरस्त्रस्नौ भीरुभीरुकभीलुकाः ॥ २६ ॥**

स्यादिति—अधृष्टे अप्रगल्भिते शालीनःस्यात् न धृष्णोतिस्म अधृष्टः, शालाप्रवेशमर्हति शालीनः "शालीनकौपीने" इति साधुरिति द्वे सलज्जस्य । विस्मयान्विते आश्चर्ययुक्ते विलक्षः स्यात् विशेषेण लक्षयति "पचाद्यचि" विलक्षः, विस्मयेनाश्चर्येणान्वितो विस्मयान्वितः स्यादिति द्वे परकीयधर्मशीलादौ प्राप्ताश्चर्यस्य । अधीरे धैर्यतारहिते कातरः स्यात् न धीरो धैर्यं यस्येति अधीरः, ईषत्तरतीति अचि "ईषदर्थे चेति" कोः कादेशे च कातरः स्यादिति द्वे रोगादिलक्षणेनाकुलमानसस्य । त्रस्नौ त्रसनशीले भीरु-भीरुक-भीलुकाःस्युः त्रस्यति "त्रसिगृधीति" 'क्नौ' त्रस्नुः, बिभेत्येवं शीलो "भियः क्रुक्लुकनाविति" 'क्रौ' भीरुः, "भीरुरात्त त्रिलिङ्गः स्याद्द्वयोविति योषिति" (इति विश्वमेदिन्यौ) "क्रुकन्नपीति" 'क्रुकनि' भीरुकः, 'क्लुकनि' भीलुकः स्यादिति चत्वारि भयशीलस्य ॥ २६ ॥

कहनेवाला — पु.स.न. पु.स.न. पु.स.न. पु.स.न.
पकड़नेवाला **आशंसुराशंसितरि गृहयालुर्ग्रहीतरि ।**
श्रद्धावान् — पु.स.न. पु.स.न. पु.स.न.
गिरनेवाला **श्रद्धालुः(श्रद्धयायुक्ते) पतयालु (श्च) पातुके ॥ २७ ॥**

आशेति—आशंसनरि आशंसुः स्यात् । आशंसते "सनाशंसेति" 'उ' प्रत्यये आशंसुः, एवं 'तृनि' आशंसिता स्यादिति द्वे इष्टार्थप्राप्तीच्छोः । ग्रहीतरि गृहयालुः स्यात् गृह्णाति "स्पृहिगृहीति" 'आलुचि', "अयामन्तेति" णेरयादेशे च गृहयालुः, गृह्णाति 'तृनि' "ग्रहोऽलिटीति" इटो दीर्घे च ग्रहीता स्यादिति द्वे ग्रहणशीलस्य । गुरुवेदान्तवाक्यादिषु विश्वासः श्रद्धा तया युक्ते संपन्ने श्रद्धालुः स्यात्, श्रद्धधाति 'आलुचि' श्रद्धालुः स्यादित्येकं श्रद्धावतः । पातुके पतनशीले पतयालुः स्यात् पतयति 'आलुचि' पतयालुः, पतति "लषपतेति" 'उकञि' पातुकः स्यादिति द्वे पतनशीलस्य ॥ २७ ॥

[illegible] — पु.स.न. पु.स.न. पु.स.न. पु.स.न.
लज्जाशीलोऽपत्रपिष्णुर्वन्दारुरभिवादके ।
[illegible] — पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
शरारुर्घातुको हिंस्रः(स्या)द्वर्धिष्णु(श्च)र्वर्धनः ॥ २८ ॥

लज्जेति—[illegible], अपत्रपते "अलंकृञिति" इष्णुचि अप-

त्रपिष्णुः स्यादिति द्वे लज्जावतः । अभिवादके वन्दारुः स्यात्—वन्दते "शृवन्द्योरिति" 'आरौ' वन्दारु, अभिवादयति 'ण्वुलि' अभिवादकः स्यादिति द्वे वन्दनशीलस्य । शृणाति आरौ, शरारुः, हन्ति "लषपतेति" 'उकञि' घातुकः, हिनस्ति "नमिकम्पीति" रे हिंस्रः "हिंस्रा काकादनीमांस्योः स्त्रियां स्याद्धातुकेऽन्यवत्" (इति विश्वमेदिन्यौ) इति त्रीणि हिंसाशीलस्य । वर्धते "अलंकृञिति" 'इष्णुचि' वर्धिष्णुः, एवं "अनुदात्तेतश्चेति" 'युचि' वर्धनः "वर्धनं छेदने वृद्धौ वर्धनी तु गलन्तिका" (इति हैमः) इति द्वे वर्धनशीलस्य ॥ २८ ॥

उछलनेवाला. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
भूषणों की चाह वाला. होने की चाह वाला. वर्तनेवाला.

उत्पतिष्णु(स्तू)त्पतिताऽलंकरिष्णु (स्तु)मण्डनः ।

पु.स.न पु.स.न. पु.स.न पु.स.न. पु.स.न.

भूष्णुर्भविष्णुर्भविता वर्तिष्णुर्वर्तनः(समौ) ॥ २९ ॥

उदिति—उत्पतति 'इष्णुचि' उत्पतिष्णुः, एवं 'तृनि' उत्पतिता स्यादिति द्वे ऊर्ध्वपतनशीलस्य । अलंकरणशीलः "अलंकृञिति" 'इष्णुचि' अलंकरिष्णुः, मण्डनशीलः "क्रुधमण्डार्थेभ्यश्चेति" 'युचि' मण्डनः स्यादिति द्वे अलंकरणशीलस्य । भवनशीलः "ग्लाजिस्थश्चेति" 'ग्स्नौ' भूष्णुः, "भुवश्चेति" 'इष्णुचि' भविष्णुः, तृनि भविता स्यादिति त्रीणि भवनशीलस्य । वर्तनशीलः "अलंकृञिति" 'इष्णुचि' वर्तिष्णुः, "अनुदात्तेतश्चेति" 'युचि' वर्तनः उभौ समौ समानार्थौ स्यातामिति द्वे वर्त्तनशीलस्य ॥ २९ ॥

निकालनेवाला. पु.स.न. पु.स.न. पु.स.न.
सघनसचिक्कण.

निराकरिष्णुःक्षिप्नुः(स्यात्) "सान्द्रस्निग्धस्तु" मेदुरः ।

जाननेवाला. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
खिलनेवाला.

ज्ञाता(तु) विदुरो बिन्दुर्विकासी (तु) विकस्वरः ॥३०॥

नीति—निराकरणशील. 'इष्णुचि' निराकरिष्णुः, क्षेपणशीलः "त्रसिगृधीति" क्नौ, क्षिप्नुः स्यादिति द्वे निराकरणशीलस्य । सान्द्रोघनः स्निग्धश्चिक्कणः सान्द्रश्चासौ स्निग्धश्चेति सान्द्रस्निग्धो मेदुरः स्यात् मेदनशीलो "भञ्जभासेति" 'घुरचि' मेदुर. स्यात् तल्लक्ष्यं "मेघैर्मेदुरमम्बरमिति" विज्ञेयमित्येकं घनचिक्कणस्य । जानाति 'तृनि' ज्ञाता, वेदनशीलो "विदिभिदीति" 'कुरचि' विदुरः, वेत्तीत्येवंशीलोविन्दुः "विन्दुरिच्छुरिति" साधुरिति त्रीणि ज्ञानशीलस्य । विकसति "वौ कसलसेति" 'घिनुणि' "विकासः स्फुटने व्यक्तौ" (इति दन्त्यान्ते धरणिः) तस्मादिनौ वा विकासी एवं "स्थेशभासेति" 'वरचि' विकस्वरः स्यादिति द्वे विकसनशीलस्य ॥ ३० ॥

---

१ नादेर्भुवः अतएव भाष्ये तु "भुव इट् प्रतिषेधश्च" इत्युपलभ्यते ॥

गमन करने- पु.स.न. पु.स.न. पु.स.न. पु.स.न.
वाला. **विसृत्वरो विसृमरः प्रसारी (च) विसारिणि ।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
सहनशील. **सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ ३१ ॥**

वीति—विसरणशीलो विसारोऽस्त्यस्येति वा विसारी तस्मिन् विसृत्वरो विसृमरः प्रसारी च स्युः विसरणशील. "इणनशजीति" करपि, "ह्रस्वस्येति" तुकि च विसृत्वरः एवं "सृघस्येति" 'क्मरचि' विसृमरः, प्रसरणशीलः "प्रलपेति" विनुणि, प्रसारी विसरणम् 'घञि' विसारः सोऽस्त्यस्येति इनौ विसारी स्यादिति चत्वारि प्रसरणशीलस्य । सहनशीलः "अलंकृञिति" इष्णुचि, सहिष्णुः, एवं "अनुदात्तेतश्चेति" 'युचि' सहनः, क्षमणशीलः 'तृनि' क्षन्ता, तितिक्षणशीलः "सनाशंसेति" 'उप्रत्यये' तितिक्षुः, तृनः "स्वरतीति" पक्षे इडागमे क्षमिता, क्षाम्यत्येवं शीलः "शमित्यष्टाभ्य इति" 'घिनुणि' क्षमी स्यादिति षट् सहनशीलस्य ॥ ३१ ॥

क्रोधी. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
महाकोधी. **क्रोधनोऽमर्षणः कोपी चण्ड(स्त्व)त्यन्तकोपनः ।**
जागनेवाला. पु.स.न. पु.स.न. पु.स.न. पु.स.न
निद्रा से घूर्णित. **जागरूको जागरिता घूर्णितः प्रचलायितः ॥ ३२ ॥**

क्रुधिति—क्रोधनशीलः "क्रुधमण्डेति" 'युचि', क्रोधनः, नमर्षणशीलो 'युचि' अमर्षणः, अवश्यं कुप्यति "आवश्यकेति" 'णिनौ' कोपी स्यादिति त्रीणि क्रोधनशीलस्य । चण्डते 'पचाद्यचि' चण्डः "चण्डस्तु यमदासेऽति कोपने । तीव्रे दैत्यविशेषे च चण्डी तु शिवयोषिति । चण्डा धनहरीशंखपुष्प्योः" (इति हेमचन्द्रः) अत्यन्तं कुप्यति "क्रुधमण्डेति" 'युचि' अत्यन्तकोपनः स्यादिति द्वे अतिकोपनस्य । जागरणशीलः "जागरूकः" 'इत्यूके' जागरूकः एवं 'तृनि' जागरिता स्यादिति द्वे जागरूकस्य । घूर्णतेस्म "गत्यर्थेति" 'क्ते' घूर्णा जातास्येति तारकादित्वादितचि वा घूर्णितः, प्रचल इवाचरति "कर्तुः क्यङ् सलोपश्चेति" 'क्यङि' प्रचलायतेस्म "गत्यर्थेति" 'क्ते' प्रचालाया जातास्येति 'इतचि' वा प्रचलायितः स्यादिति द्वे संजातघूर्णस्य ॥ ३२ ॥

सोनेवाला. पु.स.न. पु.स.न. पु.स.न. पु.स.न पु.स.न.
सोता हुआ. **स्वप्नक् शयालुर्निद्रालुर्निद्राणशयितौ (समौ) ।**
विमुख. पु.स.न. पु.स.न. पु.स.न. पु.स.न
अधोमुख. **पराङ्मुखः पराचीनः (स्या) दवाङप्यधोमुखः ॥ ३३ ॥**

स्वेति—स्वपनशीलः "स्वपितृषोर्नजिङ्" 'नजिङि' स्वप्नक्, शयनशीलः "शीङ्-श्रद्धेति" 'आलुचि' शयालुः "शयालुः स्यादजगरे निद्राशीले च कुक्कुरे" (इति

विश्वमेदिन्यौ) निद्राशीलः " स्पृहिगृहीति " ' आलुचि ' निद्रालुः स्यादिति त्रीणि निद्राशीलस्य । निद्रातिस्म अकर्मकत्वात्कर्तरि क्ते " संयोगादेरिति " निष्ठा नत्वे च निद्राणः, शेतेस्म कर्तरि क्ते " निष्ठाशीङिति " कित्त्वाभावे च शयितः उभौ समौ समानार्थौ स्यातामिति द्वे निद्रां प्राप्तस्य । पराञ्चत्यनभिमुखो भवति "ऋत्विगिति" ' क्विनि ' पराङ्मुखमस्येति पराङ्मुखः, पराङेव, " विभाषाञ्चेरिति" स्वार्थे ' खे ' तस्येनादेशे च पराचीनः स्यादिति द्वे विमुखस्य । अवाञ्चत्यधोमुखोभवति ' क्विनि ' अवाङ्, स्त्रियाम् " उगितश्चेति " ङीपि अवाची अधोमुखं यस्येति अधोमुखः स्यादिति द्वे अधोमुखस्य ॥ ३३ ॥

देवपूजक. सब ओर जानेवाला. साथ का जानेवाला. तिरछा जानेवाला.

पु.स.न. पु.स.न.

(देवानञ्चति) देवद्र्यङ् विष्वद्र्यङ् (विष्वगञ्चति) ।

पु.स.न. पु.स.न.

(यःसहाञ्चति)सध्र्यङ्(सः)सतिर्यङ्(यस्तिरोऽञ्चति)३४

द्वयिति—देवान् अञ्चति=गच्छति पूजयति वा क्विनि " विष्वग्देवयोरिति" अद्र्यादेशे च देवद्र्यङ् स्यादित्येकं देवपूजकस्य । विष्वगञ्चति ' क्विनि ' अद्र्यादेशे च विष्वद्र्यङ् मूर्धन्यमध्य. " विश्वद्र्यङ् " तालव्यमध्यश्च स्यादित्येकं सर्वतो गच्छतः । यः सह अञ्चति गच्छति स सध्र्यङ्स्यात् "सहस्य सध्रिरिति" सध्र्यादेशः। स्त्रियाम् " उगितश्चेति " ङीपि सध्रीची, स्यादित्येकं सहचारितस्य । यस्तिरोऽञ्चति स तिर्यङ् स्यात् "तिरसस्तिर्यलोपे" इति तिर्यादेशः स्यादित्येकं वक्रं गच्छतः ॥ ३४ ॥

वक्ता

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

वदो वदावदो वक्ता वागीशो वाक्पतिः (समौ) ।

महावक्ता नैयायिक बहुभाषी

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

वाचोयुक्तिपटुर्वाग्मी वावदूको (ऽतिवक्तरि) ॥ ३५ ॥

वेति—वदति " पचाद्यचि " वदः, एवं " चरिचलीति " अचि, द्वित्वे, अभ्यासस्याकाचि च वदावदः, वक्ति ' तृनि ' वक्ता " वक्ता तु पण्डितेऽपि स्याद्वाग्मिन्यप्यभिधेयवत् " (इति विश्वः) इति त्रीणि वदावदस्य " वक्ता " इति ख्यातस्य । वाचामीशो वागीशः, वाचांपतिः वाक्पतिः उभौ समौ समानार्थौ स्यातामिति द्वे पटुवचनस्य " महावक्ता " इति ख्यातस्य । वाचो युक्तिः सयुक्तिकत्वम् " वाग्दिक्पश्यद्भ्यः " इत्यलुकि, वाचो युक्तिस्तस्यां पटुः प्रवीणो वाचोयुक्तिपटुः, प्रशस्ता वागस्य " वाचोग्मिनिः " इति ' ग्मिनौ ' वाग्मी स्यात् "वाग्मी पटौ सुराचार्ये" (इति विश्वमेदिन्यौ) इति द्वे प्रशस्तवाच. " नैयायिक " इति ख्यातस्य । अतिवक्तरि वावदूकः स्यात् । अतिशयेन वदति, वावद्यते कुर्वादिषु ' वावदूक ' शब्दपाठात् वदेरूके, वावदूकः, अतिवक्ति साधुकारिणि ' तृनि ' ' तृचि ' वा अतिवक्ता स्यादिति द्वे बहुभाषिणः ॥ ३५ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अवाच्यभाषी (स्था) जल्पाक (स्तु) वाचालो वाचाटो बहुगर्ह्यवाक् ।

पु.स.न. पु.स.न. पु.स.न. पु.स न. पु.स.न.

अप्रियवादी प्रियवादी (दुर्मुखे) मुखराबद्धमुखौ शक्लः (प्रियंवदे) ॥ ३६ ॥

स्येति—जल्पनशीलो जल्पति वा "जल्पभिक्षेति" 'षाकनि' जल्पाकः, षित्त्वात्स्त्रियां ङीषि 'जल्पाकी' बहुगर्ह्या वागस्य "आलजाटचौ बहुभाषिणि" इति कुत्सायाम् 'आलचि' वाचालः, 'आटचि' वाचाटः, बहुगर्ह्या वाक् यस्येति बहुगर्ह्यवाक् स्यादिति चत्वारि बहुगर्ह्यभाषिणोऽवाच्यवादिनो वा । दुर्मुखेऽप्रियवादिनि मुखराबद्धमुखौ स्याताम् । दुर्निन्दितं मुखमस्येति दुर्मुखः, निन्दितं मुखमस्य "खमुखेति" "रे" मुखरः (अत्र मुखशब्दो लक्षणया वचनपरो ज्ञेयः) न बद्धं नियमितं मुखमस्येति अबद्धमुखः स्यादिति त्रीण्यप्रियवादिनः । प्रियंवदे प्रियवक्तरि शक्लः स्यात् । शक्नोति "मूङ् शक्येति" क्ले शक्लः, स्वाभिमते तु शक्नोति वक्तुमिति 'क्तचि' शक्तः, सर्वधरमते तु शक्लोपि, प्रियं वदति "प्रियवशे वद इति" 'खचि' मुमागम च प्रियंवदः स्यादिति द्वे प्रियवादिनः ॥ ३६ ॥

पु.स.न. पु.स.न. पु.स न. पु.स.न.

अस्फुटवादी लोहलः (स्याद) स्फुटवाग् गर्ह्यवादी (तु) कद्वदः ।

कुवादी पु.स.न. पु.स.न. पु स.न पु.स.न.

दोषवादी रूक्षवादी (समौ) कुवादकुचरौ (स्याद) सौम्यस्वरोऽस्वरः ॥३७॥

लाविति—लोहनम् भावे 'घञि' लोहं लाति "आतोऽनुपेति" 'के' लोहयति बाहुलकादलचि वा कपिलकादित्वाल्लत्वे च लोहलः "लोहलः अस्फुटार्थवचनवादिनि च त्रिषु" (इति हेमचन्द्रः) न स्फुटा वागस्येति अस्फुटवाक् स्यादिति द्वे अस्फुटवादिनः । गर्ह्यं निन्द्यं वदति "सुप्यजातौ णिनि" 'णिनौ' गर्ह्यवादी, कुत्सितं वदति, अचि "रथवदयोश्चेति" कोः कद्वादेशे च 'कद्वदः' स्यादिति द्वे कुवादिनः । कुत्सितो वादोऽस्येति कुवादः, कुत्सितं चरति 'पचाद्यचि' कुचरः [illegible] स्यातामिति द्वे कुकथनशीलस्य । असौम्यो रूक्षः स्वरो यस्येति असौम्यस्वरः, अप्रशस्तः स्वरो यस्येति अस्वरः स्यादिति द्वे काकादिवद्रूक्षस्वरस्य ॥३७॥

[illegible] पु.स.न. पु.स.न. पु.स.न. पु.स.न

[illegible] स्वनः शब्दनो नान्दीवादी नान्दीकरः (समौ) ।

[illegible] पु.स.न. पु.स.न.

[illegible] जडोऽज्ञ एडमूक (स्तु वक्तुं श्रोतुमशिक्षिते) ॥ ३८ ॥

[illegible] "[illegible]" 'युचि' स्वनः, शब्दनशीलो

---

* [illegible]

'युचि' शब्दनः स्यादिति द्वे शब्दकरणशीलस्य। नान्दीवदनशीलः "सुपीति" वदेर्णिनौ नान्दीवादी, नान्दीं करोति "दिवाविभेति" टे. नान्दीकरः "आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रवर्तते। देवद्विजनृपादीनां तस्मान्नान्दीति कीर्त्यते" (इति भरतः) उभौ समौ समानार्थौ स्यातामिति द्वे नाटकादौ मङ्गलार्थं भेर्यादिवादकस्य। अज्ञे अज्ञातरि जडः स्यात् जलति 'पचाद्यचि' डलयोरभेदाल्लस्य डत्वे च जडः "इष्टं वानिष्टं वा सुखदुःखं वा न वेत्ति यो मोहात्। परवशगः स भवेदिह जडसंज्ञकः पुरुषः"। "जडा स्त्रियाम्। शूकशिम्ब्यां हिमग्रस्तमूकाप्रज्ञेषु च त्रिषु" (इति विश्वमेदिन्यौ) न जानातीति 'के' अज्ञः स्यादिति द्वे इष्टानिष्टज्ञानविहीनस्य। वक्तुं श्रोतुं च अशिक्षिते शिक्षारहिते एडो बधिरश्चासौ मूकश्चेति एडमूकः "एडमूकोऽन्यलिङ्गः स्याच्छठे वाक्श्रुतिवर्जिते" (इति मेदिनी) नास्ति एडमूकोऽस्मादिति विग्रहे तु अनेडमूकोऽपि "त्रिलिङ्गोऽनेडमूकः स्याच्छठे वाक्श्रुतिवर्जिते" (इति रभसः) इत्येकं वाक्श्रुतिवर्जितस्य ॥ ३८ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

चुप रहनेवाला, **तूष्णींशील (स्तु) तूष्णीको नग्नोऽवासा दिगम्बरः।**

नंगा धड़ंगा, पु.स.न. पु.स.न. पु.स.न. पु.स.न.

निकाला धिक्कारी **निष्कासितोऽवकृष्टः (स्याद) पध्वस्त (स्तु) धिक्कृतः॥३९॥**

त्विति—तूष्णीशीलमस्येति तूष्णीशीलः, तूष्णींशीलमस्त्यस्येति "शीले को मलोपश्चेति" के, मलोपे, "केणः" इति णाणो ह्रस्वे च मलोपसामर्थ्यादिति तूष्णीकः स्यादिति द्वे मौनशीलस्य "चुप्पा" इति ख्यातस्य। नजतेस्म, अकर्मकत्वात्कर्तरि क्ते "ओदितश्चेति"[1] निष्ठानत्वे च नग्नः "नग्नो वन्दिक्षपणयोः पुंसि त्रिषु विवाससि" (इति विश्वः) न वासोऽस्येति अवासाः, दिगेव अम्बरं यस्येति दिगम्बरः "दिगम्बरः स्यात्क्षपणोऽध्वने तमसि शंकरे" (इति मेदिनी) इति त्रीणि दिगम्बरस्य "नंगा" इति ख्यातस्य। निष्कास्यते स्म ण्यन्तात्कर्मणि क्ते" निष्कासितः, अवकृष्यते स्म अवकृष्टः स्यादिति द्वे निष्कासितस्य। अपध्वस्यते स्म अपध्वस्तः "अपध्वस्तः परित्यक्ते निन्दितेऽप्यवचूर्णिते" (इति मेदिनी) 'धिक्' इति कृतो धिक्कृतः स्यादिति द्वे निन्दितस्य ॥ ३९ ॥

गयेघमण्डवाला पु.स.न. पु.स.न. पु.स.न. पु.स.न.

धनादि का दिलानेवाला **आत्तगर्वोऽभिभूतः (स्याद्) दापितः साधितः (समौ)।**

अनादर किया हुआ पु.स.न. पु.स.न. पु.स.न. पु.स.न.

प्रत्यादिष्टो निरस्तः (स्या) त्प्रत्याख्यातो निराकृतः॥४०॥

---

१ नजते स्म "ओ नजी व्रीडे" (तु. आ. से.) अकर्मकत्वात् कर्तरि क्तः (३। ४। ७२) "ओदितश्च" (८। २। ४५) इति नत्वमिति सुधाकारः॥

आत्तेति—आत्तो गर्वो यस्येति आत्तगर्वः, "गन्धो गन्धक आमोदे सम्बन्धे लेश-गर्वयोरिति विश्वः" आत्तो गन्धो गर्वो यस्येति विग्रहे तु आत्तगन्धोऽपीति पाठान्तरम्, अभिभूयते स्म अभिभूतः स्यादिति द्वे विध्वस्ताभिमानस्य अथवा अपध्वस्तमारभ्याभिभूतान्तं चत्वारः पर्याया इति केप्याहुः। दाप्यते स्म णयन्तात्कर्मणि क्ते दापितः, 'दाय्यते स्म' इति विग्रहे तु दायितोऽपीति पाठान्तरम्, साध्यते स्म साधितः उभौ समौ समानार्थौ स्यातामिति द्वे धनादिकप्रदापितस्य। प्रत्यादिश्यते स्म प्रत्यादिष्टः, निरस्यते स्म निरस्तः, "निरस्तः प्रेषितशरे संत्यक्ते त्वरितोदिते। निष्ठ्यूते प्रतिहते च" (इति हेमः) प्रत्याख्यायते स्म प्रत्याख्यातः, निराकारि कर्मणि क्ते, निराकृतः स्यादिति चत्वारि निराहृतस्य॥ ४० ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.
निकाला हुआ **निकृतः(स्या)द्विप्रकृतो विप्रलब्ध (स्तु) वञ्चितः।**
ठगा गया पु.स.न. पु.स.न. पु.स.न. पु.स.न.
टूटे दिलवाला **मनोहतः प्रतिहतः प्रतिबद्धो हत (श्च सः)॥ ४१ ॥**

नीति—न्यकारि-निक्रियतेस्म वा कर्मणि 'क्त' निकृतः, निकृतं विप्रलब्धे स्याच्छठे विप्रकृते त्रिषु" (इति विश्व.) विप्राकारि-विप्रक्रियतेस्म वा विप्रकृतः स्यादिति द्वे निकृतस्य। विप्रलभ्यतेस्म कर्मणि क्ते विप्रलब्धः, वञ्च्यतेस्म णयन्तात्कर्मणि 'क्ते' वञ्चितः स्यादिति द्वे विप्रलब्धस्य। यः मनोहतः सः प्रतिहतः, प्रतिबद्धः, हतश्च स्यात्। मनोहतं यस्येति मनोहतः, प्रति हन्यतेस्म कर्मणि 'क्ते' प्रतिहतः प्रतिबध्यतेस्म प्रतिबद्धः, हन्यतेस्म हतः स्यादिति चत्वारि कृतमनोभङ्गस्य॥ ४१ ॥

निन्दित पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
बंधुआ **अधिक्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ।**
विपत्ति में पड़ा पु.स.न. पु.स.न. पु.स.न. पु.स.न.
भय से भगा **आपन्नआपत्प्राप्तः(स्यात्)कान्दिशीकोभयद्रुतः॥४२॥**

अधीति—अधिक्षिप्यतेस्म कर्मणि 'क्ते' अधिक्षिप्तः, "अधिक्षिप्तः प्रणिहिते कुत्सिते भर्त्सिते त्रिषु" (इति विश्वहेमचन्द्रौ) प्रत्यक्षेपि-प्रतिक्षिप्यतेस्म वा प्रतिक्षिप्तः "प्रतिक्षिप्तं प्रतिहते प्रेषिते च निराकृते" (इति विश्वः) इति द्वे कृताक्षेपस्य, निन्दाभिव्यक्तस्य वा। बद्धे कारागृहे निगडादिभिर्यन्त्रिते कीलितसंयतौ स्याताम्। बध्यतेस्म कर्मणि 'क्ते' बद्धः कील्यतेस्म, कीलितः, संयम्यतेस्म संयतः स्यादिति त्रीणि बद्धस्य "कैदुवा" इति ख्यातस्य। आपद्यतेस्म 'गत्यर्थेति' कर्तरि 'क्ते' आपन्नः, आपदं संकटमितिवान् किमपि आपन्न। प्राप्नोतिस्म प्राप्तः आपदं प्राप्तः "द्वितीया श्रितेति" समासः। आपत्प्राप्तः स्यादिति द्वे आपत्तिमागतस्य। कां दिशं

[illegible] " (इति [illegible]) ॥
[illegible] ॥

गच्छामीत्याह " तदा हेति माशब्दादिभ्य इति " ठकि तस्यैकादेशे च पृषोदरादित्वात् कान्दिशीकः, मुकुटस्तु कन्दनम् भावे 'घञि' कन्दः सोऽस्त्यस्येति मत्वर्थीये 'इनौ' कन्दी, शीकनं भावे 'घञि' शीकः स चासौ कन्दिशीकः सोऽस्त्यस्येति " ज्योत्स्नाद्यणि " कान्दिशीकः सिद्ध्यतीत्येवं व्याख्यातवानिति । अद्रुद्रुवत्-द्रवति स्म वा 'गत्यर्थेति' कर्तरि क्ते द्रुतः, भयाद्द्रुतः " पञ्चमीति " योगविभागात्समासे भयद्रुतः स्यादिति द्वे भयात्पलायितस्य ॥ ४२ ॥

अपवादी पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
चञ्चल **आक्षारितः क्षारितोऽभिशस्ते संकसुकोऽस्थिरे ।**
कष्टित पु.स.न. पु.स.न. पु.स.न. पु.स.न.
शोकाकुल **व्यसनार्त्तोपरक्तौ (द्वौ) विहस्तव्याकुलौ (समौ) ॥४३॥**

आक्षेति—अभिशस्ते आक्षारितः, क्षारितश्चेत्युभौ स्याताम् । आक्षार्यतेस्म ण्यन्तात्कर्मणि 'क्ते' आक्षारो मैथुनं प्रत्याक्रोशो जातोऽस्येति 'इतचि' वा आक्षारितः एवं क्षार्यतेस्म क्षारितः " क्षारितः स्राविते क्षारे चाभिशस्तेऽपि च त्रिषु" (इति मेदिनी) अभिशस्यतेस्म कर्मणि 'क्ते' यस्य विभाषेति, 'वृषिशसीति' वा इडागमाभावे च अभिशस्तः स्यादिति त्रीणि मैथुननिमित्तं मिथ्यादूषितस्य । अस्थिरे संकसुकः स्यात् । संकसति " समि कस उकन्निति " उकनि संकसुकः, न स्थिरः अस्थिरः स्यादिति द्वे चलस्वभावस्य । व्यसनेन आर्त्तो व्यसनार्त्तः, उपरज्यते स्म कर्मणि क्ते उपरक्तः " उपरक्तो व्यसनार्त्ते राहुग्रस्तेन्दुसूर्ययोः " (इति विश्वः) व्यसनार्तश्चोपरक्तश्चेमौ द्वौ स्यातामिति द्वे दैवमानुषपीडायुक्तस्य । विक्षिप्तोहस्तोऽस्येति विहस्तः, " विहस्तस्तु विह्वले पण्डकेऽकरे " (इति हैम.) व्याकोलति " इगुपधेति " 'के' व्याकुलः उभौ समौ समानार्थौ स्यातामिति द्वे शोकादिभिरिति कर्तव्यताशून्यस्य ॥ ४३ ॥

शोकादि से भङ्ग गात्रवाला. मरणासन्नबुद्धिवाला पु.स.न. पु.स.न. — पु.स.न. पु.स.न.
विक्लवो विह्वलः (स्यात्तु) विवशोऽरिष्टदुष्टधीः ।
बेंत मारने योग्य आततायी पु.स.न. पु.स.न. पु.स.न. १
कश्यः कशार्हे (संनद्धे) त्वाततायी (वधोद्यते)॥४४॥

वीति—विक्लवते 'पचाद्यचि' विक्लवः, विह्वलतीति 'अचि' विह्वलः स्यादिति द्वे स्वाङ्गान्यत्र धारयितुमशक्तस्य । विरुद्धं वष्टि 'अचि' विवशः " विवशस्त्रिष्ववश्यात्मारिष्टदुष्टधियोरपि " (इति मेदिनी) अरिष्टेन दुष्टा, अरिष्टदुष्टा धीर्यस्येति अरिष्टदुष्टधीः स्यादिति द्वे आसन्नमरणलक्षणेन दूषितमतेः । कशार्हे कश्यः स्यात् ।

---

१ वध उपलक्षणम् । यत्स्मृतिः—"अग्निदो गरदश्चैव शस्त्रपाती धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः ॥ " (इति क्षीरस्वामी) ॥

कशामर्हति “ दण्डादिभ्यो यः ” इति ‘ ये ’ कश्यः, “ कश्यं कशार्हमद्ययोः । अश्वमध्येऽपि ” (इति हैमः) कशामर्हति “ अर्हः ” इत्यचि, कशार्हः स्यादिति द्वे ताडनार्हस्य । संनद्धमस्त्यस्येति, (अचि) संनह्यति स्म वा अकर्मकत्वात् कर्तरि ‘क्ते’ संनद्धस्तस्मिन् वधोद्यते आततायी स्यात् । आततं यथा स्यात्तथा अयितुं शीलमस्य “ सुपीति ” ‘ णिनौ ’ आततायी स्यादित्येकमाततायिनः ॥ ४४ ॥

शत्रुता करने योग्य. शीश काटने योग्य. — पु.स.न. पु.म.न. पु.स.न. पु.स.न.

द्वेष्ये त्वक्षिगतो वध्यः शीर्षच्छेद्य (इमौ समौ) ।

विष देनेयोग्य. मूसल से मारने योग्य. — पु.स.न. पु.स.न.

विष्यो (विषेण यो वध्यो) मुसल्यो(मुसलेन यः)॥४५॥

द्वयीति—द्वेष्ये द्वेषार्हे अक्षिगतः स्यात् । द्वेष्टुमर्हः “ऋहलोर्ण्यदिति” ‘ण्यति’ द्वेष्यः अक्षिविषयं गतः “ शाकपार्थिवादित्वात्” मध्यमपदलोपे अक्षिगतः स्यादिति द्वे द्वेषार्हस्य । वधमर्हति स्म “ दण्डादिभ्यो यः ” इति ‘ ये ’ हन्तुमर्हः “ हनो वधच ” इति ‘ यति ’ वा वध्यः, शीर्षस्य शिरसश्छेदस्तमर्हति “ शीर्षच्छेदादिति ” ‘ यति ’ शीर्षच्छेद्यः इमौ समौ समानार्थौ स्यातामिति द्वे शिरश्छेदार्हस्य । योविषेण वध्यश्चेत् स विष्यः स्यात् विषेण वध्यः “नौवयोधर्मेति” यति विष्यः स्यादित्येकं विषवध्यस्य । यो मुसलेन वध्यश्चेत्स मुसल्यः स्यात् मुसलेन वध्यः “ दण्डादिभ्य इति ” ‘ ये ’ मुसल्यः स्यादित्येकं मुसलवध्यस्य ॥ ४५ ॥

पुण्यात्मा. पापात्मा. बिना विचारे वधादि करनेवाला — पु.स.न. पु.स.न. पु.स.न. पु.स.न.

शिशिवदानोऽकृष्णकर्मा चपलश्चिकुरः (समौ) ।

केवल दोष द्रष्टा. कपटी — पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

दोषैकदृक् पुरोभागी निकृतस्त्वनृजुः शठः ॥ ४६ ॥

शीति—शिशिवदेः ‘ शिवदि [illegible] ’ अस्मात् “ लिटः कानच् ” इति कानचि, अ[illegible]ऽर्थ न शिशिवदानः, अकृष्णं शुक्लं कर्मास्येति अकृष्णकर्मा स्यादिति द्वे अपापकर्मणः । कृष्णकर्मेति पाठान्तरम् तत्र ‘ शिवदानो, अस्मात्स्वे-[illegible] “ [illegible] ” आनचि. दुष्टे. मनोऽनुकूले च शिशिवदानः, कृष्णं कर्मास्येति कृष्णकर्मा स्यादिति द्वे पापकर्मणः । चपति गुणादित्वात् ‘ कलचि ’ चपलः. “ चपलश्चोरके चले ” (इति हैमः) ‘ चि ’ इत्यस्मात् कुरचि “ [illegible] ” ‘ [illegible] ’ चिकुरः “ चिकुरोऽद्रौ कुन्तले [illegible] ” । पलि[illegible] ” (इति हैमः) इमौ समौ समानार्थौ स्यातामिति द्वे [illegible] । दोष एव [illegible] दृक् ज्ञानं यस्येति दोषैकदृक्, पुरः पूर्वं भजते “ [illegible] ” ‘ [illegible] ’ पुरोभागी स्यादिति द्वे दोषैकदृष्टेः । निकृन्तति

"इगुपधेति" के न्यक्कारीति विग्रहे तु कर्मणि 'क्ते' वा निकृतः "निकृतं विप्रलब्धे स्याच्छठे विप्रकृते त्रिषु" ऋजुविरुद्धो "नञिति" तत्पुरुषे "नलोपोनञः" इति न लोपे "तस्मादिति" नुडागमे च अनृजु., शठति "पचाद्यचि" शठः "शठो मध्यस्थपुरुषे धूर्त्ते धत्तूरकेऽपि च" (इति हेमचन्द्रः) इति त्रीणि वक्राशयस्य ॥४६॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. १ पु.स.न.

चुगलखोर **कर्णेजपः सूचकः (स्यात्) पिशुनो दुर्जनः खलः ।**

दुष्ट पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

घातुक **नृशंसो घातुकः क्रूरः पापो धूर्त (स्तु) वञ्चकः ॥४७॥**

छली

केति—कर्णे जपति "स्तम्बकर्णयोः" इत्यचि, "हलदन्तादिति" अलुकि च कर्णेजपः, सूचयति, 'ण्वुलि' "युवोरिति" अकादेशे च सूचकः स्यात् "सूचकः शुनि दुर्जने । कथक सीवनद्रव्ये मार्जारे वायसेऽपि च" (इति हैमः) इति द्वे सूचकस्य "चुगलखोर" इति ख्यातस्य । पिशति "क्षुधिपिशिमथिभ्यः किदिति" 'उनन्' पिशुनः, "पिशुनं कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना सूचकक्रूरयोस्त्रिपु । पृक्कायां पिशुना स्त्री स्यात्" (इति विश्वमेदिन्यौ) दुष्टो जनः "कुगतीति" समासे दुर्जनः, खलति, "पचाद्यचि" खं छिद्रं लाति "आतोनुपेति" के वा खलः स्यात् "खलः कल्के भुवि स्थाने क्रूरे कर्णेजपेऽधमे" (इति हैममेदिन्यौ) इति त्रीणि परस्परभेदकस्य । स्वामी तु सूचकपर्याय एवैतानाह । नॄन् शंसति हन्तीति विग्रहे "कर्मण्यण्" इत्यणि नृशंस, हननशीलो "लपपतेति" 'उकञ्' घातुकः, कृन्तति "कृतेश्छः क्रूचेति" 'रक्' 'क्रू' आदेशे च क्रूरः "क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेयवत्" (इति विश्वः) पापमस्यास्तीति "अर्श आदिभ्य इति" अचि पापः स्यादिति चत्वारि परद्रोहकारिणः । धूर्वति=हिंसतीति "हसिमृग्रिण्" इति 'तनि' "राल्लोपः" इति वलोपे "हलि चेति" दीर्घे च धूर्त्तः "धूर्त्तन्तु खण्डलवणे धूर्त्तो धत्तूरमायिनोः" (इति हेमचन्द्रः) वञ्चयति (वञ्चु गतौ) णयन्तारण्वुलि, अकादेशे च वञ्चकः "वञ्चकस्तु खले धूर्त्ते गृहवभ्रौ च जम्बुके" (इति विश्वमेदिन्यौ) इति द्वे परप्रतारणस्वभावस्य ॥ ४७ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

मूर्ख **अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

कृपण **कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ॥ ४८ ॥**

अज्ञ इति—अज्ञे अज्ञातरि मूढयथाजातमूर्खवैधेयवालिशाः स्युः । न जानाति 'इगु-

१ खलः सर्षपमात्राणि पररन्ध्राणि पश्यति । आत्मनो विल्वमात्राणि पश्यन्नपि न पश्यति ॥ १ ॥
सर्पः क्रूरः खलः क्रूरः सर्पात्क्रूरतरः खलः । सर्प एकाकिनं हन्ति खलः सर्वविनाशकृत् ॥ २ ॥

पचेति '' 'के' कित्त्वादालोपे च अज्ञः "अज्ञस्तु जडमूर्खयोः" (इति विश्वः) मुह्यति स्म "गत्यर्थेति" 'क्ते' हस्य ढत्वे, धत्वे, ष्टुत्वे, ढलोपे, दीर्घे च मूढः "मूढस्तन्द्रितबालयोः" (इति विश्वः) "वा द्रुहेति" घत्वपक्षे मुग्धोऽपि जातं जन्मकालविशेषमनतिक्रम्यवर्तते 'पदार्थानतिवृत्तावव्ययीभावे' तदस्यास्तीति "अर्श आदिभ्य इति" 'अचि' यथाजातः, मुह्यति "मुहेःखोमूर्चेति" 'खे' मूरादेशे च मूर्खः, विधेयं विधानं तस्यायमधिकारी "तस्येदम्" इत्यणि, वृद्धौ च वैधेयः, वलिशस्य मत्स्यवेधनस्यायं मूर्खत्वादपूज्यत्वात् "अणि" वृद्धौ च बालिशः स्यादिति षट् मूर्खस्य। कदर्ये निन्दितस्वामिनि कृपणक्षुद्रकिंपचानमितंपचाः स्युः। कुत्सितोऽर्यः स्वामी "कुगतीति" समासे "कोः कत्तत्पुरुषेऽचि" इति कोः कदादेशे च कदर्यः, कृपां करोति "तत्करोतीति" 'णिचि' कृपयति=कृप्यते "कृत्यल्युटो बहुलमिति" कर्मणि 'ल्युटि' अजादेशस्य स्थानिवत्त्वाद्गुणाभावे च। कृप्यते कृपा विषयी क्रियते बाहुलकात् क्युनि, ल्युटि वा संज्ञापूर्वकत्वाद्गुणाभावे लत्वाभावे च वा कृपणः, क्षुणत्तीति "स्फायितञ्चीति" 'रकि' क्षुद्रः "क्षुद्रो दरिद्रे कृपणे निकृष्टेऽल्पनृशंसयोः" (इति हेमचन्द्रः) किंपचति "ताच्छील्ये इति" चानशि, शानचि वा अनित्यत्वान्मुमागमाभावे, "किंक्षेपे" इति समासे च किंपचानः, मितं पचति। "मितनखे च" इति 'खचि' मितंपचः "किंपचः, अनमितंपचः" इति वा छेदः तत्र पचति 'पचाद्यचि' पचः, कुत्सितः पचः, समासे किंपचः नमितंपचोऽमितं पचस्तद्भिन्नोऽनमितंपचः स्यादिति पञ्च कृपणस्य ॥ ४८ ॥

पु.म.न. पु.म.न. पु.म.न. पु.म.न. पु.म.न.

दरिद्री या निर्धनी — **निःस्व(स्तु) दुर्विधो दीनो दरिद्रो दुर्गतो(ऽपि सः)।**

पु.म.न. पु.म.न. पु.म.न. पु.म.न. पु.म.न.

भिखारी या याचक — **वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४९ ॥**

निरिति—यः निःस्वो निर्धनः स दुर्विधः, दीनः, दरिद्रः, दुर्गतोऽपि स्यात्। निर्गतं स्वं धनमस्य, स्वान्निष्क्रान्तो वा निःस्वः, दुःस्था विधा प्रकारः समृद्धिर्वाऽस्येति दुर्विधः "दुर्विधो ना दरिद्रः स्याद्दुर्गतेऽपि खलेऽपि च" (इति मेदिनी) दीयते स्म 'दीङ् क्षये' अस्माद् "गत्यर्थेति" कर्तरि 'क्ते' स्वादीनामोदित्त्वाद् "ओदितश्चेति" निष्ठानत्वे च दीनः "दीना स्त्री मूषिका स्त्रियाम्। वाच्यवद्दुर्गते भीते" (इति मेदिनी) दरिद्राति 'पचाद्यचि' आर्धधातुकत्वाद् दरिद्रातेरालोपे च दरिद्रः, दुर्गच्छति स्म "गत्यर्थेति" कर्तरि 'क्ते' दुर्गतः स्यादिति पञ्च दरिद्रस्य। वननम् "सर्वधातुभ्य इन्निति" इनि, वनिं याचनामिच्छति 'क्यचि' वनीयति. 'ण्वुलि', वनीयकः "वनीपकः" इति पाठे तु वनीं पाति "आतोऽनुपेति" 'के' वनीपस्तस्मात् संज्ञायां कनि-ण्वुलि वा वनीपकोऽपि, याचते "अनुदात्तेतश्चेति" याचनः ततः स्वार्थे कनि याचनकः, मार्गति, "मार्ग अन्वेषणे"

" बहुलमन्यत्रापीति " 'युचि' मार्गणः, याचति 'ण्वुलि' याचकः, अर्थोऽस्यास्ति "अर्थाच्चासंनिहिते" इति 'इनौ' अर्थयते, गृह्यादित्वाणिनौ वा अर्थी स्यादिति पञ्च याचकस्य ॥ ४९ ॥

अहंकारी. शुभयुक्त. देवता. नर पशु आदि

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अहंकारवानहंयुः शुभंयु(स्तु) शुभान्वितः।

पु.स.न.

दिव्योपपादुका (देवा) "नृगवाद्या" जरायुजाः ॥५०॥

अहमिति—अहंकरणमहंकारः सोऽस्त्यस्येति 'मतुपि' अहंकारवान्, अहमस्यास्ति "अहंशुभमिति मान्तं विभक्तिप्रतिरूपकमव्ययम्"। "अहंशुभमोर्युस्" इति 'युसि' अहंयुः स्यादिति द्वे साहंकारस्य। शुभमस्ति 'युसि' शुभंयुः, शुभेन अन्वितः "कर्तृ-करणे—" इति समासे शुभान्वितः स्यादिति द्वे शुभयुक्तस्य। देवाः दिव्योपपादुकाः स्युः "नरकव्यावृत्तये दिव्यपदम्। मातापित्रादिदृष्टकारणनिरपेक्षा अदृष्टसहकृतेभ्यो गुणेभ्यो जाता ये देवास्ते दिव्योपपादुका उच्यन्ते"—दिवि भवाः, "द्युप्रागपेति" 'यति' दिव्याः, उपपद्यन्ते उपपूर्वकपदगतावस्मात् "लषपतपदेति" 'उकञि' उपपादुकाः दिव्याश्च ते उपपादुकाश्चेति दिव्योपपादुकाः स्युरित्येकं देवानाम्। नृगवाद्याः जरायुजाः भवन्ति ना च गौश्च आद्यौ येषामिति नृगवाद्याः आद्यशब्देन खराश्वादीनां ग्रहणम्। ते जरायो-र्गर्भाशयाज्जाताः "पञ्चम्यामिति" जनेर्डे जरायुजाः स्युरित्येकं नृगवादीनाम् ॥ ५० ॥

स्वेदज-अण्डज **(स्वेदजाः) कृमिदंशाद्याः पक्षिसर्पादयो(ऽण्डजाः)।**

इति प्राणिवर्गः ॥

स्वेदेति—कृमिदंशाद्याः कृमिश्च दंशश्च तावाद्यौ येषामिति। आद्यशब्देन मशक-मत्कुणादिग्रहणम्। ते स्वेदजा उच्यन्ते स्वेदजनकत्वादूष्मास्वेदस्तस्माज्जाता "पञ्चम्यामिति" जने 'डे' स्वेदजाः स्युरित्येकं कृमिदंशादीनाम्। पक्षिसर्पादयः पक्षी च सर्पश्च तावादी येषामिति। आदिशब्देन नक्रमत्स्यपिपीलिकादिग्रहः। ते अण्डजा कथ्यन्ते अण्डे जाताः "सप्तम्यां जनेरिति" 'डे' अण्डजाः स्युरित्येकं पक्षि-सर्पादीनाम् ॥ इति प्राणिवर्गः ॥

पु. पु.स.न. पु.स.न. पु.स.न.

वृक्ष,लता आदि **उद्भिद (स्तरुगुल्माद्या) उद्भिदुद्भिज्जमुद्भिदम् ॥५१॥**

उद्भीति—तरुगुल्माद्याः तरुश्च गुल्मश्च तावाद्यौ येषामिति। आद्यशब्देन तृणौषधि-लतादिग्रहः। ते उद्भिदः कथ्यन्ते। भुवमुद्भिन्दन्ति "भिदिर् विदारणे" अस्मात् "सत्सूद्विषेति" 'क्विपि' उद्भिदः स्युरित्येकं तरुगुल्मादीनाम्। उद्भिनत्तीति विग्रहे 'क्विपि' उद्भित् (द्) उद्भेदनं संपदादित्वात् 'क्विपि' उद्भित् ततो जातम् "पञ्चम्या-

मिति " 'डे' उद्भिज्जम्, उद्भिनत्ति "इगुपधेति" 'के' उद्भिदं स्यादिति त्रीणि उद्भिदस्य ॥ ५१ ॥

पु.स.न. पु.म.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

सुन्दर या **सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।**

पु.म.न. पु.म.न. पु.स.न. पु.स.न. पु.म.न. पु.स.न.

मनोरम **कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥ ५२ ॥**

स्त्रिति—सु द्रियत 'दङ् आदरे' अस्मात् "अहन्नृद इति" 'अपि' पृषोदरादित्वा-न्नुमागमे च—सु उनत्ति चित्तं द्रवीकरोति वा वाहुलकादरे, शकन्ध्वादित्वात्पररूपे च सुन्दरम्, स्त्रियां गौरादित्वान्ङीपि सुन्दरी, रोचते "इषिमदिमुदीति" 'किरचि' रुचिरम्, चरति चित्ते "दृसनिजनीति" 'ञुणि' चारु "चारुर्बृहस्पतौ पुंसि शोभने त्वभिधेयवत्" (इति विश्वः) सु शोभनं समं सर्वमस्येति "सुविनीति" षत्वे सुषमम्, साध्नोत्यर्थमिति "कृवापेति" 'उणि' साधु, "साधुर्जेने मुनौ वार्द्धुषिके सज्जनरम्ययोः" (इति हेमचन्द्रः) शोभते "अनुदात्तेतश्चेति" 'युचि' शोभनम् "शोभनो योग-भेदे ना सुन्दरे वाच्यलिङ्गकः" (इति मेदिनी) कम्यते स्म कमणि 'क्ते' "यस्य विभाषेति" इडागमाभावे, च "अनुनासिकस्येति" दीर्घ च । 'कनति स्म' "गत्यर्थेति" क्ते वा कान्तम् "कान्ता नार्यां प्रियङ्गौ स्त्री शोभने त्रिषु ना भवे । लोहे च चन्द्रसूर्याद्यः पर्यायात्तु शिलासु च" (इति विश्वमेदिन्यौ) मनोरमयति ण्यन्तात् 'कर्मण्यणि' मनोरमम् "मनोहरम्" इति पाठे तु मनोहरति "हृञ्त-रनुद्यमने" इत्यचि मनोहरम्, रोचते—रुच्यते वा रुच्यम "राजसूयेति" साधुः, मनसा जानातीति इगुपधत्वात् 'के' मनोज्ञम्, मञ्ज्यते 'मजि ध्वनाविति' सौत्रो धातु-स्तस्माद्बाहुलकादुप्रत्यये मञ्जु, मञ्जु मञ्जुत्वं लाति गृह्णातीति विग्रहे तु "आतोऽनु-पेति" 'क' मञ्जुलम् "मञ्जुलं च जलाभ्यासे । रम्ये कुञ्जे मञ्जुलस्तु दात्यूहे" (इति हैम०) इति द्वादश सुन्दरस्य ॥ ५२ ॥

पु.न.न.

प्रहृष्टदर्शन **(तद्) संचनकं (तृप्तेर्नास्त्यन्तो यस्य दर्शनात्)**

पु.म.न. पु.म.न. पु.म.न. पु.म.न. पु.म.न. पु.स.न.

प्रिय **अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५३ ॥**

तदिति—यस्य दर्शनात् द्रष्टुर्मनसश्च तृप्तेः अन्तो नास्ति तत् असेचनकं स्यात् । न सिच्यते मनोऽनेनेति "करणाधिकरणयोश्चेति" ल्युटि ततः "संज्ञायां कन्" इति 'कनि' 'आसेचनकं' स्यात् "आसेचनमिति" दीर्घादि पाठे 'आङ्' योग्यः इत्येक-[illegible] । अभीष्टे अभीप्सितम्, हृद्यम्, दयितम्, वल्लभम्, प्रियं च स्यात् । [illegible] कर्मणि 'क्ते' अभीष्टम्, आप्तुम्-

मिष्यते स्म सन्नन्तात्कर्मणि 'क्ते' अभीप्सितम्, हृदयस्य प्रियम् "हृदयस्य प्रियः" इति 'यति' हृद्यम्, "हृद्यं च वलजीरे च हृत्प्रिये हृद्वेऽपि च । वशक्रुद्वेदमन्त्रे च हृद्या वृद्धयाख्यभेषजे" (इति विश्वः) दय्यते स्म कर्मणि 'क्ते' दयितम्, वल्लते, वल्ल्यते वा "रासिवल्लिभ्यां च" 'इत्यभचि' वल्लभम्, "वल्लभो दयितेऽध्यक्षे-सल्लक्षणातुरङ्गमे" (इति विश्वः) प्रीणाति "इगुपधेति" के प्रियम् "प्रियो वृद्धयौषधे हृद्ये धवे" (इति हैमः) इति षट् प्रियस्य ॥ ५३ ॥

पु.स.न. पु.स.न. पु.स.न.पु.स.न.पु.स.न.पु.स.न.पु.स.न.

अधम **निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.पु.स.न.

कुपूयकुत्सितावद्यखेटगर्ह्याणकाः (समाः) ॥ ५४ ॥

नीति—निकृष्यते स्म कर्मणि 'क्ते' निकृष्टः, प्रतिकृष्यते स्म कर्मणि 'क्ते' प्रतिकृष्टः, ऋच्छति "अन्येभ्योऽपीति" 'वनिपि' ऋच्छतेः "अवद्यावमाधमार्वरेफाः कुत्सिते" इति वन्नन्तो निपात्यते वा अर्वा "अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः" (इति मेदिनी) रिफ्यते 'रिफ कत्थनादौ' अस्मात् "अकर्तरि च" इति 'घञि' "अवद्यावमाधमेति" अप्रत्ययान्ते निपातिते वा रेफः "रेफो रवर्णे पुंसि स्यात्कुत्सिते वाच्यवत्पुनः" (इति विश्वः) 'रेपः' इति पाठे तु रीयते, कर्मणि बाहुलकात् 'पे' रेपः "रेपः स्यान्निन्दिते क्रूरे" (इति विश्वः) मुकुटमते तु रेपाः सान्तोऽपि "प्रापेरूपी पुरारेपाः" (इति माघस्य द्व्यक्षरयमकम्) याप्यते णयन्तात्कर्मणि "अचोयत्" इति 'यति' याप्यः, "याप्यं तु यापनीये स्यान्निन्दितेऽप्यभिधेयवत्" (इति मेदिनी) अवत्यस्मादात्मानम् "अवद्येति" अम प्रत्ययान्ते निपातिते अवमः, तत्रैव वकारस्य धकारपक्षे अधमः "अधमः स्याद्गर्ह्ये ऊने" (इति विश्वः) कुत्सितं पूयते 'पचाद्यचि' कुपूयः, पृषोदरादित्वादत्वे कपूयोऽपि, कुत्सा संजातास्य तारकादित्वादितचि कुत्सितः, न उद्यते "अवद्यावमेति" निपात्यते अवद्यः, खेटति त्रसति 'अचि' खेटः "खेटः कफे ग्रामभेदे चर्मण्यस्त्रयर्थवति त्रिपु" (इति मेदिनी) गर्ह्यते "ऋहलोर्ण्यत्" इति 'ण्यति' गर्ह्यः, अणति 'अचि' अणः "कुत्सायां कन्" कुत्सितोणः अणकः एते समानार्थाः स्युरिति त्रयोदशाधमस्य ॥ ५४ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

मैली या गन्दी वस्तु पवित्र या साफ़ स्वभावसे पवित्र **मलीमसं (तु) मलिनं कच्चरं मलदूषितम् ।**

पु.स.न.पु.स.न.पु.स.न. पु.स.न. पु.स.न.

पूतं पवित्रं मेध्यं (च) वीध्रं (न्तु) विमलात्मकम् ॥ ५५ ॥

मेति—मलोऽस्यास्तीति मलीमसम् "ज्योत्स्नातमिस्रेति" साधु, "मलीमसं तु मलिने पुष्पकासीसलोहयोः" (इति विश्वः) मलते, मल्यते वा "बहुलमन्यत्र"

पीति " 'इनचि' 'किनचि' वा मलिनम् " मलिनं कृष्णदोषयोः । मलिनी रजस्वलायाम् " (इति हैमः) कुत्सितं चरति 'अचि' कदादेशे च कच्चरम्, मलेन दूषितम् " कर्तृकरणे कृता बहुलम् " इति समासे 'मलदूषितम्' स्यादिति चत्वारि मलदूषितस्य । पूयते स्म कर्मणि 'क्ते' पूतम् " पूतं त्रिषु पवित्रे च शठिते बहुलीकृते" (इति मेदिनी) पुनाति, पूयतेऽनेनेति वा " कर्तरिचर्षिदेवतयोः " इति " इत्र " पवित्रम् " पवित्रं तु मेध्ये ताम्रे कुशे जले । अर्घोपकरणे चापि पवित्रा तु नदीभिदि " (इति हैमः) मेधनार्हम् 'मेधृ संगमे च' अस्मात् " ऋहलोरिति " 'ण्यति' मेध्यम् " मेध्यं त्रिषु शुचौ रक्तवचारोचनयोः स्त्रियाम् " (इति मेदिनी) 'पवित्रः प्रयतः पूत' इति प्राणिविषये उक्तम् । इह त्वप्राणिनिष्ठेयमिति त्रीणि पवित्रस्य । वीन्धे 'ञि इन्धी दीप्तौ' अस्मात् " वा विन्धेः " इति 'क्नि' वीध्रम्, विमल आत्मा स्वभावो यस्येति विमलात्मकम् । विमलमर्थमस्य विग्रहे तु विमलार्थकम् वा स्यादिति द्वे स्वभावनिर्मलस्य ॥ ५५ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

मलरहित. **निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।**

निरर्थक. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न पु.स.न.

खाली या रीता. **असारं फल्गु शून्यं (तु) वशिकं तुच्छरिक्तके ॥५६॥**

नीति—निर्णिज्यते स्म कर्मणि 'क्ते' निर्णिक्तम्, शोध्यते स्म ण्यन्तात्कर्मणि 'क्ते' शोधितम्, मृज्यते स्म कर्मणि 'क्ते' मृष्टम्, निष्क्रान्तं शोध्यमस्मात् शोध्यान्निष्क्रान्तमिति वा निःशोध्यम्, न अवस्करोऽत्रेति अनवस्करं स्यादिति पञ्चापनीतमलस्य । न सारोऽत्रेति असारम्, फलति 'ञिफला विशरणे' अस्माद् 'गुक्' फल्गु " फलिपाटीनि " साधुः " फल्गुः काकोदुम्बरिके वृक्षे निरर्थकेऽपि च " (इति हैम.) इति द्वे निरर्थकस्य । शुनेहितम् " शुनः संप्रसारणं वा च दीर्घः " इति गणसूत्रेण 'यति' संप्रसारणे, दीर्घे च शून्यम् " शून्यं बिन्दौ च निर्जने । शून्या तु नलिका " (इति हैम.) उच्यते " सर्वनाम्नस्तुस्य इति " 'इनि' " संज्ञायां कन " इति कनि च वशिकम्, तोदनम् संपदादित्वाद्भावे 'क्विपि' तुद् व्यथा तया-छ्यति मूलविभुजादित्वात् 'के' तुदं छ्यति विग्रहे तु " आतोनुपेति " 'के' वा तुच्छम्, रिच्यते स्म कर्मणि 'क्ते' स्वार्थे 'कनि' च 'रिक्तकं' स्यादिति चत्वारि शून्यस्य ॥ ५६ ॥

न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] **(क्लीबे) प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः ।**

[illegible] पु.स.न.पु.स.न. पु.स.न. पु.स.न. पु.स.न.

मुख्यवर्यवरेण्या (श्च) प्रवर्हानवरार्ध्य (वत्) ॥५७॥

पु.स.न.पु.स.न. पु.स.न. पु.स.न.पु.स.न. पु.स.न. पु.स.न.

पराध्र्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमाग्रियम् ।

क्लीति–प्रधीयते, प्रदधाति वा 'ल्युटि' 'युचि' वा प्रधानं क्लीबे नपुंसके स्यात् । "प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदा" (इति मेदिनी) प्रकृष्टं मुखमस्य प्रमुखम् "प्रमुखं प्रथमे मुख्ये" (इति हैमः) प्रविच्यते 'घञि' प्रवेकः, न उत्तमोऽस्मादिति अनुत्तमः, अतिशयेन उत्कृष्टः उत्कृष्टाथ-वृत्तेरुच्छब्दात् 'तमपि' द्रव्यप्रकर्षार्थत्वान्नामुः । उत्ताम्यति 'अचि' उत्तम्यते 'घञि' वा "नोदात्तेति" वृद्ध्यभावे च उत्तमः, मुखमिव, मुखे भवो वा शाखादि-त्वाद् 'ये' मुख्यः, वर्यते 'वर ईप्सायाम्' चुराद्यदन्तात् "अचोयत्" इति कर्मणि 'यति' वर्यः, व्रियते "वृञ्एण्यः" 'इत्येण्ये' वरेण्यः, प्रवर्हति 'अचि' प्रवर्हः, अवरास्मिन्नर्धेभवः "परावराधमोत्तमपूर्वाच्चेति" अर्धात् 'यति' अवरार्ध्यः न अवरार्ध्यः "नञ्" इति समासे अनवरार्ध्यः, वदिति समानार्थेऽव्ययम् तेन एते सर्वे समानार्थाः स्युः । परस्मिन्नर्धे भवम् 'अर्धाद्यार' इति 'यति' परार्ध्यम्, अगतीति अग्रम् "ऋज्रेन्द्रेति" साधु । "अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आल-म्बने समूहे च प्रान्ते च स्यान्नपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत्" (इति मेदिनी) प्रकृष्टमग्रं प्राग्रं तस्मिन्हरति "हरतेरनुद्यमनेऽच्" 'इत्यचि' प्राग्रहरम्, प्राग्रे भवम् "अग्राद्यत्" इति 'यति' प्राग्र्यम्, अग्रे भवम् "घच्छौचेति" चकारा-द्यति अग्र्यम्, 'छे' छस्य ईयादेशे च अग्रीयम्, 'घे' घस्य इयादेशे च अग्रियं स्यादिति सप्तदश प्रधानस्य ॥ ५७ ॥

पु.स.न. पु.स.न. पु.स न. पु.स.न. पु.स.न.

श्रेष्ठ. **श्रेयाञ्श्रेष्ठःपुष्कलः 'स्या'त्सत्तम(श्चा)तिशोभने॥५८॥**

पु. पु. पु. पु.

श्रेष्ठार्थवाचक. **(स्युरुत्तरपदे) व्याघ्रपुङ्गवर्षभकुञ्जराः ।**

पु पु. पु.

सिंहशार्दूलनागा (द्याः पुंसि श्रेष्ठार्थगोचराः) ॥५९॥

श्रयिति–अतिशोभने श्रेयान्, श्रेष्ठः, पुष्कलः, सत्तमश्च स्यात् । अतिशयेन प्रशस्यः "द्विवचनविभज्योपपदेतरबीयसुनौ" (५ । ३ । ५७) "अजादी गुणवचना-देव" इति 'ईयसुनि' "प्रशस्यस्यश्रः" इति आदेशे, गुणे च श्रेयान् "श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत् । श्रेयसी करिपिप्पल्यामभयापाठयोरपि" (इति विश्वः) "अतिशायनेतमविष्ठनौ" इति 'इष्ठनि' आदेशे, गुणे च श्रेष्ठः "श्रेष्ठो वरे कुबेरे च" (इति हैमः) पुष्यति "पुषः करः कलश्च" इति 'कले' पुष्कलः "पुष्कलस्तु पूर्णे श्रेष्ठे" (इति हैमः) अतिशयेन सन् 'तमपि' सत्तमः

"सत्तमः स्यात्पूज्यतमे साधीयस्युत्तमे त्रिपु" (इति मेदिनी) अतिशयेन शोभनोऽतिशोभनः स्यादिति पञ्च सत्तमस्य शोभनस्य वा । व्याघ्रपुङ्गवर्षभकुञ्जराः सिंहशार्दूलनागाद्या उत्तरपदे स्थिताश्चेत्तदा श्रेष्ठस्यार्थः, श्रेष्ठार्थो गोचरो येषामिति श्रेष्ठार्थगोचराः श्रेष्ठार्थवाचका वा सन्तः पुंसि स्युः । यथा पुरुषो व्याघ्र इव "उपमितं व्याघ्रादिभिरिति" समासे पुरुषव्याघ्रः, पुमांश्चासौ गौश्चेति "गोरतद्धितलुकि" इति 'टचि' पुङ्गवः मुनिषु पुङ्गवो मुनिपुङ्गवः, पुरुषेषु ऋषभः श्रेष्ठः पुरुषर्षभः, मनुष्यः कुञ्जर इव मनुष्यकुञ्जरः, नृपः सिंह इव नृपसिंहः, नृपः शार्दूल इव नृपशार्दूलः, नृपः नाग इव नृपनागः आद्यशब्देन सोमचन्द्रमुखादिग्रहस्तेन ना सोम इव "नृसोमः" इत्यादि सिद्धमित्येते श्रेष्ठार्थवाचकस्य ॥ ५८ । ५९ ॥

पु.स.न. न. न.

अप्रधान. **अप्राग्र्यं (द्वयहीने द्वे) अप्रधानोपसर्जने ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

विस्तीर्ण. **विशंकटं पृथु बृहद्विशालं पृथुलं महत् ॥ ६० ॥**

पु.स.न.पु.स.न.पु.स.न.पु.स.न.पु.स.न. पु.स.न. पु.स.न.

मोटा. **वड्रोरु विपुलं पीनपीव्नी (तु) स्थूलपीवरे ।**

अप्रेति–प्राग्र्याद्भिन्नम्=अप्राग्र्यम्, प्रधानादन्यद् अप्रधानम्, उपसृज्यते कर्मणि ल्युटि उपसर्जनम् इमे द्वे द्वयाभ्यां स्त्रीपुंसाभ्यां हीने क्लीबे स्यातामिति त्रीणि अप्रधानस्य । विस्तृतम् विस्तृतार्थवृत्तेर्विशब्दात् "वेः शालच्छङ्कटचौ" इति 'शंकटचि' विशंकटम्, प्रथते 'प्रथ प्रख्याने' अस्मात् "प्रथिम्रदीति" कौ, संप्रसारणे च पृथु, "पृथुर्विशाले भूपाले वाचिका कृष्णजीरयोः" (इति हेमचन्द्रः) वर्धते 'बृह वृद्धौ' अस्मात् "वर्तमाने पृषद्बृहन्महत्" इति अति प्रत्ययान्तो निपात्यते । बृहत्, विस्तृतम् 'शालचि' विशालम् "विशाला त्विन्द्रवारुण्यामुज्जयिन्यां च योषिति । नृपभृद्भिदोः पुंसि पृथुले त्वभिधेयवत्" (इति विश्वमेदिन्यौ) पृथुत्वमस्यास्ति सिध्मादित्वात् 'लचि' पृथुत्वं लातीति वा पृथुलम्, महति "वर्तमाने पृषदिति" 'अति' महत्, वहते "बहुलमन्यत्रापि" इति 'रकि' इत्यौणादिकत्वात् वड्रम्, ऊर्णोति "महति ह्रस्वश्च" इति कुप्रत्यये, नुलोपे, ह्रस्वे च उरु, विपोलति "इगुपधेति" 'के' विपुलम् "विपुलः पृथुले गाधे मेरुपश्चिमभूधरे" (इति विश्वः) इति नव विशालस्य विस्तीर्णस्य वा । प्यायते स्म "ओप्यायी वृद्धौ" अस्मात् "गत्यर्थेति" कर्तरि 'क्त' "ओदितश्च" इति निष्ठानत्वे, "प्यायः पी" इति 'पी' आदेशे च पीनम्, प्यायते 'प्यैङ् वृद्धौ' अस्मात् "श्याप्योः संप्रसारणं च" इति 'क्वनिपि' पीव, स्त्रियां तु "वनो र च" इति ङीपि पीवरी, स्थूलयति 'स्थूल' स्थूलम् "स्थूलः पीने जडे" (इति हैमः) प्यायते "छित्वरछत्वर-

धीवरपीवरेति" ष्वरच् प्रत्ययान्तो निपात्यते पीवरम् "पीवरः स्थूलकूर्मयोः" (इति हेमचन्द्रः) इति चत्वारि स्थूलस्य ॥ ६० ॥ ३ ॥

पु.स.न. पु.म न. पु.स.न. पु.स.न. पु.स.न. पु.स.न पु.स.न.पु.स.न.

थोड़ा **स्तोकाल्पक्षुल्लकाः श्लक्ष्णं सूक्ष्मं दभ्रं कृशं तनु॥ ६१ ॥**

स. स. पु. पु. पु. पु.

सूक्ष्म या महीन **(स्त्रियां) मात्रा त्रुटी (पुंसि) लवलेशकणाणवः ।**

पु स.न. पु.स.न. पु.म.न. पु स.न. पु.स.न.

बहुत थोड़ा **अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय (इत्यपि) ॥६२॥**

स्तवेति–स्तुच्यते 'ष्टुच प्रसादे' अस्माद् 'घञि' न्यङ्क्वादित्वात्कुत्वे च स्तूयत बाहुलकात्स्तूत्रः 'के' वा स्तोकः "स्तोकस्त्रिष्वल्पे चातके पुमान्" (इति मेदिनी) अल्यते वार्यते 'अल भूषणादौ' अस्माद्बाहुलकात् 'पे' अल्पः, क्षोदनं संपदादित्वात् 'क्विपि' क्षुद् तां लाति "आतोऽनुपेति" के "तोर्लि" इति लत्वे स्वार्थे कनि च क्षुद्यते "स्फायितञ्चीति" 'रकि' रलयोरेकत्वात् कपिलिकादित्वाद्वा लत्वे च वा क्षुल्लकः "क्षुल्लकस्त्रिषु नीचेऽल्पे" (इति विश्व.) श्लिष्यति, श्लिष्यते वा "श्लिषेरच्चोपधायाः" इति 'क्स्ने' श्लक्ष्णम्, सूच्यते "सूचेः स्मन्" इति 'स्मनि' सूक्ष्मम् "–सूक्ष्मं स्यात्कतकेऽध्यात्मे पुंस्यणौ त्रिषु चाल्पके" (इति विश्वः) दभ्यते "स्फायितञ्चि" इति 'रकि' दभ्रम्, कृश्यते स्म कृशम् "अनुपसर्गात्फुल्लक्षीब-कृशोल्लाघा." इति साधु, तन्यते "तनि चरीति" उप्रत्यये 'तनु' "तनुः काये त्वचि स्त्री स्यात्त्रिष्वल्पे विरले कृशे" (इति विश्व) मीयते "सर्वधातुभ्यः ष्ट्रन्" इति 'ष्ट्रनि' पिताङीषोऽनित्यत्वात् 'टापि' मात्रा "मात्रं त्ववधृतौ स्वार्थे कार्त्स्न्ये मात्रा परिच्छदे । अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे । काले वृत्ते च (इति हैमः) त्रुट्यते "इगुपधात्कित्" इति 'इनि' "कृदिकारादिति" वा ङीष् त्रुटी, त्रुटिर्वा उभे स्त्रियां स्याताम् । लूयते "ऋदोरप्" इति 'अपि' लवः "लवः कालभिदि-क्षिदि । विलासे रामजे लेशे" (इति हैमः) लिशति 'अचि' लिश्यते 'घञि' वा लेशः, कणति 'अचि' कण "कणो धान्यांशलेशयोः । कणाजीरकपिप्पल्योः" (इति हेमचन्द्रः) अणति, अण्यते वा "अणश्च" इति उप्रत्यये अणुः "अणु-र्व्रीह्यल्पयोः" (इति हैमः) एते पुंसि स्युरिति चतुर्दश सूक्ष्मस्य । अत्यल्पे अल्पि-ष्ठम्, अल्पीयः, कनीयः, अणीय इत्यपि स्यात् । अतिशयेन अल्पः अत्यल्पः, अतिशयेन अल्पः 'इष्ठनि' अल्पिष्ठम् 'ईयसुनि' अल्पीयः "युवाल्पयोः कनन्यतरस्याम्" इति कनादेशे 'कनीयः' अतिशयेन अणुः 'ईयसुनि' अणीयः स्यादिति पञ्च अत्यल्पस्य ॥ ६१ । ६२ ॥

पु.स.न. पु.स.न. पु.स.न पु.स.न पु.स.न. पु.स.न.

बहुत या **प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न, पु.स.न. पु.स.न.

अधिक **पुरुहं पुरु भूयिष्ठं स्फिरं भूय (श्च) भूरि (च)॥ ६३ ॥**

प्रेति–प्रभवति स्म "गत्यर्थेति" क्ते प्रभूतम् "प्रभूतमुद्गते प्राज्ये" (इति हैमः) प्रचोरति चुरादीनां णिज्वैकल्पिकत्वात् "इगुपध" इति 'के' प्रगतं चुरायाः, इति वा प्रचुरं, प्रवीयते 'अज गतौ' ययति, 'बहुलं तणीति' 'वी' आदेशाभावे च । प्रकर्षेणाज्यते काम्यते "अञ्जू व्यक्तादौ" आङ्पूर्वात् "अञ्जेः संज्ञायाम्" इति 'क्यपि' वा प्राज्यम्, दभ्रादल्पादन्यत् 'नञ्समासे' अदभ्रम्, बहून् लाति "आतोऽनुप-" इति 'के' बहुलम् "बहुला नीलिकायां स्यादेलायां गवि योषिति । कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम् । पुंस्यग्नौ कृष्णपक्षे च वाच्यवत्प्राज्यकृष्णयोः" (इति विश्वमेदिन्यौ) बंहते 'बहि वृद्धौ' अस्माद् "लङ्घिबंह्योर्नलोपश्च" इति 'उप्रत्यये' नलोपे च बहु, "बहु स्यात्त्र्यादिसंख्यासु विपुलेऽप्यभिधेयवत्" (इति विश्वः) पुरून् हन्ति "अन्येभ्योऽपि" इति 'डे' पुरून् जहाति, जिहीते वा 'आतोऽनुपेति' 'के' वा पुरुहम्, पिपर्ति, पूर्यते वा 'पृभिदि–' इति 'कौ' "उदोष्ठ्येति" उदादेशे, रपरत्वे च पुरु, "पुरुः प्राज्येऽभिधेयवत् । पुंसि स्याद्देवलोके च नृपभेदपरागयोः" (इति हैमः) अतिशयेन बहु 'इष्ठनि' इलोपे, बहोर्भ्वादेशे, यिडागमे च भूयिष्ठम्, स्फायत इति स्फिरम् "अजिरशिशिर–" इति साधु, स्फारमित्यपिपाठः, तत्र 'स्फायितञ्चि' इति 'रकि' स्फारम् "स्फारस्तु स्फरकादीनां बुद्बुदे विपुलेऽपि च" (इति हेमचन्द्रः) अतिशयेन बहु 'ईयसुनि' "बहोर्लोपो भू च बहोः" इति इलोपे, बहोर्भ्वादेशे च भूयः, भवति "अदिशदिभूशुभिभ्यः क्रिन्" इति 'क्रिनि' भूरि "भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकः" (इति मेदिनी) इति द्वादश बहुलस्य ॥ ६३ ॥

पु.स.न.

सौ से परे या **परश्शता (स्तास्ते येषां परा संख्या शतादिकात्) ।**

[illegible] पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

गिनने योग्य. **गणनीये(तु)गणेयं संख्यातं गणित(मथ)समं सर्वम् ६४।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] **विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

समग्रं सकलं पूर्णमखण्डं (स्यात्) अनूनके ॥ ६५ ॥

पेति—येषां संख्येयानां संख्या गणना शतादिकात् परा अधिका चेत्तदा ते क्रमशः परश्शताद्याः स्युः । शतात्परे " पञ्चमी " इति योगविभागात्समासे, राजदन्तादित्वात्परनिपाते, पारस्करादित्वात्सुडागमे च परश्शतः, आद्येन परस्सहस्राः स्युस्तेन " परश्शतानां विदुषां समाजः " इति केषांचिद्वचनं संगच्छत इत्येकं शतात्परस्य । गणनीये तु गणेयं स्यात् । गण्यते 'अनीयरि' गणनीयम्, गणयितुं शक्यम् " अचो यत् " इति 'यति' संज्ञापूर्वकत्वाणिलोपाभावे, गुणे च गणेयम्, प्रज्ञाद्यणि तु गाणेयमपि स्यादिति द्वे गणयितुं शक्यस्य । संख्यायते स्म 'ख्या प्रकथने' अस्माच्चक्षिङादेशाद्वा कर्मणि 'क्ते' संख्यातम्, गण्यते स्म कर्मणि 'क्ते' गणितं स्यादिति द्वे गणितस्य । अथेति—समति 'षम वैक्लव्ये' अस्मात्पचाद्यचि समम् " सर्वसाधुसमानेषु समं स्यादभिधेयवत् " (इति विश्वः) सरति—सृतमनेन विश्वमिति " सर्वनीघृष्वेति " निपातिते, सर्वति, 'अचि' वा सर्वम्, विशति, " अशूप्रुषि—" इति 'क्वनि' विश्वम् " विश्वं कृत्स्ने च भुवने विश्वेदेवेषु नागरे । विश्वाप्यतिविषायां स्यात् " (इति विश्वः) न शेषोऽस्येति अशेषम्, कृत्यते " कृत्यशूभ्यां क्स्नः " इति 'क्स्ने' कृत्स्नम् " कृत्स्नं सर्वाम्बुकुक्षिषु " (इति मेदिनी) समस्यते स्म कर्मणि 'क्ते' समस्तम्, निवृत्तं खिलमस्येति निखिलम्, न खिलमस्येति अखिलम्, निष्क्रान्तं शेषात् " निरादयः " इति समासे निःशेषम्, संगतमग्रमस्य, समं ग्रसते वा " अन्येभ्योऽपि " इति 'डे' समग्रम्, कलाभिः सहितम्—सहकलाभिर्वा सकलम्, पूर्यते स्म कर्तरि, कर्मणि वा क्ते पूर्णम् " पूर्णः शक्ते समग्रे ना पूरिते त्वभिधेयवत् " (इति मेदिनी) स्वामिमते तु पूर्वमिति पाठस्तत्र पूर्वति 'पूर्व पूरणे' अस्मादचि पूर्वम्, न खण्ड्यते 'घञि' अखण्डम्, ऊनयति 'अचि' ऊनम् न ऊनम् 'नञ्समासे' अनूनम्, स्वार्थे 'कनि' अनूनकं स्यादिति चतुर्दश समग्रस्य ॥ ६४ । ६५ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

सघनयागभिन **घनं निरन्तरं सान्द्रं पेलवं विरलं तनु ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

विरलं या छिटका **समीपे निकटासन्नसंनिकृष्टसनीड (वत्) ॥ ६६ ॥**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

समीप या पास **सदेशाभ्याशसविधसमर्यादसवेश (वत्) ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

उपकण्ठान्तिकाभ्यर्णाभ्यग्रा(अप्य)भितो(ऽव्ययम्)॥

घेति—हन्यते 'हन हिंसागत्योः' अस्मात् " मूर्तौ घनः " इति 'अपि' घनादेशे च घनम् " घनः सान्द्रे दृढे दार्ढ्ये विस्तारे मुद्गरेऽम्बुदे । संघे मुस्ते घनं मध्ये

१ त तस्थिवांसं नगरोपकण्ठे इति । २ अभ्यर्णमागस्कृतमस्पृशद्भिरिति रघुः ।

नृत्यवाद्यप्रभेदयोः " (इति हेमचन्द्रः) निर्गतमन्तरात्—निर्गतमन्तरमस्मिन्निति वा निरन्तरम्, सह अन्द्यते ' अदि बन्धने, बाहुलकाद् ' रकि ' सान्द्रं स्यादिति त्रीणि सघनस्य ' गञ्जिन ' इति ख्यातस्य । पेलनम् ' पिल भेदने ' घञि पेलः सोऽस्त्यस्येति " अन्येभ्योऽपि " इति ' वे ' पेलवम्, विराति बाहुलकात् ' कलनि ' आतोलोपे च विरलम्, तन्यते " भृमृशीति " उप्रत्यये तनु " तनुर्वपुस्त्वचोः । विरलेऽल्पे कृशे " (इति हैमः) इति त्रीणि विरलस्य । संगता आपो यस्मिन्निति विग्रहे ' ऋक्पूरब्धूः ' इति ' अप्रत्यये ' " द्व्यन्तरुपसर्गेभ्योऽपईत् " इति अपईदादेशे च समीपः, निबद्धम् " संप्रोदश्च " इति चान्नेः ' कटचि ' निकटति ' अचि ' वा निकटः, आसीदति स्म " गत्यथति " ' क्ते ' आसद्यते स्म कर्मणि ' क्ते ' वा आसन्नः, संनिकृष्यते कर्मणि ' क्ते ' संनिकृष्टः, समानं नीडं वासस्थानमस्य—सहनीडेनेति वा सनीडः, समानो देशोऽस्येति सदेशः, अभ्यश्यते " अभिपूर्वकादशूङ् व्याप्तौ " इत्यतो ' घञि ' अभ्याशः मुकुटमते तु अभ्यासीदतीति विग्रहे ' अन्येभ्योऽपीति ' ' डे ' अभ्यासोदन्त्यान्तोऽपि " अभ्यासोऽभ्यसनेऽन्तिके " (इति दन्त्यान्तेषु विश्वमेदिन्यौ) समाना विधाऽस्य, सह विधयेति वा सविधः, समाना मर्यादास्येति समर्यादः, समानो वेशोऽस्येति सवेशः, (वदिति समानार्थेऽव्ययमुभयत्रापि ज्ञेयम्) उपगतः कण्ठः सामीप्यमस्य, उपगतः कण्ठम् " अत्यादयः " इति समासे वा उपकण्ठः, अन्तोऽस्यास्ति ' ठन् ' ठस्येकादेशे च अन्तिकः, " अन्तिकं निकटे वाच्यलिङ्गं स्त्री शोभनौषधौ । चुल्ल्यां ज्येष्ठभगिन्यां च नाट्योक्त्यां कीर्त्यतेऽन्तिका (इति विश्वः) अभ्यर्दति स्म, अभ्यर्द्यते स्म वा कर्तरि, कर्मणि वा ' क्ते ' " अभेश्चाविदूर्ये " इतीडभावे च अभ्यर्णः, अभिमुखमग्रमस्येति अभ्यग्रः, " पर्यभिभ्यां च " इति तसिलि अभितोऽपि अव्ययं स्यादिति पञ्चदश निकटस्य ॥ ६६ । ६७ ॥

संयुक्त या मिला पु.स.न. पु.स.न. पु.स.न.
अत्यन्त समीप **संसक्ते (त्व) व्यवहितमपदान्तर (मित्यपि) ।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न.
दूर या फासिला **नेदिष्ठमन्तिकतमं (स्या) द्दूरं विप्रकृष्टकम् ॥ ६८ ॥**

संसक्त इति—संसक्ते संयुक्ते तु अव्यवहितम्, अपदान्तरमित्यपि स्यात् । संसज्यते स्म कर्मणि ' क्त ' संसक्तम्, न व्यवधीयते स्म कर्मणि ' क्त ' " दधातेर्हिः " इति ह्यादेशे च अव्यवहितम्, पदानामन्तरमवकाशोऽन्तरम्, न पदान्तरमस्येति अपदान्तरम्, मुकुटमते तु अपदान्तरमपीति त्रीणि संयुक्तस्य । अतिशयेनान्तिकम् ' इष्ठनि ' " अन्तिकबाढयोर्नेदसाधौ " इति नेदादेशे, " [illegible] " [illegible] नेदिष्ठम्, अतिशये त्वन्तिकम् ' तमपि ' अन्तिकतमं स्यादिति द्वे अति निकटस्य । दुःखेनेयते प्राप्यते दुरप- [illegible] " दुरीणो लोपश्च " इति रकि इणो लोपे, " रोरि " रलोपे,

" हलोपे पूर्वस्येति " दीर्घे च दूरम्, विप्रकृष्यते स्म कर्मणि ' क्ते ' विप्रकृष्टम्, स्वार्थे कनि ' विप्रकृष्टकम् ' स्यादिति द्वे दूरस्य ॥ ६८ ॥

अतिदूर पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
लम्बा चौड़ा **दवीय ' श्च ' दविष्ठं ' च ' सुदूरे दीर्घमायतम्।**
गोल ऊंचा पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
झुका हुआ **वर्तुलं निस्तलं वृत्तं बन्धुरं ' तू ' न्नतानतम् ॥ ६९ ॥**

देति—सुदूरे अतिदूरे दवीयः, दविष्ठं च स्यात्। अत्यन्तं दूरम् ' ईयसुनि ' " स्थूलदूरयुवेति " रलोपे, गुणे, अवादेशे च दवीयः, ' इष्ठनि ' दविष्ठम्, सु=अत्यन्तं दूरं सुदूरं स्यादिति त्रीणि अतिदूरस्य । दृणाति बाहुलकाद् ' घकि ' इदादेशे, दीर्घे च दीर्घम्, आयम्यते स्म कर्मणि ' क्ते ' आयतते 'अचि' वा आयतं स्यादिति द्वे लम्बितस्य विस्तीर्णस्य वा । वर्तते बाहुलकादुलचि वर्तुलम्, निर्गतं तलमस्येति निस्तलम्, " निस्तलं वर्तुले चले " (इति विश्वः) वर्तते स्म ' गत्यर्थेति ' कर्तरि ' क्ते ' वृत्तम् " वृत्तं वृत्तौ दृढे मृते । चरित्रे वर्तुले छन्दः स्वतीताधीतयोर्वृते " (इति हैमः) इति त्रीणि वर्तुलस्य । बध्नाति " मद्गुरादयश्चेति " 'उरचि' बन्धुरः खर्जूरादित्वात् ' ऊरे ' बन्धूरोऽपि " बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु " (इति रन्तिदेवः) उन्नमति स्म उन्नतम्, आनमति स्म आनतम् उन्नतं च तदानतं च उन्नतानतं स्यादिति द्वे उन्नतानतस्य ॥ ६९ ॥

पु.स.न.पु.स.न.पु.स.न.पु.स.न. पु.स.न. पु.स.न. पु.स.न.
ऊंचा **उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे(ऽथ) वामने ।**
बौना पु.स.न.पु.स.न.पु.स.न. पु.स.न. पु.स.न. पु.स.न.पु.स.न.
औंधे मुख **न्यग्नीच खर्वह्रस्वाः(स्यु) रवाग्रेऽवनतानते ॥ ७० ॥**

उच्चेति—तुङ्गे उत्तुङ्गे उच्चप्रांशून्नतोदग्रोच्छ्रिताः स्युः—उच्चिनोति " अन्येभ्योऽपीति " 'डे' उच्चैस्त्वमस्त्यस्य ' अचि ' वा " अव्ययानामिति " टिलोपे च उच्चः, प्रकृष्टा अंशवोऽस्येति प्रांशुः, उन्नमति " गत्यर्थेति " कर्तरि ' क्ते ' उन्नतः, उच्छ्रयति स्म कर्तरि ' क्ते ' उच्छ्रितम् " उच्छ्रितं त्रिषु संजाते समुन्नद्धप्रवृद्धयोः " (इति मेदिनी) तुञ्ज्यते कर्मणि ' घञि ' तुङ्गः " तुङ्गः पुन्नागनगयोर्बुधे स्यादुन्नतेऽन्यवत् । तुङ्गी प्रोक्ता हरिद्रायां वर्वरायामपीष्यते " (इति हैमः) । इति षट् उन्नतस्य । अथेति—वामने न्यग्नीचखर्वह्रस्वाः स्युः । वामयति मदम् नन्दादित्वाल्ल्यौ वामनः, न्यञ्चति " ऋत्विगिति " 'क्विनि' न्यक्, नीचैस्त्वमस्त्यत्रेति अर्शआद्यचि ' अव्ययानामिति ' टिलोपे च नीचः "नीचः पामरखर्वयोः" (इति हेमचन्द्रः) खर्वति, पचाद्यचि खर्वः " खर्वं संख्यान्तरे क्लीवं नीचे वामनके त्रिषु " (इति मेदिनी) ह्रसति ' ह्रस शब्दे ' अस्माद्बाहुलकात् ' वे ' ह्रस्वः " खर्वह्रस्वौ न्यग्वामनौ " (इति हैमः)

इति पञ्च वामनस्य " बौना " इति ख्यातस्य । अवाग्रे अधोमुखे अवनतानते स्याताम् । अवनतमग्रमस्येति अवाग्रम्, अवनमतिस्म " गत्यर्थेति " कर्तरि ' क्ते ' अवनतम्, आनमति स्म आनतं स्यादिति त्रीण्यधोमुखस्य ॥ ७० ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
वक्र **अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न
या टेढा **आविद्धं कुटिलं भुग्नं वेल्लितं वक्र(मित्यपि) ॥ ७१ ॥**

अरेति—ऋच्छति ' विचि ' अर् तमालाति मूलविभुजादित्वात् ' के ' अरालाति विग्रहे तु " सुपीति " योगविभागात् ' के ' वा अरालम्, " अरालं कुटिले सर्जरसे च समदन्तिनि " (इति विश्वः) वृज्यते, वृजेः "किच्च" इति "किनचि" वृजिनम् " वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु " (इति मेदिनी) जहाति हीयते वा " जहातेः सन्वदालोपश्च " इति ' मनि ' जिह्मम्, " जिह्मस्तु कुटिले मन्दे जिह्मं तगरपादपे " (इति हैमः) । " ऊर्मिः स्त्री पुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः । वस्त्रसंकोचरेखायां वेदनापीडयोरपि " (इति मेदिनी) ऊर्मिरस्यास्ति ' मतुपि ' यवादित्वान्मतोर्वस्याभावे च ऊर्मिमत्, कुञ्चति स्म कर्तरि ' क्ते ' बाहुलकात्संज्ञापूर्वकत्वाद्वा नलोपाभावे च कुञ्चितम्, नमति स्म कर्तरि ' क्ते ' नतम् " नतं तगरपाद्यां स्यात् क्लीबं कुटिलनम्रयोः । "त्रिषु" (इति मेदिनी) आविध्यते स्म कर्मणि ' क्ते ' " ग्रहिज्येति " संप्रसारणे च आविद्धम् " आविद्धो वाच्यलिङ्गः स्यात्कुटिले च पराहते " (इति मेदिनी) कुटति " मिथिलादयश्च " इति " इलचि " कुटिं कौटिल्यं लाति गृह्णातीति वा " आतोऽनुपेति " ' के ' कुटिलम " कुटिला त्वापगायां स्त्री भुग्ने तु वाच्यलिङ्गकः " (इति मेदिनी) भुजति स्म " गत्यर्थेति " कर्तरि ' क्ते ' " ओदितश्च " इति निष्ठानत्वे च भुग्नम्, वेल्लति स्म कर्तरि ' क्ते ' वेल्लितम् " वेल्लितं गमने क्लीबं कुटिले विधुते त्रिषु " (इति मेदिनी) वञ्चति " वञ्चु गतौ " अस्मात् " स्फायितञ्चीति " ' रक्' नलोपे, चस्य के च वक्रम् " वक्रं पुटभेदे वक्रः कुटिले क्रूरभौमयोः " (इति हैमः) इत्येकादश कुटिलस्य ॥ ७१ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
सीधा **ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ ।**
व्याकुल पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
नित्य **शाश्वत (स्तु) ध्रुवो नित्य सदातन सनातनाः ॥ ७२ ॥**

ऋज्विति—ऋजुः अजिह्मः प्रगुणः त्रयाणाम् । ऋजति, अर्जयति गुणानिति [illegible] ऋजुः, जिह्मो जिह्मादिति अजिह्मः, प्रहृष्टा

गुणा यस्येति प्रगुणः स्यादिति त्रीणि सरलस्य। व्यस्ते तु अप्रगुणाकुलौ स्याताम्। व्यस्यते स्म कर्मणि 'क्ते' व्यस्तः, भिन्नः प्रगुणादिति अप्रगुणः, आकोलति इगुपधत्वादिति 'के' आकुलः स्यादिति त्रीणि आकुलस्य। शश्वद्भव. "तत्र भवः" इत्यणि, वृद्धौ वहिपष्टिलोप इति वचनादव्ययानां टिलोपस्यानित्यत्वाट्टिलोपाभावे च शाश्वतः, अध्यात्मादित्वात् ठञपि ठस्येकादेशे च शाश्वतिकोऽपि, ध्रुवति "इगुपधेति" 'के' ध्रुवः, "ध्रुवोवटे। वसुयोगभिदोः शम्भौ शङ्कावुत्तानपादजे। स्थिरे नित्ये निश्चिते च ध्रुवं खेऽजस्रतर्कयोः। ध्रुवा मूर्वाशालपर्यौः स्रुग्भेदे गीतभिद्यपि" (इति हैमः) नियतं भवः "त्यब्नेर्ध्रुवे" इति 'त्यपि' नित्यः "नित्यं स्यात्संततेऽपि च। शाश्वते त्रिषु" (इति मेदिनी) सदाभवः "सायं चिरमिति" ट्यौ, "युवोरिति" अनादेशे, तुडागमे च सदातनः एवं सनाभवः सनातनः "सनातनोऽच्युते। पितॄणामतिथौ रुद्रवेधसोः शाश्वते स्थिरे" (इति हेमचन्द्रः) इति पञ्चनित्यस्य॥ ७२॥

पु.स.न. पु.स.न. पु.स.न.

अति स्थिर. **स्थास्नुः स्थिरतरस्थेया (नेकरूपतया तु यः)।**

स्थिर. पु.स.न. पु.स.न. पु.स.न.

वृक्षादि. **(कालव्यापी स) कूटस्थः स्थावरो जङ्गमेतरः॥ ७३॥**

स्थेति—स्थानशीलः "ग्लाजिस्थश्चेति" 'ग्स्नौ' स्थास्नुः, अतिशयेन स्थिरः "द्विवचनविभज्येति" 'तरपि' स्थिरतरः, 'ईयसुनि' "प्रियस्थिरेति" स्थादेशे गुणे च स्थेयान्स्यादिति त्रीण्यतिस्थिरस्य। एकरूपतया प्रधानरूपतया यः कालं व्याप्तुं शीलमस्त्यस्येति कालव्यापी स कूटवत्तिष्ठति "सुपिस्थः" इति 'के' कूटस्थः स्यादित्येकं निश्चलस्य। तिष्ठत्येवंशीलः स्थानशीलो वा "स्थेशभासेति" 'वरचि' स्थावरः, जङ्गमादितरो जङ्गमेतरः स्यादिति द्वे जङ्गमेतरस्य॥ ७३॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

चलनेवाले. **चरिष्णुजङ्गमचरं त्रसमिङ्गं चराचरम्।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

कापनेवाले. **चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम्॥ ७४॥**

पु.स.न. पु.स.न पु.स.न. पु.स.न.

चञ्चल. **चञ्चलं तरलं (चैव) पारिप्लवपरिप्लवे॥**

चेति—चरणशीलम् "अलंकृञिति" 'इष्णुचि' चरिष्णु, वक्रं गच्छति, भृशं गच्छति वा यङि, पचाद्यचि, जङ्गमम्, चरति 'अचि' चरम् "चरोक्षद्यूतभेदे च भौमे चारे त्रसे चले" (इति मेदिनी) त्रसति 'अचि' त्रसम्, इङ्गति 'अचि' इङ्गम् "इङ्गः स्यादिङ्गितेऽद्भुते। ज्ञानजङ्गमयोश्चापि" (इति हेमचन्द्रः) चरति

'अचि' "चरिचलीति" द्वित्वे अभ्यासस्यागागमे च चराचरम् "चराचरं जङ्गमे स्यादिङ्गविष्टपयोरपि" (इति हैमः) इति चराचरस्य । चलनशीलम् "चलनशब्देति" युचि, अनादेशे च चलनम्, कम्पनशीलम् 'युचि' कम्पनम्, "नमिकम्पीति" 'रे' कम्प्रं स्यादिति त्रीणि कम्पनशीलस्य। चलति, अचि, चलम्, लोडति "क्वचिदपवादविषयेऽप्युत्सर्गप्रवृत्तेः" अचि डलयोरैक्याद् लोलम्, चलति अचि, "चरिचलीति" द्वित्वे अभ्यासस्यागागमे च चलाचलम्, चञ्चति बाहुलकादलचि चञ्चलम् "चञ्चला तु तडिल्लक्ष्म्योश्चञ्चलश्चपलेऽनिले" (इति मेदिनी) तरति बाहुलकादलचि तरलम् "तरलं चञ्चलेपिङ्गे भास्करेऽपि त्रिलिङ्गकम्" (इति विश्वः) परिप्लवते 'अचि' प्रज्ञाद्यणि च पारिप्लवम्, 'केवलेऽचि' परिप्लवमिति सप्त चञ्चलस्य॥ ७४ । ३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अधिक. **अतिरिक्तः समधिको दृढसंधि'स्तु' संहतः ॥ ७५ ॥**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

बड़ा मिलापी. **कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ।**

कठिन. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

बहुत बढ़ेहुए. **जरठं मूर्तिमन्मूर्तं प्रवृद्धं प्रौढमेधितम् ॥ ७६ ॥**

अतीति—अतिरिच्यते स्म कर्मणि 'क्ते' अतिरिक्तः, सम्यगधिकः समधिकः स्यादिति द्वे अधिकस्य । दृढः सन्धिः संधानमस्येति दृढसन्धिः, संहन्यते स्म कर्मणि 'क्ते' संहतः "संहतं संगते दृढे" (इति हैमः) इति द्वे दृढसंधानस्य । कक्खति "कक्ख हसने" शकादित्वादटनि कक्खटम्, खक्खटमिति कवर्गद्वितीयादिरपि । कठति "बहुलमन्यत्रापीति" 'इनचि' कठिनम् "कठिनमपि निष्ठुरे स्यात्तत्स्थेऽपि त्रिषु नपुंसकं स्थाल्याम् । कठिनी खटिकायामपि कठिनागुडशर्करायां च" (इति विश्वः) कृन्तति "कृतेश्छः क्रू च" इति 'रकि' क्रू आदेशे च क्रूरम्, "क्रूरा नृशंसघोरोष्णकठिनाः" (इति हैमः) कठति "कठिचकिभ्यामोरन्" इति 'ओरनि' कठोरम्, "कठोरौ पूर्णकठिनौ" (इति हैमः) नितिष्ठति मद्गुरादित्वादुरचि, आलोपे च निष्ठुरम्, दृंहति, दृंहति स्म वा दृढम् "दृढ स्थूलबलयोः" इति धातु "दृढं स्थूले नितान्ते च प्रगाढे बलवत्यपि" (इति मेदिनी) जीर्यति बाहुलकादठनि जरठम्, "जरठः कर्कशे पाण्डौ कठिनेऽप्यभिधेयवत्" (इति विश्वः) मूर्तिः काठिन्यमस्यास्तीति 'मतुपि' मूर्तिमत्, मूर्च्छति स्म अदर्शनं करोति 'क्ते' "आदितश्च" इति इडागमाभावे "न ध्याख्येति" नत्वाभावे च मूर्तम् "मूर्तं स्यात्त्रिषु मूर्च्छाले कठिने मूर्तिमत्यपि" (इति विश्वः) इति सप्त कठिनस्य । प्रवर्धते स्म "गत्यर्थेति" कर्तरि 'क्ते' प्रवृद्धम्, प्रौह्यते स्म प्रकर्षेण 'क्ते' "प्रादूहेति" वृद्धौ च प्रौढम्, एधते स्म कर्तरि 'क्ते' एधितं स्यादिति त्रीणि प्रवृद्धस्य ॥ ७५ । ७६ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

पुराना. पुराणे प्रतनप्रत्नपुरातनचिरन्तनम् ।

पु.स.न पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

नया. प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥ ७७ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

कोमल. नूत्न (श्च) सुकुमारं (तु) कोमलं मृदुलं मृदु ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

पीछे. अन्वगन्वक्षमनुगेऽनुपदं (क्लीबमव्ययम्) ॥ ७८ ॥

पुरेति—पुराभवम् "सायं चिरमिति" ट्यौ, "पुराणप्रोक्तेषु" इति निर्देशात्तुडभावे च पुराणम् "पुराणं प्रत्नशास्त्रयोः । पुराणः षोडशपणे" (इति हैमः) प्रकृष्टे भवम् "नश्च पुराणे प्रात्" क्तव्य" इति चात् त्नप्—तनप्—खाश्च प्रत्यया वक्तव्याः" इति भाष्यात्तनपि प्रतनम्, 'त्नपि' प्रत्नम्, पुराभवम् 'ट्यौ' पुरातनम्, चिरे भवम् "सायं चिरमिति" ट्यौ, निपातनान्मान्तत्वे च चिरन्तनं स्यादिति पञ्च पुरातनस्य । प्रतिनवमग्रमस्येति प्रत्यग्रः, अभिनूयते "ऋदोरप्" इति 'अपि' अभिनवः, नूयते "अचोयत्" इति 'यति' नव्यः, नव एवेति विग्रहे "नवस्य-नूरादेशस्त्नप्, तनप् खाश्च प्रत्ययाः" इति 'खे' खस्येनादेशे च नवीनः, 'तनपि' नूतनः, नूयते, 'अपि' नवः, 'त्नपि' 'नू' आदेशे च नूत्नः स्यादिति सप्त नवीनस्य । सुष्ठु कुमार्यते 'कुमारक्रीडायाम्' चुराद्यदन्तात् 'पुंसीति' 'घे' "एरच्" इति 'अचि' सुकाम्यते "कमेः किदुच्चोपधायाः" इति "आरनि" अत उत्वे च वा सुकुमारम्, कौतीति विग्रहे "कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्" इति 'कलचि' मुडागमे, वाहुलकाद्गुणे च कोमलम्, मृदुर्गुणोऽस्यास्ति "सिध्मादिभ्यश्च" इति 'लचि' मृदुलम्, म्रदते, अद्यते वा "म्रद मर्दने" भौवादिकात् "प्रथिम्रदिभ्रस्जाम्" इति 'कौ' संप्रसारणे च मृदु "मृद्धतीक्ष्णे च कोमले" (इति हैमः) इति चत्वारि कोमलस्य । अनुगे वर्तमानमन्वगन्वक्षमनुपदमेतत्त्रयमव्ययं वर्तते क्लीबत्वं तु अन्वक्षानुपदयोरेव भवति अन्वञ्चति "ऋत्विगिति" क्विनि "क्विन्प्रत्ययस्येति" कुत्वे च अन्वक्, अनुगतमक्षमिन्द्रियमन्वक्षम्, अनुगच्छति "अन्येभ्योऽपि" इति 'डे' अनुगम्, पदस्य पश्चात् पश्चादर्थेऽव्ययीभावे अनुपदमिति चत्वार्यनुगस्य ॥ ७७ । ७८ ॥

१ पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्तोऽपि पृषोदरादित्वान्नेति बोध्यम् "अबाधकान्यपिनिपातनानि" इति भाष्यविरुद्धमिति परिभाषेन्दुशेखरे नागेशः । २ युज्यते चान्वक् शब्दस्याव्ययत्वम् "अन्वग्ययौयमध्यमलोकपालः" इत्यत्र 'अन्वङ्' इति रूपापत्तेः । तामित्यत्र "कर्तृकर्मणोरिति" षष्ठ्यापत्तेश्च । अव्ययत्वे तु न लोकाव्ययेति षष्ठी निषेधेन अव्ययादिति सुपोलुकालुप्तत्वेन न काप्यनुपपत्तिः ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

प्रत्यक्ष.अप्रत्यक्ष. **प्रत्यक्षं (स्या) दैन्द्रियकमप्रत्यक्षमतीन्द्रियम् ।**

पुं.स.न. पु.स.न. पु.स.न. पु.स.न.

एकाग्रमनवाला. **एकतानोऽनन्यवृत्तिरेकाग्रैकायना (वपि) ॥ ७९ ॥**

पु.स.न. पु.स.न. पु.स.न.

(अप्ये) कसर्गएकाग्र्यो (ऽप्ये) कायनगतो (ऽपि च) ।

प्रति—अक्षमिन्द्रियं प्रतिगतम् “ अत्यादयः ” इति समासे प्रत्यक्षम्, इन्द्रियेणानुभूयते कुलालादित्वाद् ‘ वुञि ’ वृद्धौ, अकादेशे च ऐन्द्रियकं स्यादिति द्वे इन्द्रियज्ञातस्य । भिन्नं प्रत्यक्षात् नञ्समासे अप्रत्यक्षम्, अनध्यक्षमिति वा पाठस्तत्र अक्षेष्वधि विभक्त्यर्थेऽव्ययीभावे अध्यक्षम् तस्माद्भिन्नमनध्यक्षमपि, इन्द्रियमतिक्रान्तमतीन्द्रियं स्यादिति द्वे इन्द्रियेणाज्ञातस्य । एकस्तानो विस्तारोऽस्य, एकं तानयति ‘ तनु श्रद्धोपकरणयोः ’ अस्माच्चौरादिकात् कर्मण्यणि वा एकतानः, न अन्यावृत्तिरस्येति अनन्यवृत्तिः, एकम्, एकस्मिन् वा अग्रमस्य एकाग्रः, एकमयनमस्येति एकायनः, एकः, एकस्मिन् वा सर्गो निश्चयोऽस्येति एकसर्गः, एकमग्र्यं ज्ञेयमस्येति एकाग्र्यः प्रज्ञाद्यणि तु ऐकाग्र्योऽपि, एकं च तदयनं च एकायनं गतः एकस्मिन्नयने गतं ज्ञानमस्येति वा एकायनगतोऽपि स्यादिति सप्त एकाग्रचित्तस्य समाहितमानसस्य वा ॥७९।½ ॥

पु.स.न. पु.स.न. पु.स.न पु.स.न.पु.स.न.

आदि. **पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या (अथास्त्रियाम्)॥ ८० ॥**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अन्त. **अन्तो जघन्यं चरममन्त्यपाश्चात्य पश्चिमम् ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

व्यर्थ, साफ. **मोघं निरर्थकं स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ॥ ८१ ॥**

पुमिति—आद्यं प्रथमं दीयते गृह्यते, प्रथममादीयते गृह्यते वा “ उपसर्गे घोः किः ” इति ‘ कौ ’ आलोपे च आदिः “ सामीप्ये च व्यवस्थायां प्रकारेऽवयवे तथा चतुर्ष्वर्थेषु मेधावी आदि शब्दं तु लक्षयेदिति ” पुंसि स्यात् । पूर्वति ‘ अचि ’ पूर्वं “ पूर्वं तु पूर्वजे । प्रागग्रे श्रुतभेदेषु ” (इति हेमः) पुरोभवः “ दक्षिणापश्चात्पुरसस्त्यक् ” इति ‘ त्यकि ’ वृद्धौ च पौरस्त्यः, प्रथते ‘ प्रथ प्रख्याने ’ अस्मात् “ प्रथेरमच् ” इत्यमचि प्रथमः “ प्रथमस्तु भवेदाद्ये प्रधानेऽपि च वाच्यवत् ” (इति मेदिनी) आदौ भवः दिगादित्वाद् ‘ यति ’ आद्यः स्यादिति पञ्च प्रथमस्य । अन्त इति—अमति गच्छत्यवसानमिति, अमतेः ‘ अचि ’ वा अन्तः अस्त्रियां पुन्नपुंसके स्यात् “ अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । अवयवेऽपि ” (इति हेमचन्द्रः) जघने भवम् दिगादित्वात्—शरीरावयवाद्वा ‘ यति ’ जघन्यम् “ जघन्यं मेहने क्लीबं गर्ह्येऽन्त्ये चाभिधेयवत् ” (इति मेदिनी) चरति “ चरेश्च ” इत्यमचि चरमम्,

अन्तेभवम् दिगादित्वाद् 'यति' अन्त्यम्, "अन्त्यस्त्वन्तभवेऽधमे" (इति हैमः) पश्चाद्भवम् "दक्षिणापश्चादिति" 'त्यकि' वृद्धौ च पाश्चात्यम्, एवम् "अग्रादि पश्चाड्डिमच्" इति 'डिमचि' पश्चिमं स्यादिति पञ्च पाश्चात्यस्य। मुह्यन्त्यस्मिन् "हलश्चेति" 'घञि' 'अचि' वा न्यङ्क्वादित्वात्कुत्वे च मोघः "मोघो दीने निष्फले च मोघा स्यात्पाटलातरौ" (इति हैमः) निर्गतोऽर्थोऽस्मादिति निरर्थकं स्यादिति द्वे निष्प्रयोजनस्य। स्पाश्यतेस्म णयन्तात्कर्मणि 'क्ते' स्पष्टम् "वादान्तेति" साधुः। स्फुटति इगुपधत्वात् के, स्फुटम्, "स्फुटो व्यक्तप्रफुल्लयोः। सिते व्याप्ते" (इति हैमः) प्रव्यज्यतेस्म, प्रव्यच्यतेस्म इति वा कर्मणि 'क्ते' प्रव्यक्तम् उद्वणाति उत्पूर्वकाद्वणशब्दे अस्मात्पचाद्यचि पृषोदरादित्वाल्लत्वे च उल्वणं स्यादिति चत्वारि स्पष्टस्य ॥ ८०।८१॥

पु.स.न. न. पु.स.न. १ पु.स.न. पु.स.न.

साधारण. **साधारणं (तु) सामान्यमेकाकी (त्वे)क एककः।**

असहाय. पु.स.न. पु.स.न. पु.स.न.पु.स.न.पु.स.न.पु.स.न.

भिन्न. **भिन्ना "र्थका" अन्यतर एकस्त्वोऽन्येतरा (वपि)॥८२॥**

सेति—सह आधारणेनेति साधारणम्, तदेव "आग्नीध्रसाधारणादञ्" इति 'अञि' साधारणम् स्त्रियां टिड्ढेति ङीपि साधारणी, टापि 'साधारणा' सह मानेन समानं तस्य भावः, चातुर्वर्ण्यादित्वात् स्वार्थे वा 'ष्यञि' सामान्यं स्यादिति द्वे अनेकसम्बन्धिन एकस्य। एक एव "एकादाकिनिच्चासहाये" "चात्कनलुकौ च" इति 'आकिनिचि' एकाकी, 'कनोलुकि' एकः "एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु" (इति मेदिनी) 'कनि' एककः, पीयूषव्याख्यातः "शाम्भवी शक्तिरेकला" इति वचनादेकलोऽपि तत्र सिध्मादित्वात् "लच्" स्यादिति त्रीण्यसजातीयासहायस्य। भिन्नोऽर्थो येषामिति भिन्नार्थकाः, अन्य एव अल्पाद्यूतरमितिवत्स्वार्थे 'तरपि' अन्यतरः क्वचित् 'एकतरः' इति पाठस्तत्र "एकाच्च प्राचाम्" इति 'डतरच्'। एति "इणभी" इति 'कनि' एकः, तनोति "तनोतेरनश्च वः" इति चात् क्विबित्येके, आगमानित्यत्वात्तुक् वैकल्पिकः, केचित्तुचिकमेवानुवर्तयन्ति एवं मतभेदसिद्धौ त्वत्-त्व-शब्दावन्यपर्यायौ सर्वादिगणे पठिताविति। अनिति अन्न्यादित्वाद् 'ये' अन्यः "अन्योऽसदृशेतरयोः" (इति हैमः) तरणम् "ॠदोरप्" इत्यपि, तरः एः कामस्य तरः, इना कामेन तरति पचाद्यचि वा इतरः "इतरः पामरेऽन्यस्मिन्" (इति हेमचन्द्रः) इति षडन्यतरस्य भिन्नार्थवाचकस्य वा ॥ ८२ ॥

अनेकप्रकारका. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

जल्दवाज़ी. **उच्चावचं नैकभेदमुच्चण्डमविलम्बितम्।**

मर्मभेदक. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अवाधित. **अरुंतुदं (तु) मर्मस्पृगबाधं (तु) निरर्गलम् ॥ ८३॥**

१ "एकाकी हयमारुह्ये" ति सप्तशतीस्तवः॥

उच्चेति–उदक् चावाक् चेति उच्चावचम् " मयूरव्यंसकादयश्च " इति निपातनात् साधुः, एकोभेदोऽस्येत्येकभेदम्, न एकभेदम् " सुप्सुपा " इति समासे न एको भेदोऽत्रेति वा उत्तरपदशब्दस्य समासचरमावयवे रूढत्वान्मध्यमपदे नलोपाभावे नैकभेदं स्यादिति द्वे अनेकप्रकारस्य। उच्चण्डनम् भावे ' घञि ' उच्चण्डते पचादित्वादचि वा उच्चण्डम्, विलम्बनं, विलम्ब्यतेस्म वा विलम्बितम् न विलम्बितमिति नञ्समासे ' अविलम्बितम् ' स्वामिमते तु अवलम्बितमवलम्बनमपि स्यादिति द्वे उत्तालस्य " जल्दबाजी " इति ख्यातस्य। अरूंषि तुदति ' तुद व्यथने ' अस्मात् ' विध्वरुपोस्तुदः " इति खचि, "अरुर्द्विषदिति" मुमागमे च 'अरुंतुदम्' मर्म स्पृशति ' स्पृश उपतापे ' तौदादिकात् " स्पृशोऽनुदके " इति ' क्विनि ' कवर्गादेशे च मर्मस्पृक् स्यादिति द्वे मर्मपीडकस्य। न बाधा अस्येति अबाधम्, निष्क्रान्तमर्गलायाः "निरादयः क्रान्ताद्यर्थे पञ्चम्या " इति समासे ' निरर्गलम् ' स्यादिति द्वे बाधारहितस्य ॥ ८३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

उलटा. **प्रसव्यं प्रतिकूलं (स्याद) पसव्यमपष्टु (च)।**

बायाँ. पु.स.न. पु.स.न. पु.स.न.

दाहिना. **वामं (शरीरे) सव्यं (स्या) दपसव्यं (तु) (दक्षिणे) ॥ ८४ ॥**

प्रेति–प्रगतं सव्यादिति प्रसव्यम्, "प्रसव्यं वाच्यलिङ्गं स्यात्प्रतिकूलानुकूलयोः " (इति मेदिनी) प्रतीपं कूलादिति प्रतिकूलम्, अपगतं सव्यादिति अपसव्यम् "अपसव्यं त्रिलिङ्गन्तु दक्षिणप्रतिकूलयोः " (इति विश्वः) अपतिष्ठतीति विग्रहे "अपदुःसुषुस्थः " इति ' कौ ' आलोपे, सुषमादित्वात् षत्वे च 'अपष्टु' स्यात् " अपष्टुः, पुंसि काले च वामे स्यादन्यलिङ्गकः " (इति मेदिनी) इति चत्वारि विरुद्धार्थप्रकाशकस्य " उलटा " इति ख्यातस्य। शरीरे यद्वामं तत्सव्यं स्यात्। सूयते ' षू प्रेरणे ' अस्मात्तौदादिकात्कर्मणि " अचोयत् " इति यति अवादेशे च सव्यम् " सव्यं वामे च दक्षिणे " (इत्यजयः)। " सव्यं तु दक्षिणे। वामे च प्रतिकूले च " (इति विश्वः) इत्येकं वामस्य " बायाँ " इति ख्यातस्य। दक्षिणे दक्षिणाङ्गे तु ' अपसव्यम् ' स्यात्, अपक्रान्तं सव्यादित्यपसव्यमित्येकं दक्षिणस्य ' दाहिना ' इति ख्यातस्य ॥ ८४ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] **संकटं (ना तु) सम्बाधः कलिलं गहनं (समे)।**

[illegible] पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] **संकीर्णं संकुलाकीर्णं मुण्डितं परिवापितम् ॥ ८५ ॥**

---

* [illegible] " [illegible] " ([illegible])।

समिति—संबाधार्थात्संशब्दात्स्वार्थे "संप्रोदश्चेति" 'कटचि' संकटति 'कटे वर्षावरणयोः' अस्मात्पचाद्यचि वा संकटम्, संबाधन्तेऽत्र "बाधृ विलोडने" अस्माद् "हलश्च" इति 'घञि' संबाधः ना पुमान्स्यात् "संबाधः संकटे भगे" (इति विश्वः) इति द्वे संकीर्णस्य । कलते, कल्यते वा "कल शब्दसंख्यानयोः" भौवादिकात् "सलिकलि—" इति 'इलचि' कलिलम्; गाह्यते, "बहुलमन्यत्रापि" इति 'युचि' "पृषोदरादित्वाद्ध्रस्वे च गस्य गानस्य गतेर्वाहनमिति वा गहनम् "गहनं वनदुःखयोः । गह्वरे कलिले चापि" (इति विश्वहैमौ) उभे समे समानार्थे स्यातामिति द्वे दुष्प्रवेशस्य । संकीर्यते स्म कर्मणि 'क्ते' संकीर्णम्, "संकीर्णं निचितेऽपि स्यादशुद्धे त्वभिधेयवत्" (इति मेदिनी) संकोलति 'कुल संस्त्याने' अस्मादिगुपधेति 'के' संकुलम्, आकीर्यते स्म कर्मणि 'क्ते' आकीर्णं स्यादिति त्रीणि नानाजातीयसंमिलितस्य सर्वेकार्थानीत्येके वा । मुण्ड्यते स्म 'मुडि खण्डने' अस्माद्भौवादिकात् कर्मणि 'क्ते' मुण्डितम्, परिवाप्यते स्म "वपिः प्रकिरणे दृष्टश्छेदने चापि वर्तते" केशान्वपतीति सूत्रे "आदेच उपदेशेऽशिति" ६ । १ । ४५ भाष्यात् । मुण्डनार्थोऽत्र वपिस्तस्माण्णयन्तात्कर्मणि 'क्ते' परिवापितम्, स्यादिति द्वे मुण्डितस्य ॥ ८५ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

गुंथा हुआ. फैलाया. **ग्रथितं संदितं दृब्धं विसृतं विस्तृतं ततम् ।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

भूला हुआ. स्थापित. **अन्तर्गतं विस्मृतं (स्या) त्प्राप्तप्रणिहिते (समे) ॥ ८६ ॥**

ग्रेति—ग्रथ्यते स्म 'ग्रन्थ संदर्भे' अस्मात्क्रैयादिकात्कर्मणि 'क्ते' नलोपे च ग्रथितम् । ग्रन्थितमिति पाठान्तरम् तत्र 'ग्रथि कौटिल्ये' अस्माद्भौवादिकात्कर्मणि 'क्ते' ग्रन्थितम् 'गुम्फितम्' इति पाठे गुम्फ्यते स्म 'गुम्फ ग्रन्थे' अस्मात्तौदादिकाण्णयन्तात्कर्मणि 'क्ते' गुम्फितम्, णयन्ताभावे गुफितमपि, पीयूषव्याख्यातो गुन्थितमिति क्वचित्, स्वामिमते तु मव्यते स्म कर्मणि 'क्ते' मवितम्, अनेकार्थत्वाद् ग्रन्थने वर्तमाना 'म्मृदक्षोदे' क्रैयादिकाण्णयन्तात्कर्मणि 'क्ते' मार्दितमपि, संदीयते 'दो अवखण्डने' अस्माद्दैवादिकात्कर्मणि 'क्ते' "द्यतिस्यतीति" इत्वे च संदितम्, दृभ्यते स्म 'दृभी ग्रन्थे' कर्मणि 'क्ते' 'दृब्धम्' स्यादिति त्रीणि ग्रन्थितस्य । विसरति स्म कर्तरि 'क्ते' विसृतम्, विस्तीर्यते स्म कर्मणि 'क्ते' विस्तृतम्, तायते, तन्यते स्म वा कर्मणि 'क्ते' ततम् "ततं व्याप्ते विस्तृते च त्रिलिङ्गकम् । क्लीबं वीणादिवाद्ये स्यात्पुंलिङ्गस्तु सदागतौ" (इति मेदिनी) इति त्रीणि विस्तृतस्य । अन्तर्गच्छति स्म, गम्यते स्म वा कर्तरि, कर्मणि वा 'क्ते' अन्तर्गतम्, विस्मर्यते स्म

१ भगे योनौ यथा—करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते । उपसर्पन् ध्वजः पुंस· साधनान्तविराजिते ॥ (इत्यनेकार्थकैरवाकारकौमुदी) ॥

कर्मणि ' क्ते ' ' विस्मृतम् ' स्यादिति द्वे विस्मृतस्य । प्राप्यते स्म कर्मणि ' क्ते ' प्राप्तम् " प्राप्तं लब्धे समञ्जसे " (इति मेदिनी) गोवर्धनमते तु प्रोप्यतेस्म कर्मणि ' क्ते ' प्रोतमपि, प्रणिधीयते स्म कर्मणि ' क्ते ' " दधातेर्हिः " इति ह्यादेशे च प्रणिहितम् उभे समे समानार्थे स्यातामिति द्वे स्थापितस्य ॥ ८६ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

कंपा. **वेल्लितप्रेङ्खिताधूतचलिताकम्पिता धुते ।**

पु.स.न.पु.स.न.पु.स.न. पु.स.न. पु.स.न.पु.स.न.पु.स.न.

भेजा. **नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः (समाः) ॥ ८७ ॥**

वयिति—वेल्ल्यते स्म ' वेल्ल चलने ' अस्माद्भौवादिकाण्णयन्तात्कर्मणि ' क्ते ' वेल्लितः, " वेल्लितं गमने क्लीबं कुटिले विधुते त्रिपु " (इति मेदिनी) प्रेङ्ख्यते स्म कर्तरि, कर्मणि वा ' क्ते ' प्रेङ्खितः, आधूयते स्म ' धू विधूनने ' तौदादिकात ' धूञ् कम्पने ' क्रैयादिकाद्वा कर्मणि ' क्ते ' आधूतः, चल्यते स्म 'चल कम्पने' भौवादिकाण्णयन्तात्कर्मणि ' क्ते ' चलितः, आकम्प्यते स्म आकम्पितः, धूयते स्म, कर्मणि ' क्त ' धुतः " धुतम् । त्यक्ते विधूते " (इति हैमः) इति षट् ईषत्कम्पितस्य । नुद्यते स्म कर्मणि ' क्ते ' नुत्तः " नुदविद– " इति वा नत्वे नुन्नः, अस्यते स्म कर्मणि ' क्ते ' अस्तः " अस्तः क्षिप्ते पश्चिमाद्रौ " (इति हैमः) निष्ठीव्यते स्म कर्मणि ' क्ते ' " यस्ये " तीडभावे, च " च्छ्वोः– " इति ऊठि च निष्ठ्यूतः, आविध्यते स्म कर्मणि ' क्त ' आविद्ध. " आविद्धो वाच्यलिङ्गः स्यात्कुटिले च पराहते " (इति मेदिनी) क्षिप्यते स्म, क्षिप्तः, ईर्यते स्म ' ईर गतौ कम्पने च ' कर्मणि ' क्ते ' ईरितः एते समाः समानार्थाः स्युरिति सप्त प्रेरितस्य ॥ ८७ ॥

घिरा हुआ
चराया गया
फैलाया गया
कहा हुआ
गुणा किया

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

परिक्षिप्तं (तु) निवृतं मूषितं मुषिता (र्थकम्) ।

पु.स.न. पु.स.न. पु.स.न पु.स.न. पु.स.न. पु.स.न.

प्रवृद्धप्रसृते न्यस्तनिसृष्टे गुणिताहते ॥ ८८ ॥

परि–परितः क्षिप्यते स्म कर्मणि ' क्ते ' परिक्षिप्तम्, निव्रियते स्म ' वृञ् वरणे ' [illegible]कर्मणि ' क्ते ' निवृतं स्यादिति द्वे परिवारितस्य वेष्टितस्य । मूष्यते स्म ' मूष स्तेये ' भौवादिकात्कर्मणि ' क्ते ' मूषितम्, मुषितमेवार्थो यस्येति मुषितार्थकम् [illegible] स्म ' मुष स्तेये ' [illegible] ' क्ते ' मुषितम् " मुषितं [illegible] " ([illegible]) इति द्वे चोरितस्य । [illegible] स्म " [illegible] " कर्तरि ' क्ते ' प्रवृद्धम्, प्रसर[illegible] स्म [illegible] ' क्ते ' प्रसृतं स्यादिति द्वे प्रवृद्धस्य । न्यस्यते स्म कर्मणि ' क्ते ' न्यस्तम्, [illegible] स्म ' सृज [illegible] ' [illegible] ' क्ते ' निसृष्टं स्यादिति द्वे न्यस्तस्य । [illegible] ' क्ते ' गुणितम्, आहन्यते [illegible] ' हन [illegible] ' [illegible] ' क्ते ' आहतं स्यादिति द्वे गुणितस्य ॥ ८८ ॥

बढा हुआ छिपा धूलिलिप्त रसीला उवाया छीका में रक्खा

पु.स.न. पु.स.न. पु.स.न.पु.स.न. पु.स.न. पु.स.न.
निदिग्धोपचिते गूढगुप्ते गुण्डितरूषिते।
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
द्रुतावदीर्णे उद्गूर्णोद्यते काचितशिक्यिते ॥ ८९ ॥

नीति—निदिह्यतेस्म 'दिह उपचये' आदादिकात् कर्मणि 'क्ते' निदिग्धम्, उपचीयतेस्म 'चिञ् चयने' कर्मणि 'क्ते' उपचितम् "भवेदुपचितं दिग्धे समृद्धे वाच्यलिङ्गकम्" (इति मेदिनी) इति द्वे पुष्टिं प्रापितस्य। गुह्यतेस्म 'गुहू संवरणे' भौवादिकात्कर्मणि 'क्ते' गूढं "गूढं रहसि गुह्ये च न द्वयोः संवृते त्रिषु" (इति मेदिनी) गुप्यतेस्म 'गुपू रक्षणे' भौवादिकात्कर्मणि 'क्ते' गुप्तम् "गुप्तं गूढे त्राते" (इति हैमः) इति द्वे कृतगोपनस्य। गुण्ड्यते स्म 'गुडि वेष्टने' चौरादिकात्कर्मणि 'क्ते' गुण्डितम्, गुण्ठितमिति पाठे 'गुठि वेष्टने' चौरादिकात्कर्मणि 'क्ते' गुण्ठितमपि, रूष्यतेस्म रूषिर्वेष्टनार्थोऽपठितोऽपि भ्वादौ द्रष्टव्यो भ्वादेराकृतिगणत्वात् कर्मणि 'क्ते' रूषितं स्यादिति द्वे 'गुण्डालित' इति ख्यातस्य। द्रवतिस्म, द्रूयतेस्म वा कर्तरि, कर्मणि वा 'क्ते' द्रुतम् "द्रुतं शीघ्रविलीनयोः" (इति हैमः) अवदीर्यतेस्म 'दॄ विदारणे' क्रैयादिकात्कर्मणि 'क्ते' इदादेशे रपरत्वे, दीर्घे, णत्वे च अवदीर्णम्, स्यादिति द्वे प्रापितद्रवीभावस्य। उद्गूर्यतेस्म 'गुरी उद्यमने' दैवादिकात्कर्मणि 'क्ते' दीर्घे, णत्वे च उद्गूर्णम्, उद्यम्यतेस्म 'यम उपरमे' भौवादिकात्कर्मणि 'क्ते' उद्यतं स्यादिति द्वे उत्तालितस्य। काचे धृतम् "प्रातिपदिकाद्धात्वर्थे" इति 'णिचि' तदन्तात्कर्मणि 'क्ते' काचितम्, एवं शिक्ये धृतम् 'णिचि' तदन्तात्कर्मणि 'क्ते' 'शिक्यितम्' स्यादिति द्वे शिक्ये स्थापितस्य ॥ ८९ ॥

सूंघाहुआ चन्दनादि लेप कूपादि से निकालना नदी आदि से घिरा

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. १
घ्राणघ्राते दिग्धलिप्ते समुदक्तोद्धृते (समे)[1]।
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स न.
वेष्टितं(स्या)द्वलयितं संवीतं रुद्धमावृतम् ॥ ९० ॥

घ्रेति—घ्रायतेस्म, 'घ्रा गन्धोपादाने' भौवादिकात्कर्मणि 'क्ते' "नुदविदेति" वा निष्ठानत्वे, "अट्कुप्वाङिति" णत्वे च घ्राणः, "घ्राणं तु घ्रातघोणयोः" (इति हैमः) नत्वाभावे तु घ्रातं स्यादिति द्वे आघ्रातस्य। दिह्यतेस्म 'दिह उपचये' आदादिकात्कर्मणि 'क्ते' दिग्धम्, "दिग्धो विपाक्तबाणे स्यात्पुंसि लिप्तेऽन्यलिङ्गकः" (इति मेदिनी) लिप्यतेस्म 'लिप् उपदेहे' तौदादिकात्कर्मणि 'क्ते' 'लिप्तम्' स्यात् "लिप्तं भुक्तविलिप्तयोः" (इति हैमः) इति द्वे लिप्तस्य "लेप" इति ख्यातस्य। समुदच्यतेस्म "अञ्चु गतिपूजनयो." भौवादिकात्कर्मणि 'क्ते' समुदक्तम्, उद्ध्रियतेस्म 'हृञ् हरणे' 'धृञ् धारणे' वा अस्मात्कर्मणि 'क्ते' उद्धृतम् "उद्धृतं स्यान्निपूक्षिप्ते परिभुक्तोज्झितेऽपि च"

१ समे इति 'भवृद्धमसूते' इत्यारभ्य समुदक्तोद्धृते' इत्यन्तमन्वेतीति भानुः ॥

(इति मेदिनी) उभे 'समे' स्यातामिति द्वे कूपादेर्निष्काशितजलादेः । वेष्ट्यतेस्म 'वेष्ट वेष्टने' भौवादिकात्कर्मणि 'क्ते' वेष्टितम् "वेष्टितं रुद्धे लासके करणान्तरे" (इति मदिनी) वलयवत्कृतम् "तत्करोति" इति 'णिचि' तदन्तात्कर्मणि 'क्ते' वलयं जातमस्य 'तारकादित्वादितचि' वा वलयितम्, संवीयतेस्म 'व्येञ् संवरणे' अस्मात्कर्मणि 'क्ते' संवीतम्, रुध्यतेस्म कर्मणि 'क्ते' रुद्धम्, आव्रियतेस्म 'वृञ् वरणे' क्रैयादिकात्कर्मणि 'क्ते' आवृतं स्यादिति पञ्च नद्यादिवेष्टितस्य ॥ ९० ॥

पु.स.न पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

टेढ़े या टूटे. **रुग्णं भुग्ने (ऽथ) निशितक्ष्णुतशातानि तेजिते ।**

तीखे. पके. पु.स.न.पु.स.न.पु.स.न.पु.स.न. पु.स.न.

लज्जित. **(स्याद्वि) नाशोन्मुखं पक्वं ह्रीणह्रीतौ (तु) लज्जिते ॥ ९१ ॥**

रुगिति—भुग्ने आविद्धे रुग्णं स्यात् । रुज्यते स्म 'रुजो भङ्गे' तौदादिकात्कर्मणि 'क्ते' "ओदितश्च" इति निष्ठा नत्वे, कुत्वे णत्वे च रुग्णम्, एवं भुज्यते स्म 'भुजो कौटिल्ये' अस्मात् कर्मणि 'क्ते' नत्वे तस्यासिद्धत्वाच्चोः कुरिति कुत्वे च भुग्नं स्यादिति द्वे वक्रस्य । अथेति—तेजिते तीक्ष्णीकृते निशितक्ष्णुतशातानि स्युः । निशायतेस्म "शो तनूकरणे" दैवादिकात्कर्मणि 'क्ते' "शाच्छोरिति" वेत्वे च निशितम्, पक्षे निशातमपि, क्ष्णूयतेस्म 'क्ष्णु तेजने' आदादिकात्कर्मणि 'क्ते' क्ष्णुतम्, शायतेस्म कर्मणि 'क्ते' शातम्, तेज्यतेस्म 'तिज निशाने' चुरादिण्यन्तात्कर्मणि 'क्ते' तेजितं स्यादिति चत्वारि शाणादिना तीक्ष्णीकृतस्य । विनशनम् 'भावे घञि' विनाशः उद्गतं मुखमारम्भोऽस्य उन्मुखम् विनाशे उन्मुखम् विनाशोन्मुखम्, पच्यतेस्म 'डुपचष् पाके' भौवादिकात्कर्मणि 'क्ते' "पचोवः" इति निष्ठा वत्वे च 'पक्वम्' स्यात् "पक्वं परिणते नाशाभिमुखे" (इति हैमः) इति द्वे विनाशोन्मुखस्य । लज्जिते लज्जासंजाते ह्रीत ह्रीणौ स्याताम् । अह्रैषीत्—जिह्रेतिस्म वा 'ह्री लज्जायाम्' जौहोत्यादिकात्कर्तरि निष्ठ प्रत्यये, "नुदविदेति" वा नत्वे, णत्वे च ह्रीणः, नत्वाभावे तु ह्रीतः, लज्जाजातास्येति विग्रहे तारकादित्वादितचि लज्जितः स्यादिति त्रीणि लज्जितस्य ॥ ९१ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

वरण किये. **वृते (तु) वृत्तवावृत्तौ संयोजित उपाहितः ।**

मिलाये. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

मिलने योग्य. बहते हुए. **प्राप्यं गम्यं समासाद्यं स्यन्नं रीणं स्नुतं स्नुते ॥ ९२ ।**

वृत इति—वृते वरणीकृते वृत्तवावृत्तौ स्याताम् । व्रियतेस्म 'वृञ् वरणे' क्रैयादिकात्कर्मणि 'क्ते' वृतः, यत "[illegible] वृतः [illegible]" इति प्रयोगदर्शनात् । वृणोतेस्म 'वृङ् वरणे' [illegible]कर्मणि 'क्ते' वृतः "वृतं वृत्तौ हटे मृते । [illegible]" (इति हेमचन्द्रः) केचित् 'वावृतु वरणे' दैवा-

दिकं पठन्ति तन्मते वावृत्यतेस्म कर्मणि 'क्ते' वावृत्तः स्यादिति त्रीणि स्वयंवरादौ स्वीकृतवरादेः । संयोज्यतेस्म 'युजिर् योगे' रौधादिकाण्ण्यन्तात्कर्मणि 'क्ते' संयोजितः, उपाधीयतेस्म 'डुधाञ् धारणपोषणयोः' जौहोत्यादिकात्कर्मणि 'क्ते' "दधातेर्हिः" इति ह्यादेशे च उपाहितः "उपाहितां वक्षसि पीवरस्तने" (इति भारविः) "उपाहितो नलोत्पाते पुमानारोपिते त्रिषु" (इति मेदिनी) इति द्वे मेलितस्य । प्राप्यते "आप्ल व्याप्तौ" सौवादिकात् "ऋहलोरिति" ण्यति, प्राप्यम्, गम्यते 'गम्लृगतौ' भौवादिकात् "पोरदुपधात्" इति 'यति' गम्यम्, समासाद्यते 'षद्लृ विशरणादौ' भौवादिकात् कर्मणि 'ण्यति' समासाद्यं स्यादिति त्रीण्यापुंशक्यस्य । स्यन्दतेस्म, 'स्यन्दू प्रस्रवणे' भौवादिकात्कर्तरि, 'क्ते' " रदाभ्यामिति " निष्ठा नत्वे च स्यन्नम्, रीयतेस्म 'रीङ् प्रस्रवणे' दैवादिकात्कर्तरि, 'क्ते' "स्वादयओदितः" इति नत्वे च रीणम्, स्रवतिस्म स्रूयतेस्म वा 'स्रु गतौ' भौवादिकात्कर्तरि, कर्मणि वा 'क्ते' स्रुतम् , स्नौतिस्म' 'ष्णु प्रस्रवणे' आदादिकात्कर्तरि 'क्ते' स्नुतं स्यादिति चत्वारि प्रस्नुतस्य ॥ ९२ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.

जोड़े हुए **संगूढः(स्या)त्संकलितोऽवगीतः ख्यातगर्हणः ।**

निन्दित पु.स.न. पु.स.न. पु.स.न. पु.स.न.

नानाभाति **विविधः (स्या)द्बहुविधो नानारूपः पृथग्विधः ॥९३॥**

समिति—संगुह्यतेस्म 'गुहू संवरणे' भौवादिकात्कर्मणि 'क्ते' ढत्वे, धत्वे, ष्टुत्वे, ढलोपे, दीर्घे च संगूढः, संकल्यतेस्म 'कल संख्याने' भौवादिकात्कर्मणि 'क्ते' संकलितः स्यादिति द्वे अङ्कान्तरेणैकीकृतस्याङ्कादेः । अवगीयते निन्द्यतेस्म 'गै शब्दे' भौवादिकात्कर्मणि 'क्ते' "घुमास्थेति" ईदादेशे च अवगीतः, "अवगीतं तु निर्वादे दृष्टगर्हितयोरपि" (इति विश्वः) ख्याता गर्हणायस्येति ख्यातगर्हणःस्यादिति द्वे प्रसिद्धनिन्दस्य । विचित्राविधा यस्येति विविधः, बह्वोविधा यस्येति बहुविधः,नानारूपमस्येति नानारूपः, पृथग्विधायस्येति पृथग्विधःस्यादिति चत्वारि नानाप्रकारस्य ॥ ९३ ॥

धिक्कारे पु.स.न. पु.स.न. पु.स.न. पु.स.न.

पिसे हुए **अवरीणोधिकृत (श्चाप्य) वध्वस्तोऽवचूर्णितः ।**

सहाय किये पु.स.न. पु.स.न. पु.स.न. पु.स.न.

बाजते **अनायासकृतं फाण्टं स्वनितं ध्वनितं(समे) ॥ ९४ ॥**

अवेति—अवरीयतेस्म, 'रीङ् स्रवणे' दैवादिकात्कर्मणि'क्ते' स्वादीनामोदित्वान्निष्ठात्वे च अवरीणः, धिगकारि—धिक्क्रियतेस्म वा धिकृतः स्यादिति द्वे निन्दितमात्रस्य । प्रवध्वस्यतेस्म 'ध्वंसुगतौ' भौवादिकात्कर्मणि'क्ते' अवध्वस्तः"अवध्वस्तं परित्यक्ते निन्दिऽप्यवचूर्णिते" (इति विश्वः) । अपध्वस्यतेस्म विग्रहे तु कर्मणि 'क्ते' अपध्वस्तोऽपि,

१ केचित्तु वामहर्षं वृतु धातोर्णयवयवमिच्छन्ति । तनोवावृत्यमानासौ रामशालां न्यविक्षत (इति भट्टिः) ॥

अवचूर्ण्यतेस्म "सत्यापेति" णयन्तात्कर्मणि 'क्ते' 'चूर्णपेषे' चौरादिकात्कर्मणि 'क्ते' वा अवचूर्णितः स्यादिति द्वे क्षिप्तसुधादिचूर्णस्य । अनायासेन कृतं फाण्टं स्यात् अथवा आयसनमायासस्तस्माद्भिन्नोऽनायासस्तेन कृतम् अनायासकृतम्, फण्यतेस्म 'फण गतौ' भौवादिकात्कर्मणि 'क्ते' फाण्टम् "क्षुब्धस्वान्तध्वान्तेति साधुरिति द्वे अनायाससाध्यकषायविशेषस्य । स्वन्यतेस्म 'स्वन शब्दे' भौवादिकाद्भावेकर्मणि वा 'क्ते' स्वनितम् ध्वन्यतेस्म 'ध्वन शब्दे' भौवादिकाद्भावे कर्मणि वा 'क्ते' ध्वनितम् उभे समे समानार्थे स्यातामिति द्वे कृतशब्दस्य ॥ ६४ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
बँधे हुए. **बद्धे संदानितं मूतमुद्दितं संदितं सितम् ।**
अच्छे पके. पु.स.न पु.स.न. १ पु.स.न.
पके घी आदि. **निष्पक्वं क्वथितं(पाके क्षीराज्यपयसां) श्रृतम् ॥ ६५ ॥**

बेति—बध्यतेस्म 'बन्ध बन्धने' क्रैयादिकात्कर्मणि 'क्ते' बद्धम्, संदान्यतेस्म 'दान खण्डने' भौवादिकात्कर्मणि 'क्ते' संदानितम्. मूयतेस्म 'मूङ् बन्धने' भौवादिकात्कर्मणि 'क्ते' मूतम् मुकुटमते तु 'मुर्व बन्धने' भौवादिकात्कर्मणि 'क्ते' "राल्लोपः" इतिवलोपे "हलिचेति" दीर्घे, निष्ठा नत्वे च मूर्णमपि, उद्दीयते "दो अवखण्डने" दैवादिकात्कर्मणि 'क्ते' "द्यतिस्यतीति" इत्वे च उद्दितम् एवं संदीयते कर्मणि 'क्ते' सन्दितम्, सीयतेस्म 'षिञ् बन्धने' सौवादिकात्कर्मणि 'क्ते' सितम् स्यादिति षड्बद्धस्य । निश्चयेन पक्वम्, निष्पक्वम्, क्वथ्यतेस्म 'क्वथे निष्पाके' भौवादिकात्कर्मणि 'क्ते' क्वथितं स्यादिति द्वे निष्पक्वस्य । क्षीरं दुग्धम्, आज्यं घृतम् पयो जलम् तेषां पाके श्रृतं स्यात् । श्रायतेस्म 'श्रा पाके' आदादिकात्कर्मणि 'क्ते' श्रृतम् 'श्रृतं पाके' इति साधु इत्येकं दुग्धाज्यादिपाकस्य ॥ ६५ ॥

पु.स.न. पु.स.न.
बुझे. **निर्वाणो(मुनिवह्न्यादौ) निर्वात(स्तु गतानिले) ।**
पवनरहित. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
पके. हगे. मूते. **पक्वं परिणते गूनं हन्ने मीढं(तु) मूत्रिते ॥ ६६ ॥**

निरिति—मुनिवह्न्यादौ निर्वाणः स्यात् । निर्वातिस्म 'वा गतिगन्धनयोः' आदादिकात् "गत्यर्थेति" कर्तरि 'क्ते' निर्वाणः "निर्वाणोऽवाते" इति साधुः । यथा निर्वाणो मुनिः निर्मुक्तः, निर्वाणो वह्निः शान्त इत्यर्थः । आदिना निर्वाणो हस्ती निमग्न इत्यर्थः । "निर्वाणमस्तंगमने निर्वृतौ गजमज्जने । संगमेऽप्यपवर्गे च" (इति मेदिनी) इत्येकं निर्मुक्तस्य । गतानिले गतश्चासावनिलश्च तस्मिन् निर्वातं स्यात् । निर्वाति स्म निर्वातः यथा (निर्वातो वातः) इत्येकं गतानिलस्य । परिणतं पक्वं स्यात् । [illegible] पक्वम्, पचितस्म 'पच पाके' भौवादिकात् कर्तरि 'क्ते'

* "निर्वाणो मुनिवह्न्यादौ" ([illegible]) "[illegible]" ([illegible]) ॥

परिणतं स्यादिति द्वे परिणामं प्राप्तस्य । हन्ने गूनं स्यात् । गूयते स्म 'गु पुरीषोत्सर्गे' तौदादिकात्कर्मणि 'क्ते' "दुग्वो दीर्घश्च" इति निष्ठानत्वे दीर्घे च गूनम्, हद्यते स्म 'हद पुरीषोत्सर्गे' भौवादिकात्कर्मणि 'क्ते' हन्नं स्यादिति द्वे गुदनिष्काशितपुरीषस्य । मूत्रिते तु मीढं स्यात् । मिह्यते स्म 'मिह सेचने' अस्माद्भौवादिकात्कर्मणि 'क्ते' ढत्वे, धत्वे, ष्टुत्वे, ढलोपे, दीर्घे च मीढम्, मूत्र्यते स्म 'मूत्र प्रस्रावे' चौरादिकात्कर्मणि 'क्ते' इडागमे च मूत्रितं स्यादिति द्वे उपस्थनिष्काशितमूत्रस्य ॥ ९६ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

पोढे किये क्षमावान् वान्त किये इन्द्रियजित् शान्त किये. मागे

पुष्टे (तु) पुषितं सोढे क्षान्तमुद्वान्तमुद्गते ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

दान्त(स्तु) दमिते शान्तः शमिते प्रार्थितेऽर्दितः ॥९७॥

पुष्यति—पुष्टे तु पुषितं स्यात् । पुष्यते स्म 'पुष पुष्टौ' दैवादिकात्कर्मणि 'क्ते' इडभावे च 'पुष्टम्' स्यात् एवं भौवादिकात्कर्मणि 'क्ते' इडागमे च 'पुषितम्' स्यादिति द्वे कृतपोषणस्य । सोढे क्षान्तं स्यात् । सहते, सह्यते स्म वा 'षह मर्षणे' भौवादिकात्कर्तरि, कर्मणि वा 'क्ते' "सहिवहोरोदवर्णस्य" इत्यवर्णस्योदादेशे च सोढम्, क्षमते, क्षम्यते स्म वा 'क्षमूष् सहने' भौवादिकात्कर्तरि, कर्मणि वा 'क्ते' "अनुनासिकस्येति" दीर्घे च 'क्षान्तम्' स्यादिति द्वे क्षान्तस्य । उद्गते उद्वान्तं स्यात् । उद्वम्यते स्म 'टुवमु उद्गिरणे' भौवादिकात्कर्मणि 'क्ते' दीर्घे च उद्वान्तम्, मुकुटमते तु उद्धायते स्म 'ओहाङ् गतौ' जौहोत्यादिकात्कर्तरि, कर्मणि वा 'क्ते' निष्ठानत्वे च उद्धानम् उद्वानमिति वा क्वचित्पाठस्तत्र 'ओवै शोषणे' भौवादिकात्कर्मणि 'क्ते' निष्ठानत्वे च उद्वानम्, उद्गम्यते स्म 'गम्लृ गतौ' भौवादिकात्कर्मणि 'क्ते' अनुनासिकलोपे च 'उद्गतम्' स्यादिति द्वे वमितवास्यक्तस्यान्नादेः । दमिते दान्तः स्यात् । दम्यते स्म 'दमु उपशमे' दैवादिकाण्णिजन्तात्कर्मणि 'क्ते' दान्तः "वादान्तेति" साधुः । पक्षे इडागमे, णिलोपे च दमितः "दान्तस्तु दमितेऽपि स्यात्तपःक्लेशसहे त्रिपु" (इति मेदिनी) इति द्वे कृतदमनस्य वृषभादेः । शमिते शान्तः स्यात् । शम्यते स्म 'शमु उपशमे' दैवादिकाण्णिजन्तात्कर्मणि 'क्ते' शान्तः "शान्तोऽतिमुक्तरसयोः पुंसि त्रिपु शमान्विते । अव्ययं धारणे शान्तम्" (इति मेदिनी) पक्षे शमितः णयन्ताभावे तु शान्तो रोगः निवृत्त इत्यर्थः स्यादिति द्वे शान्तस्य । प्रार्थिते अर्दितः स्यात् । प्रार्थ्यते स्म 'अर्थ उपयाच्ञायाम्' चौरादिकात्कर्मणि 'क्ते' इडागमे च प्रार्थितः, अर्द्यते स्म 'अर्द गतौ याचने च' भौवादिकात्कर्मणि 'क्ते' इडागमे च अर्दितः "अर्दितं याचितेऽपि स्याद्वातव्याधौ च हिंसिते" (इति मेदिनी) इति द्वे प्रार्थितस्य ॥ ९७ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

जानेहुए ढँके पूजित पूर्ण क्लेशित. समाप्त

ज्ञप्त(स्तु) ज्ञपिते छन्नश्छादिते पूजितेऽञ्चितः ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

पूर्ण(स्तु) पूरिते क्लिष्टः क्लिशितेऽवसिते सितः ॥ ९८ ॥

१ "सितस्त्ववसिते बद्धे वर्णे सिता तु शर्करा" (इति हेम.)।

ज्ञप्तेति—ज्ञप्यते स्म 'ज्ञा अवबोधने' मारणादौ वर्तमानान्मित्संज्ञकाण्ण्यन्तात्कर्मणि 'क्ते' "वादान्तेति" निपातिते च ज्ञप्तः, पक्षे इडागमे, णिलोपे च ज्ञपितः स्यादिति द्वे ज्ञपितस्य । छादिते अपवारिते छन्नः स्यात् । छाद्यते स्म 'छद अपवारणे' चौरादिकाण्ण्यन्तात्कर्मणि 'क्ते' "वादान्तेति" निपातिते च छन्नः, "छन्नं रहश्छादितयोः" (इति हैमः) पक्षे इडागमे, णिलोपे च छादितः स्यादिति द्वे छादितस्य । पूजितेऽञ्चितः स्यात् । पूज्यते स्म 'पूज पूजायाम्' चौरादिकाण्ण्यन्तात्कर्मणि 'क्ते' पूजितः यथा "नरदेवेन पूजितः" अञ्च्यते स्म 'अञ्चु पूजायाम्' भौवादिकात्कर्मणि 'क्ते' "अञ्चेः पूजायाम्" इतीडागमे, "नाञ्चेः पूजायाम्" इति नलोपाभावे च अञ्चितः, "अर्चितः" इति पाठे तु 'अर्च पूजायाम्' भौवादिकात्कर्मणि 'क्ते' अर्चितोऽपि स्यादिति द्वे पूजितस्य । पूरिते पूर्णः स्यात् । पूर्यते स्म 'पूरी आप्यायने' दैवादिकाण्ण्यन्तात्कर्मणि 'क्ते' "वादान्तेति" निपातिते च पूर्णः "पूर्णः कृत्स्ने च पूरिते" (इति हैमः) पक्षे इडागमे, णिलोपे च पूरितः स्यादिति द्वे पूर्णस्य । क्लिशिते क्लिष्टः स्यात् । क्लिश्यते स्म 'क्लिशू विबाधने' क्रैयादिकात्कर्मणि 'क्ते' "क्लिशः क्त्वानिष्ठयोः" इति वेट्कत्वादिडभावे "व्रश्चेति" षत्वे, ष्टुत्वे च क्लिष्टः, इडागमे तु क्लिशितः स्यादिति द्वे प्राप्तक्लेशस्य । अवसिते सितः स्यात् । अवस्यति स्म अवसीयते स्म वा 'षोऽन्तकर्मणि' दैवादिकात्कर्तरि कर्मणि वा 'क्ते' आत्त्वे "द्यतिस्यतीति" इत्वे च अवसितः एवं केवलादपि कर्तरि, कर्मणि वा 'क्ते' सितः स्यादिति द्वे समाप्तस्य ॥ ९८ ॥

जले हुए, सूक्ष्मकिये, छेदे, विचारे

पु.स.न. पु.स.न.पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
प्रुष्टप्लुष्टोषिता (दग्धे) तष्टत्वष्टौ (तनूकृते) ।
पु.स.न. पु.स.न. पु.स.न. पु.स.न.पु.स.न. पु.स.न.
वेधितच्छिद्रितौ (विद्धे) विन्नवित्तौ (विचारिते) ॥९९॥

दग्धेति—दग्धे भस्मीकृते प्रुष्टप्लुष्टोषिताः स्युः । प्रुष्यते स्म 'प्रुष दाहे' भौवादिकात्कर्मणि 'क्ते' "यस्य विभाषेति" इडभावे च प्रुष्टः, एवं 'प्लुष दाहे' भौवादिकात्कर्मणि 'क्ते' इडभावे च प्लुष्टः, उष्यते स्म 'उष दाहे' भौवादिकात्कर्मणि 'क्ते' इडागमे च उषितः "उषितं प्लुषितं प्लुष्टं" (इति हैमः) दह्यते स्म 'दह भस्मीकरणे' भौवादिकात्कर्मणि 'क्ते' घत्वे, धत्वे, जश्त्वे च दग्धः स्यादिति चत्वारि भस्मीकृतस्य । तनूकृते तष्टत्वष्टौ स्याताम् । तक्ष्यते स्म 'तक्षू तनूकरणे' भौवादिकात्कर्मणि 'क्ते' इडभावे, "स्कोरिति" कलोपे, ष्टुत्वे च तष्टः, एवं त्वक्ष्यते स्म 'त्वक्षू तनूकरणे' कर्मणि 'क्ते' त्वष्टः, [illegible] भौवादिकात्कर्मणि 'क्ते' [illegible]

[illegible]

च तनूकृतः स्यादिति त्रीणि तष्टस्य । यथा तष्टं काष्ठं शस्त्रेणाल्पीकृतमित्यर्थः । विद्धे वेधितच्छिद्रितौ स्याताम् । वेध्यते स्म 'विध विधाने' तौदादिकाण्ण्यन्तात्कर्मणि 'क्ते' वेधितः, छिद्र्यते स्म 'छिद्र वेधे' अदन्तचौरादिकात्कर्मणि 'क्ते' छिद्रितः, विध्यते स्म 'व्यध ताडने' दैवादिकात्कर्मणि 'क्ते' "ग्रहिज्येति" संप्रसारणे च विद्धःस्यात् "विद्धं स्याद्वेधिते क्षिप्ते सदृशे बाधिते त्रिपु" (इति विश्वः) इति त्रीणि वेधितस्य । विचारिते विन्नवित्तौ स्याताम् । विद्यते स्म 'विद विचारणे' रौधादिकात्कर्मणि 'क्ते' "नुदविदेति" वा नत्वे विन्नः "विन्नं विचारिते लब्धे" (इति विश्वः) नत्वाभावे वित्तः "वित्तं क्लीबे धने वाच्यलिङ्गं ख्याते विचारिते" (इति मेदिनी) विचार्यते स्म 'चर गतौ' भौवादिकाण्ण्यन्तात्कर्मणि 'क्ते' इडागमे, णिलोपे च विचारितः स्यादिति त्रीणि प्राप्तस्य विचारितस्य वा ॥ ९९ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
निस्तेज पि· **(निष्प्रभे) विगतारोकौ (विलीने) विद्रुतद्रुतौ ।**
छला सिद्ध पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
हुआ फाडागया **(सिद्धे) निर्वृत्तनिष्पन्नौ (दारिते) भिन्नभेदितौ ॥१००॥**

नीति—निष्प्रभे निस्तेजसि विगतारोकौ स्याताम् । निष्क्रान्ता प्रभाऽस्मादिति निष्प्रभः, विगच्छति स्म 'गम्लृ गतौ' भौवादिकाद् "गत्यर्थेति" कर्तरि 'क्ते' अनुनासिकलोपे च विगतः, "विगतौ वीतनिष्प्रभौ" (इति रुद्रः) रोचनम् 'रुच दीप्तौ' भौवादिकाद्भावे 'घञि' रोकः, न रोकोऽस्येत्यरोकः स्यादिति त्रीणि निष्प्रभस्य । विलीने विद्रुतद्रुतौ स्याताम् । विलीयते स्म 'लीङ् श्लेषणे' दैवादिकात्कर्तरि 'क्ते' स्वादीनामोदित्त्वान्निष्ठानत्वे च विलीनः, विद्रवति स्म 'द्रु गतौ' भौवादिकात्कर्तरि 'क्ते' विद्रुतः, एवं केवलादपि कर्तरि 'क्ते' द्रुतः स्यादिति त्रीणि स्वतः प्राप्तद्रवीभावस्य । सिद्धे निर्वृत्तनिष्पन्नौ स्याताम् । सिध्यति स्म 'षिधु संराद्धौ' दैवादिकाद् "गत्यर्थेति" कर्तरि 'क्ते' सिद्धः "सिद्धो व्यासादिके देवयोनौ निष्पन्नमुक्तयोः । नित्ये प्रसिद्धे" (इति हैमः) निर्वर्तते स्म 'वृतु वर्तने' कर्तरि 'क्ते' इडभावे च निर्वृत्तः, निष्पद्यते स्म 'पद गतौ' दैवादिकात्कर्तरि 'क्ते' निष्ठानत्वे च निष्पन्नः स्यादिति त्रीणि सिद्धावस्थां प्राप्तस्य । दारिते भिन्नभेदितौ स्याताम् । दार्यते स्म 'दॄ विदारणे' क्र्यादिकाण्ण्यन्तात्कर्मणि 'क्ते' इडागमे, णिलोपे च दारितः, अभेदीति 'भिदिर् विदारणे' रौधादिकात्कर्मणि 'क्ते' "रदाभ्यामिति" निष्ठानत्वे निष्ठापेक्षया पूर्वस्य दस्यापि नत्वे च भिन्नः, एवं चौरादिकाण्ण्यन्तात्कर्मणि 'क्ते' इडागमे, णिलोपे च भेदितः स्यादिति त्रीणि विदारितस्य ॥ १०० ॥

---

१ "द्रुत शीघ्रविलीनयोः" (इति हैमः) ॥

पु.स.न. पु.स.न. पु.स.न.
बुने वस्त्रआदि **ऊतं स्यूतमुतं (चेति त्रितयं तन्तुसन्तते)।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
नमस्कार किये **स्यादर्हितनमस्यितनमसितमपचायितार्चितापचितम्**

वेति—तन्तुसन्तते ऊतं, स्यूतम्, उतं चेति त्रितयं स्यादिति। ऊय्यते स्म, ' ऊयी तन्तुसन्ताने ' भौवादिकात्कर्मणि 'क्ते' "लोपो व्योर्वलीति" यलोपे च ऊतम्, सीव्यते स्म । ' षिवु तन्तुसन्ताने ' दैवादिकात्कर्मणि 'क्ते' " छ्वो–" रित्यूठि, यणादेशे च स्यूतम्, ऊयते स्म ' वेञ् तन्तुसन्ताने' भौवादिकात्कर्मणि 'क्ते' "ग्रहिज्येति " संप्रसारणे च उतम्, सन्तन्यते स्म कर्मणि ' क्ते ' " अनुदात्तोपदेशेति " नलोपे च सन्ततम् तन्तुभिः सन्ततम् " कर्तृकरणे कृता बहुलमिति " समासे तन्तुसन्ततम् स्यादिति चत्वारि स्यूतस्य । अर्ह्यते स्म ' अर्ह पूजायाम् ' भौवादिकात्कर्मणि 'क्ते' इडागमे च अर्हितम्, नमःकृतम् " नमोवरीति " क्यचि, तदन्तात्कर्मणि 'क्ते' "क्यस्य विभाषेति" यलोपाभावे, इडागमे च नमस्यितम्, यलोपपक्षे तु नमसितम्, अपचाय्यते स्म ' चायृ पूजानिशामनयोः ' भौवादिकात्कर्मणि 'क्ते' इडागमे च अपचायितम्, अर्च्यते स्म ' अर्च पूजायाम् ' भौवादिकात्कर्मणि ' क्ते ' अर्चितम्, अपचीयते स्म ' चिञ् चयने ' सौवादिकात्कर्मणि 'क्ते' " अपचितश्चेति " चायतेर्निपातिते वा अपचितम् स्यादिति षड् नमस्कृतस्य ॥ १०१ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न.
पूजा किये **वरिवसितं वरिवस्यितमुपासितं चोपचरितं (च) ।**
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
तपे या तपाये **सन्तापितसन्तप्तौ धूपितधूपायितौ (च) दून(श्च) १०२ ॥**

वेति—वरिवसितं वरिवः कृते वरिवस्यितमुपासितमुपचरितं च स्यात्, वरिवः कृतम् " नमो वरिवः " इति क्यचि, तदन्तात्कर्मणि ' क्ते ' " क्यस्य विभाषेति " यलोपे च वरिवसितम्, यलोपाभावे तु वरिवस्यितम्, उपास्यते स्म ' आस उपवेशने ' कर्मणि ' क्ते ' उपासितम्, उपचर्यते स्म ' चर गतौ ' भौवादिकात्कर्मणि ' क्ते ' उपचरितं स्यादिति चत्वारि पूजितस्य । संतापयति स्म, संताप्यते स्म वा ' तप दाहे ' भौवादिकात्कर्तरि, कर्मणि वा 'क्ते' संतापितः, संतपति, संतप्यते स्म वा ' तप संतापे ' भौवादिकात्कर्तरि, कर्मणि वा ' क्ते ' संतप्तः, धूपायति, धूप्यते स्म वा ' धूप संतापे ' भौवादिकात्कर्तरि कर्मणि वा ' क्ते ' धूपितः, तथा " आयादयः—" इति वैकल्पिकत्वात् धूपाय्यते स्म धूपायितः, दूयति स्म, दूयते स्म वा ' दुङ् उपतापे ' भौवादिकात्कर्तरि, कर्मणि वा ' क्ते ' " दुग्वोर्दीर्घश्च " इति निष्ठानत्वे च दूनः स्यादिति। पञ्च धूपितस्य ॥ १०२ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
हर्षित (हृष्टे) मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ।
पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
कटे हुए छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ॥१०३॥

हृष्टेति—हृष्टे मत्तः, तृप्तः, प्रह्लन्नः, प्रमुदितः, प्रीतश्च स्यात्। हर्षति स्म, 'हृषु अलीके' भौवादिकात् हृष्यति स्म 'हृष तुष्टौ' दैवादिकाद्वा कर्तरि 'क्ते' "हृषेर्लोमसु" इति विकल्पेट्कत्वाद् "यस्य विभाषेति" इडभावे च हृष्टः, "हृष्टो रोमाञ्चितेऽपि च । जातहर्षे प्रतिहते विस्मितेऽप्यभिधेयवत्"(इति मेदिनी) माद्यति स्म 'मदी हर्षे' दैवादिकात्कर्तरि 'क्ते' "नध्याख्येति" नत्वाभावे च मत्तः, तृप्यति स्म 'तृप प्रीणने' दैवादिकात्कर्तरि 'क्ते' तृप्तः, प्रह्लादते स्म 'ह्लादी सुखे च' भौवादिकात्कर्तरि 'क्ते' "रदाभ्यामिति" निष्ठानत्वे, "ह्लादो निष्ठायामिति" ह्रस्वे च प्रह्लन्नः, प्रमोदते स्म 'मुद हर्षे' भौवादिकात्कर्तरि 'क्ते' प्रमुदितः, प्रीयते स्म 'प्रीङ् प्रीणने' दैवादिकात्कर्तरि 'क्ते' प्रीतः स्यादिति षट् हर्षितस्य । छिद्यते स्म 'छिदिर् द्वैधीकरणे' रौधादिकात्कर्मणि 'क्ते' निष्ठानत्वे च छिन्नम्, छायते स्म 'छो छेदने' दैवादिकात्कर्मणि 'क्ते' छातम्, लूयते स्म 'लूञ् छेदने' क्रैयादिकात्कर्मणि 'क्ते' "ल्वादिभ्य इति" नत्वे च लूनम्, कृत्यते स्म 'कृती छेदने' तौदादिकात्कर्मणि 'क्ते' कृत्तम् दायते स्म 'दाप् लवने' आदादिकात्कर्मणि 'क्ते' दातम्, दीयते स्म 'दो अवखण्डने' दैवादिकात्कर्मणि 'क्ते' "द्यतिस्यतीति" इत्वे च दितम्, अच्छायीति कर्मणि 'क्ते' "शाच्छोरन्यतरस्याम्" इतीत्वे च छितम्, वृश्च्यते स्म 'ओव्रश्चू छेदने' तौदादिकात्कर्मणि 'क्ते' "ग्रहिज्येति" संप्रसारणे, "ओदितश्च" इति निष्ठानत्वे नत्वस्यासिद्धत्वाद् "व्रश्चेति" षत्वे प्राप्ते "निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः" इति सिद्धत्वात्षत्वाभावे "स्कोरिति" सलोपे, "चोः कुरिति" कुत्वे, "अट्कुप्वाङिति" णत्वे च 'वृक्णम्' स्यादित्यष्टौ छिन्नस्य ॥ १०३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.
चुये स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ।
पु.स.न.पु.स.न.पु.स.न. पु.स.न. पु.स.न. – पु.स.न.
मिले लब्धं प्राप्तं विन्नं भावितमासादितं (च) भूतं (च) ॥१०४॥

स्रेति—स्रंसते स्म, स्रस्यते स्म वा 'स्रंसु ध्वंसु भ्रंशु अवस्रंसने' भौवादिकात्कर्तरि, कर्मणि वा 'क्ते' इडभावे च स्रस्तम्, ध्वंसते, ध्वस्यते स्म वा कर्तरि, कर्मणि वा 'क्ते' ध्वस्तम्, एवं भ्रंशते, भ्रश्यते स्म वा कर्तरि, कर्मणि वा 'क्ते' इडभावे, नलोपे, "व्रश्चेति" षत्वे, ष्टुत्वे च भ्रष्टम्, स्कन्दति, स्कद्यते स्म वा 'स्कन्दिर् गत्यादौ' भौवादिकात्कर्तरि कर्मणि वा 'क्ते' नलोपे, "रदाभ्यामिति" निष्ठानत्वे च स्कन्नम्, पद्यते स्म

१ "छिन्न कृत्ते निलिङ्कायां स्यादगुडूच्यामपि योषिति" (इति मेदिनी) ॥

'पद गतौ' दैवादिकात्कर्तरि, कर्मणि वा 'क्ते' नत्वे च पन्नम्, च्यवते, च्यूयते स्म वा 'च्युङ् गतौ' भौवादिकात्कर्तरि, कर्मणि वा 'क्ते' च्युतम्, गल्यते स्म 'गल स्रवणे' चौरादिकात्कर्तरि, कर्मणि वा 'क्ते' इडागमे च 'गलितम्' स्यादिति सप्त च्युतस्य। लभ्यते स्म 'डुलभष् प्राप्तौ' भौवादिकात्कर्मणि 'क्ते' धत्वे बत्वे च लब्धम्, प्राप्यते स्म 'आप्लृ व्याप्तौ' सौवादिकात्कर्मणि 'क्ते' प्राप्तम्, विद्यते स्म 'विद्लृ लाभे' तौदादिकात्कर्मणि 'क्ते' निष्ठानत्वे च विन्नम्, भाव्यते स्म 'भू प्राप्तौ' चौरादिकाण्णयन्तात्कर्मणि 'क्ते' भावितम्, आसाद्यते स्म 'षद्लृ विशरणादौ' तौदादिकाण्णयन्तात्कर्मणि 'क्ते' इडागमे, णिलोपे च आसादितम्, भूयते स्म, चुरादीनां णिज्वैकल्पिकत्वाण्णिचोऽभावपक्षे कर्मणि 'क्ते' 'भूतम्' स्यादिति षट् प्राप्तस्य ॥ १०४ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

द्वे **अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम्।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

गीले **आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं(च) १०५॥**

अन्वयिति—अन्वेष्यते स्म 'एष गतौ' भौवादिकात् 'इष गतौ' दैवादिकाण्णयन्ताद्वा कर्मणि 'क्ते' अन्वेषितम्, गवेष्यते स्म 'गवेष मार्गणे' चौरादिकात्कर्मणि 'क्ते' इडागमे च गवेषितम्, अन्विष्यते स्म 'इषु इच्छायाम्' तौदादिकात्कर्मणि 'क्ते' "यस्य विभाषेति" इडभावे च अन्विष्टम्, मार्ग्यते स्म 'मार्ग अन्वेषणे' चौरादिकात्कर्मणि 'क्ते' मार्गितम्, मृग्यते स्म 'मृग अन्वेषणे' चौरादिकात्कर्मणि 'क्ते' मृगितं स्यादिति पञ्च अन्वेषितस्य। अर्द्यते स्म 'अर्द गतौ याचने च' भौवादिकात्कर्मणि "अर्तेर्दीर्घश्च" इति रकि, दीर्घे च आर्द्रम् "आर्द्रा नक्षत्रभेदे स्यात्स्त्रियां क्लिन्नेऽभिनेयवत्" (इति मेदिनी) आर्द्रेण सह वर्तमानं सार्द्रम्, क्लिद्यति स्म 'क्लिदू आर्द्रीभावे' दैवादिकादकर्मकत्वात्कर्तरि 'क्ते' "रदाभ्यामिति" निष्ठानत्वे च क्लिन्नम्, तिम्यति स्म, 'तिम ष्टिम आर्द्रीभावे' दैवादिकाद् "गत्यर्थाकर्मकेति" कर्तरि 'क्ते' तिमितम्, एवं स्तिम्यति स्म अकर्मकत्वात्कर्तरि 'क्ते' स्तिमितम् "स्तिमितस्त्वचले क्लिन्ने" (इति रुद्रः) समुनत्ति स्म 'उन्दी क्लेदने' रौधादिकादकर्मकत्वात्कर्तरि 'क्ते' "नुद विदेति" वा निष्ठानत्वे च समुन्नम्, नत्वाभावे तु उनत्ति स्म कर्तरि 'क्ते' "श्वीदितं निष्ठायाम्" इतीडभावे च 'उत्तम्' स्यादिति सप्त आर्द्रस्य ॥ १०५ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

रक्षिते **त्राणं त्रातं रक्षितमवितं गोपायितं गुप्तम्।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अवज्ञाते **अवगणितमवमतावज्ञाते अवमानितं(च)परिभूते १०६**

१ [illegible] (इति मार्कण्डेयः) ॥-
२ [illegible]

त्रेति—त्रायते स्म, अत्रायीति वा 'त्रैङ् पालने' भौवादिकात्कर्मणि 'क्ते' "नुदविदेति" वा नत्वे च त्राणम् "त्राणं त्राते रक्षणे च त्रायमाणौषधावपि" (इति हैमः) नत्वाभावे तु त्रातम् रक्ष्यते स्म 'रक्ष पालने' भौवादिकात्कर्मणि 'क्ते' इडागमे च रक्षितम्, अव्यते स्म 'अव रक्षणादौ' भौवादिकात्कर्मणि 'क्ते' इडागमे च अवितम्, गोपाय्यते स्म 'गुपू रक्षणे' भौवादिकाद् "आयादय" इति आयान्तात्कर्मणि 'क्ते' गोपायितम्, आयाभावे तु गुप्यते स्म कर्मणि 'क्ते' गुप्तं स्यात् "गुप्तं गूढे त्राते" (इति हैमः) इति षट् रक्षितस्य। अवगण्यते स्म 'गण संख्याने' चौरादिकात्कर्मणि 'क्ते' अवगणितम्, अवमन्यते स्म 'मन ज्ञाने' दैवादिकात्कर्मणि 'क्ते' "अनुदात्तोपदेशेति" नलोपे च अवमतम्, अवज्ञायते स्म 'ज्ञा अवबोधने' क्रैयादिकात्कर्मणि 'क्ते' अवज्ञातम्, अवमान्यते स्म 'मान पूजायाम्' भौवादिकात्कर्मणि 'क्ते' अवमानितम्, परिभूयते तिरस्क्रियते स्म 'भू सत्तायाम्' कर्मणि 'क्ते' परिभूतं स्यादिति पञ्चावमानितस्य ॥ १०६ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

त्यागेहुए **त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टम्।**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

कहेहुए **उक्तंभाषितमुदितंजल्पितमाख्यातमभिहितंलपितम्॥**

त्येति—त्यज्यते स्म 'त्यज हानौ' भौवादिकात्कर्मणि 'क्ते' इडभावे, "चोः कुरिति" कुत्वे, "खरि चेति" चर्त्वे च त्यक्तम्, हीयते स्म 'ओहाक् त्यागे' जौहोत्यादिकात्कर्मणि 'क्ते' "घुमास्थेति" ईत्वे, निष्ठानत्वे च हीनम्, विधूयते स्म 'धुञ् कम्पने' सौवादिकात्कर्मणि 'क्ते' विधुतम्, समुज्झ्यते स्म 'उज्झ उत्सर्गे' तौदादिकात्कर्मणि 'क्ते' इडागमे च समुज्झितम्, धूयते स्म, 'धू विधूनने' तौदादिकात्कर्मणि 'क्ते' धूतम्, "धूतौ कम्पितभर्त्सितौ" (इति हेमचन्द्रः) उत्सृज्यते स्म उत्पूर्वकात् 'सृज विसर्गे' अस्मात्तौदादिकात्कर्मणि 'क्ते' "व्रश्चेति" षत्वे, ष्टुत्वे च 'उत्सृष्टम्' स्यादिति षट् त्यक्तस्य। उच्यते स्म 'वच परिभाषणे' आदादिकाद् ब्रूञो वचेर्वा कर्मणि 'क्ते' "वचिस्वपियजादीनां कितीति" संप्रसारणे, कुत्वे च उक्तम्, भाष्यते स्म 'भाष व्यक्तायां वाचि' भौवादिकात्कर्मणि 'क्ते' इडागमे च भाषितम्, उद्यते स्म 'वद व्यक्तायां वाचि' भौवादिकात्कर्मणि 'क्ते' यजादित्वात्संप्रसारणे, इडागमे च उदितम्, जल्प्यते स्म 'जल्प व्यक्तायां वाचि' भौवादिकात्कर्मणि 'क्ते' इडागमे च जल्पितम्, आख्यायते स्म 'ख्या प्रकथने' आदादिकाच्चक्षिङादेशाद्वा कर्मणि 'क्ते' आख्यातम्, अभिधीयते स्म 'डुधाञ् धारणपोषणयोः' जौहोत्यादिकात्कर्मणि 'क्ते' "दधातेर्हिः" इति ह्यादेशे च अभिहितम्, लप्यते स्म 'लप् व्यक्तायां वाचि' भौवादिकात्कर्मणि 'क्ते' इटि च 'लपितम्' स्यादिति सप्त जल्पितस्य ॥ १०७ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

ज्ञात या विदित बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते ।

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अङ्गीकृत या ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ॥ १०८ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

स्वीकार किया संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ।

व्युत्पत्ति—बुध्यते स्म ' बुध अवगमने ' दैवादिकात्कर्मणि ' क्ते ' अनिट्कत्वादिडभावे, धत्वे, दत्वे च बुद्धम् " बुद्धः पण्डिते बोधिते जिने " (इति हैमः) एवं ' बुधिर् बोधने ' ' बुध अवगमने ' वा भौवादिकात्कर्मणि ' क्ते ' सेट्कत्वादिडागमे च बुधितम्, मन्यते स्म ' मनु अवबोधने ' तानादिकात्कर्मणि ' क्ते ' " यस्य विभाषेति " निषेधस्यानित्यत्वादिटि " तदनित्यत्वे च ' कृती छेदने ' इतीदित्करणं लिङ्गम् । अन्यथा सेऽसिचीति वेट्कत्वादिसिद्धे किन्तेनेति " वोपदेवस्तु ' मन चेति ' भ्वादिं मनि पठितवानिति तस्मात्कर्मणि ' क्ते ' सेट्कत्वादिडागमे च मनितं स्यात्, विद्यते स्म ' विद ज्ञाने ' आदादिकात्कर्मणि ' क्ते ' इटि च विदितम्, प्रतिपद्यते स्म ' पद गतौ ' दैवादिकात्कर्मणि ' क्ते ' " रदाभ्यामिति " निष्ठानत्वे च प्रतिपन्नम्, अवसीयते स्म ' षोऽन्तकर्मणि ' दैवादिकात्कर्मणि ' क्ते ' " द्यतिस्यतीति " इत्वे च अवसितम्, अवगम्यते स्म ' गम्लृ गतौ ' भौवादिकात्कर्मणि ' क्ते ' " अनुदात्तोपदेशेति " मलोपे च अवगतं स्यादिति सप्त विदितस्य । ऊरीक्रियते स्म ' डुकृञ् करणे ' तानादिकात्कर्मणि ' क्ते ' ऊरीकृतम्, उरीकृतमपि, एवम् उररीक्रियते स्म कर्मणि ' क्ते ' उररीकृतम्, अनङ्गमङ्गमकारीति कर्मणि ' क्ते ' च्वौ, दीर्घे च अङ्गीकृतम्, आश्रूयते स्म ' श्रु श्रवणे ' भौवादिकात्कर्मणि ' क्ते ' आश्रुतम्, प्रतिज्ञायते स्म ' ज्ञा अवबोधने ' क्र्यादिकात्कर्मणि ' क्ते ' प्रतिज्ञातम्, संगीर्यते स्म ' गॄ निगरणे ' तौदादिकात् ' गॄ शब्दे ' क्र्यादिकाद्वा कर्मणि ' क्ते ' इद्आदेशे, रपरत्वे, दीर्घे, निष्ठानत्वे, णत्वे च संगीर्णम्, विद्यते स्म ' विद ज्ञाने ' आदादिकात्कर्मणि ' क्ते ' इडागमे च विदितम्, " विदितं बुधिताश्रुतयोः " (इति मेदिनी) संश्रूयते स्म कर्मणि ' क्ते ' संश्रुतम्, समाधीयते स्म कर्मणि ' क्ते ' हादेशे च समाहितम्, उपश्रूयते स्म कर्मणि ' क्ते ' उपश्रुतम्, उपगम्यते स्म कर्मणि ' क्ते ' मलोपे च उपगतं स्यादिति [illegible] ॥ १०८ । ३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

[illegible] अपगीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि ।

[illegible]—[illegible] आदादिकात्कर्मणि ' क्ते ' [illegible]

[illegible]

ईलितम्, शस्यते स्म 'शंसु स्तुतौ' भौवादिकात्कर्मणि 'क्त' इडभावे च शस्तम् " शस्तं क्षेमे प्रशस्ते च " (इति हैमः) पणाय्यते स्म 'पण व्यवहारे स्तुतौ च' भौवादिकादायान्तात्कर्मणि 'क्त' इडागमे " अतो लोप " इत्यलोपे च पणायितम् एवं पनाय्यते स्म कर्मणि 'क्त' पनायितम्, प्रणूयते स्म 'णु स्तुतौ' आदादिकात्कर्मणि 'क्त' प्रणुतम्, पणेरायाभावे तु पण्यते स्म कर्मणि 'क्त' पणितम्, एवं पन्यते स्म आयाभावे कर्मणि 'क्त' पनितम्, अपिगीर्यते स्म 'गॄ शब्दे' क्रैयादिकात्कर्मणि 'क्त' अपिगीर्णम्, गीर्यते स्म इति विग्रहे तु कर्मणि 'क्त' गीर्णमपि, वर्ण्यते स्म 'वर्ण वर्णक्रियाविस्तारगुणवचनेषु' चौरादिकात्कर्मणि 'क्त' वर्णितम्, अभिष्टूयते स्म 'ष्टुञ् स्तुतौ' आदादिकात्कर्मणि 'क्त' " उपसर्गात्सुनोतीति " षत्वे च अभिष्टुतम्, ईड्यते स्म कर्मणि 'क्त' इडागमे च ईडितम्, एतानि स्तुतमेवार्थो येषामिति स्तुतार्थानि स्युरिति द्वादश-प्रशस्तस्य ॥ १०९ । ३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

खाये, **भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातम्**

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

चपार्थे **अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते ।**

भेति—भक्ष्यते स्म, 'भक्ष अदने' चौरादिकात्कर्मणि 'क्त' इडागमे च भक्षितम्, चर्व्यते स्म 'चर्व अदने' भौवादिकात्कर्मणि 'क्त' इडागमे च चर्वितम्, लिप्यते स्म 'लिप उपदेहे' तौदादिकात्कर्मणि 'क्त' लिप्तम्, कचित्तु लीढमिति पाठस्तत्र 'लिह आस्वादने' आदादिकात्कर्मणि 'क्त' इडभावे, ढत्वे, धत्वे, ष्टुत्वे, ढलोपे, दीर्घे च लीढम्, प्रत्यवसीयते स्म, 'षो अन्तकर्मणि' दैवादिकात्कर्मणि 'क्त' " द्यतिस्यतीति " इत्वे च प्रत्यवसितम्, गरणम् 'गॄ निगरणे' तौदादिकाद्भावे " इक्कृष्यादिभ्यः " इति इकि, इदादेशे, रपरत्वे, "अचि विभाषेति" वालत्वे गिलिः; सा संजातास्येति तारकादित्वादितचि, गिलितम्, लत्वाभावे तु गिरितमपि, खाद्यते स्म 'खाद्द भक्षणे' भौवादिकात्कर्मणि 'क्त' इडागमे च खादितम्, प्सायते स्म 'प्सा भक्षणे' आदादिकात्कर्मणि 'क्त' प्सातम्, अभ्यवह्रियते स्म, हृञ् हरणे' भौवादिकात्कर्मणि 'क्त' अभ्यवहृतम्, अद्यते स्म 'अद भक्षणे' आदादिकात्कर्मणि 'क्त' " रदाभ्यामिति " निष्ठानत्वे च अन्नम्, " अदोऽनन्ने " इति ज्ञापकाद्वा जग्धादेशे, धत्वे " झरो झरीति " धलोपे च जग्धम्, ग्रस्यते स्म 'ग्रसुग्लसु अदने' भौवादिकात्कर्मणि 'क्त' " यस्य विभाषेति " इडभावे च ग्रस्तम् एवं ग्लस्यते स्म कर्मणि 'क्त' ग्लस्तम्, अश्यते स्म 'अश भोजने' क्रैयादिकात्कर्मणि 'क्त' सेट्कत्वादिडागमे च अशितम्, भुज्यते स्म 'भुज पालनाभ्यवहारयोः' रौधादिकात्कर्मणि 'क्त' इडभावे, गत्वे, कत्वे च 'भुक्तम्' स्यादिति चतुर्दश खादितस्य ॥ ११० । ३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अतिशयार्थ वाची ये ६ शब्द हैं — **क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ॥ १११ ॥**

पु.

(क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः) ।

क्षेपीति—क्षेपिष्ठादयः क्षिप्रादीनां प्रकर्ष एव अर्थो येषामिति प्रकर्षार्था भवन्ति तथातिशयविशिष्टक्षिप्रादिषु यथासंख्यं वर्तन्ते इति—यथा अतिशयेन क्षिप्रः "अतिशायने तमबिष्ठनाविति" इष्ठनि, "स्थूलदूरेति" यणो लोपे गुणे च क्षेपिष्ठः, एवं अतिशयेन क्षुद्रः इष्ठनि, क्षोदिष्ठः, अतिशयेन प्रियः, इष्ठनि "प्रियस्थिरेति" प्रादेशे गुणे च प्रेष्ठः, अतिशयेन उरुः इष्ठनि, वरादेशे च वरिष्ठः, अतिशयेन स्थूलः, इष्ठनि "स्थूलदूरेति" यणो लोपे, गुणे, अवादेशे च स्थविष्ठः, अतिशयेन बहुलः इष्ठनि, "प्रियस्थिरेति" बहुलस्य बंहादेशे च बंहिष्ठः स्यादिति अत्राभीप्सितपृथूप्रियोरुपर्यायाविति पीवरः स्थूलपर्यायः पीवर इति पाठस्त्वयुक्तश्छन्दोभङ्गात् । पीव इति पाठे नान्तो युक्तः स्यादित्येकैकम् ॥ १११ । ३ ॥

पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न. पु.स.न.

अतिशयवाची साधिष्ठ आदि — **साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठाः ॥ ११२ ॥**

(बाढव्यायतबहुगुरुवामनवृन्दारकातिशये) ।

इति विशेष्यनिघ्नवर्गः ।

सेति—बाढाद्यतिशये साधिष्ठादयो यथासंख्यं वर्तन्ते अत्र व्यायतबहुवामना दीर्घस्फिरह्रस्वानां पर्यायाः यथा अतिशयेन बाढः इष्ठनि "अन्तिकबाढयोर्नेदसाधाविति" बाढस्य साधादेशे साधिष्ठः, अतिशयेन व्यायतो दीर्घः, इष्ठनि "प्रियस्थिरेति" दीर्घस्य द्राघादेशे द्राघिष्ठः, अतिशयेन स्फिरः इष्ठनि, स्फादेशे, गुणे च स्फेष्ठः, अतिशयेन गुरुः इष्ठनि, गरादेशे गरिष्ठः, अतिशयेन ह्रस्वः इष्ठनि "स्थूलदूरेति" वलोपे च ह्रसिष्ठः, अतिशयेन वृन्दारको मुख्यः इष्ठनि, "प्रियस्थिरेति" वृन्दादेशे च वृन्दिष्ठः स्यादित्येकैकम् ॥ ११२ । ३ ॥

इति विशेष्यनिघ्नवर्गविवरणम् ।

अथ संकीर्णवर्गो व्याख्यायते ।

[illegible] **प्रकृतिप्रत्ययाद्यर्थैः संकीर्णे लिङ्गमुन्नयेत् ।**

[illegible] **कर्मक्रिया तत्सातत्ये गम्ये स्युरपरस्पराः ॥ १ ॥**

---

१ [illegible]

प्रेति—संकीर्णार्थैः संकीर्णलिङ्गैश्चारब्धत्वात्संकीर्णो वर्गः प्रकृतिप्रत्ययाद्यर्थैर्लिङ्गम्पुंस्त्वादिकं उन्नयेत् ऊहेत । यथा 'अपरस्परः' अयं हि लिङ्गविशेषाभिधायिप्रत्ययस्याविधानात्प्रकृतिः अस्य च "परवल्लिङ्गमिति" अतिदेशात्परशब्दस्यैव लिङ्गं भवति परशब्दस्य च सर्वनामत्वात्त्रिलिङ्गत्वम् । न च द्वन्द्वे चेति निषेधः । तस्य समुदायविषयत्वेनावयवविषयत्वाभावात् । प्रत्ययार्थेन यथा—शान्तिः स्त्रियां क्तिनो विधानात् । 'विधूननम्' नपुंसके ल्युटो विहितत्वात् । आद्यशब्देन रूपभेदादिग्रहः । रूपभेदेन कर्मादेः क्लीबत्वादि । साहचर्येण डिम्बादेः पुंस्त्वादि । अथवा भिन्नजातीयेन लिङ्गेन संसर्गे सति अत्र वर्गे वर्गान्तरे च प्रकृत्यर्थाद्यैर्लिङ्गं ज्ञेयम् । लिङ्गसंग्रहे वक्ष्यमाणमपि लिङ्गमुन्नेयत्वेनेहोक्तमिति । करणम्, क्रियते वा 'डुकृञ् करणे' तानादिकाद्भावे कर्मणि "सर्वधातुभ्यो मनिन्" इति मनिनि कर्म, "कर्मव्याप्ये क्रियायां च पुंनपुंसकयोर्मतम्" (इति रुद्रः) एवं "कृञः श चेति" शे, "सार्वधातुके यगिति" यकि "रिङ्शयग्लिङ्क्षु" इति रिङादेशे च यगभावे रिङादेशे "अचिश्नु" इतीयङि वा क्रिया स्यादिति द्वे क्रियायाः । तत्सातत्ये क्रियायाः क्रियावतां च नैरन्तर्य्ये गम्ये अपरस्पराः स्युः अपरे च परे चेति द्वन्द्वे "अपरस्पराः क्रियासातत्ये" इति सुटि निपातिते 'अपरस्पराः' क्रियासातत्ये 'अपरस्परं गच्छन्ति' "निर्दिष्टं कर्मसातत्ये सुधीभिरपरस्परम्" (इति भागुरिः) क्रियावतां सातत्ये तु लिङ्गत्रयम्, अपरस्पराः सार्थाः स्त्रियश्च गच्छन्ति, अपरस्पराणि कुलानि इत्येकं नैरन्तर्येण क्रियायाः क्रियावतश्च ॥ १ ॥

साकल्य वचन, आसङ्गवचन, — न. न. (साकल्यासङ्गवचने) पारायणतुरायणे ।

स्वतन्त्रता, बेकारण स्थिति — स. स. न. यदृच्छा स्वैरिता (हेतुशून्या त्वास्था) विलक्षणम् ॥२॥

सेति—साकल्यं च आसङ्गश्च तौ वक्ति "कृत्यल्युटो बहुलम्" इति वचेः कर्तरि ल्युटि, साकल्यासङ्गवचने पारायणतुरायणे स्याताम् । पारस्य अयनम् "पूर्वपदादिति" णत्वे 'पारायणम्' क्लीबलिङ्गमेवैतेनैकेतेन "स्वपारायणं नाम लक्ष्यं मम मैथिली" इति भट्टिप्रयोगः संगच्छते । "परायणम्" इति वा पाठस्तत्र परं च तदयनं चेति 'परायणम्' "आश्रये तत्पराभीष्टे परायणपदं विदुः" (इति शाश्वतः) । तोतोर्ति 'तुर त्वरणे' जौहोत्यादिकात्कर्तरि "इगुपधेति" 'के' तुरस्तस्यायं तुरायणम्, त्वरया अयनमिति वा त्वरायणम् । मुकुटस्तु यथाक्रमं साकल्यवचनं पारायणम् । आसङ्गवचनं च परायणमिति व्याख्यानवानिति, तथा च पीयूषव्याख्यायामपि एवंचित्परायणाख्याने तुरायणमितीच्छन्तीत्येकैकम् । ऋच्छनम् 'ऋच्छ गत्यादौ' तौदादिकाद्भावे "गुरोश्च हलः" इत्यप्रत्यये ऋच्छा, या ऋच्छा "विशेषणं विशे-

ण्येण बहुलम्" इति समासे यदृच्छा, स्वेनेरितुं शीलमस्य "सुप्यजाताविति" णिनौ स्वैरी तस्य भावः 'तलि' स्वैरिता स्यादिति द्वे स्वातन्त्र्यस्य । हेतुना कारणेन शून्य आस्था स्थितिः विलक्षणं स्यात् । विगतं लक्षणमालोचनं यत्रेति विलक्षणम् "विलक्षणं मतं स्थानं यद्भवेन्निष्प्रयोजनम्" (इति भागुरिः) इत्येकं कारणशून्यस्थितेः ॥ २ ॥

शान्ति, इन्द्रियनिग्रह, पु. पु. स. स. पु. पु.
शमथ(स्तु) शमःशान्तिर्दान्ति(स्तु) दमथो दमः ।

सुकर्म, महादान न. न. न. न.
अवदानं कर्मवृत्तं काम्यदानं प्रवारणम् ॥ ३ ॥

शेति—शमनम् 'शमु उपशमे' दैवादिकाद्भावे, "बाहुलकाच्छामिदमिभ्यामिति" अथचि, शमथः, 'भावे' घञि, "नोदात्तोपदेश" इति वृद्ध्यभावे च शमः "स्त्रियां क्तिन्" इति क्तिनि, "अनुनासिकस्य" इति दीर्घे च शान्तिः स्यादिति त्रीणि कामक्रोधाद्यभावस्य । दमनम् 'दमु उपशमे' दैवादिकाद्भावे स्त्रियां क्तिनि, दीर्घे च दान्तिः, अथचि, दमथः, 'घञि' दमः स्यादिति त्रीणि तपःक्लेशसहनस्य । अवदानम् 'दैप् शोधने' भौवादिकाद्भावे ल्युटि, अनादेशे च अवदानम् अपदानमिति वा पाठः, वर्तनम् 'वृतु वर्तने' अस्माद्भावे 'क्ते' इडभावे च वृत्तम्, कर्मणः कर्मणि वा वृत्तम् कर्मवृत्तं स्यादिति द्वे प्रशस्तकर्मणः । कामोऽस्ति यत्रेति "अन्यत्रापीति" यपि काम्यते 'कमु कान्तौ' भौवादिकात्स्वार्थणयन्तात्कर्मणि "अचो यत्" इति यति वा काम्यम, दत्तं दानम्, काम्येनेच्छया काम्यस्य वस्त्रीहस्त्यश्वादेर्वा दानम् काम्यदानम्, प्रवारितम् प्रपूर्वकात् 'वृञ् वरणे' चौरादिकाण्णयन्ताद्भावे "ल्युट् चेति" ल्युटि, अनादेशे च प्रवारणम् "प्रवारणं निषेधे स्यात्काम्यदाने च न द्वयोः" (इति मेदिनी) पर्यायव्याख्यातः प्रचारितमिति विग्रहे तु प्रचारणमपि स्यादिति द्वे महादानस्य ॥ ३ ॥

वशीकरण, उच्चाटन, न. न. न.
वशक्रिया संवननं मूलकर्म 'तु' कार्मणम् ।

कम्पन, तर्पण न. न. न. न. न.
विधूननं विधुवनं तर्पणं प्रीणनावनम् ॥ ४ ॥

वेति—वशस्य करणम् "कृञः श च" इति शे, यकि, रिङादेशे च वशक्रिया, संवननम् संपूर्वकात् 'वनु याचने' तानादिकाद् वशीकरणार्थात्तस्माद्भावे ल्युटि, अनादेशे च संवननम्, [illegible] संवननम्, [illegible] वा संवदनमपीति द्वे वशीकरणस्य ।

१ [illegible] (इति [illegible]) ॥

ओषध्यादिमूलेन कर्म मूलकर्म, कर्मैव "तद्युक्तात्कर्मणोऽण्" इत्यणि, वृद्धौ च कार्मणम् "कार्मणं मन्त्रतन्त्रादियोजने कर्मठेऽपि च" (इति मेदिनी) इति द्वे कार्मणस्य। विधूनितम् विपूर्वकाद् 'धूञ् कम्पने' चौरादिकाण्ण्यन्ताद्भावे ल्युटि, अनादेशे च विधूननम्, विधूतम् विपूर्वको 'धू विधूनने' तौदादिकस्तस्माद्भावे ल्युटि "गाङ्कुटादिभ्यः" इति ङित्वाद्गुणाभावे, उवङि च 'विधुवनम्' स्यादिति द्वे कम्पनस्य। तृतम् 'तृप प्रीणने' दैवादिकाद्भावे ल्युटि, गुणे, अनादेशे, णत्वे च तर्पणम्, प्रीणितम् 'प्रीञ् तर्पणे' क्रैयादिकात्स्वार्थण्यन्ताद्भावे 'ल्युटि' अनादेशे च प्रीणनम्, अवितम् 'अव रक्षणादौ' भौवादिकाद्भावे ल्युटि 'अवनम्' स्यादिति त्रीणि तर्पणस्य ॥ ४ ॥

स. न. न.

रक्षा, सीना, पर्याप्तिः 'स्या'त्परित्राणं हस्तवारण (मित्यपि)।

न. न. स. पु. न. स.

फटना सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा ॥ ५ ॥

पेति—पर्यापणम् परिपूर्वकः 'आप्लृ व्याप्तौ' सौवादिकस्त्राणार्थस्तस्मात्स्त्रियां क्तिनि, पर्याप्तिः, परित्रातम् परिपूर्वकः 'त्रैङ् पालने' भौवादिकस्तस्माद्भावे ल्युटि, परित्राणम्, वारितम् 'वृञ् वरणे' चौरादिकात्स्वार्थण्यन्ताद्भावे ल्युटि वारणम्, हस्तेन हस्तस्य वा वारणम हस्तवारणम्, अपिशब्दात्क्वचित् हस्तधारणमिति वा पाठस्तत्र 'धृञ् धारणे' भौवादिकाण्ण्यन्ताद्भावे ल्युटि धारणम्, प्रहारोद्यतस्य हस्तस्य धारणं रोधो हस्तधारणमपि स्यादिति त्रीणि मारणोद्यतनिवारणस्य। स्यूतम् 'षिवु तन्तुसन्ताने' दैवादिकाद्भावे ल्युटि, गुणे, अनादेशे च सेवनम्, पृषोदरादित्वाद्दीर्घे तु सीवनम्, क्तिनि, 'च्छ्वोरित्यूठि' यणादेशे च स्यूतिः "सेवस्तु सेवनं स्यूतिः" इति पाठो न्याय्यस्तत्र 'सेवनम्' भावे घञि सेव. स्यादिति त्रीणि सीवनस्य। विदरणम्, 'दॄ विदारणे' क्रैयादिकाद्भावे "ऋदोरप्" इत्यपि, गुणे च, विदरः, स्फुटितम् 'स्फुट विकसने' तौदादिकाद्भावे ल्युटि, कुटादित्वाद्गुणाभावे च स्फुटनम्, भेदनम् 'भिदिर् विदारणे' रौधादिकाद्भावे "षिद्भिदादिभ्योऽङ्" इत्यङि, गुणाभावे, टापि च भिदा स्यादिति त्रीणि स्फुटनस्य ॥ ५ ॥

न. पु. पु. स.

शापना, अनुभव ज्ञान. आक्रोशनमभीषङ्गः संवेदो वेदना (न ना)।

न. स. स. स. स. स.

सर्वत्र व्याप्त, भिक्षा संमूर्च्छनमभिव्याप्तिर्याच्ञाभिक्षार्थनार्दना ॥ ६ ॥

च्छेया वहुलम्" इति समासे यदृच्छया, स्वेनेरितुं शीलमस्य "सुप्यजाताविति" णिनौ स्वैरी तस्य भावः 'तलि' स्वैरिता स्यादिति द्वे स्वातन्त्र्यस्य । हेतुना कारणेन शून्या आस्था स्थितिः विलक्षणं स्यात् । विगतं लक्षणमालोचनं यत्रेति विलक्षणम् "विलक्षणं मतं स्थानं यद्भवेन्निष्प्रयोजनम्" (इति भागुरिः) इत्येकं कारणशून्यस्थिते. ॥ २ ॥

शान्ति, इन्द्रियनिग्रह, सुकर्म, महादान

पु. पु. स. स. पु. पु.
शमथ(स्तु) शमःशान्तिर्दान्ति(स्तु) दमथो दमः ।
न. न. न. न.
अवदानं कर्मवृत्तं काम्यदानं प्रवारणम् ॥ ३ ॥

शेति—शमनम् 'शमु उपशमे' दैवादिकाद्भावे, "बाहुलकाच्छमिदमिभ्यामिति अथचि, शमथः, 'भावे' घञि, "नोदात्तोपदेश" इति वृद्ध्यभावे च श "स्त्रियां क्तिन्" इति क्तिनि, "अनुनासिकस्य" इति दीर्घे च शान्तिः स्यादिति त्री कामक्रोधाद्यभावस्य । दमनम् 'दमु उपशमे' दैवादिकाद्भावे स्त्रियां क्तिनि, दीर्घे दान्तिः, अथचि, दमथः, 'घञि' दमः स्यादिति त्रीणि तपःक्लेशसहनस्य । अ दातम् 'दैप् शोधने' भौवादिकाद्भावे ल्युटि, अनादेशे च अवदानम् अपदानमि वा पाठः, वर्तनम् 'वृतु वर्तने' अस्माद्भावे 'क्ते' इडभावे च वृत्तम्, कर्मणः कर्मणि वृत्तम् कर्मवृत्तं स्यादिति द्वे प्रशस्तकर्मणः । कामोऽस्ति यत्रेति "अन्यत्रापीति" य काम्यते 'कमु कान्तौ' भौवादिकात्स्वार्थणयन्तात्कर्मणि "अचो यत्" इति यति काम्यम्, दत्तं दानम्, काम्येनेच्छया काम्यस्य वरस्त्रीहस्त्यश्वादेर्वा दानम् काम्य नम्, प्रवारितम् प्रपूर्वकात् 'वृञ् वरणे' चौरादिकाण्णयन्ताद्भावे "ल्युट् चेति ल्युटि, अनादेशे च प्रवारणम् "प्रवारणं निषेधे स्यात्काम्यदाने च न द्वयोः" (इ मेदिनी) पीयूषव्याख्यातः प्रचारितमिति विग्रहे तु प्रचारणमपि स्यादिति द्वे मह दानस्य ॥ ३ ॥

वशीकरण, उच्चाटन, कांपना, अघाया

स. न. न.
वशक्रिया संवननं मूलकर्म 'तु' कार्मणम् ।
न. न. न. न. न.
विधूननं विधुवनं तर्पणं प्रीणनावनम् ॥ ४ ॥

वेति—वशस्य करणम् "कृञः श च" इति शे, यकि, रिङादेशे च वशक्रि संवननम् संपूर्वको 'वनु याचने' तानादिको वशीकरणार्थस्तस्माद्भावे ल्युटि, अन देशे च संवननम्, समुन्नं संवपनम्, समुदितं वा संवदनमपीति द्वे वशीकरणस्य

१ "अपभिश्र-सादन यनन्तन्" इति मर्गारवुवमः (इति मुकुटपीयूषौ) ॥

ओषध्यादिमूलेन कर्म मूलकर्म, कर्मैव " तद्युक्तात्कर्मणोऽण् " इत्यणि, वृद्धौ च कार्मणम् " कार्मणं मन्त्रतन्त्रादियोजने कर्मठेऽपि च " (इति मेदिनी) इति द्वे कार्मणस्य । विधूनितम् विपूर्वकाद् ' धूञ् कम्पने ' चौरादिकाण्णयन्ताद्भावे ल्युटि, अनादेशे च विधूननम्, विधूतम् विपूर्वको ' धू विधूनने ' तौदादिकस्तस्माद्भावे ल्युटि " गाङ्कुटादिभ्यः " इति ङित्वाद्गुणाभावे, उवङि च ' विधुवनम् ' स्यादिति द्वे कम्पनस्य । तृप्तम् ' तृप प्रीणने ' दैवादिकाद्भावे ल्युटि, गुणे, अनादेशे, णत्वे च तर्पणम्, प्रीणितम् ' प्रीञ् तर्पणे ' क्रैयादिकात्स्वार्थण्यन्ताद्भावे ' ल्युटि ' अनादेशे च प्रीणनम्, अवितम् ' अव रक्षणादौ ' भौवादिकाद्भावे ल्युटि ' अवनम् ' स्यादिति त्रीणि तर्पणस्य ॥ ४ ॥

स. न. न.
रक्षा, सीना, **पर्याप्तिः 'स्या' त्परित्राणं हस्तवारण (मित्यपि) ।**
न. न. स. पु. न. स.
फटना **सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा ॥ ५ ॥**

पेति—पर्यापणम् परिपूर्वकः 'आप्लृ व्याप्तौ' सौवादिकस्त्राणार्थस्तस्मात्स्त्रियां क्तिनि, पर्याप्तिः, परित्रातम् परिपूर्वकः ' त्रैङ् पालने ' भौवादिकस्तस्माद्भावे ल्युटि, परित्राणम्, वारितम् 'वृञ् वरणे' चौरादिकात्स्वार्थण्यन्ताद्भावे ल्युटि वारणम्, हस्तेन हस्तस्य वा वारणम् हस्तवारणम्, अपिशब्दात्क्वचित् हस्तधारणमिति वा पाठस्तत्र ' धृञ् धारणे' भौवादिकाण्णयन्ताद्भावे ल्युटि धारणम्, प्रहारोद्यतस्य हस्तस्य धारणं रोधो हस्तधारणमपि स्यादिति त्रीणि मारणोद्यतनिवारणस्य । स्यूतम् ' षिवु तन्तुसन्ताने ' दैवादिकाद्भावे ल्युटि, गुणे, अनादेशे च सेवनम्, पृषोदरादित्वाद्दीर्घे तु सीवनम्, क्तिनि, ' च्छ्वोरित्यूठि ' यणादेशे च स्यूतिः " सेवस्तु सेवनं स्यूतिः " इति पाठो न्याय्यस्तत्र ' सेवनम ' भावे घञि सेवः स्यादिति त्रीणि सीवनस्य । विदरणम्, ' दॄ विदारणे ' क्रैयादिकाद्भावे " ऋदोरप् " इत्यपि, गुणे च, विदरः, स्फुटितम् ' स्फुट विकसने ' तौदादिकाद्भावे ल्युटि, कुटादित्वाद्गुणाभावे च स्फुटनम्, भेदनम् ' भिदिर् विदारणे ' रौधादिकाद्भावे " षिद्भिदादिभ्योऽङ् " इत्यङि, गुणाभावे, टापि च भिदा स्यादिति त्रीणि स्फुटनस्य ॥ ५ ॥

न. पु. पु. स.
शापना, अनुभव **आक्रोशनमभीषङ्गः संवेदो वेदना (न ना) ।**
ज्ञान,
न. स. स. स. स. स.
सर्वेरव्याप्त, भिक्षा **संमूर्च्छनमभिव्याप्तिर्याच्ञाभिक्षार्थनार्दना ॥ ६ ॥**

आक्रुविति—आक्रुष्टम् आङ्पूर्वकः 'क्रुश आह्वाने' भौवादिकस्तस्माद्भावे ल्युटि, गुणे, अनादेशे च आक्रोशनम्, अभिषञ्जनम् अभिपूर्वकः 'षञ्ज संगे' भौवादिकस्तस्माद्भावे घञि, "उपसर्गस्य घञि" इति दीर्घे, कुत्वे च 'अभीषङ्गः' स्यादिति द्वे शापस्य। संवेदनम् संपूर्वको 'विद ज्ञाने' आदादिकस्तस्माद्भावे घञि, गुणे च संवेदः, वेदयति–वेद्यते वा 'विद चेतनाख्याननिवासेषु' चौरादिकाण्णयन्तात् "ण्यासेति" "घट्टिवन्दिविदिभ्यश्चेति" वा युचि, अनादेशे, टापि च वेदना ना पुमान् न स्यादिति द्वे अनुभवस्य। संमूर्तम् 'मुर्च्छा मोहसमुच्छ्राययोः' भौवादिकाद्भावे ल्युटि, अनादेशे च संमूर्च्छनम्, अभिव्यापनम्, अभिविपूर्वकः 'आप्लृ व्याप्तौ' सौवादिकस्तस्मात "स्त्रियां क्तिन्" इति क्तिनि, अभिव्याप्तिः स्यादिति द्वे सर्वतो व्याप्तेः। याचनम् 'टुयाचृ याच्ञायाम्' भौवादिकाद्भावे "यजयाचेति" नङि, चुत्वे, टापि च याच्ञा, भिक्षणम् 'भिक्ष याचने' भौवादिकाद्भावे "गुरोश्च" इत्यप्रत्यये टापि च भिक्षा, अर्थयति अर्थ्यते वा 'अर्थ याच्ञायाम्' चौरादिकाण्णयन्तात् "ण्यासेति" युचि, अनादेशे च अर्थना, अर्दयति 'अर्द गतौ याचने च' भौवादिकस्तस्मात्स्वार्थण्यन्ताद् युचि अर्दना स्यादिति चत्वारि याच्ञायाः॥ ६॥

काटना, कुश- वर्धनं छेदने (ऽथ द्वे) आनन्दनसभाजने।
आनन्द, उत्तमोपदेश, हानि आप्रच्छन (मथा) म्नायः संप्रदायः(क्षये)क्षिया॥७॥

(न. न. न. न. / न. पु. पु. पु. स.)

वेति—छेदने वर्धनं स्यात्। वर्धितम् 'वर्धच्छेदनपूरणयोः' चौरादिकाण्णयन्ताद्भावे 'ल्युटि' अनादेशे च वर्धनम् "वर्धनं छेदने वृद्धौ" (इति दन्तोष्ठ्यादावजयः) छिन्नम् 'छिदिर् द्वैधीकरणे' रौधादिकाद्भावे 'ल्युटि' छेदनं स्यादिति द्वे छेदनस्य। अथेति—आनन्दितम् आङ्पूर्वकः 'टुणदि समृद्धौ' भौवादिकस्तस्माद्भावे ल्युटि, अनादेशे च आनन्दनम्, आमन्त्रणमिति वा कचित्पाठस्तत्राङ्पूर्वको 'मन्त्रि गुप्तभाषणे' चौरादिकस्तस्माद्भावे 'ल्युटि' आमन्त्रणम्, सभाजितम् 'सभाज प्रीतिसेवनयोः' चौरादिकाद्भावे 'ल्युटि' सभाजनम्, आनन्दनं च सभाजनं चेति आनन्दनसभाजने द्वे तथा च आपृष्टम् आङ्पूर्वकः 'प्रच्छ ज्ञीप्सायाम्' तौदादिक आनन्दनार्थस्तस्माद्भावे 'ल्युटि' आप्रच्छनं स्यादिति त्रीण्यालिङ्गनकुशलप्रश्नादिनानन्दनस्य। अथेति—आम्नानम् आङ्पूर्वको 'म्ना अभ्यासे' भौवादिकस्तस्माद्भावे 'घञि' "आतो युगिति" युकि च आम्नायः, संप्रदानम् संप्रपूर्वको 'डुदाञ् दाने' जौहो-

१ मुकुटेन तु "प्रीतिसेवनयोः" इति पाठो धृतः। स्वामिना तु—'प्रीतिदर्शने' इति पाठोऽङ्गीकृतः॥

त्यादिकस्तस्माद्भावे घञि, युकि च संप्रदायः स्यादिति द्वे गुरुपरम्परागतसदुपदेशस्य। क्षये क्षिया स्यात्। क्षयणम् 'क्षि क्षये' भौवादिकस्तस्माद्भावे "एरच्" इत्यचि, गुणे; अयादेशे च क्षयः, एवं 'क्षीष् हिंसायाम्' क्रैयादिकस्तस्मात् "षिद्भिदादिभ्योऽङ्" इत्यङि, इयङि च क्षिया स्यादिति द्वे अपचयस्य ॥ ७ ॥

पु. पु. पु. स. पु. न. पु. पु.

लेना, चाहना, रक्षा, शब्द, छेदना, पकाना, बुलाना, वरदान

(ग्रहे) ग्राहो वशः (कान्तौ) रक्ष्य (त्राणे) रणः (क्वणे)।

पु. पु. स. पु. पु. स. पु. स.

व्यधो (वेधे) पचा (पाके) हवो (हूतौ) वरो (वृतौ) ॥८॥

ग्रेति—ग्रहे ग्रहणे ग्राहः स्यात्। ग्रहणम् 'ग्रह उपादाने' क्रैयादिकस्तस्माद्भावे "ग्रहवृदृ—" इत्यपि ग्रहः, ग्राहणम् स्वार्थणयन्ताद्भावे "एरच्" इत्यचि, घञि वा 'ग्राहः' स्यादिति द्वे ग्रहणस्य। कान्तौ वशः स्यात्। वशनम् 'वश कान्तौ' आदादिकस्तस्माद्भावे "वशिरण्योः" इत्यपि वशः, कमनम् 'कमु कान्तौ' भौवादिकस्तस्माद्भावे 'क्तिनि' "अनुनासिकस्य" इति दीर्घे, मस्यानुस्वारे, परसवर्णे च 'कान्तिः' स्यादिति द्वे इच्छायाः। त्राणे पालने रक्ष्णः स्यात्। रक्षणम् 'रक्ष पालने' भौवादिकाद्भावे "यजयाचेति" नङि, 'रक्ष्णः' त्रातम् 'त्रैङ् पालने' भौवादिकाद्भावे 'ल्युटि' अनादेशे, णत्वे च 'त्राणम्' स्यादिति द्वे रक्षणस्य। क्वणे रणः स्यात्। रणनम् 'रण शब्दे' भौवादिकाद्भावे "वशिरण्योः" इत्यपि रणः, क्वणनम् 'क्वण् शब्दे' भौवादिकाद्भावे 'अपि' क्वणः "क्वणो वीणायामिति" साधुरिति द्वे शब्दकरणस्य। वेधे व्यधः स्यात्। व्यधनम् 'व्यध ताडने' दैवादिकाद्भावे "व्यधजपोः" इत्यपि व्यधः, वेधनम् 'विध विधाने' तौदादिकाद्भावे घञि, गुणे च वेधः, प्रज्ञाद्यणि तु वैधोऽपि स्यादिति द्वे वेधनस्य। पाके पचा स्यात्। पचनम् 'डुपचष् पाके' भौवादिकाद्भावे षित्त्वादङि, टापि च पचा, एवं घञि, कुत्वे च पाकः स्यादिति द्वे पचनस्य। हूतौ हवः स्यात्। ह्वानम् 'ह्वेञ् स्पर्द्धायां शब्दे च' भौवादिकाद्भावे "भावेऽनुपसर्गस्य" इत्यपि, संप्रसारणे, गुणे, अवादेशे च हवः, एवं क्तिनि, यजादित्वात्संप्रसारणे च हूतिः स्यादिति द्वे आह्वानस्य। वृतौ वरः स्यात्। वरणम् 'वृञ् वरणे' सौवादिकाद्भावे "ग्रहवृदृ—" इत्यपि, गुणे, रपरत्वे च वरः "तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः" एवं क्तिनि वृतिः स्यादिति द्वे वरस्य ॥ ८ ॥

पु. पु. पु. पु. स. स. पु. स.

जलाना, नीति, जीर्ण, श्रम, बढ़ती, प्रसिद्धता, छूना, टपकना

ओषः (प्लोषे) नयो (नाये) ज्यानि (जीर्णौ) भ्रमो (भ्रमौ)।

स. स. स. स. स. स. पु. पु.

स्फाति (र्वृद्धौ) प्रथा (ख्यातौ) स्पृष्टिः (पृक्तौ) स्नवः (स्रवे)॥

अविति—प्लोषे दाहे ओषः स्यात्। ओषणम् ' उष दाहे ' भौवादिकाद्भावे 'घञि' गुणे च ओषः, प्लोषणम् ' प्लुष दाहे ' भौवादिकाद्भावे घञि प्लोषः स्यादिति द्वे दाहस्य। नाये नीतौ नयः स्यात्। नयनम् ' णय् गतौ ' भौवादिकाद्भावे ' घञि ' संज्ञापूर्वकत्वादूवृद्ध्यभावे च ' णीञ् प्रापणे ' भौवादिकाद्भावे ' एरच् ' इत्यचि वा नयः एवं " प्रणीभुवो–" इति ' घञि ' वृद्धौ च नायः स्यादिति द्वे नीतेः। जीर्णौ ज्यानिः स्यात्। ज्यानम् ' ज्या वयोहानौ ' क्रैयादिकाद्भावे " ग्लाम्लाज्याहाभ्यो निः" इति 'नौ' ज्यानिः, जरणम् 'जृष् वयोहानौ' दैवादिकाद्भावे 'क्तिनि' इदादेशे, रपरत्वे, दीर्घे "ॠल्वादिभ्य इति" निष्ठावत्वाद् "रदाभ्यामिति" नत्वे, णत्वे च जीर्णिः स्यादितिद्वे जीर्णस्य। भ्रमौ भ्रमः स्यात्। भ्रमणम ' भ्रमु अनवस्थाने ' दैवादिकाद्भावे ' घञि ' " नोदात्तोपदेशस्य–" इति वृद्ध्यभावे च भ्रमः एवम् "इकृष्यादिभ्यः" इति ' इकि ' ' भ्रमिः ' स्यादिति द्वे भ्रमणस्य। वृद्धौ स्फातिः स्यात्। स्फातम, स्फायनं वा ' स्फायी वृद्धौ ' भौवादिकाद्भावे ' क्तिनि ' यलोपे च स्फातिः " स्फातिर्वृद्धिः प्रसारो ना " (इति वोपालितः) वर्धनम् ' वृधु वृद्धौ ' भौवादिकाद्भावे ' क्तिनि ' धत्वे, दत्वे वृद्धिः स्यादिति द्वे वृद्धेः। ख्यातौ प्रथा स्यात्। प्रथनम् ' प्रथ प्रख्याने ' भौवादिका द्भावे " षिद्भिदादिभ्योऽङ् " इति षित्त्वादङि प्रथा, ख्यानम् ' ख्या प्रकथने ' आदादि काच्चक्षिङादेशाद्वा भावे ' क्तिनि ' ख्यातिः स्यादिति द्वे प्रख्यातेः। पृक्तौ स्पृ स्यात्। स्पर्शनम् ' स्पृश् संस्पर्शे ' तौदादिकाद्भावे ' क्तिनि ' " व्रश्चेति "षत्वे, ष्टुत्वे स्पृष्टिः, पर्चनम् ' पृची संपर्के ' रौधादिकाद्भावे क्तिनि, कुत्वे च पृक्तिः स्यादिति द्वे स्प नस्य। स्नवनम् ' ष्णु प्रस्रवणे ' आदादिकाद्भावे "ॠदोरप्" इत्यपि, गुणे, अव देशे च स्नवः, स्रवणम् ' स्रु गतौ ' भौवादिकाद्भावे ' अपि ' स्रवः, घञि तु स्ना स्रावश्च स्यादिति द्वे प्रस्रवणस्य ॥ ९ ॥

बढ़ना, फुरना, सत्यज्ञान, जनना, घी आदिका झरना या टपकना, ग्लानि	स. विधा (समृद्धौ) स. (स्फुरणे) न. स्फुरणा स. (प्रमितौ) स. प्रम... स.
	स. प्रसूतिः (प्रसवे) पु. (श्च्योते) पु. प्राघारः पु. क्लमथः पु. (क्लमे) ॥१

वीति—विधानम् विपूर्वको ' डुधाञ् धारणपोषणयोः ' जौहोत्यादिकस्तस्मा " आतश्चोपसर्गे " इत्यङि, आतो लोपे, टापि च विधा, " विधा गजान्ने ॠद्धौ (इति मेदिनी) एधनमिति विग्रहे तु " गुरोश्च हलः " इत्यप्रत्यये, एधापि, स नम् संपूर्वकः ' ॠधु वृद्धौ ' दैवादिकस्तस्माद्भावे क्तिनि, समृद्धिः स्यादिति द्वे ध पत्तेः। स्फुरणे स्फुरणा स्यात्। स्फुरितम् ' स्फुर स्फुरणे ' तौदादिकाद्भावे ल्युटि, अ

१ " क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते " इति ॥

देशे, कुटादित्वाद् गुणाभावे च स्फुरणम् स्वार्थण्यन्तात् स्फोरणम् धातुपाठेऽडुपधपाठात् स्फरणम्, प्रज्ञाद्यणि तु स्फारणमपि, स्वार्थण्यन्ताद्युचि तु संज्ञापूर्वकत्वाद्गुणाभावे टापि च स्फुरणा स्यादिति द्वे स्फुरणस्य । प्रमितौ प्रमा स्यात् । प्रमाणम् प्रपूर्वको 'डुमिञ् प्रक्षेपणे' सौवादिकस्तस्माद्भावे 'क्तिनि' प्रमितिः, एवं प्रपूर्वको 'माङ् माने' दैवादिकस्तस्मात् "आतश्चोपसर्गे" 'इत्यङि' प्रमा स्यादिति द्वे प्रमाज्ञानस्य । प्रसवे प्रसूतिः स्यात् । प्रसवनम् प्रपूर्वकः 'षूङ् प्राणिप्रसवे' दैवादिकस्तस्माद्भावे 'क्तिनि' प्रसूतिः, एवं 'षूङ्' दैवादिकात् 'षू प्रेरणे' तौदादिकाद्वा "ऋदोरप्" इत्यपि, गुणे, अवादेशे च प्रसवः स्यादिति द्वे प्रसवनस्य, प्रेरणस्य वा । श्च्योते क्षरणे प्राघारः स्यात् । श्च्योतनम् 'श्च्युतिर क्षरणे' भौवादिकाद्भावे घञि, गुणे च श्च्योतः । यकाररहिते तु श्चोतोऽपि, प्रघरणम् प्रपूर्वकः 'घृ क्षरणदीप्त्योः' जौहोत्यादिकस्तस्माद्भावे 'घञि' "उपसर्गस्य" इति दीर्घे, वृद्धौ च 'प्रघारः' स्यादिति द्वे क्षरणस्य । क्लमनम् 'क्लमु ग्लानौ' दैवादिकाद्भावे बाहुलकादथचि क्लमथः, घञि तु "नोदात्तोपदेश" इति वृद्ध्यभावे क्लमः स्यादिति द्वे ग्लानेः ॥ १० ॥

बढ़ाई, मिलाप, प्रयोजन, फेंकना या आज्ञा करना, लीलना, उद्यम करना.

उत्कर्षो(ऽतिशये) संधिः (श्लेषे) विषय (आशये) ।
(क्षिपायां) क्षेपणं गीर्णि (र्गिरौ) गुरण(मुद्यमे)॥ ११ ॥

(पु. पु. पु. पु. पु. पु.; स. न. स स. न. पु.)

उदिति—अतिशये उत्कर्षः स्यात् । उत्कर्षणम् उत्पूर्वकः 'कृष विलेखने' भौवादिकस्तस्माद्भावे घञि, गुणे च उत्कर्षः, अतिशयनम्, अतिपूर्वकः 'शीङ् स्वप्ने' आदादिकस्तस्माद्भावे "एरच्" इत्यचि,गुणे अयादेशे च अतिशयः स्यादिति द्वे उत्कर्षस्य। श्लेषे आलिङ्गने संधिः स्यात् । संधानम् संपूर्वको 'डुधाञ् धारणपोषणयोः' जौहोत्यादिकस्तस्माद्भावे 'उपसर्गे घोः किः' इति कौ, आलोपे च संधिः, श्लेषणम् 'श्लिष आलिङ्गने' दैवादिकाद्भावे 'घञि' गुणे च श्लेषः स्यादिति द्वे सन्धानस्य । आशये विषयः स्यात् । विषयणम् विपूर्वकः 'षिञ् बन्धने' सौवादिकस्तस्माद्भावे 'एरच्' इत्यचि, गुणे च विषयः, आशयनम् आङ्पूर्वकः 'शीङ् स्वप्ने' आदादिकस्तस्मादचि आशयः "आश्रयः" इति वा पाठस्तत्र आङ्पूर्वकः 'श्रिञ् सेवायाम्' अस्माद्भावेऽचि आश्रयोपि स्यादिति द्वे विषयस्य । क्षिपायां क्षेपणं स्यात् । क्षेपणम् 'क्षिप प्रेरणे' तौदादिकाद्भावे भिदाद्यङि क्षिपा, ल्युटि तु क्षेपणं स्यादिति द्वे क्षेपणस्य । गिरौ गीर्णिः स्यात् । गरणम् 'गॄ निगरणे' तौदादिकाद्भावे क्तिनि, इत्वादेशे, रपरत्वे, दीर्घे, 'ऋल्वादिभ्य इति' निष्ठावत्त्वान्नत्वे, णत्वे च गीर्णिः 'इक्कृष्यादिभ्य' इतीकि तु गिरिः स्यादिति द्वे निगरणस्य । उद्यमे गुरणं स्यात् । गूर्णम् 'गुरी उद्यमने' तौदादिकाद्भावे ल्युटि, अनादेशे, कुटादित्वादगुणाभावे च गुरणम्, 'गूरी हिंसागत्योः' दैवादिकाद् 'गूर उद्यमने' चौरादिकाद्वा भावे ल्युटि, अनादेशे च गूरणम् तौदादिकात्स्वार्थण्यन्तात्तु गोरणमपि, उद्यमनम् उत्पूर्वको 'यमु

उपरमे' भौवादिकस्तस्माद्भावे 'घञि' संज्ञापूर्वकत्वाद् वृद्ध्यभावे च उद्यमः स्यादिति द्वे भाराद्युद्यमनस्य ॥ ११ ॥

पु. पु. पु. न. न. पु.

उठाना, आश्रय, जीति, कहना, खुशी, ऊबना.

उन्नाय (उन्नये) आयः (अयणे) (जयने) जयः ।

पु. पु. पु. पु. पु. पु.

निगादो (निगदे) मादो (मदे) उद्वेग (उद्भ्रमे)॥ १२॥

उदिति—उन्नये उन्नायः स्यात् । उन्नयनम् उत्पूर्वको 'णीञ् प्रापणे' भौवादिकस्तस्माद्भावे "अवोदोर्नियः" इति घञि, वृद्धौ च उन्नायः, अचि तु उन्नयः स्यादिति द्वे उन्नयनस्य । अयणे आयः स्यात् । अयणम् 'श्रिञ् सेवायाम्' भौवादिकस्तस्माद्भावे "श्रिणीभुवो" इति घञि, वृद्धौ च 'आयः, ल्युटि तु 'अयणं' स्यादिति द्वे आश्रयणस्य । जयने जयः स्यात् । जितम् 'जि जये' भौवादिकस्तस्माद्भावे ल्युटि, जयनम्, 'अचि' तु जयः । 'जपने जपः स्यादिति वा पाठस्तत्र जपितम् 'जप व्यक्तायां वाचि' भौवादिकाद्भावे ल्युटि जपनम् 'अपि' तु जपः स्यादिति द्वे उत्कर्षप्राप्तेः । निगदे निगादः स्यात् निगदनम् निपूर्वको 'गद व्यक्तायां वाचि' भौवादिकस्तस्माद्भावे घञि, वृद्धौ च निगादः "नौ गदेति" 'अपि' तु निगदः स्यादिति द्वे निगदनस्य । मदे मादः स्यात् । मदन 'मदी हर्षे' दैवादिकस्तस्माद्भावे 'घञि' मादः, "मदोऽनुपसर्गे" इत्यपि तु मदः स्यादि द्वे हर्षस्य । उद्भ्रमे उद्वेगः स्यात् । उद्वेजनम् उत्पूर्वकः 'ओविजी भयचलनयोः' तौदादिकस्तस्माद्भावे घञि, गुणे, कुत्वे च उद्वेगः, उद्भ्रमणम् उत्पूर्वको 'भ्रमु अनवस्थाने दैवादिकस्तस्माद्भावे घञि "नोदात्तोपदेशस्येति" वृद्ध्यभावे च 'उद्भ्रमः' स्यादि द्वे उद्वेजनस्य ॥ १२ ॥

न. पु. स. पु.

मींजना, अङ्गीकार, न मानना, रण में पुकारना.

विमर्दनं परिमलेऽभ्युपपत्तिरनुग्रहः ।

पु. पु. पु. पु.

निग्रहे'स्तु' निरोधः (स्याद) भियोगस्त्वभिग्रहः ॥१३॥

वीति—परिमले विमर्दनं स्यात् । विमृदितम् विपूर्वको 'मृद क्षोदे' क्रैयादिकस्तस्माद्भावे 'ल्युटि' गुणे, अन्नादेशे च विमर्दनम्, परिमलनम् परिपूर्वको 'मल धारणे' भौवादिकस्तस्माद्भावे घञि, संज्ञापूर्वकत्वाद्वृद्ध्यभावे च परिमलः स्यादिति द्वे कुङ्कुमादिमर्दनस्य । अभ्युपपदनम् अभ्युपपूर्वकः 'पद गतौ' दैवादिकाद्भावे 'क्तिनि' अभ्युपपत्तिः, अनुग्रहणम् अनुपूर्वको 'ग्रह उपादाने' क्रैयादिकस्तस्माद्भावे "ग्रहवृद" इत्यपि अनुग्रह. स्यादिति द्वे हितसंपादनाहितनिवारणप्रवृत्तेः । निग्रहणम् 'अपि' निग्रह. निरोधनम् निपूर्वको 'रुधिर आवरणे' रौधादिकस्तस्माद्भावे घञि, गुणे च निरोधः स्यात । स्वामिमते तु विग्रहस्तु विरोधः स्यादिति वा पाठस्तत्र विग्रहणम् 'अपि' विग्रह

१ "परिमलो विमर्देऽणौनि" (विश्वः) ॥ २ निग्रहस्तद्विरुद्धः स्यादिति पाठान्तरम् ॥

विरोधनम् 'घञि' विरोधः स्यादिति द्वे निरोधस्य। अभियोजनम् अभिपूर्वको 'युजिर् योगे' रौधादिकस्तस्माद्भावे 'घञि' गुणे, कुत्वे च अभियोगः, अभिग्रहणम् अभिपूर्वको ग्रह उपादाने, क्रैयादिकस्तस्माद्भावे 'अपि' अभिग्रहः "अभिग्रहोऽभिग्रहणेऽप्यभियोगे च गौरवे" (इति रुद्र.) इति द्वे अभियोगस्य ॥ १३ ॥

मूठीबाँधना, लूटना, बाँधना, सताप.

पु. पु. पु. पु. पु.
मुष्टिबन्ध'स्तु' संग्राहो (डिम्बे) डमरविप्लवौ।
न. स. पु. पु. पु. पु.
बन्धनं प्रसितिश्चारः स्पर्शः स्प्रष्टोपतप्तरि ॥ १४ ॥

स्विति—मुष्यतेऽनया, मुष्णाति वा क्तिनि, क्तिचि वा मुष्टिः "संपीडिताङ्गुलिर्मुष्टिः" (इति हलायुधः) बन्धनं 'घञि' बन्धः मुष्टेर्बन्धो मुष्टिबन्धः, संग्रहणम् संपूर्वकाद् 'ग्रह उपादाने' क्रैयादिकाद्भावे "समिमुष्टाविति" घञि, वृद्धौ च संग्राहः स्यादिति द्वे मुष्टि बन्धनस्य । डिम्बे लुण्ठने डमरविप्लवौ स्याताम् । डिम्बनम् 'डिबि नोदे' अस्माद्भावे 'घञि' डयनम् 'डीङ् विहायसागतौ' अस्मादौणादिके निपातिते वा डिम्बः "भयध्वनि पुष्कसेऽपि डिम्बः लीहनि विप्लवे" (इति रभसः) 'डम' इति शब्दस्यराणाम् डम पूर्वको 'रा दाने' आदादिकस्तस्माद्भावे बाहुलकाद् घञर्थे 'के' आलोपे च डमरः, प्रज्ञाद्यणि तु डामरोऽपि । विप्लवनम् विपूर्वकः 'प्लुङ् गतौ' भौवादिकस्तस्माद् "ऋदोरप्" इत्यपि, विप्लवः स्यादिति त्रीणि धाडक लुण्ठनादेरशास्त्रकलहस्य वा बद्धम् 'बन्ध बन्धने' क्रैयादिकस्तस्माद्भावे ल्युटि, अनादेशे च बन्धनम्, प्रसयनम् प्रपूर्वकः 'षिञ् बन्धने' सौवादिकस्तस्माद्भावे 'क्तिनि' प्रसितिः, चरणम् 'चर गतौ' भौवादिकाद् बन्धनार्थाद्भावे घञि, वृद्धौ च 'चारः' "बन्धापसर्पयोश्चारः" (इति रुद्र) स्वामि मते तु 'स्वारः' इति पाठस्तत्र स्वरति 'स्वृ शब्दोपतापयोः' भौवादिकात्पचाद्यचि स्वर प्रज्ञाद्यणि तु स्वारोऽपि स्यादिति त्रीणि बन्धनस्य । उपतप्तरि स्पर्शः स्प्रष्टा च स्यात् । स्पृशति 'स्पृश संस्पर्शने' तौदादिको धातूनामनेकार्थत्वादुपतापे वृत्तिस्तस्मात्कर्तरि "पदरुजविशस्पृशो घञ्" इति घञि, गुणे च स्पर्शः "स्पशः" इति रेफहीनपाठे तु 'स्पश बाधनस्पर्शनयोः' भौवादिकात्पचाद्यचि स्पशोऽपि, तृचि "अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्" इत्यमागमे च स्प्रष्टा पक्षे स्पर्ष्टा च । उपतपति उपपूर्वकः 'तप सन्तापे' भौवादिकस्तस्मात्तृचि, उपतप्ता स्यादिति त्रीणि संतप्तस्य, संतापस्य वा ॥ १४ ॥

अपकार, अभिप्रायानुरूपचेष्टा, प्रकृति का बदलना.

पु. पु. पु. पु. न.
निकारो विप्रकारः (स्यादा) कारस्त्विङ्ग इङ्गितम् ।
पु. पु. स्त्री. न.
परिणामो विकारो (द्वे समे) विकृतिविक्रिये ॥ १५ ॥

---

१ स्वामी तु चारस्थाने स्वारं पठित्वा स्वरादीनां चतुर्णां पर्यायतामाह ॥

२ स्वारस्पर्शयोर्भावे घञ्, स्प्रष्टोपतप्त्रोर्भावे "कृत्यल्युटो बहुलमिति" तृच् भावप्रकरणानुरोधादिति

नीति—निकृष्टीकरणम्, निपूर्वको 'डुकृञ् करणे' तानादिकस्तस्माद्भावे 'घञि' वृद्धौ च निकारः "निकारः स्यात्परिभवे धान्यस्योत्क्षेपणेऽपि च" (इति धरणिः) विप्रकरणम् विप्रपूर्वकात्कृञो भावे 'घञि' विप्रकारः स्यादिति द्वे अपकारस्य। आकरणम् आङ्पूर्वकात्कृञो भावे 'घञि' आकारः, इङ्गनम् 'इगि गतौ' भौवादिकाद्भावे 'घञि' इङ्गः, एवं भावे क्ते, नुमि इडागमे च 'इङ्गितम्' स्यादिति त्रीणि अभिप्रायानुरूपचेष्टायाः। परिणामनम् परिपूर्वको 'णम प्रह्वत्वे शब्दे च' भौवादिकस्तस्माद्भावे घञि, वृद्धौ च परिणामः, विकरणम् विपूर्वकात्कृञो भावे 'घञि' विकारः, क्तिनि विकृतिः एवं 'कृञः शचेति' शे, यकि, रिङादेशे च विक्रिया इमे द्वे समे समानार्थे स्यातामिति चत्वारि प्रकृतेरन्यथा भवनस्य ॥ १५ ॥

छीन लेना, बटोरना, लेना, खेल के लिये घूमना.

पु. पु. पु. पु.
अपहारस्त्वपचयः समाहारः समुच्चयः।
पु. न. पु. पु.[1]
प्रत्याहार उपादानं विहार (स्तु) परिक्रमः ॥ १६ ॥

अपेति—अपहरणम् अपपूर्वको 'हृञ् हरणे' भौवादिकस्तस्माद्भावे 'घञि' वृद्धौ च अपहारः, अपचयनम् अपपूर्वकः 'चिञ् चयने' सौवादिकस्तस्माद्भावे 'एरच्' इत्यचि, गुणे, अयादेशे च अपचयः स्यादिति द्वे अपहरणस्य। समाहरणम् समाङ्पूर्वको 'हृञ् हरणे' भौवादिकस्तस्माद्भावे घञि, वृद्धौ च समाहारः, समुच्चयनम् समुत्पूर्वकः 'चिञ् चयने' अस्माद्भावे 'अचि' समुच्चयः स्यादिति द्वे राशीकरणस्य। प्रत्याहरणम् प्रत्याङ् पूर्वकाद् 'हृञ् हरणे' अस्माद्भावे 'घञि' प्रत्याहारः, उपात्तम् उपाङ् पूर्वकाद्दाञो भावे 'ल्युटि' अनादेशे च उपादानम्, स्यादिति द्वे स्वविषयेभ्य इन्द्रियपरावर्तनस्य। विहरणम् विपूर्वकाद् हृञो भावे घञि विहारः, परिक्रमणम् परिपूर्वकः 'क्रमु पादविक्षेपे' भौवादिकस्तस्माद्भावे 'घञि' "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति वृद्ध्यभावे च परिक्रमः स्यादिति द्वे क्रीडार्थसंचरणस्य ॥ १६ ॥

चोरी करना, युक्ति से बाणादि का निकालना, नकल करना, खर्च.

पु. न. पु. न.
अभिहारोऽभिग्रहणं निर्हारोऽभ्यवकर्षणम्।
पु. पु. पु.
अनुहारोऽनुकारः (स्यादर्थस्यापगमे) व्ययः ॥ १७ ॥

अभीति—अभिहरणम् अभिपूर्वकाद् हृञो भावे घञि, वृद्धौ च अभिहारः, अभ्याङ्पूर्वकाल्ल्युटि तु अभ्याहरणमपि अभिगृहीतम् अभिपूर्वकाद् 'ग्रह उपादाने' अस्माद्भावे ल्युटि अनादेशे, णत्वे च 'अभिग्रहणम्' स्यादिति द्वे अभिमुख्येन ग्रहणस्य। निर्हरणम् "निर्" पूर्वकाद् हृञो भावे 'घञि' निर्हारः, अभ्यवकृष्टम्

[1] पृथक्नानामवर्गो परिक्रम इति ॥

अभ्यवपूर्वकः 'कृष् विलेखने' भौवादिकस्तौदादिकश्च तस्माद्भावे ल्युटि गुणे, अनादेशे, णत्वे च अभ्यवकर्षणं स्यादिति द्वे शल्यादेर्युक्त्या निःसारणस्य । अनुहरणम्, अनुपूर्वकाद् हृञो भावे घञि, वृद्धौ च अनुहारः, अनुकरणम् अनुपूर्वकात् कृञो भावे घञि अनुकारः स्यादिति द्वे सदृशीकरणस्य । अर्थस्य धनादिकस्य अपगमे अपक्षयेऽल्पीभावे व्ययः स्यात् व्ययनम् 'व्यय वित्तसमुत्सर्गे' चुराद्यदन्तस्तस्माद्भावे घञि, 'एरच्' इत्यचि वा व्ययः स्यादित्येकमर्थापगमस्य ॥ १७ ॥

पु. स. पु.
वहना, **प्रवाह(स्तु)प्रवृत्तिः (स्या) त्प्रवहो "गमनं बहिः"।**
बाहर जाना, पु. पु. पु. पु. पु. पु.
संयम. **वियामो वियमो यामो यमः संयामसंयमौ ॥ १८ ॥**

प्रेति—प्रवहणम् प्रपूर्वको 'वह प्रापणे' भौवादिकस्तस्माद्भावे 'घञि' वृद्धौ च प्रवाहः, प्रवर्तनम् प्रपूर्वको 'वृतु वर्तने' भौवादिकस्तस्माद्भावे 'क्तिनि' प्रवृत्तिः स्यादिति द्वे अविच्छेदेन जलादिप्रवृत्तेः । वहिर्गमनं प्रवहः स्यात् । वहत्यनेन 'गोचरसंचरवहेति' घान्ते निपातिते वहः प्रकृष्टो वहः प्रवहः "प्रवहस्तु बहिर्यात्रा मातरिश्वप्रभेदयोः" (इति विश्वः) इत्येकं वहिर्यात्रायाः । वियमनम् विपूर्वको 'यम उपरमे' भौवादिकस्तस्माद्भावे 'घञि' वृद्धौ च वियामः, "यमः समुपनिविपु च" इति 'अपि' वियमः, यमनम् 'घञि' यामः चादनुपसर्गाद् अपि तु यमः, संयमनम् 'घञि' संयामः 'अपि' तु संयमः स्यादिति षट् संयमनस्य । स्वामी तु वियामवियमाविति द्वे विविधयमनस्य । यामयमाविति द्वे उपरतिमात्रस्य । संयामसंयमाविति द्वे च संयमनस्येति व्याख्यां व्याख्यातवानिति ॥ १८ ॥

मारण कर्म, न. पु. स. पु.स.
जागना, **हिंसाकर्माभिचारः (स्या)ज्जागर्याजागरा (द्वयोः)।**
विघ्न, पु. पु. पु. पु. पु.
पासका आश्रय. **विघ्नोऽन्तरायः प्रत्यूहः (स्यादु) पघ्नोऽन्तिकाश्रये ॥ १९ ॥**

हिमिति—हिंसाफलं कर्म शाकपार्थिवादित्वान्मध्यमपदलोपे हिंसाकर्म, अभिचरणम् अभिपूर्वकः 'चर गतिभक्षणयोः' भौवादिकस्तस्माद्भावे 'घञि' वृद्धौ च अभिचारः स्यादिति द्वे मारणादिक्रियायाः । जागरणम् "जागृ निद्राक्षये" आदादिकस्तस्माद्भावे 'शे' यकि, "जाग्रोऽविचिण्णल्ङित्सु" इति गुणे, टापि च जागर्या गुणात्परत्वाद्दिडादेशे जाग्रिया, क्तिनि जागर्तिः, 'जागर्तेरकारो वा' इत्यप्रत्यये, गुणे, टापि च जागरा द्वयोः स्त्रीपुंसयोः स्यादिति द्वे जागरणस्य । विहननम् विपूर्वको 'हन हिंसागत्योः' अस्माद् 'घञर्थे कः' इति 'के' "गमहनजनखनघसामिति" उपधालोपे, "हो हन्तेरिति" कुत्वे च विघ्नः अन्तर्मध्ये, अन्तरस्य व्यवधानस्य वा अयनम् 'अय गतौ' भौवादिकः 'इण् गतौ' आदादिकश्च तस्माद्भावे घञि,

अचि वा अन्तरायः, - प्रत्यूहनम् प्रतिपूर्वकः 'ऊह वितर्के' भौवादिकस्तस्माद्भावे 'घञ्' प्रत्यूहः स्यादिति त्रीणि विघ्नस्य । अन्तिकाश्रये उपघ्नः स्यात् । उपहन्यते, उपहननं वा उपपूर्वकाद्धन्तेरप्प्रत्यये उपधालोपे, कुत्वे च उपघ्नः "उपघ्नआश्रये" इति साधुः । अन्तिके आश्रीयते आश्रयणं वा "एरच्" इत्यचि, गुणे, अयादेशे च अन्तिकाश्रयः स्यादिति द्वे संनिहिताश्रयस्य ॥ १९ ॥

उपभोग, परिवार, महावियोग, अभिप्राय.

निर्वेश उपभोगः (स्या) त्परिसर्पः परिक्रिया ।
(पु. पु. पु. स.)

विधुरं (तु) प्रविश्लेषोऽभिप्रायश्छन्द आशयः ॥ २० ॥
(न. पु. पु. पु. पु.)

निरिति—निर्वेशनम् निरपूर्वको 'विश प्रवेशने' तौदादिकस्तस्माद्भावे 'घञ्' गुणे च निर्वेशः, उपभोजनम् उपपूर्वको 'भुज पालनाभ्यवहारयोः' रौधादिकस्तस्माद्भावे घञ्, गुणे, कुत्वे च उपभोगः स्यादिति द्वे उपभोगस्य । परितः समन्तात्सर्पणम् परिपूर्वकः 'सृप्लृ गतौ' भौवादिकस्तस्माद्भावे घञ्, गुणे, रपरत्वे च परिसर्पः, परिकरणम् परिपूर्वकात्कृञो भावे "कृञः शचेति" शे, यकि, रिङादेशे च परिक्रिया स्यादिति द्वे परिजनादिनावेष्टनस्य । विगता धूः कार्यभारो "ऋक्पूरब्धूः पथामानक्षे" इत्यप्रत्यये विधुरम् क्लीवत्वं लोकात् । प्रविश्लेषणम् प्रविपूर्वकः 'श्लिष आलिङ्गने' दैवादिकस्तस्माद्भावे घञ्, गुणे च प्रविश्लेषः "वैकल्येऽपि च विश विधुरं विकले त्रिषु" (इति त्रिकाण्डशेषः) इति द्वे विश्लेषस्य । अभिप्रयर अभिपूर्वकः 'प्रीञ् तर्पणे' क्रैयादिकस्तस्माद्भावे 'घञ्' वृद्धौ आयादेशे च अ प्रायः, छन्दनम् 'छदि संवरणे' चौरादिकस्तस्माद्भावे घञ् छन्दः, चन्दनं वे विग्रहे तु 'चदि आह्लादने' भौवादिकस्तस्मात् "सर्वधातुभ्योऽसुन्निति" असु "चन्देरादेश्च छः" इति छे च छन्दस्सान्तोपि आशयनम् आङ्पूर्वकः 'शीङ् स्व आदादिकस्तस्माद्भावे "एरच्" इत्यचि, गुणे, अयादेशे च आशयः स्यादि त्रीण्यभिप्रायस्य ॥ २० ॥

संक्षेप, विगाड़, चारों ओर जाना, आसन.

संक्षेपणं समसनं पर्य्यवस्था विरोधनम् ।
(न. न. स. न.)

परिसर्या परीसारः (स्यादा)स्या(त्वा)सना स्थितिः ॥ २१
(स. पु. स. स. स.)

समिति—संक्षिपम् संपूर्वकः 'क्षिप प्रेरणे' तौदादिकस्तस्माद्भावे ल्युटि, गुणे, अन देशे, णत्वे च संक्षेपणम्, समस्तम् संपूर्वकः 'असु क्षेपणे' दैवादिकस्तस्माद्भावे ल्युटि अनादेशे च समसनं स्यादिति द्वे संक्षेपस्य । पर्यवस्थानम् पर्यवपूर्वकात्तिष्ठतेर्भा "आतश्चोपसर्गे" इत्यङि, आलोपे, टापि च पर्यवस्था विरुद्धम् विपूर्वको 'रुधि आवरणे' अस्माद्भावे ल्युटि, गुणे, अनादेशे च विरोधनं स्यादिति द्वे विरोधस्य । परि

सरणम् परिसर्या "परिचर्यापरिसर्येति" साधुः। एवं परिपूर्वकात्सरतेर्भावे 'घञि' उपसर्गस्य 'घञि' इति दीर्घे, वृद्धौ च परीसारः, दीर्घाभावे तु परिसारोऽपि स्यादिति द्वे सर्वतो गमनस्य। आसनम् 'आस उपवेशने' अस्माद्भावे "कृत्यल्युटो बहुलम्" इति 'ण्यति' आस्या, "ण्यासश्रन्थो युच्" इति 'युचि' अनादेशे, टापि च आसना, स्थानम् 'ष्ठा गतिनिवृत्तौ' भौवादिकस्तस्माद्भावे "स्थागापापचो भावे" इति क्तिनि "द्यतिस्यतीति" इत्वे च स्थितिः स्यादिति त्रीणि आसनस्य ॥ २१ ॥

विस्तार, पु. पु. पु. पु.
शब्दविस्तार, **विस्तारो विग्रहो व्यासः (स च शब्दस्य) विस्तरः।**
अङ्गमीजना, न. न. पु. न.
लोप या छिपना. **(स्या) न्मर्दनं संवाहनं विनाशः (स्याद)दर्शनम् ॥२२॥**

वीति—विस्तरणम् विपूर्वकः 'स्तृञ् आच्छादने' क्रैयादिकस्तस्माद्भावे "प्रथने वावशब्दे" इति घञि, वृद्धौ च विस्तारः, विग्रहणम् विपूर्वकाद् 'ग्रह उपादाने' अस्माद्भावे "ग्रहवृद–" इत्यपि विग्रहः, व्यसनम् विपूर्वकः 'असु क्षेपणे' दैवादिकस्तस्माद्भावे घञि, वृद्धौ च व्यासः स्यादिति त्रीणि विस्तारस्य। स च शब्दस्य व्यासश्चेत्तदा विस्तरः स्यात्। विस्तरणम् विपूर्वकात्स्तृणातेर्भावे "ऋदोरप्" इत्यपि, गुणे च विस्तरः स्यादित्येकं शब्दविस्तरस्य। मृदितम् 'मृद क्षोदे' क्रैयादिकस्तस्माद्भावे ल्युटि मर्दनम् एवं संवाहितम् संपूर्वकाद्वहतेस्स्वार्थण्यन्ताद्भावे ल्युटि, "वाहनमाहितादिति" निपातनाद्दीर्घेऽपि वा संवाहनं संवहनं वा स्यादिति द्वे पादमर्दनादेः। विनशनम् विपूर्वकान्नश्यतेर्भावे घञि, वृद्धौ च, विनाशः, दर्शनस्याभावोऽदर्शनं स्यादिति द्वे तिरोधानस्य ॥ २२ ॥

परिचय, पु. पु. पु न.
धानका फैलना, **संस्तवः(स्या)त्परिचयः प्रसर(स्तु)विसर्पणम्।**
धान्यादि का संग्रह, पु. पु. पु. न.
समीप या पड़ोस. **नीवाक(स्तु)प्रयामः(स्या)त्संनिधिः संनिकर्षणम् ॥२३॥**

समिति—संपूर्वकात्स्तौतेर्भावे "ऋदोरप्" इत्यपि, गुणे, अवादेशे च संस्तवः, परितः समन्ताच्चयनम् परिपूर्वकाच्चिनोतेर्भावे "एरच्" इत्यचि, गुणे, अयादेशे च परिचयः स्यादिति द्वे परिचयस्य "पहिचान" इति ख्यातस्य। प्रसरणम् प्रपूर्वकात्सरतेर्भावे बाहुलकादपि, गुणे च प्रसरः, विसृमम् विपूर्वकः 'सृप्लृ गतौ' भौवादिकस्तस्माद्भावे ल्युटि, गुणे च विसर्पणं स्यादिति द्वे व्रणादिविसरणस्य। निवचनम् निपूर्वकाद्वक्तेर्ब्रवीतेर्वा भावे घञि 'उपसर्गस्येति' दीर्घे, वृद्धौ, कुत्वे च नीवाकः, प्रयमणम् प्रपूर्वकाद्यच्छतेर्भावे घञि, वृद्धौ च प्रयामः स्यादिति द्वे धान्यसंचयस्य अयानरस्य वा। संनिधानम् संपूर्वकाद्दधातेर्भावे "उपसर्गे घोः किः" इति कौ, आलोपे च संनिधिः, स्वार्थे के तु संनिधं च "संनिधं समीपमुपकण्ठम्" (इति गोपालितः) संनिकृष्टम् संनिपूर्वकात्कृषेर्भावे ल्युटि गुणे च संनिकर्षणं स्यादिति द्वे संनिधानस्य ॥ २३ ॥

अन्न काटना, अन्नादिकों को साफ करना, प्रसंग, नरी.

पु. पु. न. पु. न. पु.
लवोऽभिलावो (लवने) निष्पावः (पवने) पवः ।
पु. पु. पु. न.
प्रस्तावः(स्याद)वसरस्त्रसरः सूत्रवेष्टनम् ॥ २४ ॥

लेति—लवने छेदने लवः, अभिलवश्च स्यात् । लवनम् लुनातेर्भावे "ऋदोरप्" इत्यपि लवः, अभिलवनम् अभिपूर्वकाल्लूञो भावे 'निरभ्योः पूल्वोः' इति घञि, वृद्धौ, आवादेशे च अभिलावः, लूनम्, लुनातेर्भावे ल्युटि लवनं स्यादिति त्रीणि छेदनस्य। पवने निष्पावः पवश्च स्यात् । निष्पवनम् निष्पूर्वकात्पुनातेर्भावे घञि निष्पावः, पूतम् पूञो भावे ल्युटि, गुणे अनादेशे च पवनम्, एवम् "ऋदोरप्" इत्यपि तु पवः स्यादिति त्रीणि धान्यादीनां बहुलीकरणस्य । प्रस्तवनम् प्रपूर्वकात्स्तौतेर्भावे 'प्रेद्रुस्तुस्रुवः' इति घञि, वृद्धौ, आवादेशे च प्रस्तावः, अवसरणम् अवपूर्वकात्सरतेर्भावे वाहुलकादपि गुणे च अवसरः स्यादिति द्वे प्रसंगस्य। त्रसनम् त्रस्यतेर्भावे वाहुलकादौणादिके 'अरनि' त्रसरः "तसरः" इति पाठे तु तननम् तनोतेर्भावे "तन्पृषिभ्यां क्सरन्" इति क्सरनि, नलोपे च तसरोऽपि सूत्राणां तन्तूनां वेष्टनं सूत्रवेष्टनं स्यादिति द्वे सूत्रस्य वेष्टनक्रियायाः ॥ २४ ॥

प्रथम गर्भ, प्रीति प्रार्थित, बुद्धिशक्ति, कोटका मार्ग.

पु. पु. पु. पु.
प्रजनः (स्यादु) पसरः प्रश्रयप्रणयौ (समौ) ।
स पु. पु. पु.
धीशक्तिर्निष्क्रमो(ऽस्त्री तु) संक्रमो दुर्गसंचरः ॥ २५ ॥

प्रेति—प्रजननम् प्रपूर्वको 'जनी प्रादुर्भावे' दैवादिकस्तस्माद्भावे 'घञि' "जनिवध्योरिति" वृद्ध्यभावे च प्रजनः, उपसरणम् उपपूर्वकात्सरतेर्भावे "प्रजने सर्तेः" इत्यपि, गुणे च उपसरः स्यादिति द्वे प्रथमगर्भग्रहणस्य । प्रश्रयणम् प्रपूर्वकः 'श्रिञ् सेवायाम्' भौवादिकस्तस्माद्भावे "एरच्" इत्यचि गुणे, अयादेशे च प्रश्रयः, "प्रसरः" इति वा पाठस्तत्र प्रसरणम् प्रसरतेर्भावे वाहुलकादपि, गुणे च प्रसरोऽपि, "प्रसरः प्रणये वेगे" (इति मेदिनी) प्रणयनम् प्रपूर्वकान्नयतेर्भावे अचि, गुणे, अयादेशे च प्रणयः उभौ समौ समानार्थौ स्यातामिति द्वे प्रीत्या प्रार्थनस्य । धियः शक्तिः धीशक्तिः साष्टधा "शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहौ च विज्ञानं तत्त्वज्ञानं च धी गुणाः" निष्क्रमणम् निष्पूर्वकात्क्राम्यतेर्भावे घञि, "नोदात्तोपदेशस्येति" वृद्ध्यभावे च निष्क्रमः "निष्क्रमो निर्गमे ख्यातौ बुद्धिसंपदि निष्क्रमः" (इति रुद्रः) इति द्वे बुद्धिशक्तेः । संक्रमणम् संपूर्वकात्क्रमेर्भावे घञि, वृद्ध्यभावे च संक्रमः अस्त्री पुन्नपुंसकं स्यात् । दुःखेन गम्यतेऽस्मिन्निति "सुदुरोरधिकरणे" इति (ड) दुर्गम्, संचरणम् संपूर्वकाच्चरतेर्भावे पुंसीति 'घ' संचरः

'घञि' तु संचारोऽपि दुर्गस्य संचरो दुर्गसंचरः स्यादिति द्वे दुर्गप्रवेशनक्रियायाः ॥ २५ ॥

युद्धकी बढ़ती या कर्मारम्भ में पहला प्रयोग, प्रथमारम्भ या आरम्भमात्र, वेग.

पु. पु. पु. पु.
प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः (स्या) दुपक्रमः ।
न. पु. पु. पु. स
(स्याद)भ्यादानमुद्घात आरम्भः संभ्रमस्त्वरा॥२६॥

प्रेति—प्रत्युत्क्रमणम् प्रत्युत्पूर्वकात्क्राम्यतेर्भावे घञि, "अनुदात्तोपदेशस्येति" वृद्ध्यभावे च प्रत्युत्क्रमः, क्तिनि तु प्रत्युत्क्रान्तिः, प्रयोजनम् प्रपूर्वकाद्युनक्तेर्भावे घञि, गुणे, कुत्वे च प्रयोगः स एवार्थो यस्येति प्रयोगार्थः "प्रयुद्धार्थः" इति वा पाठस्तत्र योधनं युद्धम् प्रकृष्टं युद्धमर्थोऽस्येति प्रयुद्धार्थोऽपि "प्रत्युत्क्रमः प्रयुद्धार्थः" (इति भागुरिः) इति द्वे कर्मारम्भे प्रथमप्रयोगस्य । प्रक्रमणम् प्रपूर्वकात्क्राम्यतेर्भावे घञि वृद्ध्यभावे च प्रक्रमः, एवम् उपक्रमणम् उपपूर्वकात्क्रमेर्भावे घञि उपक्रमः, आत्तमादानम्, आभिमुख्येनादानम् अभ्यादानम्, उद्धननम् उत्पूर्वकाद्धन्तेर्भावे घञि "हनस्तोऽचिण्णलोः" इति नस्य तत्वे कुत्वे वृद्धौ च उद्घातः, एवमुपोद्घातोऽपि आरम्भणम् आङ्पूर्वकाद् 'रभ राभस्ये' भौवादिकाद्भावे घञि, "रभेरशब्लिटोः इति नुमि च आरम्भः स्यादिति पञ्चारम्भस्य अन्ये त्वाद्यौ प्रथमारम्भस्य त्रीण्यारम्भमात्रस्येत्याहुर्वा । संभ्रमणम् संपूर्वकाद्भ्राम्यतेर्भावे घञि, वृद्ध्यभावे च संभ्रमः, त्वरणम् त्वरतेर्भावे घटादीनां षित्वातिदेशादङि टापि च त्वरा स्यात् "आवेगस्तु त्वरा त्वरिः" (इति वाचस्पतिः) इति द्वे त्वरायाः ॥ २६ ॥

कार्य का रुकना, गिरना, साक्षात्कार, तिलक लगाना.

पु. पु. २ पु. न.
प्रतिबन्धः प्रतिष्टम्भोऽवनाय (स्तु) निपातनम् ।
पु. पु. पु. न.
उपलम्भस्त्वनुभवः समालम्भो विलेपनम् ॥ २७ ॥

प्रेति—प्रतिबन्धनम् प्रतिपूर्वकाद्बध्नातेर्भावे घञि प्रतिबन्धः "विष्कम्भः प्रतिबन्धो वियोगः" (इति बोपालितः) प्रतिष्टम्भनम् प्रतिपूर्वकात्स्तभ्नातेर्भावे घञि "स्तम्भेरिति" षत्वे च प्रतिष्टम्भः, एवं विष्टम्भोऽपि स्यादिति द्वे रोधस्य । अवनयनम् अवपूर्वकान्नयतेर्भावे "अवोदोर्नियः" इति घञि, वृद्धौ, आयादेशे च अवनायः, अचि तु अवनयोऽपि निपातनम् निपूर्वकात्पततेः स्वार्थण्यन्ताद्भावे ल्युटि अनादेशे च निपातनम्, निपातनमिति वा पाठस्तत्र निपूर्वकाद् 'यत निकारोपस्कारयोः' चौरादिकाद्भावे ल्युटि निपातनमपि स्यादिति द्वे अवोनयनस्य । उपलम्भनम् उपपूर्वकाल्लभतेर्भावे घञि "उपसर्गात्खल्घञोः" इति नुमि च उपलम्भः अनुभवनम् अनुपूर्वकाद्-

१ "संभ्रमो निर्गमो भ्रमस्त्वरा." (इति रत्नकोषः) ॥
२—'[illegible]' इति रघुः ॥

वर्तेर्भावे "ऋदोरप्" इत्यपि, गुणे, अवादेशे च अनुभवः स्यादिति द्वे साक्षात्कारस्य। समालम्भनम् समाङ्पूर्वकाल्लभेर्भावे घञि, नुमि च समालम्भः, विलिप्तम् विपूर्वकाल्लिम्पतेर्भावे ल्युटि, गुणे, अनादेशे च विलेपनं स्यादिति द्वे कुङ्कुमादिनोपलेपस्य ॥ २७ ॥

प्रीति तोड़ना, अतिदान, अतिप्रसिद्धि, पदार्थों का देखना.

पु. पु. पु. न.
विप्रलम्भो विप्रयोगो विलम्भस्त्वतिसर्जनम् ।
पु. स. स. पु.
विश्राव(स्तु)प्रविख्यातिरवेक्षा प्रतिजागरः ॥ २८ ॥

वीति—विप्रलम्भनम् विप्रपूर्वकाल्लभतेर्भावे 'घञि' नुमि च विप्रलम्भः विप्रयोजनम् विप्रपूर्वकाद्युजेर्भावे घञि, गुणे कुत्वे च विप्रयोगः स्यादिति द्वे रागिणोर्वियोजनस्य। विलम्भनम् विपूर्वकाल्लभेर्भावे घञि "उपसर्गादिति" नुमि च विलम्भः, अतिसृष्टम् अतिपूर्वकात्सृज्यतेर्भावे ल्युटि, गुणे, अनादेशे च अतिसर्जनं स्यादिति द्वे अतिदानस्य। विश्रवणम् विपूर्वकाच्छृणोतेर्भावे "वौ क्षुश्रुवः" इति घञि, वृद्धौ, आवादेशे च विश्रावः, प्रविख्यानम् प्रविपूर्वकात्ख्यातेर्भावे क्तिनि, प्रविख्यातिः, एवं प्रतिख्यानम् प्रतिख्यातिरपि स्यादिति द्वे अतिप्रसिद्धेः। अवेक्षणम् अवपूर्वकादीक्षतेर्भावे "गुरोश्च हलः" इत्यप्रत्यये टापि च अवेक्षा, प्रतिजागरणम् प्रतिपूर्वकाज्जागर्तेर्भावे घञि "जाग्रोऽविचिण्णलिति" गुणे रपरत्वे च प्रतिजागरः स्यादिति द्वे अवेक्षणस्य ॥ २८ ॥

पढना, गीला करना, क्लेश, समागम.

पु. पु. पु. पु. पु. न.
निपाठनिपठौ पाठे तेमस्तेमौ समुन्दने ।
पु. पु. पु. पु. पु. पु.
आदीनवास्रवौ क्लेशे मेलके सङ्गसङ्गमौ ॥ २९ ॥

नीति—पाठे निपाठनिपठौ स्याताम्। निपठनम् निपूर्वकात्पठतेर्भावे 'घञि' वृद्धौ निपाठः "नौ गदनदेति" अपि तु निपठः एवं केवलादपि घञि पाठः स्यादिति त्रीणि पठनस्य। समुन्दने संक्लेदने तेमस्तेमौ स्याताम्। तेमनम् तिम्यतेर्भावे घञि, गुणे तेमः, एवं स्तेमनं स्तेमः, समुन्नं समुत्तं वा संपूर्वकादुनत्तेर्भावे ल्युटि अनादेशे 'समुन्दनम्' स्यादिति त्रीण्यार्द्रीभावस्य। क्लेशे आदीनवास्रवौ स्याताम्। आदानम् आपूर्वको 'दीङ् क्षये' दैवादिकस्तस्माद्भावे क्ते स्वादीनामोदित्त्वात् "ओदितश्चेति" निष्ठानत्वे च आदीनम् + वानम् वातेर्बाहुलकाद् "घञर्थे कः" इति के आलोपे च वः, आदीनस्य वः आदीनवः, आस्रवणम् आङ्पूर्वकात्स्रवतेर्भावे अपि, गुणे अवादेशे आस्रवः, क्लेशनम् क्लिश्नातेर्भावे घञि, गुणे च क्लेशः स्यादिति त्रीणि क्लेशस्य। मेलके सङ्गसङ्गमौ स्याताम्। मेलनम् मिलतेर्भावे घञि मेलः स्वार्थे कनि च मेलकः सञ्जन

१—आस्रवशब्दोऽप्ययमनेनेति आस्रवः केषांचिन्मते तु आश्रवणमाश्रवस्तालव्यमध्योऽपि ॥

'षञ्ज सङ्गे' भौवादिकस्तस्माद्भावे घञि, कुत्वे, परसवर्णे च सङ्गः, संगमनम् संपूर्वका-द्गच्छतेर्भावे "ग्रहवृदृनिश्चिगमश्च" इत्यपि संगमः स्यात् । प्रज्ञाद्यणि तु सांगमोऽपि "नामेलः संगमो नाना" (इत्यमरमाला) इति त्रीणि संगमस्य ॥ २९ ॥

न. न. न. स. पु.

खोजना, **संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।**

पु. पु. पु. न.

लिपटना. **परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥**

संवीति—संवीक्षितम् संविपूर्वकादीक्षतेर्भावे ल्युटि, अनादेशे च संवीक्षणम्, स्वामि-मते तु "अन्वीक्षितमन्वीक्षणम्, अन्वेषितमन्वेषणम्, गवेषितं गवेषणमित्यपि त्रयं स्यात्" विचितम् विपूर्वकाच्चिनोतेर्भावे ल्युटि, गुणे, अनादेशे, अयादेशे च विचयनम्, मार्गितम् 'मार्ग अन्वेषणे' चौरादिकस्तस्माद्भावे ल्युटि मार्गणम्, मृगणम् 'मृग अन्वेषणे' चुरागदन्ताद्भावे 'ययास्येति' युचि, अनादेशे, टापि च मृगणा मुकुटमते तु "परिचर्या परिसर्या मृगयेति" निपातिते मृगयाऽपि घञि तु मृगः स्यादिति पञ्चान्वेषणस्य । परिरम्भणम् परिपूर्वकाद्रभतेर्भावे घञि, "रभेरशब्लिटोः" इति नुमि च परिरम्भः, दीर्घे च परीरम्भोऽपि, परिष्वञ्जनम् परिपूर्वकः 'ष्वञ्ज परिष्वङ्गे' भौवादिकस्तस्माद्भावे घञि, कुत्वे, परसवर्णे, "परिनिविभ्यः" इति षत्वे च परिष्वङ्गः, संश्लेषणम् संपूर्व-कात् श्लिष्यतेर्भावे घञि, गुणे च संश्लेषः, उपगूढम् उपपूर्वकाद्गूहतेर्भावे ल्युटि "ऊदुपधाया गोहः" इत्युपधोदादेशे च उपगूहनं स्यादिति चत्वार्यालिङ्गनस्य ॥ ३० ॥

न. न. न. न. न.

देखना, **निर्वर्णनं (तु) निध्यानं दर्शनालोकनेक्षणम् ।**

न. न. पु. स.

निकालना. **प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ ३१ ॥**

नीति—निर्वर्णितम् निर्पूर्वकाद्वर्णयतेर्वर्णशब्दात् "सत्यापेति" णिजन्ताद्वा भावे ल्युटि, अनादेशे च निर्वर्णनम्, निध्यातम् निपूर्वकाद्ध्यायतेर्भावे ल्युटि निध्यानम्, दृष्टम् पश्यतेर्भावे ल्युटि, गुणे, अनादेशे च दर्शनम्, आलोकितम् आङ्पूर्वकाल्लोकते-र्भावे ल्युटि आलोकनम् घञि तु आलोकोऽपि । ईक्षितम् ईक्षतेर्भावे ल्युटि, अनादेशे, णत्वे च ईक्षणम्, एवं लक्षितं लक्षणमपि स्यादिति पञ्च निरीक्षणस्य । प्रत्याख्यातम् प्रत्याङ्पूर्वकात् ख्यातेश्चक्षिङ्‌देशाद्वा भावे ल्युटि प्रत्याख्यानम्, निरस्तम् निर्पूर्वका-दस्यतेर्भावे ल्युटि अनादेशे च निरसनम्, प्रत्यादिष्टम् प्रत्याङ्पूर्वकाद्दिशतेर्भावे घञि गुणे च प्रत्यादेशः, निराकरणम् निराङ्पूर्वकात्करोतेर्भावे 'क्तिनि' निराकृतिः स्यादिति चत्वारि निराकरणस्य ॥ ३१ ॥

१—[illegible]

प्रहर के सोने वाले, घिनाना, निन्दा या करुणा.

पु. पु.
उपशायो विशायश्च (पर्यायशयनार्थकौ) ।
न. स. स. स.
अर्तनं (च) ऋतीया (च) हृणीया (च) घृणा(र्थके) ॥ ३२ ॥

उपेति–उपशायो विशायश्चेत्युभौ पर्यायेण क्रमेण शयनं तदेवार्थो ययोरिति पर्यायशयनार्थकौ स्याताम् । उपशयनम् उपपूर्वकाच्छेतेर्भावे "व्युपयोः शेतेः पर्याये" इति घञि, वृद्धौ, आयादेशे च उपशायः, एवं विशयनं विशायश्च स्यादिति द्वे पर्यायशयनार्थकस्य । "घृणाजुगुप्साकृपयोरिति" (विश्वः) घृणा एवार्थो यस्येति घृणार्थकस्तस्मिन् घृणार्थके अर्तनम्, ऋतीया, हृणीया च स्यात् । ऋतितम्, ऋतिः सौत्रस्तस्मादीयङोऽभावे भावे ल्युटि, गुणे, अनादेशे च अर्तनम्, ईयङ् पक्षे "अप्रत्ययात्" इत्यप्रत्यये, टापि च ऋतीया, हृणीयनम् कण्ड्वादित्वाद् हृणीयतेर्भावे अप्रत्यये, टापि च हृणीया, पृषोदरादित्वाद्ध्रस्वे च हृणियापि, घर्णनम् घृणोतेर्भावे भिदादित्वादङि टापि च घृणा "मोहो वीर्ज्या जुगुप्सा च हृणीया हृणिया घृणा" (इति वाचस्पतिः) इति चत्वारि जुगुप्सनस्य ॥ ३२ ॥

उलटा पलटा, अतिक्रम.

पु. पु. पु. पु.
स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये ।
पु. पु. पु. पु.
पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ॥ ३३ ॥

स्यादिति–विपर्यये व्यत्यासः, विपर्यासः, व्यत्ययश्च स्यात् । व्यत्यसनम् व्यतिपूर्वकादस्यतेर्भावे घञि, वृद्धौ च व्यत्यासः, एवं विपर्यसनं विपर्यासः, व्यत्ययनम् व्यतिपूर्वकादेतेर्भावे "एरच्" इत्यचि, गुणे, अयादेशे च व्यत्ययः, विपर्ययनम् विपरिपूर्वकादेतेर्भावे अचि विपर्ययः घञि तु 'विपर्यायः' स्यादिति चत्वारि व्यतिक्रमस्य । पर्ययणम् परिपूर्वकादेतेर्भावे अचि पर्ययः, घञि तु पर्यायः, अतिक्रमणम् अतिपूर्वकात्क्राम्यतेर्भावे घञि, "नोदात्तोपदेशस्येति" वृद्ध्यभावे च अतिक्रमः, तस्मिन्नतिक्रमे अतिपातः, उपात्ययश्च स्यात् । अतिपतनम् अतिपूर्वकात्पततेर्भावे घञि, वृद्धौ च अतिपातः, उपात्ययनम् उपातिपूर्वकादेतेर्भावे अचि, गुणे, अयादेशे च उपात्ययः स्यादिति चत्वार्यतिक्रमस्य ॥ ३३ ॥

भृत्यों को भेजना, यज्ञ में ब्राह्मणों की स्तुति का स्थान.

न.
(प्रेषणं यत्समाहूय तत्रस्या) त्प्रतिशासनम् ।
पु.
(स) संस्तावः (क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम्) ॥ ३४ ॥

प्रेषिति–समाहूय यत् प्रेषणं भृत्यादीनामाज्ञाकरणं तत्र प्रतिशासनम् स्यात् । प्रतिपूर्वकाच्छास्तेर्भावे ल्युटि अनादेशे च प्रतिशासनम् स्यादित्येकं भृत्यादिप्रेषणस्य ।

क्रतुषु यागेषु द्विजन्मनां वेदगायकानां विप्राणां या स्तुतिभूमिः स संस्तावः स्यात्। समेत्य स्तुवन्त्यत्रेति विग्रहे संपूर्वकात्स्तौतेराधारे "यज्ञे समिस्तुवः" इति घञि, वृद्धौ, आवादेशे च संस्तावः स्यादित्येकं यज्ञे स्तावकद्विजावस्थानभूमेः ॥ ३४ ॥

पु.
बहटन या ठीहा, खन्ता या गदेला (निधाय तक्ष्यते यत्र काष्ठे काष्ठं स) उद्घनः।

पु. पु.
स्तम्बघ्न (स्तु)स्तम्बघनः (स्तम्बो येन निहन्यते)॥३५॥

नीति—यत्र यस्मिन् काष्ठे काष्ठं निधाय संस्थाप्य तक्ष्यते तनूक्रियते स काष्ठरूपाधारः उद्घनः स्यात्। उदूर्ध्वं हन्यतेऽस्मिन् उत्पूर्वकाद्धन्तेरधिकरणे अपि "उद्घनोऽत्याधानम्" इति साधुरित्येकमुद्घनस्य "ठीहा" इति ख्यातस्य। येन शस्त्रविशेषेण स्तम्बो गुल्सो निहन्यते स स्तम्बघ्नः स्तम्बघनश्च स्यात्। स्तम्बो हन्यते येन स्तम्बोपपदाद्धन्तेः करणे "स्तम्बे क च" इति के, उपधालोपे, कुत्वे च स्तम्बघ्नः पक्षे अपि, घनादेशे च स्तम्बघनः ल्युटि तु स्तम्बहननमपि स्यादिति द्वे तृणादिगुच्छोन्मूलनसाधनस्य, नीवारादिग्रहणार्थं कृतवंशपात्रस्य वा ॥ ३५ ॥

पु. पु.
बर्मी, बराबर जमे वृक्ष अनाज को ऊपर निकालना. आविधो (विध्यते येन तत्र) "विष्वक्समे" निघः।

पु. पु.
उत्कार'श्च'निकार'श्च'(द्वौ धान्योत्क्षेपणार्थकौ)॥३६॥

आवीति—येन शस्त्रविशेषेण पदार्थो विध्यते तत्र आविधः स्यात्। आविध्यते येन, आङ्पूर्वकाद्विध्यतेः करणे "घञर्थे कः" इति के, "ग्रहिज्येति" संप्रसारणे च आविधः स्यादित्येकं भ्रमरसूच्यादेः "बर्मा" इति ख्यातस्य। विष्वक्समे समन्तात्समारोहपरिणाहमहीरुहादौ निघः स्यात्। नियतं हन्यते निघः "निघो निमित्तम्" इति साधुरित्येकं तुल्यरोहपरिणाहवृक्षादेः। उत्कारो निकारश्चेमौ द्वौ धान्यानामुत्क्षेपणं तदेवार्थो ययोस्ताविति धान्योत्क्षेपणार्थकौ स्याताम्। उत्करणम् उत्पूर्वकात्किरतेर्भावे "कॄ धान्ये" इति घञि, वृद्धौ च उत्कारः एवं निकरणम् 'घञि' निकारःस्यादिति द्वे धान्यानामुत्क्षेपणस्य ॥ ३६ ॥

पु. पु. पु. पु.
खाना, डाकना, थूकना, डकारना, उपरति या निवृत्ति, थूकना, या खखारना. निगारोद्गारविक्षावोद्ग्राहा (निगरणादिषु)।

स्त्री. स्त्री. स्त्री. पु. पु.
आरत्यवरतिविरतय उपरामे(ऽथास्त्रियां तु)निष्ठेवः३७।

स्त्री. न. न.
निष्ठ्यूतिर्निष्ठेवनं निष्ठीवन (मित्यभिन्नानि)।

नीति—निगारः, उद्गारः, विक्षावः, उद्ग्राह एते चत्वारः क्रमशो निगरणादिषु वर्तन्ते। तत्र निगरणम् निपूर्वकाद्गिरतेर्भावे "ऋदोरप्" इति घञि, वृद्धौ च निगारः

स्यादिति द्वे खलसमूहस्य "खलिहानवृन्द" इति ख्यातस्य । अथेति नृणां मनुष्याणां निकरे मानुष्यकं स्यात् मनुष्याणां समूहः "गोत्रोक्षोष्ट्रेति" वुञि, वृद्धौ, अकादेशे "प्रकृत्या अके राजन्यमनुष्ययुवानः" इति यलोपाभावे च मानुष्यकं स्यादित्येकं मानुषसमूहस्य । ग्रामाणां समूहः "ग्रामजनबन्धुभ्यस्तल्" इति तलि, टापि च ग्रामता स्यादित्येकं ग्रामसमूहस्य । एवं जनानां समूहः तलि टापि च जनतास्यादित्येकं जनसमूहस्य । धूमानां समूहः "पाशादिभ्यो यः" इति ये, अलोपे, टापि च धूम्या स्यादित्येकं धूमसमूहस्य । पाशानां समूहः ये, पाश्या स्यादित्येकं पाशसमुदायस्य । एवं गला बृहत्काशास्तेषां समूहः 'पाशादिभ्य इति' ये, अलोपे टापि च गल्या स्यादित्येकं काशसमूहस्य एते शब्दाः पृथक् पृथक् भवन्तीति ॥ ४२ ॥

सहस्र, करीष, चर्म और अथर्वादिकों का समूह.

न. न. न. न.

'अपि' साहस्रकारीषचार्मणाथर्वणा (दिकम्) ॥४३॥

इति संकीर्णवर्गः ॥

अपीति—समूहे वर्तमानानां सहस्रादीनां साहस्रकारीषचार्मणाथर्वणादिकं स्यात् । सहस्राणां समूहः 'भिक्षादिभ्योऽण्' इत्यणि, वृद्धौ, अलोपे च साहस्रं स्यादित्येकं सहस्रसमूहस्य । करीषाणां समूहः अणि, वृद्धौ, अलोपे च कारीषं स्यादित्येकं शुष्कगोमयसमूहस्य । चर्मणां चर्मिणां वा समूहः, अणि, वृद्धौ, णत्वे च चार्मणं चार्मिणं वा स्यादित्येकैकं चर्म-चर्मि-समूहस्य । अथर्वणां समूहः अणि, वृद्धौ, णत्वे च आथर्वणं स्यादित्येकमथर्वसमूहस्य आदिना वार्मणमाङ्गारमित्यादिग्रहः । संकीर्णार्थत्वं च घञादीनां कर्तृभिन्ने कारके भावे च विधानात्, उणादीनां भावकारकेषु विधानात् भावे प्रायेण विग्रहो दर्शितः, कारके तु यथासंभवमूहनीयः सद्भिः सुधीभिरिति ॥ ४३ ॥

इति संकीर्णवर्गविवरणम् ॥

अथ नानार्थवर्गो व्याख्यायते ॥

नानार्थाः केऽपि कान्तादि वर्गेष्वेवात्र कीर्तिताः ।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥ १ ॥

नेति—अत्रैव वर्गे वक्ष्यमाणेषु कान्ता आदयो येषामिति तेषां वर्गाः समूहास्तेषु केऽपि नानार्था अनेकार्थाः कीर्तिताः शब्दिताः । यथा "मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोम्बुनोरिति" ये कान्तादयो येषु पर्यायेषु भूरिप्रयोगा. प्रचुरप्रयोगास्ते तेषु कीर्तिताः । अपिशब्दादिहापि । यथा नाकशब्दः । अतः पुनरुक्तिर्नोद्भावनीयेति भावः ॥ १ ॥

आकाश, स्वर्ग, स्वर्गादि, जन, छन्द, कीर्ति, तीर, तलवार.

पु. पु.

(आकाशे त्रिदिवे) नाको लोक (स्तु भुवने जने) ।

पु. पु.

(पद्ये यशसि च) श्लोकः (शरे खड्गे च) सायकः ॥२॥

आकेति—आकाशे, त्रिदिवे स्वर्गे च नाकः । न अकं दुःखमत्रेति 'नाकः' स्यादित्येकं स्वर्गाकाशयोः । भुवने, जने च लोकः । लोकनम्, लोक्यते वा लोकतेर्भावे कर्मणि च घञि, गुणे च लोकः स्यादित्येकं जनभुवनयोः । पद्ये छन्दसि यशसि कीर्तौ च श्लोकः । श्लोकनं, श्लोक्यते वा श्लोकतेर्भावे कर्मणि च घञि 'श्लोकः' स्यादित्येकं पद्ययशसोः । शरे बाणे खड्गे च 'सायकः' । स्यतीति स्यतेः कर्तरि ण्वुलि, युकि च सायकः, श्यतीति विग्रहे तु शायकोऽपि स्यादित्येकं बाणखड्गयोः ॥ २ ॥

सियार, वरुण, चिउडा, बालक, दर्शन, प्रकाश, तुरही, पटह.

पु. पु.
जम्बुकौ (क्रोष्टुवरुणौ) 'पृथुकौ' (चिपिटार्भकौ) ।
पु. पु.
आलोकौ (दर्शनोद्योतौ) (भेरीपटह) मानकौ ॥ ३ ॥

जमिति—क्रोष्टा शृगालः, वरुणो जलेशः उभौ जम्बुकौ जम्बुकपदवाच्यौ स्याताम् । जमतीति जम्बुकः "मितद्र्वादयश्च" इति साधुः "जम्बुकः फेरवे नीचे पश्चिमाशापतावपि" (इति मेदिनी) इत्येकं क्रोष्टुवरुणयोः । चिपिटार्भकौ चिपिटः चिपटिकः अर्भको बालः उभौ पृथुकौ पृथुकपदवाच्यौ स्याताम् । पृथुरेव "संज्ञायां कन्" इति कनि, प्रथते वा पृथुकः "अर्भकपृथुकपाका वयसि" इति साधुः "पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवत्" इत्येकं चिपिटार्भकयोः । दर्शनोद्योतौ आलोकावालोकपदवाच्यौ स्याताम् । आलोकनम् आङ्पूर्वकाल्लोकतेर्भावे घञि, गुणे च आलोकः "आलोकस्तु पुमान्द्योते दर्शने वन्दिभाषणे" (इति मेदिनी) इत्येकं दर्शनोद्योतयोः । भेरीपटहम् भेरी-पटहमित्युभौ आनकौ आनकपदवाच्यौ स्याताम् । अनिति 'अन प्राणने, अदादिकस्तस्मात्कर्तरि ण्वुलि, वृद्धौ अकादेशे च आनकः "आनकः पटहे भेर्यां मृदङ्गे ध्वनदम्बुदे" (इति मेदिनी) इत्येकं भेरीपटहयोः ॥ ३ ॥

गोदी, चिह्न, चिह्न, अपवाद, सर्प, बढ़ई, स्फटिक, सूर्य.

पु. पु.
(उत्सङ्गचिह्नयो) रङ्कः कलङ्को (ऽङ्कापवादयोः) ।
पु. पु.
तक्षको (नागवर्धक्यो) रर्कः (स्फटिकसूर्ययोः) ॥ ४ ॥

उदिति—उत्सङ्गचिह्नयोर्वाचकः अङ्कः स्यात् । अङ्क्यतेऽनेन 'अकि लक्षणे' भौवादिकस्तस्माद् "हलश्च" इति करणे घञि, नुमि, अनुस्वारे, परसवर्णे च अङ्कः स्यात् "अङ्को रूपकभेदाङ्कचिह्नरेखाजिभूषणे । रूपकांशान्तिकोत्सङ्गस्थाने" (इति मेदिनी) इत्येकमुत्सङ्गचिह्नयोः । अङ्कापवादयोर्वाचकः कलङ्कः स्यात् । कलति 'कल शब्द संख्यानयोः' अस्मात्कर्तरि "अन्येभ्योऽपि दृश्यते" इति क्विपि, कल्—अङ्क्यतेऽनेनेत्यङ्कः, कल् चासावङ्कश्चेति कलङ्कः स्यात् । "कलङ्कोऽङ्केऽपवादे च कालायसमलेऽपि च" (इति मेदिनी) इत्येकमङ्कापवादयोः । नागः सर्पः वर्धकिस्तक्षा उभयोर्वाचकस्त-

क्षकः स्यात् । तक्षति 'तक्षू तनूकरणे' भौवादिकस्तस्मात्कर्तरि ण्वुलि, अकादेशे च तक्षकः स्यादित्येकं नागवर्धकयोः । स्फटिकसूर्ययोर्वाचकः अर्कः स्यात् । अर्च्यते 'अर्च पूजायाम्' भौवादिकस्तस्मात्कर्मणि घञि, "चजोरिति" कुत्वे च "कृदाधारार्चि-कलिभ्यःकः" इति के वा "चोः कुरिति" कुत्वे, "झरो झरीति" कलोपे च, अर्क्यते "एरच्" एरजण्यन्तानामिति मते घञि वा अर्कः "अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ" (इति मेदिनी) इत्येकं स्फटिकसूर्ययोः ॥ ४ ॥

वायु, ब्रह्मा, सूर्य, शीश, जल, तिल्ली, संक्षेप, भात का सीथ.

पु. न.
(मारुते वेधसि ब्रध्ने पुंसि) कः कं (शिरोऽम्बुनोः) ।
पु.
(स्या) त्पुलाक (स्तुच्छधान्ये संक्षेपे भक्तसिक्थके) ॥ ५ ॥

मेति—मारुते वायौ, वेधसि ब्रह्मणि, ब्रध्ने सूर्ये च कः पुंसि स्यात् । शिरोम्बुनोः शिर-जलयोर्वाचकं कं स्यात् । कायति, कचते वा कायतेः कचतेर्वा कर्तरि "अन्येभ्योपीति" डे कः कं वा स्यात्-"को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे । मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषु कम्" (इति मेदिनी) इत्येकैकं मारुतादीनाम् । तुच्छधान्ये नीवारादौ संक्षेपे अविस्तारे भक्तसिक्थके च पुलाकः स्यात् । पोलनम्, पोलतेर्भावे संपदादित्वात् क्विपि, पुल् तामकतीति "कर्मण्यण्" इत्यणि, "वलाकादयश्चेति" वा पुलाकः स्यादित्येकं तुच्छधान्यादीनाम् ॥ ५ ॥

उल्लू, हाथी की पूछ के पास का मास, करवा, ओला अनार, बुद्ध, गणेश, गरुड.

पु.
(उलूके करिणः पुच्छमूलोपान्ते च) पेचकः ।
पु.न. पु.
(कमण्डलौ च) करकः (सुगते च) विनायकः ॥ ६ ॥

विति—उलूके वायसारातौ करिणो हस्तिनः पुच्छमूलोपान्ते च पेचकः स्यात् । पचति, पच्यते वा दुःखेनेति पचतेः कर्तरि, कर्मणि च "पचिमच्योरिच्चोपधायाः" इति वुनि उपधेत्त्वे, अकादेशे, गुणे च पेचकः स्यादित्येकमुलूकगजपुच्छमूलोपान्तयोः । कमण्डलौ करकः स्यात् । करोति "कृञादिभ्यो वुन्" इति वुनि, गुणे, अकादेशे च करकः "करकस्तु पुमान्पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघोपले न स्त्री करङ्के च कमण्डलौ" (इति मेदिनी) इत्येकं कमण्डलोः । सुगते शोभनज्ञानवति जिने च विनायकः स्यात् । विनयति, विपूर्वकान्नयतेः कर्तरि ण्वुलि, वृद्धौ, अकादेशे च विनायकः "विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ" (इति मेदिनी) इत्येकं बुद्धस्य ॥ ६ ॥

हाथ, बीता, बिच्छू या आठवीं राशि, उलटा, अङ्ग-मग्न.

पु. पु.
किष्कु (हस्ते वितस्तौ च) (शूककीटे च) वृश्चिकः ।
पु.म न.
(प्रतिकूले) प्रतीक (स्त्रिष्वेकदेशे तु) पुंस्ययम्) ॥ ७ ॥

कीति–हस्ते, वितस्तौ च किष्कुः स्यात् । कायतेऽनेन 'कै शब्दे' भौवादिकस्तस्मात् "मृगय्वादयश्च" इति करणे कौ धातोरित्त्वे सुकि, कुकि च निपातिते षत्वे च किष्कु "किष्कुर्द्वयोर्वितस्तौ च सप्रकोष्ठकरेऽपि च" (इति मेदिनी) इत्येकं हस्तवितस्त्योः । शूककीटे शूकसदृशरोमव्याप्तकीटविशेषे 'वृश्चिकः' स्यात् । वृश्चति, वृश्चते. कर्तरि "व्रश्चिकृषोः किकन्" इति किकनि, "ग्रहिज्येति" संप्रसारणे च वृश्चिकः "वृश्चिकस्तु द्रुणौ राशौ शूककीटौषधीभिदोः" (इति मेदिनी) इत्येकं शूककीटादीनाम् । प्रतिकूले प्रतीकस्त्रिषु त्रिलिङ्ग्यां स्यात् । एकदेशे तु अयं पुंसि स्यात् । प्रतिगता ईर्लक्ष्मीर्येन यं वा "नद्यृतश्च" इति कपि प्रतीकः "प्रतीकोऽवयवेऽपि स्यात्प्रतिकूलविलोमयोः" (इति मेदिनी) इत्येकं प्रतिकूलादेः ॥ ७ ॥

चिरायता, गन्धतृण, कुकुरमुत्ता, तोरई, चँचेड़ा या चिरचिरा, कायफल, दूधिया खैर, लोबान, तिलोंकी खली या पीना, हींग, काबुलदेश या काबुली घोड़ा।

(स्या)द्भूतिक(न्तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च)।
(ज्योत्स्निकायां च घोषे च)कोशातक्य(थ कट्फले)॥८॥
(सिते च खदिरे) सोमवल्कः (स्यादथ सिल्हके)।
(तिलकल्के च) पिण्याको बाह्लीकं (रामठेऽपि च)॥९॥

स्यादिति–भूनिम्बे, कत्तृणे, भूस्तृणेऽपि च 'भूतिकं' स्यात् । भवति, भवतेः कर्तरि "क्तिच्क्तौ च संज्ञायाम्" इति क्तिचि तदन्तात्संज्ञायां कनि च भूतिकम् "स्याद्भूतिकं तु भूनिम्बे दीप्यभूस्तृणकत्तृणे" (इति मेदिनी) इत्येकं भूनिम्बादीनाम् । ज्योत्स्निकायां पटोलिकायां घोषे अपामार्गे च कोशातकी स्यात् । कोषं कोशं वातति कोषकोशपूर्वकः 'अत सातत्यगमने' भौवादिकस्तस्मात् "क्वुन्शिल्पिसंज्ञयोरिति" क्वुनि, अकादेशे गौरादित्वान्ङीपि च कोषातकी, कोशातकी वा "कोशातकः कचे पुंसि पटोल्यां घोषके स्त्रियाम्" (इति मेदिनी) इत्येकं पटोलिकापामार्गयोः । अथेति–कट्फले, सिते खदिरे च सोमवल्कः स्यात् । सोम इव वल्को वल्कमस्येति सोमवल्कः स्यादित्येकं कट्फलश्वेतखदिरयोः । अथेति–सिल्हके गन्धद्रव्यविशेषे, तिलकल्के च पिण्याकः स्यात् । पण्यते इति पिण्याकः "पिनाकादयश्च" इति साधुः "पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाह्लीकसिल्हके" (इति मेदिनी) इत्येकं सिल्हकतिलकल्कयोः । रामठे हिङ्गुनि बाह्लीकं स्यात्–बाह्लीकदेशयोरपि । वहति जाने वा बाह्लीकम् "अ[illegible] [illegible]" इति साधुः "बाह्लीकं बाह्लिकं धीरं हिङ्गुनोर्नाश्वदेशयोः" (इति [illegible]) इत्येकं रामठादीनाम् ॥ ८ । ९ ॥

१ "[illegible]" (१ [illegible]) "[illegible]" ([illegible])"

इन्द्र, गूगुल, उल्लू, मदारी, विश्वामित्र, नेवला, रोग, ताप, शङ्का, थोड़ा, नीच, छोटा.

पु. (महेन्द्रगुग्गूलूकव्यालग्राहिषु) कौशिकः ।
पु. (रुक्तापशङ्कास्वा)तङ्कः(स्वल्पेऽपि)क्षुल्लक(स्त्रिषु)॥ १०॥

महेति—महेन्द्रो देवराजः, गुग्गुलुः कुम्भः, उलूको वायसारातिः, व्यालग्राही अहितुण्डिको मदारीति यावत् एषु कौशिकः स्यात्। कुशिकस्यापत्यं "ऋष्यण्" इत्यणि, वृद्धौ, अलोपे च कौशिकः "कौशिको नकुले व्यालग्राहिगुग्गुलशक्रयोः। विश्वामित्रे च कोशज्ञो, लूकयोरपि कौशिकः। कौशिकी चण्डिकायां च नदीभेदे च कौशिकी" (इति विश्वः) इत्येकं महेन्द्रादीनाम्। रुक् रोगः तापः संतापः शङ्का आसु आतङ्कः स्यात्। आतङ्कनम्, आतङ्क्यतेऽनेनेति वा भावे, करणे वा घञि आतङ्कः "आतङ्को रोगसन्तापशङ्कासु मुरजध्वनौ" (इति मेदिनी) इत्येकं रोगादीनाम्। स्वल्पे अपिशब्दान्नीचेऽपि क्षुल्लकस्त्रिषु त्रिलिङ्ग्यां स्यात्। क्षोदनम्, क्षोधनम् वा क्षुणत्तेः क्षुध्यतेर्वा भावे संपदादित्वात्किपि क्षुद् तां लाति गृह्णाति क्वुनि, अकादेशे, आलोपे, लत्वे च क्षुल्लकः "क्षुल्लकस्त्रिषु नीचेऽल्पे" (इति मेदिनी) इत्येकमल्पादीनाम् ॥ १० ॥

चन्द्रमा, दीर्घायु, कुश, घोड़े की टाप, बत्तख, बाघ, आगी, दिग्गज, सफेद कमल, अजवायन, मोर की चोटी आदि.

पु. जैवातृकः (शशाङ्केऽपि) (खुरेऽप्यश्वस्य) वर्तकः ।
पु. पु. (व्याघ्रेऽपि)पुण्डरीको(ना)(यवान्यामपि)दीपकः॥ ११॥

जायिति—शशाङ्के चन्द्रे अपिशब्दाद्दीर्घायुः कृशयोरपि जैवातृकः स्यात्। जीवति, जीवतेः कर्तरि "आतृकन् वृद्धिश्च" इति आतृकनि, वृद्धौ च जैवातृकः "जैवातृकः पुमान्सोमे दीर्घायुःकृशयोस्त्रिषु" (इति मेदिनी) इत्येकं चन्द्रादीनाम्। अश्वस्य घोटकस्य खुरे अपिशब्दाद्विहगेऽपि वर्तकः स्यात्। वर्तते, वृतेः कर्तरि ण्वुलि, गुणे, अकादेशे च वर्तकः, स्त्रियां वर्तिकाऽपि "वर्तकस्तु खुरेऽश्वस्य विहगे वर्तिका द्वयोः" (इति मेदिनी) इत्येकमश्वखुरादीनाम्। व्याघ्रे अपिशब्दाद्दिङ्नागादौ पुण्डरीकः ना पुमान्स्यात्। पुण्डयतीति पुण्डरीकः "फर्फरीकादयश्च" इति साधुः "पुण्डरीकः पुंसि व्याघ्रेऽग्निदिङ्नागे कोशकारान्तरेऽपि च" सिताम्भोजे सितच्छत्रे च भेषजे। (इति मेदिनी) इत्येकं व्याघ्रादीनाम्। यवान्याम्, अपिशब्दादजमोदादावपि

दीपकः स्यात्। दीपयति, दीप्यतेर्ण्यन्तात्कर्तरि ण्वुलि, अकादेशे च दीपकः "दीपकं वागलंकारे वाच्यवद्दीप्तिकारके। दीपकश्चाजमोदायां यवानीबर्हिचूडयोः" (इति मेदिनी) इत्येकं यवान्यादीनाम्॥ ११॥

वानर, सियार, कुत्ता आदि, सोना, गेरू, पीड़ा, अप्रिय-अकार्य, अप्रिय, झूठ.

पु. — न.

शालावृकाः "कपिक्रोष्टुश्वानः" (स्वर्णेऽपि) गैरिकम्।

न. — न.

(पीडार्थेऽपि)व्यलीकं(स्याद)लीकं(त्वप्रियेऽनृते)॥१२॥

शेति—कपिर्वानरः, क्रोष्टा शृगालः, श्वा शुनकः एते शालावृकाःस्युः। शालां वृण्वन्ति, शालापूर्वकाद्वृणोतेः कर्तरि "सृवृभूशुषिमुषिभ्यः कक्" इति ककि, शालावृकाः स्युरित्येकं वानरादीनाम्। स्वर्णे अपिशब्दाद्धातावपि गैरिकं स्यात्। गिरौ भवम् अध्यात्मादित्वाट्ठकि, वृद्धौ, ठस्येकादेशे, इलोपे च गैरिकम् "गैरिकं धातुरुक्मयोः" (इति मेदिनी) इत्येकं स्वर्णादीनाम्। पीडार्थे अपिशब्दादप्रियाकार्यादावपि व्यलीकं स्यात्। अलति 'अल भूषणादौ' भौवादिकस्तस्मात्कर्तरि "अलीकादयश्च" इति कीकन्नन्ते निपातिते अलीकम् विगतमलीकम् व्यलीकं "व्यलीको नागरे स्मृतः। व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने" (इति विश्वः) इत्येकं पीडनादीनाम्। अप्रिये, अनृते असत्ये च अलीकं स्यात् "अलीकमप्रियेऽपि स्याद्दिव्यसत्ये नपुंसकम्" (इति मेदिनी) इत्येकमप्रियादीनाम्॥ १२॥

स्वभाव, वंश, खण्ड, वकला, १०८ कर्ष सोना, सोना-मात्र, छाती का भूषण, सोने का पल, अशर्फी, विष्टा, पाप, त्रिशूल, शिव-धनुष.

न.

(शीलान्वया)वनूके(द्वे)शल्के (शकलवल्कले)।

(साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले॥ १३॥

पु.न. — पु.न.

दीनारेऽपि च)निष्को(ऽस्त्री)कल्को(ऽस्त्रीशमलैनसोः)।

पु.न.

(दम्भेऽप्यथ) पिनाको(ऽस्त्री शूलशंकरधन्वनोः) १४॥

शीलेति—शीलं स्वभावः, अन्वयो वंशः उभौ अनूके अनूकपदवाच्यौ स्याताम्। अनूच्यति अनुपूर्वकादुच्यतेः कर्तरि "इगुपधेति" के, न्यङ्क्वादित्वात्कुत्वे च अनुकायति, अनुपूर्वकात्कायतेः कर्तरि "आतश्चोपसर्गे" इति के वा "अन्येषामपीति" दीर्घे च अनूकम् "अनूकं तु कुले शीले पुंसि स्याद्गतजन्मनि" (इति मेदिनी) इत्येकं शीलादीनाम्। शकलं खण्डम्, वल्कलं त्वक्, एते द्वे शल्के स्याताम्। शलति शलतेः कर्तरि "[illegible]" कनि 'शल्कम्' स्यादित्येकं खण्डवल्कलयोः। सुवर्णानां साष्टे अष्टाभिरधिकमाने शते कर्षे, हेम्नि हेममात्रे, उरोभूषणे वक्षोलंकरणे पले हेमपले

दीनारे सांव्यवहारिके रूपकेऽपि च निष्कः अस्त्री पुंनपुंसकं स्यात्। निश्चयेन कायति, निपूर्वकात्कायतेः कर्तरि "आतश्चोपेति" के "इदुदुपधस्य चेति" षत्वे च निष्कः "निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः। वक्षोऽलंकरणे हेममात्रे हेमपलेऽपि च" (इति मेदिनी) इत्येकं स्वर्णसाष्टशतकर्षादीनाम्। शमलैनसोः गूथपापयोः दम्भे लोकवञ्चनाय विहितकर्मानुष्ठानेऽपि कल्कः अस्त्री पुंनपुंसकं स्यात्। कल्यते, कलतेः कर्मणि: "कृपाचारेति" के, कल्कः "कल्कः पापाशये पापे दम्भे विट्कट्टयोरपि" (इति विश्वः) इत्येकं शमलादीनाम्। अथेति शूलशंकरधन्वनोः पिनाकः अस्त्री पुंनपुंसकं स्यात्। पनाय्यत इति पिनाकः "पिनाकादयश्च" इति साधुः "पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः" (इति मेदिनी) इत्येकं त्रिशूलादीनाम्॥१३।१४॥

हथिनी, नई ब्याई गइया, मेघसमूह, देवी, नरक यातना, वृत्ति, तर्क, हाथी की सूंड़ का अगिला भाग, कमलबीज, देवता, मनोज्ञ श्रेष्ठ, मुख्य, अन्य, केवल.

स । स.

धेनुका (तु करेण्वां च) (मेघजाले च) कालिका।

स. स.

कारिका (यातनावृत्त्योः) कर्णिका (कर्णभूषणे)॥१५॥

(करिहस्ताङ्गुलौ पद्मबीजकोश्यां) (त्रिषूत्तरे)।

पु स न. पु स.न.

वृन्दारकौ (रूपिमुख्या) वेके (मुख्यान्यकेवलाः)॥१६॥

धयिति—करेण्वां हस्तिन्यां चाद्धेनावपि धेनुका स्यात्। धेनुरेव स्वार्थे कनि, धेनुका "स्याद्धेनुका करिण्यां च धेनावपि ना तु दानवविशेषे" (इति मेदिनी) इत्येकं हस्तिन्यादीनाम्। मेघजाले मेघसमूहे चाद्योगिनीभेदादावपि 'कालिका' स्यात्। कालो वर्णोऽस्त्यस्याः "अत इनिठनाविति" ठनि, ठस्येकादेशे टापि च। काल्येव स्वार्थे कनि वा कालिका "कालिका चण्डिकाभेदे काण्यर्थे वृश्चिकपत्रयोः। क्रमदेय वस्तुमूल्ये धूसरीनवमेघयोः। पटोलशाखारोमालीमांसीकाकीशिवासु च। मेघावलौ च" (इति मेदिनी) इत्येकं मेघजालादीनाम्। यातनावृत्त्योः वेदनाविवरणश्लोकयोः कारिका स्यात्। करणम् "धात्वर्थनिर्देशे ण्वुल्" इति ण्वुलि, वृद्धौ, अकादेशे, टापि अत इत्वे च कारिका "कारिका नटयोषिति। कृतौ विवरणश्लोके शिल्पयातनयोरपि। नपुंसकं तु कर्मादौ कारकं कर्तरि त्रिषु" (इति मेदिनी) इत्येकं यातनादीनाम्। कर्णभूषणे कर्णालंकारे, करिहस्ताङ्गुलौ गजशुण्डाग्रभागे, पद्मबीजकोश्यां च 'कर्णिका' स्यात्। कर्णस्यालंकारः "कर्णललाटादिति" कनि, टापि "प्रत्ययस्थादिती" इत्वे च कर्णिका "कर्णिका करिहस्ताग्रे करमध्याङ्गुलावपि। अमुकाच्छिद्रटारोऽब्जवराटे कर्णभूषणे" (इति मेदिनी) इत्येकं कर्णभूषणादी-

नाम् । अत उत्तरे खान्तेभ्यः प्राक् वक्ष्यमाणाः शब्दास्त्रिपु त्रिलिङ्ग्यां भवन्तीति । रूपिमुख्यौ वृन्दारकौ वृन्दारकपदवाच्यौ स्याताम् । प्रशस्तं वृन्दमस्य "शृङ्गवृन्दाभ्यामारकन्" इति आरकनि वृन्दारकः "वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिपु" (इति मेदिनी) इत्येकं सुरादीनाम् । मुख्यान्यकेवलाः एक एकपदवाच्याः स्युः । एति 'इण् गतौ' आदादिकस्तस्मात्कर्तरि "इण्भीकेति" कनि एकः "एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिपु" (इति मेदिनी) इत्येकं मुख्यादीनाम् ॥ १५ । १६ ॥

मायावी, दूरसे देखनेवाला, मुँहदेखा, स्वामी का काम न करनेवाला

पु. पु.
(स्या)द्दाम्भिकः कौक्कुटिको(यश्चादूरेरितेक्षणः) ।
पु.
लालाटिकः (प्रभोर्भालदर्शी कार्याक्षमश्च यः) ॥ १७ ॥

स्यादिति—दम्भनं दभ्नोतेर्भावे 'घञि' दम्भः लोकवञ्चनाय विहितकर्मानुष्ठानं दम्भः सोऽस्यास्तीति, तेन चरतीति वा ठकि, वृद्धौ, ठस्येकादेशे च दाम्भिकः छलकारिणि स्यादित्येकं मायाविनः । यश्च आदूरेरितेक्षणः दूरदर्शी सः कौक्कुटिकः । कुक्कुटी पश्यति "संज्ञायां ललाटकुक्कुट्यौ पश्यति" इति ठकि, वृद्धाविकादेश, ईलोपे च कौकुटिकः स्यादित्येकं दूरदर्शिनः । यः प्रभोः स्वामिनः भालं पश्यत्येवंशीलो भालदर्शी, यश्च कार्याक्षमः स्वामिकार्यं कर्तुमशक्तः स लालाटिकः स्यात् । ललाटं पश्यति ठकि लालाटिकः "लालाटिकः प्रभोर्भालदर्शिन्याश्लेषणान्तरे । कार्याक्षमे" (इति मेदिनी) भावदर्शीति वा पाठः "लालाटिकः सदालस्यप्रभुभालनिदर्शिनि" (इत्यजयः) इत्येकं स्वामिभालावलोकिकार्यकरणासमर्थयोः ॥ १७ ॥

पर्वत, नृपत, कङ्कण, चक्र, सुई की नोक, छोटा वैरी, रोमाञ्च.

पु. न.
(भूभृन्नितम्बवलयचक्रेषु)कटको(ऽस्त्रियाम्) ।
पु.
(सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च) कण्टकः ॥ १८ ॥

भ्विति—भूभृत्पर्वतो नृपश्च, नितम्बः कटिपश्चाद्भागः, वलयः कङ्कणम् चक्रं रथाङ्गादिकम् एषु कटकः अस्त्रिया पुन्नपुंसके स्यात् । कटति, कट्यते वा कटतेः कर्तरि कर्मणि वा "क्वुन्शिल्पिसंज्ञयोः" इति क्वुनि, अकादेशे च कटकः "कटकोऽस्त्री नितम्बेऽद्रेर्दन्तिनां दन्तमण्डने । सामुद्रलवणे राजधानीवलययोरपि" (इति मेदिनी) इत्येकं पर्वतादीनाम् । सूच्यग्रे सूचिमुखे क्षुद्रशत्रावल्पवैरिणि, लोमहर्षे रोमाञ्चे च कण्टकः स्यात् । कण्टति 'कटि गतौ' भौवादिकस्तस्मात्कर्तरि 'क्वुनि' अकादेशे च कण्टकः "कण्टकः क्षुद्रशत्रौ च कर्मस्थानकदोषयोः । रोमाञ्चे च द्रुमाङ्गे च कण्टको मकरेऽपि च" (इति विश्वः) इत्येकं सूच्यग्रादीनाम् ॥ १८ ॥

दीनारे सांव्यवहारिके रूपकेऽपि च निष्कः अस्त्री पुंनपुंसकं स्यात्। निश्चयेन कायति, निपूर्वकात्कायतेः कर्तरि "आतश्चोपेति" के "इदुदुपधस्य चेति" पत्वे च निष्क- "निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः। वक्षोऽलंकरणे हेममात्रे हेमपलेऽपि च" (इति मेदिनी) इत्येकं स्वर्णसाष्टशतकर्षादीनाम्। शमलैनसोः गूथपापयोः दम्भे लोकवञ्चनाय विहितकर्मानुष्ठानेऽपि कल्कः अस्त्री पुंनपुंसकं स्यात्। कल्यते, कलतेः कर्मणि: "कृपाचारेति" के, कल्कः "कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि" (इति विश्वः) इत्येकं शमलादीनाम्। अथेति शूलशंकरधन्वनोः पिनाकः अस्त्री पुंनपुंसकं स्यात्। पनाय्यत इति पिनाकः "पिनाकादयश्च" इति साधुः "पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः" (इति मेदिनी) इत्येकं त्रिशूलादीनाम्॥१३।१४॥

हथिनी, नई ब्याई गइया, मेघसमूह; देवी, नरक यातना, वृत्ति, तर्क, हाथी की सूड़ का अगिला भाग, कमलबीज, देवता, मनोज्ञ, श्रेष्ठ, मुख्य, अन्य, केवल.

स. स.
धेनुका (तु करेण्वां च) (मेघजाले च) कालिका।
स. स.
कारिका (यातनावृत्त्योः) कर्णिका (कर्णभूषणे)॥१५॥
(करिहस्ताङ्गुलौ पद्मबीजकोश्यां) (त्रिषूत्तरे)।
पु.स.न. पु.स.न.
वृन्दारकौ (रूपिमुख्यौ) वेके (मुख्यान्यकेवलाः)॥१६॥

धयिति—करेण्वां हस्तिन्यां चाद्धेनावपि धेनुका स्यात्। धेनुरेव स्वार्थे कनि, धेनुका "स्याद्धेनुका करिण्यां च धेनावपि ना तु दानवविशेषे" (इति मेदिनी) इत्येकं हस्तिन्यादीनाम्। मेघजाले मेघसमूहे चाद्योगिनीभेदादावपि 'कालिका' स्यात्। कालो वर्णोऽस्त्यस्याः "अत इनिठनाविति" ठनि, ठस्येकादेशे टापि च। काल्येव स्वार्थे कनि वा कालिका "कालिका चण्डिकाभेदे कार्ण्ये वृश्चिकपत्रयोः। क्रमदेयवस्तुमूल्ये धूसरीनवमेघयोः। पटोलशाखारोमालीमांसीकाकीशिवासु च। मेघावली च" (इति मेदिनी) इत्येकं मेघजालादीनाम्। यातनावृत्त्योः वेदनाविवरणश्लोकयोः कारिका स्यात्। करणम् "धात्वर्थनिर्देशे ण्वुल्" इति ण्वुलि, वृद्धौ, अकादेशे, टापि अत इत्त्वे च कारिका "कारिका नटयोषिति। कृतौ विवरणश्लोके शिल्पयातनयोरपि। नपुंसकं तु कर्मादौ कारकं कर्तरि त्रिषु" (इति मेदिनी) इत्येकं यातनादीनाम्। कर्णभूषणे कर्णालंकारे, करिहस्ताङ्गुलौ गजशुण्डाग्रभागे, पद्मबीजकोश्यां च 'कर्णिका' स्यात्। कर्णस्यालंकारः "कर्णललाटादिति" कनि, टापि "प्रत्ययस्थादिती" त्वे च कर्णिका "कर्णिका करिहस्ताग्रे करमध्याङ्गुलावपि। अमुकादिच्छटाशेऽब्जवराटे कर्णभूषणे" (इति मेदिनी) इत्येकं कर्णभूषणादी-

नाम् । अत उत्तरे खान्तेभ्यः प्राक् वक्ष्यमाणाः शब्दास्त्रिषु त्रिलिङ्गयां भवन्तीति। रूपिमुख्यौ वृन्दारकौ वृन्दारकपदवाच्यौ स्याताम् । प्रशस्तं वृन्दमस्य "शृङ्गवृन्दाभ्यामारकन्" इति आरकनि वृन्दारकः "वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु" (इति मेदिनी) इत्येकं सुरादीनाम् । मुख्यान्यकेवलाः एक एकपदवाच्याः स्युः। एति 'इण् गतौ' आदादिकस्तस्मात्कर्तरि "इणभीकेति" कनि एकः "एकं संख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु" (इति मेदिनी) इत्येकं मुख्यादीनाम् ॥ १५ । १६ ॥

मायावी, दूरसे देखनेवाला, मुँहदेखा, स्वामी का काम न करनेवाला

पु. पु.
(स्या)द्दाम्भिकः कौक्कुटिको(यश्चादूरेरिनेक्षणः)।
पु.
लालाटिकः (प्रभोर्भालदर्शी कार्याक्षमश्च यः) ॥ १७ ॥

स्यादिति—दम्भनं दभ्नोतेर्भावे 'घञि' दम्भः लोकवञ्चनाय विहितकर्मानुष्ठानं दम्भः सोऽस्त्यस्येति, तेन चरतीति वा ठकि, वृद्धौ, ठस्येकादेशे च दाम्भिकः छलकारिणि स्यादित्येकं मायाविनः। यश्च आदूरेरितेक्षणः दूरदर्शी स कौक्कुटिकः। कुक्कुटीं पश्यति "संज्ञायां ललाटकुक्कुट्यौ पश्यति" इति ठकि, वृद्धाविकादेश, ईलोपे च कौक्कुटिकः स्यादित्येकं दूरदर्शिनः। यः प्रभोः स्वामिनः भालं पश्यत्येवंशीलो भालदर्शी, यश्च कार्याक्षमः स्वामिकार्यं कर्त्तुमशक्तः स लालाटिकः स्यात्। ललाटं पश्यति ठकि लालाटिकः "लालाटिकः प्रभोर्भालदर्शिन्याश्लेषणान्तरे। कार्याक्षमे" (इति मेदिनी) भावदर्शीति वा पाठः "लालाटिकः सदालस्यप्रभुभालनिदर्शिनि" (इत्यजयः) इत्येकं स्वामिभालावलोकिकार्यकरणासमर्थयोः ॥ १७ ॥

पर्वत, नूतर, कङ्कण, चक्र, सुई की नोक, छोटा वैरी, रोमाञ्च.

पु न.
(भूभृन्नितम्बवलयचक्रेषु)कटको(ऽस्त्रियाम्)।
पु.
(सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च) कण्टकः ॥ १८ ॥

भिन्नति—भूभृत्पर्वतो नृपश्च, नितम्बः कटिपश्चाद्भागः, वलयः कङ्कणम् चक्रं रथाङ्गादिकम् एषु कटकः अस्त्रियां पुन्नपुंसके स्यात्। कटति, कट्यते वा कटतेः कर्तरि कर्मणि वा "क्वुन्शिल्पिसंज्ञयोः" इति कुनि, अकादेशे च कटक. "कटकोऽस्त्री नितम्बेऽद्रेर्दन्तिनां दन्तमण्डले। सामुद्रलवणे राजधानीवलययोरपि" (इति मेदिनी) इत्येकं पर्वतादीनाम् । सूच्यग्रे सूचिमुखे क्षुद्रशत्रावल्पवैरिणि, लोमहर्षे रोमाञ्चे च कण्टकः स्यात्। कण्टति 'कटि गतौ' भौवादिकस्तस्मात्कर्तरि 'ण्वुलि' अकादेशे च कण्टकः "कण्टकः क्षुद्रशत्रौ च कर्मस्थानकदोषयोः । रोमाञ्चे च द्रुमाङ्गे च कण्टको मस्करेऽपि च" (इति विश्वः) इत्येकं सूचीमुखादीनाम् ॥ १८ ॥

पकाना, बालक, हार के बीचकी मणि, अधिपति — पु. पाकौ (पक्तिशिशू) (मध्यरत्ने नेतरि) नायकः पु. ।

पलग या परिवार, बधिक, लोभी — पु. पर्य्यङ्कः(स्यात्परिकरे)(स्याद्व्याधेऽपि च)लुब्धकः पु. १ ॥१९॥

पेति—पचनं पक्तिः, शिशुर्बालकः उभौ पाकौ पाकशब्दवाच्यौ स्याताम् । पा पिबति वा पाकः "अर्भकपृथुकपाका वयसि" इति साधुः "पाकः परिणतौ शिशौ केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च" (इति मेदिनी) इत्येकं पचना नाम् । मध्यरत्ने हारमध्यमणौ, नेतरि अधिपे च नायकः स्यात् । नयति, नयतेः क ण्वुलि वृद्धौ अकादेशे, आयादेशे च नायकः "नायको नेतरि श्रेष्ठे हारमध्यमणावपि" (इति विश्वः) इत्येकं मध्यरत्नादीनाम् । परिकरे परिजनादौ पर्य्यङ्कः स्यात् । परि ऽङ्क्यते परिपूर्वकः 'अकि लक्षणे' भौवादिकस्तस्मात्कर्मणि घञि पर्यङ्कः "पल्यङ्कोऽपि पर्यङ्कवृषीपर्यस्तिकासु च" (इति मेदिनी) इत्येकं परिजनादीनाम् । व्याधे अ शब्दाल्लोभिनि च लुब्धकः स्यात् । लुभ्यतिस्म 'लुभ गार्ध्ये' दैवादिकस्तस्माद् "गत्यर्थाकर्म कर्तरि क्ते, लुब्धः स्वार्थे कनि च लुब्धकः स्यादित्येकं व्याधादीनाम् ॥ १९ ॥

समूह, पेटारी, गुरु, देश में उपजा, गांव, ढाल, महरा या कहार — पेटक(स्त्रिषु वृन्देऽपि) (गुरौ देश्ये च) दैशिकः पु. ।

पु. खेटकौ(ग्रामफलकौ) (धीवरेऽपि च)जालिकः पु. ॥ २० ॥

पयिति—वृन्दे समूहे अपिशब्दान्मञ्जूषायामपि पेटकस्त्रिपु त्रिलिङ्गयां स्यात् । पेट 'पिट संघाते' भौवादिकस्तस्मात्कर्तरि 'ण्वुलि' गुणे, अकादेशे च पेटकः "पेटकः पुस्तकादीनां मञ्जूषायां कदम्बके" (इति विश्वः) इत्येकं समूहादेः । गुरावुपदेशकारिणि देश्ये देशोद्भवे च दैशिक. स्यात् । देशनम्, दिशतेर्भावे घञि देशः सोऽस्त्यस्येति. ठ अणि च देशेभवोवा अध्यात्मादित्वाट्ठञि वा दैशिकः स्यादित्येकं गुर्वादीनाम् । ग्र फलकौ खेटकौ खेटकपदवाच्यौ स्याताम् । खेटति ' खिट त्रासे ' भौवादिकस्तस्मात्कर्त ण्वुलि, गुणे, अकादेशे च खेटकः स्यादित्येकं ग्रामादेः । धीवरेऽपि जालिकः स्यात जालेन चरति " चरतीति " ठकि, वृद्धौ, ठस्येकादेशे च जालिकः स्यादित्येकं धीवरादेः ॥ २० ॥

पराग, पद्मकेसर स्त्रीधन, — पु. (पुष्परेणौ च) किञ्जल्कः पु.स. शुल्को स्त्री (स्त्रीधनेऽपि च)।

महसूल, हिलकोरा, भाव, समूह — (स्यात्कल्लोलेप्यु)त्कलिका स. वार्धकं न. (भाववृन्दयोः)॥२१॥

"१—आर्द्रायामपि लुब्धकः" इत्यपि पाठः ।

ञ्जिति–तुष्परेणौ कुसुमधूलौ चशब्दात्केसरेऽपि किञ्जल्कः स्यात् । किञ्चिज्जलति, किञ्चित्पूर्वकाद् 'जल अपवारणे' अस्माच्चौरादिकाद्बाहुलकात्कप्रत्यये, पृषोदरादित्वात् 'किञ्जल्कः' स्यादित्येकं पुष्परेणवादीनाम् । स्त्रीधने वरादर्थग्रहे, अपि शब्दाद् घट्टादिदेये च शुल्कः अस्त्री पुन्नपुंसकं स्यात् । शुल्क्यते, 'शुल अतिसर्जने' अस्मात्कर्मणि घञि शुल्कः "शुल्कं घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियाम्" (इति मेदिनी) इत्येकं घट्टादिदेयधनादीनाम् । कल्लोले उल्लोले, अपि शब्दादुत्कण्ठादौ च 'उत्कलिका' स्यात् । उत्कलनम्, उत्कल्यते वा उत्पूर्वकात्कले: "कृञादिभ्यो वुन्" इति वुनि, अकादेशे, टापि, इत्त्वे च उत्कलिका "उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि" (इति कोषान्तरम्) इत्येकं कल्लोलादीनाम् । भाववृन्दयोः भावसमूहयोर्वाचकं वार्धकं स्यात् । वृद्धानां समूहः "वृद्धाच्च" इति वुञि, वृद्धौ, अकादेशे च वार्धकम् "वार्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि" (इति विश्वः) वृद्धसमुदाये, वृद्धत्वे, वृद्धकर्मणि च 'वार्धकम्' स्यादित्येकं भाववृन्दयोः ॥ २१ ॥

हथिनी, वेश्या, बालक, विदारक अन्ध, घमण्ड पत्थर काटने का औजार

स. पु.
(करिण्यां) चापि गणिका दारकौ (बालभेदकौ) ।
पु. पु.
(अन्धेप्य) नेडमूकः स्याट्टङ्कौ (दर्पाश्मदारणौ) ॥ २२ ॥

इति कान्तवर्गः ॥

केति–करिण्यां हस्तिन्याम्, अपिशब्दाद्यूथिकावेश्यादौ च गणिका स्यात् । गणः समूहोऽस्त्यस्या भर्तृत्वेन, ठनि, गणयतीति विग्रहे तु ण्वुलि, अकादेशे टापि, इत्वे च गणिका–"गणिका यूथी-वेश्येभी-तर्कारीषु ना तु दैवज्ञे" (इति मेदिनी) इत्येकं करिण्यादीनाम् । बालभेदकौ बालः अर्भकः भेदको दारकश्च उभौ दारकौ दारकपदवाच्यौ स्याताम् । दृणाति, दारयति वा ण्वुलि, वृद्धौ, अकादेशे च दारकः, द्वित्वे दारकावित्येकमर्भकभेदकयोः । अन्धे लोचनरहिते, अपिशब्दाच्छठे, वाक्श्रुतिवर्जिते च अनेडमूकः स्यात् । नास्ति एडमूकोऽस्मादनेडमूकः "त्रिलिङ्गोऽनेडमूकः स्याच्छठे वाक्श्रुतिवर्जिते" (इति रभसः) इत्येकमन्धादीनाम् । दर्पाश्मदारणौ गर्वग्रावभेदकौ टङ्कौ टङ्कपदवाच्यौ स्याताम् । टङ्कयति, "टकि बन्धे" अस्माच्चौरादिकात्कर्तरि पचाद्यचि टङ्कः, द्वित्वे टङ्कौ स्तः "टङ्को नीलकपित्थे च खनित्रे टङ्कनेऽस्त्रियाम् । "जङ्घायां स्त्री" पुमान्कोपे कोषास्यग्रावदारणे" (इति मेदिनी) इत्येकं दर्पादीनाम् ॥२२॥

इति कान्तवर्गविवरणम् ॥

अथ खान्ताः ।

शोभा, किरण, ज्वाला, भौंरा, बाण, निधिभेद, भाल की हड्डी, शङ्ख, इन्द्रियादि

पु. पु.
मयूख (स्त्विट्करज्वालासु) (लिबाणौ) शिलीमुखौ ।
पु. न.
शङ्खो (निधौ ललाटास्थ्नि कम्बौ न स्त्री) (न्द्रियेपि) खम् २३

मेति—त्वेषणां त्विट् कान्तिः, करः किरणः, ज्वाला अग्निशिखा-एष्वर्थेषु मयूख स्यात् । मिमीते 'माङ्माने' जौहोत्यादिकस्तस्मात्कर्तरि "माङऊखोमयच" इति ऊखे माङोमयादेशे च मयूखः "मयूखः किरणेऽपि च । ज्वालायामपि शोभायाम्" (इ मेदिनी) इत्येकं त्विडादीनाम् । अलिर्भ्रमरः, बाणः शायकः उभौ शिलीमुखौ स्याताम् शिली शल्यं मुखे यस्येति शिलीमुखः स्यादित्येकं भ्रमरबाणयोः । निधौ शेवः ललाटास्थ्नि भालास्थनि, कम्बौ शङ्खे कङ्कणे च शङ्खः स्त्री न स्यात् । शाम्यत्यने शाम्यतेः करणे "शमेः खः" इति 'खे' दैत्यानां शं सुखं खनति "अन्येभ्योऽपीति डे वा शङ्खः "शङ्खः कम्बौ न योषिन्ना भालास्थ्नि निधिभिन्नखे" (इति मेदिनी) इत्ये निध्यादीनाम् । इन्द्रिये अपिशब्दात्क्षेत्रादावपि 'खम्' स्यात् । खनति, खनतेः कर्ता 'अन्येभ्योऽपीति' डे खम् "खमिन्द्रिये पुरे क्षेत्रे शून्ये विन्दौ विहायसि । संवेद देवलोके शर्मण्यपि नपुंसकम्" (इति मेदिनी) इत्येकमिन्द्रियादीनाम् ॥ २३ ॥

किरण, ज्वाला, चोटी आदि पर्वत, वृक्ष, वायु, वाण, शर, सूर्य, पक्षी.

स. पु. पु.
(घृणिज्वाले अपि) शिखे (शैलवृक्षौ) नगावगौ ।
पु. पु.
आशुगौ (वायुविशिखौ) (शरार्कविहगाः) खगाः॥ २४ ॥

वृत्ति—घृणिः किरणः- ज्वाला अग्निशिखा उभे शिखे शिखापदवाच्ये स्याताम् अपिशब्दाच्छाखादयश्च शिखापदवाच्याः स्युः । शेते "शीङो ह्रस्वश्च" इति खे ह्रस्वे, टापि च शिखा "शिखाशाखावर्हिचूडालाङ्गलिक्यग्रमात्रके । चूडामात्रे शिफा च ज्वालायां प्रपदेऽपि च" (इति मेदिनी) इत्येकं किरणादीनाम् (इति खान्ताः अथ गान्ता व्याख्यायन्ते—शैलवृक्षौ पर्वतपादपौ नगौ, अगौ च स्याताम् । न गच्छ नञ्पूर्वकाद्गच्छतेः कर्तरि "अन्येभ्योऽपीति" डे "नगोऽप्राणिष्वन्यतरस्याम्" इति नञि प्रकृतिभूते च नगः "नगो महीरुहे शैले भास्करे पवनाशने" (इति हैमः "नलोपो नञः" इति नस्य लोपे तु अगः "अगः स्यान्नगवत्तरौ । शैले सरीसृपे भानौ" इति द्वे शैलवृक्षादीनाम् । वायुविशिखौ वातवाणौ आशुगौ स्याताम् । आशु गच्छति "अन्येष्वपीति" डे आशुगः स्यादित्येकं वाय्वादीनाम् । शरो वाणः, अर्कः, सूर्य विहगः पक्षी एते खगाः खगपदवाच्याः स्युः । खे गच्छति "अन्येष्वपीति" डे खगः "खगः सूर्ये ग्रहे देवे मार्गणे च विहंगमे" (इति मेदिनी) इत्येकं वाणादीनाम् ॥२४॥

पक्षी, सूर्य, पाखी, सुपारी, समूह, हरिण, मृगशिर, ढूंढना, मांगना, जोरसे बहना.

पु. पु.
पतङ्गौ (पक्षिसूर्यौ च) पूगः (क्रमुकवृन्दयोः) ।
पु. पु.
(पशवोऽपि) मृगा वेगः (प्रवाहजवयोरपि) ॥ २५ ॥

पेति–पक्षिसूर्यौ विहगादित्यौ पतङ्गौ स्याताम्। चशब्दाच्छलभादयोऽपि पतङ्गाः स्युः। पतति, पततेः कर्तरि "पतेरङ्गच् पक्षिणि" इति अङ्गचि पतङ्गः "पतङ्गः शलभे शालीप्रभेदे पक्षिसूर्ययोः। क्लीबं सूते" (इति मेदिनी) इत्येकं विहंगमादीनाम्। क्रमुकवृन्दयोः पूगः स्यात्। पुनाति, पूयते मुखमनेनेति वा पुनातेः कर्तरि करणे वा "छापूखडिभ्यः कित्" इति गनि पूगः स्यादित्येकं पूगसंचयोः। पशवो वृषादयः अपिशब्दात्कुरङ्गादयोऽपि मृगाः मृगपदवाच्याः स्युः। मृग्यते 'मृग अन्वेषणे' चुराद्यदन्तात्कर्मणि घञि मृगः "मृगः पशौ कुरङ्गे च करिनक्षत्रभेदयोः। अन्वेषणायां याच्ञायां मृगी तु, वनितान्तरे" (इति मेदिनी) इत्येकं पशूनाम्। प्रवाहजवयोः अपिशब्दाद्रेतः किम्पाचयोरपि वेगः स्यात्। वेजनम् "ओविजी भयचलनयोः" अस्माद्भावे घञि, गुणे कुत्वे च वेगः "वेगो स्यप्रवाहयो.। रेतः किम्पाचयोश्चापि" (इति हैमः) इत्येकं प्रवाहादीनाम्॥ २५॥

फूलकी धूलि, गन्धचूर्ण धूलि, हाथी आदि, तिलक, नेत्र-प्रान्त आदि.

पु.
परागः (कौसुमे रेणौ स्नानीयादौ रजस्यपि)।
पु. पु. पु.
(गजेऽपि) नागमातङ्गावपाङ्ग (स्तिलकेऽपि च)॥२६॥

पेति–कौसुमे रेणौ, पुष्पधूलौ, स्नानीयादौ, रजसि अपिशब्दादुपरागचन्दनादावपि परागः स्यात्। परागच्छति "अन्येष्वपीति" डे परागः "परागः कौसुमे रेणौ धूलिस्नानीययोरपि। गिरिप्रभेदे विख्यातावुपरागे च चन्दने" (इति मेदिनी) इत्येकं पुष्पधूल्यादीनाम्। गजे हस्तिनि अपिशब्दात्क्रूराचारितोयदादावपि नागमातङ्गौ स्याताम्। न अगः नागः "नागं नपुंसकं रङ्गे सीसके करणान्तरे। नागः पन्नगमातङ्गक्रूराचारिषु तोयदे। नागकेसरपुन्नागनागदन्तकमुस्तके। देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तर. स्थितः" (इति मेदिनी) मतङ्गस्यायम् "तस्येदम्" इत्यणि वृद्धौ, अलोपे च मातङ्गः "मातङ्गः श्वपचे गजे" (इति मेदिनी) इति द्वे गजादीनाम्। तिलके अपि शब्दान्नेत्रप्रान्तादावपि अपाङ्गः स्यात्। अपगतोऽङ्गात् "निरादय." इति समासे अपाङ्गः "अपाङ्गो नयनस्यान्ते स्याच्चित्रकप्रधानयो." (इत्यजय.) इत्येकं तिलकादीनाम्॥ २६॥

स्वभाव, त्याग, निश्चय, अध्याय, सृष्टि, कवच, उपाय, ध्यान, सगति, युक्ति.

पु.
सर्गः (स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु)।
पु.
योगः (संनहनोपायध्यानसंगतियुक्तिषु)॥ २७॥

सेति–स्वभावः, निर्मोक्षस्त्याग.-मोक्षाभावो वा निश्चय., अध्याय., सृष्टिश्च एषु सर्गः स्यात्। सृज्यते 'सृज विसर्गे' देवादिकस्तस्मात्कर्मणि 'घञि' गुणे, कुत्वे च सर्गः "सर्गस्तु निश्चयाध्यायमोहोत्साहात्मसृष्टिषु" (इति मेदिनी) इत्येकं स्वभावादीनाम्। संनहनं कवचम्, उपाय. सामादिः, ध्यानं चिन्तनम्, संगतिः,

संगमः, युक्तिश्च एष्वर्थेषु योगः स्यात् । योजनम् 'युज् समाधौ' दैवादिकः' 'युजिर् योगे' रौधादिकश्च अस्माद्भावे घञि, गुणे, कुत्वे च योगः "योगोऽपूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु । वपुःस्थैर्यप्रयोगे च विष्कुम्भादिषु भेषजे । विश्रब्धघातके द्रव्योपायसंनहनेष्वपि । कार्मणेऽपि च (इति मेदिनी) इत्येकं कवचादीनाम् ॥ २७ ॥

सुख, स्त्री आदि का पालन, साँप का फन, देह, पपीहा, हरिण, विचित्र रंग.

पु.
भोगः (सुखेस्त्र्यादिभृतावहेश्चफणकाययोः)
पु.
(चातके हरिणे पुंसि) सारङ्गः (शबले त्रिषु) ॥ २८ ॥

भवेति—सुखे, स्त्र्यादिभृतौ, अहेः सर्पस्य फणकाययोश्च भोगः स्यात् । भोजनम् भुनक्तेर्भुजतेर्वा भावे घञि, गुणे, कुत्वे च भोगः "भोगः सुखे धने पुंसि (चाहेः) शरीरफणयोर्मतः । पालनेऽभ्यवहारे च योषिदादिभृतावपि" (इति मेदिनी) भृतिर्भाडिः आदिना हस्त्यश्वादिकर्मकाराणां च भृतिः "पालनेऽभ्यवहारे च निर्वेशे पण्योषिताम् (इति विश्वः) इत्येकं सुखादीनाम् । चातके हरिणे च सारङ्गः पुंसि स्यात् । शबले त्रिषु त्रिलिङ्ग्यां स्यात् । सारमङ्गं यस्य, शकन्ध्वादिः सारं गच्छति—"गमेःसुपि वाच्यः" इति खचि (खच्च डिद्वावाच्यः) इति डित्वाट्टिलोपे च, सहारङ्गेणेति वा सारङ्गः "सारङ्गः" पुंसि हरिणे चातके च मतङ्गजे । शबले त्रिषु (इति मेदिनी) इत्येकं चातकादीनाम् ॥ २८ ॥

वानर, मेढक, सारथी, शाप, अनादर, जुवा आदि, जोड़ा, सत्ययुगादि.

पु. पु.
(कपौ च) प्लवगः (शापे) त्वभिषङ्गः (पराभवे) ।
पु. न.
(यानाद्यङ्गे) युगः (पुंसि) युगं (युग्मे कृतादिषु) ॥ २९ ॥

केति—कपौ वानरे चशब्दाद्भेकसारथ्यादावपि प्लवगः स्यात् । प्लवेन गच्छति, 'अन्येष्वपीति डे' टिलोपे च प्लवगः "प्लवगो वानरे भेके सारथौ चोष्णादीधितेः" (इति मेदिनी) इत्येकं वानरादीनाम् । शापे आक्रोशे, पराभवे तिरस्कारे च अभिषङ्गः स्यात् । अभिषञ्जनम् अभिपूर्वकः 'षञ्ज सङ्गे' भौवादिकस्तस्माद्भावे घञि "उपसर्गादिति" षत्वे, कुत्वे च अभिषङ्गः "अभिषङ्गः पुंलिङ्गः पराभवाक्रोशशपथेषु" (इति मेदिनी) इत्येकं शापादीनाम् । यानाद्यङ्गे यानाद्यवयवे युगः पुंसि स्यात् । युग्मे युगले कृतादिषु कृत, त्रेता, द्वापरादिषु आदिना हस्तचतुष्कवृद्ध्योषधादावपि युगं क्लीबे स्यात् । योजनम्, युज्यते वा युनक्तेर्भावे कर्मणि वा घञि, संज्ञापूर्वकत्वात्तद्वहति रथयुगेनि निपातनाद्वा गुणाभावे, कुत्वे च युगः "युगो रथे हलाद्यङ्गे न द्वयोस्तु कृतादिषु । युग्मे हस्तचतुष्केऽपि वृद्धिनाम्नौषधेऽपि च" (इति मेदिनी) इत्येकं रथाद्यङ्गादीनाम् ॥ २९ ॥

स्वर्ग, बाण, गौ, बैल आदि, चिह्न, मूत्रेन्द्रिय आदि.

(स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ।
पु. स न.
लक्ष्यदृष्ट्या स्त्रियां पुंसि) गौर्लिङ्गं (चिह्नशेफसोः) ॥ ३० ॥

स्वरिति—स्वर्गो नाकः, इषुर्बाणः, पशवो वृषादयः, वाग् वाणी, वज्रं कुलिशम्, दिक् दिशा, नेत्रं लोचनम्, घृणिः किरणः, भूर्भूमिः जलं पानीयम् एषु अर्थेषु गौः लक्ष्यदृष्ट्या प्रयोगानुसारेण स्त्रियां पुंसि च स्यात् । गच्छति, गम्यतेऽनेनेति वा गमेः कर्तरि, कर्मणि, करणे वा 'गमेर्डोरिति' डो प्रत्यये गौः "गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि । नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु" (इति केशवः) इत्येकं स्वर्गादीनाम् । चिह्नं लक्ष्म, शेफो मेहनम् उभयोरर्थे लिङ्गं स्यात् । लिङ्ग्यतेऽनेन "लिगि गतौ" भौवादिकस्तस्मात्करणे "हलश्च" इति घञि, नुमागमे च लिङ्गम् "लिङ्गं चिह्नेऽनुमाने च सांख्योक्तप्रकृतावपि । शिवमूर्तिविशेषे च मेहनेऽपि नपुंसकम्" (इति मेदिनी) इत्येकं चिह्नादेः ॥ ३० ॥

स्वामी, शिखर आदि, मस्तक, योनि आदि, संपदा, अभिलाषा आदि.

न. न.
शृङ्गं (प्राधान्यसान्वोश्च) वराङ्गं (मूर्धगुह्ययोः) ।
न.
भगं (श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु) ॥ ३१ ॥

इति गान्तवर्गः ।

शृङ्गमिति—प्राधान्यसान्वोः प्रभुत्वशिखरयोः चशब्दाच्चिह्नक्रीडाम्बुयन्त्रकादावपि शृङ्गं स्यात् । शृणाति 'शॄ हिंसायाम्' क्रैयादिकस्तस्मात्कर्तरि "शृणातेर्ह्रस्वश्च" इति गनि, नुटि च शृङ्गम् "शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके । स्त्री विषायां स्वर्णमीनभेदयोर्ऋषभौषधौ" (इति मेदिनी) इत्येकं प्राधान्यादीनाम् । मूर्धगुह्ययोः मस्तकयोन्योः वरं च तदङ्गं चेति वराङ्गं स्यात् "वराङ्गं योनिमातङ्गमस्तकेषु गुडत्वचि" (इति मेदिनी) इत्येकं मूर्धादीनाम् । श्रीः संपत्तिः शोभा च, कामोऽभिलाषः, माहात्म्यमैश्वर्यम्, वीर्यं पराक्रमः, यत्नः प्रयत्नः, अर्कः सूर्यः, कीर्तिर्यशश्च एष्वर्थेषु भगं स्यात् । भज्यते-भजतेः कर्मणि 'पुंसीति' 'खनो घचेति' वा घे, कुत्वे च भगम् "भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु । माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथ ना रवौ" (इति मेदिनी) इत्येकं संपदादीनाम् ॥ ३१ ॥

इति गान्तवर्गः ।

अथ घान्ताः ।

मारना, अस्त्र, समूह, जल का वेग, मोल, पूजा का जल, पाप, दुःख, शिकार आदि.

पु. पु.
परिघः (परिघातेऽस्त्रे) ऽप्योघो (वृन्देऽम्भसां रये) ।
पु. न.
(मूल्ये पूजाविधा) वर्घो ऽ (होदुःखव्यसनेष्व) घम् ॥ ३२

परीति—परिघाते, अस्त्रे अस्त्रविशेषे, अपिशब्दाद् योगार्गलयोरपि परिघः स्यात् । परिहननम्, परिहन्यतेऽनेनेति वा हन्तेर्भावे करणे वा "परौघः" इत्यपि, घा देशे च परिघः " परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः " (इति मेदिनी) इत्येकं परिघातादीनाम् । " परेश्चघाङ्कयोः " इति लत्वेऽपि पलिघः " पलिघः काचकलशे घटे प्राकारगोपुरे " (इति हैमः) इत्येकं काचकलशादीनाम् । वृन्दे समूहे, अम्भसां जलानां रये वेगे ओघः स्यात् । आऊह्यतेऽनेन आङ्पूर्वकाद् ' ऊह वितर्के ' अस्मात्करणे " हलश्च " इति घञि गुणे, न्यङ्कादित्वात्कुत्वे च ओघः " ओघो वेगेजलस्य च । वृन्दे परम्परायां च द्रुतनृत्योपदेशयोः " (इति मेदिनी) इत्येकं समूहादीनाम् । मूल्ये, पूजाविधौ च अर्घः स्यात् । अर्ह्यतेऽनेन ' अर्ह पूजायाम् ' भौवादिकस्तस्मात्करणे " हलश्च " इति घञि न्यङ्कादित्वात्कुत्वे च अर्घः स्यादित्येकं मूल्यादेः । अंहः पापम्, दुःखं जन्मजरामरणादिकम्, व्यसनं मृगयाद्यूतादिकम् एवं अघं स्यात् । अङ्घ्यतेऽनेन " अघि गत्याक्षेपे " भौवादिकस्तस्मात्करणे घञि, " अनित मागमशासनमिति " नुमोऽभावे च ' अघं ' स्यादित्येकं पापादीनाम् ॥ ३२ ॥

इष्ट, अल्प, सिकहर या छीका, काच, नेत्ररोग, विपरीत, बड़ाई, ठगना, अग्नि, आषाढ, मन्त्री आदि.

(त्रिष्विष्टेऽल्पे) लघुः काचाः (शिक्यमृद्भेददृग्रुजः) ।
(विपर्यासे विस्तरे च) प्रपञ्चः (पावके) शुचिः ॥ ३३ ॥
(मास्यमात्ये चात्युपधे पुंसि मेध्ये सिते त्रिषु) ।

त्रिष्विति—इष्टे मनोज्ञे, अल्पे च लघुः त्रिषु त्रिलिङ्गयां स्यात् । लङ्घ्यते ' लघि गतौ भौवादिकस्तस्मात्कर्मणि " लघिवंह्योर्नलोपश्च " इत्युप्रत्यये नलोपे च लघु " कृष्णागुरुणि शीघ्रे च लघु क्लीबेऽगुरौ त्रिषु । निःसारे च मनोज्ञे च पृक्कायां च लघुः स्त्रियाम् " (इति रभसः) इत्येकमिष्टादीनाम् ' (इति घान्ताः) अथ चान्ता व्याख्यायन्ते—शिक्यं सिकहराख्यम्, मृद्भेदो मृदन्तरम्, दृग्रुक् नेत्ररोगः एते काचाः काचपदवाच्याः स्युः । काच्यतेऽनेन ' कच बन्धे ' भौवादिकस्तस्मात्करणे घञि " नक्रादेः " इति कुत्वाभावे च णिजन्तात्पचाद्यचि वा काचः " काचः शिक्ये मणौ नेत्ररोगभेदे मृदन्तरे " (इति मेदिनी) इत्येकं शिक्यादीनाम् । विपर्यासे विपर्यये, विस्तारे, चशब्दात्संचयप्रतारणयोरपि प्रपञ्चः स्यात् । प्रपञ्च्यते प्रपूर्वकः ' पचि व्यक्तीकरणे ' भौवादिकस्तस्मात्पचाद्यचि, नुमि, अनुस्वारे, परसवर्णे च प्रपञ्चः " प्रपञ्चः संचयेऽपि स्याद्विस्तरे च प्रतारणे " (इति मेदिनी) इत्येकं विपर्यासादीनाम् । पावके अनले, मासि आषाढमासे उपधामुल्कोचमतिक्रान्तेऽमात्ये च शुचिः पुंसि स्यात् । मेध्ये पूते, सिते धवले च त्रिषु त्रिलिङ्गयां स्यात् । शोचत्यनेन, शोचतेः कः " इगुपधात्कित् " इति इनि, कित्त्वाद् गुणाभावे च शुचिः " शुचिर्ग्रीष्माग्निशृङ्गा

ऽत्राषाढे शुद्धमन्त्रिणि। ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु" (इति मेदिनी) इत्येकं पावकादीनाम्॥ ३३। ३॥

क्रोधेच्छा, अभिलाषा किरण आदि.

स.
(अभिष्वङ्गे स्पृहायां च गभस्तौ च) रुचिः (स्त्रियाम्)॥३४॥

इति चान्ताः।

अभीति—अभिष्वङ्गे क्रोधेच्छायां स्पृहायामत्यासक्तौ, गभस्तौ किरणे चशब्दात्प्रकाशशोभयोरपि रुचिः स्त्रियां स्यात्। रोचते 'रुच दीप्तावभिप्रीतौ च' भौवादिकस्तस्मात्कर्तरि "इगुपधात्कित्" इतीनि, कित्त्वाद् गुणाभावे च रुचिः "रुचिः स्त्रीदीप्तिशोभायामभिष्वङ्गाभिलाषयोः" (इति मेदिनी) इत्येकं क्रोधेच्छादीनाम्॥ ३४॥

इति चान्ताः।

अथ छान्ताः।

हर्षित, रीछ, स्फटिक, पल्लव, हार, पहिरनेके कपडे का छोर, नाव, जल का किनारा.

पु. पु.स.न.
(प्रसन्ने भल्लुके) ऽप्यच्छो गुच्छः (स्तवकहारयोः)।
पु.
(परिधानाञ्चले) कच्छो (जलप्रान्ते त्रिलिङ्गकः)॥३५॥

प्रेति—प्रसन्ने आनन्दिते भल्लुके ऋक्षे अपिशब्दात्स्फटिकामलयोरपि अच्छः स्यात्। न च्छ्यति दृष्टिम् "सुपीति" के, न च्छाद्यते "अन्येष्वपीति" डे वा अच्छः "अच्छो भल्लूके स्फटिकेऽमलेऽच्छाभिमुखेऽव्ययम् (इति हैमः) इत्येकं प्रसन्नादीनाम्। स्तवकहारयोः गुच्छः स्यात्। गवनम् 'गुङ् शब्दे' भौवादिकस्तस्मात्संपदादित्वात्क्विपि, तुकि च 'गुत्' तां छ्यतीति "आतोऽनुपेति" के आलोपे च गुच्छः "स्याद् गुच्छः स्तवकेस्तम्बे हारभेदकलापयोः" (इति मेदिनी) इत्येकं स्तवकादीनाम्। परिधानाञ्चले परिधानीयवस्त्रप्रान्ते 'कच्छः' पुंसि, जलप्रान्ते तु त्रिलिङ्गकः स्यात्। कं जलं छ्यति परिच्छिनत्ति कपूर्वकः "छो छेदने" दैवादिकस्तस्मात्कर्तरि "आतोऽनुपेति" के, आलोपे च कच्छः "कच्छो द्रुभेदे नौकाङ्गेऽनूपप्राये तटेऽपि च। कच्छास्तु देशे, कच्छास्यात्परिधानापराञ्चले। चीर्यां वराह्याम्" (इति हैमः) इत्येकं परिधानाञ्चलादीनाम्॥ ३५॥

इति छान्ताः।

अथ जान्ताः।

मयूर, गरुड, नेवला, दांत, ब्राह्मण, पक्षी, विष्णु, शिव, बकरा आदि गौका स्थान, मार्ग, समूह.

पु. पु.
(केकिताक्ष्यौं) वहिभुजौ (दन्तविप्राण्डजा) द्विजाः।
पु. पु.
अजा (विष्णुहरच्छागा) (गोष्ठाध्वनिवहा) व्रजाः॥३६॥

कथितिति-केकी मयूरः, तार्क्ष्यो गरुडो नकुलश्च उभौ अहिभुजौ अहिभुक्पदवाच्यौ स्याताम्। अहिं भुङ्क्ते अहिपूर्वको 'भुज पालनाभ्यवहारयोः' रौधादिकस्तस्मात् "क्विप् चेति" क्विपि, अहिभुक् स्यादित्येकं मयूरादीनाम्। दन्ता दशनाः, विप्रा ब्राह्मणाः, अण्डजाः पक्षिणश्च एते द्विजाः द्विजपदवाच्याः स्युः। द्विर्जायते द्विःपूर्वको 'जनी-प्रादुर्भावे' दैवादिकस्तस्मात् "अन्येष्वपीति" डे, डित्त्वाट्टिलोपे च द्विजः "जन्मना जायते शूद्रः कर्मणा द्विज उच्यते" (इत्याद्यभियुक्तोक्तेः) तथा च "द्विजः स्त्री दन्तब्राह्मणक्षत्रवैश्यदन्ताण्डजेषु ना। द्विजा भार्ग्यां हरेणौ च" (इति मेदिनी) इत्ये दशनादीनाम्। विष्णुर्नारायणः, हरः शिवः, छागो वर्करः, एते अजाः अजपदवाच्य स्युः। न जायते "अन्येष्वपीति" डे, अजतीति विग्रहे तु पचाद्यचि वा, बहुलं तणि भाष्यस्थवार्तिकेन, व्यादेशाभावे च अजः "अजो हरौ हरे कामे विधौ छागे रघोःसुते" (इति विश्वः) इत्यकं हरिहरादीनाम्। गोष्ठं गोस्थानकम्, अध्वा मार्गः, निवहः स हश्च एते व्रजाः व्रजपदवाच्याः स्युः। व्रजति, व्रजेः कर्तरि पचाद्यचि, व्रजत्यस्मिन्नि विग्रहे तु "गोचरसंचरेति" घान्ते निपातिते वा व्रजः "व्रजो गोष्ठाध्ववृन्देषु" (इ मेदिनी) इत्येकं गोष्ठादीनाम्॥ ३६॥

बुद्ध, यमराज, पु. पु.
युधिष्ठिर, हाथी-
दाँत, सघनवन,
खेत, नगर का न. स.
द्वार, उत्तम स्त्री.

धर्मराजौ (जिनयमौ) कुञ्जो (दन्तेऽपि न स्त्रियाम्)
बलजे (क्षेत्रपूर्द्वारे) बलजा (वल्गुदर्शना)॥ ३७॥

धेति–जिनो बुद्धः, यमो यमराजः उभौ धर्मराजौ धर्मराजपदवाच्यौ स्याताम् धर्मेण राजति, पचाद्यचि, धर्मस्य राजा, धर्मश्चासौ राजाचेति वा "राजाहः सखि भ्यष्टच्" इति टचि धर्मराजः "धर्मराजो यमे बुद्धे युधिष्ठिरनृपे पुमान्" (इ मेदिनी) इत्येकं बुद्धादीनाम्। दन्ते दन्तिनां दन्ते अपिशब्दाद्धनौ निकुञ्जेऽपि कुञ्जः स्त्रियां न स्यात्। कौ जायते "सप्तम्यां जनेर्डः" इति डे, पृषोदरादित्वान्नुम गमे च कुञ्जः "कुञ्जोऽस्त्रियां निकुञ्जेऽपि हनौ दन्तेऽपि दन्तिनाम्" (इति मेदिनी) इत्येकं गजदन्तादीनाम्। क्षेत्रं धान्यक्षेत्रम्, पूर्द्वारं गोपुरम् उभे बलजे बलजपदवाच्ये स्याताम्। बले जातम् "सप्तम्यामिति" जनेर्डे, टिलोपे च बलजम् "बलजं गोपुर क्षेत्रे सस्यसंगरयोरपि" (इति मेदिनी) इत्येकं क्षेत्रादीनाम्। वल्गु मनोहरं दर्शनं यस्या वल्गुदर्शना वराऽबला बलजा स्यात्। बले जाता "सप्तम्यामिति" डे, टिलोपे, टापि च बलजा "बलजा वरयोपायां यूथ्याम्" (इति मेदिनी) इत्येकं वरयोपादीनाम्॥ ३७॥

१–"जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते। वेदाभ्यासाद्भवेद्विप्रो ब्रह्म जानाति ब्राह्मणः" (स्मृतिवचनम्)॥

समभूभाग, संग्राम, पुत्र, कन्या, यत, शङ्ख, चन्द्रमा, धन्वन्तरि, कमल आदि अपने, नित्य.

स. स.
(समक्ष्मांशे रणे)ऽप्याजिः प्रजा (स्यात्संततौ जने)।
पु. न.
अब्जौ (शङ्खशशाङ्कौ च) (स्वके नित्ये) निजं (त्रिषु) ३८

इति जान्ताः ॥

सेति—समक्ष्मांशे समभूभागे रणे संग्रामेऽपि आजिः स्यात्, अजन्त्यस्याम् 'अज गतौ' भौवादिकस्तस्मादाधारे "अज्यतिभ्यां च" इतीणि, वृद्धौ च आजिः "अथाजिः स्त्री समभूमौ च संग्रामे" (इति मेदिनी) इत्येकं समभूभागादीनाम् । संततौ संताने जने लोके च प्रजा स्यात् । प्रजायते, प्रपूर्वको 'जनी प्रादुर्भावे' दैवादिकस्तस्मात्कर्तरि "उपसर्गे च संज्ञायाम्" इति डे, टापि च प्रजा स्यादित्येकं सन्तानादीनाम् । शङ्खः कम्बुः, शशाङ्कश्चन्द्रः उभौ अब्जौ अब्जपदवाच्यौ स्याताम् । च शब्दान्निचुलादयोऽप्यब्जाः स्युः । 'अप्सु जायते' "सप्तम्यां जनेर्डः" इति डे, जस्त्वे च अब्जः "अब्जोऽस्त्री शङ्खे ना निचुले धन्वन्तरौ च हिमकिरणे । क्लीबं पद्मे" (इति मेदिनी) इत्येकं शङ्खादीनाम् । स्वके स्वकीये, आत्मीये, नित्ये चिरस्थायिनि च 'निजं' त्रिषु त्रिलिङ्ग्यां स्यात् । निजायते निपूर्वकाज्जनेः "उपसर्गे च" इति डे, निजं स्यादित्येकमात्मीयादीनाम् ॥ ३८ ॥

इति जान्ताः ॥

अथ ञान्ताः ।

आत्मा, प्रवीण, बुद्धि, नाम, हाथ आदि से अर्थ बतलाना, गायत्री, सूर्यपत्नी.

पु.
(पुंस्यात्मनि प्रवीणे च) क्षेत्रज्ञो (वाच्यलिङ्गकः)।
स.
संज्ञा (स्याच्चेतनानामहस्ताद्यैश्चार्थसूचना) ॥ ३९ ॥

पुमिति—आत्मनि क्षेत्रज्ञः पुंसि स्यात् । प्रवीणे च वाच्यलिङ्गकः स्यात् । क्षेत्रं जानाति उपपदसमासे 'ज्ञा अवबोधने' क्रैयादिकस्तस्मात्कर्तरि "आतोऽनुपसर्गे कः" इति के आलोपे च क्षेत्रज्ञः स्यादित्येकमात्मादीनाम् । चेतना बुद्धिः, नाम अभिधानम्, हस्ताद्यैः पाणिभ्रुकुटिलोचनाद्यैः अर्थस्य सूचना च एते संज्ञापदवाच्याः स्युः । संज्ञानम्, संपूर्वकाज्जानातेर्भावे "आतश्चोपसर्गे" इत्यङि, आलोपे च संज्ञा स्यात् । "संज्ञा नामनि गायत्र्यां चेतनारवियोषितोः । अर्थस्य सूचनायां च हस्ताद्यैरपि योषिति" (इति मेदिनी) इत्येकं चेतनादीनाम् ॥ ३९ ॥

वैद्य, पण्डित या आशावेद्वान्, बुध.

पु. पु.
दोषज्ञौ (वैद्यविद्वांसौ) ज्ञो (विद्वान्सोमजोऽपि च) ॥ ४० ॥

इति ञान्ताः ॥

१—समासे यथा "तिष्ठाम्याजौ स्थिरं मन" (इति मार्कण्डेयः) ॥

दविति—वैद्यश्चिकित्सकः, विद्वान्प्राज्ञः पण्डितश्च उभौ दोषज्ञौ दोषज्ञपदवाच्यौ स्याताम्। दोषं जानातीति दोषपूर्वकाज्जानातेः कर्तरि "आतोऽनुपसर्गे कः" इति के, आलोपे च दोषज्ञः स्यादित्येकं वैद्यादेः। विद्वानध्यात्मवेदकः सोमजश्चन्द्रजः अपि-शब्दाद् ब्रह्मा च ज्ञः स्यात्। जानाति, जानातेः कर्तरि "इगुपधज्ञाप्रीकिरः कः" इति के, आलोपे च ज्ञः "ज्ञो ब्रह्मा—बुध—विद्वत्सु" (इति मेदिनी) इत्येकं प्राज्ञादीनाम्॥ ४०॥

इति ञान्ताः॥

अथ टान्ताः।

कौआ, हाथी का गाल आदि, हाथी का कपोल, कमर आदि, चँदुला, दुष्टचर्म, महेश आदि.

(काकेभगण्डौ) करटौ (पु.) (गजगण्डकटी) कटौ (पु.)।
शिपिविष्ट (पु.) (स्तु खलतौ दुश्चर्मणि महेश्वरे)॥ ४१॥

केति—काको वायसः, इभगण्डो हस्तिकपोलः उभौ करटौ करटपदवाच्यौ स्याताम्। क इति रटेति कपूर्वको 'रट शब्दे' औवादिकस्तस्मात्पचाद्यचि करटः "करटो गज-गण्डे स्यात्कुसुम्भे निन्द्यजीवने। एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे। करटो वाद्य-भेदे" (इति मेदिनी) इत्येकं काकादीनाम्। गजगण्डकटी हस्तिकपोलश्रोणी कटौ कटपदवाच्यौ स्याताम्। कटति 'कटे वर्षावरणयोः' औवादिकस्तस्मात्पचाद्यचि कटः "कटः श्रोणौ क्रियाकारे किलिञ्जेऽ[2]तिशये शवे। समये गजगण्डेऽपि पिप्पल्यां च कटी मता" (इति विश्व.) इत्येकं गजगण्डादीनाम्। खलतौ रोगादिना निष्केश-शिरसि, दुष्टचर्मणि, महेश्वरे महेशे शौरौ च शिपिविष्टः स्यात्। शिपिषु रश्मिषु पशुषु वा विष्टः शिपिविष्टः शिपिपिष्टश्च "शिपिविष्टः शिवः शौरिर्दुश्चर्मा खल-तिस्तथा" (इति कोषान्तरम्) इत्येकं खल्वाटादीनाम्॥ ४१[1]॥

विश्वकर्मा, वढ़ई, सूर्य, भाग्य, काल, रस, अकार्य, डाह, तीखा.

(देवशिल्पिन्यपि) त्वष्टा (पु.) दिष्टं (न.) (दैवेऽपि न द्वयोः)।
(रसे)कटुः (पु.) कटु (न.) (कार्ये) त्रिषु (मत्सरतीक्ष्णयोः)॥ ४२॥

दयिति—देवशिल्पिनि विश्वकर्मणि अपिशब्दात्तक्षादित्यभेदयोरपि त्वष्टा स्यात् त्वक्षति, त्वक्ष्यते वा त्वष्टा "नप्तृनेष्टृ—" इति साधुः "त्वष्टा पुमान्देवशिल्पित-क्ष्णोरादित्यभिद्यपि" (इति मेदिनी) इत्येकं देवशिल्प्यादीनाम्। दैवे भाग्ये दिष्ट

१—"कटभृमस्य सौरभ्यमवघ्राय व्रजौकसः" (इति भागवतम्)॥

२—क्लिश्यतेऽनेन 'क्लिश ऋवंत्यक्रोडनयोः' अस्माद् "इगुपधात्कित्" इति किलिर्वक्रवीरणादित्वा-भावः ततः "पञ्चम्यामजातौ" इति डे पृषोदरादित्वान्नुमागमे च किलिञ्जस्तस्मिन्निति॥

द्वयोः स्त्री ,सयोः न स्यात् । अपिशब्दात्काले पुमान् स्यात् । दिश्यतेस्म दिशतेः कर्मणि क्ते, "व्रश्चेति" षत्वे, ष्टुत्वे च दिष्टम् "दिष्टं दैवे पुमान् काले" (इति मेदिनी) इत्येकं दैवादीनाम् । रसे रसमात्रे कटुः पुमान्, अकार्ये कटु नपुंसकं, मत्सरतीक्ष्णयोस्तु त्रिषु त्रिलिङ्गयां स्यात् ॥ ४२ ॥

क्षेम, अशुभ, न. शुभ, शुभ, अशुभ, सौरि का घर, मदिरा, मरणका चिह्न,

न.

रिष्टं (क्षेमाशुभाभावे) ष्वरिष्टे (तु शुभाशुभे) ।
(मायानिश्चलयन्त्रेषु कैतवानृतराशिषु) ॥ ४३ ॥

माया, निश्चल, यन्त्रादि, छोटी इलायची, काल अल्प, सशय.

पु.न.

अयोघने शैलशृङ्गे (सीराङ्गे) कूट (मस्त्रियाम्) ।

स.

(सूक्ष्मैलायां) त्रुटिः(स्त्रीस्यात्कालेऽल्पेसंशयेऽपि सा) ४४

रीति—क्षेमं कुशलम्, अशुभममङ्गलम्, अभावोऽशुभाभावः एषु रिष्टं स्यात् । रेषणम्, रिष्यते स्म वा "रिष् हिंसायाम्" दैवादिकस्तस्माद्भावे कर्मणि वा क्ते, इडभावे च रिष्टम् "रिष्टं क्षेमाशुभाभावे पुंसि खड्गे च फेनिले" (इति मेदिनी) इत्येकं क्षेमादीनाम् । शुभं कल्याणम्, अशुभमभद्रम् उभे अरिष्टे अरिष्टपदवाच्ये स्याताम् । न रिष्टम् नञ्समासे अरिष्टम् "अरिष्टो लशुने निम्बे फेनिले काककङ्कयोः । अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च" (इति मेदिनी) इत्येकं शुभादीनाम् । माया विपरीतदर्शनम, निश्चलः अचलः, अविकार आकाशादिर्वा, यन्त्रं मृगबन्धनविशेषः, कैतवं कपटम्, अनृतमसत्यम्, राशिः समूहः, अयोघनः लोहघनः, शैलशृङ्गम् पर्वतशिखरम्, सीराङ्गं फालाधार. एषु कूटम् अस्त्रियां पुन्नपुंसके स्यात् । कूटयते, कूटयते वा 'कूट आप्रदाने' चौरादिकस्तस्मात्पचाद्यचि, घञि वा कूटम् "कूटं पूर्द्वारयन्त्रयो. । मायादम्भाद्रिशृङ्गेषु सीराङ्गेनृत्ततुच्छयोः । निश्चलेऽयोघने राशौ" (इति हेमचन्द्रः) इत्येकं मायादीनाम् । सूक्ष्मैलायाम् तुत्थायाम् त्रुटिः स्त्री स्यात्—सा त्रुटिः काले कालमाने, अल्पे स्वल्पे, संशयेऽपि स्यात् । त्रुट्यतेऽनेन 'त्रुट छेदने' चौरादिकस्तस्माद् 'इगुपधादिति' इनि त्रुटिः, त्रुटी वा "त्रुटिः स्त्री संशये स्वल्पे सूक्ष्मैलाकालमानयोः" (इति मेदिनी) इत्येकं सूक्ष्मैलादीनाम् ॥ ४३।४४॥

धन्वा की नोक, बडाई, कोन, करोड़, जड, लिपटे बाल, फल, संपदा, ज्ञान, नेत्र, देखना.

स. स.

(अर्त्युत्कर्षाश्रयः) कोटयो (मूले लग्नकचे) जटा ।

स. स.

व्युष्टिः (फले समृद्धौ च) दृष्टि (र्ज्ञानेऽक्ष्णिदर्शने) ॥ ४५ ॥

अरत्नि—अर्तिर्धनुषोऽग्रभागः, उत्कर्षो जयातिः, अश्रिः खड्गादिकोणः एते कोटयः कोटिपदवाच्याः स्युः । कोटयते 'कुट प्रतापने' चौरादिकस्तस्माद् 'अचः' इति इन्-

त्यये, णिलोपे च कोटिः, कोटी वा "कोटिः स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः" (इति मेदिनी) इत्येकं चापाग्रभागादीनाम् । मूले, लग्नकचे च जटा स्यात् । जटति 'जट संघाते' भौवादिकस्तस्मात्पचाद्यचि, टापि च जटा "जटा लग्नकचे मूले मांस्यां प्लक्षे पुनर्जटी" (इति मेदिनी) इत्येकं मूलादीनाम् । फले, समृद्धौ च व्युष्टिः स्यात् । व्युच्छनम्, व्युच्छ्यतेवा विपूर्वकः 'उच्छी विवासे' भौवादिकस्तस्माद्भावे, कर्मणि वा क्तिनि, "व्रश्चेति" षत्वे, ष्टुत्वे च व्युष्टिः स्यादित्येकं फलादीनाम् । ज्ञाने, अक्षिणि नेत्रे, दर्शने च दृष्टिः स्यात् । दर्शनम्, दृश्यतेऽनयेति वा 'दृशिर्प्रेक्षणे' भौवादिकस्तस्माद्भावे कर्मणि वा क्तिनि, षत्वे, ष्टुत्वे च दृष्टिः "दृष्टिर्ज्ञानेऽक्ष्णिदर्शने" (इति हैमः) इत्येकं ज्ञानादीनाम् ॥ ४५ ॥

यज्ञ, इच्छा, निश्चित, बहुत, दु ख, महावन, दक्ष, तीक्ष्ण, नीरोग, हर, काला कौआ, पेट का कोठा, कोठिला, घरका मध्य, खत्ता कोठरी आदि.

स. इष्टि (र्यागेच्छयोः) स. सृष्टि (निश्चिते बहुनि त्रिषु)।
पु स न. कष्ट (तु कृच्छ्रगहने) (दक्षामन्दागदेषु तु)॥ ४६ ॥
पु.स.न. पटु (द्वौ वाच्यलिङ्गौ च) पु. नीलकण्ठः (शिवेऽपि च)।
पु. (पुंसि)कोष्ठे(ऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा)॥ ४७ ॥

यिति—यागो यज्ञः इच्छा वाञ्छा अनयोरिष्टिः स्यात् । एषणम् 'इषु इच्छायाम् तौदादिकस्तस्माद्भावे क्तिनि, इज्यतेऽनयेति वा यजेः करणे क्तिनि, "व्रश्चेति" षत्वे, ष्टु च इष्टिः "इष्टिर्मताभिलापेऽपि संग्रहः श्लोकयागयोः" (इति मेदिनी) इत्ये यागादीनाम् । निश्चिते, बहुनि प्रचुरे बहुले वा सृष्टिः त्रिषु त्रिलिङ्ग्यां स्यात् । सर्जनम 'सृज विसर्गे' दैवादिकस्तस्माद्भावे क्तिनि, षत्वे, ष्टुत्वे च सृष्टिः, अदन्तपाठे तु भा क्ते सृष्टमपि "मुक्तनिर्मितयोः प्राज्ये त्रिषु सृष्टं तु निश्चिते" (इति रुद्रः) इत्ये निश्चितादीनाम् । कृच्छ्रं दुःखम्, गहनं कलिलंमहावनं सघनं विकटं वा उभे कष्टे कष्ट पदवाच्ये स्याताम् । कषति, कष्यते स्म वा कर्तरि कर्मणि वा क्ते "कृच्छ्रगहनयोः कषः' इतीडभावे च कष्टम् "कष्टं तु गहने कृच्छ्रे" (इति कोषान्तरम्) इत्येकं कृच्छ्रादीनाम् दक्षश्चतुरः अमन्दस्तीक्ष्णः, अगदो नीरोगः एषु पटुः स्यात् । पाटयति । पटतेर्ण्यन्ता "फलिपाटीति" उप्रत्यये पटादेशे च पटुः "पटुस्तीक्ष्णे स्फुटे दक्षे निष्ठुरे निर्द ऽपि च" (इति रुद्रः) इत्येकं दक्षादीनाम् । इमौ कष्टपटू द्वौ वाच्यलिङ्गौ स्याताम (इति टान्ताः) अथ ठान्ता व्याख्यायन्ते—नीलः कण्ठो यस्येति नीलकण्ठः शिवे सदाशिवे अपिशब्दाद्दात्यूहकलविङ्कखञ्जनादिष्वपि स्यात् । "कालकण्ठस्तु दात्यूहे कल- विङ्के च खञ्जने । सितापाङ्गे हरे पीतसारके नीलकण्ठवत्" (इति विश्वः) इत्येकं हरादीनाम् । अन्तर्जठरं जठरमध्यम्, कुसूलो धान्यागारं कोठिलेति यावत् तथा अन्त-

गृहं गेहमध्यम् एतत्त्रयं कोष्ठः पुंसि स्यात् । कुष्यते कुष्णातेः कर्मणि " उषि कुषीति " थनि, ष्टुत्वे च कोष्ठः " कोष्ठः कुसूले चात्मीये मध्ये कुक्षेर्गृहस्य च " (इति मेदिनी) इत्येकमन्तर्जठरादीनाम् ॥ ४६ । ४७ ॥

सिद्धि, नाश, अन्त, बडाई, मर्यादा, दिशा, अत्युत्तम, अति वृद्ध, बडा भाई, महीना, बालक, छोटा भाई.

स. स.
निष्ठा (निष्पत्तिनाशान्ताः) काष्ठो (त्कर्षे स्थितौ दिशि) ।
पु.स.न. पु.
(त्रिषु) ज्येष्ठो(ऽतिशस्तेऽपि)कनिष्ठो(ऽतियुवाल्पयोः) ४८

इति ठान्ताः ॥

नीति—निष्पत्तिः निष्पादनं सिद्धिर्वा, नाशोऽदर्शनम्, अन्तः प्रध्वंसः एते निष्ठापदवाच्याः स्युः । निष्ठानम्, निपूर्वकात्तिष्ठतेर्भावे " आतश्चोपसर्गे " इत्यङि, उपसर्गादिति षत्वे टापि च निष्ठा " निष्ठा निष्पत्तिनाशान्तयाच्ञानिर्वहणेषु च " (इति मेदिनी) इत्येकं निष्पत्त्यादीनाम् । उत्कर्षे प्रकर्षे, स्थितौ स्थितिमात्रे, दिशि च काष्ठा स्यात् । काशते " काशृ दीप्तौ " भौवादिकस्तस्मात्कर्तरि " हनिकुषीति " कथनि, षत्वे, ष्टुत्वे, टापि च काष्ठा " काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः । स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम् " (इति मेदिनी) अतिशस्ते अतिप्रशस्ते अपिशब्दाद् वृद्धमासान्तरादावपि ज्येष्ठस्त्रिषु त्रिलिङ्ग्यां स्यात् । अतिशयेन प्रशस्तः " अतिशायने तमबिष्ठनाविति " इष्ठनि, " ज्यचेति " प्रशस्यस्य ज्यादेशे, गुणे च ज्येष्ठः " ज्येष्ठः श्रेष्ठे च वृद्धे च त्रिषु मासान्तरे पुमान् । ज्येष्ठा तु गृहगोधाख्यजन्तुनक्षत्रभेदयोः " (इति मेदिनी) इत्येकमतिप्रशस्तादीनाम् । अतियुवा अतितरुणः, अल्पः अत्यल्पः उभयोः कनिष्ठः स्यात् । अतिशयेन युवा अल्पो वा इष्ठनि, " युवाल्पयोः कनन्यतरस्याम् " इति कनादेशे च कनिष्ठः " कनिष्ठोऽतियुवात्यल्पानुजेस्त्रीदुर्बलाङ्गुलौ " (इति मेदिनी) इत्येकमतियुवादीनाम् ॥ ४८ ॥

इति ठान्ताः ॥

अथ डान्ताः ।

लाठी, दण्डकरना आदि, मिट्टी आदिका गोला या गेंद, मीठा, सांप, बाघ, गौ, धरती, वाणी, बुधभार्या.

पु. न. पु.
दण्डो (ऽस्त्री लगुडेऽपि स्याद्) गुडो (गोलेक्षुपाकयोः) ।
पु. स. स.
(सर्पमांसात्पशू) व्याडौ (गोभूवाच) स्त्विडा इला ॥४९॥

देति—लगुडे यष्टौ, अपिशब्दाद्यममानभेददमसैन्यव्यूहभेदादावपि दण्डः अस्त्री पुन्नपुंसकं स्यात् । दण्डयति, ' दण्ड निपातने ' चौरादिकस्तस्मात्कर्तरि पचाद्यचि, दण्डय

तेऽनेन "पुंसीति" घे, दाम्यतीति विग्रहे तु 'अमान्तादिति' डे वा दण्डः "दण्डो यमे मानभेदे लागुड दमसैन्ययोः । व्यूहभेदे प्रकाण्डेऽश्वे कोणामन्थानयोरपि । अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्विके" (इति विश्वः) इत्येक लगुडादीनाम् । गोलो व तुलपिण्डः, पचनं पाकः इक्षूणांपाकः अनयोः गुडः स्यात् । गुडति 'गुड वेष्टने' तौदादिकस्तस्मात्कर्तरि "इगुपधेति" के गुडः "गुडः स्याद्गोलके हस्तिसंनाहेक्षुविकारयोः । गुडा स्नुह्यां च कथिता गुडिकायां च योषिति" (इति मेदिनी) इत्येकं गोलादीनाम् । सर्पो भुजंगः, मांसमत्तीति मांसात् सचासौ पशुश्चेति मांसात्पशुर्व्याघ्रः उभौ व्याडौ व्याडपदवाच्यौ स्याताम् । व्याडति व्याङ्पूर्वकः 'अड उद्यमे' भौवादिकस्तस्मात्पचाद्यचि व्याडः "व्याडो व्याघ्रे खले सर्पे" (इति रभसः) इत्येकं सर्पादीनाम् । गौर्धेनुः, भूर्भूमिः, वाक् वाणी च एते इडापदवाच्या इलापदवाच्याश्च स्युः । इलति 'इल उत्क्षेपे' तौदादिकस्तस्मात्कर्तरि "इगुपधेति" के, टापि, डलयोरैक्याड्डत्वे च इडा "इडा तु बुधयोषिति । सौरभेय्यां च वचने वसुमत्यामपि स्त्रियाम्" (इति मेदिनी) डत्वाभावे तु इलापि "इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च" (इति मेदिनी) इति द्वे गवादीनाम् ॥ ४९ ॥

बांसकी शलाका, सिंहनाद, विषादि, घड़ी, नाडी, दण्ड, बाण, निन्दित आदि.

क्ष्वेडा (स.) **(वंशशलाकाऽपि) नाडी** (स.) **(कालेऽपि षट्क्षणे) ।**
काण्डो (पु.न.) **(ऽस्त्री दण्डबाणार्ववर्गावसरवारिषु) ॥ ५० ॥**

क्ष्वयिति—वंशस्य शलाका पिञ्जरार्थवेणुशलाका अपिशब्दात्सिंहनादोऽपि क्ष्वेडा स्यात् । तथा च विषध्वनिकर्णामयेषु क्ष्वेडः, लोहितार्कपर्णफलघोपपुष्पेषु च क्ष्वेडं स्यात् । क्ष्वलति 'क्ष्वलृ चलने' भौवादिकस्तस्मात्पचाद्यचि, डलयोरैक्याल्लस्य डत्वे टापि च क्ष्वेडा "क्ष्वेडो ध्वनौ कर्णामये विषे । क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति लोहिताकपर्णफले घोपपुष्पे नपुंसकम् । दुरासदे च कुटिले वाच्यलिङ्गः प्रकीर्तितः" (इति मेदिनी) इत्येकं वंशशलाकादीनाम् । षट्क्षणे षट्क्षणपरिमिते काले समये अपिशब्दाच्छिरादिष्वपि नाडी स्यात् । नालयति 'णल गन्धे' भौवादिकोण्यन्तस्तस्मात्पचाद्यचि, डलयोरैक्याल्लस्य डत्वे, गौरादित्वान्ङीपि च नाडी "नाडी नाले व्रणान्तरे । शिरायां गण्डदूर्वायां चर्यायां कुहनस्य च । तथा च षट्क्षणकालेऽपि" (इति मेदिनी) इति षट्क्षणकालादीनाम् । दण्डो लगुडादिः, बाणः शरः, अर्वा कुत्सितः, वर्गः परिच्छेदः, अवसरः प्रस्तावः, वारि जलम् एषु काण्डो अस्त्री पुन्नपुंसकं स्यात् । कनति 'कनी दीप्तौ' भौवादिकस्तस्मात् 'अमान्तादिति' डे "कादिभ्यः कित्" इति कित्त्वे, नस्यानुस्वारे, परसवर्णे "अनुनासिकस्येति" दीर्घे च काण्डः "काण्डःस्तम्बे तरुस्कन्धे बाणाऽवसरनीरयोः । कुत्सित वृक्षभिन्नाडी वृन्दे रहसि न स्त्रियाम्" (इति मेदिनी) इत्येकं दण्डादीनाम् ॥ ५० ॥

घोडेका गहना | आदि, अत्यर्थ, प्रतिज्ञा, दृढ़, अतिशय, दु:ख, कष्ट.

न.
(स्या)द्भाण्ड (मश्वाभरणेऽमत्रे मूलवणिग्धने) ।
न. न.
(भृशप्रतिज्ञयो) र्बाढं प्रगाढं (भृशकृच्छ्रयोः) ॥ ५१ ॥

स्यादिति—अश्वाभरणेऽश्वभूषणे, अमत्रे भाजने, मूलवणिग्धने वणिग्मूलधने, भूषणमात्रे च भाण्डं स्यात् । भण्यते 'भण् शब्दे' भौवादिकात्तस्मात्कर्मणि 'ञमान्तादिति' डे, पृषोदरादित्वाद्भाण्डम् "भाण्डं पात्रे वणिग्मूलधने भूषाश्वभूषयोः" (इति मेदिनी) इत्येकमश्वाभरणादीनाम् । (इति डान्ता.) अथ ढान्ता व्याख्यायन्ते—भृशमतिशयः, प्रतिज्ञानं प्रतिज्ञा अनयोर्बाढं स्यात् । बाहते, बाह्यते स्म वा "बाहृ प्रयत्ने" भौवादिकस्तस्मात्कर्तरि कर्मणि वा क्ते, "क्षुब्धस्वान्तेति" निपातिते बाढम् "बाढं भृशप्रतिज्ञयोः" (इति कोपान्तरम्) इत्येकमतिशयादीनाम् । भृशकृच्छ्रयोरतिशयदु:खयोः प्रगाढं स्यात् । प्रगाह्यतेस्म प्रपूर्वको 'गाहू विलोडने' अस्मात्कर्मणि क्ते, "यस्य विभाषा" इतीडभावे, हस्य ढत्वे, धत्वे, ष्टुत्वे, ढलोपे च प्रगाढम् "प्रगाढं स्याद्दृढे कृच्छ्रे" (इति धरणिः) इत्येकं भृशादीनाम् ॥ ५१ ॥

समर्थ, मोटा, छोड़े, मिले. सेना विशेष, बच्चा स्त्रीकागर्भ, बाणासुर, तीर

पु.स.न. पु.स.न
(शक्तस्थूलौ त्रिषु) दृढौ व्यूढौ (विन्यस्तसंहतौ) ।
पु. पु.
भ्रूणो(ऽर्भके स्त्रैणगर्भे) बाणो(बलिसुते शरे) ॥ ५२ ॥

शेति—शक्तः समर्थो बलवांश्च, स्थूलः पीवरः उभौ दृढौ दृढपदवाच्यौ सन्तौ त्रिषु त्रिलिङ्ग्यां स्याताम् । दृंहति, दृंहतिस्म वा "दृंह दृहि वृद्धौ" भौवादिकस्तस्मात्कर्तरि 'गत्यर्थाकर्मेति' क्ते "दृढः स्थूलबलयोः" इति निपातिते च दृढः "दृढः स्थूले नितान्ते च प्रगाढे बलवत्यपि" (इति मेदिनी) इत्येकं शक्तादीनम् । विन्यस्तो विसृष्टो विनिर्मुक्तः संस्थापितश्च, संहतो दृढसन्धिः, सन्नद्धः समुदितश्च उभौ व्यूढौ व्यूढपदवाच्यौ स्याताम् । विशेषेणोह्यतेस्म विपूर्वको 'वह प्रापणे' भौवादिकस्तस्मात्कर्मणि क्त, यजादित्वाद् "वचिस्वपीति" संप्रसारणे, हस्य ढत्वे, धत्वे, ष्टुत्वे, ढलोपे, दीर्घे च व्यूढः "व्यूढः संहतविन्यस्ते पृथुलेऽप्यभिधेयवत्" (इति मेदिनी) इत्येकं विन्यस्तादीनाम् (इति ढान्ताः) "अथ णान्ता व्याख्यायन्ते—" अर्भके शावके, स्त्रिया अयं स्त्रैणः सचासौ गर्भश्च तस्मिन्स्त्रैणगर्भे स्त्रीगर्भे च भ्रूणः स्यात् । भ्रूण्यते 'भ्रूण आशायाम्' चौरादिकस्तस्मात्कर्मणि घञि भ्रूणः "भ्रूणः स्त्रीगर्भडिम्भयोः" (इति मेदिनी) इत्येकम र्भकादीनाम् । बलिसुते बाणासुरे, शरे सायके च बाणः स्यात् । बाणयति 'बाण शब्दे' भौवादिक. स्वार्थण्यन्तस्तस्मात्कर्तरि पचाद्यचि बाण "बाणः स्याद्गोस्तने दैत्यभेदे केवलकाण्डयो. । बाणा तु बाणमूले

१ सेनाविशेषसंस्थापने यथा—"दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा" (इति भगवद्गीतायाम्) ।

ऽस्त्री नीलझिण्टथा पुंनर्द्वयोः" (इति मेदिनी) इत्येकं बलिसुतादीनाम् ॥ ५२ ॥

अतिसूक्ष्म, चावलों की कनकी, समूह, रुद्रानुचर, जूआ की बाजी आदि

पु. कणो (ऽतिसूक्ष्मे धान्यांशे संघाते प्रमथे) पु. गणः ।

पु.[१] पणो (द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च) ॥ ५३ ॥

केति—अतिसूक्ष्मे अतिलवे, परमाणौ वा धान्यांशे धान्यातिसूक्ष्मभागे तण्डुलादिप्रसिद्धे च कणः स्यात् । कणति 'कण निमीलने' भौवादिकस्तस्मात्पचाद्यचि कणः "कणा जीरककुम्भीरमक्षिकापिप्पलीषु च । कणोऽतिसूक्ष्मे धान्यांशे" (इति मेदिनी) इत्येकमतिसूक्ष्मादीनाम् । संघाते समूहे, प्रमथे रुद्रानुचरे च गणः स्यात् । गण्यते 'गण संख्याने' चौरादिकस्तस्मात्कर्मणि 'घञि' 'अचि' वा गणः "गणः स्यात्प्रमथे संघे संख्यासैन्यप्रभेदयोः" (इति मेदिनी) इत्येकं संघातादीनाम् । द्यूतादिषु कैतवादिषु, उत्सृष्टे समुज्झिते, भृतौ भृत्यायाम्, मूल्ये वस्तुमूल्ये, धने द्रव्ये, अपिशब्दाद्व्यवहारस्तुतिकार्षापणादिष्वपि पणः स्यात् । पणनम्, पण्यतेऽनेनवा 'पण व्यवहारे स्तुतौ च' भौवादिकस्तस्माद्भावे, करणे वा "नित्यं पणः परिमाणे" इत्यपि पणः "पणो माने वराटाना मूल्ये कार्षापणे धने । द्यूते विक्रय्य शाकादेर्वद्धमुष्टौ ग्लहे भृतौ" (इति धरणिः) इत्येकं द्यूतादीनाम् ॥ ५३ ॥

धनुषकी रस्सी, रसगन्धादि, मौन रहना आदि.

(मौर्व्यां द्रव्याश्रिते सत्त्वशुक्लसंध्यादिके) पु. गुणः ।

(निर्व्यापारस्थितौ कालविशेषोत्सवयोः) पु. क्षणः ॥ ५४ ॥

माविति—मौर्व्यां धनुषो ज्यायाम्, द्रव्याश्रिते रसगन्धादौ, सत्त्वं च शुक्लश्च सन्धिश्च सन्ध्या च ते ता वा आदयो यस्येति द्वन्द्वान्ते श्रूयमाणत्वादादिशब्दस्य प्रत्येकं सम्बन्धस्तेन सत्त्वादौ, शुक्लादौ, सन्धिविग्रहादौ सन्ध्यादौ च गुणः स्यात् । गुण्यते 'गुण आमन्त्रणे' चौरादिकस्तस्मात्कर्मणि घञि गुणः "गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये । त्यागशौर्य्यादिसत्त्वादिसन्ध्याद्यावृत्तिरज्जुषु । शुक्लादावपि बुद्ध्यां च" (इति मेदिनी) इत्येकं मौर्व्यादीनाम् । निर्व्यापारस्थितौ व्यापाराभावस्थितौ कालविशेषे त्रिंशत्कलात्मिके काले, उत्सवे पुत्रजन्मपर्वादौ च क्षणः स्यात् । क्षणोति 'क्षण हिंसायाम्' तानादिकस्तस्मात्कर्तरि पचाद्यचि क्षणः "क्षणो व्यापारशून्यत्वमुहूर्तोत्सवपर्वसु" (इति रुद्रः) इत्येकं निर्व्यापारस्थित्यादीनाम् ॥ ५४ ॥

---

१ "वराटकानां दशकद्वय यत्सा काकिणी ताश्च पणश्चतस्रः । ते षोडशद्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः" (इति लीलावत्याम्) ॥

ब्राह्मण, क्षत्रि-यादि, सफ़ेद, लाल, आदि, बड़ाई, हरूफ़, सूर्य, सूर्यका सारथी, वर्णभेद आदि.

पु.　　　　　　　　　　न.
वर्णो (द्विजादौ शुक्लादौ स्तुतौ) वर्णं (तु वाक्षरे) ।
पु.
अरुणो (भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु) ॥ ५५ ॥

वेति—द्विजादौ ब्राह्मणक्षत्रियादौ, शुक्लादौ शुक्लरक्तपीतादौ आदिना यशोगुणकथासु, स्तुतौ च वर्णः पुमान्स्यात् । अक्षरे अक्षरविलेखने तु वर्णं वा क्लीबं स्यात् । वर्ण्यते वर्ण प्रेरणे ' चौरादिकस्तस्माद्भावे कर्मणि वा घञि वर्णः " वर्णो द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना न स्त्रियां भेदरूपाक्षरविलेखने " (इति मेदिनी) इत्येकं द्विजादीनाम् । भास्करे सूर्ये अपिशब्दादव्यक्तरागसन्ध्यारागार्कसारथ्यादिषु अरुणः पुमान्स्यात् । वर्णभेदेऽपि त्रिषु त्रिलिङ्ग्यां स्यात् । ऋच्छति ' ऋ गतौ ' भौवादिकस्तस्मात्कर्तरि " अर्तेश्च " इत्युननि गुणे, णत्वे च अरुणः " अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ । निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु" (इति मेदिनी) इत्येकं भास्करादीनाम् ॥ ५५ ॥

शिव, खभा या काठ, वृक्षादि, काला कौआ, द्रोणाचार्य, परिमाण विशेष, शब्द, सङ्ग्राम, नाई, मुख्य आदि.

पु.　　　　　　　　पु　　　　　　　　पु
स्थाणुः (शर्वेऽपि च) द्रोणः (काकेऽपि च) (रवे) रणः ।
पु　*
ग्रामणी (नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु) ॥ ५६ ॥

स्थेति—शर्वे शिवे अपिशब्दात्कीले ध्रुवे च स्थाणुः स्यात । तिष्ठति, 'ष्ठा गतिनिवृत्तौ' भौवादिकस्तस्मात्कर्तरि " स्थो णुः " इति णौ स्थाणुः " स्थाणुः कीले हरे पुमान् । अस्त्री ध्रुवे " (इति मेदिनी) इत्येकं शिवादीनाम् । काके कृष्णकाके अपिशब्दादाढकादिचतुष्टयकपीपतिनीवृदन्तरकाष्ठाम्बुवाहिन्यादिष्वपि द्रोणः स्यात् । द्रवति ' द्रु गतौ ' भौवादिकस्तस्मात्कर्तरि " कृवृश्रृसि " इति ने, णत्वे च द्रोणः " द्रोणोऽस्त्रियामाढके स्याद्दाढकादिचतुष्टये । पुमान्कृपीपतौ कृष्णकाकेऽस्त्री नीवृदन्तरे । स्त्रियां काष्ठाम्बुवाहिन्यां गवादिन्यामपीष्यते " (इति मेदिनी) इत्येकं काकादीनाम् । रवे क्वणे, कोणे, समरे च रणः स्यात् । रणति ' रण शब्दे ' भौवादिकस्तस्मात्कर्तरि पचाद्यचि रणः " रणः कोणे क्वणे पुंसि समरे पुन्नपुंसकम् " (इति मेदिनी) इत्येकं क्वणादीनाम् । नापिते क्षौरकारिणि ग्रामणी. पुंसि स्यात् । श्रेष्ठे प्रधाने ग्रामाधिपे च त्रिषु

---

* " ग्रामीणा नीलिकायां स्त्री ग्रामोद्भूतेऽभिधेयवत् " (इति मेदिनी) । ग्रामोऽन्त्यस्या इति विग्रहे तु ग्रामिणीत्यपि ।

त्रिलिङ्ग्यां स्यात् । ग्रामं नयति उपपदसमासे 'णीञ् प्रापणे' भौवादिकस्तस्मात् "सत्सूद्विषेति" क्विपि "अग्रग्रामाभ्याम्" इति णत्वे च ग्रामणी: "ग्रामणीर्भोगिके पत्यौ प्रधाने नापितेऽपि च । ग्रामणीर्नीलिकायां च ग्रामेयी पण्ययोषितोः" (इति विश्वः) इत्येकं नापितादीनाम् ॥ ५६ ॥

भेड़ा, खरहा, ऊट आदि लोमों का बना ऊन आदि, मृगी, स्वर्णप्रतिमा आदि.

स. ऊर्णा (मेषादिलोम्नि स्यादावर्ते चान्तराभ्रुवोः)[1] ।
स. हरिणी (स्यान्मृगी हेमप्रतिमा हरिता च या) ॥ ५७ ॥

ऊरिति—मेष आदिर्येषामिति आदिना शशोष्ट्रमृगादिग्रहस्तेषां लोम तस्मिन्मेषादिलोम्नि भ्रुवोरन्तरावर्ते च ऊर्णा स्यात् । ऊर्णोति 'ऊर्णुञ् आच्छादने' आदादिकस्तस्माद् "अन्येभ्योऽपीति" डे, टिलोपे, टापि च ऊर्णा "सोर्णा तु चक्रवर्त्यादीनां महापुरुषाणां च महापुरुषलक्षणभूता मृणालतन्तुसूक्ष्मा, शुभ्रायता प्रशस्तावर्ता प्रायेण भवति" इत्येकं मेषादिलोमादीनाम् । मृगी मृगपत्नी, हेमप्रतिमा सुवर्णमयी मूर्तिः य हरिता हरितवर्णविशिष्टा च सा हरिणी स्यात् । हरिणस्य स्त्री "पुंयोगादिति" ङीपि हरिणी "हरिणी हरितायां च नारीभिद्वृत्तभेदयोः । सुवर्णप्रतिमायां च" (इति मेदिनी) इत्येकं मृग्यादीनाम् ॥ ५७ ॥

पाण्डुरवर्ण, मृग, खम्भा, लोहेकी प्रतिमा, वाञ्छा, पिपासा, निन्दा, दया.

पु. स. (त्रिषु पाण्डौ च) हरिणः स्थूणा (स्तम्भेऽपि वेश्मनः)।
स. स. तृष्णे (स्पृहापिपासे द्वे) (जुगुप्साकरुणे) घृणे ॥ ५८ ॥

त्रिष्विति—पाण्डौ पाण्डुरवर्णे चशब्दात्सारङ्गेपि हरिणः त्रिपु त्रिलिङ्गथा स्यात् हरति 'हृञ् हरणे' भौवादिकस्तस्मात्कर्तरि "हृश्र्यास्त्यां" इतीनचि णत्वे च हरिणः "हरिणः पुंसि सारङ्गे शवले त्वभिधेयवत्" (इति मेदिनी) इत्येकं पाण्डुरादीनाम् । वेश्मनो गृहस्य स्तम्भे अपिशब्दात्सूर्म्यामपि स्थूणा स्यात् । तिष्ठतीति स्थूणा "रास्नासास्नेति" साधुः "स्थूणा स्यात्सूर्म्यां स्तम्भेऽपि वेश्मनः" (इति मेदिनी) इत्येकं गेहस्तम्भादीनाम् । स्पृहा च पिपासा च इमे द्वे तृष्णे तृष्णापदव स्याताम् । तर्षणाम् 'ञितृष पिपासायाम्' दैवादिकस्तस्मात्कर्तरि "तृषिशुषिरसि कित्" इति ने, तस्य कित्त्वादूगुणाभावे टापि च तृष्णा स्यादित्येकं स्पृहादीना जुगुप्सा निन्दा, करुणा कृपा च उभे घृणे घृणापदवाच्ये स्याताम् । घर्ण 'घृणु दीप्तौ' तानादिकस्तस्माद्भावे "पिद्भिदादिभ्योऽङि" इत्यङि टापि च घृ स्यादित्येकं निन्दादीनाम् ॥ ५८ ॥

१—स्वामिमतं तु "आवर्ते चान्तराभ्रुवौ" इति पाठस्तत्र भ्रुवाविन्यत्र 'अन्तरान्तरेण युक्ते' इति द्विती ज्ञातव्या ॥

बाजार की गली, दूकान आदि, मदिरा, पश्चिम दिशा, हथिनी, हाथी, बल, धन

स. स.
(वणिक्पथे च) विपणिः (सुरा प्रत्यक् च) वारुणी[१] ।

स. न.
करेणु (रिभ्यां स्त्री नेभे) द्रविणं (तु बलं धनम्) ॥ ५६ ॥

वेति—वणिक्पथे=हट्टमार्गे चशब्दादापणे पण्ये च विपणिः स्त्रियां स्यात् । विपण्यतेऽस्याम् विपूर्वकः 'पण व्यवहारे' भौवादिकस्तस्मात्कर्मणि आधारे वा "सर्वधातुभ्य इन्" इतीनि विपणिः "आपणे पण्यवीथ्यां च पण्ये च विपणिः स्त्रियाम्" (इति रुद्रः) सुरा मदिरा, प्रत्यक् प्रतीची च उभे वारुणीपदवाच्ये स्याताम् । वरुणस्येयम् "तस्येदम्" इत्यणि, वृद्धौ, अलोपे "टिड्ढाणञिति" ङीपि च वारुणी "वारुणी गण्डदूर्वायां प्रतीचीसुरयोः स्त्रियाम्" (इति मेदिनी) इत्येकं सुरादीनाम् । इभ्यां हस्तिन्यां करेणुः स्त्री स्यात् । इभे हस्तिनि च करेणुः ना पुमान्स्यात् । के रुणुरस्य, करोति वा "कृहृभ्यामेणुः" इत्येणौ, गुणे च करेणुः "करेणुर्गजयोपायां स्त्रिया पुंसि मतङ्गजे" (इति मेदिनी) गरेणुर्वा "करेणुश्च गरेणुश्च करिणीकर्णिकारयोः" (इति रन्तिदेवः) बलं पराक्रमं, धनं वित्तं च द्रविणं स्यात् । द्रवति द्रयते वा 'द्रु गतौ' भौवादिकस्तस्मात्कर्तरि कर्मणि वा "द्रुदक्षिभ्यामिनन्" इतीननि, गुणे, अवादेशे च द्रविणम् "द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे" (इति मेदिनी) इत्येकं बलादीनाम् ॥ ५६ ॥

घर, रक्षा करनेवाला, कमल, अग्निमन्थ, विष, युद्ध, लोहा, तेज.

न. न.
शरणं (गृहरक्षित्रोः) श्रीपर्णं (कमलेऽपि च) ।

न.
(विषाभिमरलोहेषु) तीक्ष्णं (क्लीबे खरे त्रिषु) ॥ ६० ॥

शेति—गृहं गेहम्, रक्षतीति रक्षिता पालयिता च उभयोः शरणं स्यात् । शृणाति, शीर्ण वा 'शॄ हिंसायाम्' क्रैयादिकस्तस्मात्कर्तरि "कृत्यल्युटो बहुलम्" इति 'ल्युटि' भावे वा ल्युटि, अनादेशे, गुणे, णत्वे च 'शरणम्' "शरणं गृहरक्षित्रोर्वधरक्षणयोरपि" (इति मेदिनी) इत्येकं गेहादीनाम् । कमले पद्मे अपिशब्दादग्निमन्थादिषु श्रीपर्णं स्यात् । श्रीः पर्णोऽस्येति श्रीपर्णम् "श्रीपर्णी कुम्भिरम्भार्योः क्लीबे पद्माग्निमन्थयोः" (इति रभसः) इत्येकं पद्मादीनाम् । विषं गरलम्, अभिमरो मरणानिरपेक्षया युद्धोत्साहः, "भवेदभिमरो युद्धे बले स्वबलसाध्वसे" (इति मेदिनी) लोहं कालायसम् एषु तीक्ष्णं क्लीबे नपुंसके स्यात् । खरे तिग्मे त्रिषु त्रिलिङ्ग्यां स्यात् । तेजयति 'तिज निशाने' भौवादिकः स्वार्थण्यन्तो वा "तिजेर्दीर्घश्च" इति क्स्ने, कुत्वे, षत्वे, णत्वे, क्षत्वे च तीक्ष्णम् "तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके । क्लीबं यवाग्रजे पुंसि निरात्मत्यागिनोस्त्रिषु" (इति मेदिनी) इत्येकं गरलादीनाम् ॥ ६० ॥

१—"वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनाविति" भागवतम् ॥

हेतु मर्यादा आदि जिससे क्रिया कीजाय, खेत आदि·

न.
प्रमाणं (हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु) ।
न.
करणं (साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि) ॥ ६१ ॥

प्रेति--हेतुः कारणं धूम्रादिः, मर्यादा, सीमा, शास्त्राणि षड्दर्शनानि, इयत्ता परिच्छेदकता, प्रमाता ज्ञाता एष्वर्थेषु प्रमाणं स्यात् । प्रमिमीते, प्रमितम्, प्रमीयते ज्ञायते वास्तुसार्वस्वं यथार्थतयाऽनेनेति वा प्रपूर्वको 'माङ् माने' जौहोत्यादिकस्तस्मात्कर्तरि, भावे, करणे वा ल्युटि, अनादेशे णत्वे च प्रमाणम् "प्रमाणं नित्यमर्यादा शास्त्रेषु सत्यवादिनि । इयत्तायां च हेतौ च क्लीबैकत्वे प्रमातरि" (इति मेदिनी) इत्येकं कारणादीनाम् । साधकतमं क्रियासिद्धौ प्रकृष्टोपकारकम्, क्षेत्रं धान्योत्पत्तिस्थानम्, गात्रं कलेवरम्, इन्द्रियाणि ज्ञानेन्द्रियाणि--कर्मेन्द्रियाणि च एषु, अपिशब्दात् कर्मकायस्थव्रतग्रन्थनाट्यगीतादिष्वपि करणं स्यात् । करोति, क्रियते, क्रियतेऽनेन, कृतं वा 'डुकृञ् करणे' तानादिकस्तस्मात्कर्तृकर्मकरणभावेषु ल्युटि, गुणे, अनादेशे, णत्वे च करणम् "करणं कारणे काये साधनेन्द्रियकर्मसु । कायस्थे व्रतग्रन्थे च नाट्यगीतप्रभेदयोः । पुमाञ्शूद्राविशोः पुत्रे वानरादौ च कीर्त्यते" (इत्यजयः) इत्येकं साधनक्षेत्रादीनाम् ॥ ६१ ॥

जीवोंके जन्म दि उगिला अन्नादि·

(प्राण्युत्पादे) संसरण (मसंबाधचमूगतौ) ।
(घण्टापथे) (ऽथ वान्तान्ने) समुद्धरण (मुन्नये) ॥ ६२

प्रेति--प्राण्युत्पादे प्राणिनां जीवानामुत्पादे, असंबाधचमूगतौ अव्याहतसेनाग[...] घण्टापथे घण्टोपलक्षितमार्गे, नगरमार्गे च संसरणं स्यात् । सम्यक्सरन्त्यनेन संपूर्व[...] 'सृ गतौ' भौवादिकस्तस्मात्करणे ल्युटि, गुणे, अनादेशे, णत्वे च संसरणं स्या[...] त्येकं जीवोत्पादादीनाम् । अथेति वान्तान्ने भुक्तोज्झिते, उन्नये ऊर्ध्वनयने, उन्मूलिते समुद्धरणं स्यात् । सम्यग् उद्ध्रियते समुत्पूर्वको 'हृञ् हरणे' भौवादिकस्तस्मात्कर्मा[...] भावे वा ल्युटि, गुणे, अनादेशे, णत्वे च समुद्धरणम्, उद्धरणमपि "भुक्तोज्झितं[...] न्मूलितयोः स्यादुद्धरणमुन्नये" (इति रभसः) इत्येकं वान्तान्नादीनाम् ॥ ६२ ॥

पशुओंका सींग, हाथीदाँत, क्रम से उतार पृथिव्यादि·

पु.स.न.
(अतस्त्रिषु) विषाणं (स्यात्पशुशृङ्गेभदन्तयोः) ।
पु.स.न.
प्रवणः (क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे) ॥ ६३ ॥

अनइति--अतः परम् आणान्तं वक्ष्यमाणाः शब्दास्त्रिषु त्रिलिङ्गयां स्युः । पशूनां वृषभादीनां शृङ्गम्, इभानां हस्तिनां दन्तः उभयोः विषाणं स्यात् । व्यस्तिविपूर्वक[...] 'अस भुवि' आदादिकस्तस्मात्कर्तरि चानशि, "श्नसोरल्लोपः" इत्यल्लोपे "उपसर्गा[...]

त्पादुरिति " षत्वे, णत्वे च विषाणम् "विषाणी क्षीरकाकोल्यामजशृङ्ग्यां च योषिति। कुष्ठनामौषधौ क्लीवं त्रिपु शृङ्गेभदन्तयोः" (इति मेदिनी) इत्येकं पशुशृङ्गादीनाम्। क्रमनिम्नोर्व्याम् क्रमनिम्नमहीभागे, प्रह्वे नम्रे च प्रवणास्त्रिपु स्यात्। चतुष्पथे चतुर्मार्गसंगमे तु ना पुमान्स्यात्। प्रवन्तेऽनेनात्रेति वा 'प्रुङ् गतौ' भौवादिकस्तस्मात्करणे आधारे वा "करणाधिकरणयोश्च" इति ल्युटि, गुणे, अवादेशे, णत्वे च प्रवणः "प्रवणः क्रमनिम्नोर्व्यां प्रह्वे च स्याच्चतुष्पथे। आयत्ते च तथा क्षीणे प्रगुणे समुदाहृतः" (इति धरणिः) इत्येकं क्रमनिम्नमहीभागादीनाम् ॥ ६३ ॥

व्याप्त, अशुद्धादि, शून्य, ऊसर, देव, सूर्यादिनद, समुद्र.

पु.स न. संकीर्णौ (निचिताशुद्धा) पु स न. वीरिणं (शून्यमूषरम्)।
(देवसूर्यौ) विवस्वन्तौ सरस्वन्तौ (नदार्णवौ) ॥६४॥

समिति—निचितो व्याप्तः अशुद्धोऽपूतः उभौ संकीर्णौ संकीर्णपदवाच्यौ स्याताम्। संकीर्यते स्म संपूर्वकः 'कॄ विक्षेपे' तौदादिकस्तस्मात्कर्मणि क्ते "ॠत इद्धातोः" इतीत्त्वे रपरत्वे दीर्घे "रदाभ्यामिति" निष्ठानत्वे णत्वे च संकीर्णस्त्रिपु स्यात् "संकीर्णः संकटे व्याप्ते कुत्रचिद्वर्णसंकरे" (इत्यजयः) इत्येकं निचितादीनाम्। शून्यं निराश्रयदेशं प्राणिवर्जितं वा, ऊषरं च ईरिणं स्यात् ॠच्छन्ति यस्मिन्निति 'ॠ गतौ' भौवादिकस्तस्मादाधारे "अर्तेः किदीच" इनीननि, कित्त्वाद्गुणाभावे, ईदादेशे, रपरत्वे, णत्वे च ईरिणम् "ईरिणं तूषरे शून्ये" (इति मेदिनी) ह्रस्वादिरपि "इरिणं निराश्रये भूभागे कथितमूषरे" (इति ह्रस्वादावजयः) इत्येकं शून्यादीनाम् (इति णान्ताः) अथ तान्ता व्याख्यायन्ते—देवः सुरो घनो राजा च, सूर्यो दिवाकरः उभौ विवस्वन्तौ स्याताम् विवस्तेजोऽस्त्यस्येति मतुपि "मादुपधायाश्चेति" मतोर्मस्य वत्वे, दीर्घे, नुमि, सुलोपे, संयोगान्तसलोपे च विवस्वान् "विवस्वांस्तु सुरे सूर्ये तन्नगर्य्यां विवस्वती" (इति मेदिनी) इत्येकं देवादीनाम्। नदः सरिद्विशेषः, अर्णवः समुद्रश्च उभौ सरस्वन्तौ स्याताम् सरोगमनमस्यास्ति मतुपि सरस्वान् "सरस्वांस्तु नदे चाब्धौ नान्यवद्रसिके स्त्रियाम्। वाणीस्त्रीरत्नवाग्देवीगोनदीषु नदीभिदि" (इति मेदिनी) इत्येकं नदादीनाम् ॥ ६४ ॥

पक्षी, गरुड, गीध, पक्षीमात्र, अग्नि, धूममयी तारा, मेघ, पहाड.

पु. (पक्षितार्क्ष्यौ) गरुत्मन्तौ पु. शकुन्तौ (भासपक्षिणौ)।
(अग्न्युत्पातौ) पु धूमकेतू पु. जीमूतौ (मेघपर्वतौ)॥ ६५ ॥

पेति—पक्षी पक्षवान् खगो वा तार्क्ष्यस्य कश्यपस्यापत्यं तार्क्ष्यो गरुडश्च उभौ गरु-

---

१—"देव सुरे घने राज्ञि देवमाल्यातमिन्द्रिये। देवी कृताभिषेकाया तेजनीस्पृक्कयोरपि" (इति कोशान्तरम्) ॥

त्मन्तौ स्याताम् । गरुतः पक्षाः सन्त्यस्येति 'मतुपि' यवादित्वात् "झयः" इति वत्वाभावे च गरुत्मान्स्यादित्येकं खगादीनाम् । भासः कुक्कुटो गृध्रश्च "भासो भासि समाख्यातो गोष्ठकुक्कुटगृध्रयोः" (इति विश्वः) पक्षी पक्षिमात्रश्च उभौ शकुन्तौ शकुन्तपदवाच्यौ स्याताम् । शक्नोति "शकेरुनोन्तोन्त्युनयः" इत्युन्ते शकुन्तः "शकुन्तः कीटभेदे स्याद्भासपक्षिविहंगयोः" (इति मेदिनी) इत्येकं भासादीनाम् । अग्निरनलः, उत्पातः उपसर्गः शुभाशुभसूचको महाभूतविकारो वा उभौ धूमकेतू धूमकेतुपदवाच्यौ स्याताम् । धूमः केतुश्चिह्नमस्येति धूमकेतुः "धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोः" (इति विश्वः) इत्येकमनलादीनाम् । मेघः पयोधरः, पर्वतः शैलश्च उभौ जीमूतौ जीमूतपदवाच्यौ स्याताम् । जीवनं जलं मूतं बद्धमनेन पृषोदरादित्वात्साधुः । ज्यानं जीः, जिया वयोहान्या मूतो बद्ध इति वा जीमूतः "जीमूतोऽद्रौ भृतिकरे देवताड़े पयोधरे" (इति मेदिनी) इत्येकं मेघादीनाम् ॥ ६५ ॥

हाथ, नक्षत्र-विशेष, पवन, देवता, हाथीवान्, गाड़ीवान्, धारण या पालन करनेवाला आदि.

पु. पु.
हस्तौ (तु पाणिनक्षत्रे) मरुतौ (पवनामरौ) ।

पु. पु.
यन्ता (हस्तिपके सूते) भर्ता (धातरि पोष्टरि) ॥ ६६ ॥

हेति—पाणिर्हस्तः, नक्षत्रमृक्षम् उभे हस्तौ स्याताम् । हसति 'हसे हसने' भौवादिकस्तस्मात्कर्तरि "हसिमृग्रिण्" इति तनि हस्तः "हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च । ऋक्षे कौशात्परो व्राते" (इति मेदिनी) इत्येकं करादीनाम् । पवनो वायुः अमरो देवः उभौ मरुतौ मरुत्पदवाच्यौ स्याताम् । म्रियतेऽनेन 'मृङ् प्राणत्यागे' तौदादिकस्तस्मात्करणे "मृग्रोरुतिः" इत्युतौ, गुणे च मरुत् "मरुद्देवे समीरे वा ग्रन्थिपर्णे नपुंसकम्" (इति मेदिनी) इत्येकं वाय्वादीनाम् । हस्तिपके हस्त्यारोहे सूते सारथौ च यन्ता स्यात् । यच्छति 'यमु उपरमे' भौवादिकस्तस्मात्कर्तरि "ण्वुल्तृचाविति" तृचि अनुस्वारे, परसवर्णे च यन्ता स्यादित्येकं हस्तिपकादीनाम् । धातरि धारणकर्तरि, पोष्टरि पोषणकर्तरि च भर्त्ता स्यात् । भरति, बिभर्ति वा 'भृञ् भरणे' भौवादिकः 'डुभृञ् धारणपोषणयोः' जौहोत्यादिकश्च अस्मात्कर्तरि "ण्वुल्तृचाविति" तृचि कर्तृवद्भर्ता स्यात् । "भर्त्ता स्वामिनि पुंसि स्यात् त्रिषु धातरि पोष्टरि" (इति मेदिनी) इत्येकं धात्रादीनाम् ॥ ६६ ॥

पीने का पात्र, बच्चा आदि, भूतान्तर, मृतक, ग्रह, भेद, पताका, राजा, पुत्र आदि.

पु. पु.
(पानपात्रे शिशौ) पोतः प्रेतः (प्राण्यन्तरे मृते) ।

पु. पु.
(ग्रहभेदे ध्वजे) केतुः (पार्थिवे तनये) सुतः ॥ ६७ ॥

पेति—पानस्य मद्यादिपानस्य पात्रे यानपात्रे वा शिशौ बालके च पोतः स्यात्

पुनाति, पूयते वा 'पूञ् पवने' क्रैयादिकस्तस्मात्कर्तरि कर्मणि वा "हसिमृग्रिण्-" इति तनि, गुणे च पोतः "पोतः शिशौ वहित्रे च गृहस्थाने च वाससि" (इति मेदिनी) इत्येकं पानपात्रादीनाम्। प्राण्यन्तरे भूतान्तरे मृते मृतके च प्रेतः स्यात्। प्रकर्षेण इतः प्रैति स्म वा "गत्यर्थेति" कर्तरि क्ते प्रेतः "प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः" (इति मेदिनी) इत्येकं भूतान्तरादीनाम्। ग्रहभेदे, ध्वजे च केतुः स्यात्। चाय्यतेऽनेन 'चायृ पूजानिशामनयोः' भौवादिकस्तस्मात्करणे "चायः कि" इति तौ, क्यादेशे, गुणे च केतुः "केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि" (इति मेदिनी) इत्येकं ग्रहभेदादीनाम्। पार्थिवे भूपतौ तनये पुत्रे च सुतः स्यात् सूयते स्म सुनोतेः कर्मणि सौति स्म सौतेः कर्तरि वा क्ते सुतः "सुतः स्यात्पार्थिवे पुत्रे स्त्र्यपत्ये तु सुता स्मृता" (इति मेदिनी) इत्येकं भूपादीनाम्॥ ६७॥

कारीगर, कञ्चुकी आदि, पर्वत, राजा, भूपाल, क्षत्रिय मात्र.

पु. पु.
स्थपतिः (कारुभेदेऽपि) भूभृद् (भूमिधरे नृपे)।
पु. पु.
मूर्धाभिषिक्तो (भूपेऽ)प्यृतुः (स्त्रीकुसुमेऽपि च)॥ ६८॥

स्थेति—कारुभेदे शिल्पिभेदे अपिशब्दात्कञ्चुकिनि, जीवेष्टियाजकेऽपि स्थपतिः स्यात् तिष्ठन्त्यस्मिन् तिष्ठतेराधारे "घञर्थे क." इति के, आलोपे च स्थः पातीति पतिः स्थश्चासौ पतिश्चेति स्थपतिः "स्थपतिः कञ्चुकिन्यपि। जीवेष्टियाजके शिल्पिभेदे ना सप्तमे त्रिषु" (इति मेदिनी) इत्येकं शिल्पिभेदादीनाम्। भूमिधरे पर्वते, नृपे नरपतौ च भूभृत्स्यात्। भुवं बिभर्ति उपपदसमासे "क्विप् च" इति क्विपि, तुकि च भूभृत्स्यादित्येकं भूधरादीनाम्। भूपे भूपतौ अपिशब्दान्मन्त्रिणि क्षत्रियेऽपि मूर्धाभिषिक्तः स्यात्। मूर्धनि अभिषिच्यते स्म अभिपूर्वकः 'षिच् क्षरणे' तौदादिकस्तस्मात्कर्मणि क्ते, कुत्वे च "उपसर्गादिति" षत्वे च मूर्धाभिषिक्तः "मूर्धाभिषिक्तो भूपाले मन्त्रिणि क्षत्रियेऽपि च" (इति मेदिनी) स्त्रीकुसुमे नारीरजसि अपिशब्दान्मासि वसन्तादौ धीरेऽपि ऋतुः स्यात्। ऋच्छति "अर्तेश्च तुः" इति तौ, कित्त्वाद्गुणाभावे च ऋतु. "ऋतुर्मासि वसन्तादौ धीरे स्त्री कुसुमेऽपि च" (इति मेदिनी) इत्येकं रमणीरजसादीनाम्॥ ६८॥

विष्णु, शिवादि, सूर्य, बढ़ई, सारथी, पण्डित, प्रकाशितादि तर्कादिशास्त्र, उदाहरण.

पु पु पु
(विष्णा) वप्यजिताव्यक्तौ सूत (स्त्वष्टरि सारथौ)।
पु. १
व्यक्तः (प्राज्ञेऽपि) दृष्टान्ता (वुभे शास्त्रनिदर्शने)॥ ६९॥

वीति—वेवेष्टि सर्वं जगदिति विष्णुर्व्यापकस्तस्मिन् अपिशब्दाच्छंकरे, महदादिके,

१—"निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः। अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम्"॥१॥

आत्मन्यस्फुटेऽपि अजिताऽव्यक्तौ स्याताम् । न जीयते स्म नञ्पूर्वको 'जि अभिभवे' भौवादिको द्विकर्मकस्तस्मात्कर्मणि क्ते अजितः "अजितो नाहरौ त्रिषु । अनिर्जिते च" (इति विश्वः) न व्यज्यते स्म नञ्विपूर्वकः 'अञ्जू व्यक्त्यादौ' रौधादिकस्तस्मात्कर्मणि क्ते "यस्य विभाषेति" इडभावे, कुत्वे चर्त्वे च अव्यक्तः "अव्यक्तः शंकरे विष्णावव्यक्तं महदादिके । आत्मन्यपि स्यादव्यक्तमस्फुटे त्वभिधेयवत्" (इति विश्वः) इति द्वे विष्णवादीनाम् । त्वष्टरि रवौ, तक्षिण वा, सारथौ, क्षत्रियाद्ब्राह्मणीसुतवन्दिपारदप्रसूतादिष्वपि सूतः स्यात् । सुवति, सूयते स्म वा 'षू प्रेरणे' तौदादिकस्तस्मात्कर्तरि कर्मणि वा क्ते सूतः "सूतस्तु सारथौ तक्षिण क्षत्रियाद्ब्राह्मणीसुते । वन्दिपारदयोः पुंसि प्रसूते प्रेरिते त्रिषु" (इति मेदिनी) इत्येकं रव्यादीनाम् । प्राज्ञे पण्डिते अपिशब्दात्स्फुटेऽपि व्यक्तः स्यात् । व्यज्यते स्म विपूर्वकादञ्जेः कर्मणि क्ते, कुत्वे, चर्त्वे च व्यक्तः "व्यक्तः स्फुटमनीषिणोः" (इति मेदिनी) इत्येकं शास्त्रविदादीनाम् । शिष्यतेऽनेनेति शासनं वा शास्त्रं, निदर्शनमुदाहरणं च उभे दृष्टान्तौ स्याताम् । "अन्तः प्रान्तेऽन्तिके नाशे" (इति विश्वः) दृष्टः अन्तः पारोऽत्रेति दृष्टान्तः "दृष्टान्त उदाहृतौ । शास्त्रे च मरणे" (इति मेदिनी) इत्येकं तर्कादिशास्त्रादीनाम् ॥ ६९ ॥

सारथी, ड्योढीदार आदि, प्रकरण आदि.

पु. क्षत्ता (स्यात्सारथौ द्वाःस्थे क्षत्रियायां च शूद्रजे)[1] ।

पु. वृत्तान्तः (स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्तयोः) ॥७०॥

क्षदिति—सारथौ सूते, द्वाःस्थे द्वारपालके, क्षत्रियायां क्षत्रियाण्यां शूद्रजे शूद्राज्जायमाने वा चशब्दाद्दासीतनयनियुक्तादिष्वपि क्षत्ता स्यात् । क्षदति 'क्षद संवरणे' सौत्रस्तस्मात् "तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ" इति तृचि नप्तृवत्त्वं क्षत्ता "क्षत्ता शूद्रात्क्षत्रियाजे प्रतीहारे च सारथौ । भुजिष्यातनये क्षत्ता नियुक्ते च प्रजासृजि" (इति विश्वः) इत्येकं सारथ्यादीनाम् । प्रकरणे प्रस्तावे, प्रकारे भावे अभिप्राये वा कार्त्स्न्यवार्तयोः समग्रवार्ताविशेषयोः वृत्तान्तः स्यात् । वृत्तोऽन्तोऽस्य, वृत्तस्यान्त इति वा वृत्तान्तः "वृत्तान्तोऽवसरे भावे कार्त्स्न्यवार्ताविशेषयोः । वृत्तान्तः प्रक्रियायां च" (इति विश्वः) इत्येकं प्रस्तावादीनाम् ॥ ७० ॥

समर आदि यमगजादि.

पु. आनर्तः (समरे नृत्यस्थाननीवृद्विशेषयोः) ।

पु. कृतान्तो (यमसिद्धान्तदैवाकुशलकर्मसु) ॥ ७१ ॥

आनर्तेति—समरे संग्रामे, नृत्यस्थाने नृत्यशालायाम्, नीवृद्विशेषे जनपदान्तरे जने च

[1]— "क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे" इति सिद्धान्तकौमुद्यामुणादिः ।

आनर्तः स्यात् । आनृत्यन्त्यत्र आङ्पूर्वको 'नृती गात्रविक्षेपे' दैवादिकस्तस्मादाधारे "हलश्च" इति घञि, गुणे च आनर्तः "आनर्तो नृत्यशालायां जने जनपदान्तरे" (इत्यजय.) इत्येकं संग्रामादीनाम् । यमो यमराजः, सिद्धो निष्पन्नोऽन्तो निश्चयोऽत्रेति सिद्धान्तः वादिप्रतिवादिभ्यां निर्णीतो योऽर्थः स च सिद्धान्त इति वा, दैवं पूर्वजन्मकृतं कर्म, अकुशलकर्म पापं च एष्वर्थेषु कृतान्तः स्यात् । कृतोऽन्तो येन यस्येति वा कृतान्तः स्यादित्येकं यमादीनाम् ॥ ७१ ॥

श्लेष्मा, पित्तादि, रसादि, पृथिव्यादि, गन्धादि, नेत्रादि, मनशिलादि, भ्वादि.

श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ॥ ७२ ॥

श्लयिति—श्लेष्मा कफः स आदिर्यस्येति श्लेष्मादि आदिना पित्तादिग्रहः, रसः प्रथम आहारस्य विकारः, रक्तोऽसृक् तावादी यस्येति रसरक्तादि आदिना वसामज्जाशुक्रादिग्रहः, महाभूतानि पृथिव्यादिपञ्चभूतानि तद्गुणा गन्धादयः, इन्द्रियाणि चक्षुरादीनि, अश्मनो विकृतिः मन.शिलादिः, शब्दयोनिः शब्दोत्पत्तिस्थानं भू सत्तायामित्यादिश्च एते धातवो धातुपदवाच्याः स्युः । दधाति, धीयते वा धाञः कर्तरि कर्मणि वा "सितनिगमि" इति तुनि धातुः स्यादित्येकं श्लेष्मादीनाम् ॥ ७२ ॥

राजधानी, रनिवास आदि, बर्छी, साग, बल या ताकत, कठिनता, शरीर.

(कक्षान्तरेऽपि) शुद्धान्तो (नृपस्यासर्वगोचरे) ।
स. स.
(कासूसामर्थ्ययोः) शक्तिर्मूर्त्तिः (काठिन्यकाययोः) ७३ ॥

केति—असर्वगोचरे सर्वजनागम्ये नृपस्य नरपालकस्य कक्षान्तरे गुह्यकक्षाभेदे राजधानी स्थानविशेषे वा अपिशब्दादन्त.पुरे अशौचान्तेऽपि वा शुद्धान्तः स्यात् । शुद्धोऽन्तोऽस्येति शुद्धान्तः "शुद्धान्तोऽन्तःपुरे गुह्यकक्षाभेदे च भूपतेः" (इत्यजयः) इत्येकं भूपतिगुह्यकक्षाभेदादीनाम् । "कासूर्विकलवाचि स्यात्कासूः शक्त्यायुधेऽपि च" (इति विश्वः) कासूः शक्त्यायुधः, सामर्थ्यं बलम् अनयोः शक्तिः स्यात् । शक्यतेऽनया 'शक्ल शक्तौ' सौवादिकस्तस्मात्करणे क्तिनि शक्तिः क्तिचि तु शक्तिः शक्ती वा "शक्तिरस्त्रान्तरे गौर्य्यामुत्साहादौ बले स्त्रियाम्" (इति मेदिनी) इत्येकं शक्त्यायुधादीनाम् । कठिनं कठोरं तस्य भावः काठिन्यम्, कायो देहः अनयोः मूर्त्तिः स्यात् । मूर्च्छति 'मूर्च्छा मोहादौ' भौवादिकस्तस्मात्कर्तरि क्तिचि, "राल्लोपः" इति छलोपे च मूर्त्तिः "मूर्तिः पुन.प्रतिमायां कायकाठिन्ययोरपि" (इति हैमः) इत्येकं काठिन्यादीनाम् ॥ ७३ ॥

विस्तार, बेलि, रात्रि, घर, क्षय, पूजा, दान, स्नान आदि.

स. स.
(विस्तारवल्ल्योः) र्व्रततिर्वसती (रात्रिवेश्मनोः) ।
न. न.
(क्षयार्च्चयो) रपचितिः साति (र्दानावसानयोः) ॥ ७४ ॥

बीति—विस्तारवल्ल्योः विस्तारलतयोः व्रततिः स्यात् । व्रतं करोति "तत्करोतीति" णिजन्तात्कर्तरि बाहुलकादतौ व्रजन्ती तनिरस्याः पृषोदरादित्वाद् वा व्रततिः श्रीभोजमते तु 'व्रजति' बाहुलकादतौ वा "व्रततिस्तु प्रतानिन्यां विस्तारेऽपि" (इति हैमः) "कृदिकारादिनि" ङीषि तु दीर्घान्तापि "धराधरेन्द्रं व्रततीततीरिव" (इति माघः) इत्येकं विस्तारादेः । रात्रिवेश्मनोः निशागेहयोः वसतिः स्यात् वसन्त्यस्याम् वसतेराधारे "वहिवसीति" अतौ वसतिः ङीषि तु वसती वा "वसतिः स्यात्स्त्रियां वासे यामिन्यां च निकेतने" (इति मेदिनी) इत्येकं राश्यादेः । क्षयार्चयोः हानिपूजयोः अपचितिः स्यात् । अपचीयते, अपचाय्यते वा अपपूर्वकाच्चिनोतेश्चायतेर्वा क्तिनि "चायः चिक्तिनि" इति च्यादेशे च 'अपचितिः' "भवेदपचितिः पूजाव्ययनिष्कृतिहानिषु" (इति मेदिनी) इत्येकं क्षयादीनाम् । दानावसानयोः दानविरामयोः सातिः स्यात् सननम्, सानं वा सनोतेः स्यतेर्वा भावे क्तिनि "जनसनेति" आत्वे 'द्यतिस्यतीति' इत्वाभावे निपातिते वा सातिः स्यादित्येकं दानादेः ॥ ७४ ॥

दुःख, धन्वाका स. किनारा, सामान्य जाति, जन्म, लोकाचार, टपकना, गदर, विदेश.

अर्तिः (पीडाधनुष्कोट्योः) जातिः (सामान्यजन्मनोः) । (प्रचारस्यन्दयोः) रीतिरीतिः (डिम्बप्रवासयोः) ॥ ७५ ॥

अरिति—पीडा बाधा, धनुष्कोटिः धनुषोऽग्रभागः अनयोरर्तिः स्यात् । अर्दनम् 'अर्द हिंसायाम्' चौरादिकस्तस्माद्भावे क्तिनि, चर्त्वे च अर्तिः, आङ्पूर्वकादृच्छतेः क्तिनि तु "उपसर्गादृति धातौ" इति वृद्धौ आर्तिरपि स्यादित्येकं पीडादीनाम् । सामान्यम जातम्, जन्म जननम् अनयोर्जातिः स्यात् । जननम्, जायतेऽनयेति वा जनेर्भावे करणे वा क्तिनि, "जनसनेति" आत्वे च जातिः "जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः । जातिर्जातीफले धात्र्यां चुल्लीकम्पिल्लयोरपि" (इति विश्वः) इत्येकं सामान्यादीनाम् । प्रचारो लोकाचारः, स्यन्दः क्षरणम् अनयोरीतिः स्यात् । रीयते 'रीङ् स्रवणे' दैवादिकः, रिणाति 'री गतिरेषणयोः' क्र्यादिको वा तस्मात्कर्तरि क्तिचि, रयणमिति विग्रहे तु क्तिनि वा रीतिः "रीतिः प्रचारे स्यन्दे च लोहकिट्टारकूटयोः" (इति विश्वः) इत्येकं प्रचारादीनाम् । डिम्बो विप्लवः, प्रवासो विदेशः उभयोः * ईतिः स्यात् । ईयतेऽनया 'ईङ् गतौ' दैवादिकस्तस्मात्करणे 'क्तिनि' ईतिः "ईतिर्डिम्बे प्रवासेऽतिवृष्ट्यादिषट्सु च स्त्रियाम्" (इति मेदिनी) इत्येकं डिम्बादीनाम् ॥ ७५ ॥

---

* "अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः" (इति स्मृतिः) ॥

स. स.

उदय, लाभ, तीनो अग्निया, दूसरा युग, नारदकी वीणा, महत्त्व गुणयुक्त भार्या, भस्म, संपदा.

(उदयेऽधिगमे) प्राप्तिस्त्रेता (स्त्वग्नित्रये युगे)।

स. १ स.

(वीणाभेदेऽपि) महती भूति (र्भस्मनि संपदि) ॥७६॥

वितिः—उदये उत्पत्तौ समृद्धौ वा अधिगमे लाभे च प्राप्तिः स्यात् । प्रापणम् प्रपूर्वकः 'आप्लृ व्याप्तौ' सौवादिकस्तस्माद्भावे क्तिनि प्राप्तिः "प्राप्तिर्महोदये । लाभेऽपि च स्त्रियाम्" (इति मेदिनी) इत्येकं महोदयादीनाम् । अग्नित्रये दक्षिणाग्नि-गार्हपत्याहवनीयेषु, युगे युगद्वये च त्रेता स्यात् । त्रीन् भेदान् इता प्राप्ता पृषोदरादित्वात्साधुः, त्राणां त्रा, सदासंधुक्षणम्, तामिता, त्रायन्ते इति त्राः आहुतयस्ताभिरिता वा त्रेता "त्रेता युगेऽग्नित्रये च" (इति हैमः) इत्येकमग्नित्रयादीनाम् । वीणाभेदे नारदस्य वीणायाम् अपिशब्दान्महत्त्वगुणसंपन्नभार्यायामपि महती स्यात् । मह्यते 'मह पूजायाम्' भौवादिकस्तस्मात्कर्मणि "वर्तमाने पृषदिति" अतिप्रत्यये निपातिते शतृवद्भावात्, "उगितश्चेति" ङीपि च महती "महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम् । तत्त्वभेदे पुमान् श्रेष्ठे वाच्यवत्" (इति मेदिनी) इत्येकं वीणाभेदादीनाम् । भस्मनि क्षारके, संपदि संपत्तौ च भूतिः स्यात् । भवनम्, भूयतेऽनया वा, 'क्तिनि' भवति क्तिचि वा भूतिः "भूतिर्भस्मनि संपत्तिहस्तिशृङ्गारयोः स्त्रियाम्" (इति मेदिनी) इत्येकं भस्मादीनाम् ॥ ७६ ॥

स.

नागो की नदी, और नगरी, समाम, सङ्ग, सभाश्रय, निवास, पृथ्वी.

(नदीनगर्योर्नागानां) भोगव (त्यथ संगरे)।

स. स.

(सङ्गे सभायां) समितिः (क्षयवासावपि) क्षिती ॥ ७७ ॥

नेति—नागानां काद्रवेयाणां नदी सरित्, नगरी पुरी च अनयोः भोगवती स्यात् । भोगोऽस्त्यस्यामिति मतुपि, मस्य वत्वे, ङीपि च भोगवती "अथ भोगवतीनागपुरीनद्योरहो पुमान्" (इति मेदिनी) इत्येकं नागनद्यादीनाम् । अथेति—संगरे संग्रामे, सङ्गे संमेलने, सभायां जनसमूहे च समितिः स्यात् । समयनम् समीयतेऽस्यां वा संपूर्वकः 'इण् गतौ' आदादिकस्तस्मात् क्तिनि समितिः "समितिः संपराये स्यात्सभायां संगमेऽपि च" (इति मेदिनी) इत्येकं समरादीनाम् । क्षयो नाशो ह्रासो वा वासो निवासश्च उभौ क्षिती क्षितिपदवाच्यौ स्याताम् । अपिशब्दात्कालभेदे, मेदिन्यामपि क्षितिः स्यात् । क्षयणम्, क्षीयतेऽस्यां वा क्षयतेः क्षियतेर्वा भावे, आधारे वा क्तिनि क्षितिः

१ "विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती । महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी" (इति वैजयन्ती) ॥

" क्षितिर्निवासे मेदिन्यां कालभेदे क्षये स्त्रियाम " (इति मेदिनी) इत्येकं क्षयादीनाम् ॥ ७७ ॥

सूर्यका प्रकाश, हथियार, अग्निशिखा, दुनिया, बारह अक्षर पादवाली छन्द, पृथ्वी, जन.

स. **(रवेरर्चिश्च शस्त्रं च वह्निज्वाला च) हेतयः ।**

स. * **जगती (जगतिच्छन्दोविशेषेऽपि क्षितावपि) ॥ ७८ ॥**

रेति—रवेः सूर्यस्य अर्चिः प्रकाशः, शस्त्रमायुधम्, वह्निज्वाला अग्निशिखा च एते हेतयः हेतिपदवाच्याः स्युः—हिनोति, हन्ति, हन्यतेऽनयेति वा हिनोतेः, हन्तेर्वा कर्तरि क्तिचि, करणे वा क्तिनि " ऊतियूतीति " निपातिते च हेतिः " हेतिर्ज्वालास्त्रसूर्यांशुषु " (इति कोषान्तरम्) इत्येकं सूर्यप्रकाशादीनाम् । जगति लोके, छन्दोविशेषे द्वादशाक्षरपादवृत्ते, क्षितौ पृथिव्याम् अपिशब्दाज्जनेऽपि जगती स्यात् । गच्छति ' गम्लृ गतौ ' भौवादिकस्तस्मात् " पृषद्बृहन्महज्जगदिति " अतिप्रत्यये निपातिते शतृवद्भावात् " उगितश्चेति " ङीपि च जगती " जगत्स्याद्विष्टपे क्लीबं ना वायौ जंगमे त्रिषु । जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च " (इति मेदिनी) इत्येकं जगदादीनाम् ॥ ७८ ॥

दशवा छन्द, पाति प्रभाव, उत्तरकाल जाना, सेनाभेद, पक्ष या परवरूके परवकी मूल.

स. **पङ्क्ति (श्छन्दोऽपि दशमं) (स्यात्प्रभावेऽपि) चायतिः ।**

स. **पङ्क्ति (र्गतौ च) (मूले तु) प्रक्षतिः (पक्षभेदयोः) ॥ ७९ ॥**

पमिति—दशमं छन्दः दशाक्षरपादवृत्तम्- " उक्तात्युक्ता तथा मध्या प्रतिष्ठान्यासु पूर्विका । गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च " इत्यनुक्रमोक्तिषु दशमं छन्दः पङ्क्तिः, " पंक्तिश्छन्दो दशापि स्यादिति " वा क्वचित्पाठः । अपिशब्दाद्दशसंख्यालिपु पंक्तिः स्यात् । पञ्चनम् ' पचि व्यक्तीकरणे ' भौवादिकस्तस्माद्भावे ' क्तिनि ' अथवा पञ्चकद्वयम् पंक्तिः " पंक्तिविंशतीति " साधुः " पंक्तिर्दशाक्षरच्छन्दोदशसंख्यालिपु स्त्रियाम् " (इति मेदिनी) इत्येकं दशाक्षरपादवृत्तादीनाम् । प्रभावे प्रतापे अपिशब्दात्संयमदैर्घ्यागामिकालेषु च आयतिः स्यात् । आयमनम्, आयम्यतेऽनयेति वा आङ्पूर्वको ' यमु उपरमे ' भौवादिकस्तस्माद्भावे, करणे वा ' क्तिनि ' " अनुदात्तोपदेशेति " मलोपे आयतिः " आयतिः संयमे दैर्घ्ये प्रभावागामिकालयोः " (इति विश्वः) इत्येकं प्रभावादीनाम् । गतौ=गमने ' च ' शब्दात्पदगे, एकरथैकेभत्र्यश्वपञ्चपदातिके

* " द्युतिगमिजुहोतीनां द्वे च " (वा. ३–२ । १७८) इति क्विपि, " गमः क्वौ " इति मलोपे, तुकि, गमादिनान्ङीपि न ना जगती स्यात् ॥

वा पत्तिः स्यात् । पतति पततेः कर्तरि क्तिचि पत्तिः " पत्तिर्ना पदगे स्त्रियाम् । गता-वेकरथैकेभत्र्यश्वपञ्चपदातिके " (इति मेदिनी) इत्येकं गत्यादीनाम् । पक्षभेदयोः पक्षभेदौ द्वौ एको मासार्धः, अपरः पक्ष्यवयवः, तयोर्मूले तु पक्षतिः स्यात् । पक्षस्य मूलम्, " पक्षात्तिः " इति तौ पक्षतिः " सर्वतोऽक्तिनर्थादिति " ङीषि तु पक्षतीत्यपि " पक्षतिस्तु भवेत्पक्षमूले च प्रतिपत्तिथौ " (इति कोषान्तरम्) इत्येकं पक्ष-मूलादीनाम् ॥ ७६ ॥

भग, लिङ्ग, मन्त्री आदि, कौशिकी, जीविका आदि, वालू, वालूयुक्त देशादि, वेद, कान, सुनना आदि.

स. प्रकृति (योनिलिङ्गे च) (कौशिक्याद्याश्च) वृत्तयः । स.

सिकताः(स्युर्वालुकाऽपि)(वेदे श्रवसि च) श्रुतिः ॥ ८० ॥

प्रेति—योनिलिङ्गे योनौ भगे, लिङ्गे मेढ्रके चशब्दाद्गुणसाम्यामात्यादिस्वभाव-ौरवर्गेषु प्रकृतिः स्यात् । प्रकुरुते प्रपूर्वको ' डुकृञ् करणे ' तानादिकस्तस्मात्कर्तरि क्तिचि, क्तिनि वा प्रकृतिः " प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः । योनौ, लिङ्गे ौरवर्गे " (इति मेदिनी) इत्येकं योन्यादीनाम् । कौशिकी नदीविशेषः यामरचय-ाधिनन्दनानुजेति यावत् सा आद्या यासां ताः वृत्तयः स्युः । आद्येन आरभटी-सात्वती-भारतीनां ग्रहणम् चशब्दाज्जीविकासूत्रार्थविवरणयोरपि वृत्तिः स्यात् । वर्ततेऽनया वृतेः करणे क्तिनि वृत्तिः " वृत्तिर्विवरणे जीव्ये कौशिक्यादिषु चेष्यते " (इति विश्वः) भारती सात्वती चैव कौशिक्यारभटी तथा । चतस्रो वृत्तयश्चैता यासु नाट्यं प्रतिष्ठितम् (इति भरतः) इत्येकं कौशिक्यादीनाम् । वालुका वालुकायां सिकताः स्युः । अपिशब्दाद्वालुकायुक्तदेशेऽपि सिकता स्त्री स्यात् । सिच्यते ' षिच क्षरणे ' तौदादिकस्तस्मात्कर्मणि वाहुलकादतच्, पृषोदरादित्वाच्चस्य कत्वे च सिकता, द्वित्वे सिकते, वहुत्वे सिकताः स्युः " सिकता स्त्री सिकतले वालुकायान्तु भूमनि " (इति मेदिनी) इत्येकं वालुकादीनाम् । वेदे ऋग्यजुस्सामाथर्वाख्ये, श्रवसि श्रोत्रे, चशब्दाद्वार्ताश्रोत्रकर्मणोरपि श्रुतिः स्यात् । श्रूयतेऽनयेति शृणोतेः करणे क्तिनि श्रुतिः " श्रुतिः श्रोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि " (इति विश्वः) इत्येकं वेदादीनाम् ॥ ८० ॥

प्यारी स्त्री, स्त्रीमात्र, भूमि-पर, गुप्त, धारण, धैर्य.

स. वनिता (जनितात्यर्थानुरागायां च योषिति) ।

स. स. गुप्तिः (क्षितिव्युदासेऽपि) धृति (र्धारणधैर्ययोः) ॥ ८१ ॥

वेति—जनितः उत्पादितोऽत्यर्थोऽनुरागो यस्यां तस्यामिति जनितात्यर्थानुरागायां नार्यां ोगिनि योषायां च वनिता स्यात् । वन्यते स्म वनतेर्नोवेर्वा कर्मणि क्ते " ...

विभाषा " इत्यस्यानित्यत्वादिडागमे, टापि च वनिता " वनिता जातरागस्त्रीस्त्रियोः स्त्री त्रिषु याचिते " (इति मेदिनी) इत्येकं जातानुरागनार्यादीनाम् । क्षितिव्युदासे पृथिव्यन्तरञ्जिले अपिशब्दात्कारागाररक्षणाधमावकरस्थानेषु च गुप्तिः स्यात् । गोपनम्, गुप्यते वा गुपेर्भावे कर्मणि वा क्तिनि गुप्तिः " गुप्तिः कारागृहे प्रोक्ता भूगर्ते रक्षणेऽधमे" (इति विश्वः) इत्येकं भूगर्तादीनाम् । धारणधैर्ययोः धृतिः स्यात् । धरणम् धरतेर्भावे ' क्तिनि ' धृतिः " धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु " (इति विश्वः) इत्येकं धारणादीनाम् ॥ ८१ ॥

भटकटैया, वनभटा आदि, स्त्री हथिनी, जीविका वार्ताआदि, लघु, असार, रोगरहित, पानी, घी, सुधा, यज्ञशेष, चाँदी, सोना, कारण, चिह्न या निशान.

बृहती (क्षुद्रवार्ताकी छन्दोभेदे महत्यपि)। (स.)

वासिता (स्त्रीकरिण्योश्च) वार्ता (वृत्तौ जनश्रुतौ)॥८२॥ (स.) (स.)

वार्तं (फल्गुन्यरोगे च) (त्रिष्वप्सु च) घृतामृते। (न.) (न.) (न.)

कलधौतं (रूप्यहेम्नो) निमित्तं (हेतुलक्ष्मणोः)॥८३॥ (न.) (न.)

बृहति—क्षुद्रवार्ताकी छन्दोभेदे इति समाहारद्वन्द्वः क्षुद्रवार्ताक्यां=कण्टकार्य्याम्, छन्दोभेदे=नवाक्षरपादवृत्ते, महति विशाले अपिशब्दाद्वारिधान्यादिषु च बृहती स्यात् । वर्हति ' बृह वृद्धौ ' भौवादिकस्तस्मात्कर्तरि "वर्तमाने पृषदिति" अतिप्रत्यये निपातिते शतृवद्भावाद् " उगितश्चेति " ' ङीपि ' च बृहती " बृहती क्षुद्रवार्ताक्यां कण्टकार्यां च वाचि च । वारिधान्यां महत्यां च छन्दोवसनभेदयोः " (इति विश्वः) इत्येकं क्षुद्रवार्ताक्यादीनाम् । स्त्रीकरिण्योः वनिताहस्तिन्योः वासिता स्यात् । चशब्दात्सुरभीकृतधान्यमात्रखगारावववस्त्रवेष्टितेषु वासितं स्यात् । वास्यते ' वस निवासे ' भौवादिकः णयन्तो ' वास उपसेवायाम् ' चौरादिको वा तस्मात्कर्मणि क्ते, इडागमे, णिलोपे ' टापि ' च वासिता " वासिता करिणीनार्योर्वासितं सुरभीकृते । धान्यमात्रे खगारावे वासितं वस्त्रवेष्टिते " (इति विश्वः) स्वामी तु ' वाशिता ' [illegible] तत्र " वाशृ शब्दे " दैवादिकस्तस्मात्कर्मणि क्ते इडागमे च ' वाशिता ' [illegible] वनितादीनाम् । वृत्तौ जीविकायाम्, जनश्रुतौ किंवदन्त्यां च वार्ता स्यात् । वृत्तिरस्त्यस्याम् " वृत्तेश्च " इति णे, वृद्धौ टापि वार्ता " वार्ता वार्तिङ्गणे वृत्तौ वार्ताकिंवदन्तयोः " (इति विश्व.) इत्येकं वृत्त्यादीनाम् । फल्गुनि, लघुनि, असारे, तत्त्वं वा वार्तं क्लीबं स्यात् । अरोगे रोगरहिते च ' वार्तम् ' त्रिषु त्रिलिङ्ग्यां स्यात् । [illegible] रस्त्यस्येति णे, वृद्धौ च वार्तम् " वार्तं फल्गुन्यरोगे स्यादारोग्ये वृत्तिमत्यपि " ([illegible] धरणिः) इत्येकमसारादीनाम् । अप्सु जले च घृतामृते त्रिषु त्रिलिङ्ग्यां स्यातां [illegible] जिघर्ति ' घृ क्षरणदीप्त्योः ' जौहोत्यादिकस्तस्मात्कर्तरि " अञ्जिघृसिभ्यः [illegible]

इति 'क्ते' घृतम् "घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्" (इति मेदिनी) न मृतं मरणमत्रेति अमृतम् "अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते। अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः" (इति मेदिनी) इत्येकं जलादीनाम् । रूप्यहेम्नोः रजतसुवर्णयोः कलधौतं स्यात् । कलो मलो धौतोऽस्येति कलधौतम् "कलधौतं सुवर्णे स्याद्रजते च नपुंसकम्" (इति मेदिनी) इत्येकं रजतादीनाम् । हेतुलक्ष्मणोः कारणचिह्नयोः निमित्तं स्यात् । निमेद्यति निपूर्वको 'ञिमिदा स्नेहने' दैवादिकस्तस्माद्वर्तमाने कर्तरि "ञीतः क्तः" इति क्ते, संज्ञापूर्वकत्वात् "अनात्मने पदनिमित्ते" इति निर्देशाद्वा नत्वाभावे च निमित्तं स्यादित्येकं हेत्वादीनाम् ॥ ८२।८३ ॥

शास्त्र, सुनाहुआ। सत्ययुग, अलमर्थ, महाभय, बडा साहस.

श्रुतं (शास्त्रावधृतयो) र्युगपर्याप्तयोः कृतम् ।
अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ॥ ८४ ॥

श्रुतमिति—शास्त्रावधृतयोः शिष्यतेऽनेन, शासनं वा शास्त्रम्, अवधरणमवधृतम् अनयोः श्रुतं स्यात् । श्रवणम्, श्रूयते स्म वा शृणोतेर्भावे, कर्मणि वा क्ते श्रुतं स्यादित्येकं शास्त्रादीनाम् । युगपर्याप्तयोः युगं सत्ययुगाख्यम्, पर्याप्तमलमर्थकं च उभयोः कृतं स्यात् । अकारि, क्रियते स्म वा करोतेः कर्मणि 'क्ते' कृतम् "कृतं युगेऽलमर्थे स्याद्विहिते हिंसिते त्रिपु" (इति मेदिनी) इत्येकं युगादीनाम् । महाभीतिः महद्भयम्, जीवानपेक्षि कर्म महासाहसिककार्यं च अत्याहितं स्यात् । अत्याधीयते स्म अत्याङ्पूर्वकाद्दधातेः कर्मणि क्ते, "दधातेर्हिः" इति ह्यादेशे च अत्याहितं स्यादित्येकं महाभीत्यादीनाम् ॥ ८४ ॥

न्याय, पृथिव्यादि पञ्चभूत, सत्यादि, श्लोक, यश, भूतकालादि.

न.
(युक्ते क्ष्मादावृते) भूतं (प्राण्यतीते समे त्रिषु) ।
न.
वृत्तं (पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले) ॥ ८५ ॥

त्त्विति—युक्ते न्याय्ये, क्ष्मादौ पृथिव्यादिपञ्चभूतके, ऋते सत्ये 'प्राण्यतीते' इति समाहारद्वन्द्वः प्राणिनि जन्तौ अतीते गतकाले, समे समाने च भूतं त्रिपु त्रिलिङ्ग्यां स्यात् । अभूत्, भवति स्म वा भवतेः कर्तरि "गत्यर्थेति" 'क्ते' भूतम् "भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबं त्रिपूचिते । प्राप्ते वृत्ते समे सत्ये द्वे योन्यन्तरे तु ना । कुमारेऽपि" (इति मेदिनी) इत्येकं न्याय्यादीनाम् । पद्ये श्लोके, चरित्रे यशसि, अतीते गतकाले, 'दृढनिस्तले' इति समाहारद्वन्द्वः दृढे गाढे, निस्तले, गोले, वर्तुले वा वृत्तं त्रिपु स्यात् । वर्तनम्, वर्तते स्म वा 'वृतु वर्तने' भौवादिको वरणे दैवादिको वा तस्माद्भावे, कर्तरि वा 'क्ते' वृत्तम् "वृत्तोऽधीतेऽप्यतीतेऽपि वर्तुलेऽपि मृते वृते । वृत्तेऽन्यलिङ्गं वा क्लीबे छन्दश्चारित्रवृत्तिपु" (इति मेदिनी) इत्येकं पद्यादीनाम् ॥ ८५ ॥

---

१ "शस्त्रं निखाते कृतं पर्याप्तं स्यादपेक्षिते" (इति रुद्रः) ॥

राज्य, वड़ा आदि, न. अपवाद, निन्दित, रूपा, उजला, द्वीप-भेद, रत्नों की माला, सोना, चांदी आदि.

न. न.
मह (द्राज्यं चा) वगीतं (जन्ये स्याद्गर्हिते त्रिषु)।
न. न.
श्वेतं (रूप्येऽपि) रजतं (हेम्नि रूप्ये सिते त्रिषु) ॥८६॥

मेति—राज्यं महत् महत्पदवाच्यं स्यात्। चकाराद्वल्लकीभेदे तत्त्वभेदे, श्रेष्ठेऽपि स्यात्। मह्यते महतेः कर्मणि "वर्तमाने पृषदिति" अतिप्रत्यये निपातिते महत् "महती वल्लकी-भेदे राज्ये तु स्यान्नपुंसकम्। तत्त्वभेदे पुमाञ्श्रेष्ठे वाच्यवत्" (इति मेदिनी) इत्येकं राज्यादीनाम्। जन्ये जनापवादे, गर्हिते निन्दिते च 'अवगीतम्' त्रिषु त्रिलिङ्ग्यां स्यात्। अवगीयते स्म अवपूर्वकाद्गायतेः कर्मणि 'क्ते' "घुमास्थागापेति" ईत्वे च अवगीतम् "अवगीतस्तु निर्वादे दुष्टगर्हितयोरपि" (इति मेदिनी) इत्येकं जनापवादादीनाम्। रूप्ये रजते अपिशब्दात् श्वेतद्वीपे, शुक्लेऽपि श्वेतं स्यात्। श्वेतते 'श्विता वर्णे' भौवादिकस्तस्मात्पचाद्यचि श्वेतम् "श्वेतो द्वीपाद्रिभेदयोः श्वेतावराटिकाकाष्ठपाटलाशंखिनीषु च। क्लीबं रूप्येऽन्यवच्छुक्ले" (इति मेदिनी इत्येकं रूप्यादीनाम्। हेम्नि स्वर्णे, रूप्ये रूपाख्ये, सिते शुभ्रे च रजतं त्रि त्रिलिङ्ग्यां स्यात्। रजति, रज्यतेऽनेनेति वा रजतेः कर्तरि, करणे वा "पृषिरञ्जिभ्य कित्" इत्यतचि, कित्त्वान्नलोपे च रजतम् "रजतं रञ्जने रूप्ये शोणिते हृदहारयोः (इत्यजयः) इत्येकं हेमादीनाम् ॥ ८६ ॥

जगम, भुवन, वायु, नील्यादि रंग, रुधिर, सफेद, पीला, निर्मल वधा या कैदी, सफेद.

पु.स.न. पु.स.न.
(त्रिष्वितो) जग (दिङ्गेऽपि) रक्तं (नील्यादिरागि च)।
पु.स.न. पु.स.न.
अवदातः(सिते पीते शुद्धे) (बद्धार्जुनौ) सितौ ॥ ८७ ॥

त्रीति—इतः परमातान्तं वक्ष्यमाणा ये शब्दास्ते त्रिषु त्रिलिङ्ग्यां भवन्ति । इङ्गे जङ्गमे अपिशब्दात् पिष्टपे, वायौ च जगत् स्यात्। गच्छति गच्छतेः कर्तरि "द्युति गमिजुहोतीनां द्वे च" इति क्विपि "गमः क्वौ" इति मलोपे, तुकि च जगत् " स्यात्पिष्टपे क्लीबं वायौ ना जंगमे त्रिषु" (इति मेदिनी) इत्येकं जंगमादीना नील्यादिरागि नील्यादिरागयुक्तं रक्तं स्यात्। चशब्दात् अनुरक्ते, लोहिते त्रिषु, कुङ्कु ताम्रे, प्राचीनामलके, रुधिरे च नपुंसकं स्यात्। रजति, रज्यते वा रजतेः कर्तरि क वा "गत्यर्थेति" क्ते, जस्य कुत्वे, चर्त्वे च रक्तम् "रक्तोनुरक्ते नील्यादिरञ्जिते लो त्रिषु। क्लीबं तु कुङ्कुमे ताम्रे प्राचीनामलकेऽसृजि" (इति मेदिनी) इ नील्यादिरङ्गवदादीनाम्। सिते शुभ्रे, पीते पीतवर्णयुक्ते, शुद्धे पूते च अवदातः स्या

१ "हारे रूप्ये सिते त्रिषु" इति पाठान्तरम् ॥

अवदायते दायतेः कर्मणि क्ते, अवदातः "अवदातं तु विमले मनोज्ञे सितपीनयोः" (इति हेमः) इत्येकं सितादीनाम्। बद्धार्जुनौ बद्धश्वेतौ सितौ सितपदवाच्यौ स्याताम्। सीयते सिनोतेः कर्मणि क्ते सितः, द्वित्वे सितौ "सितमवसिते च बद्धे धवले त्रिपु शर्करायां स्त्री" (इति मेदिनी) इत्येकं बद्धार्जुनयोः॥ ८७॥

उचित या न्याय्य, सस्कारी, क्षमी, स्वेहुए पदार्थ, शास्त्र लक्षण सपन्न, विना सीमा, शेष, विष्णु.

पु.स.न. पु.स.न.

(युक्तेऽतिसंस्कृते मर्षिण्य) भिनीतो (ऽथ) संस्कृतम्।

पु.स.न.

(कृत्रिमे लक्षणोपेतेऽप्य) नन्तो (ऽनवधावपि)॥ ८८॥

युक्तेति–युक्ते न्याय्ये उचिते वा अतिसंस्कृते अत्यन्तसंस्कारप्राप्ते, मर्षिणि क्षन्तर्यपि अभिनीतः स्यात्। अभिनीयते स्म अभिपूर्वकान्नयतेः कर्मणि क्ते, अभिनीतः "अभिनीतं संस्कृते च न्याय्ये चामर्षिणि त्रिपु" (इति रुद्रः) इत्येकं न्याय्यादीनाम्। अथेति–कृत्रिमे करणेन निर्वृत्ते, लक्षणोपेते लक्षणेन उपेते पाणिन्यादिसूत्रव्युत्पादिते अपिशब्दात् शस्ते भूषिते च संस्कृतं स्यात्। संस्क्रियते स्म संपूर्वकात्करोतेः कर्मणि क्ते सुडागमे च 'संस्कृतम्' "संस्कृतः कृत्रिमे शस्ते भूषितेऽप्यन्यलिङ्गकः। क्लीवन्तु लक्षणोपेते" (इति मेदिनी) इत्येकं कृत्रिमादीनाम्। अनवधौ अवधिरहिते अपिशब्दाच्छेषकेशवादिषु अनन्तः स्यात्। न अन्तोऽस्येत्यनन्तः "अनन्तः केशवे शेषे पुमान्निरवधौ त्रिपु। अनन्ता च विशल्यायां शारिवादूर्वयोरपि। कणादुरालभापथ्यापार्वत्यामलकीषु च। विश्वंभरागुडूच्योः स्यादनन्तं सुरवर्त्मनि" (इति मेदिनी) इत्येकमनवध्यादीनाम्॥ ८८॥

विख्यात, हर्षित आदि, कुलीन, पण्डित आदि, पवित्र, एकान्त आदि, मोहित, बढाहुआ आदि.

पु.स.न. पु.स.न.

(ख्याते हृष्टे) प्रतीतोऽभिजात (स्तु कुलजे बुधे)।

पु.स.न. पु.स.न.

विविक्तौ (पूतविजनौ) मूर्च्छितौ (मूढसोच्छ्रयौ)॥ ८९॥

ख्येति–ख्याते प्रसिद्धे, हृष्टे हर्षिते च प्रतीतः स्यात्। प्रतीयते स्म प्रतिपूर्वकाद् 'इण् गतौ' अस्मात्कर्मणि क्ते प्रतीतः "प्रज्ञाताज्ञातहृष्टेषु प्रतीतः सादरे त्रिपु" (इति मेदिनी) इत्येकं विख्यातादीनाम्। कुलजे कुलीने, बुधे पण्डिते अभिजातः स्यात्। अभिजायते स्म अभिपूर्वकाज्जनेः कर्तरि "गत्यर्थेति" क्ते "जनसनखनामिति" आत्वे च अभिजातः "अभिजातः कुलीने स्यान्न्याय्यपण्डितयोस्त्रिषु" (इति मेदिनी) इत्येकं कुलीनादीनाम्। पूतः शुद्धः विजनः एकान्तदेशः उभौ विविक्तौ विविक्तपदवाच्यौ स्याताम्। विविच्यते स्म विपूर्वकाद् 'विजिर् पृथग्भावे' जौहोत्यादिकात् 'विचिर् पृथग्भावे' रौधादिकाद्वा कर्मणि क्ते, कुत्वे, चर्त्वे च विविक्तः "विविक्तं त्रिष्वसंपृक्ते रहः पूतविवेकिषु" (इति मेदिनी) इत्येकं पूतादीनाम्। मूढो मोहं प्राप्तः सोच्छ्रयः

तश्च उभौ मूर्च्छितौ स्याताम् । मूर्च्छा संजातास्येति तारकादित्वादितचि मूर्च्छितः " मूर्च्छितमपि सोच्छ्रये च मूढे च " (इति मेदिनी) इत्येकं मूढादीनाम् ॥ ८९ ॥

पु.स.न. पु.स.न.

खट्टा, निठुर, सफेद, स्याह, सच्चा, साधु, विद्यमान आदि.

(द्वौ चाम्लपरुषौ) शुक्तौ शिती (धवलमेचकौ) ।

पु.स.न.

(सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च) सन् ॥ ९० ॥

द्वाविति—अम्लोऽम्लरसश्चुक्रो वा परुषः कठोरः इमौ द्वौ शुक्तौ शुक्तपदवाच्यौ स्याताम् । शुच्यते स्म, ' ईशुचिर् पूतीभावे ' अस्माद्दैवादिकात्कर्मणि क्ते, " श्वीदितः " इतीडभावे च शुक्तः " शुक्तं पूताम्लनिष्ठुरे " (इति मेदिनी) इत्येकमम्लादीनाम् । धवलो गौरः मेचकः श्यामलः उभौ शिती शितिपदवाच्यौ स्याताम् । शीयते शिनो कर्मणि क्तिनि कर्तरि क्तिचि वा शितिः सितिर्वा द्वित्वे शिती सिती वा "शितिर्भूर्ज्जे सितासितयोस्त्रिषु " (इति मेदिनी) इत्येकं धवलादीनाम् । सत्ये तथ्ये सत्ययुगादौ साधौ परोपकारिणि, उत्तमकुलजे, उचिते वा विद्यमाने वर्तमानकाले, प्रशस्ते श्रेष्ठे, अभ हिते पूजिते च " सन् " स्यात् । अस्तीति विग्रहे ' अस भुवि ' अस्मादादादिकात्कर्त " लटः शतृ " इति शतरि " श्नसोरल्लोपः " इत्यल्लोपे नुमि, सुलोपे तलोपे च स स्त्रियान्तु " उगितश्चेति " ङीपि " सती " स्यात् " सन्साधौ धीरशस्तयोः । मा सत्ये विद्यमाने त्रिषु साध्व्युमयोः स्त्रियाम् " (इति मेदिनी) इत्येकं सत्यादीनाम् ॥ ९०

पूजित, वैरिविजित, आगे आया, निवास, अवात, अभेद्य कवच.

पुरस्कृतः (पूजितेऽरात्यभियुक्तेऽग्रतः कृते) ।

निवातावा (श्रयावातौ) (शस्त्राभेद्यं च वर्म यत्) ॥ ९१

पुरिति—पूजिते सम्मानिते, अरात्यभियुक्ते वैरिविजिते अग्रतःकृते सम्मुखीकृते पुरस्कृतः स्यात् । पुरोऽकारि पुरःपूर्वकात्करोतेः कर्मणि क्ते " पुरोऽव्ययमिति गतित्वे " नमस्पुरसोरिति " सत्वे च पुरस्कृतः " पुरस्कृतोऽभिशरतारिग्रस्ता कृतपूजिते " (इति मेदिनी) इत्येकं पूजितादीनाम् । आश्रयः निवासः, अवा वातरहितश्च उभौ निवातौ स्याताम् । शस्त्राभेद्यं यद्वर्मकवचादिकं तच्च निवातं स्यात् निरुद्धो निवृत्तो वा वातोऽस्मादिति निवातः "निवातो दृढसन्नाहे निवासे वातवर्जिते" (इत्यजय.) इत्येकं निवासादीनाम् ॥ ९१ ॥

उपजा, गर्वीला, बहुत ही बढा, वृद्धिमान्, लगा और उपजा हुआ, सत्कार सपन्न और पूजित.

जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिता उत्थितास्त्वमी ।

वृद्धिमत्प्रोद्यतोत्पन्ना आदृतौ सादरार्चितौ ॥ ९२ ॥

इति तान्ताः ॥

जेति—जातः उत्पन्नः उन्नद्धः दृप्तः अभिमानयुक्तो वा प्रवृद्धः समृद्धश्च एते उच्छ्रिताः उच्छ्रितपदवाच्याः स्युः । उच्छ्रयति, उच्छ्रीयते स्म वा उत्पूर्वकाच्छ्रयतेः कर्तरि कर्मणि वा "गत्यर्थेति" क्ते उच्छ्रितः द्वित्वे उच्छ्रितौ, बहुत्वे उच्छ्रिताः "उच्छ्रितं त्रिपु संजाते समुन्नद्धप्रवृद्धयोः" (इति मेदिनी) इत्येकं जातादीनाम् । अमी वक्ष्यमाणाः वृद्धिमत्प्रोद्यतोत्पन्नाः शब्दाः उत्थिताः उत्थितपदवाच्याः स्युः। उत्तिष्ठति स्म उत्पूर्वकात्तिष्ठतेः कर्तरि "गत्यर्थेति" क्ते, "उदःस्थास्तम्भोरिति" पूर्वसवर्णे, "झरो झरीति" थलोपे, "खरि चेति" चर्त्वे, "द्यतिस्यतिमास्थामिति" इत्वे च उत्थितः द्वित्वे उत्थितौ, बहुत्वे उत्थिताः "उत्थितं स्यात्त्रिषूत्पन्ने प्रोद्यते वृद्धिमत्यपि" (इति मेदिनी) इत्येकं वृद्धिमदादीनाम् । सादरः आदरसमेतः सत्कारयुतो वा अर्चितः पूजितश्च उभौ आदृतौ आदृतपदवाच्यौ स्याताम् । आद्रियते स्म आङ्पूर्वकाद् 'दृङ् आदरे' अस्मात्तौदादिकात्कर्मणि 'क्ते' आदृतः इत्येकं सादरार्चितयोः ॥ ९२ ॥

इति तान्ताः ।

अथ थान्ता व्याख्यायन्ते ॥

वाच्य, धन, पु. वस्तु, हेतु, उपरति, प्याऊ, आगम आदि.

अर्थो (ऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु) ।

न.

(निपानागमयो) स्तीर्थ (मृषिजुष्टजले गुरौ) ॥ ९३ ॥

अरिति—अभिधेयः वाच्यः, राः धनम्, वस्तु पदार्थव्यूहः, प्रयोजनम् उद्देश्यो हेतुर्वा निवृत्तिः निवर्तनम्, उपरागो विरागो वा एषु अर्थः स्यात् । ऋच्छति, अर्यते वा 'ऋ गतौ' अस्माज्जौवादिकात्कर्तरि, कर्मणि वा "उपिकुषिगार्तिभ्यस्थन्" इति थनि, गुणे च अर्थ्यते इति विग्रहे तु 'अर्थ उपयाच्ञायाम्' अस्माच्चौरादिकात् कर्मणि घञि वा अर्थः "अर्थो विषयार्थनयोर्धनकारणवस्तुषु । अभिधेये च शब्दानां निवृत्तौ च प्रयोजने" (इति मेदिनी) इत्येकमभिधेयादीनाम् । निपानम् जलावतारः उपकूपजलाशयो वा आगमः बौद्धशास्त्रभिन्नशास्त्रमनयोः, ऋषिजुष्टजले ऋषिसेवितजले, गुरौ उपाध्याये अयोध्यादिषु च तीर्थं स्यात् । तीर्यतेऽनेनेति विग्रहे तरतेः करणे "पातॄतुदीति" थकि किल्वादित्वे रपरत्वे दीर्घे च तीर्थम् अर्धर्चादित्वात्तीर्थो वा "तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु" (इति मेदिनी) इत्येकं निपानादीनाम् ॥ ९३ ॥

शक्तिमान्, म स्वरूपार्थ, मित-

समर्थ (स्त्रिषु शक्तिस्थे संबद्धार्थे हितेऽपि च) ।

मूल, क्षीणराग, वस्त्र पूज, मार्ग, पंक्ति.

दशमीस्थौ(क्षीणरागवृद्धौ)वीथी(पदव्यापि) ॥ ९४ ॥

---

१ [illegible] ॥ १ ॥

सेति—शक्तिस्थे शक्तिमति, सम्बद्धार्थे सम्बन्धस्यार्थे, हितेऽनुकूलेऽपि च समर्थस्त्रिषु त्रिलिङ्ग्यां स्यात् । समर्थयते, समर्थ्यते वा संपूर्वकाद् 'अर्थ उपयाच्ञायाम्' चौरादिकात्कर्तरि पचाद्यचि, कर्मणि घञि वा समर्थः इत्येकं शक्तिमदादीनाम् । क्षीणरागो विगतरागः वृद्धो अतिवृद्धश्च उभौ दशमीस्थौ स्याताम् । दशम्यां तिष्ठतीति विग्रहे "सुपि स्थः" इति के आलोपे च दशमीस्थः द्वित्वे दशमीस्थौ "दशमीस्थो नष्टबीजे स्थविरेऽप्यन्यलिङ्गकः" इत्येकं क्षीणरागादीनाम् । पदवी मार्गः अपिशब्दात्पङ्क्त्यादिश्च वीथी स्यात् । विथ्यते 'विथृ याचने' अस्माद्भौवादिकाद् "इगुपधात्कित्" इतीनिं, बाहुलकाद्दीर्घे, "कृदिकारादिति" ङीषि च वीथी वीथिर्वा "वीथी पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्मनोः" (इति मेदिनी) इत्येकं पदव्यादीनाम् ॥ ६४ ॥

सभा, उपाय, पर्वत का अग्र-भाग, परिमाण, भेद, पुस्तक, धन, आधार, स्थिति, मरण.

स. पु.न. *

(आस्थानीयत्नयो) रास्था प्रस्थो (ऽस्त्री सानुमानयोः) ।

पु. स.

"(शास्त्रद्रविणयो)र्ग्रन्थः संस्था(धारे स्थितौ मृतौ) ६५ ॥"

आसिति—आस्थानी सभा, यत्नः उपायश्च अनयोः आस्था स्यात् । आस्थानम्, आतिष्ठत्यस्यामिति वा आङ्पूर्वकात्तिष्ठतेर्भावे आधारे वा "आतश्चोपसर्गे" इत्यङि, आलोपे, टापि च आस्था "आस्था त्वालम्बनास्थानयत्नापेक्षासु योषिति" (इति मेदिनी) इत्येकं सभादीनाम् । सानुः शृङ्गः पर्वताग्रभागो वा मानं परिमाणभेदः अनयोः प्रस्थः अस्त्री पुन्नपुंसकं स्यात् । प्रतिष्ठतेऽनेन अस्मिन्निति वा प्रपूर्वकात्तिष्ठतेः "घञर्थे कः" इति के आलोपे च प्रस्थः "प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि" (इति मेदिनी) इत्येकं सान्वादीनाम् । शास्त्रम् शासनम्, द्रविणं धनमनयोर्ग्रन्थः स्यात् । ग्रन्थनम्, ग्रथ्यते वा ग्रथ्नातेर्भावे, कर्मणि वा घञि ग्रन्थः इत्येकं शास्त्रादीनाम् । आधारे अधिकरणे, स्थितौ स्थित्याम्, मृतौ मरणे च संस्था स्यात् । संस्थानम्, संतिष्ठतेऽनयेति वा संपूर्वकात्तिष्ठतेर्भावे करणे वा अङि, आलोपे, टापि च संस्था "संस्थश्चरेवस्थिते स्त्री स्थितौ सादृश्यनाशयोः" (इति मेदिनी) इत्येकमाधारादीनाम् ॥ ६५ ॥

इति थान्ताः ।

अथ दान्ता व्याख्यायन्ते ।

आशय, वश, मेघ, संवत्सर, निन्दा, हुक्म, पुत्र, बान्धव, किरण, चरण, चौथाई, चन्द्र, अग्नि, सूर्य.

पु. पु.

(अभिप्रायवशौ) छन्दावब्दौ (जीमूतवत्सरौ) ।

पु. पु.

अपवादौ (तु निन्दाज्ञे) दायादौ (सुतबान्धवौ) ॥

पु. पु.

पादा(रश्म्यङ्घ्रितुर्यांशा)(श्चन्द्राग्न्यर्का)स्तमोनुदः ६६ ॥

* "सानु-र्ना बुधे मार्गे वात्याया पल्लवे वने" (इति विश्व.) ॥

अभीति–अभिप्रायः आशयः, वशोऽधीनश्च उभौ छन्दौ छन्दपदवाच्यौ स्याताम् । छन्द्यते 'छदि संवरणे' अस्माच्चौरादिकाद् "अकर्तरि कारके चेति" कर्मणि घञि छन्दः "छन्दो वशेऽभिप्राये च दृषत्पाषाणमात्रके । निष्पेषणार्थपट्टेऽपि" (इति हैमः) इत्येकमभिप्रायादीनाम् । जीमूतो मेघः, वत्सरः संवत्सरश्च उभौ अब्दौ अब्दपदवाच्यौ स्याताम् । अपो ददाति अप्पूर्वकाद्ददातेः "आतोऽनुपेति" के आलोपे च अब्दः "अब्दः संवत्सरे मेघे गिरिभेदे च मुस्तके" (इति विश्वः) इत्येकं मेघादीनाम् । निन्दा जुगुप्सा, आज्ञा शासनं च उभे अपवादौ स्याताम् । अपवदनम्, अपोद्यते वा अप्पूर्वकाद्वदतेर्भावे कर्मणि वा 'घञि' अपवादः मुकुटमते तु अववादः "अववादस्तु निन्दायामाज्ञाविश्रम्भयोरपि" (इति विश्वः) इत्येकं निन्दादीनाम् । सुतः पुत्रः वान्धवो ज्ञातिश्च उभौ दायादौ स्याताम् । दायमत्ति दायपूर्वकाद् 'अद भक्षणे' अस्मात् "कर्मण्यण्" इत्यणि । आदत्ते इति विग्रहे तु आङ्पूर्वकाद्ददातेः कर्तरि "आतश्चोपेति" के आलोपे च आदः दायस्य आदः दायाद इति वा "दायादस्तु भवेत्पुंसि सपिण्डे तनयेऽपि च" (इति मेदिनी) इत्येकं सुतादीनाम् । रश्मिः किरणः अङ्घ्रिश्चरणो वृक्षमूलं वा तुर्य्यांशश्चतुर्थांशश्च एते पादाः स्युः पद्यतेऽसाविति 'पद गतौ' अस्माद्दैवादिकात् "पदरुजविशेति" घञि पादः "पादो वुध्ने तुरीयांशे शैले प्रत्यन्तपर्वते । चरणे च मयूखे च" (इति मेदिनी) इत्येकं मयूखादीनाम् । चन्द्रो निशाकरः अग्निः पावकः अर्कः सूर्यश्च एते तमोनुदः स्युः । तमो नुदतीति विग्रहे उपपदसमासे तमःपूर्वकाद् 'णुद प्रेरणे' अस्मात्कर्तरि क्विपि तमोनुद्, द्वित्वे तमोनुदौ, वहुत्वे तमोनुदः स्युरित्येकं चन्द्रादीनाम् ॥ ९६ ॥

जनवाद, सि- पु.   पु.
द्धान्त, कीचड, **निर्वादो(जनवादेऽपि) शादो (जम्बालशष्पयोः)।**
वालतृण, कष्ट
युत रोदन, रक्षक,   पु.
भयानक युद्ध. **(सारावे रुदिते त्रात)र्याक्रन्दे(दारुणे रणे) ॥ ९७ ॥**

निरिति–जनवादे लोकवादे अपिशब्दान्निर्णीतवादे सिद्धान्ते वा निर्वादः स्यात् । निर्वदनम् निरपूर्वकाद्वदतेर्भावे 'घञि' निर्वादः "निर्वादः स्याल्लोकवादपरिनिष्ठितवादयोः" (इति मेदिनी) इत्येकं लोकवादादेः । जम्वालः कर्दमः शष्पं वालतृणं च अनयोः शादः स्यात्, शदनम्, शद्यतेऽनेनेति वा 'शद्लृ शातने' अस्माद्भौवादिकाद्भावे करणे वा घञि शादः* "शादः कर्दमशष्पयोः" (इति हैमः) इत्येकं कर्दमादेः। सारावे आर्तनादसमेत रुदिते रोदने त्रातरि पार्ष्णिग्राहाक्रान्तस्य विजिगीषोरक्षितरि दारुणे भयानके रणे संग्रामे च "आक्रन्दः" स्यात् । आक्रन्दति, आक्रन्दयति आक्रन्द्यतेऽस्मिन्, आक्रन्दनम्, वा आङ्पूर्वक. 'क्रदि आह्वाने रोदने च' अस्माद्भौवादिकात् 'क्रन्द शब्द-

* स्यतीति विग्रहे तु 'शो तनूकरणे' अस्माद्दैवादिकात्कर्तरि "शाशपिभ्यां ददनाविति" दे आत्वे च शाद इति वा ॥

सेति--शक्तिस्थे शक्तिमति, सम्बद्धार्थे सम्बन्धस्यार्थे, हितेऽनुकूलेऽपि च समर्थस्त्रिषु त्रिलिङ्गयां स्यात् । समर्थयते, समर्थ्यते वा संपूर्वकाद् ‘ अर्थ उपयाच्ञायाम् ’ चौरादिकात्कर्तरि पचाद्यचि, कर्मणि घञि वा समर्थः इत्येकं शक्तिमदादीनाम् । क्षीणरागो विगतरागः वृद्धो अतिवृद्धश्च उभौ दशमीस्थौ स्याताम् । दशम्यां तिष्ठतीति विग्रहे “ सुपि स्थः ” इति के आलोपे च दशमीस्थः द्वित्वे दशमीस्थौ “ दशमीस्थो नष्टबीजे स्थविरेऽप्यन्यलिङ्गकः ” इत्येकं क्षीणरागादीनाम् । पदवी मार्गः अपिशब्दात्पङ्क्त्यादिश्च वीथी स्यात् । विथ्यते ‘ विथृ याचने ’ अस्मादौणादिकाद् “ इगुपधात्कित् ” इतीनि, बाहुलकाद्दीर्घे, “ कृदिकारादिति ” ङीषि च वीथी वीथिर्वा “वीथी पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्मनोः” (इति मेदिनी) इत्येकं पदव्यादीनाम् ॥९४॥

सभा, उपाय, पर्वत का अग्रभाग, परिमाणभेद, पुस्तक, धन, आधार, स्थिति, मरण.

स. पु.न. *

(आस्थानीयत्नयो) रास्था प्रस्थो (ऽस्त्री सानुमानयोः) ।

पु. स.

“(शास्त्रद्रविणयो)र्ग्रन्थः संस्था(धारे स्थितौ मृतौ) ९५॥”

आसिति--आस्थानी सभा, यत्नः उपायश्च अनयोः आस्था स्यात् । आस्थानम्, आतिष्ठत्यस्यामिति वा आङ्पूर्वकात्तिष्ठतेर्भावे आधारे वा “ आतश्चोपसर्गे ” इत्यङि, आलोपे, टापि च आस्था “ आस्था त्वालम्बनास्थानयत्नापेक्षासु योषिति ” (इति मेदिनी) इत्येकं सभादीनाम् । सानुः शृङ्गः पर्वताग्रभागो वा मानं परिमाणभेदः अनयोः प्रस्थः अस्त्री पुन्नपुंसकं स्यात् । प्रतिष्ठतेऽनेन अस्मिन्निति वा प्रपूर्वकात्तिष्ठतेः “ घनर्थे कः ” इति के आलोपे च प्रस्थः “ प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि ” (इति मेदिनी) इत्येकं सान्वादीनाम् । शास्त्रम् शासनम्, द्रविणं धनमनयोर्ग्रन्थः स्यात् । ग्रन्थनम्, अथ्यते वा ग्रथ्नातेर्भावे, कर्मणि वा घञि ग्रन्थः इत्येकं शास्त्रादीनाम् । आधारे अधिकरणे, स्थितौ स्थित्याम्, मृतौ मरणे च संस्था स्यात् । संस्थानम्, संतिष्ठतेऽनयेति वा संपूर्वकात्तिष्ठतेर्भावे करणे वा अङि, आलोपे, टापि च संस्था “ संस्थश्चरेवस्थिते स्त्री स्थितौ सादृश्यनाशयोः ” (इति मेदिनी) इत्येकमाधारादीनाम् ॥ ९५ ॥

इति थान्ताः ।

अथ दान्ता व्याख्यायन्ते ।

आशय, वश, मेघ, संवत्सर, निन्दा, हुक्म, पुत्र, बान्धव, किरण, चरण, चौथाई, चन्द्र, अग्नि, सूर्य.

पु. पु.

(अभिप्रायवशौ) छन्दावब्दौ (जीमूतवत्सरौ) ।

पु. पु.

अपवादौ (तु निन्दाज्ञे) दायादौ (सुतबान्धवौ) ॥

पु. पु.

पादा(रश्म्यङ्घ्रितुर्यांशा)(श्चन्द्राग्न्यर्का)स्तमोनुदः ९६

---

* “ सानुः शृङ्गे बुधे मार्गे वात्याया पल्लवे वने ” (इति विश्व.) ॥

अभीति—अभिप्रायः आशयः, वशोऽधीनश्च उभौ छन्दौ छन्दपदवाच्यौ स्याताम्। छन्द्यते 'छदि संवरणे' अस्माच्चौरादिकाद् "अकर्तरि कारके चेति" कर्मणि घञि छन्दः "छन्दो वशेऽभिप्राये च दृषत्पाषाणमात्रके। निष्पेषणार्थपट्टेऽपि" (इति हैमः) इत्येकमभिप्रायादीनाम्। जीमूतो मेघः, वत्सरः संवत्सरश्च उभौ अब्दौ अब्दपदवाच्यौ स्याताम्। अपो ददाति अप्पूर्वकाद्ददातेः "आतोऽनुपेति" के आलोपे च अब्दः "अब्दः संवत्सरे मेघे गिरिभेदे च मुस्तके" (इति विश्वः) इत्येकं मेघादीनाम्। निन्दा जुगुप्सा, आज्ञा शासनं च उभे अपवादौ स्याताम्। अपवदनम्, अपोद्यते वा अपपूर्वकाद्वदतेर्भावे कर्मणि वा 'घञि' अपवादः मुकुटमते तु अववादः "अववादस्तु निन्दायामाज्ञाविश्रम्भयोरपि" (इति विश्वः) इत्येकं निन्दादीनाम्। सुतः पुत्रः बान्धवो ज्ञातिश्च उभौ दायादौ स्याताम्। दायमत्ति दायपूर्वकाद् 'अद भक्षणे' अस्मात् "कर्मण्यण्" इत्यणि। आदत्ते इति विग्रहे तु आङ्पूर्वकाद्ददातेः कर्तरि "आतश्चोपेति" के आलोपे च आदः दायस्य आदः दायाद इति वा "दायादस्तु भवेत्पुंसि सपिण्डे तनयेऽपि च" (इति मेदिनी) इत्येकं सुतादीनाम्। रश्मिः किरणः अङ्घ्रिश्चरणो वृक्षमूलं वा तुर्यांशश्चतुर्थांशश्च एते पादाः स्युः पद्यतेऽसाविति 'पद गतौ' अस्माद्दैवादिकात् "पदरुजविशेति" घञि पादः "पादो बुध्ने तुरीयांशे शैले प्रत्यन्तपर्वते। चरणे च मयूखे च" (इति मेदिनी) इत्येकं मयूखादीनाम्। चन्द्रो निशाकरः अग्निः पावकः अर्कः सूर्यश्च एते तमोनुदः स्युः। तमो नुदतीति विग्रहे उपपदसमासे तमःपूर्वकाद् 'णुद प्रेरणे' अस्मात्कर्तरि क्विपि तमोनुद्, द्वित्वे तमोनुदौ, बहुत्वे तमोनुदः स्युरित्येकं चन्द्रादीनाम्॥ ९६॥

जनवाद, सि- पु. पु.
ग्रान्त, कीचड, बालतृण, कष्ट **निर्वादो(जनवादेऽपि) शादो (जम्बालशष्पयोः)।**
युतरोदन, रक्षक, भयानक युद्ध. पु. **(सारावे रुदिते त्रात)र्याक्रन्दे(दारुणे रणे)॥ ९७॥**

निरिति—जनवादे लोकवादे अपिशब्दान्निर्णीतवादे सिद्धान्ते वा निर्वादः स्यात्। निर्वदनम् निर्पूर्वकाद्वदतेर्भावे 'घञि' निर्वादः "निर्वादः स्याल्लोकवादपरिनिष्ठितवादयोः" (इति मेदिनी) इत्येकं लोकवादादेः। जम्बालः कर्दमः शष्पं बालतृणं च अनयोः शादः स्यात्, शदनम्, शद्यतेऽनेनेति वा 'शद्लृशातने' अस्माद्भौवादिकाद्भावे करणे वा घञि शादः* "शादः कर्दमशष्पयोः" (इति हैमः) इत्येकं कर्दमादेः। सारावे आर्तनादसमेत रुदिते रोदने त्रातरि पार्ष्णिग्राहाक्रान्तस्य विजिगीषोरक्षितरि दारुणे भयानके रणे संग्रामे च "आक्रन्दः" स्यात्। आक्रन्दति, आक्रन्दयति आक्रन्द्यतेऽस्मिन्, आक्रन्दनम्, वा आङ्पूर्वकः 'क्रदि आह्वाने रोदने च' अस्माद्भौवादिकात् 'क्रन्द शब्द-

* [illegible] 'शो तनूकरणे' अस्माद्दैवादिकात्कर्तरि "[illegible]दनाविति" दे [illegible] च [illegible] ॥

सालत्ये ' चौरादिकाद्वा कर्तरि पचाद्यचि आधारे, भावे वा घञि आक्रन्दः " आक्रन्दः क्रन्दने ह्वाने मित्रदारुणयुद्धयोः " (इति मेदिनी) इत्येकं कष्टयुतशब्दादीनाम् ॥६७॥

अनुग्रह, प्रसन्नता, काव्यगुण, व्यञ्जन, रसोई करनेवाला, गवाध्यक्ष, प्रमोद, अभिमानआदि.

पु. पु.
(स्या)त्प्रसादो(ऽनुरोधेऽपि)सूदः(स्याद्व्यञ्जनेऽपि च)।
पु. पु. पु.
(गोष्ठाध्यक्षेऽपि)गोविन्दो(हर्षेऽ) प्यामोदवन्मदः ॥६८॥

स्यादिति—अनुरोधे अनुरागे अनुवर्तने वा अपिशब्दाद् अनुग्रहकाव्यप्राणस्वास्थ्यादिषु च प्रसादः स्यात् । प्रसदनम्, प्रसद्यतेऽनेनेति वा प्रपूर्वकात्सदेर्भावे करणे वा घञि, वृद्धौ च प्रसादः " प्रसादोऽनुग्रहे काव्यप्राणस्वास्थ्यप्रसत्तिषु " (इति मेदिनी) इत्येकमनुरागादीनाम् । व्यञ्जने सूपादौ, अपिशब्दाच्छक्तिभेदे सूपकारे च सूदः स्यात् । सूदयति, सूद्यते वा ' षूद क्षरणे ' अस्माच्चौरादिकात्कर्त्तरि पचाद्यचि कर्मणि " एरच् " इत्यचि वा सूदः " सूदस्तु सूपवत्सूपकारे च व्यञ्जनेऽपि च " (इति विश्वः) इत्येकं सूपभक्तादीनाम् । गोष्ठाध्यक्षे गोस्थानकाधीशे अपिशब्दाद्वासुदेवे वृहस्पतौ च गोविन्दः स्यात् । गां विन्दति गोपूर्वकाद्विन्दतेः कर्तरि " गवादिषु विन्देः संज्ञायामिति " शे, शित्त्वान्नुमि च गोविन्दः " गोविन्दो वासुदेवे स्याद्गवाध्यक्षे वृहस्पतौ " (इति मेदिनी) इत्येकं गवाध्यक्षादीनाम् । हर्षे प्रमोदे आमोदः स्यात् । तद्वन्मदोऽपि आमोदयति, आमोदनं वा आङ्पूर्वकान्मुदेः स्वार्थण्यन्तात् कर्तरि पचाद्यचि, भावे घञि वा आमोदः " आमोदो गन्धहर्षयोः " (इति मेदिनी) मदनम्, मद्यतेऽनेनेति वा माद्यतेर्भावे करणे वा " मदोऽनुपसर्गे " इत्यपि मदः " मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः " (इति विश्वः) इति द्वे हर्षादीनाम् ॥ ६८ ॥

श्रेष्ठ, राजचिह्न, बैल की लाँट, ज्ञान, सभाषण, क्रियाकार, सग्राम और नाम.

पु.न.
(प्राधान्ये राजलिङ्गे च वृषाङ्गे) ककुदो(ऽस्त्रियाम्) ।
स.
(स्त्री)संवि(ज्ज्ञानसंभाषाक्रियाकाराजिनामसु) ॥ ६६ ॥

प्रेति—प्राधान्ये मुख्ये, राजलिङ्गे राजलक्ष्मणि छत्रचामरादिके, वृषाङ्गे वृषभाङ्गविशेषे लाटेति प्रसिद्धे च ककुदः अस्त्रियां पुन्नपुंसकं स्यात् । कं सुखं कौति कपूर्वकात् कौतेः कर्तरि " अब्दादयश्चेति " दे पृषोदरादित्वाद्गुणाभावे च ककुदः यदा हलन्तस्तदा कं सुखं कौतीति विग्रहे क्विपि, तुकि च ककुत् (द्) "ककुद्वत् ककुदं श्रेष्ठे वृषाङ्गे राजलक्ष्मणि " (इति विश्वः) इत्येकं प्राधान्यादीनाम् । ज्ञानं विद्या, संभाषा सुरीत्या संभाषणम्, क्रियायाः कारो नियमः पणबन्धो वा आजिर्युद्धम् नाम संज्ञा एतेष्वर्थेषु संवित् स्त्री स्यात् । संवेदनम्, संविद्यतेऽनयेति वा संपूर्वकाद् ' विद ज्ञाने ' आदादिकाद् ' विद चेतनादौ च ' चौरादिकाद्वा भावे, करणे वा संपदादित्वात्क्विपि संवित्

"संवित् स्त्रियां प्रतिज्ञायामाचारे ज्ञानसंगरे। संभाषणे क्रियाकारे संकेते नाम्नि तोषणे" (इति मेदिनी) इत्येकं ज्ञानादीनाम् ॥ ९९ ॥

धर्म, एकान्त, वसन्त आदि छः ऋतु, साल, व्यवसाय, रक्षण, स्थान, चिह्न, चरण, वस्तु.

स. स.
(धर्मे रहस्यु) पनिषत् (स्यादृतौ वत्सरे) शरत्।

न.
पदं (व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु) ॥ १०० ॥

धेति—धर्मे श्रुतिस्मृतिविहितकर्मणि शास्त्रोक्तकर्मोत्पन्नभाविफलसाधनभूते शुभे पुण्ये दानादौ वा रहसि एकान्ते गोप्ये वा वेदान्ते च उपनिषत् स्यात्। उपनिषदनम्, उपनिषीदति श्रेयोऽस्यामिति वा उपनिपूर्वकात्सीदतेर्भावाधारयोः सम्पदादित्वात् क्विपि उपनिषत् "भवेदुपनिषद्धर्मे वेदान्ते विजने स्त्रियाम्" (इति मेदिनी) इत्येकं विजनादीनाम्। ऋतौ वसन्तादौ वत्सरे वर्षे च 'शरत्' स्यात्। शृणाति, शीर्यन्ते पाकेनौषधयोऽस्यामिति वा शृणातेः कर्तरि, आधारे वा (शॄदृभसोऽदिरिति) अदिप्रत्यये शरत् "शरत्स्त्री वत्सरेऽप्यृतौ" (इति मेदिनी) इत्येकमृतुवत्सरयोः। व्यवसितिर्व्यवसायः, त्राणं रक्षणम्, स्थानं स्थितिः, लक्ष्म लक्षणम्, अङ्घ्रिः चरणः, वस्तु पदार्थः एषु पदं स्यात्। पद्यते, पदनम्, पद्यतेऽनेनेति वा 'पद गतौ' अस्मादैवादिकात्कर्तरि पचाद्यचि, भावकर्मकरणेषु वा 'घञि' संज्ञापूर्वकत्वाद्वृद्ध्यभावे च पदम् "पदं शब्दे च वाक्ये च व्यवसायापदेशयोः। पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः" (इति विश्वः) श्लोकपादेऽपि च क्लीवं पुंलिङ्गः किरणे पुनः (इति मेदिन्यां विशेषः) इत्येकं व्यवसायादीनाम् ॥ १०० ॥

गोसेवित देश, मान, स्थान, कार्य, इष्ट, मिष्ट, अकठिन, कोमल.

न. न.
गोष्पदं (सेविते माने) (प्रतिष्ठाकृत्य) मास्पदम्।

पु.स.न. पु.स.न.
(त्रिष्विष्टमधुरौ) स्वादू मृदू (चातीक्ष्णकोमलौ) ॥ १०१ ॥

गविति—सेविते गोसेवितदेशे, माने प्रमाणे गोपदप्रमिते लम्बिते आयते श्वभ्रे वा गोष्पदं स्यात्। गावः पद्यन्तेऽस्मिन्देशे गोपूर्वकात् 'पद गतौ' अस्मादैवादिकादाधारे घञि, संज्ञापूर्वकत्वाद्वृद्ध्यभावे च गोःपदमिति समासे वा "गोष्पदं सेवितासेवितप्रमाणेषु" इति सुटि सस्य षत्वे च निपातिते गोष्पदम् "गोष्पदं गोपदे श्वभ्रे गवां च गतिगोचरे" (इति विश्वः) इत्येकं सेवितमानयोः। प्रतिष्ठा स्थानं मर्यादा वा कृत्यं कार्यमेतद्द्वयमास्पदं स्यात्। आपद्यतेऽस्मिन्निति विग्रहे आङ्पूर्वकात्पद्यतेराधारे घञि, वृद्ध्यभावे "आस्पदं प्रतिष्ठायामिति" सुडागमे च आस्पदम् "आस्पदं पदकृत्ययोः" (इति मेदिनी) इत्येकं स्थानकार्ययोः। अतः परमावर्गाद्दान्तास्त्रिषु भवन्ति। इष्टो मनोज्ञः मधुरो मिष्टः उभौ स्वादू स्वादुपदवाच्यौ स्याताम्। स्वदते 'ष्वद आस्वादने' अस्माद्भौवादिकात्

"कृत्वापेति" उणि वृद्धौ स्वादुः द्वित्वे स्वादू "स्वादु मिष्टमनोज्ञयोः" (इति मेदिनी) इत्येकमिष्टमधुरयोः । अतीक्ष्णः अतिग्मः कोमलः अकठिनः उभौ "मृदू" मृदुपदवाच्यौ स्याताम् । मृद्यते 'म्रद मर्दने' अस्माद्धौवादिकात् कर्मणि "प्रथिम्रदीति" कौ, संप्रसारणे च मृदुः द्वित्वे मृदू "मृद्वतीक्ष्णे च कोमले" (इति हैमः) इत्येकमतिग्मकोमलयोः ॥ १०१ ॥

मूर्ख, अल्पादि, नया, अधीर, पण्डित व ढीठ.

पु.स.न. पु.स.न.

(मूढाल्पापटुनिर्भाग्या) मन्दाः स्यु (र्द्वौ तु) शारदौ ।

पु.स.न.

(प्रत्यग्राप्रतिभौ) (विद्वत्सुप्रगल्भौ) विशारदौ ॥ १०२ ॥

इति दान्ताः ॥

म्विति–मूढो मूर्ख. अल्पा स्वल्पा, अपटुः असमर्थः निर्भाग्यो भाग्यहीनश्च एते मन्दाः मन्दपदवाच्याः स्युः । मन्दते 'मदि स्तुत्यादौ' अस्माद्धौवादिकात्कर्तरि पचाद्यचि, नुमागमे च मन्दः द्वित्वे मन्दौ बहुत्वे मन्दाः "मन्दोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः । अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ" (इति मेदिनी) इत्येकं मूढादीनाम् । प्रत्यग्रोऽभिनवः, अप्रतिभः अप्रगल्भोऽधीरो वा इमौ द्वौ तु शारदौ शारदपदवाच्यौ स्याताम् । शरदि भवः "सन्धिवेले" त्यणि वृद्धौ च शारदः द्वित्वे शारदौ "शारदोऽब्दे स्त्रियां तोयपिप्पलीसप्तपर्णयोः । शस्ये क्लीबं शरज्जातनूतनाप्रतिभे त्रिषु" (इति मेदिनी) इत्येकमभिनवाधीरयोः । विद्वान् पण्डितः सुप्रगल्भः महाधृष्टो महाधीरो वा इमौ द्वौ विशारदौ विशारदपदवाच्यौ स्याताम् । विशिष्टो विपरीतो वा शारदः "प्रादयो गतेति" समासे विशारदः "विशारदः पण्डिते च धृष्टे" (इति मेदिनी इत्येकं धृष्टपण्डितयोः ॥ १०२ ॥

इति दान्ताः ॥

अथ धान्ता व्याख्यायन्ते ॥

नापविशेष, वरगद, देह, उचाई, ध्यानादि, रास्ता.

पु. पु.

(व्यामो वटश्च) न्यग्रोधावुत्सेधः (कायउन्नतिः) ।

(पर्याहारश्च मार्गश्च) विवधौ वीवधौ (च तौ) ॥ १०३

व्येति–व्यामः ततयोः सकरयोर्बाह्वोस्तिर्यगन्तरम्, वटः बहुपात्र- उभौ न्यग्रो[धौ] स्याताम् । न्यग्रं रुणद्धीति विग्रहे उपपदसमासे "कर्मण्यण्" इत्यणि, गुणे न्यग्रोधः द्वित्वे न्यग्रोधौ "न्यग्रोधो व्यामवटयोर्न्यग्रोधश्च शमीतरौ" (इति विश्वः इत्येकं व्यामवटयोः । कायो देहः उन्नतिरौन्नत्यं च उत्सेधः स्यात् । उत्सेधनम्, उत्सिध्यतेऽनेनेति वा उत्पूर्वकः 'षिधु गत्याम्' भौवादिकस्तस्माद्भावे करणे वा घञि, गुणे उत्सेधः "उत्सेधस्तूच्छ्रये न स्त्री क्लीबं संनहनेऽपि च" (इति विश्वः) इत्येकं का[य]

ञ्छाययोः । पर्याहारः उभयतो बद्धशिक्यं स्कन्धवाह्यं काष्ठम् "काँवडी" इति ख्यातं स्थानादिर्वा मार्गः पन्थाश्च तावुभौ विवधौ वीवधौ च स्याताम् । विविधो वधो हननं गमनं वेति विग्रहे "प्रादिभ्यो धातुजस्येति वा. २ । २ । २४" समासे, उत्तरपदलोपे च विवधः "अन्येषामपीति" दीर्घपक्षे तु वीवधः द्वित्वे विवधौ-वीवधौ च "विवधो वीवधश्चापि पर्याहारेऽध्वभारयोः" (इति विश्वः) इति द्वे पर्याहारादीनाम् ॥ १०३ ॥

यज्ञीय वृक्षादि, गिरवी या थाती आदि. **पु. परिधि (र्यज्ञियतरोः शाखायामुपसूर्यके) । पु. (बन्धकं व्यसनं चेतः पीडाधिष्ठान) माधयः ॥ १०४ ॥**

परीति—यज्ञियतरोः पलाशादिवृक्षस्य शाखायाम्, उपसूर्यके सूर्यसमीपस्थे मेघ-धूपादिसंनिकर्षाज्जायमाने वेष्टनाकारे मण्डले च परिधिः स्यात् । परिधीयते परिपूर्वका-द्धातेः कर्मणि "उपसर्गे घोः किरिति" कौ, आलोपे च परिधिः स्यादित्येकं यज्ञियवृक्षादेः । बन्धकं उत्तमर्णगृहे आऋणादानाद्विश्वासार्थं यद्वस्तु स्थापितं तद्ब-न्धकं स्यात् । व्यसनं दुःखम्, चेतः पीडा मानसी व्यथा, अधिष्ठानमध्यासनमाश्रयो वा एते आधय आधिपदवाच्याः स्युः । आधानम्, आधीयतेऽनेनास्मिन्निति वा आङ्पूर्वकाद्धाञो भावकरणाधारेषु कौ, आलोपे च आधिः, द्वित्वे आधी, बहुत्वे आधयः "आधिः पुमाँश्चित्तपीडाप्रत्याशाबन्धकेषु च । व्यसने चाप्यधिष्ठाने" (इति मेदिनी) इत्येकं बन्धकादीनाम् ॥ १०४ ॥

समाधान आदि, थाती या धरोहर आदि. **पु. (स्युः समर्थननीवाकनियमाश्च) समाधयः । पु. (दोषोत्पादे)ऽनुबन्धः(स्यात्प्रकृत्यादिविनश्वरे) ॥ १०५ ॥ (मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने) ।**

स्युरिति—समर्थनं शङ्कापरिहारः, समाधानं वा नीवाको वचनाभावः मूलोत्कर्षार्थं धान्यादिसंग्रहो वा नियम अङ्गीकारश्च एते समाधयः समाधिपदवाच्याः स्युः । समाधानम्, समाधीयतेऽनेनेति वा समाङ्पूर्वकाद्धातेर्भावसाधनयोः कौ, आलोपे च समाधिः, द्वित्वे समाधी, बहुत्वे समाधयः "समाधिर्ध्याननीवाकनियमेषु समर्थने" (इति विश्वः) इत्येकं समर्थनादीनाम् । दोषोत्पादे दोषाणामुत्पादने, प्रकृत्यादिविन-श्वरे प्रकृतिप्रत्ययागमादेशेषु विनश्वरे, इत्संज्ञालोपाभ्यामदर्शनशील वर्णे मुख्या-नुयायिनि मातापित्रादिकानुवर्तिनि शिशौ बालके, प्रकृतस्यानुवर्तने प्रकृतस्य प्रारब्धस्य अनुवर्तने च अनुबन्धः स्यात् । अनुबध्यते अनुपूर्वकाद्बध्नातेः कर्मणि घञि अनु-बन्धः "अनुबन्धस्तु बन्धे स्याद्दोषोत्पादे विनश्वरे । मुख्यानुयायिबाले च प्रकृत-स्यानिवर्तने" (इति मेदिनी) इत्येकं दोषोत्पादनादीनाम् ॥ १०५ । ३ ॥

"कृवापेति" उणि वृद्धौ स्वादुः द्वित्वे स्वादू "स्वादु मिष्टमनोज्ञयोः" (इति मेदिनी) इत्येकमिष्टमधुरयोः । अतीक्ष्णः अतिग्मः कोमलः अकठिनः उभौ "मृदू" मृदुपदवाच्यौ स्याताम् । मृद्यते 'म्रद मर्दने' अस्माद्भौवादिकात् कर्मणि "प्रथिम्रदीति" कौ, संप्रसारणे च मृदुः द्वित्वे मृदू "मृद्वतीक्ष्णे च, कोमले" (इति हैमः) इत्येकमतिग्मकोमलयोः ॥ १०१ ॥

मूर्ख, अल्पादि, नया, अधीर, पण्डित व ढीठ.

पु.स.न. पु.स.न.
(मूढाल्पापटुनिर्भाग्या) मन्दाः स्यु (र्द्वौ तु) शारदौ ।
पु.स.न.
(प्रत्यग्राप्रतिभौ) (विद्वत्सुप्रगल्भौ) विशारदौ ॥ १०२ ॥

इति दान्ताः ॥

म्विति–मूढो मूर्खः अल्पा स्वल्पा, अपटुः असमर्थः निर्भाग्यो भाग्यहीनश्च एते मन्दाः मन्दपदवाच्याः स्युः । मन्दते 'मदि स्तुत्यादौ' अस्माद्भौवादिकात्कर्तरि पचाद्यचि, नुमागमे च मन्दः द्वित्वे मन्दौ बहुत्वे मन्दाः "मन्दोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरोगिणोः । अल्पे च त्रिषु पुंसि स्याद्धस्तिजात्यन्तरे शनौ" (इति मेदिनी) इत्येकं मूढादीनाम् । प्रत्यग्रोऽभिनवः, अप्रतिभः अप्रगल्भोऽधीरो वा इमौ द्वौ तु शारदौ शारदपदवाच्यौ स्याताम् । शरदि भवः "सन्धिवेले" त्यणि वृद्धौ च शारदः द्वित्वे शारदौ "शारदोऽब्दे स्त्रियां तोयपिप्पलीसप्तपर्णयोः । शस्ये क्लीबं शरज्जातनूतनाप्रतिभे त्रिषु" (इति मेदिनी) इत्येकमभिनवाधीरयोः । विद्वान् पण्डितः सुप्रगल्भः महाधृष्टो महाधीरो वा इमौ द्वौ विशारदौ विशारदपदवाच्यौ स्याताम् । विशिष्टो विपरीतो वा शारदः "प्रादयो गतेति" समासे विशारदः "विशारदः पण्डिते च धृष्टे" (इति मेदिनी) इत्येकं धृष्टपण्डितयोः ॥ १०२ ॥

इति दान्ताः ॥

अथ धान्ता व्याख्यायन्ते ॥

नापविशेष, वरगद, देह, उंचाई, ध्यानादि, रास्ता.

पु. पु.
(व्यामो वटश्च) न्यग्रोधावुत्सेधः (कायउन्नतिः) ।
(पर्याहारश्च मार्गश्च) विवधौ वीवधौ (च तौ) ॥ १०

व्येति–व्यामः ततयोः सकरयोर्बाह्वोस्तिर्यगन्तरम्, वटः बहुपाद उभौ न्य स्याताम् । न्यञ्चं रुणद्धीति विग्रहे उपपदसमासे "कर्मण्यण्" इत्यणि, गुणे न्यग्रोधः द्वित्वे न्यग्रोधौ "न्यग्रोधो व्यामवटयोर्न्यग्रोधश्च शमीतरौ" (इति विश इत्येकं व्यामवटयोः । कायो देहः उन्नतिरौन्नत्यं च उत्सेधः स्यात् । उत्सेधनम्, उ ध्यतेऽनेनेति वा उत्पूर्वकः 'षिधु गत्याम्' भौवादिकस्तस्माद्भावे करणे वा घञि, गुणे उत्सेधः "उत्सेधस्तूच्छ्रये न स्त्री क्लीबं संनहनेऽपि च" (इति विश्वः) इत्येकं का

स्कन्धयोः । पर्याहारः उभयतो वद्धशिक्यं स्कन्धावाह्यं काष्ठम् "काँवडी" इति ख्यातं ध्यानादिर्वा मार्गः पन्थाश्च नावुभौ विवधो वीवधो च स्यानाम् । विविधो वधो हननं गमनं चेति विग्रहे "प्रादिभ्यो धातुजस्येति वा. २ । २ । २४" समासे, उत्तरपदलोपे च विवधः "अन्येषामपीति" दीर्घपक्षे तु वीवधः द्वित्वे विवधौ-वीवधौ च "विवधो वीवधश्चापि पर्याहारेऽध्वभारयोः" (इति विश्वः) इति द्वे पर्याहारादीनाम् ॥ १०३ ॥

यज्ञीय वृक्षादि, गिरवी या थाती आदि. पु. परिधि (र्यज्ञियतरोः शाखायामुपसूर्यके) ।
पु. (वन्धकं व्यसनं चेतः पीडाधिष्ठान) माधयः ॥ १०४ ॥

परीति—यज्ञियतरोः पलाशादिवृक्षस्य शाखायाम्, उपसूर्यके सूर्यसमीपस्थे मेघ-वृष्टादिसंनिकर्षाज्जायमाने वेष्टनाकारे मण्डले च परिधिः स्यात् । परिधीयते परिपूर्वका-द्धातेः कर्मणि "उपसर्गे घोः किरिति" कौ, आलोपे च परिधिः स्यादित्येकं यज्ञियवृक्षादेः । वन्धकं उत्तमर्णगृहे आऋणादानाद्विश्वासार्थं यद्वस्तु स्थापितं तद्ब-न्धकं स्यात् । व्यसनं दुःखम्, चेतः पीडा मानसी व्यथा, अधिष्ठानमध्यासनमाश्रयो वा एते आधयः आधिपदवाच्याः स्युः । आधानम्, आधीयतेऽनेनास्मिन्निति वा आङ्पूर्वकाद्धाञो भावकरणाधारेषु कौ, आलोपे च आधिः, द्वित्वे आधी, बहुत्वे आधयः "आधिः पुमाँश्चित्तपीडाप्रत्याशावन्धकेषु च । व्यसने चाप्यधिष्ठाने" (इति मेदिनी) इत्येकं वन्धकादीनाम् ॥ १०४ ॥

समाधान आदि थाती या धरोहर आदि. पु. (स्युः समर्थननीवाकनियमाश्च) समाधयः ।
पु. (दोषोत्पादे)ऽनुवन्धः(स्यात्प्रकृत्यादिविनश्वरे) ॥ १०५ ॥
(मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने) ।

स्युरिति—समर्थनं शङ्कापरिहारः, समाधानं वा नीवाको वचनाभावः मूलोत्कर्षार्थं धान्यादिसंग्रहो वा नियमः अङ्गीकारश्च एते समाधयः समाधिपदवाच्याः स्युः । समाधानम्, समाधीयतेऽनेनेति वा समाङ्पूर्वकाद्धातेर्भावसाधनयोः कौ, आलोपे च समाधिः, द्वित्वे समाधी, बहुत्वे समाधयः "समाधिर्ध्याननीवाकनियमेषु समर्थने" (इति विश्वः) इत्येकं समर्थनादीनाम् । दोषोत्पादे दोषाणामुत्पादने, प्रकृत्यादिविन-श्वरे प्रकृतिप्रत्ययागमादेशेषु विनश्वरे, इत्संज्ञालोपाभ्यामदर्शनशील वर्णे मुख्या-नुयायिनि मातापित्रादिकानुवर्तिनि शिशौ बालके, प्रकृतस्यानुवर्तने प्रकृतस्य प्रारब्धस्य अनुवर्तने च अनुवन्धः स्यात् । अनुवध्यते अनुपूर्वकाद्वध्नातेः कर्मणि घञि अनु-वन्धः "अनुवन्धस्तु वन्धे स्याद्दोषोत्पादे विनश्वरे । मुख्यानुयायिबाले च प्रकृत-स्यानिवर्त्तने" (इति मेदिनी) इत्येकं दोषोत्पादनादीनाम् ॥ १०५ । ३ ॥

विष्णु, चन्द्रमा, परिच्छेद, गड्हा, विधान, भाग्य, याचना, जासूस, पण्डित, समूहादि.

पु. विधु (विष्णौ चन्द्रमसि) पु. (परिच्छेदे बिले) ऽवधिः ॥ १०६ ॥
पु. विधि (विधाने दैवेऽपि) पु. प्रणिधिः (प्रार्थने चरे) ।
पु. पु. बुधवृद्धौ (पण्डितेऽपि) पु. स्कन्धः (समुदयेऽपि च) ॥ १०७ ॥

वीति—विष्णौ सर्वव्यापिनि परमेश्वरे, चन्द्रमसि निशानाथे अत्रापीत्यनुवृत्त्या कर्पूरे, राक्षसे च 'विधुः' स्यात् । विध्यति विरहिणाम् 'व्यध ताडने' अस्माद्दैवादिकात्कर्तरि "पृभिदीति" कौ "ग्रहिज्येति" संप्रसारणे च विधुः "विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे" (इति विश्वः) इत्येकं हृषीकेशादीनाम् । परिच्छेदे भागे, विभागे, अध्याये, पर्वणि, सर्गे, सीमनि वा बिले विवरे च अवधिः स्यात् । अवधानम् अवधीयतेऽनेनेति वा अवपूर्वकाद्धधातेर्भावसाधनयोः कौ, आलोपे च अवधिः "अवधिस्त्ववधाने स्यात्सीम्नि काले बिले पुमान्" (इति मेदिनी) इत्येकं परिच्छेदादीनाम् । विधाने कर्तव्यकार्ये, दैवे पूर्वजन्मकृते शुभाशुभकर्मणि अपिशब्दात् परमेष्ठिनि, काले च विधिः स्यात् । विधानम्, विधीयतेऽनेनेति वा विपूर्वकाद्धधातेर्भा करणयोः कौ, आलोपे च विधिः "विधिर्ना नियतौ काले विधाने परमेष्ठिनि (इति मेदिनी) इत्येकं विधानादीनाम् । प्रार्थने याचने चरे चरिष्णौ, चारे प्रणिधिः स्यात् । प्रणिधानम्, प्रणिधीयतेऽनेनेति वा प्रणिपूर्वकाद्धधातेर्भावसाधनयं कौ, आलोपे च प्रणिधिः "प्रणिधिर्याचने चरे" (इति हेमः) इत्येकं याचन दीनाम्, पण्डिते सदसद्विवेकिनि विदुषि, कवौ वा अपिशब्दाद्रौहिणेयादिषु च बुधवृद्ध स्याताम् । बुध्यते 'बुध अवगमने' अस्माद्दैवादिकात्कर्त्तरि "इगुपधेति" के, कित्त्व द्गुणाभावे च बुधः "बुधः कवौ रौहिणेये" (इति विश्वः) वर्धते स्म 'वृधु वृद्धौ अस्माद्भौवादिकात्कर्तरि "गत्यर्थेति" के, धत्वे, दत्वे च वृद्धः "वृद्धो जीर्णे प्रवृद्धे त्रिषु क्लीवन्तु शैलजे" (इति मेदिनी) इति द्वे पण्डितादीनाम् । समुदये समुदा समूहे वा अपिशब्दान्नृपांससंपरायकायादिषु च स्कन्धः स्यात् । कं शिरो दधा "आतोनुपसर्गे" इति के, पारस्करादित्वात्सुडागमे, आलोपे च स्कन्धः "स्कन्ध स्यान्नृपतावंसे संपरायसमूहयोः । काये तरुप्रकाण्डे च भद्रादौ छन्दसो भिदि" (इति मेदिनी) इत्येकं समूहादीनाम् ॥ १०६ । १०७ ॥

नद विशेष, समुद्र, नदी, विधान, प्रकार, सुन्दर आदि.

पु.स. देशे (नदविशेषेऽब्धौ) सिन्धु (र्ना सरिति स्त्रियाम्) ।
स. विधा (विधौ प्रकारे च) पु.स.न. साधु (रम्येऽपि च त्रिषु) ॥ १०८

दयिनि—देशे देशभेदे, नदविशेषे "भैरव—शोणभद्र—ब्रह्मपुत्रादौ" अब्धौ स

च सिन्धुः ना पुमान्स्यात् । सरिति नद्या तु स्त्रियां स्यात् । स्यन्दते 'स्यन्दू प्रस्रवणे' अस्माद्धौवादिकात्कर्तरि "स्यन्देः संप्रसारणं धश्चेति" उप्रत्यये, संप्रसारणे, दस्य धान्तादेशे च सिन्धुः "सिन्धुः समुद्रे नद्यां च नदे देशेभदानयोः" (इति विश्वः) इत्येकं नदविशेषादीनाम् । विधौ विधाने, प्रकारे भेदे सादृश्ये च 'विधा' स्यात् । विधानम् विपूर्वकाद्धाञो भावे "आतश्चोपेति" अङि, आलोपे, टापि च विधा "विधा गजान्ने भृद्धौ च प्रकारे वेतने विधौ" (इति विश्वः) इत्येकं विधानादीनाम् । रम्ये रमणीये सुन्दरे वा अपिशब्दाद्वार्धुषिके, सज्जने च 'साधु' त्रिषु त्रिलिङ्ग्यां स्यात् । साध्नोति 'साध संसिद्धौ' अस्मात्सौवादिकात्कर्तरि "कृवापेति" उणि साधु "साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्" (इति विश्व.) इत्येकं रम्यादीनाम् ॥ १०८ ॥

भार्या, पुत्रस्त्री, स. स.
स्त्रीमात्र, चूना, वधू "जाया स्नुहा स्त्री च" सुधा "लेपोऽमृतं स्नुही" ।
अमृत, सेहुँड़, स. स. स.
संकल्प, मर्यादा,
आदर, आकांक्षा. सन्धा "प्रतिज्ञामर्यादा" श्रद्धा[1] "संप्रत्ययः स्पृहा" ॥ १०९ ॥

वेति—जाया भार्या, स्नुहा पुत्रपत्नी, स्त्री स्त्रीमात्रा च एते वधूपदवाच्याः स्युः । वहतीति विग्रहे वहतेः कर्तरि "वहो धश्चेति" उप्रत्यये हस्य धादेशे च वधूः "वधूः स्नुषानवोढास्त्रीभार्यापृक्काङ्गनासु च । शट्यां शारिवाया च" (इति विश्वः) इत्येकं भार्यादीनाम् । लेपः जेमनम्, "येन देवालयाद्या लिप्यन्ते" चूनेति ख्यातो वा अमृतम् मोक्षः जलं घृतं वा स्नुही सीहुण्डश्च सुधा स्यात् । सुष्ठु, सुखेन वा धीयते धार्यते, पोष्यते, पीयते वा सुपूर्वकाद्धाञो धेटो वा कर्मणि "आतश्चोपसर्गे" इत्यङि, आलोपे, टापि च सुधा "सुधा प्रासादभाग्द्रव्यं सुधाविद्युत्सुधामृतम् । सुधा हि भोजनं ज्ञेयं सुधा धात्री सुधा स्नुही" (इत्यनेकार्थमञ्जरी) इत्येकं लेपादीनाम् । प्रतिज्ञा संकल्पः स्वीकारो वा मर्यादा सीमा प्रशंसा वा उभे 'सन्धा' पदवाच्ये स्याताम् । संधानम् संधीयतेऽत्रेति वा संपूर्वकाद्धाञो भावाधारयोरङि, आलोपे, टापि च सन्धा स्यादित्येकं प्रतिज्ञादेः । संप्रत्ययः सत्कारः आदरः विश्वासो वा स्पृहा आकाङ्क्षा च उभे 'श्रद्धा' पदवाच्ये स्याताम् । श्रद्धानम्, श्रद्धीयतेऽत्रेति वा श्रत्पूर्वकाद्दधातेर्भावाधिकरणयोरङि, आलोपे, टापि च श्रद्धा "श्रद्धादरे च काङ्क्षायाम्" (इति मेदिनी) इत्येकमादरादीनाम् ॥ १०९ ॥

न.
मदिरा, फूलका मधु[2] ("मद्ये पुष्परसे" क्षौद्रे)ऽप्यन्धं(तमस्यपि) ।
रस, शहद,
अन्धा, अंधेरा, पु.स.न.
मूर्ख, अहंकारी. (अतस्त्रिषु) समुन्नद्धौ(पण्डितंमन्यगर्वितौ) ॥ ११० ॥

---

१ "गुरुवेदान्तवाक्यादिषु विश्वास श्रद्धा." (इति तत्त्वबोध.) ॥

२ "मधुपराग मधु चैत है, मधु मदिरा मकरन्द। मधु नभ मधु खग मधु सुधा, मधुसूदन गोविन्द" ॥ (इति भाषाकोष) ॥

मेति—मद्ये मदिरायाम्, पुष्परसे मकरन्दे, क्षौद्रे माक्षिके अपिशब्दाज्जलदैत्यचैत्र-वसन्तजीवाशोकादौ च मधु स्यात् । मन्यते 'मन ज्ञाने' अस्माद्दैवादिकात्कर्तरि "फलपाटीति" उप्रत्यये, धान्तादेशे च मधु "मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः । दैत्ये चैत्रे वसन्ते च जीवाशोके मधुद्रुमे" (इति विश्वः) इत्येकं मद्यादीनाम् । तमसि तिमिरे अपिशब्दान्नेत्रहीने जले च अन्धं स्यात् । अन्धयति 'अन्ध दृष्ट्युपघाते' अस्माच्चौरादिकात्कर्त्तरि पचाद्यचि अन्धम् "अन्धन्तु तिमिरे क्लीबं चक्षुहीनेऽभिधेयवत्" (इति मेदिनी) इत्येकं तिमिरादीनाम् । अतः परमाधान्ताद्वक्ष्यमाणाः शब्दास्त्रिषु त्रिलिङ्ग्यां भवन्तीति । आत्मानं पण्डितं मन्यते पण्डितंमन्यो मूर्खः, गर्वितः दृप्तः अभिमानयुक्तो वा उभौ समुन्नद्धौ स्याताम् । समुन्नह्यते स्म समुत्पूर्वकात् 'णह बन्धने' अस्माद्दैवादिकात्कर्त्तरि क्ते हस्य धत्वे, तस्य धत्वे, जश्त्वे च समुन्नद्धः "समुन्नद्धः समुद्भूते पण्डितंमन्यदृप्तयोः" (इति विश्वः) इत्येकं पण्डितंमन्यादीनाम् ॥ ११० ॥

निन्दित, आज्ञा आदि, आश्रित, सन्निहित, ख्यात, भूषित.

पु.स.न. ब्रह्मबन्धु(रधिक्षेपे निर्देशेऽ) (थावलम्बितः) ।
पु.स.न. पु.स.न. (अविदूरेऽ) प्यवष्टब्धः प्रसिद्धौ (ख्यातभूषितौ) ॥ १११ ॥

इति धान्ताः ॥

ब्रेति—अधिक्षेपे निन्दाप्रयोगे यथा "हे ब्रह्मबन्धो दुष्टोऽसीति" विप्राचारहीने, निन्दितकर्मकारिणि वा निर्देशे आज्ञायाम् उपदेशे वा ब्रह्मबन्धुः स्यात् । ब्रह्मैव ब्राह्मणजातिः बन्धुरस्येति ब्रह्मबन्धुः "ब्रह्मबन्धुरधिक्षेपे निर्देशे च द्विजन्मनाम्" (इति विश्वः) इत्येकमधिक्षेपादेः । अथेति—अवलम्बितः आश्रितः, वस्त्रादिरुद्धो वा न विदूरं यस्येति अविदूरः सन्निहितः जीवितो रुद्धश्च वा अपिशब्दाद्दृढश्च अवष्टब्धः स्यात् । अवष्टभ्यते स्म अवपूर्वकात्स्तभ्नोतेः स्तभ्नातेर्वा कर्मणि क्ते, धत्वे, जश्त्वे "अवाच्चालम्बनाविदूर्ययोः" इति षत्वे च अवष्टब्धः "अवष्टब्धोऽविदूरे स्यादाक्रान्ते चावलम्बिते" (इति मेदिनी) इत्येकमवलम्बितादेः । ख्यातः प्रख्यातः कथितो वा भूषितः वस्त्राभरणैरलंकृतश्च उभौ प्रसिद्धौ स्याताम् । प्रसिद्ध्यति, प्रसिद्ध्यते स्म वा प्रपूर्वकात्सिध्यतेः सिध्यतेर्वा कर्त्तरि, कर्मणि वा क्ते, धत्वे, दत्वे च प्रसिद्धः स्यादित्येकं ख्यातालंकृतयोः ॥ १११ ॥ इति धान्ताः ॥

अथ नान्ता व्याख्यायन्ते ॥

सूर्य, अग्नि, किरण या सू(र्य), काम, मूर्ख, ब्रह्मा, पशु, मूढ, नीच जाति.

* पु. पु. (सूर्यवह्नी) चित्रभानू भानू (रश्मिदिवाकरौ) ।
पु. पु. भूतात्मानौ (धातृदेहौ)(मूर्खनीचौ) पृथग्जनौ ॥ ११२ ॥

* चित्रभानुः पुमान् वैश्वानरे चाहस्करेऽपि च" (इति कोशान्तरम्) ॥

सूरिति—सूर्यो दिवाकरः वह्निरग्निश्च उभौ चित्रभानू चित्रभानुपदवाच्यौ स्याताम् । चित्रा भानवो रश्मयोऽस्येति चित्रभानुः द्वित्वे चित्रभानू स्यातामित्येकं सूर्यादेः । रश्मिः किरणः हयरश्मिर्वा दिवाकरः सूर्यश्च उभौ भानू भानुपदवाच्यौ स्याताम् । भातीति विग्रहे 'भा दीप्तौ' अस्मादादादिकात्कर्त्तरि "दाभाभ्यां नुः" इति नौ भानुः द्वित्वे भानू "भानुरंशौ रवौ दिने" (इति कोपान्तरम्) इत्येकं किरणादीनाम् । धाता ब्रह्मा विष्णुर्वा देहः कायः उभौ भूतात्मानौ स्याताम् । भूतानामात्मा, भूतानि आत्मा स्वभावो यस्येति वा भूतात्मा द्वित्वे भूतात्मानौ स्यातामित्येकं धात्रादेः । मूर्खो मूढः नीचो हीनजातिः उभौ पृथग्जनौ स्याताम् । पृथक् कार्यो जनः शाकपार्थिवादित्वान्मध्यमपदलोपे पृथग्जनः द्वित्वे पृथग्जनौ स्यातामित्येकं मूढादेः ॥ ११२ ॥

पु. पु.

पर्वत, पत्थर, बाण, पक्षी, वृक्ष, पहाड़, आगी, मोर.

ग्रावाणौ (शैलपाषाणौ) पत्रिणौ (शरपक्षिणौ) ।

पु. पु.

(तरुशैलौ) शिखरिणौ शिखिनौ (वह्निबर्हिणौ) ॥११३॥

ग्रेति—शैलः पर्वतः, पाषाणः प्रस्तरः उभौ ग्रावाणौ स्याताम् । ग्रसत इति 'ग्रसु अदने' अस्माद्भौवादिकाड्डे, ग्रः, आवनति आङ्पूर्वकाद्वनतेर्विचि, आवाग्रश्चासावावा चेति ग्रावा द्वित्वे ग्रावाणौ "ग्रावा प्रस्तरे जलदे गिरौ" (इति विश्वः) इत्येकं शैलादीनाम् । शरो वाणो जलं वा पक्षी खगः उभौ पत्रिणौ स्याताम् । पत्राणि सन्त्यस्य "अत इति" इनौ दीर्घे च पत्री, द्वित्वे पत्रिणौ "पत्री श्येने रथे काण्डे खगद्रुरथिकाद्रिषु" (इति विश्वः) इत्येकं वाणादीनाम् । तरुर्वृक्षः, शैलः पर्वतः उभौ शिखरिणौ स्याताम् । शिखरमस्ति ययोरिति इनौ, शिखरिणौ "शिखरी स्यादपामार्गे शैलपादपयोः पुमान्" (इति कोषान्तरम्) इत्येकं वृक्षादीनाम् । वह्निरग्निः बर्ही मयूरः उभौ शिखिनौ स्याताम् । शिखाः सन्त्यस्येति "द्वन्द्वोपतापेति" व्रीह्यादित्वाद्वा इनौ "यस्येति" आलोपे च शिखी द्वित्वे शिखिनौ "शिखी वह्नौ बलीवर्दे शरे केतुग्रहे द्रुमे । मयूरे कुक्कुटे पुंसि शिखावत्यन्यलिङ्गकः" (इति मेदिनी) इत्येकमग्न्यादीनाम् ॥ ११३ ॥

पु.

वाञ्छा, अनुकूल, सारथी, सवार, घोड़ा, बाण, पखेरू.

प्रतियत्नौ (उभौ लिप्सोपग्रहावथ) सादिनौ ।

(द्वौ सारथिहयारोहौ) वाजिनो (ऽश्वेषुपक्षिणः) ॥११४॥

प्रेति—लिप्सा वाञ्छा, उपग्रहो वन्दीग्रहणादिः उभौ प्रतियत्नौ स्याताम् । प्रतियतनम्, प्रतियत्यते वा प्रतिपूर्वकात् 'यती प्रतियत्ने' अस्माद्भौवादिकात् 'यत निकारादौ' चौरादिकाद्वा "यजयाचेति" नङि प्रतियत्नः द्वित्वे प्रतियत्नौ "प्रतियत्नश्च संस्कारलिप्सोपग्रहणेषु च" (इति मेदिनी) इत्येकं लिप्सादीनाम् ।

अथेति सारथिः सूतः, हयारोहः अश्वारोहश्चेमौ द्वौ सादिनौ स्याताम् । अवश्यं सीदति, सादयति वा 'पद्लृ विशरणादौ' अस्माद्धौवादिकाण्णयन्ताद्वा "आवश्यकेति" ग्रह्यादित्वाद्वा णिनौ वृद्धौ च सादी द्वित्वे सादिनौ "सादी तुरङ्गमातङ्गरथारोहेषु दृश्यते" (इति मेदिनी) इत्येकं सारथ्यादीनाम् । अश्वो घोटकः इषुर्बाणः, पक्षी विहंगश्च एते वाजिनो वाजिपदवाच्याः स्युः वाजाः पक्षाः सन्त्यस्य "अत इति" इनौ, अलोपे च वाजी, द्वित्वे वाजिनौ, बहुत्वे वाजिनः "वाजी बाणाश्वपक्षिषु" (इति मेदिनी) इत्येकमश्वादीनाम् ॥ ११४ ॥

कुल, जन्मभूमि, बरस, किरण, तिन्नी पसाई या साठी, चन्द्रमा, आगी, सूर्य.

पु. पु.
(कुलेऽप्य)भिजनो (जन्मभूम्यामप्यथ) हायनाः ।
पु.
(वर्षार्चिर्व्रीहिभेदाश्च) (चन्द्राग्न्यर्का) विरोचनाः ११५॥

कीति—कुले मुख्यवंशे, जन्मभूम्यां जन्मस्थाने अपिशब्दात् ख्यातादौ च अभिजनः स्यात् । अभिजायतेऽस्मिन् अभिपूर्वकाज्जनेराधारे "हलश्च" इति घञि "जनिवध्योश्चेति" वृद्ध्यभावे च अभिजनः "अभिजनः कुले ख्यातौ जन्मभूम्यां कुलध्वजे" (इति विश्वः) इत्येकं कुलादीनाम् । अथेत्यनन्तरम् वर्षोऽब्दम्, अर्चिर्ज्वा रश्मिर्वा, व्रीहिभेदो मुकुटमते नीवारादिः स्वामिमते तु षष्टिकश्च एते हायनाः हायनवाच्याः स्युः जहाति, जिहीते वा 'ओहाक् त्यागे, ओहाङ् गतौ' वा अस्माज्जुहोत्यादिकात् "हश्च व्रीहिकालयोरिति" ण्युटि, णित्त्वाद् युगागमे अनादेशे हायनः "हायनो न स्त्रियां वर्षे पुंस्यर्चिर्व्रीहिभेदयोः" (इति मेदिनी) इत्येकं वर्षादीनाम् । चन्द्रो निशाकरः, अग्निर्वैश्वानरः अर्को दिवाकरश्च एते विरोचनाः विरोचनपदवाच्याः स्युः विरोचते विपूर्वकाद्रुचेः कर्त्तरि "अनुदात्तेतश्च हलादेरिति" युचि, गुणे, अनादेशे च विरोचनः, द्वित्वे विरोचनौ, बहुत्वे विरोचनाः "विरोचः प्रह्लादस्य तनयेऽर्केऽग्निचन्द्रयोः" (इति मेदिनी) इत्येकं चन्द्रादीनाम् ॥ ११५ ॥

बाल, वरुण, वासुदेव, सूर्य, देवताओं का कारीगर, उपाय, धृति, बुद्धि, स्वभाव, ब्रह्म, शरीर.

पु. पु.
(केशेऽपि) वृजिनो विश्वकर्मा(र्कसुरशिल्पिनोः) ।
आत्मा (यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च)॥ ११६

कयिति—केशे कचे वरुणे, वासुदेवे वा अपिशब्दात्कल्मषादौ वृजिनः स्यात् वृज्यते 'वृजी वर्जने' अस्मादादादिकात्कर्मणि "वृजेः किच्चेति" इनचि कित्त्वाद्गुणाभावे च वृजिन. "वृजिनं कल्मषे क्लीबं केशे ना कुटिले त्रिषु" (इति रभसः) इत्येकं चिकुरादीनाम् । अर्कः सूर्यः, सुरशिल्पी देवशिल्पी अनयोर्विश्वकर्मा स्यात्

विश्वं कर्म अस्मादस्येति वा विश्वकर्मा "विश्वकर्मा सहस्रांशौ मुनिभिद्देवशिल्पिनोः" (इति मेदिनी) इत्येकं सूर्यादीनाम्। यत्नः परिश्रमः, उद्योगो वा धृतिस्तुष्टिर्धारणं सुखं वा बुद्धिर्ज्ञानम्, सांख्योक्तसुखदुःखाद्यष्टविधधर्मवत्प्रकृतिपरिणामभेदो वा स्वभावः स्वकीयधर्मो निजगुणो वा ब्रह्म परमात्मा "यस्मात्प्रजाः प्रजायन्ते तद्ब्रह्मेति विदुर्बुधाः" (इति श्रुतेः) वर्ष्म देहश्च आत्मा स्यात्। अतति सततं व्याप्नोति 'अत सातत्यगमने' अस्माद्भ्वादिकात् "सातिभ्यामनिन्मनिणाविति" मनिणि, णित्त्वाद्वृद्धौ, परत्वादुपधादीर्घे, सुलोपे, नलोपे च आत्मा "आत्मा कलेवरे यत्ने स्वभावे परमात्मनि। चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च" (इति धरणिः) इत्येकं यत्नादीनाम्॥ ११६॥

पु.

इन्द्र, हिंसक, मतवाला हाथी, वर्षा करनेवाला मेघ, धनादिका गर्व, स्नेह, मारडालना.

(शक्रो घातुकमत्तेभो वर्षुकाब्दो) घनाघनः।

पु.

अभिमानो (ऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः)॥११७॥

शेति—शक्रः इन्द्रः, घातुकमत्तेभः घातुकश्चासौ मत्तेभश्चेति कर्मधारये हिंसकमत्तहस्ती क्रूरप्रमत्तकरी वा वर्षुकाब्दः वर्षणशीलो वारिदश्च घनाघनः स्यात्। केचित्तु "शक्रघातुकमत्तेभवर्षुकाब्दा घनाघनाः" इति बहुवचनान्तं पठन्ति तन्मते शक्रः दिवस्पतिः, घातुकः हिंसकः, मत्तेभो मत्तवारणः, वर्षुकाब्दः वर्षाकारी मेघः संवत्सरो वा एते घनाघनाः स्युः। हन्तीति विग्रहे "हन्तेर्घत्वं चेति" पचाद्यचि, द्वित्वे, अभ्यासस्यागमे, कुत्वे च घनाघनः "अन्योन्यघट्टने चैव घातुके च घनाघनः" (इति धरणिः) इत्येकमिन्द्रादीनाम्। अर्थादिदर्पे अर्थो धनं वस्तु वा आदिना कुलपशुगुणादिग्रहस्तेषां दर्पे गर्वे, अज्ञाने विवेकरहिते अविद्यायां वा ज्ञाने विवेके विद्यायां वा प्रणयहिंसयोः प्रणयः स्नेहः हिंसा प्राणवियोगानुकूलव्यापारश्च अनयोरभिमानः स्यात्। अभिमननम् अभिपूर्वाद्दिवादिकान्मनेर्भावे घञि वृद्धौ च अभितः सर्वतो मानो वेत्यभिमानः स्यादित्येकं वित्तादिगर्वादीनाम्॥ ११७॥

पु स.न.

बादल, कठिनता, कठोर, सघन, सूर्य, स्वामी, चन्द्रमा, रजपूत, राजा.

घनो (मेघे मूर्त्तिगुणे त्रिषु मूर्त्ते निरन्तरे)।

पु. पु.

इनः (सूर्ये प्रभौ) राजा (मृगाङ्के क्षत्रिये नृपे)॥ ११८॥

घेति—मेघे वारिदे, मूर्त्तिगुणे काठिन्ये, मूर्त्ते कठिने, कठोरे वा निरन्तरे सान्द्रे, सघने, निविडे वा घनस्त्रिषु त्रिलिङ्गयां स्यात्। हननम्, हन्यते वा हन्तेर्भावकर्मणोः "मूर्तौ घनः" इत्यपि, घनादेशे च घनः "घनं सान्द्रं घनं वाद्यं घनो मुस्तो घनोऽम्बुदः। घनः काठिन्यसंघातो विस्तारो लोहमुद्गरः" (इति धरणिः) इत्येकं मेघा-

प्रतीवापो दुग्धादौ दध्यादिभावार्थं तक्रादिप्रक्षेपः, निक्षेपो वा जवनं वेगः आप्यायनं तर्पणाम् तान्येव अर्थो यस्येति आतञ्चनं स्यात् । आतञ्चितम् आङ्पूर्वकात्तञ्चेर्भावादौ ल्युटि, अनादेशे च 'आतञ्चनम्' स्यादित्येकं प्रतीवापादेः ॥ १२२ ॥

चिह्न, दाढी, मूछ, गीलाकरना, अङ्गभेद, लोकापवाद, पश्वादिकों का युद्ध.

न. व्यञ्जनं (लाञ्छने श्मश्रुनिष्ठानावयवेष्वपि)।
न. (स्या)त्कौलीनं(लोकवादे युद्धे पश्वहिपक्षिणाम्)॥१२३॥

व्येति—लाञ्छने चिह्ने, श्मश्रुणि लोमवृद्धौ पुंमुखे, निष्ठाने तेमने अवयवे स्त्रीपुरुषयोरङ्गभेदेऽपि व्यञ्जनं स्यात् । व्यक्तम्, व्यज्यते अनेनेति वा विपूर्वकादञ्जेर्भावादौ ल्युटि अनादेशे च व्यञ्जनम् "व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽपि च" (इति मेदिनी) इत्येकं लाञ्छनादेः । लोकवादे लोकापवादे, पश्वहिपक्षिणां पशुः मृगादिः अहिः सर्पो वृत्रासुरो वा पक्षी खगः एषां युद्धे संग्रामे च कौलीनं स्यात् । कुलीनस्य कर्म भावो वा "युवादयणि" वृद्धौ च कौलीनम् "कौलीनं पशुभिर्युद्धे कुलीनत्वापवादयोः" (इति धरणिः) इत्येकं कौलीनादेः ॥ १२३ ॥

निकलना, वनभेद, प्रयोजन, सावकाश, टिकना, खेलना आदि.

न. (स्या) दुद्यानं (निःसरणे वनभेदे प्रयोजने)।
न. न. (अवकाशे स्थितौ)स्थानं(क्रीडादावपि)देवनम्॥१२४॥

स्यादिति—निःसरणे गेहादिभ्यो निःसृतौ, वनभेदे राज्ञः साधारणे वने उपवने वा प्रयोजने अर्थे, कार्ये, कारणे वा उद्यानं स्यात् । उद्यात्यनेन, अस्मिन्निति वा उत्पूर्वकात् 'या प्रापणे' अस्मादादादिकात् "करणाधिकरणयोश्चेति" ल्युटि अनादेशे च उद्यानम् "उद्यानं वनभेदे स्यान्निःसृतौ च प्रयोजने" (इति धरणिः) इत्येकं निःसरणादीनाम् । अवकाशे अवसरे सावकाशे वा स्थितौ गतिनिवृत्तौ, गृहे स्थानं स्यात् । स्थितम्, स्थीयतेऽत्रेति वा तिष्ठतेर्भावाधिकरणयोर्ल्युटि अनादेशे च स्थानम् "स्थानं सादृश्येऽवकाशे स्थितौ वृद्धिक्षयेतरे" (इति मेदिनी) इत्येकमवकाशादेः । क्रीडा खेला, लीला च आदिना विजिगीषादिग्रहः अपिशब्दाद् व्यवहारे च देवनं स्यात् । द्यूतम्, दीव्यतेऽनेनेति वा 'दिवु क्रीडादौ' अस्माद्भावकरणयोर्ल्युटि, गुणे, अनादेशे च देवनम् "देवनं व्यवहारे स्याज्जिगीषाक्रीडयोरपि । अक्षे देवनः प्रोक्तः" (इति विश्वः) इत्येकं क्रीडादीनाम् ॥ १२४ ॥

पौरुष, तन्त्र, बैठे हुए का उठना, तिरस्कार, विरोधाचरण.

न. उत्थानं (पौरुषे तन्त्रे सन्निविष्टोद्गमेऽपि च)।
न. व्युत्थानं(प्रतिरोधे च विरोधाचरणेऽपि च) ॥ १२५ ॥

उदिति–पौरुषे=उद्योगे, प्रशंसने, पराक्रमादौ वा, तन्त्रे=कुटुम्बकृत्ये, सिद्धान्ते, औषधोत्तमे, प्रधाने, तन्तुवाने, शास्त्रभेदे, परिच्छदे, श्रुतिशाखान्तरे, हेतौ, उभयार्थप्रयोजके वा, सन्निविष्टस्य उद्गमे अपिशब्दात्पुस्तकरणाहर्षेषु चशब्दान्मलवेगेऽपि उत्थानं स्यात् । उत्थितम्, उत्थीयतेऽनेनेति वा उत्पूर्वकात्तिष्ठतेर्भावादौ ल्युटि अनादेशे सस्य थे, थलोपे, उदो दस्य चर्त्वेन तत्वे च उत्थानम् " उत्थानमुद्यमे तन्त्रे पौरुषे पुस्तके रणे । प्राङ्गणोद्गमहर्षेषु मलवेगेऽपि न द्वयोः " (इति मेदिनी) इत्येकं पौरुषादीनाम् । प्रतिरोधे तिरस्कारे, बाधे, प्रतिबन्धे, निरोधे वा विरोधाचरणे चौर्यादिविरुद्धाचरणे अपिशब्दात्स्वतन्त्राचरणे च व्युत्थानं स्यात् । विरुद्धमुत्थानम् " प्रादयो गतेति " समासे व्युत्थानम् " स्वतन्त्रता च व्युत्थानम् " (इति त्रिकाण्डशेषः) इत्येकं प्रतिरोधादीनाम् ॥ १२५ ॥

प्रेतक्रिया, गमन, धनका उपजाना, निर्वर्तन, उपकरण, अनुगमन.

(मारणे मृतसंस्कारे गतौ द्रव्योपपादने ।
न.
निवर्तनोपकरणानुव्रज्यासु च) साधनम् ॥ १२६ ॥

मेति–मारणे निर्वापणे, वधे वा मृतस्य परेतस्य संस्कारे दाहादिकर्मणि, गतौ गमने, द्रव्योपपादने धनोपपादने 'द्रव्येऽर्थदापने' इति पाठे तु द्रव्ये धातुमात्रे पृथिव्यादिपञ्चभूतके वा, अर्थस्य धनादिकस्य दापने, निर्वर्तने अर्थसिद्धौ उपकरणे साधनसामग्र्याम्, परिकरे, उपाये, व्यञ्जनादौ वा अनुव्रज्यायामनुगमने च शब्दात्सैन्ये, सिद्धौषधे, मेढ्रे च साधनं स्यात् । साद्धम्, साध्यते, अनेनेति वा साध्नोतेर्भावकर्मकरणादौ ल्युटि, अनादेशे च साधनम् " साधनं मृतसंस्कारे सैन्ये सिद्धौषधौ गतौ । निर्वर्तनोपायमेढ्रदापनेऽनुगमे धने" (इति मेदिनी) इत्येकं मारणादीनाम्॥१२६॥

वैरका मिटाना, दान देना, धरोहरका फेरना, विपदा, नीचे गिरना, कामज और कोपज दोष.

न.
निर्यातनं (वैरशुद्धौ दाने न्यासार्पणेऽपि च) ।
न.
व्यसनं (विपदि भ्रंशे दोषे कामजकोपजे) ॥ १२७ ॥

निरिति–वैरशुद्धौ वैरस्य प्रतीकारे दाने गोधनादिप्रदाने न्यासार्पणे उपनिधिप्रतिदानेऽपि च निर्यातनं स्यात् । निर्यातितम्, निर्यात्यते, अनेनेति वा निर्पूर्वकाद् 'यत निकारादौ' अस्माच्चौरादिकात्स्वार्थणयन्ताद्भावादौ ल्युटि, अनादेशे, णिलोपे च 'निर्यातनं' स्यादित्येकं वैरप्रतीकारादीनाम् । विपदि विपत्तौ, भ्रंशे विनाशने अधःपतने वा कामजकोपजे दोषे कामजे दोषे मृगयाक्षपानादौ, कोपजे वाक्पारुष्यदण्डपारुष्यार्थदूषणादौ च व्यसनं स्यात् । व्यस्तम्, व्यस्यते, अनेनेति वा विपूर्वकाद् 'असु क्षेपणे' अस्माद्दैवादिकाद्भावादौ ल्युटि, अनादेशे च व्यसनम् " व्यसनं त्वशुभे

छिपाना, ढापन, साधन, लाभ, सन्तोष.

न.
आच्छादने (संपिधानमपवारणमित्युभे)।
न.
आराधनं (साधने स्यादवाप्तौ तोषणेऽपि च) ॥ १३२ ॥

आचिति—संपिधानं तिरोधानम्, अपवारणं वस्त्रादिभिः परिवारणं वस्त्रं वा उभे आच्छादने स्याताम् । आच्छादितम्, आच्छाद्यतेऽनेन वा आङ्पूर्वकात् 'छद अपवारणे' अस्माच्चौरादिकाद्भावसाधनयोर्ल्युटि, अनादेशे च आच्छादनम् द्वित्वे आच्छादने "आच्छादनं संपिधाने वस्त्रेऽपवृत्तिमात्रके" (इति धरणिः) इत्येकमपवारणादेः । साधने निर्वर्तने, उपकरणे अनुगमने वा अवाप्तौ लाभे, संप्राप्तौ वा तोषणे संतोषेऽपि च आराधनं स्यात् । आराध्यतेऽनेन आङ्पूर्वकाद्राध्नोतेः करणे ल्युटि अनादेशे च आराधनं स्यादित्येकं साधनादेः ॥ १३२ ॥

पहिया, नगर, प्रताप, चढ़ाई या परमासन, प्रधान, मणि, जल, जगल.

न.
अधिष्ठानं (चक्रपुरप्रभावाध्यासनेष्वपि)।
न. न.
रत्नं (स्वजातिश्रेष्ठेऽपि) वने (सलिलकानने) ॥ १३३ ॥

अधीति—चक्रं रथाङ्गम्, पुरं नगरम्, प्रभावः प्रतापः, अध्यासनमाक्रमणम्, अपिशब्दात्परमासनं च एषु अधिष्ठानं स्यात् । अधिष्ठितम्, अधिष्ठीयते, अनेन वा अधिपूर्वकात्तिष्ठतेर्भावादौ ल्युटि, अनादेशे "उपसर्गात्सुनोतीति" सस्य षत्वे च अधिष्ठान "अधिष्ठानं रथस्याङ्गे प्रभावेऽध्यासने पुरे" इत्येकं चक्रादीनाम् । स्वजातिश्रेष्ठे आत्मजातिप्रधाने, स्वकीयज्ञात्युत्तमे वा अपिशब्दान्मणौ च रत्नं स्यात् । रमयति, रमतेऽस्मिन्निति वा अन्तर्भावितण्यर्थाद्रमेः कर्तरि, अण्यन्तादाधारे वा "रमेस्तच" इ‍ने, "नेड्वशीनि" इडभावे, णिलोपे, मस्य तत्वे च रत्नम् "रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्" (इति मेदिनी) इत्येकं स्वजातिप्रधानादीनाम् । सलिलं जलम्, कानन विपिनम् उभे वने वनपदवाच्ये स्याताम् । वनति, वनुते वा भौवादिकात्तानादिकाद्वा वनेः कर्तरि पचाद्यचि वन्यते इति विग्रहे तु कर्मणि "अकर्तरीति" घञि, संज्ञापूर्वकत्वाद्वृद्ध्यभावे च वनम् द्वित्वे वने "क्लीबं स्यात्कानने नीरे निवासे निलये वनम्" (इति रभसः) इत्येकं जलादीनाम् ॥ १३३ ॥

विरला, थोड़ा, पण्डित, बरा-मर, मुखिया, सूर, सूचक या चुगल.

न.
तलिनं (विरले स्तोके) (वाच्यलिङ्गास्तथोत्तरे)।
पु.स.न. पु.स.न.
समानाः (सत्समैकेस्युः) पिशुनौ (खलसूचकौ) ॥ १३

तेति—विरले अन्तरगमने, स्तोके अल्पे, "शय्यायाम्, विरले, तुच्छे, स्वच्छे'

तलिनं स्यात् । तलति, तल्यते वा 'तल प्रतिष्ठायाम्' अस्माद्भौवादिकात्कर्तरि, कर्मणि वा "तलिपुलिभ्यां चेति" इननि तलिनम् "तलिनं विरले स्तोके स्वच्छेऽपि वाच्य-लिङ्गकम्" (इति मेदिनी) इत्येकं विरलादीनाम् । तथा तलिनवन् उत्तरे आनान्ता-द्वक्ष्यमाणाश्शब्दा वाच्यलिङ्गास्त्रिलिङ्गाः स्युः । सन् सुधीः, समः सदृशः, एको मुख्यो-ऽद्वितीयो वा एते समानाः स्युः । समति 'षम वैक्लव्ये' अस्माद्भौवादिकात्कर्तरि "ताच्छी-ल्यवयोवचनशक्तिष्विति" आनशि "आगमशासनमनित्यमिति" न्यायान्मुगागमाभावे च सहमानेन वर्तते, इति वा समानः द्वित्वे समानौ बहुत्वे समानाः "समानं सत्समैकेषु त्रिषु ना नाभिमारुते" (इति मेदिनी) इत्येकं सदादीनाम् । खलो दुर्जनोऽधमो वा, सूचको निन्दकः शिक्षको बोधको वा उभौ पिशुनौ स्याताम् । पिंशति 'पिश अवयवे' अस्मात्तौदादिकात्कर्तरि "क्षुधिपिशिमिथिभ्यः कित्" इत्युननि कित्त्वाद्गुणाभावे च पेशुनः द्वित्वे पिशुनौ "पिशुनं कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना सूचकक्रूरयो-स्त्रिषु" (इति मेदिनी) इत्येकं खलादीनाम् ॥ १३४ ॥

कमती या न्यून, निन्द्य, वेगवान्, बलवान्, अप-राधी, वैरिग्रस्त, विपदा में प्राप्त हुआ.

पु.स.न. पु.स.न. पु.स.न.

हीनन्यूना (वूनगर्ह्यौ) (वेगिशूरौ) तरस्विनौ ।

पु.स.न.

अभिपन्नौ (ऽपराद्धोऽभिग्रस्तव्यापद्गता अपि) ॥ १३५॥

हीति—ऊनः स्वल्पः, गर्ह्यो निन्द्यः उभौ हीनन्यूनौ स्याताम् । जहाति, हीयते वा जहातेः कर्तरि कर्मणि वा "आदिकर्मणि क्तः" इति क्ते "घुमास्तेति" ईदादेशे "ओदि-तश्चेति" निष्ठानत्वे च हीनः "हीनं गर्ह्योनयोस्त्रिषु" (इति मेदिनी) न्यूनयति निपूर्वकात् 'ऊन परिहाने' अस्माच्चौरादिकात्कर्तरि पचाद्यचि, न्यून्यते इति विग्रहे तु "अकर्तरि चेति" कर्मणि घञि न्यूनः "न्यूनं गर्ह्योनयोः" (इति मेदिनी) इति द्वे गर्ह्योनयोः । वेगी वेगवान्, शूरो वीरश्च उभौ तरस्विनौ स्याताम् । तरो बलं जवो वास्यास्ति "अस्मायेति" विनौ, "सौचेति" दीर्घे च तरस्वी द्वित्वे तरस्विनौ स्याताम् । "तरस्वी शूरवेगिनोः" (इति मेदिनी) इत्येकं वेगिशूरयोः । अपराद्धः अपराधवान्, अभिग्रस्तो वैरिपराजितः सर्वतः शत्रुसंरुद्धो वा व्यापद्गतो विपद्गतः अपिशब्दादभिद्रुतश्च अभिपन्नः स्यात् । अभिपद्यते स्म अभिपूर्वकात्पद्यतेः कर्त्तरि, कर्मणि वा क्ते "रदाभ्यामिति" निष्ठानत्वे निष्ठापेक्षया धातोर्दस्य नादेशे च अभिपन्नः "अभिपन्नोऽपराद्धेऽभिद्रुते ग्रस्ते विपद्गते" (इति विश्वः) इत्ये-कमपराधवदादीनाम् ॥ १३५ ॥

इति नान्ताः ॥

अथ पान्ता व्याख्यायन्ते ॥

भूषण, मोरपख, तरकस, समूह, परिच्छद, चारोंतरफ बीज-बोना, जलाधार.

पु.[1] **कलापो (भूषणे वर्हे तूणीरे संहतेऽपि च)।**
पु. **(परिच्छदे) परीवापः (पर्युप्तौ सलिलस्थितौ) ॥ १ ३६ ॥**

केति—भूषणे अलंकारमात्रे, वर्हे मयूरपिच्छे, तूणीरे इषुधौ, संहते समुदाये अपिशब्दात्काञ्च्याम्, चशब्दाच्चन्द्रे, विदग्धे, व्याकरणभेदेऽपि कलापः स्यात्। कलामाप्नोति कलापूर्वकाद् "आप्लृ व्याप्तौ" अस्मात्सौवादिकात् "कर्मण्यण्" इत्यणि। कला आप्यतेऽनेनेति विग्रहे तु "हलश्चेति" घञि वा कलापः "कलापः संहतौ वर्हे काञ्च्यां भूषणतूणयोः" (इत्यजयः) "चन्द्रे, विदग्धे व्याकरणभेदेऽपि कथ्यते बुधैः" (इति मेदिन्यां विशेषः) इत्येकं भूषणादीनाम्। परिच्छदे, परिवारे—पटमण्डपाद्युपकरणे वा, पर्युप्तौ परितो बीजवपने, सलिलस्थितौ जलाधारे च परीवापः स्यात्। परिवपनम्, पर्युप्यतेऽनेन, अत्रेति वा परिपूर्वकाद्वपतेर्भावकरणाधिकरणेषु घञि, वृद्धौ, "उपसर्गस्येति" दीर्घे च परीवापः स्यादित्येकं परिच्छदादीनाम् ॥ १३६ ॥

ग्वाला, गोशालाधिप, शिव, विष्णु, ऊष्मा, आंसू, अनाज, कपडा.

पु. पु. **(गोधुग्गोष्ठपती) गोपौ (हरविष्णू) वृषाकपी।**
न. पु.न. **बाष्प (मूष्मास्त्रु) कशिपु (त्वन्नमाच्छादनं द्वयम्) ॥ १ ३ ७ ॥**

गवित्ति—गोधुक् गोदोग्धा आभीरो वा गोष्ठपतिर्गोशालाधिपः उभौ गोपौ स्याताम्। गांपाति गोपूर्वकात्पातेः कर्तरि "आतोऽनुपेति" के, कित्त्वादालोपे च गोपः द्वित्वे गोपौ "गोपो ग्रामौघगोष्ठाधिकृतयोर्वल्लवे" (इति विश्वः) इत्येकं गोदुहादीनाम्। हरः शिवः, विष्णुर्नारायणः उभौ वृषाकपी स्याताम्। वृषं धर्मं न कम्पयति, वृषाद्धर्माद्दाकम्पयति दुष्टानिति वा वृषनञाङ्पूर्वकात् 'कपि किञ्चिच्चलने' अस्मात्कर्त्तरि "कुण्डिकम्प्योर्नलोपश्चेति" इप्रत्यये, नलोपे च, वर्षति कामानिति "इगुपधेति" के वृषः, आकम्पयति पापानीति पूर्ववदिप्रत्यये, वृषश्चासावाकपिश्च। वृषा इन्द्रोऽनेनास्माद्वा आकम्पते, वृषो धर्मो वृषा इन्द्रो वा कपिरिवशे यस्येति वा, वृषरक्षकः कपिर्वराहः शाकपार्थिवादित्वान्मध्यमपदलोपे वा "अन्येषामपीति" दीर्घे च। वृष्णः इन्द्रस्य अकं दुःखं पिबति, प्राप्नोति, प्रापयति दैत्यानिति वा विचि, संज्ञापूर्वकत्वाद्गुणाभावे च, क्विपि तु आगमशास्त्रस्यानित्यत्वात्तुगागमाभावे च वृषाकपिः द्वित्वे परशब्दस्येष्टवाचित्वादियङ्

[1] "द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्। कलापकं चतुर्भिः स्यात्तत ऊर्ध्वं कुलकं स्मृतम् ॥ १ ॥

वाधित्वा पूर्वसवर्णादीर्घे च वृषाकपी " वृषाकपिः पुमान्कृष्णे शंकरे जातवेदसि " (इति मेदिनी) इत्येकं शिवादीनाम् । ऊष्मा ग्रीष्मः अश्रुनयनाम्बुवाष्पं स्यात् । वाधते वाधेः कर्तरि " खष्पशिल्पेति " पे, धस्य पत्वे निपातिते च वाष्पम् " वाष्पो नेत्रजलोष्मणोः वाष्पं[1] च " (इत्युणादिः) इत्येकं नेत्रजलादेः । अन्नं भक्तम्, आच्छादनं वस्त्रमेतद्द्वयं कशिपु स्यात् । कश्ते दुःखम्, कश्यते वा कशेः कर्त्तरि, कर्मणि वा " मृगय्वादित्वात् " कौ इपुगागमे निपातिते च कशिपु, कशिपुर्वा अत्र वक्ष्यमाणमस्त्रियामिति संबध्यते तेन पुन्नपुंसकं स्यात् । " एकोक्त्या कशिपुर्भक्ताच्छादने च द्वयोः पृथक् " (इति विश्वः) इत्येकं भक्तादेः ॥ १३७ ॥

न. पु.न.
शयन या पलंग, अटारी, स्त्री, **तल्पं (शय्याट्टदारेषु)(स्तम्बेऽपि)विटपो (ऽस्त्रियाम्) ।**
गुल्म या गुच्छा, पु.स.न. पु.स.न. पु.स.न.
पण्डित, मनो- **प्राप्तरूपस्वरूपाभिरूपा (बुधमनोज्ञयोः) ॥ १३८ ॥**
हर, कछुई वीणा स.
विशेष, मृग-
रोम से उपजा **(भेद्यलिङ्गा अमी)(कूर्मी वीणाभेदश्च)कच्छपी ।**
कम्बल, दिनका पु.
आठवा भाग. **" कुतपो(मृगरोमोत्थपटे चाह्नोऽष्टमेंऽशके)" ॥ १३९ ॥**

इति पान्ताः ॥

तेति—शय्या शयनीयम् पल्यङ्को वा अट्टोऽट्टालिका दाराः स्त्रियः एषु तल्पं स्यात् । तल्यतेऽस्मिन्, ' तल प्रतिष्ठायाम् ' अस्माद्भौवादिकादाधारे " खष्पशिल्पेति " पे, तल्पम् अत्रापि वक्ष्यमाणमस्त्रियामिति संबध्यते इत्येकं शयनादीनाम् । स्तम्बे गुल्मे तृणादिगुच्छे वा अपिशब्दात्पल्लवे, पिङ्गे, विस्तारे, शाखायां च विटपः अस्त्रियां पुन्नपुंसकं स्यात् । वेटति, विट्यते वा ' विट आक्रोशे, शब्दे च ' अस्माद्भौवादिकात्कर्तरि, कर्मणि वा " विटपपिष्टपविशिपोलपाः " इति कपनि, विटपः विटपं वा " विटपः पल्लवे पिङ्गे विस्तारे स्तम्बशाखयोः " (इति विश्वः) इत्येकं स्तम्बादीनाम् । बुधः पण्डितः सौम्यो वा मनोज्ञः मनोहरो मञ्जुलो वा अनयोः प्राप्तरूपस्वरूपाभिरूपाः स्युः । प्राप्तं रूपं येनेति प्राप्तरूपः, " प्राप्तरूपोज्ञरम्ययोः " (इति मेदिनी) स्वमेवरूपं यस्येति स्वरूपः, अभिलक्ष्यं रूपमस्येति अभिरूपः " अभिरूपो बुधे रम्ये " (इति मेदिनी) अमी शब्दाः भेद्यलिङ्गा वाच्यलिङ्गा भवन्ति इति त्रीणि ज्ञरम्ययोः । कूर्मी कमठी वीणाभेदो वल्लकीभेदश्च कच्छपी स्यात् । कच्छे, कच्छं वा पिबति, कच्छेन पातीति वा " सुपीति " के, गापोष्टगिति तु न भवति पिबतेः सुराशीध्वोरिति वचनात् " गतिकारकोपपदेति " सुबुत्पत्तेः प्राक् समासे "जातेरिति" ङीपि च कच्छपी "कच्छपी वल्लकीभेदे डुलौ क्षुद्रगदान्तरे" (इति विश्व.) इत्येकं कूर्म्यादीनाम् । मृगरोमोत्थपटे मृगलोमजवस्त्रे, अह्नोऽष्टमेंऽशके पञ्चदशमुहूर्तात्मकस्य दिनस्याष्टमेभागे च कुतप. स्यात् । कुत्सितं तपति कुपूर्वकात्तपतेः कर्तरि "संज्ञाया-

[1] वायति, वाति वेति विग्रहे तु " खष्पशिल्पेति " प प्रत्ययेपुगागमे निपातिते च वाष्पमपि अतएव वर्धमानाचार्यैरपि वाष्पाकुलमिति व्याख्यातम् ॥

मिति" खचि "अनव्ययस्येत्यनुवृत्तेर्मुमागमाभावे च कुंभुवं तपति वा आगमजमनित्यमित्युक्तत्वान्मुमोऽभावे च कुतपः "कुतपोऽस्त्रियां दौहित्रे वाद्ये छागजकम्बले। कुशे दिनस्याष्टमांशे वा सूर्ये" (इति मेदिनी) इत्येकं मृगरोमोत्थपटादीनाम् ॥१३८।१३९॥

इति पान्ताः ॥

अथ फान्ता व्याख्यायन्ते ॥

रकार, निन्दित, शिखा या जटा, नदी, जटामासी, माता.

पु. (रवर्णे पुंसि) रेफः (स्यात्कुत्सिते वाच्यलिङ्गकः)।
स. शिफा (शिखायां सरिति मांसिकायां च मातरि) ॥१४०॥

रेति—रवर्णे 'र' इत्यक्षरे रेफः पुंसि स्यात्। कुत्सिते निन्दिते च वाच्यलिङ्गकः स्यात्। र इतिवर्णः इति विग्रहे "रादिफः" इति इफे, गुणे च। रिफति, रिफ्यते वा 'रिफ हिंसायाम्' अस्मात्तौदादिकात्कर्तरि पचाद्यचि कर्मणि "अकर्तरीति" घञि वा गुणे च रेफः "रेफो रवर्णे पुंसि, स्यात्कुत्सिते वाच्यवत्पुनः" (इति विश्वः) इत्येकं रवर्णादीनाम्। शिखायां चूडायाम्, सरिति नद्याम्, मांसिकायां जटामांस्याम्, मातरि धात्र्यां सौरभेय्यामाखुकर्ण्यां वा शिफा स्यात् शेते शीङः कर्तरि बाहुलकात् फकि, ह्रस्वे, टापि च शिफा "शिफा जटायां सरिति मांसिकायां च मातरि" (इति विश्वः) इत्येकं शिखादीनाम् ॥ १४० ॥

रूखों की जड, गौ आदि पशुओं का खुर, गूथना, बाहुओं का गहना.

न. शफं (मूले तरूणां स्याद्गवादीनां खुरेऽपि च)।
पु. गुम्फः (स्याद्गुम्फने बाहोरलंकारे च कीर्तितः) ॥१४१॥

इति फान्ताः ॥

शेति—तरूणां वृक्षाणां मूले, गवादीनां धेनूनां खुरेऽपि च शफं स्यात्। शं फणति शम्पूर्वकात् 'फण गतौ' अस्माद्भौवादिकात्कर्त्तरि "अन्येभ्योऽपीति डे" डित्वाट्टिलोपे, पृषोदरादित्वान्मलोपे च शफं स्यादित्येकं तरुमूलादेः। गुम्फने ग्रन्थने, बाहो भुजाया अलंकारे भूषणे च गुम्फः वर्णितः स्यात्। गुम्फनम्, गुफ्यते वा 'गुम्फ ग्रन्थे' अस्मात्तौदादिकाद्भावकर्मणोर्घञि गुम्फः स्यादित्येकं गुम्फनादौ ॥ १४१ ॥

इति फान्ताः ॥

अथ बान्ता व्याख्यायन्ते।

जन्म मरण में टिकाहुआ प्राणी, घोडा, देवगायक या गवैया, कंकण, शंख, सर्प, निन्दक.

पु (अन्तराभवसत्त्वेऽश्वे) गन्धर्वो (दिव्यगायने)।
पु.[1] कम्बु (र्ना वलये शङ्खे) पु. द्विजिह्वौ (सर्पसूचकौ) ॥१४२॥

---

1 "कम्बुः शङ्खेऽस्त्रियां पुंसि शम्बूके वलये गजे" (इति मेदिनी) ॥

अन्तरेति—अन्तराजन्ममरणयोर्मध्ये भवे सत्त्वे यातनाशरीरे, अश्वे घोटके, दिव्यगायने देवगायके विश्वावसुतुम्बुरुचित्ररथादौ, गायनमात्रे च गन्धर्वः स्यात्। गन्धं सौरभमर्वति गन्धपूर्वकाद् 'अर्व गतौ' अस्मात्कर्तरि "कर्मण्यण्" इत्यणि, सुपो लुकि, शकन्ध्वादित्वात्पररूपे च गन्धर्वः "गन्धर्वः पशुभेदे स्यात्पुंस्कोकिलतुरङ्गयोः। अन्तराभवसत्त्वे च गायनेऽपि च" (इति मेदिनी) इत्येकमन्तराभवसत्त्वादीनाम्। वलये कङ्कणे, शंखे च कम्बुः ना पुमान्स्यात्। काम्यते 'कमु कान्तौ' अस्मात्कर्मणि "मृगय्वादयश्चेति" कुप्रत्यये, वुगागमे निपातिते च कम्बुः "कम्बुर्वलयशङ्खयोः। गजे शम्बूके कर्चूरे ग्रीवायामलिकेऽपि च" (इति हैमः) इत्येकं वलयादीनाम्। सर्पो भुजंगमः, सूचको निन्दकः पिशुनश्च उभौ द्विजिह्वौ स्यातम्। द्वे जिह्वे ययोस्तावित्येकं सर्पसूचकयोः ॥ १४२ ॥

पूर्वे या पूर्वज लोग. पु.स.न. **पूर्वो(ऽन्यलिङ्गः प्रागाह) (पुम्बहुत्वेपि पूर्वजान्)।**

इति वान्ताः ॥

पूरिति—प्राग् पूर्वदिग्वाची यः पूर्वः सः अन्यलिङ्गः वाच्यलिङ्गः स्यात्। इत्याह वदत्याचार्यः। यश्च पूर्वजान् पूर्वजानां वाची स पुंबहुत्वेऽपि स्यात्। पूर्वयति 'पूर्व निकेतने' अस्माच्चौरादिकात्कर्त्तरि पचाद्यचि पूर्वः "पूर्वे तु पूर्वजेषु स्युः पूर्वः प्रागाद्ययोस्त्रिषु" (इति मेदिनी) पूर्वजेषु पूर्वे स्युः। यथा "पूर्वे स्युः पूर्वजाः पूर्वे ज्ञातयः" (इति धरणिः) प्रागाद्ययोः पूर्वः त्रिषु त्रिलिङ्ग्यां स्यात्। यथा "पूर्वो ग्रामः, प्रयागात्पूर्वा काशी, पूर्वं वनं वर्तते" पूर्वशब्दो विश्वमेदिन्योरपि स्पर्शान्तेष्वेवोपलभ्यते। हैमेतु दन्त्योष्ठ्यान्तेष्वेवेति सद्भिः सुधीभिरेवाकलनीयमित्येकं प्रागादीनाम्। इत्यादि ज्ञेयम् ॥

इति वान्ताः ॥

अथ भान्ता व्याख्यायन्ते ॥

घड़ा, हाथी का शिरोभाग, बालक, मूर्ख. पु. पु. **कुम्भौ (घटेभमूर्धांशौ) डिम्भौ (तु शिशुबालिशौ) १४३॥**

किति—घटः कलशः इभमूर्धांशोहस्तिमस्तकभागः उभौ कुम्भौ स्याताम्। कुं भूमिं कुत्सितं वा उम्भति कुपूर्वकाद् 'उम्भ पूरणे' अस्मात्तौदादिकात्कर्तरि "कर्मण्यण्" इत्यणि, सुपो लुकि, शकन्ध्वादित्वात्पररूपे च कुम्भः द्वित्वे कुम्भौ, "कुम्भः स्यात्कुम्भकर्णस्य सुते वेश्यापतौ घटे। राशिभेदे द्विपाङ्गे च कुम्भं त्रिवृति गुग्गुले" (इति विश्वः) इत्येकं घटादीनाम्। शिशुरर्भकः, बालिशो मूढोऽज्ञो वा उभौ डिम्भौ स्याताम्। डिम्भयति "डिभि संघे" अस्माच्चौरादिकात् "पचाद्यचि" नुमागमे च डिम्भः द्वित्वे डिम्भौ "डिम्भोऽपि बालिशे बाले" (इति मेदिनी) इत्येकं बालादीनाम् ॥ १४३ ॥

सूर्मी, थूनी या खभा, जडता, ब्रह्मा, शिव, उदर, स्त्रीका गर्भ, बालक, प्रणय आदि.

स्तम्भौ (स्थूणाजडीभावौ) शम्भू (ब्रह्मत्रिलोचनौ)।
(कुक्षिभ्रूणार्भका) गर्भा विस्रम्भः (प्रणयेऽपि च)१४४॥

स्तेति—स्थूणा लोहप्रतिमा, गेहस्तम्भो वा, अजडस्य जडस्यभवनं जडीभावो जडता उभौ स्तम्भौ स्याताम् । स्तभ्नाति, स्तभ्नोति वा 'स्तम्भु रोधने' अस्मात्सौत्रात्क्र्यादिकात्कर्तरि पचाद्यचि, स्तम्भनमिति विग्रहे तु भावे घञि वा स्तम्भः द्वित्वे स्तम्भौ स्यातामित्येकं स्थूणादेः । ब्रह्मा प्रजावर्धको विधाता वा त्रीणि लोचनानि यस्येति त्रिलोचनः सदाशिवः उभौ शम्भू स्याताम् । शं सुखं भवति प्रापयति शंपूर्वकाद् 'भूप्राप्तौ' अस्माच्चौरादिकादन्तर्भावितण्यर्थात्कर्तरि मितद्र्वादित्वाड्डौ डित्त्वाट्टिलोपे च शंम्भुः द्वित्वे शम्भू "शम्भुः पुंसि महादेवे परमेष्ठिनि चार्हति" (इति मेदिनी) इत्येकं ब्रह्मादीनाम् । कुक्षिरुदरम्, भ्रूणः स्त्रैणगर्भः गर्भस्थजन्तुर्वा अर्भको बालकः एते गर्भाः स्युः । गिरति, गृणाति, गीर्यते वा गिरतेर्गृणातेर्वा कर्तरि, कर्मणि वा "अर्तिगृभ्यां भन्" इति भनि, गुणे च गर्भः द्वित्वे गर्भौ बहुत्वे गर्भाः "गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके" (इति मेदिनी) इत्येकमुदरादीनाम् । प्रणये परिचये शृङ्गाररसप्रार्थने वा अपिशब्दात्केलिकलहे, विश्वासे, वधे च विस्रम्भः स्यात् । विस्रंभणम्, विस्रभ्यतेऽनेनेति वा विपूर्वकात्'स्रम्भु विश्वासे 'अस्माद्भौवादिकाद्भावसाधनयोर्घञि विस्रम्भः "विस्रम्भः केलिकलहे विश्वासे प्रणये वधे" (इति विश्वः) इत्येकं ‡ प्रणयादीनाम् ॥ १४४ ॥

भेरी, पाशा, कुसुम का फूल, कमण्डलु या करवा आदि.

(स्याद्भेर्यां) दुन्दुभिः (पुंसि स्यादक्षे) दुन्दुभिः (स्त्रियाम्)।
(स्यान्महारजनेक्लीबं) कुसुम्भं (करके पुमान्) ॥१४५॥

स्यादिति—भेर्यां 'तुरही' इति ख्यातायां बृहड्ढक्कायां वा दुन्दुभिः पुंसि पुंलिङ्गे स्यात् । अक्षे पाशके दुन्दुभिः स्त्रियां स्त्रीलिङ्गे स्यात् । 'दुन्द' इति शब्देन 'उभ' दुन्दपूर्वकाद् 'उभ पूरणे' अस्मात्तौदादिकात्कर्तरि "इगुपधात्कित्" इतीनि, कित्त्वा गुणाभावे शकन्ध्वादित्वात्पररूपे च 'दुन्द्' इति हलन्तस्यैवानुकरणे वा तदा पररूप भावे च दुन्दुभिः "दुन्दुभिः पुमान् । वरुणे दैत्यभेर्योश्च त्र्यक्षे विन्दुत्रिकद्वये" (इति मेदिनी) इत्येकं भेर्यादीनाम् । महारजने वह्निशिखे 'कुसुम्भं' क्लीवं स्यात । कमण्डलौ 'करवा' इति ख्याते वा 'कुसुम्भः' पुमान् स्यात् । कुसुम्यति, अंन्त

‡ "परिचयप्रार्थनयोः प्रणय परिकीर्तितः" (इत्यमरमाला) ॥

१—त्र्यक्षे विन्दुत्रिकद्वये यथा "दुन्दुभ्या किल तत्कृत पतितया यद्द्रौपदी हारिता" (इति स्वामिनः

'कुसुम्भक्षेपे' अस्मात्कण्ड्वादिकात्कर्तरि पचाद्यचि, "हलश्चेति" घञि वा पृषोदरादित्वात्पत्वाभावे च कुसुम्भं, कुसुम्भो वा "कुसुम्भं हेमनि महारजने ना कमण्डलौ" (इति मेदिनी) इत्येकं महारजनादीनाम् ॥ १४५ ॥

क्षत्रिय, गौ, गोष्ठी, सामाजिकयासज्जन, अध्यक्ष.

(क्षत्रियेऽपि च) नाभि (र्ना) सुरभि (र्गवि च स्त्रियाम्) ।

पु.

सभा (संसदि सभ्ये च) (त्रिष्वध्यक्षेऽपि) वल्लभः १४६॥

इति भान्ताः ॥

क्षेति—क्षत्रिये क्षात्रजातौ अपिशब्दान्मुख्यनृपतौ, चक्रमध्ये च नाभिः ना पुमान् स्यात् । चशब्दात्प्राणिप्रतीके द्वयोः कस्तूरिकामदे च स्त्रियां स्यादिति । नभ्यते 'णभ हिंसायाम्' अस्माद्भौवादिकात्कर्मणि "इणाजादिभ्यः" इत्यणि, णित्त्वाद्वृद्धौ च नाभयतीति विग्रहे तु स्वार्थण्यन्तात्कर्तरि "अ च इः" इतीप्रत्यये, णिलोपे च नाभिः "कृदिकारादिति" ङीपि च नाभी वा "नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे" (इति मेदिनी) इत्येकं क्षत्रियादीनाम् । गवि कामधेनौ चशब्दाच्छल्लकीमातृभिदोः सुरभिः स्त्रियां स्यात् । चम्पकवसन्तजातीफलेषु पुमान्, स्वर्णगन्धोत्पलेषु नपुंसकम्, सुगन्धितमनोज्ञयोस्त्रिलिङ्गयाम्, विख्यातादिष्वपि पुमान्स्यात् । सुष्ठुरभते, रभ्यते वा सुपूर्वकाद्रभेः कर्तरि कर्मणि वा "सर्वधातुभ्य इन्" इतीनि सुरभिः "सुरभिः शल्लकीमातृभित्सुरगोषु योषिति । चम्पके च वसन्ते च तथा जातीफले पुमान् । स्वर्णे गन्धोत्पले क्लीवं सुगन्धिकान्तयोस्त्रिषु" । "(विख्याते सचिवेधीरे चैत्रेऽपि पुमानयम्)" । (इति मेदिनी) इत्येकं सुरधेन्वादीनाम् । संसदि परिषदि, सभ्येसामाजिके चशब्दाद्द्यूतमन्दिरयोरपि सभा स्त्रियां स्यात् । सह भान्ति ये, यस्यां वा सहपूर्वकाद्भातेः कर्तरि, आधारे वा "सुपीति" के, "अन्येभ्योऽपीति" डेवा डित्वाट्टिलोपे टापि च सभा "स्त्रियां सामाजिके गोष्ठ्यां द्यूतमन्दिरयोः सभा" (इति रभसः) इत्येकं गोष्ठ्यादीनाम् । अध्यक्षे मुख्याधिकारिणि, अपिशब्दाद्दयिते, सल्लक्षणाश्वे च वल्लभः त्रिषु त्रिलिङ्ग्यां स्यात् । वल्लते, वल्ल्यते वा वल्लेः कर्तरि कर्मणि वा "रासिवल्लिभ्यां चेति" अभचि वल्लभः "वल्लभो दयितेऽध्यक्षे सल्लक्षणातुरंगमे" (इति मेदिनी) इत्येकमध्यक्षादीनाम् ॥ १४६ ॥

इति भान्ताः ॥

अथ मान्ता व्याख्यायन्ते ।

किरण, पगहा, वानर, मेंडक, चाहना, कामदेव, शूरता, उद्योग.

पु. पु.

(किरणप्रग्रहौ) रश्मी (कपिभेकौ) प्लवंगमौ ।

पु. पु.

(इच्छामनोभवौ) कामौ (शौर्योद्योगौ) पराक्रमौ॥१४७॥

कीर्ति—किरणो मयूखः, प्रग्रहो हयादिबन्धनरज्जुः उभौ रश्मी स्यातामू । अश्नुते अश्यतेऽनेनेति वा अश्नोतेः कर्तृसाधनयो. "अश्नोतें रश् च" इति मिप्रत्यं धातोरशादेशे च रश्मिः द्वित्वे रश्मी, "रश्मिः पुमान् दीधितौ स्यात्पक्ष्मप्रग्रहयोरपि" (इति मेदिनी) इत्येकं किरणादीनाम् । कपिर्वानरः रक्तचन्दनम्, वराहः कपिलवर्ण वा भेको मेघो मण्डूको वा एतौ सूवंगमौ स्याताम् । सूवेन गच्छति सूवपूर्वकाद्गमे कर्तरि "गमश्चेति" खचि, "खचडिद्वेति" डित्त्वाभावे मुमागमे च सूवंगम "सूवंगमश्च मण्डूके तथा शाखामृगेऽपि च" (इति मेदिनी) इत्येकं वानरादीनाम् इच्छा आकाङ्क्षा अभिलाषो वा मनोभवो मदनः उभौ कामौ स्याताम् । कमनम् कम्यते वा कमेर्भावे, कर्मणि वा घञि, वृद्धौ च कामः द्वित्वे कामौ "कामः स्मरेच्छयो पुमान् । रेतस्यपि निकामे च काम्येऽपि स्यान्नपुंसकम्" (इति मेदिनी) इत्येकमिच्छा दीनाम् । शौर्य शूरता, उद्योग उपायः शक्त्युद्योगाविति पाठान्तरम् शक्तिः सामर्थ्यं अस्त्रविशेषो वा उद्यमः उत्साहः उभौ पराक्रमौ स्याताम् । पराक्रमणम्, पराक्रम्यतेऽनेनेति वा परापूर्वकात्क्रमेर्भावसाधनयोर्घञि "नोदात्तोपदेशस्येति" वृद्ध्यभावे च पराक्रमः द्वित्वे पराक्रमौ "पराक्रमः स्यात्सामर्थ्ये विक्रमोद्यमयोरपि" (इति मेदिनी इत्येकं शौर्यादीनाम् ॥ १४७ ॥

पुण्य, सयम, न्याय, स्वभाव, आचार, सोमपायी, उपाय पूर्वक आरम्भ, घूस या धर्मादिको से मन्त्रियों की परीक्षा.

पु.न. **धर्माः (पुण्ययमन्यायस्वभावाचारसोमपाः) ।**

पु. **(उपायपूर्वा आरम्भ उपधा चाप्यु) पक्रमः ॥ १४८ ॥**

धेति—पुण्यं सुकृतम्, यमः संयमो यमो वा, न्यायः कल्पः, स्वभावो निसर्गः आचारः मन्वादिमहर्षिप्रणीतशास्त्रोक्तव्यवहारः, सोमपाः सोमपायी एते धर्माः स्युः । धरति ध्रियते वा धरतेः कर्तृकर्मणोः "अर्तिस्तुसु" इति मनि, गुणे च धर्मः "धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ । अहिंसोपनिपन्न्याये ना धनुर्यमसोमपे" (इति मेदिनी) इत्येकं पुण्यादीनाम् । उपायः पूर्वोयस्येति आरम्भः, उपधा उत्कोचः अपिशब्दाच्चिकित्सा, विक्रमश्च उपक्रमः स्यात् । उपक्रमणम्, उपक्रम्यतेऽनेनेति वा उपपूर्वकात्क्रमेर्भावसाधनयोर्घञि, वृद्ध्यभावे च उपक्रमः "उपक्रमः स्यादुपधाचिकित्सारम्भविक्रमे" (इति विश्वः) इत्येकमारम्भादीनाम् ॥ १४८ ॥

वाणिज्य, नगर, वेद, नागर, वणिक, बल-दे, राम, सुन्दर, सफेद.

पु. **(वणिक्पथः पुरं वेदो) निगमा (नागरो वणिक्) ।**

पु. पु. **नैगमौ (द्वौ) (वले) रामो (नीलचारुसिते त्रिषु) ॥ १४९ ॥**

वेति—वणिक्पथो वाणिज्यम्, पुरं नगरम्, वेदः आम्नायः एते निगमाः स्युः । निगम्यते, अनेनेति वा "गोचरसंचरेति" घान्ते निपातिते निगम. त्रित्वे निगमौ वहुत्वे निगमाः "निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे" (इति विश्वः) इत्येकं वाणिज्यादीनाम् । नागरो नगरवासी, वणिग्वैश्यश्चेमौ द्वौ नैगमौ स्याताम् । द्वाविति प्राच्यस्य नैगमत्वे निषेधः (इति स्वामी) द्वावित्युक्तेरुपनिषद्वाणिग्योर्नायमित्येके इति पीयूषव्याख्यातोऽवसेयम् । निगमे भवः "तत्रभवः" इत्यणि वृद्धौ च नैगमः "नैगमः स्यादुपनिषद्वणिजोर्नागरेऽपि च" (इति विश्वः) इत्येकं नागरादीनाम् । बले बलदेवे रामः पुमान्स्यात् । नीले कृष्णे, चारौ सुन्दरे रमणीये वा सिते धवले च त्रिषु त्रिलिङ्गयां स्यात् । रमते, अनेनेति वा रमेः कर्तरि, करणे वा "ज्वलितिकेति" णे, "हलश्चेति" घञि वा वृद्धौ च रामः "रामः पशुविशेषे स्याज्जामदग्न्ये हलायुधे । राघवे ऽसितश्वेतमनोज्ञेषु च वाच्यवत्" (इति विश्वः) इत्येकं बलादीनाम् ॥ १४९ ॥

समूह, चढाई, संग्राम, यत्न, समुदाय, टेढा, आलसी.

पु. पु.
(शब्दादिपूर्वो वृन्देऽपि) ग्रामः (क्रान्तौ च) विक्रमः ।
पु. पु.
स्तोमः (स्तोत्रेऽध्वरे वृन्दे) जिह्मस्तु (कुटिलेऽलसे) १५० ॥

शेति—शब्दादिः पूर्वो यस्येति ग्रामः वृन्दे समुदाये अपिशब्दात्स्वरे संवसथे च स्यात् । ग्रसते, ग्रस्यते वा ग्रसेः कर्तरि, कर्मणि वा "ग्रसेराचेति" मे, सस्यात्वे च ग्रामः "ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वकः" (इति विश्वः) इत्येकं वृन्दादीनाम् । क्रान्तौ क्रान्तिमात्रे चशब्दाच्छक्तिसंपत्तावपि विक्रमः स्यात् । विक्रमणम्, विक्रम्यतेऽनेनेति वा विपूर्वकात्क्रमेर्भावसाधनयोर्घञि, वृद्ध्यभावे च विक्रमः "विक्रमः शक्तिसंपत्तिः क्रान्तिमात्रं च विक्रमः" (इति धरणिः) इत्येकं क्रान्त्यादीनाम् । स्तोत्रे स्तवे, अध्वरे यागे, वृन्दे समूहे च स्तोमः स्यात् । स्तूयते, अनेनेति वा स्तौतेः कार्यसाधनयोः "अर्तिस्तुसु" इति मनि गुणे च स्तोमः "स्तोमः स्तोत्रेऽध्वरे वृन्दे मस्तके लोहदण्डके" (इति कोपान्तरम्) इत्येकं स्तवादीनाम् । कुटिले कुञ्चिते वक्रे वा अलसे मन्दे च जिह्मः स्यात् । जहाति, हीयते वा जहातेः कर्तरि, कर्मणि वा "जहातेः सन्वदालोपश्चेति" मनि, सन्वद्भावे, आलोपे च जिह्मः "जिह्मस्तु कुटिले मन्दे जिह्मं तगरपादपे" (इति हैमः) इत्येकं कुटिलादीनाम् ॥ १५० ॥

ग्रीष्म, घाम आदि, हाव, भ्रान्ति, सीहा, गुच्छा, फ़ौज, बहिन, भौजाई, देवरानी, जेठानी आदि, पृथ्वी, सहनशीलता, योग्य, समर्थ, हितैषी.

पु. पु.
"(उष्णोऽपि) घर्म (श्चेष्टालंकारे भ्रान्तौ च) विभ्रमः ।"
पु. स.
गुल्मा (रुक्स्तम्बसेनाश्च) जामिः (स्वसृकुलस्त्रियोः) ।
स. न.
(क्षितिक्षान्त्योः) क्षमा (युक्ते) क्षमं (शक्ते हिते त्रिषु) १५१

त्रिति–उष्णो उष्णागमे अपिशब्दात्स्वेदादौच घर्मः स्यात् । घरति, जिघर्त्यङ्गमनेनेति वा घरतेर्जिघर्त्तेर्वा करणे मकि, गुणे च निपातिते घर्मः "घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्बुनोरपि" (इति कोषान्तरम्) इत्येकमुष्णादीनाम् । चेष्टालङ्कारे हावे विशेषे भ्रान्तौ चित्तवृत्त्यनवस्थाने च विभ्रमः स्यात् । विभ्रमणम् विपूर्वकाद्भ्राम्यतेर्भावे घञि, "नोदात्तोपदेशेति" वृद्ध्यभावे च विभ्रमः "अथ विभ्रमः । शोभायां संशये हावे" (इति हैमः) इत्येकं हावादीनाम् । रुक् उदररोगः प्लीहाख्यव्याधिर्वा स्तम्बोऽप्रकाण्डस्तृणादिगुच्छो वा सेनात्रिसेनामुखम्, चशब्दाद् घट्टसैन्यरक्षणेऽपि एते गुल्माः स्युः । गुडयते गुडेः कर्मणि वाहुलकान्मकि, डलयोरेकत्वाड्डस्य लत्वे च गुल्मः "गुल्मः स्तम्बे प्लीह्निघट्टसैन्ययोः सैन्यरक्षणे" (इति विश्वः) इत्येकं प्लीहादीनाम् । स्वसा भगिनी, कुलस्त्री कुलवधूः अनयोर्जामिः स्यात् । जायति जायते वा 'जैक्षये' अस्माद्भौवादिकात्कर्तृकमर्णोर्वाहुलकान्मिप्रत्यये, आत्वे च । जम्यते इति विग्रहेतु जमेः कर्मणि "इञजादिभ्य इति" इञि, ञित्वाद्वृद्धौ च जामिः "जामिः स्वसृकुलस्त्रियोः" (इति चवर्गादावजयः) मुकुटस्तु "प्रहरे समये यामो यामिः स्वसृकुलस्त्रियोः" इति रभसादन्तस्थादित्वं व्याख्यातवान् । तत्र यातेर्वाहुलकान्मिप्रत्यये तु यामिः "यामिः कुलस्त्रीस्वस्रोःस्त्री" (इति मेदिनी) इत्येकं भगिन्यादीनाम् । क्षितिः पृथ्वी, क्षान्तिस्तितिक्षा अनयोः क्षमा स्यात्, युक्ते योग्ये क्षमम् मान्तमव्ययमित्येके । शक्ते पराक्रमे, हिते हितैषिणि च त्रिषु त्रिलिङ्गयां स्यात् क्षमणम् क्षमूषो भावे षित्त्वादङि टापि च क्षमा, क्षमते, क्षम्यते वा पचाद्यचि, घञि वा क्षमः "क्षमा तितिक्षा पृथ्वी च योग्ये शक्ते हिते क्षमम्" (इति धरणिः) इत्येकं क्षित्यादीनाम् ॥ १५१ ॥

हरा, काला, पु.स.न. स.
श्यामलता, हल्दी या रात,

(त्रिषु)श्यामौ(हरित्कृष्णौ)श्यामा(स्याच्छारिवा निशा)।

पूछ, भाल का न.
चित्र, घोड़े का गहना, प्रधान और निशान.

ललामं (पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु) ॥ १५२ ॥

त्रिष्विति–हरित्पलाशो दिग्वा, कृष्णः कृष्णवर्णः उभौ श्यामौ त्रिषु त्रिलिङ्गयां स्याताम् । श्यायते श्यैङः कर्तरि "इषुयुधीन्धि" इति मकि, आत्वे च श्यामः "श्यामो वटे प्रयागस्य वारिदे वृद्धदारके । पिके च कृष्णहरिते पुंसि स्यात्तद्वतित्रिषु । मरिचे सिन्धुलवणे क्लीबं स्त्रीशारिवौषधौ । अप्रसूताङ्गनायां च प्रियङ्गावपि चोच्यते । यमुनायां त्रियामायां कृष्णात्रिवृतिकौषधौ । नीलिकायामिति मेदिनी" इत्येकं हरितादीनाम् । शारिवा अनन्ता श्यामलता वा निशा हरिद्रा, त्रियामा वा श्यामा स्यात् । श्यायते श्यैङो मकि, टापि च श्यामो वर्णोऽस्त्यस्या वा श्यामा "श्यामा गोपवल्ली गोपा गोपालिका च सा" (इति वाचस्पतिः) इत्येकं शारिवादेः । पुच्छो लाङ्गूलं

पुण्ड्रमश्वादीनां ललाटचित्रम्, अश्वो वाजी, भूषा सामीप्यादश्वस्यैव, प्रधानमेव प्राधान्यम्, केतुः पताका एषु ललामं स्यात् । लडनम् लडेर्भावे संपदादित्वात्क्विपि, डलयोरैक्याड्डस्य लत्वे च लल् ताममतीति " कर्मण्यण् " इत्यणि वृद्धौ च ललामम्, बाहुलकात्कनिनि नान्तोऽपि " प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु । भूषावाजि-प्रधानेषु ललामं स्याल्ललाम च " (इति रुद्रः) इत्येकं पुच्छादीनाम् ॥ १५२ ॥

न.
लिङ्गशरीर, **सूक्ष्म(मध्यात्मम)(म्यादौ प्रधाने)प्रथम(स्त्रिषु) ।**
आदि, प्रधान, २
सुन्दर,प्रतिकूल, पु स.न. पु स.न.
न्यून, निन्दित. **वामौ (वल्गुप्रतीपौ द्वा) वधमो (न्यूनकुत्सितौ)॥१५३॥**

स्विति—अध्यात्मम् आत्मनि अधिकृतं लिङ्गशरीरम् अपिशब्दात्कैतवादिकं च सूक्ष्मं स्यात् । सूच्यते 'सूच पैशुन्ये' अस्माच्चौरादिकात्कर्मणि " सूचेः स्मन् " इति स्मनि, चस्यकुत्वे, षत्वे, क्षत्वे च सूक्ष्मम् " सूक्ष्मं स्यात्कैतवेऽध्यात्मे पुंस्यग्नौ त्रिषु चाल्पके " (इति मेदिनी) इत्येकमध्यात्मादीनाम् । आदौ, प्रधाने मुख्ये च प्रथमस्त्रिषु त्रिलिङ्ग्यां स्यात् । प्रथते 'प्रथ विस्तारे' अस्माद्भौवादिकात्कर्तरि " प्रथे-रमच् " इत्यमचि प्रथमः " प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत् " (इति मेदिनी) इत्येकमादिप्रधानयोः । अतः परमामान्तं 'त्रिषु' इत्यधिक्रियते । वल्गु मनोरमम्, प्रतीपो विपरीतः एतौ द्वौ वामौ स्याताम् । वमति वमेः कर्तरि " ज्वलि-तिकेति " णे । वम्यते इति विग्रहे तु कर्मणि घञि ञित्वाद्वृद्धौ च वामः द्वित्वे वामौ " वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे । पयोधरे हरे कामे विद्या वामा-मपि स्त्रियाम् । वामी शृगालीवडवारासभीकरभीषु च " (इति विश्वः) इत्येकं मनोहरादीनाम् । न्यूनः ऊनः, कुत्सितो निन्दितः उभौ अधमौ स्याताम् । अवति, अवेः कर्तरि " अवद्यावमाधमेति " अमे, वस्य धान्तादेशे निपातिते च । न धमति, धम्यते वा नञ् पूर्वकाद् 'धम ध्माने' अस्मात्सौत्रात्कर्तरि पचाद्यचि, कर्मणि घञि वा अधमः " अधमः स्याद्गर्ह्येऽने " (इति विश्वः) इत्येकं न्यूनादेः ॥ १५३ ॥

पु.स.न.
जीर्ण, खाकर **(जीर्णं च परिभुक्तं च) यातयाम (मिदं द्वयम्) ।**
त्याग किया.

इति मान्ताः ॥

जीरिति—जीर्णं परिपक्वम्, परिणामतां प्राप्तं वा परिभुक्तं परिभुक्तोज्झितं चेदं द्वयं यातयामं स्यात् । यातो गतो याम उपभोग कालो यस्येति यातयामम् " यातयामो-ऽन्यवज्जीर्णे परिभुक्तोज्झितेऽपि च " (इति मेदिनी) इत्येकं जीर्णादेः ।

इति मान्ताः ॥

अथ यान्ता व्याख्यायन्ते ।

घोडा, गरुड, घर, कमतीहोना या अपहार.

पु. पु.
(तुरंगगरुडौ) तार्क्ष्यौ (निलयापचयौ) क्षयौ ॥ १५४ ॥

त्विति—तुरंगः अश्वः, गरुडः पक्षिराजः उभौ तार्क्ष्यौ स्याताम् । तार्क्ष्यस्य कश्यपस्यापत्यमिति विग्रहे "ऋष्यन्धकेति" अणि, तार्क्ष्यः, द्वित्वे तार्क्ष्यौ "तार्क्ष्योऽश्वसर्पयोः । गरुडाग्रजे सुपर्णे च पुंसि क्लीबं रसाञ्जने" (इति मेदिनी) इत्येकं तुरंगमादेः । निलयः आलयः, अपचयः अपहारो ह्रासो वा एतौ क्षयौ स्याताम् । क्षयणम्, क्षीयतेऽत्रेति वा क्षयतेः, क्षियतेर्वा भावाधारयोः "एरच्" इत्यचि, "पुंसीति" वे वा गुणे च क्षयः "क्षयो रोगान्तरे वेश्मकल्पान्तापचयेषु च" (इति मेदिनी) इत्येकं निलयादीनाम् ॥ १५४ ॥

देवर, साला, भतीजा, वैरी, गर्जताहुआमेघ, इन्द्र, प्रभु, वनिया.

पु. पु.
श्वशुर्यौ (देवरश्यालौ) भ्रातृव्यौ (भ्रातृजद्विषौ) ।

पु. पु.
पर्जन्यौ (रसदब्देन्द्रौ) स्यादर्यः (स्वामिवैश्ययोः) ॥ १५५ ॥

श्वेति—देवरः पतिलघुभ्राता, श्यालः पत्नीभ्राता उभौ श्वशुर्यौ स्याताम् । श्वशुरस्यापत्यमिति विग्रहे "राजश्वशुराद्यत्" इति यति, "यस्येति चेति" अलोपे च श्वशुर्यः द्वित्वे श्वशुर्यावित्येकं देवरादेः । भ्रातृजो भ्रातृसुतः, द्विट् शत्रुरेतौ भ्रातृव्यौ स्याताम् । भ्रातुरपत्यम् "भ्रातुर्व्यच्चेति" व्यति "व्यन्सपत्ने" इति व्यनि वा भ्रातृव्यः, द्वित्वे भ्रातृव्यावित्येकं भ्रातृजादेः । रसदब्दोध्वनदम्बुदः, इन्द्रो देवराजः उभौ 'पर्जन्यौ' स्याताम् । पर्षति, पृषेः कर्तरि 'अन्य' प्रत्यये षस्य जे निपातिते च पर्जन्यः द्वित्वे पर्जन्यौ "पर्जन्यो मेघशब्देऽपि ध्वनदम्बुदशक्रयोः" (इति विश्व.) इत्येकं मेघशब्दादीनाम् । स्वामी प्रभुः वैश्यो वणिग् अनयोः अर्यः स्यात् । अर्यते "ऋ गतौ" अस्मात्कर्मणि "अर्यः स्वामिवैश्ययोरिति" यति, गुणे च 'अर्यः' स्यादित्येकं स्वाम्यादेः ॥ १५५ ॥

पुष्यनक्षत्र, कलियुग, अवसर, क्रम, आधीन, सौगन्द, ज्ञान, विश्वास, हेतु, छेद, शब्द, बहुत काल की शत्रुता, पीछे से पछताना.

पु. पु.
तिष्यः (पुष्ये कलियुगे) पर्यायो (ऽवसरे क्रमे) ।

पु.
प्रत्ययो (ऽधीनशपथज्ञानविश्वासहेतुषु ॥ १५६ ॥

पु.
रन्ध्रे शब्दे) ऽथानुशयो (दीर्घद्वेषानुतापयोः) ।

तीति—पुष्ये पुष्यनक्षत्रे, कलियुगे तुर्ययुगे च तिष्यः स्यात् । त्विषन्ति कार्याणि

स्मिन्, त्विषेराधारे अन्यादित्वाद् 'यकि' वलोपे निपातिते च तिष्य: "तिष्य: कलियुगे ऋक्षे तिष्या धात्री च कीर्त्यते" (इति धरणिः) इत्येकं पुष्यादे:। अवसरे अवकाशे प्रस्तावे वा क्रमे कल्पे विधाने वा पर्याय: स्यात्। पर्ययणम्, परिपूर्वकाऽ‍इतेर्भावे "परावनुपात्यये" इति घञि, ञित्वाद्वृद्धौ, यणादेशे च पर्याय: "पर्यायस्तु प्रकारे स्यान्निर्माणेऽवसरे क्रमे" (इति विश्व:) इत्येकमवसरादे:। अधीन: निघ्न: आयत्तो वा शपथ: शापज्ञानं मोक्षविषयिणी बुद्धि: इन्द्रियार्थसंनिकर्षजन्यं वा, विश्वासो विस्रम्भ:, हेतु: कारणम् एषु तथा रन्ध्रे छिद्रे, शब्दे च प्रत्यय: स्यात्। प्रत्ययनम्, प्रतीयतेऽनेनेति वा प्रतिपूर्वकादिणोभावसाधनयो: "एरच्" इत्यचि 'पुंसीति' घे वा गुणे अयादेशे च प्रत्यय: "प्रत्यय: शपथे रन्ध्रे विश्वासाचारहेतुषु। प्रथितत्वे च सन्नादावधीनज्ञानयोरपि" (इति विश्व:) इत्येकमधीनादीनाम्। अथेत्यनन्तरम् दीर्घद्वेषो महाद्वेषो बहुकालिकी शत्रुता वा अनुताप: पश्चात्ताप: अनयो: अनुशय: स्यात्। अनुशयनम्, अनुशीयतेऽनेनेति वा अनुपूर्वकाच्छीङो भावाधारयो: "एरच्" इत्यचि "पुंसीति" घे वा गुणे, अयादेशे च अनुशय: "भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयो:" (इति विश्व:) इत्येकं दीर्घद्वेषादीनाम्॥ १५६॥

असपूर्णता, हाथियों की मध्यमगति, सौगन्द, आचार, काल, सिद्धान्त, सुभाषा, व्यसन, अशुभ, दैव, विपत्ति.

पु. स्थूलोच्चय(स्त्वसाकल्ये गजानां मध्यमे गते)॥१५७॥
पु. समया:(शपथाचारकालसिद्धान्तसंविद:)।
पु. (व्यसनान्यशुभं दैवं विपदि) त्यनया (स्त्रय:)॥ १५८॥

स्थितिर्—असाकल्ये असामर्थ्ये गजानां हस्तिनां मध्यमे गते गमने च स्थूलोच्चय: स्यात्। उच्चयनम् उत्पूर्वकाच्चिनोतेर्भावे "एरच्" इत्यचि, गुणे, अयादेशे, उदो दस्य चुत्वेन जे, चर्त्वेन चे च उच्चय: स्थूलस्योच्चय: स्थूलोच्चय: "स्थूलोच्चयस्त्वसाकल्ये गण्डोपलकरण्डयो:" (इति विश्व.) इत्येकमसाकल्यादे.। शपथ: शपनम्, आचारो धर्मशास्त्रोक्तव्यवहार:, कालो दण्डधरो, दिष्टो वा सिद्धान्तो राद्धान्त:, संवित् संभाषा च एते समया: स्यु:। समयनम्, समीयतेऽनेनात्रेति वा संपूर्वकादिणोभावसाधनाधारेषु "एरच्" इत्यचि. "पुंसीति" घे वा समेतीति विग्रहे तु "पचाद्यच्" इत्यचि वा गुणे, अयादेशे च समय: द्वित्वे समयौ, बहुत्वे समया: "समय: शपथाचारसिद्धान्तेषु तथा धियि। क्रियाकारे च निर्देशे संकेते कालभाषयो. (इति मेदिनी) इत्येकं शपथादीनाम्। व्यसनानि स्त्रीद्यूतपानादीनि अशुभम् अभद्रदायकं दैवं भागधेयम्, विपद् विपत्ति: एते त्रयोऽनया: स्यु:। न नयनम्, न नीयतेऽनेनात्रेति वा विरोधार्थकनञ्पूर्वकान्नयतेर्भावकरणाधिकरणेषु "एरच्" इत्यचि, अयाच्छुसा-

वहविधेरन्यो वा अनयः, द्वित्वे अनयौ, बहुत्वे अनयाः " अनयस्तु विपद्दैवाशुभयोर्व्यसनेषु च " (इति मेदिनी) इत्येकं व्यसनादीनाम् ॥ १५७ ।-१५८ ॥

उल्लंघन, कष्ट, दोष, दण्डदेना, आपदा, लड़ाई, आनेवालाकाल, श्वशुर आदि.

अत्ययो (ऽतिक्रमे कृच्छ्रे दोषे दण्डेऽप्यथापदि) ।
(युद्धायत्योः) संपरायः पूज्य (स्तु श्वशुरेऽपि च)॥ १५६॥

पु. पु.

अतीति—अतिक्रमे अतिपाते, अभीतस्य रणे याने वा, कृच्छ्रे कष्टे सान्तपनादिके वा दोषे अवगुणे, अपराधे, वातपित्तकफात्मके वा दण्डे, दमे लगुडे वा अपिशब्दादत्युत्पाते, नाशे, विध्वंसे च अत्ययः स्यात् । अत्ययनम्, अतीयतेऽनेनात्रेति वा अतिपूर्वकादिणोभावकरणाधिकरणेषु " एरच् " इत्यचि, गुणे अयादेशे च अत्ययः " अत्ययोऽतिक्रमे कृच्छ्रेऽत्युत्पाते नाशदण्डयोः " (इति धरणि.) इत्येकमतिक्रमादीनाम् । अथेत्यनन्तरम् आपदि विपत्तौ युद्धे संग्रामे, आयतावुत्तरकाले च संपरायः स्यात् । संपरायणम्, संपरेयतेऽनेनात्रेति वा संपरापूर्वकादिणोभावसाधनाधारेषु अचि, गुणे, अयादेशे, सवर्णदीर्घे च संपरायः " संपरायः समीके स्यादापदुत्तरकालयोः " (इति मेदिनी) इत्येकमापदादीनाम् । श्वशुरे पतिपत्न्योः पितरि, अपिशब्दात्पूजायोग्ये च पूज्यः स्यात् । पूजयितुमर्हः ' पूज पूजायाम् ' अस्माच्चौरादिकाद् " अर्हे कृत्यतृचश्चेति " यति पूज्यः " पूज्यौ श्वशुरपूजार्हौ " (इति मेदिनी) इत्येकं पूज्यादेः ॥ १५६ ॥

सेना पृष्ठभागस्थ सेना, समूह, समुदाय, अच्छा वासस्थान, विश्वास, मागना, प्रेम, वैर, उंचाई, जिसका जो जानागया, शब्द, स्पर्श आदि.

(पश्चादवस्थायिबलं समवायश्च) संनयौ । पु.
(संघाते सन्निवेशे च)संस्त्यायः प्रणया(स्त्वमी)॥१६०॥ पु. पु.
(विस्रम्भयाच्ञाप्रेमाणो) (विरोधेऽपि) समुच्छ्रयः । पु.
विषयो (यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि)॥ १६१॥ पु.

पेति—पश्चात्सेनापृष्ठभागे अवस्थातुं शीलं यस्येति बलं सैन्यम्, समवायः संघातश्च उभौ संनयौ स्याताम् । संनयनम्, संनीयते वा संपूर्वकान्नयतेर्भावकर्मणोः " एरच् " इत्यचि संनयतीति विग्रहे तु कर्तरि " पचाद्यचि " वा गुणे, अयादेशे च संनयः द्वित्वे संनयावित्येकं सेनापृष्ठस्थसेनादेः । संघाते समुदाये, सन्निवेशे निकर्षणे च शब्दाद्विस्तृतावपि संस्त्यायः स्यात् । संस्त्यानम्, संपूर्वकात्स्त्यायतेर्भावे घञि आत्वे, युगागमे च संस्त्याय. " संस्त्यायः सन्निवेशे च संघाते विस्तृतावपि " (इति मेदिनी) इत्येकं समूहादेः । विस्रम्भो विश्वासः, याच्ञा, प्रार्थना, प्रेमा, प्रियता

अमी प्रणायाः स्युः। प्रणायनम्, प्रपूर्वकान्नयतेर्भावे "एरच्" इत्यचि, गुणे, अया-देशे च प्रणायः, द्वित्वे प्रणायौ, बहुत्वे प्रणायाः "प्रणायः प्रसरे प्रेम्णि याञ्चाभिक्र-भयोरपि। निर्वाणेऽपि" (इति मेदिनी) इत्येकं विश्वासादीनाम्। विरोधे देहे अपिशब्दादुन्नतौ च समुच्छ्रयः स्यात्। समुच्छ्रयणम्, समुत्पूर्वकात् श्रिञोभावे, अचि, गुणे अयादेशे दस्य चुत्वेन जे, चर्त्वेन चे 'शश्छोऽटीति' छे च समुच्छ्रय. "विरोधोन्नत्योः समुच्छ्रयः" (इति रभसः) इत्येकं विरोधादेः। यस्य प्राणिनः प्रबन्धाद् यः पदार्थो ज्ञातो नित्यं सेवितस्तत्र, शब्दादिके, अपिशब्दाद् गोचरे, देशे, जनपदे च विषयः स्यात्। विषयणम्, विषीयतेऽत्रेति वा "एरच्" इत्यचि, "पुंसीति" घे, वा विषिणोतीति विग्रहे तु पचाद्यचि वा गुणे, अयादेशे "परिनिविभ्यः सेवसितस-येति" षत्वे च विषयः "विषयो गोचरे देशे तथा जनपदेऽपि च। प्रबन्धाद्यस्य यो ज्ञातस्तत्र रूपादिके पुमान्" (इति मेदिनी) इत्येकं गोचरादेः॥ १६०। १६१॥

कषैला, काढ़ा या गोंद, समाज, **(निर्यासेऽपि)कषायो(ऽस्त्री) (सभायां च)प्रतिश्रयः।**
पु. पु.
बाहुल्य, अन्त-गति, दीनता, यज्ञ, कोप. **प्रायो(भूम्न्यन्तगमने) मन्यु (र्दैन्ये क्रतौ क्रुधि) १६२॥**
पु. पु.

निरिति—निर्यासे क्वाथे अपिशब्दाद्रसभेदाङ्गरागविलेपनादौ च कषायः अस्त्री पुन्नपुं-सकं स्यात्। कषति कण्ठम्, कषेः कर्त्तरि बाहुलकादायेकषायः "कषायो रसभेदे स्यादङ्गरागे विलेपने। निर्यासे च कषायोऽथ सुरभौ लोहितेऽन्यवत्" (इति विश्वः) इत्येकं निर्यासादेः। सभायां गोष्ठ्याम्, चशब्दादङ्गीकारे, आश्रयेऽपि प्रतिश्रयः स्यात्। प्रतिश्रयणम्, प्रतिश्रीयतेऽत्रेति वा प्रतिपूर्वकाच्छ्रयतेर्भावाधारयोः "एरच्" इत्यचि "पुंसीति" घे वा गुणे अयादेशे च प्रतिश्रयः "प्रतिश्रयः सभायां चाश्रयेऽभ्युप-मेऽपि च" (इति मेदिनी) इत्येकं समाजादेः। भूम्नि बाहुल्ये, अन्तगमने अन्तगतौ मरणे वा अनशने, तुल्ये च प्रायः स्यात्। प्रायणम्, प्रपूर्वकादयतेरेतेर्वाभावे घञि, वृद्धौ, आयादेशे, सवर्णादीर्घे च प्रायः "प्रायश्चानशने मृत्यौ प्रायोबाहुल्यतुल्ययोः" (इति विश्वः) इत्येकं बाहुल्यादेः। दैन्ये दीनतायाम्, क्रतौ यागे, क्रुधि कोपे, शोके च मन्युः स्यात्। मन्यते मनः कर्त्तरि "यजिमनिशुन्धिदसिजनिभ्यो युच्" इति युचि "अनुनासिकयोः" इत्युक्तत्वादनादेशाभावे च मन्युः "मन्युः पुमान् क्रुधि। दैन्ये शोके च यज्ञे च" (इति मेदिनी) इत्येकं दैन्यादीनाम्॥ १६२॥

गोप्य, लिङ्ग, भग, सौगन्द, सही या ठीक, **(रहस्योपस्थयो)र्गुह्यं सत्यं(शपथतथ्ययोः)।**
न. न.
बल, प्रभाव, शुभ, पृथ्वी आदि. **वीर्यं(बले प्रभावे च)द्रव्यं(भव्ये गुणाश्रये)॥ १६३॥**
न. न.

---

१ बाहुल्य यथा "प्रायेण ब्राह्मणा भोज्याः" अन्तगतौ यथा "प्रायोपवेशः कृतः" (इत्यग्निवेशः)॥

रेति—रहस्यं रहसिभवम्, गोप्यं वा उपस्थो भगं, लिङ्गश्च अनयोर्गुह्यं स्यात् । गूहनम्, गुह्यते वा गूहतेर्भावे, कर्मणि वा "शंसिदुहिगुहिभ्यो वेति" क्यप्। कित्त्वादूगुणाभावे च, ण्यति तु संज्ञापूर्वकत्वादूगुणाभावे वा गुह्यम् "गुह्यं रहस्युपस्थे च गुह्यः कमठदम्भयोः" (इति विश्वः) इत्येकं रहस्यादीनाम् । शपथः शपनम्, शापो वा, तथ्यमृतं च एतयोः सत्यं स्यात् । सति साधुः "तत्र साधुरिति यति सत्यम् "सत्यं कृते च शपथे तथ्ये च त्रिपु तद्वति" (इति मेदिनी) इत्येकं शपथादेः । बले शौर्य्ये, सामर्थ्ये वा प्रभावे प्रतापे, तेजोविशेषे वा चशब्दाच्छुक्रे वीर्यं स्यात् । वीर्य्यतेऽनेन, 'वीर विक्रान्तौ' अस्माच्चौरादिकात्करणे "अचोयत्" इति 'यति' वीरे साधुरिति विग्रहे तु "तत्र साधुरिति" यति, वा वीर्यम् "वीर्यं प्रभावे शुक्रे च तेजः सामर्थ्ययोरपि" (इति मेदिनी) इत्येकं बलादेः । भव्ये शुभे सत्ये जीवे वा गुणाश्रये पृथिव्यादौ, "द्रविणे च" द्रव्यं स्यात् । द्रोरिदम्, "द्रव्यं च भव्ये" इति यति, गुणे, अवादेशे च द्रव्यम् "द्रव्यं स्याद्द्रविणे भव्ये पृथिव्यादौ च पित्तले । भेषजे च विलेपे च जतुद्रुमविशेषयोः" (इति विश्वः) इत्येकं भव्यादेः ॥ १६३ ॥

ठिकाना, घर, न. नक्षत्र, आगी, शुभाशुभ कर्म,	धिष्ण्यं(स्थाने गृहे भेऽग्नौ) भाग्यं(कर्म शुभाशुभम्) । न. न.
कसेरू वा सोना, वज्रदन्ती या दन्तीवृक्ष आदि.	(कशेरुहेम्नो)र्गाङ्गेयं विशल्या (दन्तिकाऽपि च) ॥ १६४ ॥ न. स.

धीति—स्थाने अवकाशे, स्थितौ वा गृहे गेहे, भे नक्षत्रे, अग्नौ वह्नौ च धिष्ण्यं स्यात् । धृष्णोति, 'ञिधृषा प्रागल्भ्ये' अस्मात्सौवादिकात्कर्तरि "सानसि वर्णसीति" ण्ये, ऋकारस्येकारे च धिष्ण्यम् "धिष्ण्यं स्थानाग्निसद्मसु । शक्राद्येऽपि" (इति मेदिनी) इत्येकं स्थानादेः । शुभाशुभं जन्मान्तरीयं कर्म्म, ऐश्वर्यं च भाग्यं स्यात् । भज्यतेऽनेनेति विग्रहे भजतेः करणे "ऋहलोर्ण्यत्" इति ण्यति णित्त्वादूवृद्धौ, "चजोरिति" कुत्वे च, भगस्यैश्वर्यस्य भावोवेति विग्रहे तु ब्राह्मणादित्वात् ष्यञि, भाग्यम् "भाग्यं शुभात्मकविधौ स्याच्छुभाशुभकर्मणि" (इति विश्वः) इत्येकं शुभाशुभकर्मादेः । कशेरुस्वनामख्याततृणकन्दविशेषः, हेम हिरण्यम् अनयोर्गाङ्गेयं स्यात् । गङ्गाया अपत्यम् "शुभ्रादिभ्यश्चेति" ढकि वृद्धौ, ढस्यैयादेशे आलोपे च गाङ्गेयम् "गाङ्गेयः स्यात्पुमान्भीष्मे क्लीबं स्वर्णकशेरुणोः" (इति मेदिनी) इत्येकं कशेरुकादेः । दन्तिका उदुम्बरपर्णिका अपिशब्दादग्निशिखा, चशब्दादूगुडूची त्रिपुटा च विशल्या स्यात् । विगता शल्यात् विगतं शल्यं यस्या येन वि विशल्या "विशल्याग्निशिखादन्ती गुडूची त्रिपुटासु च" (इति मेदिनी) इत्येकं दन्तिकादेः ॥ १६४ ॥

लक्ष्मी, पार्वती, नाम, शोभा, आरम्भ आदि। स. वृषाकपायी (श्रीगौर्यो) रभिख्या (नामशोभयोः) । स.
(आरम्भो निष्कृतिः शिक्षा पूजनं संप्रधारणम् ॥ १६५ ॥
उपायः कर्म चेष्टा च चिकित्सा‡ च नव) क्रियाः ।

श्रिति—श्रीलर्क्ष्मी, गौरी शिवप्रिया अनयोर्वृषाकपायी स्यात् । वृषाकपेः स्त्री, "वृषाकप्यग्नीति" ङीपि, ऐकारे, आयादेशे च वृषाकपायी "वृषाकपायी श्रीगौरी-शरीजीवन्तिकासु च" (इति मेदिनी) इत्येकं लक्ष्म्यादीनाम् । नाम अभिधानम्, शोभा कान्तिः अनयोः अभिख्या स्यात् । अभिख्यानम्, अभिपूर्वकात्ख्यातेश्चक्षिङा-देशाद्वा भावे "आतश्चोपसर्गे" इत्यङि, आलोपे, टापि च अभिख्या "अभिख्या त्वभिधाने स्याच्छोभायां च यशस्यपि" (इति मेदिनी) इत्येकं नामादेः । आरम्भः प्रारम्भः, निष्कृतिः प्रायश्चित्तम्, शिक्षा अभ्यासो वर्णोच्चारणविधिर्वा, पूजनमर्च-नम्, संप्रधारणं विचार, उपाय. सामादिः, कर्म कार्यं फलाश्रयत्वं वा, चेष्टा परिस्पन्दः, चिकित्सा रुक्प्रतिक्रिया एते नव क्रियापदवाच्याः स्युः । करणम्, करोतेर्भावादौ "कृञः शचेति" शे, यकि, रिङादेशे, इयङि सति वा टापि च क्रिया "क्रिया कर्मणि चेष्टायां करणे संप्रधारणे । आरम्भोपायशिक्षार्थचिकित्सानिष्कृतिष्वपि" (इति विश्व.) आरम्भे यथा "सर्वाः क्रिया मन्त्रमूला नृपाणाम्" निष्कृतौ यथा "महापातकिनां पुंसां क्रिया प्राणान्तिका स्मृता" शिक्षायां यथा "क्रिया हि वस्तू-पहिता प्रसीदति" पूजने यथा "देवक्रियापरस्तपस्वी" संप्रधारणे यथा "क्रियां विना को हि जानाति कृत्यम्" उपाये यथा "सप्तसामादिकाः क्रियाः" कर्मणि यथा "निष्क्रियस्य कुतः सुखम्" चेष्टायां यथा "मृतः किं निष्क्रियो यतः" चिकि-त्सायां यथा "पूर्वं ज्वरे समुत्पन्ने क्रिया पूर्वज्वरानुगा" इत्येकमारम्भादीनाम् ॥ १६५ ॥

सूर्यपत्नी, शोभा, प्रतिबिम्ब, घाम का अभाव, स. छाया (सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः) ॥ १६६ ॥

धनियों के व राजाओं के मन्दिरों की ड्योढी, करधनी, हाथी का कमरबन्ध, स. कक्ष्या (प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने) ।

क्रिया, तामसी देवता आदि। स. कृत्या (क्रियादेवतयोस्त्रिषु भेद्येधनादिभिः) ॥ १६७ ॥

छेति—सूर्यप्रिया सूर्यकान्ता, कान्तिः शोभा, प्रतिबिम्बं प्रतिमानम्, अनातपः प्रकाशाभावो वर्माभावश्च वा एते छायापदवाच्याः स्युः । छ्यति, छ्यतेः कर्तरि "श्याद्व्यधेति" णे, आत्वे, युगागमे, "माछाशसिभ्यो यः" इति ये वा, अ

‡ "या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते । दोषधातुमलानां या साम्यकृत्सैव रोगहृत्" (इति भावप्रकाशः) ॥

टापि च छाया " छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः " (इति मेदिनी) इत्येकं सूर्यप्रियादीनाम् । हर्म्यादेर्धनिनां गेहादेर्नृपालयादेर्वा प्रकोष्ठे, काञ्च्यां मेखलायाम्, मध्येभबन्धने हस्तिकटिबन्धने च कक्ष्या स्यात् । कक्षेभवा, " शरीरावयवादिति " यति, अलोपे, टापि च कक्ष्या " कक्ष्या बृहतिकायां स्यात्काञ्च्यां मध्येभबन्धने । हर्म्यादीनां प्रकोष्ठे च " (इति मेदिनी) इत्येकं हर्म्यादिप्रकोष्ठादेः । क्रिया कर्म, देवता दैवतविशेषः एतयोः कृत्या स्त्री स्यात् । धनादिभिर्भेद्ये भेदनीये च त्रिषु त्रिलिङ्ग्यां स्यात् । करणम्, करोतेर्भावे " कृञः श च " इति चात् क्यपि, तुकि च, कृत्यते इति विग्रहे तु कृन्ततेः कर्मणि " ऋदुपधादिति " वा क्यपि टापि च कृत्या " कृत्यो विद्विषि कार्ये च कृत्या क्रिया दिवौकसोः " (इति रभसः) इत्येकं क्रियादेः ॥ १६६ । १६७ ॥

झगडा,युद्धादि, जन्यः (पु.स.न.) (स्याज्जनवादेऽपि) जघन्यो (पु.स.न.) (ऽन्तेऽधमेऽपि च) ।
चरम, अधम,
निन्दित,अधीन,
संनद्ध, नीरोग. (गर्ह्याधीनौ च) वक्तव्यौ (पु.स.न.) कल्यौ (पु.स.न.) (सज्जनिरामयौ) ॥ १६८ ॥

जेति–जनानां वादे निन्दितवादे अपिशब्दाद्युद्धादौ च 'जन्यः' स्यात् । जनस्य जल्पः, " मतजनहलादिति " यति, जायते, जनयति वा जनेः कर्तरि " ऋहलोरिति" ण्यति, " जनिवध्योश्चेति " वृद्ध्यभावे, " अचोयत् " इति यति वा जन्यः जनीं वहतीति विग्रहे तु " संज्ञायां जन्या " इति वा साधुः । " जन्यामातृवयस्यास्याज्जन्या जनीवरप्रिया । जननीजनपित्रोश्च जन्यं निर्वादयुद्धयोः " (इति धरणिः) इत्येकं जनवादादेः । अन्ते चरमे, अधमे अवद्ये निकृष्टे वा अपि शब्दाच्छिश्नादौ च जघन्यः स्यात् । जघनेभवः, " शरीरावयवादिति " यति, कुटिलं हन्यते, वा हन्तेर्यङन्तात् " अचोयत् " इति यति, आगमशासनस्यानित्यत्वात् " नुगतः " इति नुगागमाभावे च जघन्यः " जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवत् " (इति विश्वः) इत्येकमन्तादेः । गर्ह्योऽधमः पामरो वा अधीनो निघ्नः आयत्तो वा चशब्दाद्वचनार्हश्च उभौ वक्तव्यौ स्याताम् । वचनार्हः, वक्तेर्ब्रूञादेशाद्वा कर्मणि तव्ये, चस्य कुत्वे च वक्तव्यः, द्वित्वे वक्तव्यौ " वक्तव्यं कुत्सिते हीने वचनार्हे च वाच्यवत् " (इति मेदिनी) इत्येकं गर्ह्यादेः । सज्जो बद्धसंनाहादिः, निरामयो नीरोगः एतौ कल्यौ स्याताम् । कलासु साधुः, " तत्र साधुः " इति यति, आलोपे च, कल्यते इति विग्रहे तु कलयतेश्चुराद्यदन्तात्कर्मणि " अचोयत् " इति यति वा णिलोपे च कल्यः द्वित्वे कल्यौ, " कल्यं प्रभाते क्लीबं स्यात्कल्यो वाक्श्रुतिवर्जिते । सज्जनीरोगदक्षे, कल्याणवचनेऽपि च । उपायवचनेऽपि स्यात्त्रिषु मद्ये तु योषिति " (इति मेदिनी) इत्येकं सज्जादीनाम् ॥ १६८ ॥

१ यतीति यपदादयस्तु " कृत्यल्युटो बहुलम् " (३।३।११३) इत्यग्रेरुक्तेयः ॥

पु.स.न. पु.स.न.

ज्ञानी, धनी, सुन्दर, अच्छा रूप, प्रियवादी. (आत्मवाननपेतोऽर्थ्या)दर्थ्यौ पुण्य(न्तु चार्वपि)।

पु.स.न. पु.स.न.

रूप्यं(प्रशस्ते रूपेऽपि) वदान्यो(वल्गुवागपि)॥ १६६ ॥

आदिति—आत्मवान् ज्ञानी, अर्थाद्धनादनपेतः संयुक्तो धनी अर्थशाली वा एतौ अर्थ्यौ स्याताम् । अर्थे साधुः, "तत्र साधुरिति" यति, अर्थादनपेतः "धर्मपथ्य-र्थेति" यति वा "यस्येति" अलोपे च अर्थ्यः द्वित्वे अर्थ्यौ "अर्थ्यौ विज्ञार्थ-शालिनोः" (इत्यजयः) "अर्थ्यं शिलाजतुन्यर्थ्यो बुधे न्याय्ये च वाच्यवत्" (इति मेदिनी) इत्येकमात्मवदादेः । चारु सुन्दरम्, अपिशब्दात्सुकृतं धर्मं च पुण्यं स्यात् । पुनाति, पूञः कर्तरि "पूञो यण्णुग्ह्रस्वश्च" इति, यणि, णुकि, ह्रस्वे च, पुणतीति विग्रहे तु "इगुपधेति" के, पुणास्तस्मिन्साधु, "तत्रसाधुरिति" यति वा पुण्यम् "पुण्यस्त्रिषु मनोज्ञे स्यात्क्लीवं सुकृतधर्मयोः" (इति विश्वः) इत्येकं चार्वादेः । प्रशस्ते रूपे अपिशब्दादाहतस्वर्णरजते रजतमात्रे च रूप्यं स्यात् । आहतं प्रशस्तं "वा" रूपमस्त्यस्येति, "रूपादाहतप्रशंसयोः" इति यपि, रूप्यम् "रूप्यः स्यात्सुन्दरे त्रिषु । आहतस्वर्णरजते रजते च नपुंसकम्" (इति मेदिनी) इत्येकं प्रशस्त-रूपादेः । वल्गुवाक् मनोहरवादी वाग्मी वा अपिशब्दाद्दाता च वदान्यः स्यात् । वदति, वदेः कर्तरि "वदेरान्यः" इत्यान्ये वदान्यः "वदान्यो दातृवाग्मिनोः" (इत्यजयः) इत्येकं वल्गुवागादेः ॥ १६६ ॥

पु.स.न. पु.स.न.

योग्य, सुन्दर, सोम देवता वाला. (न्याय्येऽपि) मध्यं सौम्यं (तु सुन्दरे सोमदैवते)।

इति यान्ताः ॥

निति—न्याय्ये युक्ते अपिशब्दादवलग्नान्तराधमादिषु च मध्यं स्यात् । मां शोभां ध्यायति, धत्ते वा मापूर्वकाद् ध्यायतेः कर्तरि "आतोऽनुपेति" के, धाञो यकि वा आलोपे पृषोदरादित्वाद्ध्रस्वे च मह्यते इति विग्रहे तु "अघ्न्यादयश्चेति" यकि, हस्य धत्वे निपातिते च मध्यम् "न्याय्यावलग्नयोर्मध्यमन्तरे चाधमे त्रिषु" (इति रभसः) इत्येकं न्याय्यादीनाम् । सुन्दरे रुचिरे, सोमदैवते चन्द्रदैवते च सौम्यं स्यात् । सोमो देवताऽस्य । "सोमाट्ट्यण्" इति ट्यणि, सोमइवेति विग्रहे तु चातुर्वर्ण्या-दित्वात् ष्यञि वा वृद्धौ च सौम्यम् । "सौम्यो बुधे मनोज्ञे स्यादनुगे सोमदैवते" (इति विश्वः) इत्येकं सुन्दरादेः ॥

इति यान्ताः ॥

अथ रान्ता व्याख्यायन्ते ।

समूह, प्रसग, पत्थर, यज्ञ, बृहस्पति, पिता आदि, युग, सशय, भेद, सादृश्य, आकार, चेष्टित.

पु. पु.
(निवहावसरौ) वारौ संस्तरौ (प्रस्तराध्वरौ) ॥ १७० ॥
पु. पु.
गुरू (गीष्पतिपित्राद्यौ) द्वापरौ (युगसंशयौ) ।
पु. पु.
प्रकारौ (भेदसादृश्ये) आकारा (विङ्गिताकृती) ॥१७१॥

नीति–निवहः समूहः, अवसरः प्रस्तावः एतौ वारौ स्याताम् । वारयति, व्रियते वा वृणोतेः स्वार्थणयन्तात्प्रेरणार्थकाद्वा कर्तरि पचाद्यचि, कर्मणि घञि वा वृद्धौ, रपरत्वे च वारः " वारः सूर्यादिदिवसे वारोऽवसरवृन्दयोः । कुब्जवृक्षे हरेद्वारे वारं मद्यस्य भाजने " (इति विश्वः) इत्येकं समुदायादेः । प्रस्तरः शय्या, पाषाणो वा अध्वरो यागः एतौ संस्तरौ स्याताम् । संस्तीर्यते, संपूर्वकात्स्तृणातेः कर्मणि " ऋदोरप् " इत्यपि, गुणे, रपरत्वे च संस्तरः " संस्तरप्रस्तरावेतौ प्रस्तराध्वरयोरपि । मणिपाषाणयोश्चापि यथाक्रममुदीरितौ " (इति विश्वः) इत्येकं प्रस्तरादेः । गीष्पतिः सुराचार्यः पित्राद्यः पिता जनकः आद्यान्महद्दुर्जरालघ्वादिग्रहः एतौ गुरू स्याताम् । गृणाति आत्मतत्त्वमिति, गृणातेः कर्तरि " कृग्रोरुच्चेति " कुप्रत्यये, उदादेशे रपरत्वे च गुरुः " गुरुस्त्रिलिङ्गयां महति दुर्जरालघुनोरपि । पुमान्निषेकादिकरे पित्रादौ सुरमन्त्रिणि " (इति मेदिनी) इत्येकं गीष्पत्यादेः । युगः सत्यत्रेतादियुगभेदः, संशयः संदेहः एतौ द्वापरौ स्याताम् । द्वाभ्यां परः, द्वौपरावत्रेति वा पृषोदरादित्वाद् द्विशब्दस्य द्वादेशे द्वापरः " द्वापरं संशये युगे " (इति कोषान्तरम्) इत्येकं युगादेः । भेदः उपजायो विशेपो वा सादृश्यं तुल्यम् उभे प्रकारौ स्याताम् । प्रकरणम् , प्रपूर्वकात्करोतेर्भावे घञि, वृद्धौरपरत्वे च प्रकारः द्वित्वे प्रकारौ " प्रकारस्तुल्यभेदयोः " (इति मेदिनी) इत्येकं भेदादेः । इङ्गितम् चेष्टा, आकृतिरवयवसंस्थानम् एते द्वे ' आकारौ ' स्याताम् । आकरणम्, आङ्पूर्वकात्कृञोभावे घञि, वृद्धौ रपरत्वे च आकारः द्वित्वे आकारावित्येकमिङ्गितादेः ॥ १७० । १७१ ॥

अनाज का अग्रभाग, बाण, धन्वा, पर्वत, वृक्ष, शैल, सूर्य, कुच, मेघ.

पु. पु.
किंशारू (धान्यशूकेषू) मरू (धन्वधराधरौ) ।
पु. पु.
अद्रयो (द्रुमशैलार्काः) (स्त्रीस्तनाब्दौ) पयोधरौ ॥ १७२ ॥

किमिति–धान्यशूकः शस्यशूकः, इषुर्वाणः कङ्कपत्री वा एतौ किंशारू स्याताम् । किंचित्, कुत्सितं वा शृणाति, किंपूर्वकाच्छृणातेः कर्तरि " किंजरयोः श्रिणः " इति ञुणि, वृद्धौ, रपरत्वे च किंशारुः द्वित्वे किंशारू " किंशारुर्ना शस्यशूके विशिखे कङ्कपत्रिणि " (इति मेदिनी) इत्येकं धान्यशूकादेः । धन्वा निर्जलदेशश्चापो वा

धराधरः पर्वतः एतौ मरू स्याताम् । म्रियन्ते जन्तवोऽत्रेति विग्रहे म्रियतेर्भा "भृमृशीति" उप्रत्यये, गुणे, रपरत्वे च मरुः द्वित्वे मरू "मरुर्ना गिरिधन्वनोः" (इति मेदिनी) इत्येकं धनुरादेः । द्रुमो वृक्षः, शैलः शिलोच्चयः अर्को दिवाकरः एते अद्रयः स्युः । अत्ति, अद्यते वा अदेः कर्तरि कर्मणि ना "अदिशदीति" क्रिनि, अद्रिः, द्वित्वे अद्री, बहुत्वे अद्रयः "अद्रिस्तु पर्वते । सूर्ये शाखिनि च" (इति हैमः) इत्येकं द्रुमादीनाम् । स्त्रीस्तनो युवतीकुचः, अब्दो वारिदः एतौ पयोधरौ स्याताम् । भगनीति "पचाद्यचि" धरः पयसोधरः पयोधरः द्वित्वे पयोधरौ "पयोधरः कोपकारे नारिकेले स्तनेऽपि च । कशेरुमेघयोः पुंसि" (इति मेदिनी) इत्येकं कामिनीकुचादेः ॥ १७२ ॥

अंधेरा, वैरी, दानव, भेट, हाथ, किरण, पराजय या तरङ्ग, बाण, वार, कोना आदि.

(ध्वान्तारिदानवा) वृत्रा (बलिहस्तांशवः) कराः । पु. † पु.
प्रदरा(भङ्गनारीरुग्बाणा) अस्राः (कचा अपि) ॥१७३॥ पु

ध्वेति—ध्वान्तः अन्धकारः, अरिः शत्रुः, दानवो दनुजभेदः एते वृत्राः स्युः । वर्तते, वृतेः कर्तरि "स्फायितञ्चिवञ्चीति" रकि, वृणोतीति विग्रहे तु वृणोतेः कर्तरि बाहुलकाद्रक् वा वृत्रः वृत्रो वा द्वित्वे वृत्रौ, वृत्रौ वा बहुत्वे वृत्राः, वृत्रा वा "वृत्रो रिपौ घने ध्वान्ते शैलभेदे च दानवे" (इति मेदिनी) इत्येकं ध्वान्तादीनाम् । बली राजग्राह्यो भागः, हस्तः पाणिः, अंशुर्मयूखः एते कराः स्युः । कीर्यते, किरतेः कर्मणि "ऋदोरप्" इत्यपि, गुणे, रपरत्वे च, करोतीति विग्रहे तु "पचाद्यचि" वा करः द्वित्वे करौ, बहुत्वे कराः "करो वर्षोपले रश्मौ पाणौ प्रत्यायशुण्डयोः" (इति मेदिनी) इत्येकं बल्यादीनाम् । भङ्गः पराजयस्तरङ्गो वा नारीरुक् रमणीरोगविशेषः बाणो विशिखः एते प्रदराः स्युः । प्रदरणम्, प्रदीर्यतेऽनेनेति वा प्रपूर्वकाद्दृणातेर्भावसाधनयोः "ऋदोरप्" इत्यपि, गुणे, रपरत्वे च प्रदरः, द्वित्वे प्रदरौ, बहुत्वे प्रदराः "प्रदरो रोगभेदे स्याद्विदारे शरभङ्गयोः" (इति मेदिनी) इत्येकं भङ्गादीनाम् । कचाः केशाः, अपिशब्दादश्रूणि कोणाश्च एते अस्राः स्युः । अस्यते, असेः कर्मणि बाहुलकाद्रकि, अस्रः द्वित्वे अस्रौ, बहुत्वे अस्राः "अस्रः कोणे, कचे पुंसि क्लीबमश्रुणि शोणिते" (इति मेदिनी) इत्येकं कचादीनाम् ॥ १७३ ॥

विना सींग का बैल, विनादाढी मूंछ का पुरुष, सोना, धन, पलग, परिवार.

(अजातशृङ्गो गौः कालेऽप्यश्मश्रुर्ना च) तूबरौ । पु.
(स्वर्णोऽपि) राः परिकरः (पर्यङ्कपरिवारयोः) ॥ १७४ ॥ पु. पु.

† "अर्थागमो भवेदायो भागधेयो बलिः करः" (इति हलायुध) ॥

अजेति–काले इत्युभाभ्यां संबध्यते, यौवनसमये न जातं उत्पन्नं शृङ्गं विषाणमस्त्यस्येति 'अजातशृङ्गो गौर्वृषभः, अश्मश्रुः श्मश्रुविहीनो ना पुरुषश्च उभौ तूवरौ स्याताम्। तौति, तौतेः कर्त्तरि बाहुलकाद्वरे, दीर्घे च तनोतीति विग्रहे तु बाहुलकाड्डू प्रत्यये तूः वृणोति, व्रियते वा वृणोतेः कर्तरि अचि, कर्मणि अपि, वा वरः तूश्चासौ वरश्चाच्छादको वा तूवरः "तूवरो दन्तोष्ठ्यमध्यो ग्रन्थकृता पठितः। वस्तुतस्तु पवर्गाद्यमध्यः। वेदे तथा दर्शनात् "अश्वस्तूपरो गोमृगः" (इति पीयूषव्याख्यातोऽवसेयम्) तूवरोऽश्मश्रुपुरुषे प्रौढाशृङ्गगवेऽपि च। पुरुषे व्यञ्जनत्यक्ते स्यात्कषायरसेऽपि च" (इति मेदिनी) इत्येकमजातशृङ्गादेः। स्वर्णे काञ्चने अपिशब्दाद्वित्ते च राः स्यात्। राति सुखम्, रायते वा रातेः कर्तरि कर्मणि वा "रातेर्डैः" इति डै प्रत्यये डित्त्वाट्टिलोपे "रायो हलि" इत्याकारान्तादेशे, रुत्वे, विसर्गे राः "राः पुंसि स्वर्णवित्तयोः" (इति मेदिनी) इत्येकं हिरण्यादेः। पर्यङ्कः मञ्चः परिवारः परिजनः उभयोः 'परिकरः' स्यात्। परिकीर्यते परिपूर्वकात्किरतेः कर्मणि "ऋदोरप्" इत्यपि, परिकीर्यतेऽनेनेति विग्रहे तु करणे "पुंसीति" घे वा गुणे, रपरत्वे च परिकरः "भवेत्परिकरो व्राते पर्यङ्कपरिवारयोः। प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि" (इति विश्वः) इत्येकं पर्यङ्कादेः ॥ १७४ ॥

शुद्धमोती, वायु, चितकबरा, प्रतिज्ञा, युद्ध, सुभाषा, आपदा.

(मुक्ताशुद्धौ च) तारः[पु.] स्याच्छारो[पु.] (वायौ स तु त्रिषु ।
कर्बुरे) (ऽथ प्रतिज्ञाजिसंविदापत्सु) संगरः[पु.] ॥ १७५ ॥

मुक्तेति–मुक्तायाः शुद्धिस्तस्याम्, चशब्दात्तरणशुद्धमौक्तिकरजतादौ च तारः स्यात् तारयति, तार्य्यते, अनेनेति वा तारयतेः कर्तरि पचाद्यचि, कर्मणि घञि, साधने 'घे' वा णिलोपे च तारः "तारो मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके । तारं च रजतेऽन्युच्चस्वरेऽप्यन्यवदीरितम् । ऋक्षाक्षिमध्ययोस्तारा सुग्रीवगुरुयोपितोः । बुद्धदेव्यां मता तारा" (इति विश्वः) इत्येकं शुद्धमौक्तिकादेः। वायौ समीरणे शारः पुमान्स्यात्। स तु कर्बुरे शवले त्रिषु त्रिलिङ्ग्यां स्यात्। शृणाति, शीर्यतेऽनेनेति वा शृणातेः कर्तरि, करणे वा "शॄ वायुवर्णनिवृत्तेषु" घञि, वृद्धौ, रपरत्वे च शारः "शारः स्याच्छबले वाच्यलिङ्गः पुंसि समीरणे" (इति मेदिनी) इत्येकं वाय्वादेः अथेत्यनन्तरम् प्रतिज्ञा कर्तव्योपदेशः, आज्ञा वा आजिः संग्रामः, संवित्तु भाषा क्रियाकारो वा आपत् विपत्तिः एष्वर्थेषु संगरः स्यात्। संगरणम्, संगीर्यते, अनेनेति वा संपूर्वकाद्गृणातेर्भावकर्मसाधनेषु "ऋदोरप्" इत्यपि, "पुंसीति" घे वा गुणे रपरत्वे च संगरः "संगरो युधि चापदि । क्रियाकारे विषे चाङ्गीकारे क्लीबं शमीफले" (इति मेदिनी) इत्येकं प्रतिज्ञानादेः ॥ १७५ ॥

मन्त्रभाग, गुप्तवाद, सूर्य, यज्ञ, बाण, यज्ञस्तम्भ का टुकडा, गुह्येन्द्रिय, विष्ठादि

पु. पु.
(वेदभेदे गुह्यवादे) मन्त्रो मित्रो (रवावपि)।
पु. पु.
(मखेषु यूपखण्डेऽपि) स्वरु (र्गुह्ये) ऽप्यवस्करः ॥ १७६॥

वयिति–वेदभेदे वेदविशेषे, गुह्यवादे गुप्तवादे रहसि कर्तव्यनिश्चये वा मन्त्रः स्यात् । मन्त्रणम्, मन्त्र्यते वा मन्त्रयतेर्भावकर्मणोर्घञि, नुमागमे, परसवर्णो च मन्त्रः "मन्त्रोवेदविशेषे स्याद्देवादीनां च साधने । गुह्यवादेऽपि च पुमान्" (इति मेदिनी) इत्येकं वेदभेदादेः । रवौसूर्ये अपिशब्दात्सुहृदि च मित्रः स्यात् । मेद्यति, मिदेः कर्तरि "अमिचिमिदिशसिभ्यः क्तः" इति क्ते, दस्य चर्त्वेन तकारे च मित्रः "मित्रं सुहृदि न द्वयोः । सूर्ये पुंसि" (इति मेदिनी) इत्येकं सूर्यादीनाम् । मखो यागः, इषुर्बाणः यूपखण्डस्तक्ष्यमाणयूपस्य प्रथमपतितशकलः एषां समाहारद्वन्द्वे मखेषु यूपखण्डम्, तस्मिन्, अपिशब्दाद्भिदुरे च स्वरुः स्यात् । स्वरति, स्वर्यते वा स्वरतेः कर्तरि कर्मणि वा "शृस्वृस्निहीति" उ प्रत्यये, गुणे, रपरत्वे च स्वरुः "स्वरुः पुमान् यूपखण्डे भिदुरेऽप्यध्वरे शरे" (इति मेदिनी) इत्येकं मखादेः । गुह्ये उपस्थे, अपिशब्दाद्वर्चस्के च अवस्करः स्यात् । अवोऽधः कीर्यते, अवपूर्वकात्किरतेः कर्मणि "ऋदोरप्" इत्यपि, गुणे, रपरत्वे, "वर्चस्केऽवस्करः" इति सुडागमे च नवस्करः "अवस्करोऽपि वर्चस्के गुह्ये" (इति मेदिनी) इत्येकमवस्करादेः ॥ १७६॥

दक्कादिकों की ध्वनि, गजेन्द्रों की गर्जना, अभियोग, चौर्य, कवचादिधारण.

पु.
आडम्बर(स्तूर्यरवे गजेन्द्राणां च गर्जिते)।
पु.
अभिहारो (ऽभियोगे च चौर्ये संनहनेऽपि च) ॥१७७॥

आडमिति–तूर्यरवे मृदङ्गमुरजादिवाद्यध्वनौ, गजेन्द्राणां मत्तमातङ्गानां गर्जिते ...ने, चशब्दात्समारम्भेऽपि आडम्बरः स्यात् । आडम्ब्यते, आङ् पूर्वकाद् डम्बयते- ...रादिकाद्भावकर्मणोर्घञि आडम्बस्तं रातीति विग्रहे "आतोऽनुपेति" के आलोपे आडम्बरः "आडम्बरः समारम्भे गजगर्जिततूर्ययोः" (इति विश्वः) इत्येकं ...रवादेः । अभियोगे अभिगम्याक्रमणे, चौर्ये चोरकर्मणि, संनहने कवचादिधारणे ...े च अभिहारः स्यात् । अभिहरणम्, अभिपूर्वकाद्धरतेर्भावे घञि, वृद्धौ, रपरत्वे च ...भिहारः स्यादित्येकमभियोगादेः ॥ १७७ ॥

...जन, तल्लवारका स्यान, उपकरण, वृक्ष, मूठी परिमाण कुश, पीठाआदि आसन.

पु.
(स्याज्जङ्गमे) परीवारः (खड्गकोशे परिच्छदे)।
पु.
विष्टरो(विटपी दर्भमुष्टिः पीठाद्यमासनम्) ॥ १७८ ॥

स्यादिति—जङ्गमे, परिजने, खड्गकोशे करवालकोशे, परिच्छदे उपकरणे च परीवारः स्यात् । परिवारणम्, परिवार्यतेऽनेनेति वा परिपूर्वकाद् वृणोतेः स्वार्थणयन्ताद्भावे, साधने वा घञि, दीर्घे, णिलोपे च परीवारः "परीवारो परिजने खड्गकोशे परिच्छदे" (इति मेदिनी) इत्येकं जङ्गमादेः । विटपी पादपः, दर्भमुष्टिः मुष्टिकापरिमाणदर्भः, पीठमाद्यं यस्य तद्गासनं च 'विष्टरः' स्यात् । विस्तीर्यते, विपूर्वकात्स्तृणातेः कर्मणि, "वृक्षासनयोर्विष्टरः" इत्यपि, स्त्रः सस्य षत्वे ष्टुत्वे च निपातिते विष्टरः "विष्टरो वृक्ष आसनं च" इत्येकं वृक्षादेः ॥ १७८ ॥

दरवाजा, द्वारपाल, ड्योढीदारिन, विशाल, नेवला, विष्णु, पीलारंग.

(द्वारि द्वाःस्थे) प्रतीहारः (प्रतीहार्यप्यनन्तरे) ।
(विपुले नकुले विष्णौ) बभ्रुः (स्यात्पिङ्गले त्रिषु) ॥ १७९ ॥

द्वेति—द्वारि द्वारे, द्वाःस्थे द्वारपाले च प्रतीहारः स्यात् । अनन्तरे द्वास्थे प्रतीहार्यपि स्यात् । प्रतिह्रियतेऽनेन, अत्रेति वा प्रतिपूर्वकाद्धरतेः साधनाधारयोर्घञि वृद्धौ, रपरत्वे "उपसर्गस्येति" दीर्घे च प्रतीहारः, गौरादित्वान्ङीपि च प्रतीहारी "प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति" (इति मेदिनी) इत्येकं द्वारादीनाम् । विपुले विशाले, नकुले 'नेवला' इति ख्याते, विष्णौ सर्वव्यापि परमेश्वरे बभ्रुः पुमान्स्यात् । पिङ्गले पीतवर्णे त्रिषु त्रिलिङ्ग्यां स्यात् । भरति, बिभर्ति वा भृञः कर्तरि "कुर्भ्रश्चेति" कौ, द्वित्वे, अभ्यासऋवर्णस्यादादेशे, रपरत्वे, रलोपे, जश्त्वे, यणादेशे च बभ्रुः "बभ्रुर्ना नकुले विष्णौ विपुले पिङ्गले त्रिषु" (इति वलशर्मा) इत्येकं विपुलादेः ॥ १७९ ॥

सामर्थ्य, स्थिराश, न्याय्य, श्रेष्ठ, जूआरी, बाजी, जूआ.

सारो (बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु) ।
दुरोदरो (द्यूतकारे पणे) (द्यूते) दुरोदरम् ॥ १८० ॥

सेति—बले स्थौल्ये, सामर्थ्ये, सैन्ये वा स्थिरांशे वृक्षादेः स्थिरांशे च सारः पुमान्स्यात् । न्याय्ये न्याययुक्ते क्लीबं नपुंसकम्, वरे श्रेष्ठे त्रिषु त्रिलिङ्ग्यां स्यात् । सरतेः कर्तरि "सृ स्थिरे" इति घञि, वृद्धौ, रपरत्वे च सारः "सारो बले स्थिरांशे च मज्जि पुंसि जले धने । न्याय्ये क्लीबं त्रिषु वरे" (इति मेदिनी) इत्येकं बलादीनाम् । द्यूतकारे कैतवकारके, पणे ग्रहे च दुरोदरः स्यात्, द्यूते तु दुरोदरं स्यात् । दुष्टमासमन्ताद्दुदरमस्येति दुरोदरः "दुरोदरं द्यूतभेदे द्यूतकृत्पणयोः पुमान्" (इति मेदिनी) "आश्रित्य दुर्गं गिरिकन्दरोदरं क्रीडन्त्यमुष्मिन्सततं दरोदरमिति यमस्त्रिरकारोऽर्मीति" गोवर्धनाचार्यो व्याख्यातवानित्येकं द्यूतकारादेः ॥ १८० ॥

पु.न.

महावन, दुर्गम मार्ग, परसम्पत्ति का नहीं सहने वाला आदि (महारण्ये दुर्गपथे) कान्तारः (पुन्नपुंसकम्) ।
पु.
मत्सरो(ऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु) ॥ १८१ ॥

मेति—महारण्ये महावने, दुर्गपथे दुर्गमवर्त्मनि च कान्तारः पुन्नपुंसकं स्यात् । कान्ता अरा अस्य, कान्तं मनोज्ञमृच्छति, इयर्ति वा कान्तपूर्वकादृच्छतेरियतेर्वा "कर्मण्यण्" इत्यणि, उपपदसमासे, विभक्तिलोपे, वृद्धौ, रपरत्वे च कान्तारः "कान्तारोऽस्त्रीमहारण्ये बिले दुर्गमवर्त्मनि । पुंसि स्यादिक्षुभेदे" (इति मेदिनी) इत्येकं महारण्यादेः । अन्यशुभद्वेषे परशुभद्वेषे मत्सरः पुमान्स्यात् । तद्वानन्यशुभद्वेषवान्, कृपणः कदर्यश्चैतयोस्त्रिषु त्रिलिङ्गयां स्यात् । माद्यति परकृच्छ्रे, मदेः कर्तरि "कृभूमदिभ्यः कित्" इति सेर, दस्य चर्त्वेन तकारे च मत्सरः "मत्सरा मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान् । असह्यपरसंपत्तौ कृपणे चाभिधेयवत्" (इति मेदिनी) इत्येकमन्यशुभद्वेषादेः ॥ १८१ ॥

देवता से चाहा, श्रेष्ठ, थोड़ा प्यारा, बासका अँखुआ, करील, कलश. (देवाद्वृते) वरः (श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये) ।
(वंशाङ्कुरे)करीरो(ऽस्त्री तरुभेदे घटे च ना) ॥ १८२ ॥

दयिति—देवाद्वृते देवादभिलषिते वरः पुमान् स्यात् । श्रेष्ठे त्रिषु त्रिलिङ्गयां स्यात्, मनाक्प्रिये ईषत्प्रिये च क्लीबं नपुंसकं स्यात् । वरणम्, व्रियते वा वृणोतेर्भावे कर्मणि वा "ग्रहवृदृ" इत्यपि, वृणोतीति विग्रहे तु कर्तरि पचाद्यचि वा गुणे, रपरत्वे च वरः "वरो जामातरि वृतौ देवतादेरभीप्सिते षिङ्गे पुंसि त्रिषु श्रेष्ठे कुङ्कुमे तु नपुंसकम् । वरी प्रोक्ता शतावर्यां वरा च स्यात्फलत्रिके । मनागिष्टे वरं क्लीबं केचिदाहुस्तदव्ययम्" (इति मेदिनी) इत्येकं देवाद्वृतादेः । वंशाङ्कुरे वेणवङ्कुरे करीरः अस्त्री पुन्नपुंसकं स्यात्, तरुभेदे वृक्षभेदे, घटे कलशे च ना पुमान्स्यात् । किरति, कीर्यते, कृणाति वा किरतेः कृणातेर्वा कर्तरि कर्मणि वा "कॄशॄपॄकटीति" ईरनि, करिणमीरयतीति विग्रहे तु करिपूर्वकादीरयतेः कर्तरि "कर्मण्यण्" इत्यणि गुणे, रपरत्वे च करीरः "वंशाङ्कुरे करीरोऽस्त्रीवृक्षभिद्घटयोः पुमान् । करीरा चीरिकायान्तु दन्तमूले तु दन्तिनाम्" (इति मेदिनी) इत्येकं वंशाङ्कुरादेः ॥ १८२ ॥

पु.

सेनाका पृष्ठभाग या पुरोभाग, रक्षासूत्र, यम, पवन आदि. (ना चमूजघने हस्तसूत्रे) प्रतिसरो (ऽस्त्रियाम्) ।
(यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ १८३ ॥
शुकाहिकपिभेकेषु) हरि (र्ना कपिले त्रिषु) ॥

नेति—चमूजघने सेनापुरोभागे चमूपृष्ठे वा प्रतिसरो ना पुमान् स्यात् । हस्तसूत्रे करसूत्रेऽस्त्रियां पुन्नपुंसकं स्यात् । प्रतिसरति, प्रतिपूर्वकात्सरतेः कर्तरि पचाद्यचि, प्रतिस्त्रियतेऽनेनेति विग्रहे तु " पुंसीति " घे वा गुणे, रपरत्वे च प्रतिसरः " भवेत्प्रतिसरो मन्त्रभेदे माल्ये च कङ्कणे । व्रणशुद्धौ चमूपृष्ठे पुंसि न स्त्री तु मण्डले । आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः " (इति मेदिनी) इत्येकं चमूजघनादीनाम् । यमो यमराजः, अनिलो वायुः, इन्द्रो देवराजः, चन्द्रो निशापतिः, अर्कः सूर्यः, विष्णुर्नारायणः, सिंहो मृगेन्द्रः, अंशुः किरणः, वाजी अश्वः एषु, शुकः कीरः, अहिः सर्पः, कपिर्वानरः, भेको मण्डूकः एषु हरिः ना पुमान्स्यात् । कपिले पिङ्गले त्रिषु त्रिलिङ्ग्यां स्यात् । हरति, हृञः कर्तरि " अचइः " इतीप्रत्यये, गुणे, रपरत्वे च हरिः " हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु । सिंहाश्वकपिभेकाहिशुकलोकान्तरेषु च । हरिर्वाच्यवदाख्यातो हरित्कपिलवर्णयोः " (इति विश्वः) इत्येकं यमादीनाम् ॥ १८३ । १ ॥

सिटकी, खाड़, स. पत्थर, चलाना या विताना, चलना, देवपूजनविषयक उत्साह, पृथ्वी, वाणी, मदिरा, जल, नींद, आलस्य, धाई, धरती, आवला.

शर्करा (कर्परांशेऽपि) यात्रा (स्याद्यापने गतौ)॥ १८४

इरा (भूवाक्सुराप्सु) (स्या) त्तन्द्री (निद्राप्रमीलयोः

धात्री (स्यादुपमातापि क्षितिरप्यामलक्यपि) ॥ १८५

शरिति—कर्परांशे खर्परांशे अपिशब्दादुपलाखण्डविकृतिशर्करान्वितदेशादौ शर्करा स्यात् । शृणाति, शीर्यते वा शृणातेः कर्तरि कर्मणि वा " अः कर इति करनि, गुणे, रपरत्वे च शर्करा " शर्कराखण्डविकृतावुपलाकर्परांशे शर्करान्वितदेशेऽपि रुग्भेदे शकलेऽपि च " (इति मेदिनी) इत्येकं कर्परांशे यापने प्रापणे, चालने, निःसारणे वा गतौ गमने च यात्रा स्यात् । या यायतेऽनयेति वा यातेर्भावसाधनयोः " हुयामेति " त्रनि, टापि यात्रा " य यापनोपाये गतौ देवार्चनोत्सवे " (इति विश्वः) इत्येकं यापनादेः । भूः वाक् वाणी, सुरा मदिरा, आपो जलम् एषु इरा स्यात् । एति, ईयते वा एतेः कर्मणि वा " ऋज्रेन्द्राग्रेति " रनि, गुणाभावे निपातिते, टापि च इरा

† " कोकिल तावद्दिरसान्यापय दिवसान् वनान्तरे निवसन् । यावदलिकुलमालः कोपि र लमति " (इति भामिनीविलास) ॥

१—" पीताय यदि बालस्य विदध्यादुपमातरम् । सुविचार्य गुणान्दोषान्कुर्याद्धात्रीं तदेदृशीम् मध्यवयसां सच्छीलां मुदितां सदा । शुद्धदुग्धां बहुक्षीरां सवत्सामतिवत्सलाम् । स्वा संतुष्टां कुलीनां सज्जनात्मजाम् । कैतवेन परित्यक्तां निजपुत्रदृशा शिशौ " (इति भावप्रकाश.

मद्ये च वारिणि" इत्येकं पृथिव्यादेः । निद्रा शयनम्, प्रमीला अत्यन्तश्रमादिना मोहप्राया चैतयोः तन्द्री स्यात्। तत् राति, द्राति वा तत्पूर्वकाद् रातेर्द्रातेर्वा "आतोऽनुपेति" के, आलोपे तदो नान्तत्वे निपातिते गौरादित्वान्ङीपि च तन्द्री, टापि तु तन्द्रापि, तन्द्रायाः करणमिति विग्रहे तु "तत्करोति" इति णिजन्तात्कर्तरि "अच इः" तन्द्रिः "कृदिकारादिति" वा ङीपि तन्द्री "तन्द्रिस्तन्द्रीस्तन्द्रा" (इति द्विरूपकोषः) इत्येकं निद्राप्रमीलयोः । उपमाता दुग्धपायिका, क्षितिः पृथ्वी, आमलकी तिष्यफला अपिशब्दाज्जननी च धात्री स्यात् । धीयते, धेटः कर्मणि, "धः कर्मणि ष्ट्रन्" इति ष्ट्रनि, आत्वे, षित्वान्ङीपि च धात्री "धात्री जनन्यामलकी वसुमत्युपमातृषु" (इति मेदिनी) इत्येकमुपमात्रादेः ॥ १८४ । १८५ ॥

अङ्गहीन, नटी, स. वेश्या, मधु- मक्खी, भटकटैया, निर्दय, नीच, थोड़ा, उपकरण, स्वल्प, माप, समग्र, निश्चित.

क्षुद्रा (व्यङ्गा नटी वेश्या सरघा कण्टकारिका)।

(त्रिषु क्रूरेऽधमेऽल्पेऽपि) क्षुद्रो मात्रा (परिच्छदे १८६॥

अल्पे च परिमाणे स्या) न्मात्रं (कार्त्स्न्येऽवधारणे)।

क्षुद्रेति—व्यङ्गा अङ्गहीना, नटी शैलूषी, वेश्या गणिका, सरघा मधुमक्षिका कण्टकारिका बृहती च क्षुद्रा स्यात् । क्रूरे नृशंसे, अधमे नीचे, अल्पे स्तोके अपिशब्दात्कृपणे च क्षुद्रस्त्रिषु त्रिलिङ्गयां स्यात्। क्षुणत्ति, क्षुद्यते वा क्षुणत्तेः कर्तरि, कर्मणि वा "स्फायितञ्चीति" रकि, टापि च क्षुद्रा टाबभावे तु क्षुद्रः "क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् । क्षुद्राव्यङ्गानटीकण्टकारिकासरघासु च । चाङ्गेरीवेश्ययोर्हिंस्रामक्षिकामात्रयोरपि" (इति विश्वः) इत्येकं व्यङ्गादीनाम्। परिच्छदे उपकरणे, अल्पे क्षुल्लके, परिमाणे परितो माने च सा मात्रा स्यात्। कार्त्स्न्ये सामग्र्ये अवधारणे निश्चिते च मात्रं स्यात् । माति, मिमीते, मीयतेऽनयेति वा मातेर्माङो वा कर्तृसाधनयोः "हुयामेति" त्रनि, टापि च मात्रा, टाबभावे तु मात्रम् "मात्रा कर्णविभूषायां वित्ते माने परिच्छदे । अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे" (इति मेदिनी) इत्येकं परिच्छदादीनाम् ॥ १८६ । ३ ॥

चित्रसारी, आश्चर्य, कमर, स्त्री, उचित, भाजन, वाहन, पक्ष, हुक्म, ग्रन्थ, हथियार, लोहा.

(आलेख्याश्चर्ययो)श्चित्रं कलत्रं (श्रोणिभार्ययोः) १८७॥

(योग्यभाजनयोः) पात्रं पत्रं (वाहनपक्षयोः)।

(निदेशग्रन्थयोः)शास्त्रं[1] शस्त्र (मायुधलोहयोः) ॥१८८॥

[1] "शासनादनिश देवि ! वर्णाश्रमनिवासिनाम् । तारणात्सर्वपापेभ्यः शास्त्रमित्यभिधीयते" (इति कुलार्णवतन्त्रम्) ॥

एति—आलेख्यं भित्त्यादौ नानावर्णप्रलेखनम्, आश्चर्यमद्भुतं चैतयोश्चित्रं स्यात् । चिनोति, चीयते वा चिनोतेः कर्तरि कर्मणि वा "अमिचीति" क्ते, कित्त्वादगुणाभावे च चित्रम् "चित्राखुपर्णीगोडुम्बासुभद्रादन्तिकासु च । मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम् । तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि ॥ तद्युक्तयोर्वाच्यलिङ्गं चित्री झिल्ल्यां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालिखनभेदयोः" (इति मेदिनी) इत्येकमालेख्यादेः । श्रोणिः कटिः भार्या जाया चैतयोः कलत्रं स्यात् । गडति, गड्यते वा गडेः कर्तृकर्मणोः "गडेरादेश्च कः" इत्यत्रनि, गस्य कादेशे, डलयोरैक्याड्डस्य लत्वे च, कलं त्रायते, कलपूर्वकात्त्रैङः कर्तरि "आतोऽनुपेति" के, आलोपे च । कडति, कड्यते वा कडेः कर्तरि कर्मणि वा बाहुलकादत्रनि, डस्य लत्वे च वा कलत्रम् "दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः" (इति रभसः) इत्येकं कट्यादेः । योग्यो निपुणः उचितो वा, भाजनं भाण्डं चानयोः पात्रं स्यात् । पाति, पायते, पीयतेऽनेनेति वा पातेः कर्तृकर्मणोः पिबतेः साधने वा "दादिभ्यश्छन्दसि" इति ष्ट्रनि पात्रम् "पात्रन्तु भाजने योग्ये पात्रं तीरद्वयान्तरे । पात्रं स्रुवादौ पर्णे च राजमन्त्रिणि चेष्यते" (इति विश्वः) इत्येकं योग्यादेः । वाहनं यानम्, पक्षः शुक्लादिश्चैतयोः पत्रं स्यात् । पतन्त्यनेन, पततेः करणे "दाम्नीति" ष्ट्रनि पत्रम् "पत्रन्तु वाहने पर्णे पक्षे च शरपक्षिणोः" (इति विश्वः) इत्येकं वाहनादेः । निदेश आज्ञा, ग्रन्थो व्याकरणादिश्चानयोः शास्त्रं स्यात् । शासनम्, शिष्यतेऽनेनेति वा शासेर्भावसाधनयोः "सर्वधातुभ्य इति" ष्ट्रनि शास्त्रमित्येकं निदेशादेः । आयुधं प्रहरणम्, लोहः कालायसं चैतयोः शस्त्रं स्यात् । शस्यतेऽनेन, शसेः साधने "दाम्नीति" ष्ट्रनि शस्त्रम् "शस्त्रं लोहास्त्रयोः क्लीबं छुरिकायां तु योषिति" (इति मेदिनी) इत्येकमायुधादेः ॥ १८७।१८८ ॥

जटा, वस्त्रभेद, भार्या, शरीर, **(स्या) (ज्जटांशुकयो) र्नेत्रं क्षेत्रं (पत्नीशरीरयोः)** । (न. न.)

सूअर व हलका मुखाग्र, नाम, वंश आदि. **(मुखाग्रे क्रोडहलयोः)पोत्रं गोत्रं (च नाम्नि च)**॥१८६॥ (न. न.)

स्यादिति—जटा संलग्नकचा, अंशुकं वसनं चैतयोर्नेत्रं स्यात् । नयति, नीयते, अनेनेति वा नयतेः कर्तृकर्मकरणेषु ष्ट्रनि, गुणे च नेत्रम् "नेत्रं मथिगुणे वस्त्रे तरुमूले विलोचने । नेत्रं रथे च नाड्यां च नेत्री नेतरि भेद्यवत्" (इति विश्वः) "नेत्रं मथिगुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां च नेत्री नाड्यां च योषिति" (इति मेदिनी) इत्येकं जटादेः । पत्नी धर्मपत्नी, शरीरं कलेवरं चानयोः क्षेत्रं स्यात् । क्षयति, क्षियति, क्षीयते, अनेन वा क्षयतेः क्षियतेर्वा कर्तृकर्मसाधनेषु "सर्वधातुभ्यः ष्ट्रन्" इति ष्ट्रनि गुणे च क्षेत्रम् "क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" (इति मेदिनी) इत्येकं पत्न्यादेः । क्रोडहलयोः सूकरलाङ्गलयोः

मुखाग्रे 'पात्रे' स्यात् । पूयतेऽनेन पुनातेः करणे "हलसूकरयोः पुवः" इति ष्ट्रनि, गुणे च पोत्रम् "पोत्रं वस्त्रे मुखाग्रे च सूकरस्य हलस्य च" (इति विश्वः) इत्येकं क्रोडहलमुखाग्रादेः । नाम्नि नामधेये चशब्दात् कुलसंभावनीयबोधकाननक्षेत्रादावपि गोत्रं स्यात् । गूयतेऽनेन, गुङः साधने ष्ट्रनि, गुणे च गोत्रम् "गोत्रा भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोः । संभावनीयबोधे च काननक्षेत्रवर्त्मसु" (इति मेदिनी) इत्येकमभिधानादेः ॥ १८६ ॥

ढापना, यज्ञ, नित्यदान, जंगल, छल, शब्दादि विषय, काया, आकाश, वस्त्र.

न. **सत्र (माच्छादने यज्ञे सदादाने वनेऽपि च) ।**
अजिरं(विषये काये)ऽप्यम्बरं(व्योम्नि वाससि)॥ १९० ॥

सदिति—आच्छादने अपवारणे वसने वा, यज्ञे यागे, सदादाने नित्यदाने, वने अरण्ये, अपिशब्दात्कैतवे च सत्रं स्यात् । सीदन्त्यनेन, अत्रेति वा सदेः साधनाधारयोः ष्ट्रनि, दस्य चर्त्वेन तकारे च सत्रम् । "सत्रं यज्ञे सदादानछादनारण्यकैतवे" (इति मेदिनी) इत्येकमाच्छादनादेः । विषये शब्दस्पर्शरूपादौ, काये देहे अपिशब्दात्प्राङ्गणवातदर्दुरेषुच अजिरं स्यात् । अजन्त्यत्र, अनेन वा अजतेराधारे साधने वा "अजिरशिशिरेति" किरचि, वीभावाभावे च अजिरम् "अजिरं प्राङ्गणे वाते विषये दर्दुरे तनौ । स्त्री चण्डयाम्" (इति मेदिनी) इत्येकं विषयादेः । व्योम्नि आकाशे, वाससि वस्त्रे च अम्बरं स्यात् । अम्बते, अम्ब्यते वा "अबि शब्दे" अस्मादौवादिकात्कर्तरि, कर्मणि वा बाहुलकादरे, नुमागमे च अम्बरम् "अम्बरं वाससि व्योम्नि कार्पासे च सुगन्धके" (इति विश्वः) इत्येकमाकाशादेः॥ १९० ॥

राज्यादि, मोक्षादि, जल, दूध, सोनाआदि, द्वारमात्र या नगरद्वारआदि.

न. न. न. **चक्रं (राष्ट्रे)ऽप्यक्षरं (तु मोक्षेऽपि) क्षीर (मप्सु च) ।**
पु. पु. न. **(स्वर्णेऽपि) भूरिचन्द्रौ (द्वौ)(द्वारमात्रे तु) गोपुरम् १९१ ॥**

चेति—राष्ट्रे, राज्ये, देशे वा अपिशब्दात् व्रजसैन्यरथाङ्गदम्भान्तरकुलालाद्युपकरणादौ च चक्रं स्यात् । क्रियतेऽनेन, "घञर्थे कः" इति के "के क्वादीनामिति" द्वित्वे च चक्रम् "चक्रः कोके पुमान् क्लीवं व्रजे सैन्यरथाङ्गयोः । राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः । जलावर्तेऽपि" (इति मेदिनी) इत्येकं राष्ट्रादीनाम् । मोक्षे अपवर्गे अपिशब्दादकारादिवर्णाव्ययब्रह्माच्युताकाशधर्मतपस्यामूलकारणेषु च अक्षरं स्यात् । न क्षरति, नञ्पूर्वकात्क्षरतेः कर्तरि "पचाद्यचि" अश्नुते, इति विग्रहे तु "अशेः सरः" इति सरे वा "व्रश्चेति" षत्वे, "षढोरिति" कत्वे, षत्वे, क्षत्वे, च अक्षरम् "मोक्षेऽपवर्गे ऽब्रह्मण्यच्युतेऽक्षरम्" (इत्यनेकार्थ-

कोषः) इत्येकं मोक्षादेः । अप्सु जले चशब्दाद्दुग्धे च 'क्षीरं' स्यात् । घस्यते, घसतेः कर्मणि " घसेः किच्चेति " ईरनि " गमहन " इत्युपधालोपे, " खरि चेति " घस्य कत्वे, " शासिवसीति " षत्वे, क्षत्वे च क्षीरम् " क्षीरं दुग्धे जले " (इति मेदिनी) इत्येकं जलादेः । स्वर्णे सुवर्णे अपिशब्दाद् वासुदेवहरविधिकर्पूरकाम्पिल्ल-सुधांशुचर्वादौ च भूरिचन्द्रावेतौ द्वौ स्याताम् । भवति, भूयते वा भवतेर्भावयतेर्वा कर्तरि भावादौ च " अदिशदीति " क्रिनि, किद्वादूगुणाभावे च भूरिः " भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि । नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकः " (इति मेदिनी) चन्दति चन्देः कर्तरि " स्फायितञ्चीति " रकि, नुमागमे च चन्द्रः "चन्द्रः कर्पूरकाम्पिल्लसुधांशुस्वर्णचरुषु " (इति मेदिनी) इति द्वे काञ्चनादेः । द्वारमात्रे, पुरद्वारे च गोपुरं स्यात् । पुरति, पुरेः कर्तरि " इगुपधेति " के किद्वादूगुणाभावे च पुरम्, गवां पुरम् गोपुरम् "गोपुरं द्वारि पूर्द्वारि कैवर्ती मुस्तकेऽपि च" (इति मेदिनी) इत्येकं द्वारमात्रादेः ॥ १६१ ॥

गुफा, कपट, (गुहादम्भौ) गह्वरे (न.) (द्वे) (रहोऽन्तिक) मुपह्वरे (न.) ।
एकान्त, समीप,
अगाड़ी, अधिक, ऊपर, घर, नगर (पुरोऽधिकमुप) र्यग्राण्य (न.) (गारे नगरे) पुरम् (न.) ॥ १६२ ॥
विषय, उपद्रव. न. मन्दिरं (चाथ) राष्ट्रो (पु. न.) (ऽस्त्री विषये स्यादुपद्रवे) ।

ग्विति—गुहा देवखातम्, दम्भो व्याजश्चेति द्वे नाम्नी गह्वरे गह्वरपदवाच्ये स्याताम् । गाह्यते, गाहतेः कर्मणि " छित्वरच्छत्वरेति " ष्वरचि ह्रस्वत्वे निपातिते च गह्वरम् द्वित्वे गह्वरे " गह्वरस्तु गुहादम्भनिकुञ्जगहनेष्वपि " (इति विश्वः) इत्येकं गुहादेः । रहो विजनम्, अन्तिकं निकटं चेति द्वे उपह्वरे स्याताम् । उपह्वरन्त्यत्र, उपपूर्वकाद् ह्वरतेराधारे " पुंसीति " घे, गुणे, रपरत्वे च उपह्वरम्, द्वित्वे उपह्वरे " उपह्वरं समीपे स्यादेकान्ते च नपुंसकम् " (इति मेदिनी) इत्येकमेकान्तादेः । पुरः पुरस्तात्, अधिकं प्राज्यम्, उपरि उपरिष्टादिमानि त्राणि अग्राणि स्युः । अंगति, अंग्यते वा अंगतेः कर्तरि कर्मणि वा " ऋज्रेन्द्राग्रेति " रनि, नलोपे निपातिते च अग्रम्, द्वित्वे अग्रे, वहुत्वे अग्राणि " अग्रं पुरस्तादुपरिपरिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत् " (इति मेदिनी) इत्येकं पुरस्तादादेः । अगारे आलये नगरे नगर्यां च पुरं, मन्दिरं च स्यात् । पुरति, पुरेः कर्तरि " इगुपधेति " के, किद्वादूगुणाभावे च पिपर्तीति विग्रहे तु " मूलविभुजादित्वात् " के वा उदादेशे रपरत्वे च पुरम् " पुरं शरीरमित्याहुर्गृहोपरिगृहेपुरम् । पुरो गुग्गुलुगख्यातो नगरेऽपि पुरंपुरी " (इति भरणिः) मन्दतेऽत्र मन्देराधारे " इषिमदिमुदीति " किरचि, नुमागमे च मन्दिरम्

" मन्दिरं नगरेऽगारे क्लीवं ना मकरालये " (इति मेदिनी) इत्येकमगारादेः । अथे-त्यनन्तरं विषये जनपदे, उपद्रवे मरणादौ च राष्ट्रोऽस्त्री पुन्नपुंसकं स्यात् । राजनि, राजेः कर्तरि " सर्वधातुभ्यः ष्ट्रन् " इति ष्ट्रनि, " अश्चेति " पत्वे च राष्ट्रः " राष्ट्रं स्यादुपवर्तने । उपद्रवे क्लीवपुंसोः " (इति मेदिनी) इत्येकं विषयादेः ॥ १६२ । ½ ॥

डर, गड्हा, हीरा, वज्र आदि. — पु.न. पु.न.

दरो(ऽस्त्रियां भये श्वभ्रे) वज्रो (ऽस्त्री हीरके पवौ)१६३॥

देति—भये त्रासे, श्वभ्रे गर्ते च दरः अस्त्रियां पुन्नपुंसके स्यात् । दरणम्, दीर्यते वा दरतेर्दृणातेर्वा भावे, कर्मणि वा " ऋदोरप् " इत्यपि, गुणे, रपरत्वे च दरः "दरोऽस्त्री साध्वसे गर्ते कन्दरे तु दरी स्मृता । दराव्ययं मनागर्थे " (इति मेदिनी) इत्येकं भयादेः । हीरके " हीरा " इति ख्याते, पवौ कुलिशे च वज्रः अस्त्री पुन्नपुंसकं स्यात् । वजति, वजेः कर्तरि " ऋज्रेन्द्रेति " रनि, वज्रः, वज्रमपि " वज्रं स्याद्बालके धात्र्यां क्लीवं योगान्तरे पुमान् । वज्रा स्नुह्यां गुडूच्यां च वज्री स्नुह्यन्तरे स्मृता । दम्भोलौ हीरकोऽप्यस्त्री वज्रं त्रपुवरत्रयोः " (इति मेदिनी) इत्येकं हीरकादेः ॥ १६३ ॥

प्रधान, सिद्धान्त, कोली, बिछौना आदि — न.

तन्त्रं (प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे) ।

सामान, चवँर की डाडी, खस की टट्टी, शयन, आसन. — न.

औशीरं (चामरे दण्डेऽप्यौशीरं शयनासने) ॥ १६४ ॥

तनिति—प्रधाने स्वतन्त्रे महामात्रे परमात्मनि वा सिद्धान्ते राद्धान्ते, सूत्रवाये तन्तुवाये, परिच्छदे उपकरणादौ च तन्त्रं स्यात् । तननम्, तन्यते, अनेन वा तनोतेर्भावकर्मसाधनेषु ष्ट्रनि । तन्त्रणम्, तन्त्र्यते वा तन्त्रयतेर्भावे, कर्मणि वा घनि, अचि वा तन्त्रयतीति विग्रहे तु कर्तरि पचाद्यचि वा तन्त्रम् " तन्त्रं कुटुम्बकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे । प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे । श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके " (इति मेदिनी) इत्येकं प्रधानादेः । चामरे चमरसम्बन्धिनि दण्डे औशीरम्, शयनासने शयनं चासनं च शयनासनं तत्रापि औशीरं स्यात् । उश्यते, वशेः कर्मणि " वशेः कित् " इतीरनि, कित्वात्संप्रसारणे च उशीरं तदेव प्रज्ञाद्यणि, उशीरस्येदमिति विग्रहे तु " तस्येदम् " इत्यणि वा वृद्धौ च औशीरम् " औशीरं चामरे दण्डे औशीरं स्वापपीठयोः " (इत्यजयः) इत्येकं चामरदण्डादेः ॥ १६४ ॥

हाथीसूंड का अग्रभाग, बाजा का मुख, पानी, आकाश, तलवार की नोक, कमल, तीर्थ, कूट. — न

पुष्करं (करिहस्ताग्रे वाद्यभाण्डमुखे जले ।

व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः) ॥ १६५ ॥

ष्विति—करिहस्ताग्रे गजशुण्डाग्रे, वाद्यभाण्डमुखे वाद्यपात्रास्ये, जले पानीये, व्योम्नि आकाशे, खड्गफले असिफलके, पद्मे कमले, तीर्थे, औषधिविशेषे च पुष्करं स्यात् । पुष्णाति, पुष्यते, अनेन वा पुषेः कर्तरि, कर्मणि, करणे वा "पुषः कित्" इति करनि 'पुष्करम्' "पुष्करं द्वीपतीर्थाहिखगराजौषधान्तरे । तूर्यास्येऽसिफले काण्डे शुण्डाग्रे खे जलेऽम्बुजे" (इति हैमः) इत्येकं करिकराग्रादेः ॥ १९५ ॥

न.

अवकाश आदि. अन्तर (मवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये ।

छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च) १९६ ॥

अनिति—अवकाशादित्रयोदशार्थवाचकमन्तरं स्यात् । अन्तं राति अन्तपूर्वकाद्रातेः कर्तरि "आतोऽनुपेति" के, आलोपे च अन्तरम् । अवकाशे यथा 'अन्तरे हिमम्' अवधौ यथा 'मासान्तरे देयम्' परिधाने यथा अन्तरे—अन्तरा वा शाटकाः परिधानीयाः, अन्तर्द्धौ यथा 'पर्वतान्तरतो रविः' भेदे यथा 'यदन्तरं सर्षपशैलराजयोः' तादर्थ्ये यथा 'त्वदन्तरेण ऋणमेतत्' छिद्रे यथा 'परान्तरे प्रहर्तव्यम्' आत्मीये यथा 'अयमत्यन्तरो मम' विनार्थे यथा 'अन्तरेण पुरुषकारम्' बहिर्वाह्ये यथा 'अन्तरे चाण्डालगृहाः' अवसरे यथा 'अन्तरङ्गः सेवकः' मध्ये यथा 'आवयोरन्तरे जातः पर्वतः' अन्तरात्मनि यथा 'दृष्टोऽन्तरे ज्योतीरूपः' चशब्दात्सादृश्ये यथा 'हकारस्य घकारोऽन्तरतमः' इत्येकमवकाशादेः ॥ १९६ ॥

न. न

मोथा, कन्दविशेष बड़ा अँधेरा, घातुक, हिंसक, कठोर आदि. (मुस्तेपि) पिठरं (राजकशेरुण्यपि) नागरम् ।

न.

शार्वरं (त्वन्धतमसे घातुके भेद्यलिङ्गकम्) ॥ १९७ ॥

म्विति—मुस्ते मुस्तके, अपिशब्दान्मन्थानदण्डके, स्थावरविषभेदे सुगन्धद्रव्यादौ च पिठरं स्यात् । पेठति, पिठ्यते वा पिठेः कर्तरि कर्मणि वा बाहुलकादरे, गुणाभावे च पिठरम् "पिठरः स्थाल्यां ना क्लीबं मुस्तामन्थानदण्डयोः" (इति मेदिनी) इत्येकं मुस्तादेः । राजकशेरुणि कन्दविशेषे अपिशब्दान्मुस्तकशुण्ठीविदग्धादौ च नागरं स्यात् । नगरे भवम् "तत्र भवः" इत्यणि, वृद्धौ च, न अगं राति वा नकारेण "सुप्सुपा" इति समासे नागपूर्वकाद्रातेः "आतोऽनुपेति" के आलोपे च नागरम् "नागरं मुस्तके शुण्ठ्यां विदग्धे नगरोद्भवे" (इति मेदिनी) इत्येकं राजकशेर्वादेः । अन्धतमसे गाढ ध्वान्ते, घातुके हिंसके क्रूरे वा शार्वरं भेद्यलिङ्गकं वाच्यलिङ्गकं स्यात् । "स्वामी तु "घातुकेऽभे नृलिङ्गकम्" इति पठित्वा घातुकश्चासाविभश्च तत्र नृलिङ्गं पुंलिङ्गं व्याख्यातवानिति" शर्वर्यां भवम् "तत्र भवः" इत्यणि णित्त्वाद्वृद्धौ च शार्वरमित्येकमन्धतमसादेः ॥ १९७ ॥

लाल, सफेद, पीला, घावकरने वाला, कठिन नीच आदि.

पु.स.न. पु.स.न.
गौरो(ऽरुणे सिते पीते) (व्रणकार्य्ये) (प्यरुष्करः) ।
पु.स.न. पु.स.न.
जठरः (कठिनेऽपि स्या) (दधस्तादपि) चाधरः ॥ १९८ ॥

गाविति—अरुणे सूर्ये, सूर्यसारथौ, सन्ध्यारागे अव्यक्तरागे वा सिते श्वेते, पीते पीतवर्णे च गौरः स्यात्। गवते मनोऽत्र, गुङोऽधिकरणे "ऋज्रेन्द्रेति" रनि वृद्धित्वे निपातिते च। गूर्यतेऽनेनेति वा गुरतेः साधने "हलश्चेति" घञि, गुणे च गोर एव "प्रज्ञाद्यणि" वृद्धौ च गौरः "गौरः पीतेऽरुणे श्वेते विशुद्धे चाभिधेयवत्। ना श्वेत-सर्षपे चन्द्रे न द्वयोः पद्मकेसरे" (इति मेदिनी) इत्येकमरुणादेः। व्रणकारी क्षतकारी अपिशब्दाद्भल्लातकश्च अरुष्करः स्यात्। अरुःकरोति अरुष्पूर्वकात्कृञः कर्तरि "दिवा विभेति" टे, गुणे रपरत्वे "इणः षः" इति षत्वे च अरुष्करः "अरुष्करो व्रणकृति त्रिषु भल्लातके पुमान्" (इति मेदिनी) इत्येकं व्रणकार्यादेः। कठिने कठोरे अपि-शब्दात्कुक्षिबद्धयोश्च जठरः स्यात्। जायते, अस्मिन् वा जनेः कर्तर्याधारे च "जनेरर-ष्ठच" इत्यरे, नस्य ठत्वे च जठरः "जठरो न स्त्रियां कुक्षौ बद्धकत्र्वटयोस्त्रिपु" (इति मेदिनी) इत्येकं कठिनादे.। अधस्तादनूर्ध्वे अपिशब्दादोष्ठे हीने च अधरः स्यात्। न धरति नञ्पूर्वकाद्धृञः कर्तरि "पचाद्यचि" गुणे च। धरादुच्चात्कठिनादन्यो वा अधरः "अधरस्तु पुमानोष्ठे हीनेऽनूर्ध्वेऽपि वाच्यवत्" (इति मेदिनी) इत्येकं नीचादेः॥ १९८॥

स्वस्थ या साव-धान, अनेक कार्यों में लगा, व्याकुल, ऊपर, उत्तरदिशा, उ-त्तम, इनका विपर्यय, श्रेष्ठ, दूर, देहादि उत्तम, स्वादु, मनोज्ञ.

पु.स.न पु.स.न.
(अनाकुलेऽपि) चैकाग्रो व्यग्रो (व्यासक्त आकुले) ।
पु.स.न. पु.स.न.
(उपर्युदीच्यश्रेष्ठेष्व) प्युत्तरः (स्या) दनुत्तरः ॥ १९९ ॥
पु.स.न.
(एषां विपर्यये श्रेष्ठे) (दूरानात्मोत्तमाः) पराः ।
पु.स न. पु.स.न.
(स्वादुप्रियौ च) मधुरौ क्रूरौ (कठिननिर्दयौ) ॥ २०० ॥

अनेति—अनाकुले स्वस्थे अव्यग्रे वा अपिशब्दादेकताने एकविषयासक्तचित्ते वा एकाग्रः स्यात्। एकमेकत्र वाग्रमस्येति एकाग्रः "एकाग्रमनन्यलिङ्गः स्यादेकतानेऽप्यनाकुले" (इति मेदिनी.) इत्येकमनाकुलादेः व्यासक्ते कार्यसंलग्ने अनेकार्थसंलग्नचित्ते वा आ-कुले व्याकुले च व्यग्रः स्यात्। विविधं विविधेवाग्रमस्य। विरुद्धमङ्गति वा "ऋज्रेन्द्राग्रेति" रनि, नुमागमे, नलोपे निपातिते च व्यग्रः स्यादित्येकं व्यासक्तादेः। उपर्युदी-च्यश्रेष्ठेषु ऊर्ध्वोदीच्योत्तमेषु उत्तरो वाच्यलिङ्गकः स्यात्, अपिशब्दाद्विराटतनये पुमान्, उत्तरस्यां दिशि स्त्रीप्रतिवाक्ये च क्लीबं स्यात्। उत्तरति, उत्पूर्वकात्तरतेः कर्तरि "पचा-

यचि " गुणे, रपरत्वे च। अतिशयेनोद्गतो वा तरपि, द्रव्यप्रकर्षत्वादाम्वभावे च उत्तरः "उत्तरं प्रतिवाक्ये स्यादूर्ध्वोदीच्योत्तमेऽन्यवत्। उत्तरस्तु विराटस्य तनये दिशि चोत्तरा" (इति विश्वः) इत्येकमुपर्यादेः। एषां विपर्यये व्यत्यासे, श्रेष्ठे उत्तमे च अनुत्तरः स्यात्। उत्तरस्याभावः। उत्तरस्य विरुद्धो वा श्रेष्ठे न उत्तरो यस्मादित्येकं विपर्ययादेः। दूरं विप्रकृष्टम्, अनात्मा आत्माभावो देहादिर्वा उत्तमः श्रेष्ठश्चैते पराः स्युः। पिपर्ति, पूर्यते, अनेन वा पिपर्त्तेः कर्तरि " पचाद्यचि " कर्मणि करणे वा " ऋदोरप् " इत्यपि, " पुंसीति " घे वा गुणे, रपरत्वे च परः " परः श्रेष्ठारिदूरान्योत्तमे क्लीबं तु केवले " (इति मेदिनी) इत्येकं दूरादेः। स्वादुप्रियौ स्वादुशोभनौ मधुरौ स्याताम्। चशब्दाद्रसो मधुरः, विषं मधुरम्, रसवान्मधुरो वाच्यलिङ्गकश्च स्यात्। मधु माधुर्यं राति, अस्त्यत्र वा। मधुपूर्वकाद्रातेः कर्तरि " आतोऽनुपेति " के, आलोपे च, " ऊषशुषीति " रे, वा मधुरः द्वित्वे मधुरौ " मधुरस्तु रसे विषे। मधुरं रसवत्स्वादुप्रियेषु मधुरोऽन्यवत् " (इति विश्वः) इत्येकं स्वाद्वादेः। कठिननिर्दयौ 'क्रूरौ' स्याताम्। कृन्तति, कृन्ततेः कर्तरि " कृतेश्छः क्रू च " इति रकि, कृतेः 'क्रू' आदेशे च क्रूरः द्वित्वे क्रूरौ " क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेयवत् " (इति विश्वः) इत्येकं कठिनादेः॥ १९९। २००॥

दाता, पूज्य, अन्य, नीच, मूर्ख, स्वाधीन, उज्ज्वलित, सफेद.

उदारो (दातृमहतो) रितर (स्त्वन्यनीचयोः)।
(मन्दस्वच्छन्दयोः) स्वैरः शुभ्र (मुद्दीप्तशुक्लयोः)॥२०१॥

(पु.स.न. — पु.स.न. — पु.स.न. पु.स.न.)

उदेति—दाता दानकर्ता, महान्पूज्यश्चैतयोरुदारः स्यात्। उच्चैरासमन्तादृच्छति, उदाङ्पूर्वकादृच्छतेः कर्तरि, पचाद्यचि, गुणे, रपरत्वे च उदारः " उदारो दातृमहतोर्दक्षिणे चाभिधेयवत् " (इति मेदिनी) इत्येकं दात्रादेः। अन्यो भिन्नोऽन्यतरो वा नीचोऽधमश्चैतयोरितरः स्यात्। इना कामेन तरति, इपूर्वकात्तरतेः कर्तरि पचाद्यचि, गुणे, रपरत्वे च इतं ज्ञानं गमनं वा रातीति, " आतोऽनुपेति " के आलोपे च वा इतरः " इतरः पामरेऽन्यस्मिन् " (इति हेमचन्द्रः) इत्येकमन्यादेः। मन्दो मूढः स्वच्छन्दः स्वाधीनश्चैतयोः स्वैरः स्यात्। स्वेन स्वातन्त्र्येण ईर्ते, ईरयति वा ईर्तेरीरयतेः कर्तरि पचाद्यचि, " स्वादीरेरिणोः " इति वृद्धौ च स्वैरः स्यादित्येकं मन्दादेः। उद्दीप्तः उज्ज्वलितः शुक्लः श्वेतश्चानयोः शुभ्रं स्यात्। शोभते, शुभेः कर्तरि " स्फायितञ्चीति " रकि, कित्त्वाद्गुणाभावे च शुभ्रम् " शुभ्रं स्यादभ्रके क्लीबमुद्दीप्तशुक्लयोस्त्रिषु " (इति मेदिनी) इत्येकमुद्दीप्तादेः॥ २०१॥

इति रान्ताः॥

अथ लान्ता व्याख्यायन्ते ॥

चोटी, मुकुट, जूडा, वृक्षभेद, हाथी, बाण, फूल.

पु.स.न
(चूडा किरीटं केशाश्च संयता) मौलय (स्त्रयः) ।
पु.
(द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि) पीलवः ॥ २०२ ॥

विवृति—चूडा शिखा, किरीटं मुकुटम्, संयताः बद्धाःकेशाः कचाश्चेति त्रयो मौलयः मौलिपदवाच्याः स्युः । मूलस्यादूरेभवः "सुतंगमादित्वात्" इञि, मूलस्यापत्यं वा "अत इञ्" इतीञि, ञित्त्वाद्वृद्धौ च मौलिः, द्वित्वे मौली, बहुत्वे मौलयः "किरीटे मौलिरक्लीबे चूडासंयतकेशयोः" (इति रभसः) इत्येकं चूडादेः । द्रुमप्रभेदः पादपभेदः; मातङ्गो हस्ती, काण्डो बाणः, पुष्पं प्रसूनं चैतानि पीलवः स्युः । पीलति, पीलेः कर्तरि मृगय्वादित्वादुप्रत्यये पीलुः, द्वित्वे पीलू, बहुत्वे पीलवः । "पीलुः पुमान्प्रसूनेयात्परमाणौ मतङ्गजे । अस्थिखण्डे च तालस्य काण्डपादपभेदयोः" (इति मेदिनी) त्येकं द्रुमप्रभेदादेः ॥ २०२ ॥

यमराज, समय आदि, चौथा युग, कलह आदि, मृग, जल, कमल-आदि, दुपट्टा, नागराजादि.

पु. पु.
(कृतान्तानेहसोः) काल (श्चतुर्थेऽपि युगे) कलिः ।
‡ पु. पु.
(स्यात्कुरङ्गेऽपि) कमलः (प्रावारेऽपि च) कम्बलः ॥ २०३ ॥

विवृति—कृतान्तो यमः, अनेहाः समयश्चैतयोः कालः स्यात् । कालयति, कलेर्ण्यन्तात्कर्तरि पचाद्यचि, कल्यते संख्यायते, उपदिश्यते वा कर्मणि घञि, ञित्त्वाद्वृद्धौ च, कलयति भूतान्यायुर्वेति विग्रहे तु कलेश्चुराद्यन्तात्कर्तरि पचाद्यजन्तात् 'प्रज्ञाद्यणि' णित्त्वाद्वृद्धौ च वा कालः "कालो मृत्यौ महाकाले समये यमकृष्णयोः" (इति मेदिनी) इत्येकं कृतान्तादेः । चतुर्थे युगे कलियुगे, अपिशब्दाच्छूराजिकलहे च कलिः पुमान्, कलिकायां तु स्त्री स्यात् । कलयति, कल्यते वा कलेश्चुराद्यदन्तात्कर्तरि, कर्मणि वा "अच इः" इती प्रत्यये, णिलोपे च कलिः "कलिः स्त्री कलिकायां ना शूराजिकलहे युगे" (इति मेदिनी) इत्येकं तुर्ययुगादेः । कुरङ्गे मृगभेदे, अपिशब्दात्सलिलताम्रजलजादौ च कमलः कमलं वा स्यात् । कामयते, काम्यते वा कमेर्णिङभावे कर्तरि, कर्मणि वा "वृषादित्वात्" कलचि, कमलः "कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे । मृगभेदे तु कमलः" (इति मेदिनी) इत्येकं कुरङ्गादेः । प्रावारे उत्तरासङ्गे अपिशब्दान्नागराजादौ च कम्बलः स्यात् । काम्यते, "कमेर्बुक्च" इति कलचि, वुगागमे च कम्बति, कम्ब्यते वा वृषादित्वात्कलचि, कं कुत्सितं शिरोऽम्बु वा बलते पचाद्यचि वा

‡ "पतङ्गमातङ्गकुरङ्गभृङ्गमीनाहताः पञ्चभिरेव पञ्च । एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरिन्द्रियैर्वा" ॥ १ ॥

कम्बलः "कम्बलो नागराजे स्यात्सास्नाप्रावारयोरपि । कृमावप्युत्तरासङ्गे सलिले तु नपुंसकम्" (इति मेदिनी) इत्येकं प्रावारादेः ॥ २०३ ॥

पोत, पूजासामग्री, ढीली खाल, मोटापन, सामर्थ्य, फौज, कौआ, बलदाऊ.

पु.
(करोपहारयोः पुंसि) बलिः (प्राण्यङ्गजे स्त्रियाम्) ।
न.
(स्थौल्यसामर्थ्यसैन्येषु) बलं (ना काकसीरिणोः) २०४

केति—करो राजग्राह्योभागः, उपहारः पूजासामग्री चैतयोर्बलिः पुंसि स्यात् । प्राण्यङ्गजे त्वक्संकोचे तु स्त्रियां स्यात् । बलति, बल्यते प्राण्यते, बलते, बल्यते संत्रियतेवा बलेर्वलेर्वा कर्तरि, कर्मणि वा "सर्वधातुभ्य" इतीनि, बलिः, वलिर्वा "बलिर्दैत्यप्रभेदे च करचामरदण्डयोः । उपहारे पुमान्स्त्री तु जरयाश्लथचर्मणि । गृहदारुप्रभेदे च जठरावयवेऽपि च" (इति मेदिनी) इत्येकं राजग्राह्यभागादेः । स्थौल्यं पीनत्वम्, सामर्थ्यं शक्तिमत्त्वम, सैन्यं सेना चैषु बलं क्लीबं, स्यात् । काकसीरिणोः वायसबलरामयोस्तु ना पुमान्स्यात् । बलति, बल्यते वा बलेः कर्तरि पचाद्यचि, कर्मणि घञि, संज्ञापूर्वकत्वाद् वृद्ध्यभावे, "पुंसीति" घे वा बलम् "बलं गन्धरसे रूपे स्थामनि, स्थौल्यसैन्ययोः । बलो हलायुधे दैत्यभेदे वलिनि वायसे" (इति विश्वः) इत्येकं स्थौल्यादेः ॥ २०४ ॥

वातसमूह, वात व्याधि का न सहनेवाला, शठ, जगली हिंसकजीव, सांप.

पु.
वातूलः (पुंसि वात्यायामपि वातासहे त्रिषु) ।
पु.स न.
(भेद्यलिङ्गः शठे) व्यालः (पुंसि श्वापदसर्पयोः)२०५।

वेति—वात्यायां वातसमूहे वातूलः पुंसि स्यात्, वातासहेऽपि त्रिषु त्रिलिङ्गः स्यात् । वातानां समूहो वातं न सहत इति वा "वातात्समूहे च" इत्यूले, चात्तदसहनेऽपि वातूलः, वातयतीति विग्रहे तु वातेश्चुराद्यदन्तात्कर्तरि बाहुलकादुलचि, वातुलोऽपि "वातूलो वातुलोऽपि स्यात्" (इति द्विरूपकोषः) इत्येकं वातसमूहादेः । शठे अनृजुं व्यालः भेद्यलिङ्गो वाच्यलिङ्गः स्यात् । श्वापदो हिंसकपशुर्व्याघ्रो वा सर्पो नागश्चैतयो पुंसि स्यात् । विरुद्धमासमन्तादलति, अडति वा व्याङ्पूर्वकादलेरडेर्वा कर्तरि "पचाद्यचि" डलयोरैक्याड्डस्य लत्वे च व्यालः "व्यालो दुष्टगजे सर्पे शठे श्वापदसिंहयोः" (इति हैमः) इत्येकं शठादेः ॥ २०५ ॥

पाप, वीट, कीट, रोग, हथियार, स्थाणु, शल्य, भाला, कोन, धार, गोद, पंक्ति.

पु.न. न.
मलो (ऽस्त्री पापविट्किट्टान्यस्त्री) शूलं (रुगायुधम्) ।
पु.स. स.
(शङ्कावपिद्वयोः) कीलःपालिःस्त्र्यश्र्यङ्कपंक्तिषु ॥२०६॥

मेति—पापं किल्बिषम् नरकहेतुकं कर्म वा विट् विष्ठा, किट्टं तैलाद्यधोभागस्थं शिङ्घाणादि च एतान्येषु मलः अस्त्री पुन्नपुंसकं स्यात् । मलते, मलयति वा मलेः कर्त्तरि पचाद्यचि मलः "मलोऽस्त्रीपापविट्किट्टे कृपणो त्वभिधेयवत्" (इति मेदिनी) "वसाशुक्रमसृग्मज्जमूत्रंविट्कर्णत्वग्नखाः । श्लेष्माश्रुदूषिकास्वेदो द्वादशैते मला नृणाम्" इत्येकं पापादेः । रुक् रोगः, आयुधमस्त्रं चेति द्वयं शूलम् अस्त्री पुन्नपुंसकं स्यात् । शूलति, शूलेः कर्त्तरि "इगुपधेति" के, शूलम् "शूलोऽस्त्री रोग आयुधे । मृत्युकेतनयोगेषु शूला स्यात्पणयोषिति" (इति मेदिनी) इत्येकं रोगादेः । शङ्कौ स्थाणौ शल्ये वा अपि शब्दादग्नितेजसि च कीलः द्वयोः स्त्रीपुंसयोः स्यात् । कीलति, कील्यते, अनेनात्रेति वा कीलेः कर्त्तरि इगुपधत्वात्के, कर्मसाधनाधारेषु घञि, "पुंसीति" घे वा कीलः "कीलः कफोणिकाघाते स्थाणौ च ज्वलनार्चिषु" (इति धरणिः) इत्येकं शङ्क्वादेः । अश्रिः कोणः, अङ्कः उत्सङ्गश्चिह्नं वा पंक्तिः श्रेणिरेष्वर्थेषु पालिः स्त्री स्यात् । पालयति, पाल्यते, अनयाऽत्रेति वा पालेरर्यन्तात्कर्तरि कर्मसाधनाधारेषु वा "अच इः" इतीप्रत्यये णिलोपे च पालिः *"पालिः कर्णलतायां स्यात्प्रदेशे पंक्तिचिह्नयोः" (इत्यजयः) इत्येकं कोणादेः ॥ २०६ ॥

कारीगरी, कालभेद, सखी, पांति, ज्वारभाठा, समय, सीमा।

कला (शिल्पे कालभेदे) ऽप्याली (सख्यावली अपि) ।
(अब्ध्यम्बुविकृतौ) वेला (कालमर्यादयोरपि) ॥२०७॥

केति—शिल्पे गीतवाद्यादिनिपुणतायाम्, कालभेदे त्रिंशत्काष्ठात्मके कालमाने अपि शब्दाच्चित्रकलादिकर्मणि, चित्रादिकर्तरि, मूलधनवृद्धौ, चन्द्रस्य षोडशांशे च कला स्यात् । कलयति, कल्यते वा कलेश्चुराद्यदन्तात्कर्तरि पचाद्यचि, कर्मणि "पुंसीति" घे वा । कं लातीति विग्रहे तु "आतोऽनुपेति" के आलोपे, टापि च कला "कला स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालमानयोः" (इति मेदिनी) इत्येकं शिल्पादेः । सखी वयस्या, आवलिः पंक्तिश्चोभे आली स्याताम् । अपिशब्दाद्विशदाशये त्रिषु, सेतौ च स्त्रियां स्यादिति । आ अलति, अल्यते, अनयेति वा आङ्पूर्वकादलेः कर्तरि, कर्मणि, करणे वा "सर्वधातुभ्य इन्" इतीनि आलिः "कृदिकारादिति" ङीष्पक्षे तु आली वा "आलिर्विशदाशये । त्रिषु स्त्रियां वयस्यायां सेतौ पंक्तौ च कीर्तिता" (इति मेदिनी) इत्येकं सख्यादेः । अब्ध्यम्बुविकृतौ चन्द्रोदयाद्वारिधिवारिविकृतौ, कालमर्यादयोः समयसीमयोः अपिशब्दादीश्वराणां भोजने च वेला स्यात् । वेलति, वेल्यते, अनयेति वा वेलेः कर्तरि "पचाद्यचि" कर्मकरणयोः "गुरोश्च हलः" इत्यङि वा टापि च वेला "वेला काले च सीमाया-

* "सरमश्रयुवती पालिः पंक्तिः कर्णलतापि च" (इति त्रिकाण्डशेषः) "पालि कर्णलताग्रे पंक्तावङ्कनभेदयोः । आयादिदेये स्त्री पाली पृथ्वामश्रुयोषिति" (इति मेदिनी) ॥

मध्ये: कूलविकारयोः । अक्लिष्टमरणे रोगे ईश्वरस्य च भोजने" (इति मेदिनी) इत्येकमध्यम्बुविकारादेः ॥ २०७ ॥

कृत्तिका, गैया आदि, आगी, श्यामता, विलास, क्रिया, सिटकी या चीनी.

स. पु.स.न.
बहुलाः (कृत्तिका गावो) बहुलो (ऽग्नौ शितौ त्रिषु)।
स. स.
लीला (विलासक्रिययो) रुपला (शर्करापि च) ॥२०८॥

वेति—कृत्तिकाः, गावश्च वहुलाः स्युः, अग्नौ अनले, शितौ कृष्णे च वहुलः त्रिषु त्रिलिङ्गयां स्यात्। वहति, वहेः कर्तरि वाहुलकादुलचि। बहुलाति वेति विग्रहे तु "आतो नुपेति" के, आलोपे, टापि च वहुला, द्वित्वे वहुले, वहुत्वे बहुलाः "बहुला नीलिकायां स्यादेलायां गवियोषिति। कृत्तिकासु स्त्रियां भूम्नि विहायसि नपुंसकम्। पुंस्यग्नौ कृष्णपक्षे च वाच्यवत्प्राज्यकृष्णयोः" (इति मेदिनी) इत्येकं कृत्तिकादेः। विलासः कामिनीश्रृङ्गारचेष्टाविशेषः, क्रिया कर्मादिश्चैतयोः लीला स्यात्। लेलायनम्, 'लेला दीप्तौ' अस्मात्कण्ड्वादिकाद्भावे भिदाद्यङि, "अप्रत्ययादिति" वा पृषोदरादित्वात्लीकारादेशे च। 'लयनम्' वेति विग्रहे तु लीङो भावे वाहुलकाल्ले, गुणाभावे, टापि च लीला "लीलां विदुः केलिविलासखेलाश्रृङ्गारभावप्रभवक्रियासु" (इति विश्वप्रकाशः) इत्येकं विलासादेः। शर्करा सिकता, अपिशब्दात्सिता च उपला स्यात्। उपलाति, उपपूर्वकाल्लातेः कर्तरि "आतश्चोपसर्गे" इति के, । उं शंभुं पलति, ओं शम्भौ पलति वा उपूर्वकात्पलेः कर्तरि 'पचाद्यचि' टापि च उपला "उपलः प्रस्तरे रत्ने शर्करायान्तु योषिति" (इति मेदिनी) इत्येकं शर्करादेः ॥ २०८ ॥

रुधिर, जल, प्रथम, जटा, नक्षत्र, समूह आदि.

न. न.
(शोणितेऽम्भसि) कीलालं मूलमाद्ये शिफाभयोः।
न.
जालं (समूहआनायोगवाक्षक्षारकावपि) ॥ २०९ ॥

शवेति—शोणिते रुधिरे, अम्भसि पानीये च कीलालं स्यात्। कीलेन प्रतिबन्धेन अल्यते वार्यते, कीलपूर्वकादलेः कर्मणि घञि, कीलं प्रतिबन्धमलति वेति विग्रहे तु "कर्मण्यण्" इत्यणि कीलालम्। "कीलालं रुधिरे तोये" (इति हैमः) इत्येकं रुधिरादेः। आद्ये प्रथमे, शिफा जटा, भं नक्षत्रं चानयोः मूलं स्यात्। मूलति, मूलेः कर्तरि "इगुपधेति" के मूलम् "मूलं शिफाद्ययोः। मूलं वित्तेऽन्तिके नाभे" (इति मेदिनी) इत्येकं प्रथमादेः। समूहः समुदायः, आनायः शणसूत्ररचितरज्जुसमूहः, गवाक्षो वातायनम्, क्षारकः ईषद्विकसितकलिका अपि शब्दाद्दम्भश्च जालं स्यात्। जलति, जलेः कर्तरि ज्वलादित्वाण्णे, जालयति वेति विग्रहे तु चौरादिकाज्जलेः 'पचाद्यचि' जालम् "जालं गवाक्षआनाये क्षारके दम्भवृन्दयोः। जालो नीपद्रुमे" (इति मेदिनी) इत्येकं समूहादेः ॥ २०९ ॥

स्वभाव, सुयश वृक्षादिफल, हेतु सिद्धफल, छानी, नेत्ररोग, समूह.

*न.　　　　　　　　　　　　न.
शीलं (स्वभावे सद्वृत्ते) (सस्ये हेतुकृते) फलम् ।
　　　　　　　　　　न.
(छदिर्नेत्ररुजोः क्लीबं) (समूहे) पटलं (न ना) ॥ २१० ॥

शीति—स्वभावे प्रकृतौ, सद्वृत्ते सद्यशसि च शीलं स्यात् । शीलनम्, शील्यतेऽनेनेति वा शीलेर्भावे करणे वा घञ्, शयनमिति विग्रहे तु "शीङो धुगिति" लकिवा शीलम्, अर्धर्चादित्वात्क्लीबम् । " निष्ठा च शीलं चारित्रं चरित्रं चरितं तथा " (इति रत्नकोषः) इत्येकं स्वभावादेः । सस्ये वृक्षादिफले, हेतुकृते हेतुसमुत्थे च फलं स्यात् । फलति, फलेः कर्तरि पचाद्यचि फलम्, " फलं हेतुसमुत्थेस्यात्फलके व्युष्टिलाभयोः । जातीफलेऽपि कक्कोले सस्यबाणाग्रयोरपि" (इति विश्वः) इत्येकं सस्यादेः । छदिर्गृहाच्छादनम्, नेत्ररुक्तद्रोगश्चैतयोः पटलं क्लीबं स्यात् । समूहे समुदाये ना पुमान् न स्यात् । पटं विस्तारं लाति, पटपूर्वकाल्लातेः कर्त्तरि " आतोऽनुपेति " के, आलोपे च पटलम् " अथ पटलं पिटके च परिच्छदे । छदिर्दृग्रोगतिलके क्लीबं वृन्दे पुनर्नना " (इति मेदिनी) इत्येकं गृहाच्छादनादेः ॥ २१० ॥

नीचे, स्वरूप, मास, उन्मान, आगी, नागलोक, कपड़ा, अधम.

　　　　　　　　पु.न.　　　　　　　　न.
(अधःस्वरूपयोरस्त्री) तलं (स्याच्चामिषे) पलम् ।
　　　　　　न.　　　न.
(औवीनलेऽपि) पातालं चेलं (वस्त्रेऽधमे त्रिषु) ॥ २११ ॥

अध इति—अधः अनूर्ध्वम्, स्वरूपं स्वकीयरूपं स्वस्यात्मनो रूपं वा एतयोः तलं अस्त्री पुन्नपुंसकं स्यात् । तलति, तलेः कर्त्तरि पचाद्यचि तलम् "तलं स्वरूपेऽनूर्ध्वेऽस्त्री क्लीबं ज्याघातवारणे । कानने कार्यबीजे च पुंसितालमहीरुहे । चपेटे च त्सरौ तन्त्री घाते सव्येन पाणिना " (इति मेदिनी) इत्येकमनूर्ध्वादेः । आमिषे मांसे चादुन्माने च पलं स्यात् । पलति, पलेः कर्त्तरि " पचाद्यचि " पलम् " पलमुन्मानमांसयोः " (इति रुद्रः) इत्येकमामिषादेः । औवीनले वडवानले, अपिशब्दान्नागलोके, विवरे च पातालं स्यात् । पतति, अत्र वा पतेः कर्त्तर्याधारे वा " चण्डिपतिभ्यामालञ् " इत्यालञ्, पातमलति, पचाद्यचि, पातमालातीति विग्रहे तु " आतोऽनुपेति " के वा आलोपे च पातालम् " पातालं नागलोके स्याद्विवरे वडवानले " (इति मेदिनी) इत्येकमौर्वानलादेः । वस्त्रे वसने, अधमे निकृष्टे नीचे वा चेलं त्रिषु त्रिलिङ्गयां स्यात् । चिलति, चिल्यते, चेलति, चेल्यते वा चिलेश्चेलेर्वा कर्त्तरि पचाद्यचि, कर्मणि घञि वा चेलम् " चेलो नीचेऽधमे त्रिषु । नपुंसकन्तु वसने " (इति मेदिनी) इत्येकं वस्त्रादे. ॥ २११ ॥

* " शीलं स्वभावे सद्वृत्ते " (इति विश्व.) चरित्रमात्रेऽपि शीलं स्यादिति ॥

कीलों से भरा गड्हा, भूसीकी आग, निश्चित, अकेला, पूरा, या समग्र.

न.
कुकूलं (शंकुभिः कीर्णे श्वभ्रे ना तु तुषानले)।
न.
(निर्णीते) केवलमिति (त्रिलिङ्गं त्वेककृत्स्नयोः) ॥२१२॥

किति—शंकुभिः कीलैः कीर्णे व्याप्ते श्वभ्रे रन्ध्रे कुकूलं क्लीबं स्यात्। तुषानले तुषाग्नौ तु ना पुमान्स्यात्। कोर्भूमेः कूलम्, कुत्सितं कूलं वा कुकूलमित्येकं कीलकीर्णश्वभ्रादेः। निर्णीते निश्चिते केवलमिति क्लीबं स्यात्। एककृत्स्नयोः एकसमग्रयोस्तु त्रिलिङ्गं स्यात्। केवते, केवेः कर्त्तरि वृषादित्वात्कलचि, के शिरसि वलति वेतिविग्रहे तु पचाद्यचि केवलम् स्त्रियां टापि केवला संज्ञाछन्दसोस्तु "केवलयामकेति" ङीपि केवलीत्यपि "केवलः कुहने पुमान्" (इति मेदिनी) इत्येकं निश्चितादेः ॥२१२॥

पूर्णता, क्षेम, पुण्य, शिक्षित, अँखुवा, मूर्ख-आदि.

न.
(पर्याप्तिक्षेमपुण्येषु) कुशलं (शिक्षिते त्रिषु)।
पु.न. पु.स.न. ‡
प्रवाल(मंकुरेऽप्यस्त्री) (त्रिषु) स्थूलं (जडेऽपि च) ॥२१३॥

परिति—पर्याप्तिः सामर्थ्यम् पूर्णता, प्राप्तिर्वा क्षेमं भव्यम्, लब्धवस्तुरक्षणं वा, पुण्यं सुकृतं शुभमदृष्टं धर्मं वा एषु कुशलं क्लीबं स्यात्। शिक्षिते कृताभ्यासे निपुणे वा त्रिषु त्रिलिङ्ग्यां स्यात्। कौ भूमौ शलति, कुपूर्वकाच्छलेः कर्तरि पचाद्यचि, कुशयति वृषादित्वात्कलचि कुशाँल्लातीति विग्रहे तु "आतोऽनुपेति" के वा आलोपे च कुशलम् "कुशलः शिक्षिते त्रिषु। क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसकम्" (इति विश्वः) इत्येकं पर्याप्त्यादेः। अंकुरे अभिनवोद्भिदि, किसलये वा अपिशब्दाद्वीणादण्डे, विद्रुमे च प्रवालं अस्त्री पुन्नपुंसकं स्यात्। प्रवलति, प्रपूर्वकाद्वलेः कर्त्तरि ज्वलादित्वाणे, वृद्धौ च ण्यन्तात्पचाद्यचि वा प्रवालम् "प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे" (इति मेदिनी) इत्येकमंकुरादेः। जडे निष्प्रज्ञे, अपिशब्दात्कूटे, पीवरे च स्थूलं त्रिषु त्रिलिङ्ग्यां स्यात्। स्थूलयति स्थूलेश्चुराद्यदन्तात्कर्तरि पचाद्यचि स्थूलम् "स्थूलं कूटे च निष्प्रज्ञे पीवरेऽप्यन्यलिङ्गकम्" (इति मेदिनी.) इत्येकं मूढादेः॥ २१३॥

ऊँचे दांतवाला, ऊंचा, सुन्दर, चतुर, मूर्ख, बालक, चञ्चल, तृष्णासहित.

*पु. पु.
करालो (दन्तुरे तुङ्गे) (चारौ दक्षे च) पेशलः।
पु. पु. ‡
(मूर्खेऽर्भकेऽपि) बालः (स्या) ल्लोल (श्चलसतृष्णयोः) २

इति लान्ताः॥

केति—दन्तुरे उन्नतरदे, तुङ्गे उन्नते उच्चतायुते वा करालः स्यात्। करेणाल

‡ इष्टं वानिष्टं वा सुखदुःखे न वेदेयो मोहात्। विन्दति परवशगः स भवेदिह जडसंज्ञकः पुरुषः॥
* दन्तुरे यथा 'करालदंष्ट्रः' ‡ चञ्चले यथा "लोलाक्षी सुन्दरी परम्" ॥

कराङ्पूर्वकाल्लातेः कर्तरि "आतश्चोपसर्गे" इति, "सुपीति" योगविभागाद्वा के, आलोपे च । करमलतीति विग्रहे तु "कर्मण्यण्" इत्यणि वा करालः "करालं दन्तुरे तुङ्गे भीषणे चाभिधेयवत्" (इति मेदिनी) इत्येकं दन्तुरादेः । चारौ सुन्दरे, दक्षे आलसहीने, चतुरे, शिक्षिते वा पेशलः स्यात् । पेशनम्, पिशेर्भावे घञि,गुणे च पेशस्तं लातीति "आतोऽनुपेति" के, आलोपे च, पेशोऽस्यास्ति, सिध्मादित्वाल्लचि वा पेशलः स्यादित्येकं सुन्दरादेः । मूर्खे मूढे, अर्भके शिशौ, अपिशब्दात् कचे ह्रीवेराश्वेभपुच्छेषु च वालः स्यात् । वलति, वल्यते वा वलेः कर्तरि ज्वलादित्वाणे, कर्मणि घञि वा वृद्धौ च-'वाडते' इति विग्रहे तु पचाद्यचि डस्य लत्वे च वालः "वालो ना कुन्तलेऽश्वस्य गजस्यापि च वालधौ । वाच्यलिङ्गोऽर्भके मूर्खे ह्रीवेरे पुन्नपुंसकम् । अलङ्कारान्तरे मेधौ वाली वाला त्रुटिस्त्रियोः" (इति मेदिनी) इत्येकं मूढादेः । चलश्चञ्चलः सतृष्णस्तृष्णासमेतश्चानयोर्लोलः स्यात् । लोडति, लोडेः कर्तरि "पचाद्यचि" डलयोरैक्याड्डस्य लत्वे च लोलः "लोलश्चले सतृष्णे च लोला तु रसनाश्रियोः" (इति हैमः) इत्येकं चञ्चलादेः ॥ २१४ ॥

इति लान्ताः ॥

अथ वान्ता व्याख्यायन्ते ॥

वन, वनाग्नि, जन्म, शिव, — पु. पु. दवदावौ (वनारण्यवह्नी) पु. (जन्महरौ) भवौ ।

प्रधान, सखा, स्वामी, खैर, मनुष्य, — पु. (मन्त्रीसहायः)सचिवौ पु. (पतिशाखिनरा) धवाः॥ २१५ ॥

देति—वनं काननम्, अरण्यवह्निः वनाग्निश्च उभौ दवदावौ स्याताम् । दवति, दुनोति वा दवतेर्दुनोतेर्वा कर्तरि पचाद्यचि, गुणे, अवादेशे च दवः "दुन्योरनुपसर्गे" इति नीसाहचर्यात्सानुबन्धकाद्दुनोतेरेव कर्तरि णे, णित्त्वाद्वृद्धौ आवादेशे च दावः इति द्वे वनवनाग्न्योः । जन्म जननम्, हरः शिवश्च एतौ भवौ भवपदवाच्यौ स्याताम् । भवति, भवतेरन्तर्भावितण्यर्थात्कर्तरि पचाद्यचि जन्मनि तु भावे "ऋदोरप्" इत्यपि गुणे, अवादेशे च भवः "भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः" (इति मेदिनी) इत्येकं जन्मादेः । मन्त्री प्रधानः, सहायः सखा चैतौ सचिवौ स्याताम् । सचनम्, सचेर्भावे "सर्वधातुभ्य इन्" इतीनि सचिस्तंवातिं, "आतोऽनुपेति" के, आलोपे च सचिवः द्वित्वे सचिवावित्येकं मन्त्रिसहाययोः । पतिः स्वामी, शाखी वृक्षभेदः खदिरो वा नरो मनुष्यश्चैते धवाः धवपदवाच्याः स्युः । धवति, धुवति, धूनोति, धुनाति वा धूञः कर्तरि 'पचाद्यचि' धूयते, इति विग्रहेतु "ऋदोरप्" इत्यपि, गुणे, [अवा]देशे च धवः द्वित्वे धवौ, बहुत्वे धवाः "धवः पुमान्नरे धूर्ते पत्यौ वृक्षान्तरेऽपि च" (इति मेदिनी) इत्येकं पत्यादेः ॥ २१५ ॥

पहाड, भेड़ा, पु. सूर्य, हुक्म, बुलाना, यज्ञ, पु.

अवयः(शैलमेषार्का) (आज्ञाह्वानाध्वरा) हवाः।

सत्ता, स्वभाव, आशय, चेष्टा, आत्मा, जन्म, पु.

भावः (सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु) ॥ २१६ ॥

अवेति—शैलः पर्वतः, मेषो मेढ्रः, अर्कः सूर्यश्च एते अवयः स्युः। अवति, अव्यते-वा अवतेः कर्तरि कर्मणि वा "सर्वधातुभ्य इन्" इतीनि अविः द्वित्वे अवी बहुत्वे अवयः "अविर्भूपुष्पवत्योः स्त्री वायुप्राकारभास्सु ना" (इति वैजयन्ती) इत्येकं शैलादेः। आज्ञा निदेशः, आह्वानं हूतिः, अध्वरो यागश्चैते हवाः स्युः। ह्वानम्, हूयतेऽत्रेतिवा हूयतेर्भावाधारयोः "भावेऽनुपसर्गस्य" इति अपि, संप्रसारणे, गुणे, अवादेशे च हवः, द्वित्वे हवौ, बहुत्वे हवाः स्युरित्येकमाज्ञादेः। सत्ता विद्यमानता, स्वभावः प्रकृतिः, अभिप्रायः आशयः, चेष्टा शरीरव्यापारः, आत्मा यत्नोधृतिर्बुद्धिः परमात्मा स्वभावः ब्रह्म, देहो वा जन्म उत्पत्तिरेषु भावः स्यात्। भावयति, भवतेर्ण्यन्तात्कर्तरि पचाद्यचि, भवनं वेति विग्रहे तु "श्रिणीभुवोऽनुपसर्गस्य" इति, घञि ञित्त्वाद्वृद्धौ आवादेशे च भावः "भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। क्रियालीलापदार्थेषु विभूतिबन्धुजन्तुषु। रत्यादौ च" (इति मेदिनी) इत्येकं सत्तादेः ॥ २१६ ॥

उत्पत्ति, फल, फूल, गर्भप्रसव, पु.

(स्यादुत्पादे फले पुष्पे) प्रसवो (गर्भमोचने)।

अविश्वास, अपह्नव, शठता. पु.

(अविश्वासेऽपह्नवेऽपि निकृतावपि) निह्नवः ॥ २१७

स्यादिति—उत्पादे उत्पत्तौ, फले वृक्षादिफले, पुष्पे कुसुमे, गर्भमोचने च प्र[सवः] स्यात्। प्रसवनम्, प्रसूयते वा प्रपूर्वकात्सूयतेर्भावे "ऋदोरप्" इत्यपि। कर्तरि [प]चाद्यचि वा गुणे अवादेशे च प्रसवः "प्रसवोगर्भमोचने। उत्पादे स्यादपत्येऽपि प[ुष्पे]ऽपि कुसुमेऽपि च" (इति मेदिनी) इत्येकमुत्पत्त्यादेः। अविश्वासे विश्वास[ह...] अपह्नवे अपलापे, निकृतौ शठतायामपि निह्नवः स्यात्। निह्नवनम्, निपूर्वकाद्ह्नुङो[भ...] "ऋदोरप्" इत्यपि, गुणे, अवादेशे च निह्नवः "निह्नवः पुंसिनिकृताविश्वासा[प...]पयोः" (इति मेदिनी) इत्येकमविश्वासादेः ॥ २१७ ॥

ऊपर उठाना, चाहनाकी उपज, उछाह, पु.

(उत्सेकामर्षयोरिच्छा प्रसवे मह) उत्सवः।

प्रभाव, ज्ञानका निश्चय, भावका बोधक. पु.

अनुभावः (प्रभावे च सतां च मतिनिश्चये) ॥ २१८

उदिति—उत्सेकः उद्रेकः, अमर्षः कोपः, इच्छायाः प्रसवः उत्पत्तिः, महः उद्धवः उत्सवः स्यात्। अथवा उत्सेकामर्षयोः उद्रेकप्रकोपयोः, इच्छाप्रसवे वाञ्छोत्पत्तौ,

क्षणे च उत्सवः स्यात्। उत्सवनम्, उत्पूर्वकात्सवतेर्भावे "ऋदोरप्" इत्यपि, गुणे, अवादेशे, उदोदस्य चर्त्वेन तकारे च उत्सवः "उत्सवो मह उत्सेक इच्छाप्रसवकोपयोः" (इति मेदिनी) इत्येकमुद्रेकादेः। प्रभावे प्रतापे, सतां बुद्धिमतां मतिनिश्चये बुद्धिनिर्णये, ज्ञाननिश्चये वा चशब्दाद्भावसूचकेऽपि अनुभावः स्यात्। भवनम्, "श्रिनीभुवो–" इति घञि भावः अनुगतोभावः "प्रादयो गताद्यर्थे" इति समासे। अनुभावयतीति विग्रहेतु कर्तरि "पचाद्यचि" वा णिलोपे च अनुभावः "अनुभावः प्रभावे स्यान्निश्चये भावसूचके" (इति विश्वः) इत्येकं प्रभावादेः॥ २१८॥

पु.

जन्म का कारण, ज्ञान का पहला स्थान, शूद्रा मे ब्राह्मणसे उपजा बालक, फरसा.

(स्याजन्महेतुः) प्रभवः(स्थानं चाद्योपलब्धये)।

पु.

(शूद्रायां विप्रतनये शस्त्रे) पारशवो(मतः)॥ २१९॥

स्यादिति–जन्महेतुः जन्मनो जननस्य हेतुः कारणमुद्भवकर्ता पित्राद्यः, आद्योपलब्धये प्रथमज्ञानार्थं स्थानं च प्रभवः स्यात्। प्रभवत्यस्मात् प्रपूर्वकाद्भवतेरपादाने "ऋदोरप्" इत्यपि, गुणे, अवादेशे च प्रभवः "प्रभवो जलमूले स्याज्जन्महेतौ पराक्रमे। ज्ञानस्य चादिमस्थाने" (इति मेदिनी) इत्येकं जन्महेत्वादेः। शूद्रायां शूद्रस्य विजातीयाङ्गनायां विप्रतनये ब्राह्मणतनूजे, शस्त्रे कुठाराख्ये आयुधे च पारशवः पुमान् मतः सर्वाचार्यैः स्वीक्रियते इति भावः। पराञ्छृणाति, पर पूर्वकाच्छृणातेः कर्तरि "आङ्परयोः खनिशृभ्यां डिच्चेति" उप्रत्यये, डित्त्वाट्टिलोपे च परशुः सएव प्रज्ञाद्यणि परस्त्रिया अपत्यं वा "परस्त्री परशुं च" इति गणसूत्रादञि, वृद्धौ "ओर्गुणः" इति गुणे, अवादेशे च पारशवः "पारशवः पुमान्। परस्त्रीतनये शस्त्रे द्विजाच्छूद्रासुतेऽपिच" (इति मेदिनी) इत्येकं विप्राच्छूद्रासुतादेः॥ २१९॥

पु. *

ताराभेद, निश्चित, हमेशा, ज्ञाति, आत्मा, आत्मीय और धन.

ध्रुवो(भभेदे क्लीबे तु निश्चिते शाश्वते त्रिषु)।

पु. पु.स.न. पु.न

स्वो(ज्ञातावात्मनि)स्वं(त्रिष्वात्मीये)स्वो(ऽस्त्रियांधने)२२०

ध्रुवइति–भभेदे नक्षत्रविशेषे ध्रुवः पुंसि स्यात्। निश्चिते व्यवसिते तु क्लीबे स्यात्। शाश्वते नित्ये त्रिषु त्रिलिङ्गया स्यात्। ध्रुवति, ध्रुवतेः कर्तरि "इगुपधेति" के ध्रुवः "ध्रुवः कीले शिवे शङ्कौ, वसौ योगे वटे मुनौ। ध्रुवा मूर्वा शालिपर्ण्या गीतिस्रुग्भेदयोरपि,। ध्रुवन्तु निश्चिते तर्के निश्चले शाश्वतेऽन्यवत्" (इति विश्वः) इत्येकं नक्षत्रविशेषादेः। ज्ञातौ सगोत्रे, आत्मनि क्षेत्रज्ञे च स्वः पुंसि स्यात्। आत्मीये स्वसम्बन्धिनि स्वं त्रिषु त्रिलिङ्गयां स्यात्। धने वित्ते स्वः अस्त्रिया पुन्नपुंसके स्यात्। स्वन

* "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" (इति भागवतम्)॥

स्वन्यते वा स्वनते: कर्तृकर्मणो: " अन्येभ्योऽपि " इति डे, डित्त्वाट्टिलोपे च स्वः " स्वो ज्ञात्यात्मनो: स्वं निजे धने " (इति हेमचन्द्रः) " स्वःस्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने " (इति मेदिनी) इत्येकं ज्ञात्यादेः ॥ २२० ॥

नारा, राजपुत्रादि के पास गिरवी धरना, मूलधन, पार्वती, सियार, कलह, जोड़ा.

स.

(स्त्रीकटीवस्त्रबन्धेऽपि) नीवी (परिपणेऽपि च) ।

स. ‡ न.

शिवा (गौरीफेरवयो) र्द्वन्द्वं (कलहयुग्मयोः) ॥ २२१ ॥

स्त्रीति—स्त्रीकटीवस्त्रबन्धे स्त्रिया रमण्याः कट्यां वस्त्रस्य बन्धने, परिपणे राजपुत्रा र्वन्धके, अपिशब्दाद्वणिजां मूलधने च नीवी स्यात् । निव्ययति, निवीयते वा, निपू कादूव्येञः कर्तरि कर्मणि वा " नौव्योयलोपः पूर्वस्य च दीर्घः " इतीणि, यलो पूर्वस्य दीर्घे, " कृदिकारादिति " ङीपि च नीवी ङीषोऽभावे नीविरपि, " नीवी स्त्री कटीवस्त्रबन्धने । मूलद्रव्ये परिपणे " (इति हैमः) इत्येकं नारीकटिवस्त्रबन्धादेः गौरी शिवप्रियादिः, फेरवो जम्बुकश्चैतयोः शिवा स्यात् । शिवमस्त्यस्याः, " अर्श आदिभ्योऽच् " इत्यचि, टापि च शिवा " शिवा झाटामलौषधौ । अभयामलकीगौ क्रोष्ट्रीसक्तुफलासु च " (इति विश्वः) इत्येकं गौर्यादेः । कलहो विवादो युद्धं वा युग्मं युगलं द्वित्वसंयुतं वा उभयोर्द्वन्द्वं स्यात् । द्वौद्वाविति द्वन्द्वम् " द्वन्द्वं रहस्यमर्यादेति साधुः "चार्थे द्वन्द्वः" इति निर्देशात्पुंस्यपि । " द्वन्द्वं रहस्ये कलहे तथा मिथुनयुग्मयोः (इति मेदिनी) इत्येकं कलहादेः ॥ २२१ ॥

धन, प्राण, निश्चय, हिजड़ा, षधिया बैल, डरपोक या कायर.

न.

(द्रव्यासुव्यवसायेषु) सत्त्व (मस्त्री तु जन्तुषु) ।

न.

क्लीवं (बं) (नपुंसके षण्ढे वाच्यलिङ्गमविक्रमे) ॥ २२२ ॥

इति वान्ताः ।

द्रेति—द्रव्यं वित्तम्, असुः प्राणाः, व्यवसायो निश्चयः एषु सत्त्वं नपुंसकं स्यात् । जन्तुषु प्राणिमात्रेषु तु ' अस्त्री ' पुंनपुंसकं स्यात् । सीदन्ति गुणाद्या अस्मिन्निति, सदेराधारे " अन्येभ्योऽपि दृश्यन्ते" इति त्वनि दस्य चर्त्वेन तकारे च सत्त्वम् "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मत्वव्यवसायासुवित्तेष्वस्त्री तु जन्तुषु " (इति मेदिनी) इत्येकं द्रव्यादेः । नपुंसके तृतीयप्रकृतौ षण्ढे शण्ढे आकृष्टाण्डे गोपतौ वा क्लीवम् अस्त्री पुन्नपुंसकं स्यात् । अत्राप्यस्त्रीत्यनुवर्तते । अविक्रमे अलसे अपौरुषे सा ध्यहीने वा वाच्यलिङ्गं त्रिलिङ्गं स्यात् । क्लीबते, क्लीबेः कर्तरि " इगुपधेति " क

‡ " गौरी नग्नजातरजःकन्या शंकरभार्ययोः । रोचनीरजनीपिङ्गप्रियङ्गुवसुधासु च । आपगाया विशेषेऽपि यादसां पतियोषिति " (इति कोषान्तरम्) ॥

क्लीबम् " अस्त्री नपुंसके क्लीबं वाच्यलिङ्गमविक्रमे " (इति रुद्रः) " विश्वहैममेदिनीष्वपि यणान्तेष्वेव पठितत्वाद्धातोर्वान्तत्वाच्च बवयोरैक्याद्वा वान्तोवान्तश्चायमिति सद्भिस्सुधीभिरेवाकलनीयम् " इत्येकं नपुंसकादेः ॥ २२२ ॥

इति वान्ताः ॥

अथ शान्ता व्याख्यायन्ते ॥

बनिया, मनुष्य, दूत, लड़ाई, समूह, मेषादि, वंश या बास.

(द्वौ) विशौ (वैश्यमनुजौ) (द्वौ चराभिमरौ) स्पशौ ।
(द्वौ) राशी (पुञ्जमेषाद्यौ) (द्वौ) वंशौ (कुलमस्करौ) ॥ २२३ ॥

द्वाविति—वैश्यो वणिक्, मनुजो मनुष्यश्चैतौ द्वौ विशौ स्याताम् । विशति, विशेः कर्त्तरि क्विपि, क्त्त्वाद्गुणाभावे, " व्रश्चेति—" षत्वे चर्त्वे च विट् द्वित्वे विशौ. " विट् स्मृतो वैश्यमनुजप्रवेशेषु मनीषिभिः " (इति विश्वः) इत्येकं वणिजादेः । चरो दूतो धावकश्चरिष्णुर्वा अभिमरो युद्धं चैतौ द्वौ स्पशौ स्याताम् । स्पशति, स्पशेः कर्त्तरि पचाद्यचि, स्पशः, द्वित्वे स्पशौ " स्पशः स्यात्संपराये च प्रणिधावपि पुंस्ययम् " (इति मेदिनी) इत्येकं दूतादेः । पुञ्जः समुदायः, मेषाद्यः मेषवृषादिश्चैतौ द्वौ राशी स्याताम् । अश्नुते व्याप्नोति, " अशिपणाय्योरुडायलुकौचेति " इण् प्रत्यये, रुडागमे च राशिः, द्वित्वे राशी " राशिर्मेषादिपुञ्जयोः " (इति मेदिनी) इत्येकं पुञ्जादेः । कुलं सजातीयसमूहः, मस्करोवेणुः कीचको वा एतौ द्वौ वंशौ स्याताम् । वनति, वन्यते वा वनेःकर्त्तरि कर्मणि वा बाहुलकाच् शे । वष्टि, उश्यते वा वशेःकर्त्तरि पचाद्यचि, कर्मणि घञि वा संज्ञापूर्वकत्वाद् वृद्ध्यभावे " संख्यावंश्येनेति " निर्देशान्नुमागमे च वंशः " वंशो वेणौ कुले वर्गे पृष्ठाद्यवयवेऽपि च " (इति विश्वः) इत्येकं कुलादेः ॥ २२३ ॥

एकान्त, प्रकाश, तनख्वाह, भोग, या यमराज, क्षुद्र, अधम, किसान.

(रहःप्रकाशौ) वीकाशौ^(पु.) निर्वेशो^(पु.) (भृतिभोगयोः) ।
(कृतान्ते पुंसि) कीनाशः^(पु.) (क्षुद्रकर्षकयोस्त्रिषु) ॥ २२४ ॥

रेति—रहो विजनं, गोप्यं, रमणं, याथार्थ्यं वा, प्रकाशः आतपश्चैतौ वीकाशौ स्याताम् । विकाशनम्, विकाश्यतेऽस्मिन्निति वा विपूर्वकात्काशेर्भावाधारयोर्घञि " इकःकाशे " इति दीर्घे च वीकाशः " वीकाशो विजने व्यक्ते " (इति विश्वः) इत्येकं विजनादेः । भृतिर्वेतनम्, भोगः उपभोगः भोजनाद्युत्पन्नसुखानुभवो वा एतयोः निर्वेशः स्यात् । निर्वेशनम्, निर्विश्यते वा निरुपपदाद्विशेर्भावे कर्मणि वा घञि, गुणे च निर्वेशः " निर्वेशस्तु पुमान्भोगे वेतने मूर्च्छनेऽपिच " (इति मेदिनी) इत्येकं वेतनादेः । कृतान्ते यमराजे कीनाशः पुंसि स्यात् । क्षुद्रः क्रूरः, अधमः, अल्पो वा कर्षक

कृषीवलश्चैतयोस्त्रिषु त्रिलिङ्ग्यां स्यात् । ‘ की ’ इत्यव्ययं कुत्सायाम् । की कुत्सितं नाशयति, कीपूर्वकान्नाशयतेः कर्तरि पचाद्यचि । क्लिश्नाति, क्लिश्यते वा क्लिशेःकर्त्तरि, कर्मणि वा “ क्लिशेरीच्चोपधायाः कन्लोपश्चलोनाम् च ” इति कनि, उपधाया ईत्त्वे, लस्यलोपे, नामागमे च कीनाशः “ कीनाशः कर्षकक्षुद्रोपांशुघातिषु वाच्यवत् । यमे ना” (इति मेदिनी) इत्येकं कृतान्तादेः ॥ २२४ ॥

स्थान, निशाना, कारण, जल आदि, अनेकावस्था, दीपवर्तिका, वस्त्र का छोर, चाहना, पूर्वादि दिशा.

पु.

(पदे लक्ष्ये निमित्ते) ऽपदेशः (स्या) त्कुश (मप्सु च)।

स. स.†

दशा(वस्थानेकविधाऽ) प्याशा (तृष्णापि चायता) २२५

पेति--पदे व्यवसाये, रक्षणे, स्थाने, चिह्ने, चरणे, सर्वपदार्थे वा लक्ष्ये व्याजे शरव्ये वा निमित्ते हेतौ च अपदेशः स्यात् । अपदेशनम्, अपदिश्यते वा अपपूर्वकाद्दिशतेर्भावे कर्मणि वा घञि चित्त्वाद् गुणे च अपदेशः “ अपदेशः पुमाँल्लक्ष्ये निमित्तव्याजयोरपि ” (इति विश्वः) इत्येकं पदादेः । अप्सु जले कुशं स्यात् । चशब्दात् द्वीपे, योक्त्रे, दर्भे, रामसुतेऽपि कुशः पुमान् स्यात् । कुश्यति, कुशेः कर्त्तरि “ इगुपधेति ” के, कित्त्वाद् गुणाभावे च कु पापं श्यतीति विग्रहे तु “ सुपीति ” योगविभागात्के, आलोपे च कुशम् “ कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले ” (इति विश्वः) इत्येकं जलादेः । अनेकविधावाल्यादिरूपा अवस्था, अपिशब्दाद्दीपवर्त्तिका, वस्त्रान्तश्च दशा स्यात्, वस्त्रान्ते तु भूम्नि स्त्रियां स्यात् । दशति, दंशेः कर्तरि मूलविभुजादित्वात्के पचाद्यचि वा “ जपजभदहदशेति ” निर्देशादकिडत्यपि नलोपे, दश्यते इति विग्रहे तु “ गुरोश्च ” इत्यङि, नलोपे टापि च दशा “ दशावस्थादीपवर्त्योर्वस्त्रान्ते भूम्नि योषिति ” (इति मेदिनी) इत्येकं नानाविधावस्थादेः । आयता विस्तृता तृष्णा लिप्सा अपि शब्दाद्दिशा च आशा स्यात् । आसमन्तादश्नुते, आङ्पूर्वकादश्नोतेः कर्तरि पचाद्यचि, टापि च आशा “ आशा ककुभि तृष्णायाम् ” (इति हैमः) इत्येकं तृष्णादेः ॥ २२५ ॥

नारी, हथिनी, ज्ञान, ज्ञाता, आँखआदि, साहसिक, कठिन, दुस्पर्श आदि.

स. स.

वशा (स्त्री करिणी च स्या) द् दृग् (ज्ञाने ज्ञातरि त्रिषु)।

पु.स.न.

(स्या) त्कर्कशः (साहसिकः कठोरामसृणावपि) ॥२२६॥

वेति--स्त्री योषा, करिणी हस्तिनी, च शब्दाद्वन्ध्यगवी, दुहितापि वशा स्यात् वष्टि, वशे. कर्तरि पचाद्यचि, टापि च वशा “ वशा नार्य्यां वन्ध्यगव्यां हस्तिन्यां दुहि-

† “ [illegible] ” (इति [illegible]) ॥

तर्यपि" (इति हैमः) इत्येकं नार्यादेः । ज्ञाने बुद्धौ, ज्ञातरि वीक्षके च दृक् त्रिषु त्रिलिङ्ग्यां स्यात् । अत्रापि चेत्यनुवर्तते तस्मान्नेत्रे दर्शने च स्त्रियां स्यात् । पश्यति, दृशेः कर्तरि "अन्येभ्योऽपि दृश्यते" इति क्विपि, दर्शनम्, दृश्यतेऽनयेति वा सम्पदादित्वात्क्विपि, "त्यदादिष्विति" दृशेःक्विन्विधानादन्यत्रापीति कुत्वे दृक् जस्त्वे च दृग "दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके" (इति मेदिनी) इत्येकं ज्ञानादेः । अतः परमावर्गान्तंत्रिष्वित्यधिक्रियते । साहसिको विवेकरहितो मिथ्यावादी, मनुष्यमारणादौरतश्चौरादिर्वा कठोरः कठिनः असमृणोऽचिकणो दुःस्पर्शो वा अपिशब्दात्कृपणनिर्दयदृढादिश्च कर्कशः स्यात् । कृणाति, कृञः कर्तरि "अन्येभ्योऽपीति" विचि, कर्, कस्ते, कशेः कर्तरि पचाद्यचि, कशः कर्चासौ कशश्चेति कर्कशः "कर्कशः परुषे क्रूरे कृपणे निर्दये दृढे । इक्षौ साहसिके कासमर्दकाम्पिल्लयोरपि" (इति विश्वः) इत्येकं साहसिकादेः ॥ २२६ ॥

पु.स.न. पु.स.न.

बड़ा प्रसिद्ध, प्रहास, घाम, खिलना, बच्चा या लड़का व मूढ आदि.

प्रकाशो (ऽतिप्रसिद्धेऽपि) (शिशावज्ञे च) वालिशः ॥

इति शान्ताः ।

प्रेति—अतिप्रसिद्धे महाविख्याते अपिशब्दात्प्रहासातपस्फुटेषु प्रकाशः स्यात् । प्रकाशते, प्रकाशनं वा प्रपूर्वकात्काशेः कर्तरि पचाद्यचि, भावे घञि वा प्रकाशः "प्रकाशोऽति प्रसिद्धेस्यात्प्रहासातपयोः स्फुटे" (इति विश्वः) इत्येकमतिप्रसिद्धादेः । शिशौ शावके करभे वा, अज्ञे जडे, मूढे च वालिशः स्यात् । वाडनम्, वाडेर्भावे "सर्वधातुभ्य इन्" इतीनि डलयोरैक्याड्डस्य लत्वे च वालिस्तां श्यतीति "आतोऽनुपेति" के, आलोपे च वालिशः "वालिशस्तु शिशौ मूर्खे" (इति मेदिनी) इत्येकं शावकादेः ॥

इति शान्ताः ।

अथ षान्ता व्याख्यायन्ते ।

पु. पु.

देवता, मछली, परमात्मा, मनुष्य, कौआ, बगला, तृण या घास, लता.

(सुरमत्स्याव) निमिषौ पुरुषा (वात्ममानवौ) ॥ २२७ ॥

पु. पु.

(काकमत्स्यात्खगौ) ध्वाङ्क्षौ कक्षौ (तु तृणवीरुधौ) ।

स्विति—सुरो देवो मत्स्यो मीनश्चैतौ अनिमिषौ स्याताम् । न निमिषति, नञ्—निपूर्वकान्निमिषेः कर्तरि "इगुपधेति" के, नञ्समासे नञो नस्य लोपे च अनिमिषः, द्वित्वे अनिमिषावित्येकं सुरादेः । आत्मा परमात्मा, मानवो मनुजश्चैतौ पुरुषौ स्याताम् । पुरति, पुरेः कर्तरि "पुरःकुषन्" इति कुषनि, कित्त्वाद् गुणाभावे च पुरुषः पुरुषौ "पुरुषः पूरुषे सांख्यज्ञे च पुन्नागपादपे" (इति मेदिनी) इत्येकं पुरुषादेः

काकः करटो वायसो वा मत्स्यानत्तीति मत्स्यात्सचासौ खगश्चैतौ ध्वाङ्क्षौ स्याताम् । ध्वाङ्क्षति, ध्वाङ्क्षेः कर्तरि पचाद्यचि ध्वाङ्क्षः द्वित्वे ध्वाङ्क्षौ "ध्वाङ्क्षो मत्स्यात्खगे काके भिक्षुके तक्षकेऽपिच" (इति मेदिनी) इत्येकं वायसादेः । तृणं घासादिः, वीरुल्लता चैतौ कक्षौ स्याताम् । कषति, कष्यते वा कषेः कर्तरि कर्मणि वा "वृतृवदिहनिकमिकषिभ्यःसः" इति से, "षढोरिति" कत्वे, पत्वे, क्षत्वे च कक्षः "कक्षः स्मृतो भुजामूले कक्षोऽरण्ये च वीरुधि । कक्षः शुष्कतृणे प्रोक्तः कत्वःकच्छ उदाहृतः । कक्षा स्पर्धापदे काञ्च्यां रथगेहप्रकोष्ठयोः । गजरज्जौ परीधानपश्चाद्ञ्चलपल्लवे" (इति धरणिः) इत्येकं तृणादेः ॥ २२७ । १/२ ॥

घोड़े की पगही, किरण, भेजना या हुक्म देना, मर्दन करना.

पु. पु.
अभीषुः (प्रग्रहे रश्मौ) प्रैषः (प्रेषणमर्दने) ॥२२८ ॥

अभीति—प्रग्रहे अश्वादिरज्जौ, रश्मौ किरणे च अभीषुः स्यात् । ईषते, ईष्यते वा ईषेः कर्तरि, कर्मणि वा "ईषेः किच्च" इत्युप्रत्यये, धातोरादेरिदादेशे च इषुः, अभिगत इषुः "प्रादयो गतेति" समासे अभीषुः । मुकुटमते तु अभीशुस्तालव्यान्तोऽपीत्येकं प्रग्रहादेः । प्रेषणं प्रेरणमाज्ञाकरणं वा मर्दनं पीडनं चेति समाहारद्वन्द्वे प्रेषणमर्दनं तस्मिन्प्रैषः स्यात् । प्रेषणम्, प्रपूर्वकादिषेर्भावे घञि, "प्रादूहो—" इति वृद्धौ च प्रैषः स्यात् । पीयूषव्याख्यातस्तु प्रेषः एङादिरपि । "प्रैषः प्रेषणपीडयोः" (इत्यजयः) "प्रैषः स्यात्प्रेषणे क्लेशे मर्दनोन्मादयोरपि" (इति विश्वः) इत्येकं प्रेषणादेः ॥ २२८॥

सहाय, आधा मास आदि, पगड़ी, मुकुट, महावीर्यवान्, मूसा, श्रेष्ठ, धर्म, बैल.

पु. न.
पक्षः (सहायेऽप्यु) ष्णीषं (शिरोवेष्टकिरीटयोः) ।

पु
(शुक्ले मूषिके श्रेष्ठे सुकृते वृषभे) वृषः ॥ २२९ ॥

पेति—सहाये सहचरे अपिशब्दान्मासार्धकादौ च पक्षः स्यात् । पक्षति, पक्ष्यते वा पक्षेः कर्तरि 'पचाद्यचि' कर्मणि 'घञि' वा पक्षः । "पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः । केशादेः परतो वृन्दे बले सखिसहाययोः । चुल्लीरन्ध्रे पतत्रे च बाजिकुञ्जरपार्श्वयोः" (इति मेदिनी) इत्येकं सहायादेः । शिरोवेष्टः शिरसोवेष्टनं वस्त्रादिरूपम्, किरीटं मुकुटं चैतयोरुष्णीषं स्यात् । उष्णमीषते हिनस्ति, उष्णपूर्वकादीषेः कर्तरि "इगुपधेति" के, शकन्ध्वादित्वात्पररूपे च उष्णीषम् "उष्णीषं तु शिरोवेष्टे किरीटे लक्षणान्तरे" (इति विश्वः) इत्येकं शिरोवेष्टनादेः । शुक्ले बहुवीर्यवति, शुक्रप्रयोगे वा, मूषिके आखौ, श्रेष्ठे पूज्ये नृपे वा सुकृते धर्मे, वृषभे बलीवर्दे च वृषः स्यात् । वर्षति, वृषेः कर्तरि "इगुपधेति" के, किच्वाद् गुणा भावे च वृषः "वृषोऽस्त्री

वलीवर्दे शृङ्गयां पुंराशिभेदयोः । श्रेष्ठे स्यादुत्तरस्थे च वासमूषिकशुक्ले " (इति मेदिनी) इत्येकं शुक्लादेः ॥ २२९ ॥

फूलती कली, तलवार का घर, खजाना, सौगन्द, जूआ, पाशा, चौपड़, इन्द्रियां, जूआ, सोलहमाशे, रथ का पहिया, लेन देन, बहेड़ा.

पु.न.
कोषो (ऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः) ।
पु. पु.न
(द्यूतेऽक्षेशारिफलकेऽ)प्याकर्षोऽथाक्ष(मिन्द्रिये)॥२३०॥
(ना द्यूताङ्गे कर्षे चक्रे व्यवहारे कलिद्रुमे) ।

कविति—कुड्मले मुकुले, खड्गपिधाने करवालाच्छादने, अर्थौघदिव्ययोः धनसमूह शपथयोश्च धनौघस्वर्गीयपदार्थयोर्वा कोषः अस्त्री पुन्नपुंसकं स्यात् । कुष्यते, कुषेः कर्मणि घञि ञित्त्वाद् गुणे च कोषः " कोषोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके । जातिकोशेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे " (इति मेदिनी) तालव्यान्तोऽपि " कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके— " इति श्लोकस्य मेदिन्यां तालव्यान्तेऽपि पाठः । इत्येकमीषद्विकसितकलिकादेः । द्यूते दुरोदरे, अक्षे पाशके, शारिफलकेऽष्टापदे अपिशब्दाच्चापभ्यासवस्तुनि, आकर्षणे च आकर्षः पुमान् स्यात् । आकर्षणम्, आकृष्यते, आकृषत्यस्मिन्निति वा आङ्पूर्वात्कृषेर्भावकर्माधिकरणेषु घञि, गुणे च आकर्षः " नाकर्षोद्यूतइन्द्रिये । पाशके शारिफलके कोदण्डाभ्यासवस्तुनि । आकर्षणेऽपि पुंसि स्यात् " (इति मेदिनी) इत्येकं द्यूतादेः । अथेति—इन्द्रिये हृषीके अक्षं नपुंसकं स्यात् । द्यूताङ्गे कैतवाङ्गे, कर्षे मानभेदे, चक्रे रथावयवे, व्यवहारे आयव्यय चिन्तायाम्, कलिद्रुमे भूतावासे विभीतके वा ना पुमान् स्यात् । अक्ष्णोति, अक्ष्यते, अनेन, अत्रेति वा अक्षेः कर्तरि पचाद्यचि, कर्मकरणाधिकरणेषु घञि, वा अक्षः " अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः । आत्मज्ञे पाशके चाक्षं तुत्थे सौवर्चलेन्द्रिये " (इति विश्वः) इत्येकमिन्द्रियादेः ॥ २३० ॥

जीविका, बिनवाकण्डा, नदी मात्र या तलैया.

पु. स. ‡
कर्षू (र्वार्ता करीषाग्निः) कर्षूः (कुल्याभिधायिनी) २३१॥

केति—वार्ता जीविका कर्षूः स्त्रियां स्यात् । करीषाग्निः शुष्कगोमयाग्निः कर्षूः पुमान् स्यात् । कुल्याभिधायिनी नदीमात्राभिधाना कर्षूः स्त्रियां स्यात् । कर्षति, कृष्यते, कर्षणं वा कृषेः, कर्त्तरि, कर्मणि, भावे वा " कृषिचमितनीति " ऊप्रत्यये, गुणे, रपरत्वे च कर्षूः " करीषाग्निः पुमान् कर्षूः कुल्यायामपि च स्त्रियाम् " (इति रभसः) इत्येकं जीविकादेः ॥ २३१ ॥

‡ कुल्या नदीमात्रं च । " कुल्या धुनी द्वीपवती तटिनी ह्रादिनी सरित् । रोधोवक्रापगाकर्षूः स्रवन्ती निम्नगानदी " (इति रत्नकोषः) ॥

पुरुषपना, पुरुषकर्म, जल, जहर, घूस लेना आदि, जुर्म, गुनाह, पाप, रोग

न. न.
(पुंभावे तत्क्रियायां च) पौरुषं विष (मप्सु च) ।
न. न.
(उपादानेऽप्या)मिषं(स्या)दपराधेऽपि) किल्बिषम् २३२

पुंमिति—पुंभावे पुरुषस्य भावे तत्क्रियायां पुरुषकर्मणि चशब्दात्तेजस्यपि पौरुषं स्यात् । पुरुषस्य कर्म भावो वा । "प्राणभृज्जाति" इत्यञि, ञित्त्वाद्वृद्धौ च पौरुषम । पौरुषं पुरुषस्य स्याद्भावे कर्मणि तेजसि । ऊर्ध्वविस्तृतदोः पाणिनृमाने त्वभिधेयवत् । (इति विश्वः) इत्येकं पुंभावादेः । अप्सु जले चशब्दाद्गरलेऽपि विषं स्यात् । वेवेष्टि, विषेः कर्तरि "इगुपधेति" के, कित्त्वाद् गुणाभावे च विषम् "विषं तु गरले तोये" (इति विश्वः) इत्येकं जलादेः । उपादाने उत्कोचे, अपिशब्दाद्भोग्यवस्तुनि, सम्भोगे, मांसे च आमिषं स्यात् । आमिष्यते=भुज्यते, आङ्पूर्वकान्मिषेः कर्मणि घञि, संज्ञापूर्वकत्वाद् गुणाभावे च आमिषम् "आमिषं पुन्नपुंकम् । भोग्यवस्तुनि संभोगेऽप्युत्कोचे पललेऽपि च ।" (इति मेदिनी) इत्येकमुत्कोचादेः । अपराधे पापे, दोषे अधर्मे, अन्याये वा अपिशब्दाद्रोगे च किल्बिषं स्यात् । केलनम्, किल्यते वा "किल क्षेपे" अस्मात्तौदादिकाद्भावे कर्मणि वा "किलेर्बुक् च" इति टिषचि, बुगागमे च किल्बिषम् "किल्बिषं पापरोगयोः" (इति मेदिनी) इत्येकमपराधादेः ॥ २३२ ॥

वर्षा, मेह, जम्बूद्वीप का भारतखण्ड, साल या सवत्, नाच का देखना, बुद्धि, आराधना, मागना, तनख्वाह.

पु.न.
(स्याद्वृष्टौ लोकधात्वंशे वत्सरे) वर्ष (मस्त्रियाम्) ।
स. स.
प्रेक्षा (नृत्येक्षणं प्रज्ञा) भिक्षा (सेवार्थना भृतिः) २३३

स्यादिति—वृष्टौ वारिदवर्षणे, लोकं धत्ते लोकधातुर्जम्बूद्वीपादिस्तदंशे भारतादौ, वत्सरे संवत्सरे च वर्षम् अस्त्रियां पुन्नपुंसके स्यात् । वर्षति, वर्षयति वा वृषेर्वर्षयतेर्वा कर्तरि पचाद्यचि, वर्षणमिति विग्रहे तु "अज्विधौ भयादीनामुपसंख्यानम्" इत्यचि वा गुणे रपरत्वे च वर्षम् "वर्षोऽस्त्री भारतादौ च जम्बूद्वीपाब्दवृष्टिषु । प्रावृट्काले स्त्रियां भूम्नि" (इति मेदिनी) इत्येकं वृष्ट्यादेः । नृत्यं नर्तनं तस्य, ईक्षणं दर्शनम्, "प्रेक्षा धीरीक्षणं नृत्तमिति" हैमादीक्षणं नृत्तंचेति पृथक्पाठात्समाहारद्वन्द्वो वा, प्रज्ञा बुद्धिश्च प्रेक्षा स्यात् । प्रेक्षणम्, प्रेक्ष्यतेऽनयेति वा प्रपूर्वकादीक्षतेर्भावे, करणे वा "गुरोश्च हलः" इत्यप्रत्यये, टापि च प्रेक्षा, "प्रेक्षा धीनृत्यदर्शयोः" (इत्यजयः) "प्रेक्षा नृत्येक्षणे बुद्धौ" (इति मेदिनी) इत्येकं नर्तनादेः । सेवा आराधना, अर्थना याचना, भृतिर्भरणया च भिक्षा स्यात् । भिक्षणम्, भिक्ष्यते वा "भिक्ष याच्ञायाम्" अस्माद्भावे कर्मणि वा

अप्रत्यये टापि च भिक्षा "भिक्षा भृतौ च याञ्चायां सेवाभिक्षितवस्तुनोः" (इति विश्व.) इत्येकमाराधनादेः ॥ २३३ ॥

शोभा, सपूर्ण, अधम, प्रत्यक्ष, अधिकृत, अप्रेम, अचिक्कण.

स. त्विट् (शोभापि) (त्रिषु परे) पु.स न. न्यक्षं (कात्स्न्यैनिकृष्टयोः)।
(प्रत्यक्षेऽधिकृते) पु.स.न. ऽध्यक्षो पु.स न. रूक्ष (स्त्वप्रेम्ण्यऽचिक्कणे) २३४

इति षान्ताः ॥

त्वीति–शोभा कान्तिश्छविर्वा, अपिशब्दाद्भाणी, रुचिश्च त्विट् स्यात्। त्वेषणम्, त्विष्यतेऽनयेति वा त्विपेर्भावे, साधने वा संपदादित्वात्किपि चर्त्वे च त्विट् "कान्तौ वाचि रुचौ त्विट् स्त्री" (इति रभसः) इत्येकं शोभादेः। अतः परे वक्ष्यमाणास्त्रयस्त्रिषु त्रिलिङ्ग्यां स्युर्वाच्यलिङ्गा भवन्तीति यावत्। कात्स्न्यैनिकृष्टयोः साकल्याधमयोः, अत्रापीत्यनुवृत्त्या परशुरामे च न्यक्षं स्यात्। नियतानि निकृतानि वा अक्षाणि यस्य यस्मिन्निति वा न्यक्षम् "न्यक्षः परशुरामे स्यान्न्यक्षः कात्स्न्यैनिकृष्टयोः" (इति विश्वः) इत्येकं कात्स्न्यादेः। प्रत्यक्षे साक्षात्प्रमाणीकृते, अधिकृते नियुक्ते च अध्यक्षः स्यात्। अधिगतोऽक्षं अधिगतोऽक्षेण वा अक्षेपु व्यवहारेषु अधिकृतः, अधिकृतान्यक्षाणयस्य, अध्यक्ष्णोति वा अधिपूर्वादक्ष्णोतेः कर्तरि 'पचाद्यचि' अध्यक्षः "अध्यक्षोऽधिकृते प्रोक्तः प्रत्यक्षे त्वभिधेयवत्" (इति मेदिनी) इत्येकं प्रत्यक्षादेः। अप्रेम्णि प्रेमाभावे स्नेहरहिते वा अचिक्कणे अमसृणे च रूक्षः स्यात्। रूक्षयति, 'रूक्ष-पारुष्ये' अस्मात्स्वार्थणयन्तात्कर्तरि पचाद्यचि रूक्षः। इत्येकमप्रेमादेः ॥ २३४ ॥

इति षान्ताः ॥

अथ सान्ता व्याख्यायन्ते ॥

दिवाकर, सफेद पखवाला पक्षी, सूर्य, आगी, बछडा, वरस, चातक, देवता.

(रविश्वेतच्छदौ) पु. हंसौ (सूर्यवह्नी) पु. विभावसू ।
पु. वत्सौ (तर्णकवर्षौ द्वौ) (सारङ्गाश्च) पु. दिवोकसः ॥२३५॥

रेति–रविः सूर्यः, श्वेतच्छदः सितपक्षो विहंगभेदश्चैतौ हंसौ स्याताम्। हन्ति गच्छति, हन्तेः कर्तरि पचाद्यचि "भवेद्वर्णागमाद्धंसः" इति सगागमे च "वृतृवदिवचिवसिहनिकमिकपिभ्यः" इति स प्रत्यये वा हंस. द्वित्वे हंसौ "हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे। योगिमन्त्रादिभेदेषु परमात्मन्यमत्सरे। निर्लोभनृपतौ हंसः शरीरमरुदन्तरे" (इति विश्वः) इत्येकं रव्यादेः। सूर्यो दिवाकर.. वह्निरनलश्चैतौ विभावसू स्याताम्। विभाप्रभावसुधनमस्येति विभावसु द्वित्वे विभावसू "विभावसुः

पुमान्सूर्ये हारभेदे च पावके" (इति मेदिनी) इत्येकं सूर्यादेः । तर्णको गोवत्सः, वर्षो वत्सरश्चेमौ द्वौ वत्सौ स्याताम् । वसति, अस्मिन्निति वा वसेः कर्तरि, अधिकरणे वा "वृतॄवदीति" से "सः स्यार्धधातुके" इति सस्य ते च वत्सः द्वित्वे वत्सौ "वत्सः पुत्रादिवर्णयो. । तर्णके नोरसि क्लीबम्" (इति मेदिनी) इत्येकं गोवत्सादेः । सारमङ्गं येषामिति, सारं गच्छन्तीति वा सारङ्गाः मृगचातकहरिणाः चशब्दाद्देवा अपि दिवौकसः स्युः । द्यौरोकोयेषामिति दिवोकसः "दिवोकाश्च दिवौकाश्च पुंसि देवे च चातके" (इति मेदिनी) इत्येकं हरिणादेः ॥ २३५ ॥

श्रृङ्गार, वीर आदि, कर्ण भूषण आदि.

पु.
(श्रृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे) रसः ।

पु. पु.
(पुंस्यु) त्तंसावतंसौ (द्वौ कर्णपूरे च शेखरे) ॥ २३६ ॥

श्रिति—श्रृङ्गारादौ श्रृङ्गारवीरकरुणादौ, विषे गरले, वीर्ये वले प्रभावे च गुणे स्वादे रागे प्रीतावनुरागे वा द्रवे द्रवतायुक्ते वेगे च रसः स्यात् । रस्यते "रस आस्वादनादौ" अदन्तस्तस्मात्कर्मणि घञि, अल्लोपस्य स्थानिवत्त्वाद्वृद्ध्यभावे च रस. "रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः । श्रृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे । रसा तु शल्लकी पाठाजिह्वाधरणिकङ्गुषु" (इति विश्वः) इत्येकं श्रृङ्गारादेः । कर्णपूरे कर्णाभरणे, शेखरे शिरोभूषणे च उत्तंसावतंसावेतौ द्वौ पुंसि स्याताम् । उत्तंस्यति, उत्तंस्यते अनेन वा उत्पूर्वकस्तसिः सौत्रोभूषार्थस्तस्मात्कर्तरि पचाद्यचि, कर्मसाधनयोर्घञि वा उत्तंसः, एवमवतंसोऽपि "उत्तंसः कर्णपूरेऽपि शेखरे चावतंसवत्" (इति विश्वः) इति द्वे कर्णाभरणादेः ॥ २३६ ॥

आठो वसुदेवता, आगी, किरण, रत्न, धन,

पु. न.
(देवभेदेऽनले रश्मौ) वसू (रत्ने धने) वसु ।

विष्णु, बुद्धिमान्, ब्रह्मा, हितकी चाहना, सापकी दाढ.

पु. स.
(विष्णौ च)वेधाः(स्त्री)त्वाशी(र्हिताशंसाहिदंष्ट्रयोः)२३७

दयिति—देवभेदे अष्टवसुदेवताविशेषे अनले अग्नौ कृत्तिकाभे वा रश्मौ किरणे हयरश्मौ वा वसुः पुमान्स्यात् । रत्ने माणिक्यादौ धने द्रव्यमात्रे च वसु क्लीवं स्यात् । वसति सर्वत्र, उष्यतेऽनेन वा वसेः कर्तरि करणे वा "शॄस्वृस्निहि" इत्युप्रत्यये वसुः "वसुर्हृदेऽग्नौ योक्त्रेऽशौ वसु तोये धने मणौ" (इत्युणादिकोषः) "वसुर्ना देवभेदाग्निभयोक्त्रवकराजसु । क्लीवं वृद्ध्यौषधे श्याले रैरत्ने मधुरे त्रिपु" (इति मेदिनी) इत्येकं देवभेदादेः । विष्णौ हृषीकेशे चशब्दाद् वुधे परमेष्ठिन्यपि वेधाः स्यात् । विदधाति, विधेः कर्तरि असुनि । विदधातीति विग्रहे तु "विधाञो वेध च" इत्युसुनि वा दीर्घे च वेधाः "वेधाः पुंसि हृषीकेशे वुधे च परमेष्ठिनि" (इति मेदिनी) इत्येकं विष्ण्वादेः ।

हितस्य आशंसा, अहेः सर्पस्य दंष्ट्रा चैतयोः आशीः स्त्री स्यात्। आशास्ते, आङ्-पूर्वकः 'शासु इच्छायाम्' आदादिकस्तस्मात्कर्तरि क्विपि। आशासनम्, आशास्यतेऽनयावेति विग्रहे तु संपदादित्वात् क्विपि वा "आशासः क्वौ-" इतीत्वे षत्वस्यासिद्धत्वाद्रुत्वे च आशीः "आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति" (इति कोषान्तरम्) इत्येकं हितार्शसादेः ॥ २३७ ॥

प्रार्थना, बडी चाहना आदि, चोरी, वध आदि, घोडी, माता आदि, भूमि, स्वर्ग.

स. लालसे (प्रार्थनौत्सुक्ये) स. हिंसा (चौर्यादि कर्म च)।
स. प्रसू (रश्वापि) (भूद्यावौ) स. रोदस्यौ न.अ. रोदसी (च ते) २३८

लेति-प्रार्थना याचना, औत्सुक्यमतिलिप्सा च उभे लालसे स्याताम्। लालसनम् 'लस दीप्तौ' भौवादिको यङन्तस्तस्माद्भावे "अ प्रत्ययात्" इत्यप्रत्यये, टापि च लालसा द्वित्वे लालसे "लालसौत्सुक्यतृष्णातिरेकयाच्ञासु च द्वयोः" (इति मेदिनी) इत्येकं प्रार्थनादेः। चोरस्य कर्म 'ब्राह्मणादित्वात्ष्यञि' चौर्यम्, आदिना बन्धन-त्रासन-ताडनादि चाद्वधोऽपि हिंसा स्यात्। हिंसनम् 'हिसि हिंसायाम्' रौधादिकस्तस्माद्भावे "गुरोश्च-" इत्यप्रत्यये, टापि च हिंसा "हिंसा चौर्यादिघातयोः" (इति मेदिनी) इत्येकं चौर्यादेः। अश्वा वडवा अपिशब्दाज्जननी कदलीलता च प्रसूः स्यात्। प्रसूते प्रपूर्वकात् सूतेः कर्तरि "सत्सू-" इति क्विपि प्रसूः "प्रसूरश्वाजनन्योश्च कदली वीरुधोरपि" (इति विश्वः) इत्येकमश्वादेः। ते भूद्यावौ द्यावाभूमी रोदस्यौ, रोदसी च स्याताम्। रोदिति सर्वमत्रेति, रुदेराधारे असुनि, गौरादित्वान्ङीषि च रोदसी, द्वित्वे रोदस्यौ, 'रोदसी, इत्यव्ययमप्यस्ति। "द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च" विगृहीतयोरप्येते नामनी। रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्। सह प्रयोगेऽप्यनयोरोदः स्यादपि रोदसी" (इति विश्वः) इत्येकं द्यावाभूम्योः ॥ २३८ ॥

ज्वाला, दीप्ति, नक्षत्र, प्रकाश, दृष्टि, पाप, गुनाह, पक्षी, बाल्यावस्था आदि.

(ज्वालाभासोर्नपुंस्य) न. र्चिर्ज्यो न. ति (र्भद्योतदृष्टिषु)।
(पापापराधयो) न.+ रागः (खगबाल्यादिनो) न. र्वयः ॥ २३९ ॥

ज्वेति-ज्वाला वह्निशिखा भाः दीप्तिश्च अनयोः अर्चिः पुंसि न स्यात्। अर्च्यते, अर्चेः कर्मणि "अर्चिशुचीति-" इसौ, अर्चिः "अथार्चिर्मयूखशिखयोर्नना" (इति मेदिनी) इत्येकं ज्वालादेः। भं नक्षत्रम्, द्योतः प्रकाशः, दृष्टिः कनीनिका मध्यभागश्चैषु ज्योतिः नपुंसकं स्यात्। द्योतते, द्योतनम्, अनेनेति वा द्युतेः कर्तृभाव साधनेषु "द्युतेरिसिन्नादेश्चजः" इतीसनि, दस्य जकारे, गुणे च ज्योतिः "ज्योति-

+ आगच्छतीति आगः-इति स्वाम्युक्तिस्तु चिन्त्या।

पुमान्सूर्ये हारभेदे च पावके" (इति मेदिनी) इत्येकं सूर्यादेः। तर्णको गोवत्सः, वर्षो वत्सरश्चेमौ द्वौ वत्सौ स्याताम् । वसति, अस्मिन्निति वा वसेः कर्तरि, अधिकरणे वा "वृतॄवदीति" से "सः स्यार्धधातुके" इति सस्य ते च वत्सः द्वित्वे वत्सौ "वत्सः पुत्रादिवर्षयो. । तर्णके नोरसि क्लीबम्" (इति मेदिनी) इत्येकं गोवत्सादेः। सारमङ्गं येषामिति, सारं गच्छन्तीति वा सारङ्गाः मृगचातकहरिणाः चशब्दाद्देवा अपि दिवोकसः स्युः। द्यौरोकोयेषामिति दिवोकसः "दिवोकाश्च दिवौकाश्च पुंसि देवे च चातके" (इति मेदिनी) इत्येकं हरिणादेः ॥ २३५ ॥

शृङ्गार, वीर आदि, कर्ण भूषण आदि.

(शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे) रसः । पु.

(पुंस्यु) त्तंसावतंसौ (द्वौ कर्णपूरे च शेखरे) ॥ २३६ ॥ पु. पु.

श्रिति—शृङ्गारादौ शृङ्गारवीरकरुणादौ, विषे गरले, वीर्ये बले प्रभावे च गुणे स्वादे रागे प्रीतावनुरागे वा द्रवे द्रवतायुक्ते वेगे च रसः स्यात्। रस्यते "रस आस्वादनादौ" अदन्तस्तस्मात्कर्मणि घञि, अल्लोपस्य स्थानिवत्त्वाद्वृद्ध्यभावे च रसः "रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे। रसा तु शल्लकी पाठाजिह्वाधरणिकङ्गुषु" (इति विश्वः) इत्येकं शृङ्गारादेः। उत्तं- कर्णपूरे कर्णाभरणे, शेखरे शिरोभूषणे च उत्तंसावतंसावेतौ द्वौ पुंसि स्याताम्। उत्तंसयति, उत्तंस्यते अनेन वा उत्पूर्वकस्तसिः सौत्रोभूषार्थस्तस्मात्कर्तरि पचाद्यचि, कर्मसाधनयोर्घञि वा उत्तंसः, एवमवतंसोऽपि "उत्तंसः कर्णपूरेऽपि शेखरे चावतंसवत्" (इति विश्वः) इति द्वे कर्णाभरणादेः ॥ २३६ ॥

आठो वसुदेवता, आगी, किरण, रत्न, धन, विष्णु, बुद्धिमान्, ब्रह्मा, हितकी चाहना, सापकी दाढ.

(देवभेदेऽनले रश्मौ) वसू (रत्ने धने) वसु । पु. न.

(विष्णौ च)वेधाः(स्त्री)त्वाशी(र्हिताशंसाहिदंष्ट्रयोः)२३७ पु. स.

दयिति—देवभेदे अष्टवसुदेवताविशेषे अनले अग्नौ कृत्तिकाभे वा रश्मौ किरणे हयरश्मौ वा वसुः पुमान्स्यात्। रत्ने माणिक्यादौ धने द्रव्यमात्रे च वसु क्लीबं स्यात्। वसति सर्वत्र, उष्यतेऽनेन वा वसेः कर्तरि करणे वा "शृस्वृस्निहि" इत्युप्रत्यये वसु- "वसुर्हदेऽग्नौ योक्त्रेऽशौ वसु तोये धने मणौ" (इत्युणादिकोषः) "वसुर्ना देवभेदाग्निभयोक्त्रकराजसु । क्लीबं वृद्धौषधे श्याले रैरत्ने मधुरे त्रिपु" (इति मेदिनी) इत्येकं देवभेदादेः। विष्णौ हृषीकेशे चशब्दाद् बुधे परमेष्ठिन्यपि वेधाः स्यात्। विधति विधेः कर्तरि असुनि। विदधातीति विग्रहे तु "विधाञो वेध च" इत्यसुनि वा दीर्घे वेधाः "वेधा. पुंसि हृषीकेशे बुधे च परमेष्ठिनि" (इति मेदिनी) इत्येकं विष्ण्वादेः

हितस्य आशंसा, अहेः सर्पस्य दंष्ट्रा चैतयोः आशीः स्त्री स्यात् । आशास्ते, आङ्पूर्वकः 'शासु इच्छायाम्' आदादिकस्तस्मात्कर्तरि क्विपि । आशासनम्, आशास्यतेऽनयावेति विग्रहे तु संपदादित्वात् क्विपि वा "आशासः कौ–" इतीत्त्वे पत्वस्यासिद्धत्वादुत्वे च आशीः "आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति" (इति कोषान्तरम्) इत्येकं हिताशंसादेः ॥ २३७ ॥

प्रार्थना, बडी चाहना आदि, चोरी, वध आदि, घोड़ी, माता आदि, भूमि, स्वर्ग.

स. स.
लालसे (प्रार्थनौत्सुक्ये) हिंसा (चौर्यादि कर्म च) ।
स. स. न.श्र.
प्रसू (रश्वापि) (भूद्यावौ) रोदस्यौ रोदसी (च ते) २३८

लेति–प्रार्थना याचना, औत्सुक्यमतिलिप्सा च उभे लालसे स्याताम् । लालसनम् 'लस दीप्तौ' भौवादिको यङन्तस्तस्माद्भावे "अ प्रत्ययात्" इत्यप्रत्यये, टापि च लालसा द्वित्वे लालसे "लालसौत्सुक्यतृष्णातिरेकयाच्ञासु च द्वयोः" (इति मेदिनी) इत्येकं प्रार्थनादेः । चौरस्य कर्म 'ब्राह्मणादित्वात्ष्यञि' चौर्यम्, आदिना वन्धन-त्रासन-ताडनादि चाद्वधोऽपि हिंसा स्यात् । हिंसनम् 'हिसि हिंसायाम्' रौधादिकस्तस्माद्भावे "गुरोश्च–" इत्यप्रत्यये, टापि च हिंसा "हिंसा चौर्यादिघातयोः" (इति मेदिनी) इत्येकं चौर्यादेः । अश्वा वडवा अपिशब्दाज्जननी कदलीलता च प्रसूः स्यात् । प्रसूते प्रपूर्वकात् सूतेः कर्तरि "सत्सू–" इति क्विपि प्रसूः "प्रसूरश्वाजनन्योश्च कदली वीरुधोरपि" (इति विश्वः) इत्येकमश्वादेः । ते भूद्यावौ द्यावाभूमी रोदस्यौ, रोदसी च स्याताम् । रोदिति सर्वमत्रेति, रुदेराधारे असुनि, गौरादित्वान्ङीपि च रोदसी, द्वित्वे रोदस्यौ, 'रोदसी, इत्यव्ययमप्यस्ति । "द्यावापृथिव्यौ रोदस्यौ रोदसी रोदसीति च" विगृहीतयोरप्येते नामनी । रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक् । सह प्रयोगेऽप्यनयोरोदः स्यादपि रोदसी" (इति विश्वः) इत्येकं द्यावाभूम्योः ॥ २३८ ॥

ज्वाला, दीप्ति, नक्षत्र, प्रकाश, दृष्टि, पाप, गुनाह, पक्षी, बाल्यावस्था आदि.

न. न.
(ज्वालाभासोर्नपुंस्य) र्चिर्ज्योति (र्भद्योतदृष्टिषु) ।
न.+ न.
(पापापराधयो) रागः (खगबाल्यादिनो) र्वयः ॥ २३९ ॥

ज्वेति–ज्वाला वह्निशिखा भाः दीप्तिश्च अनयोः अर्चिः पुंसि न स्यात् । अर्च्यते, अर्चेः कर्मणि "अर्चिशुचीति–" इसौ, अर्चिः "अथार्चिर्मयूखशिखयोर्नना" (इति मेदिनी) इत्येकं ज्वालादेः । भं नक्षत्रम्, द्योतः प्रकाशः, दृष्टिः कनीनिका मध्यभागश्चैषु ज्योतिः नपुंसकं स्यात् । द्योतते, द्योतनम्, अनेनेति वा द्युतेः कर्तृभाव साधनेषु "द्युतेरिसिन्नादेश्चजः" इतीसनि, दस्य जकारे, गुणे च ज्योतिः "ज्योति–

+ आगच्छतीति आगः–इति स्वाम्युक्तिस्तु चिन्त्या ।

रग्नौ दिवाकरे । पुमान्नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः ” (इति मेदिनी) इत्येकं नक्षत्रादेः । पापं किल्बिषम्, अपराधो मन्तुश्चानयोः आगः स्यात् । एति, इणः कर्तरि “ इण आग अपराधे च ” इत्यसुनि धातोरागादेशे च आगः “ आगोऽपराधे पापे स्यात् ” (इति मेदिनी) इत्यकं पापादेः । खगः पक्षी, बाल्यं बाल्यावस्था आदिना यौवनं चानयोर्वयः स्यात् । वयत, वति, अजति वा वयतेर्वेतेरजतेर्वा कर्तरि असुनि वयः “ वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम् ” (इति मदिनी) इत्येकं खगादेः ॥ २३९ ॥

प्रताप, विष्ठा, उत्सव, तेज, गुण, स्त्रीपुष्प, राहु, अँधेरा, तीसरा गुण.

न. न.
(तेजःपुरीषयो) र्वर्चो मह (स्तूत्सवतेजसोः) ।
न. न.
रजो (गुणे च स्त्रीपुष्पे) (राहौ ध्वान्ते गुणे) तमः॥२४०॥

तयिति—तेजः प्रतापः, प्रभावः प्रकाशो वा पुरीषं गूथ चानयोः वर्चो नपुंसकं स्यात्। वर्चते ‘ वर्च दीप्तौ ’ अस्मात्कर्तरि ‘ असुनि ’ वर्चः “ वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि । पुंसि चन्द्रस्य तनय ” (इति मेदिनी) इत्येकं प्रतापादः । उत्सवः उद्धर्षः तेजः प्रतापादिश्चानयोः महः स्यात् । महनम्, मह्यते वा महतेर्भावकर्मणोरसुनि महः मुकुटमते तु अदन्तोऽपि “ मही नद्यन्त भूमौ मह उत्सवतेजसोः ” (इति मेदिनी) इत्येकमुत्सवादः । गुणे गुणान्तरे, स्त्री पुष्पे आर्तवे चशब्दात्पराग रेणुमात्रेऽपि रजः क्लीवं स्यात् । रञ्जनम् , रज्यतेऽनेनेतिवा, रजतेर्भा । नयोरसुनि, “ भूरञ्जिभ्यां कित् ” इति कित्त्वान्नलोपे च रजः “ रजःक्लीवं गुणान्तरे । आर्तवे च परागे च रेणुमात्रेऽपि दृश्यते ” (इति मदिनी) अदन्तोऽपि । रजोऽयं रजसा साध स्त्रीपुष्पगुणधूलिपु ” (इत्यजयः) इत्येकं गुणादः । राहौ सहिकेये, ध्वान्ते महान्धकारे, गुण सत्त्वादित्रये, “ पापे, शोके च ” तमः क्ली स्यात् । तम्यतेऽनेनेति, ‘ तमु ग्लानौ ’ अस्मादचादिकात्करण असुनि तमः “तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे” (इति मेदिनी) इत्यकं राह्वादः ॥ २४० ॥

अनुष्टुबादि, मनोरथ, सान्तपनादि कर्म, बल, मार्ग, आकाश, श्रावण मास.

न. न.
छन्दः (पद्येऽभिलाषेच) तपः (कृच्छ्रादि कर्म च) ।
न. पु न. पु.
सहो(बलं)सहा(मार्गो)नभः(खं)(श्रावणो)नभाः २४१॥

छेति—पद्येऽनुष्टुबादौ अभिलाषे मनोरथे, चशब्दाद्वेदे स्वराचारेऽपि छन्दः स्यात् । चन्दनम्, चन्द्यतेऽनेनेति वा चन्देर्भावसा नयोरसुनि “ चन्देरादेश्चछः ” इति चस्य छत्वं च छन्दः “ छन्दः पद्ये च वेदे च स्वराचाराभिलाषयोः ” (इति मेदिनी) इत्येकं पद्यादः । कृच्छ्रं सान्तपनादिकम्, आदिना प्राजापत्य-चान्द्रायणा-

दिव्रतरूपं कर्म, चशब्दाल्लोकान्तरम्, धर्मम्, शिशिरो, माघश्च तपः, तपाश्च स्यात् । तपनम्, तप्यते, अनेनेति वा । तपेर्भावकर्मकरणेषु 'असुनि' तपः "तपोलोकान्तरेऽपिच । चान्द्रायणादौ धर्मे च पुमाञ्शिशिरमाघयोः" (इति मेदिनी) इत्येकं सान्तपनादः । बलं स्थौल्यसामर्थ्यसैन्यं ज्योतिश्च सहः स्यात् । मार्गो मार्गशीर्षः पन्थाश्च सहाः स्यात् । सहत, सह्यते, अनेन, अत्रेति वा सहेः कर्तृकर्मकरणाधिकरणेषु असुनि, सहः, सहाश्च "सहो बले ज्योतिषि च पुंसिहेमन्तमार्गयोः" (इति मेदिनी) अत्र लिङ्गभेदार्थो द्विःपाठो बोद्धव्यः, एवमग्रेऽपि । इत्येकं बलादः । खं व्योम नभः स्यात् । श्रावणः श्रावणमासः अत्रापि चानुवृत्त्या मेघपतद्ग्रहघ्राणमृणालसूत्रादिश्च नभाः स्यात् । नभनम्, नभ्यते, अनेन, अत्रेति वा नभेर्भावकर्मसाधनाधारेषु असुनि, नभः नभाश्च "नभो व्योम्निनभा मेघे श्रावणे च पतद्ग्रहे । घ्राणे मृणालसूत्रे च वर्षासु च नभाः स्मृतः" (इति विश्वः) इत्येकमाकाशादेः ॥ २४१ ॥

घर, आश्रय-मात्र, दूध, पानी, प्रकाश, बल, बीज, नदीका वेग.

(न.) ओकः(सद्माश्रयश्चौ) काः (पु.) पयः (क्षीरं) (न.) पयो (ऽम्बु च) ।
(न.) ओजो (दीप्तौ बले) (न.) स्रोत (इन्द्रिये निम्नगारये) ॥२४२॥

अविति—सद्म गृहम् ओकः स्यात् । आश्रयः आश्रयमात्रश्च ओकाः स्यात् । उच्यति समवैत्यत्र । 'उच समवाये' अस्माद्दैवादिकादाधारे 'असुनि' गुणे न्यङ्कादित्वात्कुत्वे च ओकः "ओकउचःके" इति निपातनाददन्तोऽपि । "ओका आश्रयमात्रे-स्यान्मन्दिरे च नपुंसकम्" (इति मेदिनी) इत्येकं मन्दिरादः । क्षीरं दुग्धं पयः स्यात् । अम्बु जलं च पयः स्यात् । पीयते 'पीङ् पाने' दैवादिकः । पयते वा 'पय-गतौ' भौवादिको वा अस्मात्कर्तरि 'असुनि' पयः "पयः क्षीरे च नीरे च" (इति-हैमः) इत्येकं क्षीरादेः । दीप्तौ द्युतौ प्रभायां वा बल सामर्थ्ये अत्रापि चानुवृत्त्या अवष्टम्भे प्रकाशेपि ओजः स्यात् । उब्जति, अनन वा 'उब्ज आर्जवे' अस्मात्तौदादिकात्कर्तरि साधने वा "उब्जेर्बल बलोपश्चेति" असुनि, बलोपे, गुणे च ओजः "ओजोदीप्ताववष्टम्भे प्रकाशबलयोरपि" (इति मेदिनी) स्वाम्यादिमते तु विषमसंख्यावाचीओजोऽदन्तोऽपि इत्येकं प्रभादेः । इन्द्रिये वीर्ये निम्नगारये नदीवेगे च स्रोतः स्यात् । स्रवति, 'स्रु गतौ' अस्माद्भौवादिकात्कर्तरि "स्रुरीभ्य तुट् च" इति असुनि, तुडागमे, गुणे च स्रोतः "स्रोतोऽम्बुवेग इन्द्रिय" (इति मेदिनी) इत्येकं वीर्यादेः ॥ २४२ ॥

प्रभाव, प्रकाश, असहन, बल, शुक्र, पण्डित, क्रूर आदिः

†(न.) तेजः (प्रभावे दीप्तौ च बले शुक्रेऽप्य) तस्त्रिषु ।
(पु.) विद्वान् (विदंश्च) (पु.) बीभत्सो (हिंस्रोऽप्य (तिशयेत्वमी) २४३

† "अधिक्षेपावमानादेः प्रत्युक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्" (इति भरतः) ॥

तयिति–प्रभावे प्रतापे, दीप्तौ प्रकाशे, चादसहने, वले सामर्थ्ये, शुक्रे रेतसि अपि-शब्दाद्धाम्नि च तेजः स्यात् । तेजयति, तेज्यतेऽनेनेति वा 'तिज निशाने' भौवादि-कारण्यन्तात्कर्तरि, साधने वा असुनि, णिलोपे च तेजः "तेजो धाम्नि पराक्रमे । प्रभावरेतसोश्च" (इति विश्वः) "तेजो दीप्तौ प्रभावे च स्यात्पराक्रमरेतसोः" (इति मेदिनी) इत्येकं प्रभावादेः । अतःपरमावर्गान्तं वक्ष्यमाणाः सान्तास्त्रिषु त्रिलिङ्गाः वाच्यलिङ्गा भवन्तीति यावत् । विदन् पण्डितः, चशब्दादात्मवेत्ता प्राज्ञोऽपि विद्वान् स्यात् । वेत्ति, विदेःकर्तरि शतरि "विदे.शतुर्वसुः" इति शतुर्वसावादेशे, नुमागमे, दीर्घे, सुलोपे, सलोपे तस्यासिद्धत्वान्नलोपाभावे च विद्वान् "विद्वानात्मविदिप्राज्ञे पण्डिते चाभिधेयवत्" (इति विश्वः) इत्येकं पण्डितादेः । हिंस्रः क्रूरः शरारुर्घातुको वा अपिशब्दाद्रससेदो, विकृतः, पार्थः, पापो, घृणात्मा च वीभत्सः स्यात् । वीभत्सते, वीभत्स्यते, अनेन वा 'वध बन्धने' भौवादिकस्तस्मात्स्वार्थसन्नन्तात्कर्तरि पचाद्यचि, कर्मणि, करणे वा घञि, घे वा अलोपे च वीभत्सः "वीभत्सो विकृते पार्थे क्रूरे पापघृणात्मनोः" (इत्यजयः) इत्येकं हिंस्रादेः । अमी वक्ष्यमाणा ज्यायानित्यादयश्चत्वारस्त्वऽतिशयेऽर्थे प्रवर्तन्तइति ॥ २४३ ॥

बूढा, प्रशंसनीय, ज्वान, थोडा, महान् श्रेष्ठ, साधु, स्वीकार या मजबूत.

पु.स.न. पु.स.न.
(वृद्धप्रशस्ययो) र्ज्यायान् कनीयांस्तु (युवाल्पयोः) ।

पु.स.न. पु.स.न.
वरीयां (स्तूरुवरयोः) साधीया (न्साधुबाढयोः)॥२४४॥

इति सान्ताः ।

त्रिति–वृद्धो जीर्णः स्थविरो वा प्रशस्यः स्तुत्यश्चानयोर्ज्यायान् स्यात् । अतिशयेन वृद्धः प्रशस्यो वा "द्विवचनेति" ईयसुनि "ज्यच" इति, "वृद्धस्य च" इति वृद्धप्रशस्ययोर्ज्यादेशे, "ज्यादादीयसः" इत्यात्वे, नुमागमे, दीर्घे, सुलोपे, सलोपे च ज्यायान् "ज्यायान्वृद्धे प्रशस्ये च" (इति हैमः) इत्येकं वृद्धप्रशस्ययोः । युवा तरुणः, अल्पः स्तोकश्चानयोः कनीयान्स्यान् । अतिशयितो युवाल्पो वा । "युवाल्पयोः कनन्यतरस्याम्" इतीयसुनि, कन्नादेशे च कनीयान् "कनीयानतियूनिस्यादत्यल्पानुजयोस्त्रिपु" (इति मेदिनी) इत्येकं युवाल्पयोः । उरुर्महान्, वरःश्रेष्ठश्चानयोर्वरीयान् स्यात् । अति शयित उरुर्वरो वा । "द्विवचनेति" ईयसुनि, "प्रियस्थिरेति" उरोर्वरादेशे च वरीयान् "वरीयान् योगभिच्छ्रेष्ठवरिष्ठेष्वतियूनि च" (इति मेदिनी) इत्येकं महदादेः । साधुः सज्जनो रम्यो वा वाढं स्वीकारः दृढश्चानयोः साधीयान्स्यान् । अतिशयितः साधुर्वाढो वा । ईयसुनि "अन्तिकवाढयोः" इति वाढशब्दस्य साधादेशे च साधीयानित्येकं साध्वादेः ॥ २४४ ॥

इति सान्ताः ॥

अथ हान्ता व्याख्यायन्ते ॥

पत्ता, मोर का पख, निर्बन्ध, ग्रहण, सूर्यादि, द्वार, शिरोभूषण आदि.

न. पु.
(दलेऽपि) बर्हं (निर्बन्धोपरागार्कादयो) ग्रहाः ।
पु.
(द्वार्यापीडे क्वाथरसे) निर्यूहो (नागदन्तके) ॥ २४५ ॥

देति—दले पत्रे, अपिशब्दान्मयूरपिच्छे च बर्हं स्यात् । बर्हति 'बृह वृद्धौ' अस्माद्भौवादिकात्कर्तरि 'पचाद्यचि' बर्ह्यते वेति विग्रहे तु बर्हेः कर्मणि 'घञि' बर्हम् "बर्हं पेच्छेदलेऽस्त्रियाम्" (इति मेदिनी) इत्येकं दलादे. । निर्बन्धः आग्रहविशेषः "लोके जिद इतिख्यातो वा" उपरागः अर्केन्दुग्रहणम् अर्कादिः सूर्यादिश्चैते ग्रहाः स्युः । गृह्णाति, ग्रहणं वा ग्रहेः कर्तरि "विभाषाग्रहः" इति पक्षे अचि, भावे तु "ग्रहवृदृ" इत्यपि 'ग्रह.' द्वित्वे ग्रहौ, बहुत्वे ग्रहाः "ग्रहोऽनुग्रहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः" (इति विश्वः) इत्येकमाग्रहविशेषादेः । द्वारि द्वारे, आपीडे शिरोभूषणे, क्वाथरसे कथितद्रव्यरसे, नागदन्तके भित्तिस्थ कीलके च निर्यूहः स्यात् । निर्यूहति, निर्पूर्वकायूहेर्लौकिकात्साधोः कर्तरि "इगुपधेति" के निरूहतिवेति विग्रहे तु के, पृषोदरादित्वाद्धातोर्यडागमे च निर्यूहः "निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके" (इति विश्वः) इत्येकं द्वारादेः ॥ २४५ ॥

तुलासूत्र, घोड़े आदिकी रस्सी, पत्नी, परिवार, ग्रहण, मूल धन, सौगन्द आदि.

पु पु.
(तुलासूत्रेऽश्वादिरश्मौ) प्रग्राहः प्रग्रहो (ऽपि च) ।
पु.
(पत्नीपरिजनादानमूलशापाः) परिग्रहाः ॥ २४६ ॥

तुलेति—तुलासूत्रे हस्तेन यद् गृहीत्वा तुलया तोल्यते तत्तुलासूत्रं "मंझा" इति ख्यातम् तस्मिन्, अश्वो हयः आदिना वृषादयश्च तेषां रश्मौ रज्जौ, अपिशब्दात् किरणे, भुजे, सुवर्णे, हरिपादपे, बन्धे, बन्द्यां च प्रग्राहः-प्रग्रहश्च स्यात् । प्रगृह्यते प्रपूर्वकाद्ग्रहेः कर्मणि "प्रवणिजाम्" "रश्मौ च" इति वा घञि, ञित्त्वादुपधावृद्धौ च प्रग्राहः "प्रग्राह. स्यात्तुलासूत्रे वृषादीनां च बन्धने" (इति हैमः) पक्षे "ग्रहवृदृ" इत्यपि, प्रग्रहः "प्रग्रहस्तु तुलासूत्रे बन्द्यां नियमने भुजे। हयादिरश्मौ रश्मौ च सुवर्णे हरिपादपे" (इति विश्वः) इत्येकं तुलासूत्रादेः । पत्नी जाया, परिजनः परिवारः, आदानं स्वीकारो ग्रहणं वा, मूलं मूलधनाङ्गीकारः, शापः शपथश्चैते परिग्रहाः स्युः । परिगृह्णाति, परिग्रहणम्, परिगृह्यते वा परिपूर्वकाद्ग्रहेः कर्तरि "विभाषा ग्रहः" इति पक्षे 'अचि' भावकर्मणोस्तु "ग्रहवृदृ—" इति 'अपि' परिग्रहः द्वित्वे परिग्रहौ, बहुत्वे परिग्रहाः "परिग्रहः कलत्रे च मूलस्वीकारयोरपि । शापे परिवारे च राहुवक्त्रस्थभास्करे" (इत्यजयः) इत्येकं पत्न्यादेः ॥ २४६ ॥

स्त्री, वर स्त्री की कमर, समूह, वृत्रासुर, आगी, चन्द्रमा, सूर्य आदि.

पु.ब. पु.
(दारेषु च) गृहाः (श्रोण्यामप्या) रोहो (वरस्त्रियाः)।

पु. पु. पु.
व्यूहो (वृन्देऽप्य) हि (वृत्रेऽप्य) (ग्नीन्द्वर्का) स्तमोपहाः २४७

देति–दारेषु[1] पत्न्याम्, च शब्दात्सद्मनि गृहाः पुंभूम्नि स्युः । गृह्णाति धान्यादिकमिति, ग्रहेः कर्तरि "गेहे कः" इति के, किन्त्वाद् "ग्रहिज्येति" संप्रसारणे च । गर्हते वेति विग्रहे तु "इगुपधेति" के गृहः, द्वित्वे गृहौ, बहुत्वे गृहाः, गृहं च "गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि" (इति मेदिनी) इत्येकं दारादेः । वरस्त्रियाः वराङ्गनायाः श्रोण्यां कट्याम्, अपिशब्दादवरोहे, आरोहणे, गजारोहे, दीर्घत्वे, समुच्छ्रये च आरोहः स्यात् । आरोहति, आरोहणम्, आरुह्यते वा । आङ् पूर्वकाद्रुहेः कर्त्तरि "पचाद्यचि" भावकर्मणोस्तु घञि गुणे च आरोहः "आरोहस्त्ववरोहे च वरारोहा कटावपि । आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये" (इति मेदिनी) इत्येकं वराङ्गनाकट्यादेः । वृन्दे समूहे अपिशब्दात्तर्कनिर्माणबलविन्यासेषु च व्यूहः स्यात् । व्यूहते, व्यूह्यते वा । विपूर्वकाद् "ऊह वितर्के" अस्माद्भौवादिकात्कर्तरि "इगुपधेति" के कर्मणि घञि वा व्यूहः "व्यूहः स्याद्बलविन्यासे निर्माणे वृन्दतर्कयोः" (इति विश्वः) इत्येकं समूहादेः । वृत्रे वृत्रासुरे अपिशब्दात्सर्पे च अहिः स्यात् । आहन्ति, आङ्पूर्वकाद्धन्तेः कर्तरि "आङि श्रिहनिभ्यां ह्रस्वश्च" इतीणि, डित्त्वाट्टिलोपे, आङो ह्रस्वे च अहिः "अहिर्वृत्रासुरे सर्पे" (इति विश्वः) इत्येकं वृत्रादेः । अग्निरनलः, इन्दुश्चन्द्र अर्क. सूर्यश्चैते तमोऽपहाः स्युः । तमोऽपहन्ति, तमोऽपपूर्वकाद्धन्ते. कर्तरि "अपे क्लेशतमसोः" इति डे, डित्त्वाट्टिलोपे च तमोपहः, द्वित्वे तमोपहौ, बहुत्वे तमोपहाः "तमोपहः सहस्रांशुमृगाङ्कजिनवह्निषु" (इति विश्वः) इत्येकमनलादे. ॥ २४७ ॥

उपकरण या बिछौना आदि सामान, राजा के योग्य वस्तु.

पु.
(परिच्छदे नृपार्हेऽर्थे) परिबर्हो (ऽव्ययाः परे)।

इति हान्ताः ॥

परीति–परिच्छदे उपकरणे, नृपार्हे राजयोग्ये अर्थे वस्तुनि अपि परिवर्हः स्यात् । परिवर्हते, परिवर्ह्यते वा परिपूर्वकाद्बर्हेः कर्तरि पचाद्यचि, कर्मणि घञि वा परिवर्हः "परिवर्हस्तु राजार्हवस्तुन्यपि परिच्छदे" (इति विश्वः) इत्येकमुपकरणादेः । इतः अनेकार्था अव्यया उच्यन्त इति ॥

इति हान्ताः ॥

---

[1] नात्स्याद्दारेषु ॥

अथ अव्यया व्याख्यायन्ते ॥

अल्पार्थ, अभिव्याप्ति, मर्यादार्थ, क्रियायोगज.

आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥ २४८ ॥

आङिति—ईषदर्थे अल्पार्थे, अभिव्याप्तौ अभिविधौ, सीमार्थे मर्यादार्थे, धातुना योगे सति योऽर्थो जायते तस्मिन् आङ् स्यात् । अतति, अतेः कर्तरि बाहुलकाड्डाङि प्रत्यये, डित्वाट्टिलोपे, प्रातिपदिकत्वात्स्वादिषु, "अव्ययदाप्सुपः" इति सुपो लुकि च आङ् "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्" (इति कौमुद्याम्) ईषदर्थे यथा आपिङ्गलः ईषत्पिङ्गल इत्यर्थः । अभिव्याप्तौ यथा आसत्यलोकात्—आपातालाद्वा । सीमार्थे यथा—आसमुद्रं राजदण्डः । धातुयोगजे क्रियायोगजे यथा—आक्रामति धूमो हर्म्यतलादित्यादिविज्ञेयम् ॥ २४८ ॥

स्मरण, वाक्यारम्भ, कोप, पीडा, पाप, निन्दा, थोडा, घुडकना या लानत.

आ (प्रगृह्यः स्मृतौ वाक्येऽ)प्यास्तु(स्यात्कोपपीडयोः) ।
(पापकुत्सेषदर्थे)कु धिग्नि(र्भर्त्सननिन्दयोः) ॥ २४९ ॥

आप्रेति—स्मृतौ स्मरणे, वाक्ये वाक्यारम्भे अपिशब्दादनुकम्पायां समुच्चये च वर्तमान. आ प्रगृह्यः स्यात् । आप्नोति, आप्नोतेः कर्तरि क्विपि, पृषोदरादित्वात्पलोपे च आ, "आ प्रगृह्यः स्मृतौ वाक्येऽनुकम्पायां समुच्चये" (इति मेदिनी) प्रगृह्यसंज्ञकत्वात् "प्लुतप्रगृह्या अचि" इति सन्धि न प्राप्नोतीति भावः । स्मृतौ यथा 'आ एवं किल तत्' वाक्ये यथा 'आ एवं नु मन्यसे' । कोपपीडयोः क्रोधबाधयोः-आः स्यात् । आस्ते, आसेः आङ्पूर्वादसतेर्वा कर्तरि क्विपि, आः "आः स्मरणेऽप्याकरणे कोपसन्तापयोरपि" (इति मेदिनी) कोपे यथा 'आः पाप ! किं विकत्थसे' पीडायां यथा आः शीतम् । पापं किल्बिषम्, कुत्सा निन्दा, ईषदर्थोऽल्पार्थश्चैषां समाहारे पापकुत्सेषदर्थे कु स्यात् । कवते, कूयते वा कुङः कर्तरि कर्मणि वा "मितद्र्वादित्वात्" डौ, डित्वाट्टिलोपे च कु "कु पापे चेषदर्थे च कुत्सायां च निवारणे" (इति विश्वः) पापे यथा 'कुकर्मपरोऽयं जन' कुत्सायां यथा 'कापथोऽयं देशो वर्तते' ईषदर्थे यथा 'कवोष्णं जलं शीते रोचते । निर्भर्त्सनमपकारशब्दैर्भयोत्पादनम्, निन्दा दोषकीर्तनं चानयोर्धिक् स्यात् । धक्कयति, दधाति वा धक्कयतेर्दधातेर्वा कर्तरि बाहुलकाड्डिक् प्रत्यये, डित्वाट्टिलोपे च धिक्, निर्भर्त्सने यथा "धिक् त्वां ताडनार्हमनध्ययनशीलम्" । निन्दायां यथा 'धिक् परस्त्रीगामिनं पुरुषमिति ॥ २४९ ॥

---

१ तेन सहेत्यभिविधि । तेन विना मर्यादा ॥

२ "आ त्रिंशतदितिशोभादाराप्य महिषासुर" (इति मार्कण्डेयपुराणम्) ॥

अन्वाचय, समाहार, इतरेतर, समुच्चय, आशीर्वाद, क्षेम, पुण्य आदि, प्रकर्ष, लाघना और प्रशंसा.

च (न्वाचयसमाहारेतरेतरसमुच्चये) ।
स्वस्त्या (शीः क्षेमपुण्यादौ)(प्रकर्षे लङ्घनेऽप्य)ति २५०

चेति—अन्वाचयः=अन्यतरस्यानुषङ्गिकत्वेनान्वयः, समाहारः=अनेकपदानां समूहः, इतरेतरयोगः=मिलितानामन्वयः, समुच्चयः परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः एषु समाहारस्तत्र चः स्यात् । चन्दति, चन्देः कर्तरि "अन्येभ्योऽपीति" डे, डित्वाट्टि लोपे च चः, "चः पादपूरणे पक्षान्तरे हेतौ विनिश्चये" (इति त्रिकाण्डशेषः) अन्वाचये यथा 'वटो ! भिक्षामट गां चानय' समाहारे यथा 'संज्ञापरिभाषम्' इतरेतरयोगे यथा 'धवखदिरौ छिन्धीति' समुच्चये यथा "रमेशं गुरुं च भजस्वेति"। आशीराशीर्वादः, क्षेमं कुशलम्, पुण्यं सुकृतं तदादौ स्वस्ति स्यात् । स्वसति, स्वस्यति वा सुपूर्वकादसतेरस्यतेर्वा कर्तरि क्तिचि, बाहुलकात्तिप्रत्यये वा 'स्वस्ति' "स्वस्ति मङ्गलाशीर्वादपापनिर्णेजनादिषु" (इति भागुरिः) आशिषि यथा 'स्वस्ति ते भूयात्' क्षेमे यथा 'स्वस्ति गच्छ' पुण्ये यथा 'स्वस्तिमान्स्वर्गमश्नुते' आदिना "स्वस्ति स्यान्मङ्गले पुण्येऽप्याशंसायामपि क्वचित्" (इति मेदिनी) । प्रकर्षे उत्कर्षे, लङ्घने उच्छलने अपिशब्दात्प्रशंसायां च अति स्यात् । अतति, अतेःकर्तरि "सर्वधातुभ्य इन्" इतीनि प्रत्यये 'अति' "अतिशब्दः प्रशंसायां प्रकर्षे लङ्घनेऽपि च" (इति विश्वः) प्रकर्षे यथा 'अत्युत्तमो विष्णुः' लङ्घने यथा 'अतिवेलं जलधितलम्' इत्यादि विज्ञेयम् ॥ २५० ॥

पूछना, विचार, भेद, निश्चय, साथ, एकवार, दूर, समीप.

स्वि(त्प्रश्ने च वितर्के च) तु (स्याद्भेदेऽवधारणे) ।
सकृत् (सहैकवारे स्या) दारा (दूरसमीपयोः) ॥ २५१ ॥

स्विदिति—प्रश्ने पृच्छायाम्, वितर्के नानापक्षविचारे च शब्दात्पादपूरणेऽपि स्वित् स्यात् । सुष्ठु एति, अयति वा सुपूर्वकादेतेरयतेर्वा कर्तरि क्विपि, तुगागमे च स्वित् "स्वित् प्रश्ने च वितर्के च तथैव पादपूरणे" (इति मेदिनी) प्रश्ने यथा 'किंस्वित्ते कुशलमस्ति' वितर्के यथा 'सर्वेश्वरत्वं विष्णोराहोस्वित् शिवस्य' । भेदे पृथक्करणे, अवधारणे निश्चये च तु स्यात् । तुदति, तुदेः कर्तरि मितद्र्वादित्वाड्डौ डित्वाट्टिलोपे च तु "तु पादपूरणे भेदे समुच्चयेऽवधारणे । पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे" (इति मेदिनी) भेदे यथा "क्षीरान्मांसं तु पुष्टिकृत्" अवधारणे यथा 'शिष्टैर्मतं तु तद्युक्तम्' । सह: सहार्थः, एकवारमेकवारकथनं चानयोः समाहारस्तस्मिन् 'सकृत्' स्यात् । एकवारम्, "एकस्य सकृच्च" इति सुचि, एकस्य सकृदा-

देशे 'संयोगान्तस्येति' सुचोलोपे च सकृत् "सकृत् सहैकवारयोः" (इत्यजयः) सहार्थे यथा 'सकृद्यान्ति सुरस्त्रियः' एकवारे यथा 'सकृदपि कुर्याद्गयाश्राद्धम्' । दूरं विप्रकृष्टकम्, समीपं सन्निकृष्टं चानयोः 'आरात्' स्यात् । आराति, आङ्पूर्वकाद् रातेः कर्त्तरि बाहुलकादाति प्रत्यये आरात् । दूरे यथा 'आराच्छत्रोः सदा वसेत्' समीपे यथा 'सखायं स्थापयेदारात्' इत्याद्यवसेयम् ॥ २५१ ॥

पश्चाद्, अन्त, समुच्चय, विकल्प, वारम्वार, सहार्थ, प्रत्यक्ष, तुल्य.

(प्रतीच्यां चरमे) पश्चादुता (प्यर्थविकल्पयोः) ।
(पुनःसहार्थयोः) शश्वत्साक्षा(त्प्रत्यक्षतुल्ययोः) २५२॥

प्रति—प्रतीच्यां पश्चिमाशायाम्, चरमे अन्त्ये च पश्चात्स्यात् । अवरस्मिन्, "पश्चात्" इत्यनेनावरस्य सप्तमीपञ्चमीप्रथमान्तस्य निपातिते, अव्ययत्वात्सुपोलुकि च पश्चात् । प्रतीच्यां यथा 'पश्चादस्तंगतोरविः' चरमे यथा 'पश्चिमे वयसि नैमिषे वसेत्', । अप्यर्थस्समुच्चयः प्रश्नश्च, विकल्पो भेदः पक्षान्तरं वा अनयोः 'उत' स्यात् । ऊयते स्म, 'उङ् शब्दे' अस्माद्भौवादिकात्कर्मणि 'क्ते' उत "उतापी द्वौच बाढार्थौ" (इत्यजयः) समुच्चये यथा 'उतार्जुनो भीमो रणे गमिष्यतः' विकल्पे यथा 'विष्णुरुत शिवः सेवनीयः' । पुनः पुनरर्थः, सहार्थश्चानयोः । पुनश्च सहश्च तावेवार्थौ ययोस्ताविति द्वन्द्वान्ते श्रूयमाणस्यार्थस्य प्रत्येकं सम्बन्धस्तेन पुनरर्थे, सहार्थे च शश्वत्स्यात् । शशति, शशेः कर्त्तरि बाहुलकाद्वत् प्रत्यये शश्वत् "शश्वत् सहसहार्थयोः" (इत्यजयः) पुनरर्थे यथा 'शश्वद्विष्णुं स्मरेत' सहार्थे यथा 'शिष्यैः शश्वद्गतो गुरुः । अक्षमिन्द्रियं प्रतिगतं प्रत्यक्षम्, तोलनं तुला तया संमितं तुल्यं सादृश्यं चानयोः 'साक्षात्' स्यात् । सहाक्षेण साक्षस्तमतति, साक्षपूर्वकादतेः कर्त्तरि क्विपि, साक्षात् "साक्षात् तुल्यसमक्षयोः" (इत्यजयः) प्रत्यक्षे यथा 'साक्षाद् दृष्टो मया हरिः' तुल्ये यथा 'साक्षाल्लक्ष्मीरियं वधूः' इति ॥ २५२ ॥

खेद, अनुकम्पा, संतोष, विस्मय, आमन्त्रण, हर्ष, दया, वाक्यारम्भ, विषाद.

(खेदानुकम्पासन्तोषविस्मयामन्त्रणे) वत ।
हन्त (हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः)॥२५३॥

खयिति—खेदो दैन्यम्, अनुकम्पा कृपा, सन्तोषः सन्तुष्टिः, विस्मयोऽद्भुतम्, आमन्त्रणमाभिमुखीकरणम् एषां समाहारस्तस्मिन् 'वत' स्यात् । वन्यतेस्म 'वनु याचने' अस्मात्तानादिकात्कर्मणि क्ते, "यस्य विभाषेति" इडागमाभावे, "अनुदात्तोपदेशेति" नलोपे च वत "वत खेदेऽनुकम्पायां हर्षे सम्बोधनेऽद्भुते" (इतिदन्त्योष्ठ्यादावजयः) खेदे यथा 'अहो वत महत्कष्टम्' अनुकम्पाया यथा 'वत निः स्वो भरणीयः' सन्तोषे यथा 'वत रमययापतिरालिङ्गितः' विस्मये यथा 'अहो वतायं ध्रुव आप देवम्' सम्बोधने यथा 'अत्र एहि वत सखे' । हर्षे प्रमोदे, अनुकम्पाया दयायाम्,

१ "उत प्रश्नविकल्पयोः । समुच्चये विकल्पेचेति" (हेम) ॥

वाक्यारम्भो वाक्यप्रारम्भः, विषादो दुःखं तापश्च अनयोः 'हन्त' स्यात् । हन्ति, हन्तेः कर्त्तरि बाहुलकात्तप्रत्यये हन्त "हन्त वाक्यारम्भखेदविषादहर्षसंभ्रमे" (इति मेदिनी) हर्षे यथा 'हन्त ते लाभः शतगुणः' अनुकम्पायां यथा 'हन्त दीनो रक्षितव्यः' वाक्यारम्भे यथा 'हन्त ते कथयिष्यामि, विषादे यथा 'हन्तजातमजातारेः प्रथमेन त्वयारिणा' (इति माघः) ॥ २५३ ॥

मुख्यसदृश, वीप्सा, लक्षणा आदि, कारण, प्रकरण, प्रकाश आदि, समाप्ति.

प्रति (प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः) ।
इति (हेतुप्रकरणप्रकर्षादिसमाप्तिषु) ॥ २५४ ॥

प्रेति—प्रतिनिधौ मुख्यसदृशे, वीप्सा व्याप्तुमिच्छा, लक्षणा शक्यसम्बन्धः, अन्वयानुपपत्तिपूर्विका वा आदिना इत्थंभूताख्यानभागप्रतिदानस्तोकादिस्तस्मिन्नर्थे प्रयोगतः शिष्टप्रयोगानुसारेण 'प्रति' स्यात् । प्राति, प्रथते वा प्रातेः प्रथेर्वा कर्त्तरि बाहुलकाडुतौ प्रति । प्रतिनिधौ यथा 'अभिमन्युं प्रति परीक्षित्' । वीप्सायां यथा 'तीर्थं तीर्थं प्रति गच्छति बलः' लक्षणायां यथा 'वृक्षं प्रति विद्योतते विद्युत्' । इत्थंभूताख्याने यथा 'भक्तो विष्णुं प्रति यज्ञदत्तः' यज्ञदत्तो विष्णुं प्रतिभक्तो विष्णुस्वरूप इत्यर्थः । भागे यथा 'लक्ष्मीर्हरिंप्रति' हरेर्भाग इत्यर्थः । प्रतिदाने यथा 'तिलेभ्यः' प्रतियच्छति मापानित्यादिज्ञेयम् । हेतुः कारणम्, प्रकरणं प्रकारः, प्रकर्षादिः प्रकाशादि, समाप्तिरवसानमेष्वर्थेषु 'इति' स्यात् । एति, अयति वा एतेरयतेर्वा कर्त्तरि क्तिचि 'इति' "इति प्रकरणे हेतौ प्रकाशादिसमाप्तिषु । निदर्शने प्रकारेस्यादनुकर्षे च संमतम्" (इति विश्वः) हेतौ यथा 'रामो हन्तीति रावणः पलायते' प्रकरणे यथा 'ब्राह्मणक्षत्रिय-विट्-शूद्रा इति' प्रकर्षे यथा 'इति पाणिनिः' आदिना 'क्रमादमुं नारद' इत्यबोधि सः (इति माघः) समाप्तौ यथा धर्ममाचरेदिति ॥ २५४ ॥

पूर्वदिशा, पहला, व्यतीत, सपूर्ण, अवधि, परिमाण, निश्चय.

(प्राच्यां) पुरस्तात् (प्रथमे पुरार्थे) ऽग्रतइत्यपि) ।
यावत्तावच्च (साकल्येऽवधौ मानेऽवधारणे) ॥ २५५ ॥

प्रेति—प्राच्यां पूर्वस्यां दिशि, प्रथमे आदिमे, पुरार्थेऽतीतविषये च 'पुरस्तात्' स्यात् । अग्रतः इत्यपि प्राच्याद्यर्थेषु भवतीति । पूर्वस्मिन् "दिक्छब्देभ्यः सप्तमी" इत्यस्तातौ "अस्ताति च" इति पुरादेशे च पुरस्तात् "प्राच्यांपुरः पुरस्तादग्रप्रथमव्यतीतेषु" (इति वोपालितः) अग्रे इति, "आद्यादिभ्य उपसंख्यानम्" इति तसौ अग्रतः । प्राच्यां यथा 'पुरस्ताद्गतो ब्रह्मदत्तः' प्रथमे यथा 'पुरस्ताद्भुङ्क्ते' पुरार्थे यथा 'पुरस्ताद्दासोऽभूत्' एवमग्रतः संस्थाप्यदेवेशं पूजयेदिति । साकल्ये सामग्र्ये, अवधौ परिच्छेदे, माने परिमाणे, अवधारणे निश्चये च यावत्—तावच्च स्यात् । यत्, तत् परि-

' "हन्तदानेऽनुकम्पायां वाक्यारम्भविषादयोः । निश्चये च प्रमोदे च" (इति हैम·) ॥

माणमस्य, "यत्तदेतेभ्यः परिमाणे वतुप्" इति वतुपि, "आसर्वनाम्नः" इत्यात्वे, पूर्वाचार्याणां मते तु डावतौ वा यावत्, तावत् "यावत्कात्स्न्येंऽवधारणे । प्रशंसायां परिच्छेदे मानाधिकारसंभ्रमे । पक्षान्तरे च" (इति मेदिनी) साकल्ये यथा 'यावद्दत्तं तावद्भुक्तम्' अवधौ यथा 'मूलाच्छाखां यावत्प्रकाण्डः' परिमाणे यथा 'यावत्स्वर्णं तावद्रजतम्' अवधारणे यथा 'श्रोत्रियं तावदामन्त्रयस्व' इति ॥ २५५॥

मङ्गल, अनन्तर, आरम्भ, प्रश्न, कात्स्न्र्य, निरर्थक, विधिहीन, अनेकार्थ, उभयार्थ.

(मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्ये) ष्वथो अथ ।

वृथा (निरर्थकाविध्योः) नाना (नेकोभयार्थयोः) ॥२५६॥

मेति–मङ्गलं कल्याणम्, अनन्तरमन्तररहितम्, आरम्भः प्रारम्भः, प्रश्नः पृच्छा, कात्स्न्र्यं सामग्र्यं चैष्वर्थेषु अथो, अथ च स्यात् । अर्थयते, 'अर्थ उपयाच्ञायाम्' अस्माच्चौरादिकात्कर्त्तरि बाहुलकाड्डोः, पृषोदरादित्वाद्रलोपे च अथो, 'अन्येभ्योऽपीति' डे, रलोपे च अथ "अथाथो संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकात्स्न्र्यारम्भसमुच्चये" (इति मेदिनी) मङ्गले यथा 'अथातो ब्रह्मजिज्ञासा' अनन्तरे यथा 'स्नानं कृत्वाथ भुञ्जीत' आरम्भे यथा 'अथ शब्दानुशासनं लिख्यते' प्रश्ने यथा 'अथ वक्तुं समर्थोऽसि' कात्स्न्र्ये यथा 'अथ धातून् ब्रूमो वयमिति'। निरर्थको व्यर्थः, अविधिर्विधिहीनश्चानयोर्वृथा स्यात् । वृणोति, वृणीते वा वृञो वृङो वा कर्तरि बाहुलकात्थाकि, कित्त्वाद् गुणाभावे च वृथा "वृथा निष्कारणे वन्ध्ये वृथा स्याद्विधिवर्जिते" (इति विश्वः) निरर्थके यथा 'वृथा दुग्धोऽनड्वान्' अविधौ यथा 'वृथा दानं धनाढ्येषु'। अनेको बहुविधः, उभयो द्वयस्तावेवार्थौ ययोस्तयोरर्थे नाना स्यात् । न इति "विनञ्भ्यां नानाञौ न सह:" इति नञो नाञि प्रत्यये नाना "नानाशब्दो विनाऽर्थेऽपि तथानेकोभयार्थयोः" (इति मेदिनी) अनेकार्थे यथा 'इह नानाविधा जना निवसन्ति' उभयार्थे यथा 'नाना विधं न सज्जेत' "नानाविनोभयानेकार्थेष्विति" हेमचन्द्रादपि बोद्धव्यम् ॥२५६॥

पूछना, विकल्प, पीछे, बराबरी, सवाल, निश्चय, आज्ञा, तसल्ली देना, सम्बोधन.

नु (पृच्छायां विकल्पे च) (पश्चात्सादृश्ययो) रनु ।

(प्रश्नावधारणानुज्ञानुनयामन्त्रणे) ननु ॥ २५७ ॥

न्विति–पृच्छायां ज्ञीप्सायाम्, विकल्पे पक्षान्तरे च 'नु' स्यात् । नुदति, नौति वा नुदेर्नौतेर्वा कर्तरि मितद्र्वादित्वाड्डौ, डित्त्वाट्टिलोपे च नु "नु स्यात्प्रश्ने विकल्पार्थेऽप्य-

१ "अथो अथ समुच्चये । मङ्गले संशयारम्भाधिकारानन्तरेषु च । अन्वादेशे प्रतिज्ञायां प्रश्नसाकल्ययोरपि" (इति हैम·) ॥ शास्त्रं सुचिन्तितमथो परिचिन्तनीयं स्वाराधितोऽपि नृपतिः परिशङ्कनीयः । अङ्के स्थितापि युवतिः परिशङ्कनीया शास्त्रे नृपे च युवतौ च कुतो वशित्वम्॥ १ ॥

२ "नु पश्नेऽनुनयेऽतीतार्थे विकल्पवितर्कयो" (इति हैम·)॥

तीतानुनयार्थयोः ” (इति विश्वः) पृच्छायां यथा ‘ कोनुयावति ’ विकल्पे यथा ‘ अयं भीमोनु धर्मोनु ’ । पश्चात्पश्चादर्थः, सादृश्यं तुल्यं चानयोरनु स्यात् । अनिति, ‘ अन प्राणने ’ अस्मादादादिकात्कर्त्तरि बाहुलकादुप्रत्यये अनु “ अनु हीने सहार्थे च पश्चात्सादृश्ययोरपि । आयामे च समीपे च लक्षणादावनुक्रमे ” (इति विश्वः) पश्चादर्थे यथा ‘ रथमनुगच्छति ’ सादृश्ये यथा ‘ ज्येष्ठमनुकरोति ’ । प्रश्नः पृच्छा, अवधारणं निश्चयः अनुज्ञा आज्ञा, अनुनयः सान्त्वनम्, आमन्त्रणं सम्बोधनं चैषां समाहारस्तत्र ननु स्यात् । न नुदति, नञ् पूर्वकान्नुदेः कर्त्तरि मितद्र्वादित्वाड्डौ डित्त्वाट्टिलोपे च ननु “ ननु प्रश्नेऽप्यनुनयेऽनुज्ञानेऽप्यवधारणे । आमन्त्रणे च” (इति विश्वः) प्रश्ने यथा ‘ ननु किमेतत् ’ अवधारणे यथा ‘ नन्वयं योगी ’ अनुज्ञायां यथा ‘ ननु गच्छ ’ अनुनये यथा ‘ ननु कोपं मुञ्च दयां कुरु ’ सम्बोधने यथा ‘ननु राजन् ! मया सह वाराणसीं व्रज ’ इत्याद्यवसेयम् ॥ २५७ ॥

निन्दा, समुच्चय, प्रश्न, शङ्का, संभावना, मिसाल, भेद, आधा, निन्दित.

(गर्हासमुच्चयप्रश्नशङ्कासंभावनास्व) पि ।
(उपमायां विकल्पे) वा सामि(त्वर्धे जुगुप्सिते)॥ २५८

गेति—गर्हा निन्दनम्, समुच्चयनं समुच्चयः परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयो वा, प्रश्नः पृच्छा, शङ्का सन्देहः, संभावना कल्पना चैष्वर्थेषु अपि स्यात् । न पियति, नञ् पूर्वकात्पियतेः कर्तरि क्विपि, आगमशास्त्रस्यानित्यत्वात्तुगागमाभावे च अपि, “ अपि संभावनाप्रश्नशङ्कागर्हासमुच्चये । तथा युक्तपदार्थे च कामचारक्रियासु च ” (इति विश्वः) निन्दायां यथा ‘ तं धिक् योऽपि सिञ्चेत्पलाण्डुम् ’ समुच्चये यथा ‘ स्त्रियं पालय पुत्रमपि ’ प्रश्ने यथा ‘अपि जानासि किञ्चित्त्वम् ’ शङ्कायां यथा ‘ अपि चोरोभवेत् ’ संभावनायां यथा ‘अपि स्थाणुं जयेद्रामः ’ । उपमायां उपमाने विकल्पे भेदे च ‘वा’ स्यात् । वाति, वातेः कर्तरि क्विपि वा “ वा स्याद्विकल्पोपमयोर्विकल्पे भेदे च ‘वा’ स्यात् । वा स्याद्विकल्पोपमयोरेवार्थे च तर्के पादपूरणे । समुच्चये च ” (इति मेदिनी) “ वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये ” (इति विश्वः) उपमायां यथा ‘ आशीविषो वा संक्रुद्धः ’ विकल्पे यथा ‘ शिवं वा यदि वा विष्णुं पूजयेदिति । अर्धे खण्डे, जुगुप्सिते निन्दिते च ‘ सामि ’ स्यात् । सामयति, ‘ षाम सान्त्वप्रयोगे ’ अस्माच्चौरादिकात्कर्त्तरि “ अच इः ” इनी प्रत्यये सामि । अर्धे यथा ‘ सामि संमीलिताक्षी ’ जुगुप्सिते यथा ‘ सामिकृतमकत्याणकारि ’ इति ॥ २५८ ॥

साथ, समीप, जल, मस्तक, उपमा, प्रकार, तर्क, निश्चय.

अमा (सह समीपे च) कं (वारिणि च मूर्धनि) ।
(इवेत्थमर्थयो) रेवं नूनं (तर्केऽर्थनिश्चये) ॥ २५९ ॥

अमेति—सह सहार्थे, समीपे निकटे च ‘ अमा ’ स्यात् । न माति, नञ्पूर्वका-

न्मातेः कर्त्तरि क्विपि, नञो नस्य लोपे च अमा। सहार्थे यथा 'पुत्रेणामा भुङ्क्ते' समीपे यथा 'अमात्यः समीपवर्तीत्यर्थः'। वारिणि जले, मूर्धनि मस्तके च 'कं' स्यात्। कम्यते, कमेर्णिङभावपक्षे विचि कम् "कं शिरःसुखवारिषु" (इति विश्वः) वारिणि यथा 'वेत्रवत्याःकममलं पश्य सखे!' मस्तके यथा 'मम कं पातु माधवः'। इवे त्थमर्थयोः उपमाप्रकारयोः एवं स्यात्। 'ए' इत्थं वमति एपूर्वकाद्वमेः कर्तरि विचि एवम् "एवं प्रकारोपमयोरङ्गीकारेऽवधारणे" (इति धरणिः) इवार्थे यथा 'अग्निरेवं वाडवः बाडवो ब्राह्मणः अग्निरिवेत्यर्थः'। इत्थमर्थे यथा 'एवं वादिनि देवर्षाविति। तर्के ऊहे अपूर्वोत्प्रेक्षणे वा अर्थनिश्चये अर्थावधारणे च 'नूनं' स्यात्। नुवा स्तुत्या नमति, नूपूर्वकान्नमेः कर्त्तरि विचि नूनम् "नूनं निश्चिततर्कयोः" इति विश्वः) तर्के यथा 'नूनमयमति पञ्चानां प्रियः' अर्थनिश्चये यथा 'क्षुद्रेऽपि नूनं शरणं प्रपन्ने' रक्षणीयइतिभावः॥ २५६॥

मौन, आनन्द, पूछना, निन्दा, प्रसिद्ध, सभावना, कोप, प्राप्ति, निन्दा.

(तूष्णीमर्थे सुखे) जोषं किं (पृच्छायां जुगुप्सने)।
नाम (प्रकाश्यसंभाव्यक्रोधोपगमकुत्सने)॥ २६०॥

द्विति—तूष्णीमर्थे मौनार्थे, सुखे आनन्दे च 'जोषम्' स्यात्। जुष्यते, जुषेः कर्मणि बाहुलकादमि जोषम् "जोषं सुखे प्रशंसायां तूष्णीलङ्घनयोरपि" (इति मेदिनी) मौनार्थे यथा 'जोषं तिष्ठ' सुखार्थे यथा 'जोषमासीत वर्षासु'। पृच्छायां प्रश्ने, जुगुप्सने निन्दने च 'किम्' स्यात्। कायति "कायतेर्डिमिः" इति डिमौ, कवनम्, कूयते वा कौतेर्भावकर्मणोर्बाहुलकाड्डिम् प्रत्यये वा किम् "किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि" (इति मेदिनी) पृच्छायां यथा 'किमाद्रियेरन् रसिकाः कृतिं मे' निन्दने यथा 'सकि सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते सकिं प्रभुः'। प्राकाश्यं प्रसिद्धम, संभाव्यं संभावना, क्रोधः कोपः, उपगमः सत्स्वरूपाङ्गीकारः, कुत्सनं निन्दनं चैषां समाहारस्तत्र नाम स्यात्। नामयति, नाम्यते वा नामयते. कर्त्तरि कर्मणि वा 'अन्येभ्योऽपीति' डे 'नाम' "नामकोपेऽभ्युपगमे विस्मये स्मरणेऽपिच। संभाव्यकुत्साप्राकाश्यविकल्पेष्वपि दृश्यते" (इति मेदिनी) प्राकाश्ये यथा 'हिमालयोनामनगाधिराजः' संभाव्ये यथा 'रामरावणयोर्भविष्यति युद्धं नाम' क्रोधे यथा 'मम वैरी रावणो नाम पापः' उपगमे 'शत्रोःसकाशाद्गृह्णाति राज्यं नाम' कुत्सने यथा 'को नामायं प्रलपति मे विशतः सभायाम्' इति २६०॥

भूषण, परिपूर्णता, सामर्थ्य, निषेध, संदेह, प्रश्न, पास, मध्य.

अलं (भूषणपर्याप्तिशक्तिवारणवाचकम्)।
हुं (वितर्के परिप्रश्ने) समया (न्तिकमध्ययोः)॥ २६१॥

अलमिति—भूषणमलंकारः, पर्याप्तिः परिपूर्णता, शक्तिः सामर्थ्यम्, वारणं निषेधश्चैतेषां वाचकमलं स्यात् । अलति, 'अल भूषणादौ' अस्माद्भ्वादिकात्कर्त्तरि बाहुलकादमि अलम् "अलं भूषणपर्याप्तिवारणेषु निरर्थके । अलं शक्तौ च निर्दिष्टम्" (इति विश्वः) भूषणे यथा 'सर्वालंकरणैरलंकृतोऽयं बालः' पर्याप्तौ यथा 'अलं भुक्तवान् यज्ञदत्तः' शक्तौ यथा 'अलं मल्लो मल्लाय' वारणे यथा 'अलं महीपाल ! तव श्रमेण' (इति रघुः) वितर्के संदेहे, ऊहे वा परिप्रश्ने पृच्छायां च 'हुं' स्यात् । हूयते, 'हु दानादौ' अस्माज्जौहोत्यादिकात्कर्मणि बाहुलकान्मे, हुम् "हुं वितर्के चानुमताविति (त्रिकाण्डशेषः) वितर्के यथा 'हुं जलं मृगतृष्णा हुम्' परिप्रश्ने यथा 'हुं यज्ञदत्तोऽयमायाति' । अन्तिकं निकटम्, मध्यं मध्यमं चानयोः समया स्यात् । समेति, संपूर्वकाद् 'इण् गतौ' अस्मादादादिकात्कर्तरि 'आः समिण्निकषिभ्याम्' इत्या प्रत्यये गुणे, अयादेशे च समया, समीपे यथा 'समया पत्तनं नदी वहति' मध्ये यथा 'समया शैलयोर्ग्रामः' पर्वतयोर्मध्ये ग्रामो वसति इति ॥ २६१ ॥

अप्रथम, भेद, निश्चय, निषेध, प्रबन्ध, चिरातन, व्यतीत, समीप, भावी.

पुन (रप्रथमे भेदे) नि (र्निश्चयनिषेधयोः) ।
(स्यात्प्रबन्धे चिरातीते निकटागामिके) पुरा ॥ २६२ ॥

पुनरिति—अप्रथमे प्रथमाभावे, भेदे अन्तरे च 'पुनर्' स्यात् । पनते, 'पन स्तुतौ' अस्माद्भ्वादिकात्कर्तरि बाहुलकादरे, अस्योकारे च 'पुनर्' "पुनरप्रथमे मतम् । अधिकारे च भेदे च तथा पक्षान्तरेऽपि च" (इति मेदिनी) प्रथमाभावे यथा 'पुनरुक्तं पुण्यदत्तेन' भेदे यथा 'किं पुनर्ब्राह्मणाः पुण्याः' । निश्चयोऽवधारणम्, निषेधो वारणं चानयोर्निर् स्यात् । नृणाति, नृणातेः कर्तरि क्विपि "ॠत इत्" इतीरादेशे च 'निर्' । "निर्निश्चये क्रान्ताद्यर्थे निर्निःशेषनिषेधयोः" (इति विश्वः) निश्चये यथा 'निरुक्तमिदं नित्यानन्देन' निषेधे यथा 'बहुदानान्निर्धनोऽयं राजा' । प्रबन्धे अविच्छेदेन क्रियाकरणे, चिरे चिरन्तने, अतीते व्यतीते, निकटे सन्निहिते, आगामिके भाविनि च पुरा स्यात् । पुरति, 'पुर अग्रगमने' अस्मात्तौदादिकात्कर्तरि बाहुलकात्का प्रत्यये, कित्त्वाद्गुणाभावे च पुरा "पुरा पुराणे निकटे प्रबन्धातीतभाविषु" (इति मेदिनी) प्रबन्धे यथा 'पुराधीते धीरोयम्' अविरतमपाठीदित्यर्थः । चिरन्तने यथा 'पुरातना ऋषयो यमैडयंस्त' माहुरन्यं पुरुषं पुराणमिति । अतीते यथा 'पुरा रामो राजा बभूव' निकटे यथा 'पुरा रामं तस्थौ रामानुजः' आगामिके यथा 'चतुर्विंशतिनः पुरा मे भाग्यमुदेष्यति' उदयं प्राप्स्यतीति ॥ २६२ ॥

१ वसन्तीह पुरा छात्रा—अवात्सुः—अवसन्—ऊषुर्वा । पुराभुङ्क्ते सिञ्चिन भोक्ष्यत इति । "इति ह स्माह शाम साम स्यादिके पुरा" (इत्यथर्वणरहस्यम्) ॥

विस्तार, अङ्गीकार, स्वर्ग, परलोक, बात, सभावना या बड़ाई.

ऊररयूरी चोररी च (विस्तारेऽङ्गीकृतौ त्रयम्)।
(स्वर्गे परे च लोके) स्व (र्वार्तासंभाव्ययोः)किल†॥२६३॥

ऊरेति—विस्तारे व्यासे, अङ्गीकृतौ स्वीकृतौ चार्थे ऊररी, ऊरी, उररी चैतत्त्रयं स्यात्। ऊयते, 'ऊयी तन्तुसन्ताने' अस्माद्भौवादिकात्कर्तरि बाहुलकाद्ररीकि, यलोपे च ऊररी, रीकि तु ऊरी, अत्र ह्रस्वादौ पाठात् 'उरी' ह्रस्वादिरपि। वयति, वयते वा वयते. कर्तरि ररीकि, संप्रसारणे, पूर्वरूपे च उररी "ऊररी चोररी चोरी विस्तारेऽङ्गीकृतौ त्रयम्" (इत्यजयः) विस्तारे यथा । 'गुरुर्ग्रन्थमूररी करोति=विस्तारयतीत्यर्थ.' अङ्गीकारे यथा 'ऊरीकृत्य पितुर्वाक्यं रामोऽरण्यं जगाम ह' 'उररी करोति प्रभोराज्ञां रामदत्तः । स्वर्गे, परे लोके च 'स्वर्' स्यात्। स्वरति, स्वर्यते वा स्वरतेः कर्तरि कर्मणि वा विचि गुणे, रपरत्वे च स्वर् "स्वः प्रेत्य व्योम्नि-नाके च" (इति कोषान्तरम्) स्वर्गे यथा 'स्वर्णद्यां स्नाति नारदः'। परलोके यथा 'स्वर्गतस्य क्रिया कार्या पुत्रैः परसभक्तितः' । वार्ता प्रवृत्तिः, संभाव्यं संभावना, संभाव्यः प्रशंसनीयो वा अनयोरर्थे 'किल', स्यात्। किलति, किलेःकर्तरि 'इगुपधेति' के, कित्त्वाद्गुणाभावे च किल "किलशब्दस्तु वार्तायां संभाव्यानुनयार्थयोः" (इति विश्वः)। "वार्तायामरुचौ किल" (इति त्रिकाण्डकोष.) वार्तायां यथा 'जघान कंसं किल वासुदेव.' संभाव्ये यथा "गुरून् किल अतिशेते शिष्यः" इति ॥ २६३ ॥

निषेध, वाक्यभूषण, जिज्ञासा, अनुनय, समीप, उभयार्थ, शीघ्र, सपूर्णता, सामने.

(निषेधवाक्यालङ्कारजिज्ञासानुनये) खलु।
(समीपोभयतःशीघ्रं साकल्याभिमुखे)ऽभितः॥२६४॥

नीति—निषेधः प्रतिषेधः, वाक्यालंकारो वाक्यभूषणम्, जिज्ञासा ज्ञातुमभिलाषा, अनुनयः सान्त्वनं चैषां समाहारस्तत्र 'खलु' स्यात्। खलति, खलतेः कर्तरि बाहुलकादुप्रत्यये खलु "खलु स्याद्वाक्यभूषाया जिज्ञासायां च सान्त्वने। वीप्सामाननिषेधेषु पूरणे पादवाक्ययो." (इति मेदिनी) निषेधे यथा 'पीत्वा खलुगतः' वाक्यालंकारे यथा 'एतत्खल्वाहुर्लोका.' जिज्ञासायां यथा 'खलु जानाति यज्ञदत्त.' अनुनये यथा 'देहि खलु वाचकमिति' । समीपं निकटम्, उभयतः उभयार्थः शीघ्रं त्वरितम्, साकल्यं कार्त्स्न्यम्, अभिमुखं सम्मुखं चैषां समाहारस्तत्र 'अभितः' स्यात्। अभिइति, "पर्यभिभ्यांच" इत्यभिशब्दात्तसिलि अभित. । समीपे यथा 'वाराणसीमभितोभागीरथी' उभयार्थे यथा 'अभित. कृष्णं गोपा.' शीघ्रार्थे यथा

† 'अलीके यथा-' प्रसह्य सिंह. किल तां चकर्ष' (इति रघु)। अज्ञानसूचके यथा' . किल विललाप' ॥

'अभितोऽधीष्व' साकल्ये यथा 'अभितो ग्रामं वनानि सन्ति' अभिमुखे यथा 'अभितोहिंसको हन्ति मामेव परिधावति' इति ॥ २६४ ॥

शब्द, प्रकाश, परस्पर, छिपना, टेढा, दुःख, शोक, पीडा.

(नामप्राकाश्ययोः) प्रादुर्मिथो (ऽन्योन्यं रहस्यपि)।
तिरो(ऽन्तर्धौ तिर्यगर्थे) हा (विषादशुगार्तिषु) ॥२६५॥

नेति—नाम नामधेयम्, शब्दो वा प्राकाश्यं द्यौत्यं चानयोरर्थे प्रादुः स्यात्। प्रान्दति, प्रपूर्वकादन्देः कर्त्तरि बाहुलकादुसि, आगमशास्त्रस्यानित्यत्वान्नुमागमाभावे च । प्रात्तीत्ति विग्रहे तु कर्तरि उसि वा प्रादुः । नामनि यथा 'प्रादुरासीच्चक्रपाणिः' प्राकाश्ये यथा 'बुद्धिस्तेप्रादुर्भविष्यति' । अन्योन्यमन्योन्यार्थे, रहसि एकान्तेऽपि मिथः मिथो च स्यात् । मेथति, 'मेथृसंगमे' अस्माद्धौवादिकात्कर्त्तरि असुनि, पृषोदरादित्वाद्ध्रस्वे च मिथः, बाहुलकादो प्रत्ययेतु 'मिथो' तन्त्रेणोभयमिहनिर्दिष्टमिति । अन्योन्यार्थे यथा 'वासिष्ठकौण्डिन्यमैत्रावरुणानां मिथो न विवाहः' एकान्ते यथा 'मिथः सीतामश्लिक्षद्रामः' रहसि सीतामालिङ्गितवानिति । अन्तर्द्धौ अन्तर्धाने, तिर्यगर्थे कुटिलार्थे च तिरः स्यात् । तरति, तरतेः कर्तरि असुनि 'कचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति गुणविषये "ॠतइद्धातोः" इतीरादेशे च तिरः । अन्तर्द्धौ यथा 'तिरो बभूव वामनः' तिर्यगर्थे यथा 'तिरो वर्तते चन्द्रः' कुटलीभूत्वा वर्तत इति । विषादो दुःखम् शुक् शोकः, अर्तिः पीडा चैष्वर्थेषु 'हा' स्यात । जहाति, जहातेः कर्तरि क्विपि हा "हा विषादे च शोके च कुत्सादुःखार्थयोरपि" (इति मेदिनी) विषादे यथा 'हा रमणीयो गतः कालः' शोके यथा 'हा राम ! वनं गतोऽसि' पीडायां यथा 'हा हतोऽस्मि' इति ॥ २६५ ॥

आश्चर्य, खेद, कारण और निश्चय.

अहहे (त्यद्भुते खेदे) हि (हेतावचधारणे) ॥२६६॥

इति नानार्थवर्गः ॥

अहेति—अद्भुते विस्मये, खेदे दैन्ये शोके वा 'अहह' इत्यव्ययं स्यात् । अहं जहाति, जिहीते वा अहं पूर्वकाद् हाको हाङो वा कर्तरि "अन्येभ्योऽपीति" डे, पृषोदरादित्वान्मलोपे च अहह । "अहहा" दीर्घान्तमपि" तत्र 'क्विप्' बोध्यः "अहहेत्यद्भुवे खेदे परिक्लेशप्रहर्षयोः । सम्बोधनेऽपि" (इति मेदिनी) अद्भुते यथा 'अहह बुद्धिप्रकर्षो राज्ञः' खेदे यथा 'अहह नीतो मया द्यूतेन कालः' परिक्लेशे यथा 'अहहा परिपीडितोऽहं व्याधिनाऽतो गङ्गाम्भसि पतिष्यामीति । प्रहर्षे यथा "अहहा मे रात्रौ पौत्रो जातः" सम्बोधने यथा 'अहह सखे ! मया सार्कं भोक्तव्यम्' । हेतौ कारणे, अवधारणे निश्चये च 'हि' स्यात् । हिनोति, हिनोतेः कर्नरि विचि, संज्ञापूर्वकत्वाद्गुणाभावे च । क्विपि तु तुगागमाभावे वा 'हि' "हि

पादपूरणे हेतौ विशेषेऽप्यवधारणे । प्रश्ने हेत्वपदेशे च संभ्रमासूययोरपि । ही दुःख हेतावाख्यातो विषादे विस्मयेऽपि च "। (इति मेदिनी) तत्र पृषोदरादित्वाद्दीर्घः । एषु सर्वत्र भावे वा प्रत्यया ज्ञातव्याः । हेतौ यथा 'अग्निरत्रास्ति धूमो हि दृश्यते' अवधारणे यथा 'चन्द्रोहि शीतो वर्तत इति' ॥ २६६ ॥

इति नानार्थवर्गविवरणम् ।

अथ अव्ययवर्गो व्याख्यायते ।

दीर्घकाल, **(चिरायचिररात्रायचिरस्याद्या) श्चिरार्थकाः ।**

वारम्बार. **मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृ (त्समाः) ॥ १ ॥**

चीति–चिरायः, चिररात्रायः, चिरस्यः एते आद्यायेषामिति ते चिरोऽर्थो येषामिति चिरार्थकाः स्युः । आद्यपदेन " चिरम्, चिरेण, चिरात्, चिरे " इति गृह्यन्ते । चिरमयते, चिरपूर्वादयतेः कर्तरि " कर्मण्यण् " इत्यणि चिराय यथा 'चिराय सन्तर्प्य समिद्भिरग्निम्' । चिरारात्रयः । " अच् प्रत्यन्वव–" इत्यत्र " अच् " इति योगविभागादचि चिररात्रास्तानयते " कर्मण्यण् " इत्यणि । चिररात्राय यथा 'चिररात्राय संचितं मधु मक्षिकाभिः' । चिरमस्यति, चिरपूर्वादस्यतेः कर्तरि ण्यति-सञ्ज्ञापूर्वकत्वाद्वृद्ध्यभावे, शकन्ध्वादित्वात्पररूपे च चिरस्य यथा 'चिरस्य दृष्टैवमृतो स्थितेव' । चिनोति, चिनोतेः कर्तरि बाहुलकाद्रक्कि, गुणाभावे, मान्तत्वे च निपातिते चिरम्, यथा 'चिरंजीवतु बालोऽयम्' रेणकि प्रत्यये चिरेण यथा 'चिरेण नाभिं प्रथमोदबिन्दवः' चिरमततीति विग्रहेतु चिरपूर्वकादतेः कर्तरि क्विपि, चिरात्, 'चिरात्सुतस्पर्शरसज्ञतां ययौ' रेकि, चिरे । 'स चिरे तपसि स्थित.' । इति सप्तदीर्घ कालस्य । मुहुः, पुनः पुनः, शश्वत्, अभीक्ष्णम्, असकृत् एते समास्तुल्यार्थाः स्युः । मोहनम्, मुह्यतेः कर्तरि बाहुलकादुसि मुहुः । यथा 'मुहुः पश्यसि कौन्तेय' । पनते, पनेः कर्तरि बाहुलकादरि, " नित्यवीप्सयोः " इति पुनः शब्दस्य द्वित्वे च पुनः पुनः यथा 'आगच्छति पुनः पुनः' । शशति, शशेः कर्तरि बाहुलकाद्वति, शश्वत् यथा 'शश्वच्छान्ति निगच्छति' । अभिक्ष्णौति, अभिपूर्वकात् क्ष्णौतेः कर्तरि बाहुलकाड्डमौ अभीक्ष्णम् । यथा 'अभीक्ष्णं स्थाल्यामोदनं पचति' । अन्यस्तु अभीक्ष्ण शब्दमनव्ययमप्याह । " अभीक्ष्णंतु पौनः पुन्ये सर्वदार्थे च दृश्यते " इत्यनव्ययप्रकरणे पाठात् । वारंवारं शश्वदर्थे वारंवारेण चेष्यते " (इति त्रिकाण्डशेषः) न सकृत् नञ्समासे असकृत् यथा 'असकृज्जलपानाच्च' । इति पञ्च पौनःपुन्यार्थस्य ॥ १ ॥

शीघ्रता वाचक, **स्राग्झटित्यञ्जसान्हाय सपदिद्राङ्मङ्क्षु (द्रुते) ।**

अतिशयार्थक. **बलवत्सुष्ठुकिमुतस्वत्यतीव च (निर्भरे) ॥ २ ॥**

स्रेति—स्राक्, झटिति, अञ्जसा, अन्हाय, सपदि, द्राक्, मङ्क्षु एते द्रुते शीघ्रार्थे स्युः। स्रवति, स्रुवःकर्तरि बाहुलकाड्डाकि, स्रवणमिति विग्रहेतु संपदादित्वात् क्विपि तुगागमे च स्रुत् तामासमन्तादकति, क्विपि वा शकन्ध्वादित्वात्पररूपे च स्राक् यथा 'स्राग्वयोयाति देहिनाम्'। झटनम्, झटेर्भावे संपदादित्वात् क्विपि झट् तामेतीति कर्तरि क्विचि झटिति 'वृक्षं झटित्यारुरोह वानरः' अञ्जनम्, अञ्जेर्भावे "कृत्यल्युटो (कृतो) बहुलम्" इति पचाद्यचि अञ्जस्तं स्यति, सायति वा क्विपि अञ्जसा यथा 'अञ्जसा याति तुरगः'। ह्वनम्, ह्वेञोभावे बाहुलकाद् घञि, पृषोदरादित्वाद्धस्य यत्वे च ततो नञि समासे 'अह्नाय' यथा 'अह्नाय सूर्येण तमो निरस्तम्'। संपद्यते, संपूर्वकात्पद्यतेः कर्तरि इनि, पृषोदरादित्वात्समोऽन्त्यलोपे च सपदि यथा 'वचसस्तस्य सपदिक्रिया केवलमुत्तरम्' द्राणम्, द्रातेर्भावे संपदादित्वात् क्विपि द्रा तामकतीति, कर्तरि क्विपि द्राक् यथा 'द्राग्भविष्यति ते सुखं प्रिये'। मज्जति, मज्जतेः कर्तरि बाहुलकात्सुप्रत्यये 'मस्जिनशोः—' इति नुमागमे, "स्कोरिति" सलोपे, कुत्वे, षत्वे, क्षत्वे च मङ्क्षु यथा "मङ्क्षूदपाति सरितः पटलैरलीनाम्" इति सप्त द्रुतस्य। बलवत्, सुष्ठु, किमुत, सु, अति, अतीव एते निर्भरे अतिशयार्थे स्युः। बलमस्यास्ति, मतुपि, मतो मस्य वत्वे च बलवत् यथा 'पुनर्वशित्वाद्बलवन्निगृह्य' सुतिष्ठति, सुपूर्वकात्तिष्ठतेः कर्त्तरि "अपदुःसुषुस्थः" इति कौ "सुषमादिषु च" इति षत्वे च सुष्ठु, यथा 'सुष्ठु पीतं मया घृतम्' किंच तद् उत च किमुत, यथा 'किमुतावर्द्धितं क्षेत्रम्'। सवति, सवनम् वा सवतेः कर्तरि भावे वा क्विपि, तुगागमाभावे च सु यथा 'सुपक्वं कदलीफलम्' अतति, अतेः कर्तरि इनि, अति यथा 'अतिवर्षति तोयदः' अति च इव च अतीव यथा 'अतीव शोभते राजा' इति षड् अतिशयस्य ॥ २ ॥

वर्जनार्थक, **पृथग्विनान्तरेणर्ते हिरुङ् नाना च (वर्जने)।**
कारणार्थक, असपूर्णार्थक. **यत्तद्यतस्ततो (हेता) वसाकल्ये तु (चिच्चन)॥ ३॥**

प्रिति—पृथक्, विना, अन्तरेण, ऋते, हिरुक्, नानाचेति षट् वर्जने वर्जनार्थे स्युः। पर्थयति 'पृथ प्रक्षेपे' अस्माच्चौरादिकात्कर्तरि बाहुलकात्कक्रि, प्रथयति, 'प्रथेः किरसंप्रसारणं चेति' अजि वा किरवात्संप्रसारणे च पृथक् यथा 'किञ्चिद्दत्वा पृथक् क्रिया' "विनञ्भ्यां नानाञौ न सह" इति निषेधार्थाद्विशब्दान्ना प्रत्यये विना "विना वातं विना वर्षं विद्युतः पतनं विना। विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमौ"। अन्तरेति, अन्तः पूर्वकादेतेः कर्तरि 'णे' गुणे च अन्तरेण 'अन्तरेण सुतं नास्ति सुखं संसारिणां भुवि'। ऋतीयते, "ऋतिः" सौत्रस्तस्मात्कर्तरि 'के' गुणाभावे च ऋते 'ऋते ज्ञानान्न मुक्तिः'। हिनोति, हिनोतेः कर्तरि रुकक्रि हिरुक् 'हिरुक् कर्म न ... गोत्र.'। नञो "विनञ्भ्याम" इति नाञि प्रत्यये, ञित्त्वाद्वृद्धौ च नाना 'वि...

नाना नास्ति मोक्षदो देवः ' इति षट् वर्जनार्थस्य । यत्, तत्, यतः, ततः एते द्वे तौ कारणे स्युः । अत्र चानुवृत्त्या येनतेनाद्यपि ज्ञेयम् । यच्छति, यमेः कर्तरि क्विपि "गमादीनां क्वौ" इत्यनुनासिकलोपे तुगागमे च यत् यथा 'यन्नरम्यं तरस्विभ्यः' । तनोति, तनोतेः कर्तरि क्विपि, नलोपे, तुगागमे च तत् 'तदिदं रक्ष शोभने' । यस्मात् "पञ्चम्यास्तसिल्" इति तसिलि, त्यदाद्यत्वे च यतः 'यतो गङ्गाम्भसि स्नातः' । तस्मात्, तसिलि, त्यदाद्यत्वे च ततः 'ततो निष्कल्मषो भवेत्' । यच्छब्दाट्टा प्रत्यये, त्यदाद्यत्वे, इनादेशे, गुणे च येन यथा 'वितर गिरमुदारां येन मूकाः पिकाः स्यु.' । एवं तच्छब्दाट्टाप्रत्यये, त्यदाद्यत्वे, इनादेशे, गुणे च तेन यथा 'तेन तुष्टा जनाः सर्वे महामोदं प्रलेभिरे' इत्यादि विज्ञेयम् । इति चत्वारि कारणस्य । असाकल्ये असकलार्थे चित्, चन इमौ स्याताम् । चेतति, चितेः कर्तरि क्विपि चित् "कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः" । चनति, चनेः कर्तरि पचाद्यचि चन 'ततः कञ्चन नाश्रयेत्' इति द्वे असकलार्थस्य ॥ ३ ॥

किसी काल, सहार्थक, अनुकूलता, निरर्थक. **कदाचिज्जातु सार्धं (तु) साकं सत्रा समं सह ।**
(आनुकूल्यार्थकं) प्राध्वं (व्यर्थके तु) वृथा मुधा ॥ ४ ॥

केति—कस्मिन् काले "सर्वैकान्यकियत्तदः काले दा" इति 'दा' किमः कादेशे च कदा, चेततीति कर्तरि क्विपि चित्—कदा च चिच्च अनयोः समाहारः कदाचित् यथा 'कण्डूयमानेन कटं कदाचित्' जायति 'जै क्षये' अस्मात्कर्त्तरि बाहुलकात्तुनि जातु यथा 'ज्ञानं ते जातु सूत्तमम्' इति द्वे कस्यचित्कालस्य । सह अर्धित्वा "आभीक्ष्ण्येणमुल्" इति णमुलि, गुणे, "सहस्य सः" इति सादेशे च । ऋध्यति ऋध्यतेः कर्तरि बाहुलकात्कमि वा सह ऋधंवर्धनम् । सार्धम् यथा 'सार्धं दानववैरिणा' । सह अकनम्, सह पूर्वकादकेर्भावे बाहुलकादमि, णमुलि वा सादेशे च साकम् यथा 'पत्न्या साकं पतिर्भुङ्क्ते' सह त्रायते, सहपूर्वकात्त्रैङ. कर्तरि क्विपि, आत्वे च सत्रा यथा 'सत्रा कलत्रेण सुखं समश्नुते' । समति, समेः कर्त्तरि बाहुलकादमि समम् यथा 'समं वधूभिस्तरुणा रमन्ते' । सहते, सहेः कर्तरि पचाद्यचि सह यथा 'पुत्रेण सहागतः पिता । तथा च "सजू. सहार्थे" इति त्रिकाण्डशेषात्सजुष्शब्दोऽप्यत्रबोद्धव्य । सह जुषते, सहपूर्वकाज्जुषेः कर्त्तरि क्विपि, सादेशे, रुत्वे, दीर्घे च सजूः यथा 'सजूः सख्या गन्तव्यम्' इति पञ्च सहार्थकस्य । प्राध्वम्, आनुकूल्यार्थकं स्यात् । प्राध्वनति, प्राङ्पूर्वकाद्ध्वनेः कर्तरि बाहुलकाड्डमि प्रत्यये प्राध्वम् "प्राध्वं तु प्रणतेचातिदूरे वर्त्मनि बन्धनम्" (इति मेदिनी) यथा 'प्राध्वं प्रणमति सुरं नीति-नाथः' इत्येकमानुकूल्यार्थस्य । वृथा, मुधा चेमौ व्यर्थके निष्कारणे [illegible] स्याताम् । व्रियते वृडो वृञो वा कर्मणि थाकि वृथा "वृथा [illegible] निष्कारणे" (इति मेदिनी) यथा 'पञ्च यज्ञा वृथा तस्य नीलवक्त्रस्य [illegible]' । मुधा [illegible]

कर्तरि बाहुलकात्काप्रत्यये, गुणाभावे, पृषोदरादित्वाद् हस्य धत्वे च मुधा 'मुधा वुधा भ्रमन्त्यत्र ' इति द्वे व्यर्थकस्य ॥ ४ ॥

विकल्पार्थक, **आहो उताहो किमुत (विकल्पे) किं किमूत (च)।**

पादपूरणार्थक. **तु हि च स्म ह वै (पादपूरणे) (पूजने) स्वती ॥ ५ ॥**

आहो इति–आहो, उताहो, किमुत, किम्, किमु, उत चैते पट् विकल्पार्थे स्युः। आहन्ति, आङ्पूर्वकाद्धनेः कर्तरि बाहुलकाड्डो प्रत्यय, डित्त्वाट्टिलोपे च आहो यथा ' देवः आहो गन्धर्वः ' " विकल्पे विस्मयेऽप्यहो " इति रुद्रवचनाद् ' अहो ' ह्रस्वादिरपि। यथा ' रामः अहो शिवः ' विस्मये यथा ' अहो अलं श्लाघ्यतमं यदोः कुलम '। उत च आहो च, अनयोः समाहारः उताहो यथा 'उताहो ब्रह्म चोच्यते'। किम् च उत च, अनयोः समाहारः किमुत "किमुतातिशये प्रश्ने विकल्पे च प्रयुज्यते" (इति विश्वः) यथा ' किमुत त्वं शिवो ब्रह्मा ' कानम्, कायतेर्भावे बाहुलकाड्डिमी किम् यथा ' स्थाणुरयं किं पुरुषः '। किम् च उच, अनयोः समाहारः किमु, " किमुसंभावनायां स्याद्विमर्शेचापि दृश्यते " (इति मेदिनी) यथा ' गृहं किमुवनं गतः '। ऊयते उङः कर्मणि क्ते उत " उत प्रश्ने वितर्के च उताप्यर्थविकल्पयोः " (इति विश्वः) यथा ' विष्णुरुत शिवः सेव्यः ' इति पट् वितर्कणस्य। तु–हि–च–स्म–ह–वै चैते पादपूरणेऽर्थे स्युः। तुदति, तुदेः कर्तरि बाहुलकाड्डुप्रत्यये, तु यथा ' रामस्तु लक्ष्मणं प्राह '। हिनोति, हिनोतेः कर्तरि क्विपि, तुगभावे च हि यथा ' अहं हि यास्ये नगरं मनोज्ञम् '। चनति, चिनोति वा चनतेश्चिनोतेर्वा कर्तरि " अन्येभ्योऽपीति " डे, डित्त्वाट्टिलोपे च 'च' यथा ' स च प्राह च राजानम् '। स्मयते, स्मिङः कर्तरि डे, स्म ' मया स्म भुक्तं सुचिरं सुराज्यम् ' हन्ति, हनेः कर्तरि डे ह " ह स्यात्सम्बोधने पादपूरणेच विनिग्रहे। नियोगे च क्षिपायां स्यात्कुत्सायामपि दृश्यते " (इति मेदिनी) ' स ह तं प्राह लक्ष्मणः ' वाति,वातेः कर्तरि बाहुलकाड्डै प्रत्यये वै ' हतो वै रामचन्द्रेण रावणो लोकरावणः ' इति पट् पादपूर्णार्थकस्य। पूजने अर्चने सु च अति चेति-स्वती स्याताम्। सवति, सवतेः कर्तरि डु प्रत्यये सु " सु पूजायां भृशार्थेनु मतिकृच्छ्र-समृद्धिषु " (इति मेदिनी) ' सुरतुतो देवदेवेशः शिवया सहितो हरः ' अतति, अतेः कर्तरि इनि अति "अत्युत्तमो हि देवानां विष्णुः सर्वगुहाशयः" इति द्वे पूजनार्थस्य॥५॥

दिनार्थक,रात्र्यर्थक, कुटिलार्थक, सम्बोधनार्थक. **(दिवाह्नीत्यथ) दोषा (च) नक्तं (च रजनाविति)।**
(तिर्यगर्थे) साचि† तिरो (ऽप्यथ सम्बोधनार्थकाः) ॥ ६ ॥

---

† साचिः स्त्रीलिङ्गापि प्रकृत्यन्तरमस्ति। ' भित्तौ साचीं परिणतमुखी ' (इति सप्तकुमारिका) "तिर्यक् साचिरपिद्वियाम ॥ (इति रत्नकोषः) ॥

दीति—अह्नि दिवसे इत्यर्थे दिवा स्यात् । दीव्यन्त्यत्र, दिवेराधारे बाहुलकात्का प्रत्यये दिवा यथा 'दिवानिशं तप्यति मर्मताडितः' इत्येकं दिवसस्य । अथेत्यनन्तरं दोषा, नक्तम्, 'चकाराद्दुषापि' इति त्रयं रजनौ रात्रावित्यर्थे स्यात् । दुष्यन्त्यत्र, दुषेराधारे आप्रत्यये, गुणे च दोषा 'दोषा रात्रिमुखे रात्रावत्रानव्ययमप्यसौ' (इति विश्वः) यथा 'चौराश्च दोषा ययुः' । नजति 'ओनस्जी व्रीडे' अस्मात्कर्तरि तमु प्रत्यये, पृषोदरादित्वात्सलोपे, कुत्वे, चर्त्वे च नक्तम् "नक्तं दोषा च रजनौ" "इति कोपान्तरम्" यथा 'नक्तं गृहस्थो भुञ्जीत' इति द्वे रात्रेः । तिर्यगर्थे कुटिलार्थे साचि, तिरोऽपि स्यात् । सचनम्, सचेर्भावे "इञजादिभ्यः" इतीञि, ञित्त्वाद्वृद्धौ साचि 'कृतं साचि धनुस्तेन' तरणम्, तरतेर्भावे असुनि "कचिदपवादविषयेऽपि—" इतीरादेशे च तिरः यथा "तिरोगत्वा समीक्षेत" अथेत्यनन्तरं वक्ष्यमाणाः पाडादयः सम्बोधनार्थकाः स्युरिति ॥ ६ ॥

सम्बोधनार्थक, सामीप्यार्थक, अविचारित, अग्रार्थक.

स्युः (पाट् प्याडङ्ग हेहैभोः) (समया निकषा हिरुक्) । (अतर्किते तु) सहसा (स्या)त्पुरः पुरतोऽग्रतः ॥ ७ ॥

स्युरिति—पाट्, प्याट्, अङ्ग, हे, है, भोः एते षट् सम्बोधनार्थकाः स्युः । पाटयति, पटेर्णिजन्तात्कर्त्तरि क्विपि, णिलोपेच पाट् यथा 'पाट्भीम ! यज्ञं रक्षस्व' । प्यायते, प्यैङः कर्तरि बाहुलकात् ट् प्रत्यये आत्वे च प्याट् 'प्याट् पार्थ ! जयद्रथं पश्य' अङ्गति अङ्गेः कर्तरि पचाद्यचि अङ्ग 'अङ्गदेव दयांकुरु' । हिनोति, हिनोतेः कर्तरि विचि, गुणे च हे 'हे राम ! तव दासोऽस्मि' । हन्ति, हनेः कर्तरि बाहुलकाड्डै प्रत्यये, डित्त्वाट्टिलोपे च है 'है अम्ब मां सन्निधेहि' । भाति, भातेः कर्तरि बाहुलकाड्डोस् प्रत्यये, डित्त्वाट्टिलोपे च भोः 'क्षमस्व भो दुराराध्य' इति षट् सम्बोधनस्य । समया—निकषा—हिरुक् इति त्रीणि सामीप्ये स्युः । समयनम्, संपूर्वकादेतेर्भावे "आ समिणुनिकषिभ्याम्" इत्या प्रत्यये, गुणे, अयादेशे च समया यथा 'समया ग्रामं नदी वहति' । निकषणम्, निपूर्वकात्कषेर्भावे आप्रत्ययेनिकषा "निकषान्तिकमध्ययोः" (इति मेदिनी) । यथा 'विलङ्घ्य लङ्कां निकषा हनिष्यति' । हिनोति, हिनोतेः कर्तरि रुकक्कि प्रत्यये हिरुक् 'हिरुगुक्तं च सामीप्ये' (इत्यमरमाला) 'हिरुग्रामंगतो भरतः' इति त्रीणि सामीप्यस्य । अतर्किते अविचारिते तु सहसा स्यात् । सहते, सहेः कर्तरि बाहुलकादसा प्रत्यये सहसा यथा 'दिवः प्रसूनं सहसा पपात' इत्येकमविचारितस्य । पुरः, पुरतः, अग्रतः इति त्रयोऽग्रार्थाः स्युः । पूर्वस्मिन्, पूर्वाधरावराणामसि पुरधवश्चैषाम्" इत्यस्तात्यर्थे असि प्रत्यये, पुरादेशे, रुत्वे, विसर्गे च पुरः

१ "उषा रात्रौ तदन्ते च (इति मेदिनी) ॥
२ "मम तावन्मतमिदं श्रूयतां मङ्ग वामपि ।" (इति माघ.) ।

यथा 'पुरः पश्यसि किं बाले' पुरति, पुरतेः कर्तरि बाहुलकादतसुकि, पुरतः 'पुरतः स्थाप्य सर्वेशम्' अग्र इति आद्यादित्वात्तसौ अग्रतः "ददर्श राजा जननीमिव स्वा गामग्रतः प्रस्नविर्णीं न सिंहम्" (इति रघुः) इति त्रीण्यग्रार्थकस्य ॥ ७ ॥

देवतार्थक, पित्र्यर्थक, अल्पार्थक, जन्मान्तरार्थक.

स्वाहा (देवहविर्दाने) श्रौषड्वौषड्वषट् स्वधा।
किञ्चिदीषन्मना (गल्पे) प्रेत्यामुत्र (भवान्तरे) ॥ ८ ॥

स्वेति—स्वाहा, श्रौषट्, वौषट्, वषट्, स्वधा एते पञ्च देवहविर्दाने देवतार्थहविष्यदानविशेषे प्रयुज्यन्ते। स्वादतेऽनेन, स्वादेः करणे बाहुलकादाप्रत्यये, पृषोदरादित्वाद्दस्य हे च। सुष्ठु आहूयतेऽनेनेति वा साधने डाप्रत्यये स्वाहा। यथा 'इन्द्राय स्वाहा' श्रूयतेऽनेनेति वा शृणोतेः कार्यसाधनयोर्बाहुलकाड्डौषट् प्रत्यये, डित्त्वाट्टिलोपे च श्रौषट् 'शम्भवे श्रौषट्' उह्यतेऽनेन, वहतेःकरणे डौषटि, वौषट् 'वासुदेवाय वौषट्'। डषटि प्रत्यये तु वषट् 'बलारातये वषट्' स्वद्यतेऽनेन, स्वदेः साधने बाहुलकादा प्रत्यये, पृषोदरादित्वाद्दस्य धे च स्वधा, † 'पितृभ्यः स्वधा' इति पञ्च देवहविर्दानस्य। किंचित्, ईषत्, मनाक् इति त्रयोऽल्पे अल्पार्थे प्रवर्तन्ते। किम् च चिज्ञानयोः समाहारः किंचित् यथा 'किंचिद्विकसितं पुष्पमिति। ईषणाम्, ईषतेर्भावे बाहुलकादति प्रत्यये ईषत्, 'ईषदुष्णं पयः पिब' मननम्, मनेर्भावे बाहुलकादाकि प्रत्यये मनाक् यथा 'मनाग् विहस्य सन्तुष्टो बभूव' इति त्रीण्यल्पार्थकस्य। भवान्तरे जन्मान्तरे प्रेत्य-अमुत्र इत्युभे प्रवर्तेते। प्रकर्षेण इत्वा, प्रपूर्वकादेतेर्भावे क्त्वा प्रत्यये, "समासे-" इति ल्यबादेशे, तुगागमे च प्रेत्य, यथा 'प्रेत्य स्वर्गे महीयते'। अमुष्मिन्, अदसः "सप्तम्यास्त्रल्" इति त्रलि, त्यदाद्यत्वे, पररूपत्वे, उत्वे, मत्वे च अमुत्र 'इहामुत्र च फलं ज्ञेयमिति' द्वे भवान्तरस्य ॥ ८ ॥

तुल्यार्थक, विस्मयार्थक, मौनार्थक, तत्कालार्थक.

ववा यथा तथैवैवं (साम्ये) ऽहो ही च (विस्मये)।
(मौने तु) तूष्णीं तूष्णीकां सद्यः सपदि (तत्क्षणे) ॥ ९ ॥

वेति—व, वा, यथा, तथा, एव, एवम्—एते षट् साम्ये तुल्यार्थे स्युः। वाति, वातं वा वातेः कर्तरि भावे वा 'अन्येष्वपि दृश्यते' इति डे, डित्त्वाट्टिलोपे च व 'वं प्रचेतसि जानीयादिवार्थे तु तदव्ययम्' (इति मेदिनी) यथा 'शरच्चन्द्रो व ते यशः' क्विपि तु वाः † 'मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम। म्रियमाणौ च तौ दृष्ट्वा मद्भिस्तत्रेदमब्रवीत्"। विषधरो वा चुक्रोध मेघनादो महाबलः'। येन प्रकारेण, यच्छब्दात् "प्रकारवचने थाल्" इति थालि, विभक्तित्वात्त्यदाद्यत्वे च, यथा 'यथा

† "पितृदाने स्वधामना" इति।
† क्वचित् 'वत्' इति पाठो दृश्यते, सतु न युक्तः। वति प्रत्ययेन गतार्थत्वात्। नच वतिरेवात्र पठित [illegible] अव्ययपाठन्यायानत्वात्। अपत्यममृहादिपर्यायेष्वगणवृन्दानिमपाठात ॥

[बु]भुक्षितस्यान्नम्' । तेन प्रकारेण, तच्छब्दात्थालि, त्यदाद्यत्वे च तथा 'तथैवार्तस्य [औ]षधम्' । अयनम्, एतेर्भावे 'इणशीभ्यांवन्' इति वनि, गुणे च एव "एवौपम्ये [प]रिभवे ईषदर्थेऽवधारणे" (इति हैमः) यथा "शार्दूल एव भूपालो भाति लोके [भ]यंकरः" अत्र स्वामिमुकुटाभ्यां तु इव शब्दो गृहीतः । अयनम्, एतेर्भावे बाहुल-[क]ाद्वकि, कित्त्वाद्गुणाभावे च इव 'छायेव तां भूपतिरन्वगच्छत' वमि प्रत्यये तु एवम् "अग्निरेवं द्विजोभाति रामान्तिकमुपागतः" इति षट् साम्यार्थस्य । विस्मये अद्भुते अहो, ही इत्युभे स्याताम् । अहानम्, नञ्पूर्वाद्दूहाङोभावे बाहुलकाड्डो प्रत्यये अहो [य]था 'अहो अलं पुण्यतमं मधोर्वनम्' । हननम्, हन्तेर्भावे बाहुलकाड्डीप्रत्यये डित्त्वाट्टिलोपे च ही 'ही † विचित्रो विपाकः' (इति माघः) इति द्वे विस्मयार्थस्य । [म]ौने अभाषणे तु तूष्णीम्–तूष्णीकाम् इत्युभे स्याताम् । तोषणम्, तुष्यतेर्भावे बाहु-लकान्नीमि प्रत्यये, उपधाया ऊदादेशे च तूष्णीम् । यथा 'तूष्णीं स्थित्वा क्षणं रामो जगाम गुरुसन्निधौ' तूष्णीमेव, "अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः" इति मित्त्वादन्त्याचः परे कामागमे, तूष्णीकाम् "तूष्णीकामासने रामः स्थित्वा दध्यौ महे-श्वरम्" इति द्वे मौनस्य । स चासौ क्षणश्च तस्मिन् तत्क्षणे तत्काले सद्यः, सपदि इत्युभे स्याताम् । समानेऽहनि इति सद्यः, "सद्यः परुदिति" साधुः । यथा 'सद्यो-हतः समुत्तस्थौ' संपद्यतेऽस्मिन्, संपूर्वात्पद्यतेराधारे 'सर्वधातुभ्य इन्' इतीनि प्रत्यये सपदि "ध्यात्वा सपदि तं रामं बाणं जग्राह लक्ष्मणः" इति द्वे तत्कालस्य ॥ ९ ॥

कल्याणार्थक, **दिष्ट्या समुपजोषं (चेत्यानन्दे) ऽथान्तरेऽन्तरा ।**
मध्यार्थक,
हठार्थक. **अन्तरेण च (मध्ये) स्युः प्रसह्य तु (हठार्थकम्) ॥ १० ॥**

दीति–दिष्ट्या, समुपजोषम् चेत्युभे आनन्दे आनन्दार्थे स्याताम् । देशनम्, दिश-तेर्भावे संपदादित्वात्क्विपि, दिक् तां स्त्यायति, दिक्पूर्वात्स्त्यायतेः कर्त्तरि क्विपि, षत्वे, पृषोदरादित्वात्सलोपे, ष्टुत्वे, संज्ञापूर्वकत्वाज्जश्त्वाभावे च दिष्ट्या यथा 'दिष्ट्या ते दर्शनं कान्ते' समुपजोषणम्, समुपपूर्वाज्जुषतेर्भावे अमिप्रत्यये, गुणे च समुपजोषम् "समु-पजोषं समीपं ते दर्शनंजातमुत्तमम्" समुपयोषं चतुर्थमन्तस्थाद्यमित्येके । मुकुटस्तु 'दिष्ट्या शमुपजोषं चेति पठित्वा नामत्रयं व्याख्यातवान्' तत्र दिशति, अघ्न्यादि त्वात्कर्तरि यकि, षत्वे, तुगागमे, ष्टुत्वे च निपातिते दिष्ट्या, शमयतेर्णिजन्तात् कर्तरि विचि शम्, "शंकरः शं करोतु मे" उपजोषणम्, उपपूर्वकाज्जुषतेर्भावे बाहुलका-दमिप्रत्यये गुणे च उपजोषम् चवर्गतृतीयतृतीयम् । अन्तस्थाद्यतृतीयमित्येके इति पीयूषव्याख्यातोऽवसेयम् । "उपजोषमुमानाथ दर्शनं प्राप्तमद्य मे" इति त्रीणि कल्या-णार्थस्य । अथेत्यनन्तरम् अन्तरे–अन्तरा–अन्तरेण च मध्ये मध्यार्थे स्युः । अन्तरेति,

† "कुमुदवनमपश्रि श्रीमदम्भोजषण्ड त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः । उदयमहिमरश्मि र्याति शीतांशुरस्तं हतविधिलसितानां ही विचित्रो विपाकः" ॥ १ ॥ (इति माघः) ॥

अन्तर्पूर्वकादेतेः कर्तरि विचि गुणे च अन्तरे यथा 'अनयोरन्तरेतिष्ठ' डाचि प्रत्यये अन्तरा 'त्वां मामन्तरा हरिः' णोप्रत्यये, गुणे च अन्तरेण 'नारदपर्वतयोरन्तरेण कमण्डलुः' इति त्रीणि मध्यस्य। प्रसह्य तु हठोऽर्थोयस्येति हठार्थकं स्यात्। प्रकर्षेण सोढ्वा प्रपूर्वात्सहेर्भावेक्त्वाप्रत्यये ल्यबादेशे च प्रसह्य यथा 'प्रसह्य सिंहः किल तां चकर्ष' इत्येकं हठार्थस्य ॥ १० ॥

उचितार्थक, निरन्तरार्थक, अभावार्थक, वारणार्थक.

(युक्ते द्वे) सांप्रतं स्थानेऽभीक्ष्णं शश्व (दनारते)।
(अभावे) नह्यनो[1]नापि मास्ममालं च (वारणे) ॥११॥

यिवृति—सांप्रतम्, स्थाने इति द्वे युक्ते उचितार्थे स्याताम्। संप्रतननम्, संप्रपूर्वकात्तनोतेर्भावे बाहुलकाड्डमिप्रत्यये, पृषोदरादित्वात्समोदीर्घे च सांप्रतम् यथा 'क्रमशो वच्मि सांप्रतम्' "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्" असांप्रतं न युक्त मित्यर्थः"। स्थानस्य करणम्, स्थानशब्दात् 'तत्करोतीति' णिजन्ताद्भावे 'ए' प्रत्यये णिलोपे च स्थाने "स्थाने हृषीकेश! तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च" इति द्वे युक्तार्थस्य। अभीक्ष्णम्, शश्वत् इति द्वे अनारते निरन्तरे प्रयुज्येते। अभिक्ष्णवनम्, अभिपूर्वात्क्ष्णौतेर्भावे बाहुलकाड्डमिप्रत्यये, पृषोदरादित्वादभेदीर्घे च अभीक्ष्णम् "अभीक्ष्णमुष्णैरपि तस्य सोष्मणः सुरेन्द्रवन्दीश्वसितानिलैर्यथा। स चन्दनाम्भःकणकोमलैस्तथा वपुर्जलार्द्रापवनैर्न निर्ववौ' शशनम्, शशतेर्भावे वति प्रत्यये शश्वत् 'शश्वच्छान्तिं प्रदेहि मे' इति द्वे निरन्तरस्य। नहि, अ, नो, नापि इति चत्वारि अभावे स्युः। नह्यति, नह्यतेः कर्तरि 'इनि' नहि "नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति" अवति, अवनम् वा अवतेः कर्तरि भावे वा बाहुलकाड्डप्रत्यये डित्वाट्टिलोपे च अ "अ स्वल्पार्थेऽप्यभावेऽपि" (इति हैमः) "अ शब्दः स्यादभावेऽपि स्वल्पार्थप्रतिषेधयोः। अनुकम्पायां च तथा वासुदेवे त्वनव्ययः" (इति मेदिनी) नञोऽयमकार इति वा केचिदाहुः। 'अ विप्रवद्भाष से विप्र इव न ब्रूषे' इत्यर्थः। नह्यति, नह्यतेः कर्तरि बाहुलकाड्डो प्रत्यये नो "नो नक्री किं कुलालः"। डप्रत्यये तु न 'नायं जनोमे सुख—दुःखहेतुः' इति चत्वारि अभावस्य। मास्म—मा, अलम् इति त्रीणि वारणे निषेधार्थे प्रवर्तन्ते। माच स्म च अनयोः समाहारः मास्म "मास्मकार्षीरिदंप्रिये"। मानम्, मातेर्भावे संपदादित्वात्क्विपि मा 'मा निषाद! प्रतिष्ठां त्वमगमश्शाश्वतीः समाः' अलनम्, अलतेर्भावे बाहुलकादमि प्रत्यये अलम 'अलं महीपाल तव श्रमेण' इति त्रीणि वारणस्य ॥ ११ ॥

पक्षान्तरार्थक, यथार्थक, प्रकटार्थक, अङ्गीकारार्थक

(पक्षान्तरे) चेद्यदि च (तत्त्वे) त्वद्धाऽञ्जसा (द्वयम्)।
(प्राकाश्ये) प्रादुराविः (स्या)दोमेवं परमं (मते) ॥१२॥

[1] 'अनशब्दोऽपि निषेधे' अनोपमाते वृद्धिरिति मुकुट.।

पक्षेति—चेत्, यदि चेति द्वे पक्षान्तरे विकल्पार्थे स्याताम्। चेतति, चितेः कर्तरि विचि, गुणे च चेत् यथा 'सत्यं चेत्तपसा च किम्' यतनम्, यतेर्भावे इनि, पृषोदरादित्वात्तस्यदे च यद्वा यच्छब्दाण्णिजन्तात् "अचइः" इतीप्रत्यये, "प्रकृत्यैकाच्" इति टिलोपाभावे च यदि 'शुचिमनो यद्यस्तितीर्थेन किम्' इति द्वे पक्षान्तरस्य। अद्धा—अञ्जसा इति द्वयं तत्त्वे यथार्थे स्यात्। अतनम्, अतेर्भावे संपदादित्वात् क्विपि, अतं सततगमनं धयति, दधाति वा अत्पूर्वाद्धयतेर्दधातेर्वा कर्तरि विचि अद्धा यथा 'भ्रातरं चावधीत्कंसं मातुरद्धा तदर्हणम्' मातुर्देवक्या भ्रातरं कंसं च अवधीत् हतवान् इति अद्धा साक्षात्कारेण अतदर्हणम् कृष्णस्य अयोग्यमिति भावः"। अञ्जनम्, अञ्जेः "कृत्यल्युटो बहुलमिति" बाहुलकाद् भावे 'पचाद्यचि' अञ्जस्तं स्यति, सायति वा। अञ्जपूर्वात्स्यतेः सायतेर्वा कर्तरि 'पचाद्यचि' क्विपि वा अञ्जसा ‡'अञ्जसा मथुरां रुध्वा जरासन्धो जगर्जह' इति द्वे तत्त्वार्थस्य। प्रादुः, आविरिति द्वयं प्राकाश्ये स्फुटार्थे स्यात्। प्रात्ति, प्रपूर्वादत्तेः कर्तरि बाहुलकादुसि, दीर्घे च प्रादुः यथा 'प्रादुर्भूत्वा तयोर्मध्ये जहार स्वां प्रियां हरिः'। आवते, आङि पूर्वादुङः कर्तरि बाहुलकादिरि, इसि वा गुणे, अवादेशे, दीर्घे च आविः "देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः। आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः" इति द्वे प्रकटार्थस्य। ओम्—एवम्—परमम् इति त्रीणि मते अनुमतावर्थे प्रवर्तन्ते। अवति, अवतेः कर्तरि मनिनि, तस्य टिलोपे, "ज्वरत्वरेति" ऊठि, गुणे च ओम् "ओमित्यनुमतौ प्रोक्तं प्रणवे चाप्युपक्रमे"। (इति कोषान्तरम्) 'ओम्प्रश्नेऽङ्गीकृतौ रोषे' (इति विश्वः) यथा 'ओमित्युक्तवतोऽथ शार्ङ्गिण इति'। अयनम्, इणोभावे बाहुलकाद् वमि प्रत्यये गुणे च एवम् 'एवं यदाह भगवान्' परंमिमीते, मिनोति, मीनाति वा परपूर्वान्माङो मिञोमीञोवा कर्तरि बाहुलकाड्डमि, परमम् 'ओमेवं परमं भवेत्' (इति व्याडिः) यथा "इत्युक्त्वा परमं रामो हनुमन्तमुवाचह" इति त्रीण्यनुमतार्थस्य॥ १२॥

सब तरफ़, यथेष्ट, अत्यर्थ, या विनाकामना स्वीकार, निन्दा समेत स्वीकार

समन्ततस्तु परितः सर्वतो विष्वगि (त्यपि)।
(अकामानुमतौ) कामम(सूयोपगमे)ऽस्तु (च)॥ १३॥

समेति—समन्ततः, परितः, सर्वतः, विष्वक् इति चत्वारि सर्वतइत्यर्थे प्रयुज्यन्ते। अपिशब्दाद् 'अभितः, विश्वतः' समन्तादित्यादिग्रहः। समन्तात्, "आद्यादित्वात्" तसौ, समन्ततः यथा 'समन्ततो वर्षति वारिवाहः' "पर्यभिभ्यां च" इति परिशेष्वादात्तसिलि, परितः 'आयान्ति परितः श्रियः' सर्वस्मात्, "पञ्चम्यास्तसिल्",

‡ "तत्रतत्राञ्जसायुष्मन्भवता यद्विनिश्चितम्। पुमांश्चैकान्ततः श्रेयस्तन्नः शंसितुमर्हसि" (इति भागवतम्)॥ अञ्जसेति कृष्णं कृत्वावे।

इति तसिलि, सर्वत. 'सर्वतो वाति पवनः' विपु अञ्चति, विपुपूर्वादञ्चतेः कर्तरि क्विनि विष्वक् । 'विष्वक् पतन्ति किरणाः' अभिशब्दात्तसिलि, अभितः 'अभितो ग्रामं वनानि सन्ति' विश्वस्मात्, तसिलि विश्वतः 'विश्वतो वाति वातोऽयम्' समन्तात् 'समन्तात्सरति स्मरः' इति चत्वारि सर्वत इत्यर्थस्य। अकामानुमतौ अनिष्टाङ्गीकारे काममित्येकं स्यात् । काम्यते, कमेर्णिङन्तात्कर्मणि बाहुलकादमि कामम् "अकामानुमते काममसूयोपगमेऽपि च" (इति रुद्रः) 'आकामानुमतौ कामम्' इत्यपि क्वचित्पाठो दृश्यते तत्राङ्त्रोध्यः । निकामानुमतौ काममित्यर्थः । "कामं कामाभ्यनुज्ञयोः" (इति त्रिकाण्डशेषः) यथा 'त्वं हनिष्यसि चेत्कामम्' इत्येकं कामाभ्यनुज्ञयोः असूया गुणेषु दोषारोपस्तस्या उपगमः सत्स्वरूपाङ्गीकारस्तत्र 'अस्तु' इत्येकं स्यात् च शब्दान्नामशब्दोऽप्यत्र संगृह्यते । असति, अस्यति वा असतेरस्यतेर्वा कर्तरि बाहुलकात्तुनि अस्तु "अस्तु स्यादभ्यनुज्ञानेऽप्यसूयापीडयोरपि" (इति मेदिनी) 'माजीवन्यः पराभवाद्दुःखदग्धोऽपि जीवति । तस्याजननिरेवास्तु जननीक्लेशकारिणः इत्येकमसूयाङ्गीकारस्य ॥ १३ ॥

विरोधोक्ति, इष्ट प्रश्न, निन्दा योग्य, यथा योग्य.

ननुच (स्याद्विरोधोक्तौ) कच्चित् (कामप्रवेदने)।
निःषमं दुःषमं (गर्ह्ये) यथास्वं (तु) यथायथम् ॥ १४ ॥

नन्विति—विरोधोक्तौ विरोधवचने ननुचेत्येकं स्यात् । न नुदति, नञ्पूर्वान्नुदतेः कर्तरि मितद्र्वादित्वाड्डौ, डित्त्वाट्टिलोपे च ननु, चन्दतीति बाहुलकाड्डे टिलोपे च 'च, 'ननु' 'च' अनयोः समाहार द्वन्द्वे ननुच 'ननुचैवं मन्यसे तर्हि किमपि न स्यात्' केचिदत्र समुच्चयार्थं पादपूरणार्थं वा च शब्दं मत्वा 'ननु' एवेत्येकं विरोधोक्तौ स्यादित्याहुः । तेषां मते 'ननु एवं मन्यसे तर्हि किमपि नस्यादित्युदाहरणीयम् । इत्येकं विरोधवचनस्य । कामप्रवेदने इष्टपरिप्रश्ने इच्छार्थप्रकाशने वा कच्चिदित्येकं स्यात् कौति, कौतेः कर्तरि बाहुलकाड्डुति, डित्त्वाट्टिलोपे च कत्, चेतति, चितेः कर्तरि क्विपि चित् कच्च चिच्चानयोः समाहारद्वन्द्वे कच्चित् यथा 'कच्चिज्जीवति मे माता' इत्येकं कामप्रवेदनस्य । निःषमम्, दुःषमं चेति द्वे गर्ह्ये निन्दितेऽर्थे स्याताम् । निर्गतं समम् "तिष्टद्गुप्रभृतीनिचेति" अव्ययीभावत्वे, 'सुविनिर्दुर्भ्यः' इति षत्वे च निःषमम् यथा 'निःषमं वक्ति मे मूर्खः' । एवं दुष्टं सममत्रेति, दुःषमम् 'दुःषमं वर्तते वधूः' इति द्वे निन्दितार्थस्य । यथास्वमिति वीप्सायामव्ययीभावः योयमात्मा यद्यात्मीयं तद्यथास्वं तस्मिन् यथायोग्येऽर्थे यथायथं स्यात् । 'यथास्वे यथायथम्' इति सूत्रेण यथा शब्दस्य द्वित्वे क्लीवत्वे च निपातिते यथायथम् । केचित्तु यथायोग्ये यथास्वम् यथायथं चेति नामद्वयमप्याहुः । यथा 'यथास्वमाश्रमं चक्रे' । 'यथायथं फलायन्ते' इति द्वे यथायोग्यस्य ॥ १४ ॥

असत्यार्थक, सत्यार्थक, निश्चयार्थक.

मृषा मिथ्या च (वितथे) यथार्थं (तु) यथातथम् ।
(स्यु) रेवं तु पुनर्वै वे (त्यवधारणवाचकाः) ॥ १५ ॥

म्रिति—मृषा, मिथ्या चेति द्वे वितथे विगतं तथा सत्यमस्मात्तत्र असत्येऽर्थे स्याताम् । मृष्यते, मृषेःकर्मणि बाहुलकात्का प्रत्यये, कित्त्वाद्गुणाभावे च मृषा " उच्छ्राय-सौन्दर्यगुणा मृषोद्याः " । मथति, मथेः कर्तरि 'अघ्न्यादित्वाद्यगन्तो निपात्यते । मिथ्या 'सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम्' इति द्वे असत्यार्थस्य । अर्थमनतिक्रम्य, पदार्थानतिवृत्तावव्ययीभावे यथार्थं तस्मिन्नर्थे यथातथमित्येकं स्यात् । तथा शब्दस्तथशब्दो वासत्यार्थः सत्यमनतिक्रम्य यथातथम् । केचित्तु सत्यार्थे यथार्थम्—यथातथमिति नामद्वयमप्याहुः । 'यथार्थमुक्तं भवता नचान्यत्' । 'गुरुर्यथातथं ब्रूते गोविन्दगुणगायकः' । इति द्वे सत्यार्थस्य । एवम्—तु—पुनः वै वा इति पञ्च अवधारणवाचकाः स्युः । केचित्तु वा एवेति पदच्छेदं कुर्वन्ति । सुभूतिस्तु 'स्युरेवन्तु पुनर्वाच' * इति पठितवान् । एति, इणः कर्तरि बाहुलकाद्वमि एवम् 'एवमेव यथा प्राह' । तुदति, तुदेः कर्तरि बाहुलकाड्डुप्रत्यये तु 'रावणं तु दुरात्मानमवधीद्राघवः प्रभुः' पनते, पनेः कर्तरि बाहुलकादरि, अस्योदादेशेच पुनः 'पुनर्बभाषे वसुदेवसूनुः' वाति, वातेः कर्तरि डै प्रत्यये वै । 'धर्मज्ञो व्याससूनुर्वै सज्जनानन्ददायकः' । वाति, वातेः कर्तरि क्विपि, वा 'स्वामिना तु वचो वोक्तं तन्मे भद्रकरं भवेत्' । अयनम् । इणोभावे वनि, गुणे च एव 'तदेव सत्यं वद मे मुरारे!' इति पञ्चावधारणार्थस्य ॥ १५ ॥

अतीतार्थक, निश्चयार्थक, सवत्सरार्थक, पश्चादर्थक, आत्मार्थक.

प्राग (तीतार्थकं) नूनमवश्यं (निश्चये द्वयम्) ।
संव (द्वर्षे)ऽ(वरे)त्वर्वागामेवं स्वय (मात्मना) ॥ १६ ॥

प्रेति—प्रागित्येकं अतीतो अर्थो यस्येति अतीतार्थकं भूतकालार्थकं स्यात् । प्राचि देशे, प्राचोदेशात्, प्राङ्देशो वा । " सप्तमीपञ्चमी—" इत्यस्तातौ, 'अञ्चेर्लुक्' इति लुकि च प्राक् यथा "प्राक्कर्मकृतं भुङ्क्ते जनो जातो धरातले " इत्येकमतीतार्थकस्य । नूनम्—अवश्यं चेति द्वयं निश्चये अवधारणे स्यात् । नु ऊनयति, नुपूर्वकादूनयतेः कर्तरि बाहुलकादमि प्रत्यये नूनम् " नूनं निश्चिततर्कयोः " (इति विश्वः) यथा 'धर्मज्ञो धर्मराजोऽयं नूनं राज्यं प्रपत्स्यते' । अवश्यायते, अवपूर्वात् श्यैङःकर्तरि बाहुलकाड्डुमिप्रत्यये, डित्त्वाट्टिलोपे च अवश्यम् 'अवश्यं यातारश्चिरतरमुषित्वापि विषयाः' इति द्वे निश्चयार्थस्य । संवदित्येकं वर्षे वत्सरे स्यात् । संवयते, संपूर्वाद्वयतेः कर्तरि क्विपि-यलोपे, तुगागमे च, संवदतीति विग्रहे तु कर्तरि विचि वा संवत् यथा " सांप्रतं क्षय, नामकं संवत्प्रवर्तते " इत्येकं संवत्सरस्य । अवरे पूर्वकालतः पश्चादित्यर्थे अर्वागित्येकं

* "चान्वाचये समाहारे अन्योन्यार्थे समुच्चये । पक्षान्तरे तथा पादपूरणेऽप्यवधारणे" (इति रुद्रः) ॥

स्यात्। अर्वन्तमञ्चति, अवरे अञ्चति वा। अस्ताति प्रत्यये, "अञ्चेर्लुक्" इति लुकि पृषोदरादित्वात् अर्वाक् यथा "कुले ऋतुत्रयादर्वाक् मण्डनान्नतु मुण्डनम्" इत्येकमवरस्य। आम्–एवं चेति द्वे निश्चयार्थे अङ्गीकारार्थे वा स्याताम्। आमयति, अमतेर्ण्यन्तात्कर्तरि क्विपि, णिलोपे च आम् "आम् ज्ञानविनिश्चये" (इति बोपालितः) यथा "आंकुर्मो वचनं गुरोः"। अयनम्, इणोभावे बाहुलकाद्वमि, गुणेच एवम् "एवं कृत्वापितुर्वाक्यं रामो मात्रन्तिकं गतः" इति द्वे स्वीकारस्य। स्वयमित्येकं आत्मना इत्यत्रार्थे स्यात्। सुष्ठु अयते, सुपूर्वकादयतेः कर्तरि बाहुलकादमिप्रत्यये, यणादेशे च स्वयम् यथा "जायते श्रीपतिः स्वयम्" इत्येकमात्मार्थस्य ॥ १६ ॥

अल्पार्थक, महत्त्वार्थक, बाहुल्यार्थक, अशीघ्रार्थक, नित्यार्थक, बाह्यार्थक, अतीतार्थक, अदर्शनार्थक.

(अल्पे) नीचै (र्मह) त्युच्चैः प्रायो (भूम्न्यद्रुते) शनैः।
सना(नित्ये)बहि(र्बाह्ये)स्मा(तीते)ऽस्त(मदर्शने)॥१७॥

अल्प इति–नीचैरित्येकं अल्पे अल्पार्थे स्यात्। निचीयते, निपूर्वकाच्चिनोतेः कर्मणि "नौ दीर्घश्च" इति डैसि प्रत्यये, दीर्घे च नीचैः यथा 'तथापि नीचैर्विनयाददृश्यत' इत्येकमल्पस्य। उच्चैरित्येकं महति महत्त्वार्थे स्यात्। उच्चीयते, उत्पूर्वाच्चिनोतेः कर्मणि "उदिचेर्डैसिः" इति डैसौ, चुत्वे, चर्त्वे च उच्चैः यथा "उच्चैरधः पातिपयोमुचोऽपि समूहमूहुः पयसां प्रणाल्यः" इत्येकमुन्नतार्थस्य। प्रायः इत्येकं भूम्नि बाहुल्यार्थे स्यात्। प्रायणम्, प्रपूर्वादयतेर्भावे असुनि प्रायः। यथा "प्रायः साहसिकाः स्त्रियः" इत्येकं बाहुल्यार्थस्य। शनैरित्येकमद्रुते अशीघ्रार्थे स्यात्। शणाति, शानयति वा शणतेः शानयतेर्वा कर्तरि 'ऐस्' प्रत्यये पृषोदरादित्वाणस्यनत्वे ह्रस्वे वा शनैः यथा "शनैरनीयन्त रयात्पतन्तोरथाः क्षितिं हस्तिनखादखेदैः" इत्येकमद्रुतार्थस्य। सना इत्येकं नित्ये नित्यार्थके स्यात्। केचित्तु सना, सनात्, सनदिति नामत्रयं नित्यार्थकमाहुः। सनति, सनतेः कर्तरि बाहुलकादाप्रत्यये सना यथा "सनातनोऽयं पुरुषः पुराणः" आत्प्रत्ययेतु सनात् "सनात्नमस्ये चरणौ मुरारेः" अति प्रत्यये तु सनत् "सनत्कुमारो वचनं बभाषे" इत्येकं नित्यार्थकस्य। बहिरित्येकं बाह्ये बाह्यार्थके स्यात्। वहति, वहेः कर्तरि बाहुलकादिसि प्रत्यये, बवयोरभेदाद्धत्वे च बहिः यथा "बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः" इत्येकं बाह्यार्थस्य। स्मेत्येकं अतीते व्यतीतार्थके स्यात्। स्यति, स्यतेः कर्तरि बाहुलकाड्डाप्रत्यये, टिलोपे च स्मयते इति विग्रहे तु "स्मिडो डः" इति डप्रत्यये वा स्म यथा "शीतालुः सलिलगतेन सिच्यते स्म" इत्येकमतीतार्थकस्य। अस्तमित्येकम्, अदर्शने दर्शनाभावे स्यात्। असनम्, अस्यतेर्भावे बाहुलकात्तमि प्रत्यये, निष्ठा प्रत्यये वा मान्तत्वे निपातिते च अस्तम् यथा "उद्यनि विततोर्ध्वरश्मिरज्जावहिमरुचौहिमधाम्नि याति चास्तम्" इत्येकमदर्शनस्य॥१७॥

सत्ता, कोपोक्ति प्रश्न, सान्त्वन, तर्क, रात्रिविराम, नमस्कार.

अस्ति (सत्त्वे) (रुषोक्तावू)मु (प्रश्ने) (ऽनुनये) त्वयि ।
हुं (तर्के) स्यादुषा (रात्रेरवसाने) नमो (नतौ) ॥ १८ ॥

अस्तिति—सत्त्वे सत्तायां विद्यमानतायां वा अस्तीत्येकं स्यात् । असनम्, असतेर्भावे क्तिचि, तौ वा 'अस्ति' "अस्त्याह (शब्दौ) कालसामान्ये तिङन्तप्रतिरूपकौ" (इति त्रिकाण्डशेषः) यथा "मित्रमस्तिधनं कृष्णां पश्येत्याह प्रिया पतिम्" इत्येकं सत्तायाः । रुषा क्रोधेन उक्तौ वचने ऊमित्येकं स्यात् । ऊय्यते, ऊयतेः कर्मणि मुकि प्रत्यये, यल्लोपे च 'ऊम्' यथा "ऊमागतोऽहं शत्रुस्ते पौरुषं दर्शयाशु मे" इत्येकं कोपवचनस्य । प्रश्ने पृच्छायां रुषा प्रश्ने वा उमित्येकं स्यात् । अवनम्, उङो भावे बाहुलकाड्डुमि प्रत्यये, डित्त्वाट्टिलोपे च 'उम्' यथा "उं गच्छसि बहिर्यंव" इत्येकं पृच्छायाः । अनुनये सान्त्वने तु अयीत्येकं स्यात् । ईयते, अय्यते वा एतेरयतेर्वा "सर्वधातुभ्य इन्" इतीनि प्रत्यये 'अयि' यथा "अयि विजहीहि दृढोपगूहनम्" अयतेर्बाहुलकादे प्रत्यये तु 'अये' इत्यपि स्यात् । यथा "माकुरु मानिनि मानमये" इत्येकमनुनयस्य । तर्के ऊहे हुमित्येकं स्यात् । हवनम्, जुहोतेर्भावे बाहुलकाड्डुमि प्रत्यये 'हुम्' यथा 'हुं रामो भरतो हुं च' इत्येकं तर्कस्य । रात्रेर्निशाया अवसाने विरामे 'उषा' इत्येकं स्यात् । ओषति, उषेः कर्तरि बाहुलकात्का प्रत्यये कित्त्वाद्गुणाभावे च उषा, असि प्रत्यये तु उषोऽपि "उषा स्याद्रजनीशेषे 'उषः' इत्यपि दृश्यते" (इति रभसः) यथा 'उषातनो वाति वायुः' इत्येकं रजनीशेषस्य । नतौ नमस्कारे नम इत्येकं स्यात् । नमनम्, नमतेर्भावे असुनि प्रत्यये 'नमः' यथा "नमो ब्रह्मण्यदेवाय" इत्येकं नमनस्य ॥ १८ ॥

पुनरर्थक, निन्दार्थक, प्रशसार्थक, सायकालार्थक, प्रभातार्थक, समीपार्थक.

(पुनरर्थे) ऽङ्ग (निन्दायां) दुष्ठु सुष्ठु (प्रशंसने) ।
सायं (साये) प्रगे प्रातः (प्रभाते) निकषा(न्तिके) ॥ १९ ॥

पुनरिति—पुनरर्थे पुनरर्थके अङ्गेत्येकं स्यात् । अङ्गनम्, अङ्गतेर्भावे घञि, नुमागमे च अङ्ग यथा "मूर्खोऽपि नावमन्यते किमङ्ग विद्वान् किंपुनरित्यर्थ." इत्येकं पुनरर्थस्य । निन्दायां कुत्सायां 'दुष्ठु' इत्येकं स्यात् । दुः स्थानम्, दुःपूर्वकात्तिष्ठतेर्भावे "अपदुः सुपुस्थः" इति कुप्रत्यये, आलोपे, सुषमादित्वात्षत्वे च दुष्ठु-यथा "दुष्ठु खलु त्वम्" इत्येकं निन्दायाः । प्रशंसने प्रशंसायां सुष्ठु इत्येकं स्यात् । सुस्थानम्, सुपूर्वकात्तिष्ठतेर्भावे कौ, आलोपे, षत्वे च सुष्ठु यथा "सुष्ठु काव्यं त्वया कृतम्" इत्येकं प्रशंसाया. । साये दिनान्ते सायमित्येकं स्यात् । सानम्, स्यतेर्भावे बाहुलकाण्णमि प्रत्यये, युगागमे च सायम् यथा "सायं सन्ध्यामुपासिष्ये" इत्येकं दिनान्तस्या ।

प्रभाते प्रातःकाले प्रगे, प्रातरित्युभे स्याताम् । प्रगीयते, अत्रेति वा प्रपूर्वकाद्गायतेः कर्मण्यधिकरणे वा बाहुलकात्के, आलोपे, कप्रत्ययेतु " सायंचिरम् " इति सूत्रे अनव्ययस्य प्रगशब्दस्यैत्त्वे निपातिते वा प्रगे यथा " इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथतोरणाद्बहिः " प्रातति, प्रपूर्वकादततेः कर्तरि " प्रादततेररन् " इत्यरनि, प्रातः यथा " रेवतीरमणो रामः प्रातरत्र समागतः " इति द्वे प्रभातस्य । अन्तिके निकटे निकषेत्येकं स्यात् । निकषणम्, निपूर्वकात्कषतेर्भावे " आसमिण्निकपिभ्या मिति " आप्रत्यये निकषा "निकषा पत्तनं नदी वहति" इत्येकं समीपस्य॥ १६ ॥

पूर्वगतं, पूर्वपूर्व गत,वर्तमानवर्ष, आजदिन, पूर्वगत दिनादि·

परुत्परार्यैषमो (ऽब्दे पूर्वे पूर्वतरे यति) ।
अद्य (त्राह्न्य) थ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥२०॥
तथाधरान्यान्यतरेतरात्पूर्वेद्युरादयः ।

पेति—पूर्वे अब्दे वत्सरे, पूर्वतरे वर्षे, यति गच्छति वर्तमाने वर्षे च परुत्—परारि—ऐषमश्चैते त्रयः शब्दाः क्रमेण भवन्ति । पूर्वस्मिन् वत्सरे, "उदारी च संवत्सरे" इति उति प्रत्यये विभक्तिलोपे " पूर्वपूर्वतरयोः परः " इति पूर्वस्य परादेशे, निपातनादलोपे च परुत् । यथा " परुन्नागतः कामिनीं कान्तकोऽसौ " एवं पूर्वतरे वत्सरे, " सद्यः परुदिति " आरिप्रत्यये, परादेशे च परारि " परारिनागतं कृष्णो राधां वाधाहरी प्रियाम् " । अस्मिन्संवत्सरे, " सद्यः परुदिति " समसप्रत्यये, इदम इशादेशे, वृद्धौ च ऐषमः " ऐषमो भगवानिन्द्रो भूरिवृष्टिं करिष्यति " इतित्रीणि पूर्वादिवत्सरस्य । अत्रास्मिन् अहनि दिवसेऽर्थे अद्येत्येकं स्यात् । अस्मिन्नहनि, " सद्यःपरुदिति " इदमोद्ये प्रत्यये, अशादेशे निपातिते च अद्य " अद्यापि सेनातुरगाः सवित्रसमयैरलूनपक्षा इव मेनिरे जनैः " इत्येकमस्य दिनस्य । अथेत्यनन्तरम् पूर्वोत्तरापरात् तथा अधरान्यान्यतरेतराच्च ' पूर्वेऽह्नि ' इत्यादावर्थे पूर्वेद्युरादयः शब्दा भवन्ति । आदिना ' उत्तरेऽह्नि, अपरेऽह्नि, अन्यस्मिन्नह्नि, अन्यतरस्मिन्नह्नि, इतरस्मिन्नह्नि । द्वितीयेनादि शब्देन उत्तरेद्युः, अपरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युरित्यादयः शब्दाः सिध्यन्ति । पूर्वस्मिन्नहनि, " सद्यः परुदिति " पूर्वशब्दादेद्युसि प्रत्यये, अलोपे निपातिते च पूर्वेद्युः " पूर्वेद्युरिष्यतेप्रातः पूर्वेद्युः पूर्ववासरे " (इति रुद्रः) यथा " पूर्वेद्युः प्राह पितरं पूर्णानन्दः परेश्वरः" । उत्तरेऽहनि, उत्तरशब्दादेद्युसि, अलोपे च उत्तरेद्युः "नान्दीमुखादुत्तरेद्युर्विवाहः परिकीर्तितः " । अपरेऽहनि, अपरशब्दादेद्युसि, अलोपे च अपरेद्युः " अपरेद्युर्गमिष्यामि मथुरां माधवप्रियाम् " अधरेऽहनि, अधरशब्दादेद्युसि, अलोपे च अधरेद्युः ‡ " अधरेद्युरधोगत्वा नागनाथं ददर्श सः " । अन्यस्मिन्नहनि अन्यशब्दादेद्युसि, अलोपे च अन्येद्युः " अन्येद्युरात्मानुचरस्य भावम् " । अन्यतर-

‡ " अधरस्तु पुमानोष्ठे हीनेऽन्यर्थे च वाच्यवदिति " (कोशान्तरम) ॥

स्मिन्नहनि " सद्यः परुदि " त्यादिना निपातिते अन्यतरेद्युः " दृष्ट्वात्वन्यतरेद्युर्मामानन्दुर्मुनयोमला: " इतरस्मिन्नहनि, इतरशब्दादेद्युसि इतरेद्युः " इतरेद्युर्निरीक्षेहमीशानंपार्वतीप्रियम् " इत्येकैकं क्रमेण ॥ २० ॥

दोनो दिन, पर दिन. **उभयद्युश्चोभयेद्युः (परेत्वह्नि) परेद्यवि ॥ २१ ॥**

उभेति—उभयद्यु., उभयेद्युश्चेत्युभौ उभयदिवसवाचकौ स्याताम् । उभयस्मिन्नहनि, " द्युश्चोभयाद्वक्तव्यः " इत्युभयशब्दाद् द्युसि प्रत्यये, विभक्तिलोपे च उभयद्युः । यथा " उभयद्युरमानाथपादकञ्जं भजाम्यहम् " । एवं " सद्यःपरुदिति " 'एद्युसि' प्रत्यये, अल्लोपे च उभयेद्यु । यथा "उभयेद्युर्भजे रामं ससीतं लक्ष्मणानुगम्" इति द्वे उभयदिवसस्य । परे अह्नि परदिने तु परेद्यवीत्येकं स्यात् । परस्मिन्नहनि, " सद्यः परुदिति " परशब्दादेद्यवि प्रत्यये, अलोपे निपातिते च ' परेद्यवि ' यथा ' मित्रं दृष्टं परेद्यवि ' इत्येकं परदिवसस्य ॥ २१ ॥

गयादिन, आने वाला दिन, परसों, उसीसमय, एकसमय, सर्व समय. **ह्यो (ऽतीते) (ऽनागतेऽह्नि) श्वः परश्वश्च (परेऽहनि) तदा तदानीं युगपदेकदा सर्वदा सदा ॥ २२ ॥**

ह्यसिति—अतीते व्यतीते अह्नि दिवसे ' ह्यः ' स्यात् । यातमहो, ह्यः ' पृषोदरादित्वात्साधुः' । "एषमोह्यःश्वसोऽन्यतरस्यामिति" निर्देशश्चात्रानुकूल. । यथा "ह्योऽभवत्त्वत्पुत्रः " इत्येकमतीतदिनस्य । अनागते आगामिनि अह्नि दिवसे ' श्वः ' स्यात् । आगामि अहः श्वः पृषोदरादित्वात्साधुः । यथा ' श्वोभविता राज्यभारो रामस्य ' इत्येकमागामिदिनस्य। परे अहनि परदिवसे परश्वः स्यात् । परंच तच् श्वश्च, । श्वःपरं वा राजदन्तादित्वात्परनिपातिते च परश्वः । यथा " रामः परश्वः समुपेष्यते माम् " इत्येकं परदिवसस्य । तदा—तदानीमिति द्वे तत्काले स्याताम् । तस्मिन्काले तच्छब्दात् " तदोदाच " इति दा प्रत्यये, त्यदाद्यत्वे, पररूपत्वे च तदा यथा ' तदा चक्षुष्मतां प्रीतिः " दानीम्प्रत्ययेतु तदानीम् । यथा ' यदा स्याद्राधयासंगस्तदानीमेव मे सुखम् " इति द्वे तत्कालस्य । युगपत्—एकदाचेत्युभे एककाले स्याताम् । युवन्त्यस्मिन्काले, यौतेराधारे ' गपतकि ' प्रत्यये । युगं पयतेऽस्मिन्निति विग्रहे तु युगपूर्वकात्पयतेराधारे ' डति ' प्रत्यये वा युगपत् "उदयाद्रिमूर्ध्नियुगपच्चकासतोः" एकस्मिन्काले, एकशब्दात् " सर्वैकान्येति " दा प्रत्यये एकदा " एकदा भगवान्व्यासो वासुदेवं ददर्शह " इति द्वे एकसमयस्य । सर्वदा—सदा चेत्युभे सर्वकाले स्याताम् । सर्वस्मिन्काले, सर्वशब्दात् " सर्वैकान्येति" दा प्रत्यये सर्वदा यथा "तैरस्मान्रक्ष सर्वदा"। " सर्वस्य सोन्यतरस्यामिति " सर्वस्य सादेशे च सदा, यथा " याचन्ते याचका सदा " इति द्वे सर्वकालस्य ॥ २२ ॥

अब या इस समय–पूर्व, उत्तर, पश्चिम.

एतर्हि संप्रतीदानीमधुनासाम्प्रतं तथा ।
(दिग्देशकालेपूर्वादौ) प्रागुदक्प्रत्यगादयः ॥ २३ ॥

इत्यव्ययवर्गः ॥

अयिति–एतर्हि–संप्रति–इदानीम्–अधुना–तथा साम्प्रतम् एते पञ्च अस्मिन्काले स्युः । अस्मिन् काले, इदम् शब्दाद् " इदमोर्हिल् " इति हिलि प्रत्यये, विभक्तिलोपे " एतेतौरथोः " इत्येतादेशे च एतर्हि यथा " एतर्हि क्रियते कार्यम् " । सम् च प्रति चानयोः समाहारद्वन्द्वे संप्रति यथा " हरत्यघं संप्रति हेतुरेष्यतः " । अस्मिन्काले, इदम् शब्दाद् " दानींचेति " दानी प्रत्यये, विभक्तिलोपे, इशादेशे च इदानीम् यथा " इदानीं नास्ति ते भयम् " । "अधुना" इत्यधुना प्रत्ययेतु विभक्तिलोपे, इशादेशे, " यस्येति " इलोपे च अधुना यथा "नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् । विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः " । एवं सम् च प्रतिचानयोः समाहार-द्वन्द्वे-तस्मात् " प्रज्ञादयण् " इत्यणि, वृद्धौ, गणे पाठान्मान्तत्वे निपातिते च सांप्रतम् यथा " मानिनीमानविध्वंसदक्षो जयति सांप्रतम् " इति पञ्चास्य कालस्य । पूर्वः आदिर्यस्मिंस्तस्मिन्पूर्वादौ दिग्देशकाले वाच्ये सति प्रागुदक्प्रत्यगादयः शब्दाः स्युः । प्राच्यांदिशि, प्राच्यादिशः, प्राची दिग् वा । प्राचिदेशे काले च, प्राचोदेशात्, कालाच्च । प्राची शब्दात्प्राक् शब्दाद्वा " दिक्शब्देभ्यः सप्तमी–पञ्चमी–प्रथमाभ्यो दिग्देशकालेष्वस्तातिः " इत्यस्तातौ, " अञ्चेर्लुक् " इत्यस्तातेर्लुकि, " लुक्तद्धितलुकि " इति स्त्रीप्रत्ययस्य लुकि च प्राक् "प्रागेव विद्यमानत्वान्न तेषामिह संभवः " एवम् उदीच्याम्, उदीच्याः, उदीची दिक् वा उदक् । प्रतीच्याम्, प्रतीच्याः, प्रतीचीदिग्वा प्रत्यक्, पूर्वादावित्यादिपदनोत्तर–दक्षिणाऽवरादीनां ग्रहः । ' प्रत्यगादयः ' इत्यादिशब्देन 'उत्तरात्' ' अधरात्, दक्षिणात्, उत्तरेण, अधरेण, दक्षिणेन, दक्षिणा, दक्षिणाहि, दक्षिणतः, उत्तरतः इत्यादयोबोध्याः । उत्तरादिक्, उत्तराशब्दाद् " उत्तराधरदक्षिणादातिः " इत्यातौ, उत्तरात् " उत्तरा त्सुगतो योगी जटाधारी दिगम्बरः " अधरो-देशः, अधरशब्दादाति प्रत्यये अधरात् " अधरात्तु गमिष्यामि " दक्षिणस्यां दिशि, दक्षिणाशब्दादातौ, आलोपे च दक्षिणात् " दक्षिणात्तु ययौ देवः " उत्तरस्यांदिश्यदूरम्, उत्तराशब्दात् " एनबन्यतरस्यामदूरेऽपञ्चम्याः " इत्येनपि, आलोपे च उत्तरेण " उत्तरेण गतो रामः " अधरस्यां दिश्यदूरम्, अधराशब्दादेनपि, आलोपे च अधरेण " अधरेण नदी वहति " दक्षिणस्यां दिश्यदूरम्, दक्षिणाशब्दादेनपि, आलोपे च दक्षिणेन " दक्षिणेन शिवानाथो रमानाथं ददर्श ह " दक्षिणस्यां दिशि दूरम्, दक्षिणाशब्दात् " दक्षिणादाच् " इत्याचि दक्षिणा " दक्षिणा दुर्जना यन्ति " एव-माहि प्रत्यये दक्षिणाहि " दक्षिणाहि वसन्त्यत्र श्वपाकाः पापकारिणः " दक्षिणस्यां दिशि, दक्षिणाशब्दात् " दक्षिणोत्तराभ्यामतसुच् " इत्यतसुचि, दक्षिणतः " ययौ

दक्षिणात:खलः " एवमुत्तरस्यां दिशि, अतसुचि प्रत्यये, आलोपे च उत्तरत: "शिवो-द्युत्तरतो नित्यं विजह्रे शिवया सह " ऊर्ध्वदेशे, " उपर्युपरिष्टात् " इत्यूर्ध्वशब्दाद्रिल्प्रत्यये, ऊर्ध्वस्योपादेशे च उपरि " ग्रामस्योपरि पक्षिण: पतन्ति " एवं रिष्टातिलप्रत्यये उपरिष्टात् " उपरिष्टान्नारदोभ्यागात् " अधरस्यां दिशि, अस्तातिप्रत्यये, अधादेशे च अधस्तादित्यादयोवगन्तव्या इति ॥ २३ ॥

इत्यव्ययवर्ग: ॥

अथ लिङ्गादिसंग्रहवर्गो व्याख्यायते ।

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहे लिङ्गं संकीर्णवदिहोन्नयेत् ॥ १ ॥

सलिङ्गेति—सलिङ्गशास्त्रैः लिङ्गबोधकानि तानि शास्त्राणि लिङ्गशास्त्राणि "शाकपार्थिवादित्वान्मध्यमपदलोप: " । लिङ्गशास्त्रैःसहिता:सलिङ्गशास्त्रास्तैर्लिङ्गानुशासनसहितैः सन्नादिर्येषामितिसन्नादयश्च कृतश्च तद्धिताश्च समासाश्चतेभ्योजायन्ते येतैरिति । ' सन्नादिप्रत्ययजैः ' चिकीर्षा, लोलूया, कण्डूया, पुत्रकाम्येत्यादिभिः । ' कृत्प्रत्ययजैः ' क्तिन्नाद्यन्तैः, भूतिः, इष्टिः, कृतिः, स्मृतिरित्यादिभिः । ' तद्धितप्रत्ययजैः, अणाद्यन्तैः औपगवः, औपगवी, गार्ग्यः, गार्गीत्यादिभिः । समासजैः, समासप्रयुक्तलिङ्गभाग्भिः संज्ञापरिभाषम्, बदरामलकमित्यादिभिः । अनुक्तैः प्रागनुक्तैः शब्दैः संग्रहः क्रियतइति शेषः । इहास्मिन्संग्रहे लिङ्गसंग्रहवर्गे लिङ्गं संकीर्णवत् संकीर्णवर्गवत् उन्नयेत्तर्कयेदिति·(अस्यायंभाव:) संकीर्णवर्गे यथा प्रकृतिप्रत्ययाद्यर्थैर्लिङ्गोहनमनुक्तलिङ्गशब्दविषयम्—तथात्रापि सलिङ्गशास्त्रादिभिर्लिङ्गोहनमनुक्तलिङ्गशब्दविषयं बोध्यम् । तत्र प्रकृत्या यथा " अर्धर्चाः पुंसि च " अर्धर्चः, अर्धर्चमित्यादि । प्रत्ययेन " स्त्रियांक्तिन् " " पुंसि संज्ञायां घः " " नपुंसके भावे क्तः " इत्यादिभिः । प्रकृतिप्रत्ययाद्यर्थैरित्यादिशब्देन क्रियाविशेषणानां क्लीबत्वमेकवचनान्तत्वं च ज्ञेयम् । तेन " सुखं सुष्वाप पिङ्गला " इत्यादिसिद्धम् । नन्वत्रकृत्प्रत्ययजैरित्यनयैवोक्त्या चिकीर्षा,पुत्रकाम्येत्यादीनामपिसंग्रहे सिद्धे पृथक्सन्नादिपदोपादानं किमर्थमितिचेत् ? गोबलीवर्दन्यायेन, ब्राह्मणवसिष्ठन्यायेन वा प्राधान्यसूचनार्थमिति बोध्यम् ॥ १ ॥

लिङ्गशेषविधि, ईदन्त—ऊदन्त—एकस्वर—भगान्त प्राणिनाम. **लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।**
स्त्रियामीदूद्विरामैकाच्सयोनिप्राणिनाम च ॥ २ ॥

लिङ्गेति—लिङ्ग्यन्ते चिह्न्यन्ते ज्ञायन्ते पुंस्त्रीनपुंसकतया शब्दा अनेनेति लिङ्गम्—तस्य शेषोऽवशेषस्तस्यविधिः यदि विशेषैरत्रोक्तैः प्रागुक्तैश्च अबाधितो बाधितो न भवति तदा व्याप्नोतीति व्यापी काण्डत्रयस्य व्यापकः स्यात् । उत्सर्गत्वात् " अपत्रा-

दविपर्यं विहायोत्सर्गः सर्वत्र प्रवर्तत" इति । स्त्रियामित्यधिक्रियते—ईच ऊच तौ विरामे विरामावन्तौ वा यस्य तच्च तदेकाच्च स्त्रियां स्यात् । यथा श्रीः, धीः, ह्रीः, भ्रूः, सूः, द्रूः, जूः, लवनं लूः, भवनं भूः । "नयतीति नीः, लुनातीति लूः" इत्यादौ तु परत्वात् "कृतः कर्तरि" इति वाच्यलिङ्गता भवति । योनिर्भगं तत्सहितानां प्राणिनां नाम च स्त्रियां स्यात् । यथा माता, दुहिता, याता, पोता, ननान्दा, स्त्री "दाराः पुंभूम्नीति" विशेषोऽत्रगम्यते ॥ २ ॥

विजली आदि. अदन्त शब्दों के साथ द्विगुसमास, पात्राद्यदन्त का निषेध.

नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम् ।
अदन्तैर्द्विगुरेकार्थो न स पात्रयुगादिभिः ॥ ३ ॥

नामेति—विद्युदादीनामष्टानां नाम स्त्रियां स्यात् । विद्युत्=तडित् । निशा=रात्रिः, रजनिः । वल्ली=वीरुत् । वीणा=विपञ्ची, इत्यादौ 'ङयाबूङन्तम्' इति सिद्धे वीणाग्रहणं चिन्त्यम् । केचित्तु वीणास्थाने वाणीं पठन्ति । वाक्, गौः, गीः । दिक्, हरित् । भूः, भूमिः कुः । सरित्, विपाट् । ह्री ग्रहणं चिन्त्यम् । "ईदूद्विरामैकाच्" इति—अपादौ "ङयाबूङन्तम्" इति च सिद्धत्वात् । "कचित्तु धियामिति पठन्ति" । संविद्, चित्, प्रतिपदित्यादि । एकोऽर्थो यस्येति एकार्थः "द्विगुरेकवचन" मित्यनेन समाहारे एकत्वविधानात् । अदन्तैरुत्तरपदैः सह यो द्विगुः स स्त्रियां स्यात् । यथा दशानां मूलानां समाहारो दशमूली, त्रयाणां लोकानां समाहारस्त्रिलोकी, पञ्चाक्षराणां समाहारः पञ्चाक्षरी । 'अदन्तैः किम्' । पञ्चकुमारि, दशधेनु । 'एकार्थः किम्' । पञ्चकपालः, पञ्चकपालौ । पञ्चकपालाः । पात्रयुगादिभिरदन्तैर्यो द्विगुः स स्त्रियां न स्यात् । यथा पञ्चपात्रम्, चतुर्युगम्, त्रिभुवनम्, त्रिपुरम् । भाष्ये तु त्रिपुरीत्येव दृश्यते ॥ ३ ॥

भावाद्यर्थक, समूहार्थक, वैर मैथुनिकाद्यर्थक, स्त्रीभावाद्यर्थक.

तल् (वृन्दे) येनिकट्यत्रा वैरमैथुनिकादिवुन् ।
(स्त्रीभावादाव)निक्तिण्ण्वुल्णच्ण्वुक्यब्युजिञङ्निशाः ४

तलिति—भावादौ विहितं तलन्तं स्त्रियां स्यात् । शुक्लस्य भावः, शुक्लता । ग्रामाणां समूहो, ग्रामता । गवां समूहो, गोता । ब्राह्मणस्य कर्म, ब्राह्मणता । वृन्दे समूहे यश्च इनिकट्यत्राश्च तदन्तं स्त्रियां स्यात् । पाशानां समूहः, पाश्या । खलानां समूहः, खलिनी । शाकानां समूहः, शाकिनी । रथानां समूहो, रथकट्या । गवां समूहो, गोत्रा । वृन्दे किम् । मुखे भवो, मुख्यः । दण्डोऽस्यास्तीति, दण्डी । "द्वन्द्वाद्वुन्वैरमैथुनिकयोः" इति वुनि, अकादेशे च अश्वश्च महिषश्च तयोर्वैरम्, अश्वमहिषिका । काकश्च उलूकश्च तयोर्वैरम्, काकोलूकिका । अत्रिश्च भरद्वाजश्च तयोर्मैथुनिका, अत्रिभरद्वाजिका । कुत्सश्च कुशि-

कश्च तयोर्मैथुनिका=कुत्सकुशिकिका । आदिना " पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च" । "दण्डव्यवसर्गयोश्च" इति वुनो ग्रहणम् । वीप्सायां द्वौ द्वौ पादौ ददाति, द्विपदिकां ददाति । द्वे द्वे शते ददाति, द्विशतिकां ददाति । दण्डे-द्वौपादौ दण्डितः, द्विपदिकाम् । द्विशतिकां व्यवसृजति ददातीत्यर्थः । वैरेत्यादि किम् । " वासुदेवार्जुनाभ्यां वुन् " वासुदेवोभक्तिरस्य वासुदेवकः । वुनो ग्रहणं ' वुञ ' उपलक्षणम् । " क्वचिद्वुरितिपाठः " " गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु " वुञ् । गार्गिकया श्लाघते । काठिकया विकत्थते । " द्वन्द्वमनोज्ञादिभ्यश्च " वुञ् शिष्यश्च उपाध्यायश्च तयोर्भावः, शैष्योपाध्यायिका । स्त्रियांभावादिस्तस्मिन् । स्त्रियामित्यधिकारे अकर्तरि कारके च, ये अन्यादयः प्रत्ययास्तदन्तं स्त्रियां स्यात् । " आक्रोशे नञ्यनिः " न करणम्, अकरणिः । न जीवनम्, अजीवनिस्ते शठ ! भूयात् । " स्त्रियां क्तिन् " करणं, कृतिः । भवनं, भूतिः । ' ण्वु ' इति ण्वुल्-ण्वुचोः सामान्यग्रहणम् । "रोगाख्यायां ण्वुल् बहुलम् " प्रच्छर्दनम्, प्रच्छर्दिका । प्रवहणम्, प्रवाहिका । " धात्वर्थनिर्देशे ण्वुलवक्तव्यः " आसनम्, आसिका । शयनम्, शायिका । " पर्यायार्हर्णोत्पत्तिषु ण्वुच् " इति ण्वुचि । भवतः शायिका । भवानिक्षुभक्षिकामर्हति । "कर्मव्यतिहारे णच् स्त्रियाम् । इति णच्-तदन्तात् " णचः स्त्रियामञ् " अञन्तत्वाट्टिड्ढेति ङीप् । व्यवक्रोशनम्, व्यावक्रोशी । व्यवहसनं व्यावहासी । व्यत्युक्षणं व्यात्युक्षी । " व्रजयजोर्भावे क्यप् " व्रजनं, व्रज्या । यजनम्, इज्या । " संज्ञायां समजनिषद्–" इति क्यपि । समजन्त्यस्यामिति समज्या=सभा । निषीदन्त्यस्यामिति निषद्या=आपणः । विदन्त्यनयेति विद्या । स्त्रीभावादौ किम् । "वदः सुपि क्यप् च" ब्रह्मणो वदनं, ब्रह्मोद्यम् । " भुवो भावे " इति क्यप् । ब्रह्मणो भवनं, ब्रह्मभूयम् । " ण्यासश्रन्थोयुच् " इति युचि, कारणं, कारणा । कामनं, कामना । " विभाषाख्यानपरिप्रश्नयोरिञ्च " । का त्वं कारिं गरिण वाकार्षीः ? सर्वां कारिं गरिण वाकार्षम् । " षिद्भिदादिभ्योऽङ् " पचनम्, पचा । त्रपणम्, त्रपा । भेदनम्, भिदा । छेदनम्, छिदा । "अ प्रत्ययात्" इत्यप्रत्यये चिकीर्षणं, चिकीर्षा । पुत्रीयणं, पुत्रीया । "गुरोश्च हलः" ईहनम्, ईहा । ऊहनम्, ऊहा । " ग्लाम्लाज्याहाभ्यो निः " ग्लानम्, ग्लानिः । म्लानम्, म्लानिः । ज्यानम्, ज्यानिः । हानम्, हानिः । " कृञः शच " करणम्, क्रिया । एषणम्, " इच्छा " इति सूत्रेण इषेः 'श' प्रत्यये इच्छा=वाञ्छेति यावत् ॥ ४ ॥

औणादिकन्यन्त, ऊदन्त, ईदन्त, ड्वन्त, आवन्त, चल, स्थिर, जिस खेल में मार पीट हो वहां ण प्रत्यय का होना.

उणादिषु निरूरीश्च ड्वाबूडन्तं चलं स्थिरम् ।

(तत्क्रीडायां प्रहरणं) चेन्मौष्टा पाल्लवा "णादिक्" ॥ ५ ॥

१-अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्मशास्त्रं पुराणं च विद्याह्येताश्चतुर्दश ॥ १ ॥

दविपर्यं विहायोत्सर्गः सर्वत्र प्रवर्तत" इति । स्त्रियामित्यधिक्रियते—ईच ऊश्च तौ विरामे विरामावन्तौ वा यस्य तच्च तदेकाच स्त्रियां स्यात् । यथा श्रीः, धीः, ह्रीः, भ्रूः, स्रूः, द्रूः, जूः, लवनं लूः, भवनं भूः । "नयतीति नीः, लुनातीति लूः" इत्यादौ तु परत्वात् "कृतः कर्तरि" इति वाच्यलिङ्गता भवति । योनिर्भगं तत्सहितानां प्राणिनां नाम च स्त्रियां स्यात् । यथा माता, दुहिता, याता, पोता, ननान्दा, स्त्री "दाराः पुंभूम्नीति" विशेषोऽत्रगम्यते ॥ २ ॥

बिजली आदि. अदन्त शब्दों के साथ द्विगुसमास, पात्राद्यदन्त का निषेध.

नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम् ।
अदन्तैर्द्विगुरेकार्थो न स पात्रयुगादिभिः ॥ ३ ॥

नामेति—विद्युदादीनामष्टानां नाम स्त्रियां स्यात् । विद्युत्=तडित् । निशा=रात्रिः, रजनिः । वल्ली=वीरुत् । वीणा=विपञ्ची, इत्यादौ 'ङ्याबूङन्तम्' इति सिद्धे वीणाग्रहणं चिन्त्यम् । केचित्तु वीणास्थाने वाणीं पठन्ति । वाक्, गौः, गीः । दिक्, हरित् । भूः, भूमिः कुः । सरित्, विपाट् । ह्री ग्रहणं चिन्त्यम् । "ईदूद्विरामैकाच्" इति—त्रपादौ "ङ्याबूङन्तम्" इति च सिद्धत्वात् । "कचित्तु धियामिति पठन्ति" । संवित्, चित्, प्रतिपदित्यादि । एकोऽर्थो यस्येति एकार्थः "द्विगुरेकवचन" मित्यनेन समाहारे एकत्वविधानात् । अदन्तैरुत्तरपदैः सह यो द्विगुः स स्त्रियां स्यात् । यथा दशानां मूलानां समाहारो दशमूली, त्रयाणां लोकानां समाहारस्त्रिलोकी, पञ्चाक्षराणां समाहारः पञ्चाक्षरी । 'अदन्तैः किम्' । पञ्चकुमारि, दशधेनु । 'एकार्थः किम्' । पञ्चकपालः, पञ्चकपालौ । पञ्चकपालाः । पात्रयुगादिभिरदन्तैर्यो द्विगुः स स्त्रियां न स्यात् । यथा पञ्चपात्रम्, चतुर्युगम्, त्रिभुवनम्, त्रिपुरम् । भाष्ये तु त्रिपुरीत्येव दृश्यते ॥ ३ ॥

भावाद्यर्थक, समूहार्थक, वैर मैथुनिकाद्यर्थक, स्त्रीभावाद्यर्थक.

तल् (वृन्दे) येनिकट्यत्रा वैरमैथुनिकादिवुन् ।
(स्त्रीभावादाव)निक्तिण्ण्वुल्णच्ण्वुक्यब्युजिञ्ङ्निशाः ॥ ४

तलिति—भावादौ विहितं तलन्तं स्त्रियां स्यात् । शुक्लस्य भावः, शुक्लता । ग्रामाणां समूहो, ग्रामता । गवां समूहो, गोता । ब्राह्मणस्य कर्म, ब्राह्मणता । वृन्दे समूहे यश्च इनिकट्यत्राश्च तदन्तं स्त्रियां स्यात् । पाशानां समूहः, पाश्या । खलानां समूहः, खलिनी । शाकानां समूहः, शाकिनी । रथानां समूहो, रथकट्या । गवां समूहो, गोत्रा । वृन्द किम् । मुखे भवो, मुख्यः । दण्डोऽस्यास्तीति, दण्डी । "द्वन्द्वाद्वुन्वैरमैथुनिकयोः" इति वुनि, अकादेशे च अश्वश्च महिषश्च तयोर्वैरम्, अश्वमहिषिका । काकश्च उलूकश्च तयोर्वैरम्, काकोलूकिका । अत्रिश्च भरद्वाजश्च तयोर्मैथुनिका, अत्रिभरद्वाजिका । कुत्सश्च कुशि-

कश्च तयोर्मैथुनिका=कुत्सकुशिकिका । आदिना "पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च" । "दण्डव्यवसर्गयोश्च" इति वुनो ग्रहणम् । वीप्सायां द्वौ द्वौ पादौ ददाति, द्विपदिकां ददाति । द्वे द्वे शते ददाति, द्विशतिकां ददाति । दण्ड-द्वौ पादौ दण्डितः, द्विपदिकाम् । द्विशतिकां व्यवसृजति ददातीत्यर्थः । वैरवाकिरिका । "वासुदेवार्जुनाभ्यां वुन्" वासुदेवो भक्तिरस्य वासुदेवकः । वुनो ग्रहणं 'वुन्' इत्यस्मात् । "कन्थिहारिरिति पाठः" "गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु" वुञ् । गार्गिकया श्लाघते । काठिकया विकत्थते । "द्वन्द्वमनोज्ञादिभ्यश्च" वुञ् । शिष्यश्च उपाध्यायश्च तयोर्भावः, शैष्योपाध्यायिका । स्त्रियांभावादिकमधिकृत्य । स्त्रियामित्यधिकृत्य आक्रोशे धात्वर्थे च, ये अन्यादयः प्रत्ययास्तदन्तं स्त्रियां स्यात् । "आक्रोशे नञ्यनिः" न करणम्, अकरणिः । न जीवनम्, अजीवनिस्ते शठ ! भूयात् । "स्त्रियां क्तिन्" करणं, कृतिः । भवनं, भूतिः । 'बहु' इति ग्रहणं-बहुलयोः सामान्यग्रहणम् । "रोगाख्यायां ण्वुल् बहुलम्" प्रच्छर्दनम्, प्रच्छर्दिका । प्रवाहणम्, प्रवाहिका । "धात्वर्थनिर्देशे ण्वुल् वक्तव्यः" आसनम्, आसिका । शयनम्, शायिका । "पर्यायार्हर्णोत्पत्तिषु ण्वुच्" इति ण्वुचि । भवतः शायिका । भवानिक्षुभक्षिकामर्हति । "कर्मव्यतिहारे णच् स्त्रियाम्" । इति णच्-तदन्तात् "णचः स्त्रियामञ्" इत्यञन्तत्वाद्ङीप् । व्यवक्रोशनम्, व्यावक्रोशी । व्यवहसनं व्यावहासी । व्यत्युक्षणं व्यात्युक्षी । "व्रजयजोर्भावे क्यप्" व्रजनं, व्रज्या । यजनम्, इज्या । "संज्ञायां समजनिषद-" इति क्यपि । समजन्त्यस्यामिति समज्या=सभा । निषीदन्त्यस्यामिति निषद्या=आपणः । विदन्त्यनयेति विद्या । स्त्रीभावादौ किम् । "वदः सुपि क्यप् च" ब्रह्मणो वदनं, ब्रह्मोद्यम् । "भुवो भावे" इति क्यप् । ब्रह्मणो भवनं, ब्रह्मभूयम् । "ण्यासश्रन्थो युच्" इति युचि, कारणं, कारणा । कामनं, कामना । "विभाषाख्यानपरिप्रश्नयोरिञ्च" । कां त्वं कारिं कारिकां वाकार्षीः ? सर्वां कारिं कारिकां वाकार्षम् । "षिद्भिदादिभ्योऽङ्" पचनम्, पचा । त्रपणम्, त्रपा । भेदनम्, भिदा । छेदनम्, छिदा । "अ प्रत्ययात्" इत्यप्रत्यये चिकीर्षणं, चिकीर्षा । पुत्रीयणं, पुत्रीया । "गुरोश्च हलः" ईहनम्, ईहा । ऊहनम्, ऊहा । "ग्लाम्लाज्याहाभ्यो निः" ग्लानम्, ग्लानिः । म्लानम्, म्लानिः । ज्यानम्, ज्यानिः । हानम्, हानिः । "कृञः श च" करणम्, क्रिया । एषणम्, "इच्छा" इति सूत्रेण इषेः 'श' प्रत्यये इच्छा=वाञ्छेति यावत् ॥ ४ ॥

णिणादिकन्यन्त, उदन्त, ईदन्त, इयन्त, आवन्त, चल, स्थिर, जिस खेल में मार पीट हो वहां ण प्रत्यय का होना.

उणादिषु निरूरीश्च ङ्याबूङन्तं चलं स्थिरम् ।
(तत्क्रीडायां प्रहरणं) चेन्मौष्टा पाल्लवा "णादिक्" ॥ ५ ॥

१-अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर । धर्मशास्त्र पुराण च विद्याह्येताश्चतुर्दश ॥ १ ॥

उणेति—उणादिषु उणादौ निरूरीश्च न्यन्तम्, ऊदन्तम्, ईदन्तं च स्त्रियां स्यात् । यथा " वीज्याज्वरिभ्यो निः " नि प्रत्यये, बाहुलकाण्णत्वे च वेणिः " वेणिः स्यात्केशविन्यासः प्रवेणिश्च स्त्रियामुभे " (इति कोषान्तरम्) ज्यानिः, जूर्णिः । " सृवृषिभ्यां कित् " सृणिरङ्कुशः । " वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्योनित् " श्रेणिः=पङ्क्तिः । श्रोणिः=कटिः । द्रोणिः=जलसेचिनी । " अनिरिति पाठान्तरम् " । " अर्तिसृधृधम्यश्यवितृभ्योऽनिः " अनिप्रत्यये धरणिः=पृथ्वी । धमनिः=नाड़ी । सरणिः=पद्धतिः । " कृषिचमितनिधनिसर्जिखर्जिभ्यऊः " कर्षूः " कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यांस्त्रियां मता " चमूः=सेना । " अवितृस्तृतन्त्रिभ्य ईः " अवीर्नारीरजस्वला । तरीर्नौः । स्तरीर्धूमः । तन्त्री वीणादेर्गुणः । ङीच आप्च ऊङ्च अन्ते यस्य तत् ङ्याबूङन्तं स्त्रियां स्यात् । कदली " कदली हरिणान्तरे । रम्भायां वैजयन्त्यां च (इति हैमः) कन्दली " कलध्वनौ कन्दली तु मृगगुल्मप्रभेदयोः " (इति मेदिनी) रमा=लक्ष्मीः । गङ्गा[1]=देवनदी । वामोरूः । करभोरूः । चलं जंगमं स्थिरं स्थावरं च स्त्रियां स्यात् । चले यथा नारी, शिवा, ब्रह्मवधूः । स्थावरे नाडी, खट्वा, अलाबूः । चरस्थिरग्रहणं चिन्त्यप्रयोजनम् । अन्यस्य व्यवच्छेद्यस्याभावात् । तत्प्रहरणं क्रीडायांचेत्तदा मौष्टा—पाल्लवा च स्यात् । " तदस्यां प्रहरणमिति क्रीडायां णः " इति 'ण' प्रत्यये, मुष्टिः प्रहरणमस्यामिति मौष्टा । पल्लवाः प्रहरणमस्यामिति पाल्लवा । इति णस्य दिगुदाहरणम् । नतु परिगणनम् । तेन मुसलप्रहरणमस्यामिति मौसला । ' दण्डः प्रहरणमस्यामिति दाण्डा ' इत्यादि सिद्धम् ॥ ५ ॥

घञन्त से ञ प्रत्ययका होना, फगुई, शिकार, स्वधा.

घञो ञः सा क्रियास्यांचेद्दाण्डपाता हि फाल्गुनी ।
श्यैनंपाता 'च' मृगया तैलंपाता स्वधे (ति दिक्) ॥६॥

घञ इति—सा घञन्तपदवाच्या दण्डपातादिक्रिया, अस्यामिति सप्तम्यर्थे वर्तते चेत्तदा घञो घञन्तात् ञः प्रत्ययः स्यात् स च स्त्रियाम् । " घञः सास्यां क्रियेति ञः " घञन्तात्क्रियावाचिनः प्रथमान्तादस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे ञप्रत्ययः स्यात् । दण्डपातोऽस्यां फाल्गुन्यां वर्तते, दाण्डपाता फाल्गुनी । श्येनपातोऽस्याम् । तिलपातोऽस्यां वर्तते । उभयत्रापि " श्येनतिलस्य पाते ञे " इति मुमागमे श्यैनंपाता=मृगया । तैलंपाता=स्वधा " पितृदाने स्वधा मता " (इत्यमरमाला) वररुचिना तु " स्वधा क्रिया प्रवेणीति " स्त्रीलिङ्गोक्ता इति दिक् उदाहरणम् । 'श्येनतिलस्य' किम् । दण्डपातोऽस्यां तिथौ वर्तते इति दाण्डपाता तिथिः । मूसलपातोऽस्यां भूम्यां वर्तत इति मौसलपाता भूमिरित्यादिज्ञेयम् ॥ ६ ॥

१—" गङ्गा गङ्गेति योब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति " (इति पुराणान्तरम्) ॥

अल्पत्व विवक्षा में मृणाली आदि, लङ्का, निर्गुण्डी या नेवारी, निरन्तरव्याख्या, धवई, निश्शेष पदव्याख्या, अरहर या तोरई.

(स्त्री स्या) त्काचिन्मृणाल्यादि (र्विवक्षापचये यदि) ।

लङ्का शेफालिका टीका धातकी पञ्जिकाऽऽढकी ॥ ७ ॥

स्त्रीति—यदि अपचये अल्पत्वे विवक्षा स्यात्तदा मृणाल्यादिः क्वचित् स्त्री स्यात् । अल्पं मृणालम्, गौरादित्वान्ङीषि 'मृणाली' एवमग्रे कुटी, प्रणाली, मुरली, छत्री, पटी, मठी । कादिविशिष्टम् । एवमग्रे कुण्डः । कुण्ड—वृक्ष्यमिति सिद्धे नामानुशासनार्थो लङ्कादीनां पाठः । लङ्कादीनामनुक्तानुसारणार्थः । शेफालिकादीनां तु व्यर्थः स्वपर्यायपठितत्वात् । लङ्क्यते गुम्फ्यतेऽस्यामिति विग्रहे लङ्क—यतेश्चौरादिकाद्णिजन्ताद् "घञ्" इत्यचि, वर्णनया दृश्यमाने शिखाद्यर्थे, गुमायां तुम्यनुपपत्त्यादू वृद्ध्यभावे च लङ्कऽस्यामिति विग्रहे तु दाहुलकात्वं, अचि, नागानु-स्वारे, परसवर्णे च लङ्का "लङ्का रक्षःपुरीशाखाशाकिनीकुलटासु च" (इति मेदिनी) शेते इति विग्रहे 'शिञि' धोः 'शये फालक्ष्येति' फालि, टाप् इनि, कनि वा शेफालिका=पुष्पविशेषः । टीक्यतेऽर्थोऽनयेति टीकतेः करणे "गुरोश्च हलः" इत्यप्रत्यये, टापि च टीका "निरन्तरव्याख्या विषमपदव्याख्या च" । धातुं करोति, णिचि, टिलोपे, कनि, पिप्पल्यादित्वान्ङीषि च धातकी=धातुपुष्पिका । पिञ्ज्यतेऽर्थोऽस्यामिति "पिजि भाषार्थः" अस्माच्चौरादिकाद्णिजन्तो "गुरोश्च हलः" इत्यप्रत्यये, पृषोदरादित्वादिकारस्याकारे, स्वार्थेकनि च । पिञ्जयतीति विग्रहे तु कनि वा पञ्जिका=निश्शेषपदस्य व्याख्या । "पच्यन्ते व्यक्तीक्रियन्ते पदार्था अनयेति विग्रहे तु पञ्चिका च" आयव्ययलिखनार्था (इति मुकुटः) । आसमन्ताड्ढौकते, ढौक्यते वा 'अचि, घञि' वा पृषोदरादित्वादौकारस्याकारे, गौरादित्वान्ङीषि च आढकी "आढकी तु तुवर्यां स्त्री परिमाणान्तरे त्रिषु" (इति मेदिनी) तुवर्यां आढकी स्त्री स्यात् । परिमाणान्तरे 'त्रिषु,' भवतीति शेयम् ॥ ७ ॥

सीध, मैना, हिचकी, बनमक्खी, लूका, चींटी, तेंदुआ, किनका, भर, टेढ़ाई, सुरंग, सूजी, पत्ते का सिरा.

सिध्रका सारिका हिक्का प्राचिकोल्का पिपीलिका ।

तिन्दुकी कणिका भङ्गिः सुरङ्गासूचिमादयः ॥ ८ ॥

सिध्रेति—सेधति, सिद्ध्यते वा सिधेः कर्तरि, कर्मणि वा "स्फायितञ्चीति" रकि, स्वार्थे कनि, क्षिपकादित्वादित्वाभावे च सिध्रका 'सीध' इति प्रसिद्धो वृक्ष-

१—"पञ्चिका क्रियते लघु" (इति वोपदेवः) ॥

भेदः । सरति, सरतेः कर्तरि 'ण्वुलि' वृद्धौ, अकादेशे, टापि च सारिका । शृणाति दुःखं विरहिणीनामिति, विग्रहे तु शृणातेः कर्तरि 'ण्वुलि' शारिका तालव्यादिरपि । पक्षिभेदो "मैना" इति ख्यातो वा । हिक्कनम्, हिक्कतेर्भावे "गुरोश्च हलः" इत्यप्रत्यये—हिक्क्यते इति विग्रहे तु पचाद्यचि, टापि च हिक्का=ऊर्ध्वे वातप्रवृत्तौ शब्द विशेषः । प्राचति प्रपूर्वकाद् 'अचु गतौ' अस्मात्कर्तरि 'ण्वुलि' प्राचिका=वनमक्षिका, पक्षिभेदो वा । ओषति, ओष्यते वा "शुकवल्कोल्काः" इति कर्कि, षस्य लत्वे च उल्का=तेजः पुञ्जः । अपि पील्यते, अपि पूर्वकात् 'पील प्रतिष्टम्भे' अस्मात्कर्मणि घञि "वष्टिभागुरिरिति" अलोपे, स्वार्थे कनि, टापि च पिपीलिका । स्वामिमते तु "शनैर्याति पिपीलकः" इति पुंस्त्वमपि । तिम्यति, तिमेः कर्तरि बाहुलकादुकषि, गुणाभावे, ङीपि च तिन्दुकी=कालस्कन्धः तेंदुआ इति ख्यातो द्रुमविशेषः । कणाति, कणेः कर्तरि पचाद्यचि, स्वार्थे 'कनि' कणिका=अति सूक्ष्मम् । भङ्गस्य करणम्, "तत्करोतीति" णिजन्ताद्भावे "अचइः" इति 'इ' प्रत्यये भङ्गिः= विच्छित्तिः, कौटिल्यभेदो वा । "व्याजच्छलनिभे भङ्गिर्वैदर्भीतनमीलिका" (इति रभसः) सुबहु रज्यतेऽस्यां रजसा सुपूर्वकाद्रञ्जेराधारे "हलश्च" इति घञि, "चजोरिति" कुत्वे टापि च सुरङ्गा=तिर्यग्भूखातः । सूच्यतेऽनया, 'सूच पैशुन्ये' अस्माच्चौरादिकात्करणे "अचइः" इतीप्रत्यये सूचिः । "स्त्री सूचिर्नृत्यभेदे च व्यधनी शिखयोरपि" (इति रत्नकोषः) । मंहनम्, मह्यतेऽनयेति वा महतेर्भावे साधने वा क्तिनि, ढत्वे, धत्वे, ष्टुत्वे, ढलोपे, दीर्घे च माढिः "माढिः पत्रशिरा" (इति रत्नकोषः) "माढिः स्त्री पत्रभङ्गौ च दैन्यस्यापि प्रकाशने" (इति मेदिनी) पत्रभङ्गौ दैन्यस्यापि प्रकाशने च माढिः स्त्री स्यादिति ॥ ८ ॥

सेमर या भात आदि का माड़, वितण्डावाद, कौड़ी, सौ कौड़ी, साड़ी या कसौटी, कछुई, झरनां, दान, कथरी, कुर्सी, तोंदी, कचहरी.

पिच्छा वितण्डा काकिण्यश्चूर्णिः शाणी द्रुणी दरत् ।
सातिः कन्था तथासन्दी नाभी राजसभापि च ॥ ९ ॥

पिच्छेति—पिच्छ्यते, 'पिच्छ बाधे' अस्माच्चौरादिकादित्कर्मणि "गुरोश्च हलः" इत्यप्रत्यये, टापि च पिच्छा=शाल्मलिनिर्यासो भक्तादिमण्डश्च । वितण्ड्यते परपक्षोऽनयेति, विपूर्वकात् 'तडि आघाते' अस्मात्साधने "गुरोश्च हलः" इत्यप्रत्यये, टापि च वितण्डा=वादभेदः । ककनम्, 'कक लौल्ये' अस्माद्भावे घञि काकः, काकमणतीति विग्रहे "कर्मण्यण्" इत्यणि, पृषोदरादित्वादकारस्यैकारादेशे, ङीपि च काकिणी "पणगण्डकयोस्तुर्य उद्मानस्य काकिणी" (इति रुद्रः) रभसस्तु नान्तेष्वप्याह "पणोद्मानगण्डानां तुर्यांशेऽपि काकिनी" तत्र 'अन प्राणने' धातु-

वोध्यः । आढकस्य पञ्चाशत्तमोभागः उद्मानः ("निर्मं हि गणितावल्याम्—) कुल्या स्यादष्टभिर्द्रोणैर्द्रोणपादेन चाढकम्। अतोर्धशतिकोभाग उद्मानमुदाहृतमिति" । "चूर्णो धूली क्षारभेदे चूर्णानिवासयुक्तिषु" (इति मेदिनी) चूर्णस्य करणम्, "तत्करोतीति" णिजन्ताद्भावे "अचः" इनीप्रत्यये चरणं चोरणं येति विग्रहे तु "घृणि–पृश्नि–पार्ष्णि–चूर्णि–भूर्णीनि" निपातिते च चूर्णिः=कपर्दकशतम् । शणस्य विकारः, "तस्य विकारः" इत्यणि, टिड्ढेति" ङीपि, शाणी=प्रावरणभेदः, निकषः 'इति स्वामी'। शाणा इत्यन्ये । द्रुणाति. द्रुणतेः कर्तरि "इगुपधेति' के "जातेरस्त्रीति" ङीपि च द्रुणी "द्रुणयम्बुद्रोणीकच्छप्योः" (इति मेदिनी) दरणम्, दीर्यते वा दृणातेर्भावे, कर्मणि वा "शृदृभसोऽदिः" इत्यदि प्रत्यये दरत् "दरस्त्रियां प्रपातेऽपि भयपर्वतयोरपि" (इति मेदिनी) सातम्, स्यतेर्भावे 'क्तिनि' 'द्यतिस्यतिमास्था' इतीत्वे प्राप्ते 'ऊतियूतिजूतीति' इत्वाभावे निपातिते च सननमिति विग्रहे तु सनोतेर्भावे क्तिनि "जनसन" इत्यात्वे वा सातिः "सातिर्दानावसानयोः" (इति हैमः) । कम्यते, कमेःकर्मणि बाहुलकादथनि कन्था "कन्था मृन्मयभित्तौ स्यात्तथा प्रावरणान्तरे" (इति मेदिनी) आस्यतेऽस्यामिति, अव्दादयश्चेति साधुः । आसन्दी—"वेत्रासनमासन्दी स्त्री वृषी च व्रतिकासनम्" (इति कोषान्तरम्) नभ्यतेऽनयाऽस्या वा नभेःसाधनेऽधिकरणे वा "इञजादिभ्यः" इतीञ्प्रत्यये, ञित्त्वाद्वृद्धौ च नाभिः "नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीकेस्यात्स्त्रियां कस्तूरिकामदे" (इति मेदिनी) राज्ञां सभा राजसभा ॥ ९ ॥

झालरि, गीतभेद, गगरी, होराशास्त्र, गौरैया चिड़िया, मत्स्य विकार, लाह, लीख, कुल्ला, वातरोग, चीसी, रोशनाई.

झल्लरी चर्चरी पारी होरा लट्वा (च) सिध्मला ।
लाक्षा लिक्षा (च) गण्डूषा गृध्रसी चमसी मसी ॥१०॥

इति स्त्रीलिङ्गशेषः ॥

झल्लेति—झर्झ्यते 'झर्झ परिभाषणहिंसातर्जनेषु' अस्माद्भौवादिकात्कर्मणि बाहुलकादरनि, पृषोदरादित्वाद्रझयोर्लत्वे च, गौरादित्वान्ङीपि च झल्लरी "झल्लरी झिल्लरी च द्वे हुडुके वालचक्रके" (इति मेदिनी) चर्च्यते, 'चर्च परिभाषणभर्त्सनयोः' अस्मात्तौदादिकात्कर्मणि बाहुलकादरनि, गौरादित्वान्ङीपि, चर्चरी= "चर्चरी गीतभेदे च केशभित्करशब्दयोः" (इति कोषान्तरम्) । पारयति, पार्य्यते वा 'पृ पूरणे' अस्माच्चौरादिकात्कर्तरि 'पचाद्यचि' कर्मणि 'घञि' वा गौरादित्वान्ङीपि च पारी "कर्करी पूरयोः पारी पादरज्ज्वां च हस्तिनः" (विश्वः) । होलति, हूल्यते वा "हुल हिंसासंवरणयोः" अस्माद्भौवादिक

'पचाद्यचि' कर्मणि घञि वा रलयोरेकत्वाद्रत्वे, टापि च होरा—"होरा तु लग्ने राश्यर्धे रेखाशास्त्रभिदोरपि" (इति मेदिनी) लटति 'लट बाल्ये' अस्माद्भौवादिकात्कर्तरि "अशूप्रुपिलटीति" क्वनि, टापि च लट्वा—"लट्वा करञ्जभेदेऽपि फलेऽवये-खगान्तरे" (इति मेदिनी) सिध्ममस्त्यस्याः "सिध्मादिभ्यश्च" इति लचि, टापि च सिध्मला—"सिध्मला मत्स्यविकृतौ वाच्यवत्तु किलासिनि" (इति मेदिनी) लक्ष्यते, 'लक्ष आलोचने' अस्माच्चौरादिकात्कर्मणि घञि पृषोदरादित्वा "लाक्षा-रोचना" इति निर्देशाद्वादीर्घे, टापि च लाक्षा=द्रुमामयः। लक्ष्यते, लक्षयते: कर्मणि घञि, पृषोदरादित्वादस्य इत्वे, टापि च लिक्षा=यूकाण्डम्। गण्ड्यते 'गडि वदनैकदेशे' अस्माद्भौवादिकाद् "गण्डेश्च" इत्यूषनि, टापि च गण्डूषा "उन्नतनाभिस्तु गण्डूषा नापि मुखपूर्तिः" (इति बोपालितः) गृध्रमपि स्यति, गृध्रपूर्वकात्स्यतेः कर्तरि "आतोनुपसर्गे—" इति के, आलोपे, गौरादित्वान्ङीषि च गृध्रसी, ऊरुसन्धौ वातरोगः। चम्यते, चमते. कर्मणि "अत्यविचमितमीति" असचि, गौरादित्वान्ङीषि च चमसी "चमसो यज्ञपात्रस्य भेदेऽस्त्रीपिष्टके स्त्रियाम्" (इति मेदिनी) मस्यति, मस्यते: कर्तरि "सर्वधातुभ्य इन्" इतीनि, "कृदिकारादिति" वा ङीषि, मसी-मसिर्वा अतएव "अथ स्त्रीपुंसयोः केलिर्मणिर्योनिर्मसिर्मुनिः" (इति त्रिकाण्डशेषः) संगच्छते। मषति हिनस्ति औज्ज्वल्यमिति विग्रहे तु मषतेः कर्तरि 'पचाद्यचि' ङीपि च मषी मूर्धन्योपधोऽपि "मलिनाम्बु मषी-मसी" इति हैमाद् बोध्यम्॥ १०॥

इति स्त्रीलिङ्गशेषविवरणम्॥

अथ पुंलिङ्गसंग्रहो व्याख्यायते॥

सभेद-सानुचर-सपर्याय, देव और दैत्य, स्वर्ग, याग, पर्वत, मेघ, समुद्र, वृक्ष, समय, तरवार, बाण, वैरी.

पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः।
स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरारयः॥ ११॥

पुमिति—सह भेदैरनुचरैश्च वर्तमानाः सभेदानुचराः, सहपर्यायैर्वर्तमानाः सपर्यायाः सुराश्च असुराश्च देवा दैत्याश्च पुंस्त्वे स्युः। यथा अमरा निर्जरा देवाः। सुरभेदाः—तुषिताः, साध्याः, आभास्वराः, इन्द्रः, शक्रः, सूर्यः, आदित्यः। देवानुचराः—हाहा, हूहूः, तुम्बुरुः, नारदः, मातलिः, । असुरपर्यायाः—दैत्याः, दैतेयाः, दानवाः। दैत्यभेदाः—बलिः, नमुचिः, जम्भः। दैत्यानुचराः—कूष्माण्डमुण्डकुम्भाण्डादयः। "दैवतानि देवताः" इत्यादौ बाधोऽस्य। स्वर्गादय एकोनत्रिंशतिः सभेदाः सपर्यायाश्च पुंसि स्युः। स्वर्गः, नाकः, त्रिदिवः। "द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्" इति त्रिशेषेर्बाधिनः। यज्ञः, मखः, क्रतुः। तद्भेदाः—उक्थातिरात्राग्निष्टोमाश्वमेधाः। अद्रिः,

गिरिः, पर्वतः । भेदाः—मेरुः, हिमवान्, मलयः ' गन्धमादनमिति ' वाचः । मेघः, घनः, जलदः । भेदाः—पुष्करावर्तकादयः । ' अभ्रमिति तु वाचः ' अब्धिः, समुद्रः, सागरः । भेदाः—क्षीरोदः, लवणोदः । द्रुः, वृक्षः, शाखी । भेदाः—सालः, वटः, आम्रः । " पाटला शिंशपादिर्वाचः " । कालः, दिष्टः, समयः । भेदाः—मासः, पक्षः, ऋतुः " दिनमित्यादौ वाचः " । असिः, खड्गः, मण्डलाग्रः । भेदाः—नन्दकः, चन्द्रहासः " कटिभमित्यादौ वाचः " । शरः, बाणः, विशिखः । भेदाः—नाराचः, काण्डः, भल्लः " पुर्वयोगिनि वाचः " अरिः, शत्रुः, अरातिः । भेदाः—आततायी-त्यादयो भवन्ति ॥ ११ ॥

हाथ, गाल आदि अह्नाहान्त, विष भेद, रात्रान्त.

करगण्डौष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।
अह्नाहान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः ॥ १२ ॥

केति—करो गजग्राहो भागः, रश्मिः, पाणिश्च । गर्भान्यादीनां तु वाचः । गण्डः, कपोलः । ओष्ठः, दन्तच्छदः, अधरः । दोः=प्रकोष्ठः । भुजादिर्योगिनि वाचः । दन्तः, दशनः, रदः । भेदो जम्भः । कण्ठः, गलः " समीप गलशब्देषु कण्ठं त्रिषु विदुर्बुधाः " (इति शाश्वतः) । केशाः=कचाः । नखः, पुनर्भवः " नखरोऽस्त्रिया मिति " वाचः । स्तनः, कुच , पयोधरः । अह्नश्च अहश्च अन्ते येषामिति ते पुंसि, स्युः । परवल्लिङ्गापवादोऽयम् । अह्नः पूर्वं पूर्वाह्णः, अह्नोऽपरमपराह्णः । द्वयोरह्नोः समाहारो द्व्यहः, त्रयाणामह्नां समाहारस्त्र्यहः । अत्र ' सनपुंसकम् ' इत्यस्यापवादः । क्ष्वेडो विषं तद्भेदाः पुंसि स्युः । सौराष्ट्रिकः, शौक्लिकेयः, ब्रह्मपुत्रः । रात्रोऽन्तो येषां ते । प्राक् पूर्वपदं न संख्या येषां ते पुंसि स्युः । परवल्लिङ्गतापवादोऽयम् । परत्वात्समाहा-रनपुंसकतामपि बाधते । तेन अहोरात्रः, सर्वरात्रः, पूर्वरात्रः । ' प्रागसंख्यकाः ' इति किम् ' पञ्चरात्रमित्यादौ पुंस्त्वं न स्यादिति ॥ १२ ॥

गोंद आदि, विशेष धूप आदि, कसेरू आदि.

श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता " अबाधिताः " ।
कशेरुजतुवस्तूनि (हित्वा) तुरुविरामकाः ॥ १३ ॥

श्रीति—श्रीवेष्टआद्यो येषामिति ते निर्यासा वृक्षद्रवाः पुंसि स्युः । श्रीवेष्टः, सरलः, द्रवः । ' श्रीपिष्टः ' इति क्वचित्पाठः । आद्येन श्रीवासः, वृकधूपः, गुग्गुलुः, सिह्लकः इत्यादयः पुंसि बोध्याः । यदि असन्ताः अन्नन्ताश्च अबाधिताः स्युस्तदा पुंसि भवन्ति । यथा—अङ्गिराः, वेधाः, चन्द्रमाः । कृष्णवर्त्मा, प्रतिदिवा, मघवा । ' अबाधिताः ' किम् । अप्सरसः, जलौकसः, सुमनसः । लोम, साम, वर्म । " कशेरुजतुवस्तूनि " हित्वा विहाय तुश्च रुश्च तुरू तौ विरामे विरामौ वा येषामिति ते पुंसि स्युः । हेतुः,

१—" अह्नोऽह्न एतेभ्य " इत्यहन्शब्दस्याह्नादेशे, " अह्नोऽदन्तात् " इत्यनेन णत्वम् बोध्यम् ॥

धातुः । कुरुः । मेरुः, त्सरुः ' कशेरुजतुवस्तूनि हित्वा ' इति व्यर्थम् । ' अबाधिताः ' इत्यस्यान्वयसंभवात् । वस्तुतस्तु ' अबाधिताः ' इत्यपि व्यर्थम् । ' विशेषैर्यद्यबाधितः ' इत्यनेन निर्वाहात् । अतएव दार्वश्वादिषु निर्वाहो ज्ञातव्य इति ॥ १३ ॥

कषणभमरोपध, पथनयसटोपध, गोत्र व वेदशाखा के नाम.

कषणभमरोपान्ता (यद्यदन्ता अमी अथ) ।
पथनयसटोपान्ता गोत्राख्याश्चरणाह्वयाः ॥ १४ ॥

केति—कषणभमरोपान्ताः कषणभमरवर्णोपधाः अमी यदि अदन्ता अकारान्ताश्चेत्तदा पुंसि स्युः । यथा अङ्कः, अर्कः, लोकः शोक इत्यादयः पुंसि भवन्ति । माषः, तुषः, तोषः, पोषः, रोष इत्यादयः । पाषाणः, शाणः, गुणः, घुण इत्यादयः । दर्भः, सरभः, गर्दभ इत्यादयः । सोमः, होमः, ग्रामः, धूम इत्यादयः । झर्झरः, शीकरः, सीरः, समीर इत्यादयः पुंसि स्युः । अथेत्यनन्तरम् पथनयसटोपान्ताः पथनयसटवर्णोपधाः अमी यद्यबाधिताश्चेत्तदा पुंसि स्युः । कूपः, यूपः, सूपः, कलाप इत्यादयः पुंसि स्युः । नाथः, सार्थः, शपथ इत्यादयः । अपघनः, इनः, जन इत्यादयः । अपनयः, विनयः, प्रणय इत्यादयः । रसः, हासः, पनस इत्यादयः । करटः, पटः, सग्ट, इत्यादयः पुंसि स्युः । अत्र मुकुटमते तु ' अदन्ताः ' इति न सम्बध्यते, अथादित्वात् तेन गोमायुः, जायुः, वायुः, पायुरित्यादयः पुंसि स्युः । गोत्रं वंश आख्यायते यैरिति गोत्रस्यादिपुरुषाः प्रवराश्च पुंसि स्युः । गौतमः, भरद्वाजः, अत्रिः, वसिष्ठ इत्यादयः । चरणानां वेदशाखानामाह्वया नामानि पुंसि स्युः । कठः, कलापः, बहवृच इत्यादयः पुंसि भवन्तीति ॥ १४ ॥

घञ् आदि, ल्यु आदि.

नाम्न्यकर्तरि भावे (च) घञजबनङ्णघाथुचः ।
ल्युःकर्तरीमनिज्भावे कोघोःकिः(प्रादितोऽन्यतः) ॥ १५ ॥

नाम्नीति—घञ्—अच्—अप्—नङ्—ण—व—अथुच् एते सप्त प्रत्ययाः नाम्नि संज्ञायां विषये अकर्तरि कर्तृभिन्ने कारके भावे च ये विहितास्तदन्ताः पुंसि स्युः । यथा प्रसीदन्त्यस्मिन्मनांसि, इति विग्रहे "हलश्च" इत्याधारे घञि, वृद्धौ प्रासादः=देवभुभुजां वासः । प्रास्यते, प्रपूर्वकादस्यतेः कर्मणि घञि, प्रासः=सांग इतिख्यातमस्त्रम् । विदन्त्यनेनेति, विदेः करणे घञि वेदः=आम्नायः । प्रपतन्त्यस्मादिति, प्रपूर्वकात्पततेरपादाने घञि प्रपातः=तटः । भावे यथा पचनं, पाकः । त्यजनं, त्यागः=दानम् । चकारात् रुजतीति, " पदरुज " इति घञि रोगः=आमयः । दायः, धाय इत्यादयोऽसंज्ञायां विहिता अपि गृह्यन्ते । चयनम्, चिनोतेर्भावे " एरच् " इत्यचि चयः=वप्रं, समूहो वा । जयनम्, अचि जयः=विजयः । कीर्यते, किरतेः कर्मणि " ॠदोरप् " इत्यपि करः=राजग्राह्यभागः, मरीचिः, पाणिर्वा । गीर्यतेऽनेनेति, अपि, गरः, गलः कण्ठो

वा । लवनम्—लूयते वा अपि, लवः=लेशः, कालभेदः, छेदः, रामात्मजो वा । स्तवनम्, भावे 'अपि' स्तवः=स्तोत्रम्' । इज्यतेऽनेनास्मिन्निति वा यजतेः करणे, साधनेऽधिकरणे वा "यजयाचयतविच्छप्रच्छरक्षो नङ्" इति 'नङि' यज्ञः—" यज्ञः स्यादात्मनि मखे नारायणहुताशयोः" (इति हैमः) । यतनम्, यते 'भावे नङि' । यत्नः=प्रतियत्नः उपायो वा । 'नङ्' इत्युपलक्षणम् । " स्वपो नन् " इत्यपि गृह्यते । 'स्वप्नः संवेश इत्यपि' इति वा पुंस्त्वसिद्धिर्बोध्या । न्यदनम्, निपूर्वकाददेर्भावे " नौ ण च " इति णे, वृद्धौ न्यादः=आहारो, भ्रमणं वा । उरश्छाद्यतेऽनेन, उरःपूर्वकात् 'छद अपवारणे' अस्माणिजन्तादिकात्साधने " पुंसि संज्ञायां घः " इति घे, "छादेर्घे—" इति ह्रस्वे च उरश्छदः=कवचम् । प्रच्छाद्यतेऽनेन, घे, ह्रस्वे च प्रच्छदः=पटः । श्वयनम्, श्वयतेर्भावे " ट्वितोऽथुच् " 'इत्यथुचि' श्वयथुः=शोथः । वेपनम्, वेपतेर्भावे अथुचि, वेपथुः=कम्पः । " नन्दिग्रहिपचादिभ्यः " इति नन्द्यादिभ्यः कर्तरि विहितो 'ल्युः' पुंसि स्यात् । नन्दयतीति, ल्युप्रत्यये, अनादेशे च नन्दनः, रमते इति रमणः, सूदयतीति सूदनः । मधोः+सूदनो मधुसूदनः । संज्ञायामिदम् । असंज्ञायां तु " कृतः कर्त्र्यसंज्ञायाम् " इति सिद्धम् । भावे इमनिच् तदन्ताः पुंसि स्युः । यथा पृथोर्भावः, " पृथ्वादिभ्य इमनिज्वा " इति इमनिचि, " र ऋतोहलादेर्लघोः " इति ऋकारस्य रत्वे, टेरिति टिलोपे च प्रथिमा । एवं मृदोर्भावो म्रदिमा । "सुपिस्थ." इति योगविभागाद्भावे कः । " घञर्थे कः " इति वा तदन्ताः पुंसि स्युः । आखूनामुत्थानमिति, घञर्थे के, आखूत्थः । प्रस्थानम्, के प्रस्थः । प्रादितः उपसर्गतः अन्यतः अन्यस्माच्च सुबन्तात्परो यो घुस्तस्माद्विहितो यः 'कि' प्रत्ययस्तदन्तः पुंसि स्यात् । यथा नितरां धीयते, धत्ते पोपयत्यनेनवेति विग्रहे " उपसर्गे घोः किः " इति कि प्रत्यये आलोपे च निधिः=सामान्यनिधिः । आदीयते गृह्यतेऽर्थोऽनेनेति, आदिः । विधानम्—विधीयतेऽनेन वा विधिः, उदकानि धीयन्तेऽस्मिन्निति विग्रहे "कर्मण्यधिकरणे च" इति 'कि'प्रत्यये उदधिः=सागरः । जलानि धीयन्तेऽस्मिन्निति जलधिः=समुद्रः। अत्र 'प्रादितोऽन्यतः' इति व्यर्थम् । घोःकिरित्यनेनैवेष्टसिद्धत्वात्तथापि स्पष्टार्थमिति ज्ञेयम् ॥ १५ ॥

घोड़ा-घोड़ी, सूर्यकान्त, इन्दुकान्त, लोहकान्त आदि.

द्वन्द्वेऽश्ववडवावश्ववडवानसमाहृते ।
कान्तः सूर्येन्दुपर्यायपूर्वोऽयः पूर्वकोऽपि च ॥ १६ ॥

द्वन्द्व इति—असमाहृते समाहारार्थभिन्ने द्वन्द्वे द्वन्द्वसमासे अश्ववडवाविति शब्दः पुंसि स्यात् । यथा अश्वश्च वडवा च अश्ववडवौ "पूर्ववदश्ववडवौ" इति पुंस्त्वम् । परवल्लिङ्गतापवादः । द्वित्वमविवक्षितम् । तेन अश्वाश्च वडवाश्ज अश्ववडवास्तानश्ववडवान्, अश्ववडवैरित्यादि । असमाहृते किम् । अश्ववडवम् । " विभाषावृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् " इति चैकवद्भावः । ...
यपूर्वः=सूर्यचन्द्रनामपूर्वः कान्तशब्दः पुंसि स्यात् । यथा—सूर्यकान्तः, अर्ककान्त

इन्दुकान्तः, चन्द्रकान्तः, सोमकान्तः। अयः पूर्वकः लोहपूर्वकः कान्तशब्दोऽपि च पुंसि स्यात्। यथा अयस्कान्तः, लोहकान्तः, पिण्डकान्त इत्यादयः पुंसि भवन्तीति॥१६॥

वरा आदि, **वटकश्चानुवाकश्च रल्लकश्च कुडङ्गकः।**

फोंक आदि. **पुङ्खो न्युब्जः समुद्गश्च विटपट्टधटाः खटः॥ १७॥**

वटक इति—वटति 'वट वेष्टने' अस्माद्भौवादिकात् कर्तरि "क्विन्शिल्पसंज्ञयोर पूर्वस्यापि" इति क्वुनि, अकादेशे च वटकः=माषपिष्टविकारः। अनु उच्यते, अनु पूर्वकाद्वचेः कर्मणि "अकर्तरि च कारके संज्ञायाम्" इति घञि, वृद्धौ, "चजोः कुघिण्यतोः" इति कुत्वे च अनुवाकः=ऋग्यजुः समूहः। ललनम्, लल्यते वा लल तेर्भौवादिकाद्भावे कर्मणि वा संपदादित्वात्क्विपि, रलयोरेकत्वे च रल्। लक्यते, लकते कर्मणि "पुंसि संज्ञायाम्" इति घे, लकः। रल् चासौ लकश्च रल्लकः=पक्ष्मकम्बलम्। कुटति, कुटतेः कर्तरि "अन्येभ्योऽपि दृश्यते" क्विपि कुट्। कुट् अङ्गमस्य "शेषाद्विभाषा" इति कपि, कुडङ्गकः। "कुडङ्गको ना छदिः पिटम्" (इति वोपालितः) 'वृक्षलतागृहम्' (इति स्वामी) "कुटङ्गकः" इति पाठे तु कुटेः कर्तरि "इगुपधः—" इति के शकन्ध्वादित्वात्पररूपत्वं बोध्यम्। पुमांसं खनति, पुंसा खन्यते वा पुंस्पूर्वकात्खनतेः कर्तरि, कर्मणि वा "अन्येभ्योपि" इति डे, टिलोपे च पुङ्खः=काण्डमूलम्। न्युब्ज्यते, निपूर्वकादुब्जतेः कर्मणि "पुंसि संज्ञायाम्" इति 'घे' न्युब्जः "न्युब्जः सम्यग्ज्ञनोज्ञे च साम्नः षट्प्रणवेषु च" (इति मेदिनी) 'न्यूब्ज' इति दीर्घपाठे तु पृषोदरादित्वात् "यज्ञकर्मण्यजपन्यूब्जसामसु" इति निर्देशाद्वादीर्घः। समुद्गम्यते, समुत्पूर्वकाद्गच्छतेः कर्मणि "अन्येष्वपि" इति डे, टिलोपे च समुद्गः=संपुटकः। वेटति, वेटतेः कर्तरि "इगुपध"-इति के, कित्त्वाद्गुणाभावे च विटः "विटोऽद्रौ धवले षिङ्गे मूषिके खदिरेऽपि च" (इति मेदिनी)। पटति, पट्यते वा पटतेः कर्तरि, कर्मणि वा बाहुलकात्तप्रत्यये, ष्टुत्वे च पट्टः "पट्टः पेषणपाषाणे व्रणादीनां च बन्धने। चतुष्पथे च राजादिशासनान्तरपीठयोः" (इति मेदिनी) तटयते, धन्यते वा तटतेर्धनतेर्वा कर्मणि "पुंसि संज्ञायाम्" इति घे, पृषोदरादित्वात्तस्य धत्वे नस्य टत्वे वा धटः "परीक्षार्थतुलायां च धटः सूरिभिरिष्यते" (इति विश्वः) खटयते=काङ्क्ष्यते, खटतेः कर्मणि "पुंसीति" घे खटः "खटोन्धकूपखपयोः प्रहारान्तरटङ्कयोः" (इति मेदिनी) अन्धकूपादौ खटः पुंसि स्यादिति॥ १७॥

कोट, अरहट, बाजार आदि—गलगण्ड, प्यारी, लाठी, मुगदर, गायका सिर, घुन. **कोट्टारघट्टहट्टाश्च पिण्डगोण्डपिचण्डवत्।**

गडुः करण्डो लगुडो वरण्डश्च किणो घुणः॥ १८॥

कोट्टेति—कुट्ट्यते—कुट्टयतेश्चौरादिकात्कर्मणि वाहुलकादारनि, गुणे च कोट्टारः "कोट्टारो नागरे कूपे पुष्करिण्याश्च पाटके" (इति रभसः) घट्टयतेऽस्मिन्, 'घट्ट चलने' अस्माद्गोवादिकादाधारे "हलश्च" इति घञि, घट्टः "घाट" इति ख्यातः । केचित्तु "कोट्ट" "अरघट्ट" इति छित्वा "कोट्टो दुर्गपुरम् ।" अरघट्टः कूपभेदः" इतिवाचस्पतिः । तत्र कुट्टमानोर्धे, वाहुलकादनुगे च कोट्टः "कोट्टः पुंक्लीबलिङ्गः"—इत्यभिधानचिन्तामणौहैमः । अरैश्चक्रावयवनहरैः काष्ठविशेषैर्घट्ट्यते रच्यते अरघट्टः, कूपाज्जलनिःसारणार्थं घटीयन्त्रमित्यन्ये । हटन्त्यत्र, हटेराधारे वाहुलकात्तप्रत्यये, द्वित्वे च हट्टः=आपणः । पिण्डते, पिण्ड्यते वा पिण्डेः कर्तरि, कर्मणि वा अचि, घञि वा पिण्डः, "पिण्डो बोले बले सान्द्र देहागारैकदेशयोः । देहमात्रे निवापे च गोलसिह्लकयोरपि" (इति मेदिनी) गोण्यत इव गोण्डः "गोण्डः पामरजातौ च वृद्धनाभौ च नद्धति" (इति मेदिनी) अपि चण्डतेऽनेनात्रेति वा अपिपूर्वकाच्चण्डेः साधनेऽधिकरणे वा "हलश्च" इति घञि "वष्टिभागुरि" रित्य पेरल्लोपे च पिचण्डः "पिचण्डोऽवयवे पशोः । उदरे च" (इति हैमः) अत्र वच्छन्देन गड्वादयोऽपि पुंसि स्युः । गडति, गड्यते वा गडतेः कर्तरि, कर्मणि वा वाहुलकादुप्रत्यये गडुः, "गडुः पृष्ठगुडे कुब्जे" (इति विश्वः) क्रियते, करोतेः कर्मणि "अण्डन् कृसृभृवृञः" इत्यण्डनि, गुणे च करण्डः "करण्डो मधुकोषासिकाण्डवद्लाटके" (इति मेदिनी) लगति, लगतेः कर्तरि वाहुलकादुडचि 'लगुडः' लगुडो यष्टिः । वृणोति, व्रियते वा वृणोतेः कर्तरि, कर्मणि वा 'अण्डनि' वरण्डः "वरण्डोऽप्यन्तरावेदी समूहमुखरोगयोः" (इति मेदिनी)) कणति, कणतेः कर्तरि पचाद्यचि, पृषोदरादित्वादस्य इत्वे च किणः "किणोमांसग्रन्थिव्रणजं चिह्नं च" । घोणते, घुणेः कर्तरि "इगुपध—" इति के कित्त्वादगुणाभावे च घुणः "घुणः स्यात्काष्ठभेदके" (इति रत्नकोषः) काष्ठवेधके घुणः पुंसि स्यादिति ॥ १८ ॥

मशक, बालों का बाधना, हरारंग, पागुर, सामवेद ध्वनि, बुल्ला, रोगभेद, दशकरोड, कुन्द, फेना, उचाई, पुआ या वरा.

* दृतिसीमन्तहरितो रोमन्थोद्गीथबुद्बुदाः ।

कासमर्दोऽर्बुदःकुन्दः फेनस्तूपौ सपूपकौ ॥ १९ ॥

दृतीति—द्रियते, 'दृङ् आदरे' अस्मात्तौदादिकात्कर्तरि "क्तिच्क्तौ च संज्ञायाम्" इति 'क्तिचि' दृतिः "दृतिश्चर्मपुटेमत्स्ये ना" (इति मेदिनी) सीम्नोऽन्तः शकन्ध्वादित्वात्पररूपे सीमन्तः=केशविन्यासः । हरति, ह्रियते वा हरतेः कर्तरि, कर्मणि वा "हसृरुहियुषिभ्य इतिः" इतीतौ, गुणे, रपरत्वे च हरित् "हरिद्दिशि स्त्रियां पुंसि

* "इन्द्रियाणान्तु सर्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम्" (इति मनु)

हयवर्णविशेषयो. । अस्त्रियां स्यात्तृणे च (इति मेदिनी) रोमस्य मन्थो रोमन्थः पृषोदरादिः पशूनां चर्वितस्य पुनश्चर्वणम् । उद्गीयते, उत्पूर्वकाद्गायतेःकर्मणि "गश्चोदि" इति थकि उद्गीथः " उद्गीथः प्रणवः सामवेदध्वनिः " (इत्यरुणः) साम्नोभाग विशेषो वा । ' बुद् ' इत्यव्यक्तध्वनिं वुन्दति करोति,बुत्पूर्वकाद्वुन्दतेः कर्तरि ' मूल विभुजादित्वात् ' क प्रत्यये, गुणाभावे च बुद्बुदः 'जलविकारः । कासं मृद्नातीति, कासपूर्वकान्मृद्नातेः कर्तरि "कर्मण्यण् " इत्यणि, गुणे च कासमर्दः=वेसवारभेदः । अरंबुन्दतीति, अरपूर्वकाद्बुन्दतेः कर्तरि " मूलविभुजादित्वात् " के, नलोपे, पृषोदरादित्वादरस्यालोपे च अर्बुदः " अर्बुदो मांसपरुषि दशकोटिषु न स्त्रियाम् । महीधरविशेषे ना " (इति मेदिनी) स्कुन्दते ' स्कुदि आप्रवणे ' अस्माद्भौवादिकात्कर्तरि ' पचाद्यचि ' पृषोदरादित्वात्सलोपे च कुन्दः " कुन्दोमाघ्येऽस्त्रीमुकुन्दभ्रमि निध्यन्तरेषु ना (इति मेदिनी) स्फायते, स्फायतेः कर्तरि " फेनमीनाविति " निपातिते, फेनः=समुद्रफेन इति ख्यातः । स्तूयते, स्तौतेः कर्मणि " स्तुवोदीर्घश्च " इति पे दीर्घे च स्तूपः=समुच्छ्रायः । मुकुटमते तु स्तूप्यते ' ष्टूप समुच्छ्राये ' अस्मच्चौरादिकात्कर्मणि घञि वा स्तूपः=घृतादिकृतकूटः । पुनाति, पूयते वा पून:कर्तरि, कर्मणि वा वाहुलकात्पकि, पूपः=अपूपः, पिष्टको वा । स्वामिमते तु यौति, यूयते, युवन्ति वध्नन्त्यस्मिन्पशुमिति वा यौतेः कर्तरि, कर्मणि, आधारे वा " कुयुभ्यां च " इति पे, दीर्घे च यूपः यज्ञस्तम्भः सएव स्वार्थे कनि यूपकस्तेनसहितौ सयूपकौ फेनस्तूपौ पुंसि स्यातामिति ॥ १९ ॥

घाम, राजा व क्षत्रिय, भाला, मुर्दा, छूरा, व्यवहार, पदार्थ, पानी की धारा, बाण, अम्लवेतस, गोल, ईंगर, देह.

आतपः क्षत्रिये नाभिः कणपक्षुरकेदराः ।
पूरक्षुरप्रचुक्राश्च गोलहिङ्गुलपुद्गलाः ॥ २० ॥

आतप इति—आतपति, आङ्पूर्वकात्तपतेः कर्तरि 'पचाद्यचि' आतपः=प्रकाशः 'घाम' इतिख्यातो वा । क्षत्रिये क्षत्रियार्थे वाच्ये सति नाभिः पुंसि स्यात् । नभ्यते ' णभ हिंसायाम् ' अस्मात्कर्तरि " इणजादिभ्यः " इतीणि, नाभयतीति विग्रहे तु स्वार्थणयन्तात् " अचइः " इति इ प्रत्यये वा नाभिः " नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् " (इति मेदिनी) कणं पाति, पिबति वा कणपूर्वकात् पातेः पिबतेर्वा कर्तरि " आतोऽनुपेति " के, आलोपे च कणपः (प्रासविशेषः) । कचित् ' कुणपः ' इति पाठः । कणति, ' कण शब्दे ' अस्मात्कर्तरि " कणेः संप्रसारणं च " इति कपनि, संप्रसारणे च कुणपः " कुणपः पूतिगन्धौ शवेऽपि च " (इति मेदिनी)

क्षुरति, 'क्षुर विलेखने' अस्मात्तौदादिकात्कर्तरि "इगुपध—" इति के 'क्षुरः' "क्षुरः स्याच्छेदने द्रव्ये कोकिलाक्षे च गोक्षुरे" (इति मेदिनी) के दृणाति, दीर्यते वा के पूर्वकाद्दृणातेः कर्तरि "पचाद्यचि" कर्मणि "ऋदोरप्" इत्यपि वा गुणे, रपरत्वे च केदरः । संव्यवहारः पदार्थश्च । 'तरुभेदः' इत्यन्ये । पूरयति 'पूर पूरणे' अस्माच्चौरादिकात्कर्तरि "पचाद्यचि" णिलोपे च पूरः "पूरो जलप्रवाहे स्याद्व्रणसंशुद्धिखाद्ययोः" (इति मेदिनी) क्षुरं प्राति, क्षुर इव प्राति वा क्षुरपूर्वकात्प्रातेः कर्तरि "आतोऽनुप—" इति "सुपीति" योगविभागाद्वा कप्रत्यये, आलोपे च क्षुरप्रः । मुकुटस्तु 'खुरप्रः' † इति कवर्गद्वितीयादिं व्याख्यातवानिति । बाणभेदः । चक्यतेऽनेन, चकतेः करणे "चकिचम्योरुच्योपधाया." इति रक्, उपधाया उत्वे च चुक्रः "चुक्रं वृक्षाम्ले, चाङ्गेर्यां स्त्रीपुंस्यम्लेऽम्लवेतसे" (इति मेदिनी) गुड्यते, 'गुड रक्षायाम्' अस्मात्तौदादिकात्कर्मणि 'घञि' गुणे, डलयोरेकत्वाद्धस्य लत्वे च 'गोलः' "गोलःस्यात्मण्डवर्तुले" (इति हैमः) हिङ्गुलाति, हिङ्गुपूर्वकाल्लातेः कर्तरि "आतोऽनुपेति" के, आलोपे च हिङ्गुलः- "हिङ्गुलो वर्णकद्रव्ये ना भगटाख्यां तु हिङ्गुली" (इति मेदिनी) हिङ्गुलुरित्युदन्तोपि तत्र मितद्र्वादित्वाद्डुप्रत्ययो बोध्यः। मुकुटस्तु "हिङ्गुलुल्यात्तु हिङ्गुलमिति क्लीबे पठितवान् । वैश्यवर्गक्लीबलिङ्गमुदन्तमदन्तं च पठ्यते इत्यादिकम् । हेमचन्द्रोपि स्वोपज्ञनाममालाव्याख्यायां व्याख्यातवान् । वाचस्पतिस्तु "हिङ्गुलस्तवस्त्रियामिति" क्लीबेऽप्याह इत्यभिहितवान् । "पुत्" इति कुत्सायामव्ययम् । पुद्गिलति, गीर्यते वा पुत्पूर्वकाद्गिरतेः कर्तरि "पचाद्यचि" कर्मणि "ऋदोरप्" इत्यपि वा । पुद्गलनीति विग्रहे तु पुत्पूर्वकाद्गलतेः कर्तरि "पचाद्यचि" वा पुद्गलः "पुद्गलः सुन्दराकारे त्रिषु पुंस्यात्मदेहयोः" (इति मेदिनी) सुन्दराकारे पुद्गलः त्रिषु त्रिलिङ्गथाम । आत्मदेहयोः पुंसि स्यादिति ॥ २० ॥

भूत, पहलवान, भालू, जाटरि, पटा-पीढा या अन्नभेद, काजी, हर्ष, कडाह, पीकदान.

वेतालमल्लभल्लाश्च पुरोडाशोऽपि पट्टिशः ।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥ २१ ॥

इति पुंलिङ्गसंग्रहः ॥

वयिति—वो वायुरितो गतोयस्मात्स वेतः । वेतमलति, वेतपूर्वकादलतेः कर्तरि, "कर्मण्यण्" इत्यणि, वे वायौ तालः प्रतिष्ठा यस्येति वा वेतालः । भूताविष्टः शवः । मल्लते, मल्ल्यते वा 'मल्ल धारणे' अस्माद्भौवादिकात्कर्तरि "पचाद्यचि"

---

† यथा "दशाननक्षिप्तखुरप्रखण्डित क्वचिद्गतार्धोहिमदीधितिर्यथा" इति हरिविन्नितवानिति ॥

कर्मणि 'घञि' वा मल्लः "मल्ल. पात्रे कपोले च मत्स्यभेदे बलीयसि" (इति मेदिनी) भल्लते, भल्ल्यते वा भल्लः कर्तरि 'पचाद्यचि' कर्मणि 'घञि' वा भल्लः, "भल्लः स्यात्पुंसि भल्लूके शस्त्रभेदे पुनर्द्वयोः। भल्लातक्यां स्त्रियां भल्ली" (इति मेदिनी)। पुरः प्रथमं दाश्यतेऽदमिति विग्रहे पुरःपूर्वकाद्दाशतेःकर्मणि 'घञि' पृषोदरादित्वात् "व्रीहेश्च पुरोडाशे" इति निर्देशाद्वा दस्य डत्वे च पुरोडाशः "पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च। रसे सोमलतायाश्च हुतशेषे च कीर्तितः" (इति विश्वः) "पट्टिः स्त्री पटभेदेस्याल्ललाटे कुम्भिकाद्रुमे" (इति मेदिनी) पट्टिं श्यति, पट्टिपूर्वकात् श्यतेः कर्तरि "आतोऽनुप—" इति के, आलोपे च पट्टिशः। मुकुटमते तु 'पट्टिसः' दन्त्यसान्तोपि तत्र 'षो अन्तकर्मणि' दैवादिकात्कर्तरि कप्रत्ययो बोध्यः, शस्त्रभेदः। कोलनम्, कोलतेर्भावे संपदादित्वात् क्विपि, कुल्। कुलं मषति, कुलपूर्वकान्मषतेः कर्तरि "कर्मण्यण्" इत्यणि, वृद्धौ च कुल्माषः "कुल्माषो यावके प्रोक्तः कुल्माषं काञ्जिकेऽपि च" (इति विश्वः) धातुपारायणे 'कुल्मासः' इति-दन्त्यसान्तोपि। तत्र मसेर्दैवादिकाद् 'घञ्' प्रत्ययो बोध्यः। कुल्मासो माषादिमिश्रमर्धस्विन्नमोदनं "खिचड़ी" इति ख्यातम्। रभणम्, रभतेऽनेनेति वा रभेर्भावे, करणे वा "अत्यविचमितमी—" त्यसचि, रभसः "रभसो वेगहर्षयोः" (इति विश्वः) सकटाह· कटाहसहितः पतद्ग्रहः पुंसि स्यात्। कटेनातिशयेनाहन्यतेगम्यते, कटाङ्पूर्वकाद्धन्तेः कर्मणि "अन्येभ्योऽपीति" डे, टिलोपे च कटाहः "कटाहो घृततैलादिपाकपात्रेऽपि कर्परे। कटाहः कूर्मपृष्ठे च स्तूपे च महिषीशिशौ" (इति विश्वः) "कराह" इति ख्यातः। गृह्णाति, 'ग्रह उपादाने' अस्मात्क्रैयादिकात्कर्तरि 'पचाद्यचि' ग्रहः। पततस्ताम्बूलादेर्ग्रहः, पतद्ग्रहः=निष्ठीवनपात्रम् "पीकदान" इति ख्यातं सुधीभिरिति ॥ २१ ॥

आकाशादि, **(द्विहीने) ऽन्यच्च खारण्यपर्णश्वभ्रहिमोदकम्।**
शीतादि. **शीतोष्णमांसरुधिरमुखा† क्षिद्रविणं बलम् ॥ २२ ॥**

द्वीति—द्विहीने द्वाभ्यां स्त्रीपुंसाभ्यां हीने रहिते "क्लीबे" इत्यधि क्रियते। अन्यदवशिष्टम् उक्तात्संग्रहाच्छेषः 'क्लीबे' स्यात्। तत्र कांश्चित्पर्यायपरत्वेन व्याचष्टे—खमिति, खनति, खन्यते वा 'खनु अवदारणे' अस्मात्कर्तरि, कर्मणि वा "अन्येभ्योऽपीति" डे, टिलोपे च खम् "खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि। संवेदने देवलोके शर्मण्यपि नपुंसकम्" (इति मेदिनी)। अर्यते, अर्तेः कर्मणि "अर्तेर्निद्" इत्यन्यप्रत्यये णत्वे च अरण्यम्=काननम् 'जंगल' इति ख्यातम्। पर्णयति, 'पर्ण हरितभावे' अस्माच्चौरादिकात्कर्तरि 'पचाद्यचि' पर्णम् "पर्णं

† "आस्यनो मुखदानश्च तनोचश्रन्ययो भवेत्। प्रजामृजा यतः खातं तस्मादाहुर्मुखं बुधाः" (इति निरुक्तम्) ॥

पत्रे पलाशे ना " (इति कोषान्तरम्) । श्वभ्रयति ' श्वभ्र गतौ ' अस्मात्स्वार्थण्यन्तात्कर्तरि ' पचाद्यचि ' श्वभ्रम । शुभ्रं श्रभ्रमिति विग्रहे तु दन्त्यादित्वमपि । बिवरम् । हन्ति, हन्ने. कर्तरि " हन्तेर्हिंच " इति मनि, ह्यादेशे च हिमम् " हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गः " (इति मेदिनी) उनत्ति, ' उन्दी क्लेदने ' अस्माद्रौधादिकात्कर्तरि क्वनि, नलोपे, अकादेशे च उदकम् । श्यायते स्म, श्यैङः कर्तरि " गत्यर्था–" इति क्ते, " द्रवमूर्तिस्पर्शयोः श्यः " इति संप्रसारणे च शीतम् " शीतं हिमगुणे क्लीबं शीतलालसयोस्त्रिषु " (इति मेदिनी) ओषति=दहति, उषेःकर्तरि " इषियुधीन्धिदसिश्याधूसूभ्यो मक् " इति नकि, उष्णम् " उष्णो ग्रीष्मे पुमान्दक्षाशीतयोरन्यलिङ्गकः " (इति मेदिनी) मन्यते, मनेः कर्तरि " मनेर्दीर्घश्च " इति से, दीर्घे च मांसम् " मांसं स्यादामिषे क्लीबं कक्कोली जटयोः स्त्रियाम् " (इति मेदिनी) रुगाद्धि । रुध्यते वा ' रुधिर् आवरणे ' अस्माद्रौधादिकात्कर्तरि, कर्मणि वा " इषिमदिमुदीति " किरचि, गुणाभावे च रुधिरम् " रुधिरोऽङ्गार के पुंसि क्लीबन्तु कुङ्कुमासृजोः " (इति मेदिनी) खनति, खन्यते, अनेन वा । खनतेः कर्तरि, कर्मणि, साधने वा " डित्खनेर्मुट् सचोदोत्तः " इत्यचि, डित्त्वाट्टिलोपे, धातोर्मुडागमे च मुखम् " मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि । संध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम् " (इति मेदिनी) अश्नुते, अश्नोतेः कर्तरि " अशेर्निन् " इति ' क्सि ' प्रत्यये, षत्वे, कत्वे, क्षत्वे च अक्षि=लोचनम् । द्रवति, द्रूयते वा द्रवतेः कर्तरि, कर्मणि वा " द्रुदक्षिभ्यामिनन् " इतीनन्नि द्रविणम् " द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे " (इति मेदिनी) वलति ' वल प्राणने ' अस्मात्कर्तरि " पचाद्यचि " वलम् " वलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च । वलयुक्तेऽन्यलिङ्गः स्याद्वाटयालके तु योषिति (इति मेदिनी) योषिति स्त्रियां स्यादिति ॥ २२ ॥

फल, सोना, ताबा, लोहा, सुख, दुःख, शुभ, अशुभ, कमल आदि फूल, निमक, पक्वान, उवटन.

फलहेमशुल्वलोहं सुखदुःखशुभाशुभम् ।
जलपुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥ २३ ॥

फेति–फलति, फलतेः कर्तरि " पचाद्यचि " फलम् " फलं हेतुकृतेजातीफलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः " (इति हैमः) । क्वचित्तु हलमिति पाठः । तत्र हलति, 'हल विलेखने' अस्मात्कर्तरि "पचाद्यचि" हलम्=लाङ्गलम् । हिनोति, हिनोतेः कर्तरि " सर्वधातुभ्यो मनिन् " इति मनिनि, गुणे च हेम हाटकम्, हिरण्यम्, स्वर्णम् वा । शलति, शल्यते वा शुल्वम् " उल्वादयश्च " इति साधु । ताम्रम्–वरिष्ठम्, म्लेच्छमुखं वा । लोहयति, लुह्यते वा । रोहति, रुह्यते वा

रुहेः कर्तरि ' पचाद्यचि ' कर्मणि घञि वा कपिलिकादित्वाल्लत्वे च । लूयतेऽनेनेति विग्रहेतु लूञः साधने बाहुलकाद् ह प्रत्यये, गुणे च लोहम्=तीक्ष्णम्, पिण्डम्, शङ्कं वा । सुखयति, कर्तरि ' पचाद्यचि ' सुखम्, शातम्–शर्म वा । दुःखयति कर्तरि अचि, दुःखम्=कृच्छ्रम्, कष्टम्, कलाकुलं वा । शोभते, शुभेः कर्तरि " इगुपध–" इति के, गुणाभावे च शुभम्=कल्याणम्, मङ्गलं वा । न शुभमिति अशुभम्=अकल्याणम्, अभद्रं वा । जलपुष्पाणि जलभवानि पुष्पाणि कुमुदकमलकह्लारोत्पलानि क्लीबे स्युः । लुनाति, लूञः कर्तरि नन्द्यादित्वात् ल्यु प्रत्यये अनादेशे "लवणाल्लुगितिनिर्देशाण्णत्वे च लवणम् " लवणं सैन्धवादौ ना सिन्धुरक्षोभिदोरसे । तद्युक्ते वाच्यलिङ्गः स्यान्नदीभेदद्विषोः स्त्रियाम् " (इति मेदिनी) व्यज्यतेऽनेन, विपूर्वकादनक्तेः साधने " करणाधिकरणयोश्च " इति ल्युटि, अनादेशे च व्यञ्जनम् " व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽहनि " (इति मेदिनी) अनुलिप्यते, अनेन वा अनुपूर्वकाल्लिम्पतेः कर्मणि, करणे वा ल्युटि, अनादेशे च अनुलेपनम्, यथा " कुंकुमाद्यनुलेपनम् " खादिसपर्यायं सविशेषं च क्लीबे भवतीति मुकुटो व्याख्यातवानिति ॥ २३ ॥

करोड़ से भिन्न सौ आदि सख्या लाख, द्विस्वर इसन्त, उसन्त, अन्नन्त, अनान्त

कोट्याः शतादिः संख्यान्या वा लक्षानियुतं (च तत्) ।
द्व्यच्कस्मिसुसन्नन्तं यदनान्तमकर्तरि ॥ २४ ॥

कविति–कोट्याः कोटेः अन्या भिन्ना शतादिः संख्या क्लीबे स्यात् । यथा शतम्, सहस्रम्, अयुतम्, अर्बुदम् । लक्ष्यते, लक्षयतेः कर्मणि " गुरोश्च–" इत्य प्रत्यये, टापि च लक्षा वा क्लीबे स्यात् । " लक्षा न पुंसि संख्यायां क्लीबे व्याजशरव्ययोः" (इति मेदिनी) तत् लक्षं नियुतं नियुतशब्दवाच्यमपि । नियूयते स्म, निपूर्वकाद् यौतेः कर्मणि ' क्ते ' नियुतम् " शतं सहस्रमयुतं नियुतं प्रयुतं मतम् । स्त्री कोटिरर्बुदमिति क्रमाद्दशगुणोत्तरम् " (इति रत्नकोषः) । असन्तमिसन्तमुसन्तमन्नन्तं यद्द्व्यच्कं तत्क्लीबे स्यात् । यथा 'यशः' पयः, तेजः, तमः " तमोध्वान्ते गुणे शोके क्लीबं वा ना विधुंतुदे " (इति मेदिनी) इसन्तं यथा सर्पिः, हविः, रोचिः, शोचिः । उसन्तं यथा धनुः, वपुः यजुः । अन्नन्तं यथा कर्म, चर्म, वर्म, शर्म । अकर्तरि कर्तृवर्जितेऽर्थे यदनान्तंनाम तत्क्लीबे स्यात् । यथा कदनम्, गगनम्, दमनम्, रमणम्, शमनमित्यादि । अकर्तरीति किम् । नन्दनः, रमणः, सूदन इत्यादयः पुंसि स्युरिति ॥ २४ ॥

त्रान्त, सलोपध, सख्यापूर्वपद रात्रान्त, पात्राद्य दन्तद्विगुसमास.

त्रान्तं सलोपधं शिष्टं रात्रं प्राक्संख्ययान्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगु (र्लक्ष्यानुसारतः) ॥ २५ ॥

त्रेति–त्रान्तं त्रकारान्तम्, सलोपधं सकारलकारोपधं च क्लीबे स्यात् । त्रान्तं

यथा गात्रम्, दात्रम्, पात्रम्, मित्रम, यन्त्रम, वहित्रम, वस्त्रम्। सोपधं यथा-बिसम्, बुसम, अन्धतमसम्। लोपधं यथा कूलम्, तूलम्, मूलम्, शूलम। शिष्टमवशिष्टमबाधितमिति यावत्। शिष्टं किम्। पुत्रः, मन्त्रः, वृत्रः। कंसः, पनसः, हंसः। कालः, शालः। प्राक्संख्ययान्वितं संख्यापूर्वपदं रात्रान्तं क्लीबे स्यात्। यथा द्वयोः रात्र्योः समाहारो द्विरात्रम्। तिसृणां रात्रीणां समाहारः त्रिरात्रम्। पञ्चानां रात्रीणां समाहारः पञ्चरात्रम। पात्राद्यदन्तैः पात्रादिभिरदन्तैरेकार्थो द्विगुः क्लीबे स्यात्। लक्ष्यानुसारतः शिष्टप्रयोगात्। पञ्चाना पात्राणां समाहारः पञ्चपात्रम। त्रयाणां भुवनानां समाहारस्त्रिभुवनम। एकार्थः किम्। पञ्चसु कपालेषु संस्कृतः, पञ्चकपालः पुरोडाशः। 'तद्धितार्थे द्विगुरयम' 'लक्ष्यानुसारत इति किम्' त्रयाणां–पुराणां तिसृणां पुरां वा समाहारस्त्रिपुरी। पञ्चानां मूलानां समाहारः पञ्चमूली। त्रयाणां लोकानां समाहारस्त्रिलोकीत्यादिषु स्त्रीत्वं बोध्यम्॥ २५॥

एकार्थकद्वन्द्व, अव्ययीभाव, संख्याव्यय से परे पथिन, पष्ठ्यन्त परछाया, समूह में सभा.

द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात्परः।
षष्ठ्याश्छाया (बहूनां चे) द्विच्छायं (संहतौ)सभा॥२६॥

द्वन्द्वेति–द्वन्द्वस्य एकत्वम्, एकत्वे द्वन्द्वो वा द्वन्द्वैकत्वमेकार्थको द्वन्द्वः समाहारद्वन्द्वः, अनव्ययस्य भवनमव्ययीभावश्च उभौ क्लीबे स्याताम्। द्वन्द्वैकत्वे यथा पाणिपादम्, शिरोग्रीवम्, मार्दङ्गिकपाणविकमित्यादिषु "द्वन्द्वश्चप्राणितूर्यसेनाङ्गानाम्" इत्येकत्वम्। अव्ययीभावे यथा अधिगोपम्, उपगङ्गम्, अधिस्त्रि, यथाशक्ति। संख्याव्ययात्परः पथः कृतसमासान्तः 'पथिन्' शब्दः क्लीबे स्यात। द्वयोःपथोः समाहारो द्विपथम्, त्रयाणां पथां समाहारस्त्रिपथम्, चतुर्णां पथां समाहारश्चतुष्पथम्। विरूपः पन्थाः, विरुद्धः पन्थावेति विपथमित्यादिषु "ऋक्पूर–" इति समासान्तः "पथ. संख्याव्ययादेरिति" क्लीबत्वम्। कुत्सितः पन्थाः "कापथ्यक्षयोः" इति कादेशे, "पथो विभाषा" इत्यप्रत्यये, "पथ. संख्याव्ययादेरिति" क्लीबत्वे च कापथम्। संख्याव्ययात्परः किम्। धर्मपथः, योगपथः। कृतसमासान्तः किम्। अतिपन्थाः, सुपन्था.। षष्ठ्याःषष्ठ्यन्तात्परा तत्पुरुषे छाया क्लीबे, सा चेद् बहूनां सम्बन्धिनी स्यात्। यथा वीनां पक्षिणां छाया विच्छायम्। अत्र "छाया बाहुल्ये" इति क्लीबत्वम्। 'बहूनां किम्, कुड्यच्छाया, कुड्यच्छायम्, अत्र विभाषासेना" इति क्लीबत्वम्। संहतौ समूहे वर्तमानो यः सभाशब्दस्तदन्तस्तत्पुरुषः क्लीबे, षष्ठ्यन्तात्पराचेत्। यथा स्त्रीणां सभा, स्त्रीसभम्=स्त्रीसंघातः। अत्र "अशाला च" इति क्लीबत्वम्। संहताविति किम्। धर्मस्य सभा, धर्मसभा धर्मशालेत्यर्थ. संपद्यते॥ २६॥

राजशब्द वर्जित राजपर्याय-रक्ष-पिशाचादि वाचक षष्ठ्यन्त पर शालार्थक सभा शब्द.

शालार्थापि परा राजाऽमनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभ (मिमादिशः) ॥ २७ ॥

शालेति—शालागृहमर्थो यस्याः सा सभा अराजकात् राजामनुष्यार्थात्=राजशब्द वर्जित राजपर्यायात्, अमनुष्यात्=रक्षःपिशाचादिवाचकाच्च षष्ठ्यन्तात्परातत्पुरुषे क्लीबे स्यात् । अपिना संहत्यर्था सभा गृह्यते । इनस्य सभा, इनसभम् । प्रभूणां स्वामिनां सभा, प्रभुसभम् । पिशाचानां सभा, पिशाचसभम् । दासीनां सभा, दासीसभं दासीगृहमित्यर्थः । नृपाणां सभा, नृपसभम् । रक्षसां सभा, रक्षस्सभमित्यादिषु "सभा राजामनुष्यपूर्वा" इति क्लीबत्वम् । इमा दिशः उदाहरणान्यवसेयानि । 'अराजकात् किम्' राज्ञां सभा राजसभा । राजपर्यायग्रहणान्नेह चन्द्रगुप्तस्य सभा, चन्द्रगुप्तसभा । राजविशेषोऽयम् । षष्ठ्यन्तात्किम् । ईष्टे, 'ईश ऐश्वर्ये' अस्मादादादिकात्कर्तरि "स्थेशभासपिसकसोवरच्" इति वरचि, टापि च ईश्वरा साचासौ सभाचेतीश्वरसभा । न सभा असभा । तत्पुरुषे, इति किम् । ईश्वरस्य सभेव सभा यस्येति ईश्वरसभः । अत्र "सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च" इति बहुव्रीहिर्विज्ञायतामिति ॥ २७ ॥

उपज्ञान्तआदि, **उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।**
कोपज्ञान्तआदि. **कोपज्ञकोपक्रमादिकन्थोशीनरनामसु ॥ २८ ॥**

उपेति—उपज्ञायते, उपपूर्वकाज्ज्ञानातेः कर्मणि 'आतश्चोपसर्गे' इत्यङि, टापि च उपज्ञा । उपक्रम्यते, उप पूर्वकात्क्रमेः कर्मणि घञि, उपक्रमः । उपज्ञा उपक्रमश्चान्ते यस्येति उपज्ञोपक्रमान्तस्तत्पुरुषः क्लीबे स्यात् । तदादित्वप्रकाशने तयोः उपज्ञोपक्रमयोः आदित्वप्रकाशने प्राथम्येद्योत्येसति । "उपज्ञोपक्रमंतदाद्याचिख्यासायाम्" उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात् । तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते । कस्य ब्रह्मणः उपज्ञा आद्यं ज्ञानं कोपज्ञम्=प्रजा । कस्य प्रजापतेः उपक्रमः आद्यारम्भः कोपक्रमं लोकः । आदिना पाणिनेरुपज्ञा प्राथम्यज्ञानं पाणिन्युपज्ञं ग्रन्थः । नन्दस्य उपक्रमः आद्यप्रारम्भः नन्दोपक्रमं द्रोणः । षष्ठ्यन्तात्परा या कन्था तदन्तस्तत्पुरुषः क्लीबे स्यात् । सा कन्था उशीनरनामसु उशीनरदेशस्थसंज्ञासु वर्तते चेत् । सौशमीनां कन्था सौशमिकन्थम् । आह्विकन्थम् । 'उशीनर, इति किम्' दाक्षिकन्था । वाह्लिकेष्वियं संज्ञा । 'नामसु किम्' वीरणकन्था कुत्रापीयं न संज्ञेति ॥ २८ ॥

---

१ कस्य प्रजापतेः उपज्ञा, उपक्रमश्च । सृष्टिरनेनादौ ज्ञाता प्रक्रान्ता च ॥

भाव में नणक चितों से अन्य अदन्त प्रत्यय, समूह व भाव कर्म में तद्धित त्यान्त, पुण्य सुदिन पर अह-शब्द.

भावे नणकचिद्भ्योन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्यया पुण्यसुदिनाभ्यां त्वहः परः ॥ २९ ॥

भाव इति—नश्च-णश्च-कश्च-चिच्च नणकचितस्तेभ्योऽन्ये अदन्तप्रत्ययाः कृतो ये भावे विहिताः, तथा समूहे अर्थे भावकर्मणोर्विहिता ये अकारान्तप्रत्ययास्तद्धिताः, तदन्तं नाम क्लीबे स्यात् । यथा भवनम्, भूतम् । अत्र "नपुंसके भावे क्तः" भवितव्यम् भवद्भिः भवनीयम्, वा । अत्र "तयोरेव कृत्यक्तखलर्थाः" इति भावे तव्यादयः । भवति, भूयते वा भव्यम् "भव्यगेयेति" साधुः । ब्रह्मणो भवनं ब्रह्मभूयम् । अत्र "भुवो भावे" इति भावे क्यप् । सांराविणम्—सांकूटिनं वर्तते । उभयत्र "अभिविधौ भावे इनुण्" इति 'इनुण्' तदन्तात् "अणिनुणः" इत्यण् "इनण्यनपत्ये" अनपत्यार्थेऽणि परे इन्प्रकृत्या स्यात् । तेन "नस्तद्धिते" इति टिलोपो न । नण-केति किम् । "यजयाच—" इति नङ् । इज्यते इति यज्ञः । यतनम्, यत्नः । "स्वपो नन्" । स्वपनम्, स्वप्नः । 'नौ णच्' न्यदनम्, न्यादः । "सुपीति—" 'घञर्थे—' इति च कः । आखूनामुत्थानमाखूत्थः । विहननम्, विघ्नः । चिन् "एरच्" इत्यच्, चयनं चयः । जयनं जयः । "ण्यासश्रन्थो युच्" इति युच् । कारणां, कारणा । समूहे तद्धिताः । "भिक्षादिभ्योऽण्" भिक्षाणां समूहो, भैक्षम् । "गोत्रोक्षोष्ट्र—" इति वुञ् । "युवोरनाकाविति" अकादेशः । औपगवानां समूहः, औपगवकम् "तस्य समूहः" इत्यण् । काकानां समूहः, काकम् । "केदाराद्यञ्च" केदाराणां समूहः, कैदार्यम्—कैदारकं वा । भावे "तस्य भावस्त्वतलौ—" गोर्भावो, गोत्वम् । "इगन्ताच्च लघुपूर्वात्" इत्यण् । शुचेर्भावः, शौचम् । मुनेर्भावो, मौनम् । "द्वन्द्वमनोज्ञादिभ्यश्च" इति वुञ्—अकादेशश्च मनोज्ञानां समूहो मानोज्ञकम् । "स्तेनाद्यन्नलोपश्च" इति यत् । स्तेनस्य भावः कर्म वा स्तेयम्=चौर्य्यम् । "गुणवचनब्राह्मणादिभ्यः कर्मणि च" चाद्भावे । इति ष्यञ् । शुक्लस्य भावः कर्म वा शौक्ल्यम् । पुण्यसुदिनाभ्यां परः कृतसमासान्तोऽहः शब्दः क्लीबे स्यात् । पुण्यं च तदहश्च "राजाहः सखिभ्यष्टच्" इति टच्, पुण्याहम् । सुदिनशब्दः प्रशस्तवाची । सुदिनं च तदहश्च सुदिनाहम् । अत्र "पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा" इति क्लीबत्वम् । समासान्त इति किम्, पुण्यान्यहानि यस्मिन्निति पुण्याहा मासश्चात्र समासान्तत्वाभावान्न क्लीबत्वमिति बोध्यम् ॥ २९ ॥

क्रियाव्यय विशेषण, सामभेद, वृत्तभेद, ताड़फल या केला का फल गोंद या भात, थून्हीं, सोना, मर्म—योजन.

क्रियाव्ययानां भेदकान्येकत्वेऽप्युक्थतोटके ।
चोचं पिच्छं गृहस्थूणं[1] तिरीटं मर्मयोजने ॥ ३० ॥

क्रियेति—धात्वर्थात्मिकाः क्रियाः, न वियन्ति न क्षयं यान्तीति अव्ययानि क्रियाश्चाव्ययानि च क्रियाव्ययानि तेषां क्रियाव्ययानां भेदकानि विशेषणानि एकत्वे अपि शब्दात्क्लीबे च स्युः । क्रियाविशेषणानि यथा मन्दं पचन्ति, सुखं तिष्ठन्ति योगिनः, सलीलं नृत्यन्ति बालाः । अव्ययविशेषणानि यथा । रम्यं स्वः, प्रातः कमनीयम् । उच्यते, वचेः कर्मणि " पातॄतुदिवचिरिचिसिचिभ्यः स्थक् " इति थकि, किस्वात्संप्रसारणे, कुत्वे च उक्थम्=सामभेदः । तुटति, तुटेः कर्तरि ' ण्वुलि ' गुणे, अकादेशे च तोटकम्=वृत्तविशेषः । चोप्यते, चोपयतेः कर्मणि घञि, चञ्चति—चच्यतेवेति विग्रहे तु चञ्चेः कर्तरि "पचाद्यचि" कर्मणि घञि वा पृषोदरादित्वादस्यौत्वे च चोचम् " फलावशिष्टं तालफलं च चोचं कदल्याः फलं भवेत् " (इत्यार्षकोषः) । पिच्छयते, पिच्छयतेः स्वार्थण्यन्तात्कर्मणि घञि पिच्छम् " पिच्छापूगच्छटाकोषमोचाशाल्मलिवेष्टके । भक्तसंभूतमण्डे च पंक्तावश्वपदामये । स्त्रियां पुंसि तु लाङ्गूले न द्वयोर्बर्हचूडयोः " (इति मेदिनी) गृहस्य स्थूणा, गृहस्थूणम्=गृहस्तम्भः,काष्ठमयी द्विकर्णिका वा । तरति, तरतेः कर्तरि, कर्मणि वा " कृतॄकृषिभ्यः कीटन् " इति कीटनि, किस्वादीत्वे, रपरत्वे च किरीटं वेष्टनम, सुवर्णं वा । शिरोभूषणमित्यन्ये । म्रियतेऽनेन, म्रियतेः करणे " सर्वधातुभ्य मनिन् " इति मनिनि, गुणे च मर्म=सन्धिस्थानम् । युज्यते ' युजिर् योगे ' अस्माद्रौधादिकात्कर्मणि " कृत्यल्युटो बहुलम् " इति ल्युटि, गुणे, अनादेशे च योजनम् " योजनं परमात्मनि । चतुष्क्रोश्यां च योगे च " (इति मेदिनी) परमात्मनि, चतुष्क्रोश्यां, योगे च ' योजनं ' स्यादिति ॥ ३० ॥

राजसूय, वाजपेय, गद्य-पद्य, माणिक्य, भाष्य, सेंदुर, चीर-चीवर, पञ्जर या पिंजरा

राजसूयं वाजपेयं गद्यपद्ये (कृतौ कवेः) ।
माणिक्यभाष्यसिन्दूरचीर[2]चीवरपञ्जरम् ॥ ३१ ॥

राजेति—राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः, लतात्मकः सोमो राजा स सूयते कण्डयतेऽत्रेति वा राजपूर्वकात्सुनोतेः कर्मण्यधिकरणे वा " राजसूयसूर्यमृषोद्य-

१ " गृहशशाभ्यां क्लीबे (नियमार्थमिदम्) गृहशशपूर्वे स्थूणोर्णे यथासङ्ख्य नपुंसके स्तः । इति स्त्रीवन्यम् " ॥

२ " चीराणि किं पथि न सन्ति दिशन्ति भिक्षाम् " (इति भागवतम्) ॥

रुच्यकुप्यकृष्टपच्याव्यथ्याः " इति 'क्यपि' निपातनाद्दीर्घश्च राजसूयम् । वाजमन्नं पेष्टीसुरा वा पीयतेऽत्रेति, वाजपूर्वकात् पिबतेरधिकरणे यति, " ईद्यति " इत्यात ईत्वे गुणे च वाजपेयम् । उभावपियागविशेषावर्धर्चादीत्येतयाविति । कवेः कृतौ " गद्यपद्ये " क्लीबे स्याताम् । यथा गद्यते, गदेः कर्मणि " गदमदचरयमश्चानुपसर्गे " इति 'यति' गद्यम्=छन्दोरहितं वाक्यं वार्तिकमिति वा । पादाः सन्त्यस्य " अन्येभ्योऽपीति " यपि, पद्भावो–इति पदादेशे । पदः सन्त्यस्येति वा पद्यम् " पद्यं श्लोके पुमान् शूद्रे पद्या वर्त्मनि कीर्तिता " (इति मेदिनी) कवेः कृतानिति किम् । गद्या=वार्ता । पद्यः=पङ्कः, पद्यं=रजः । मणिशब्देन कायति ज्ञनोऽयम्, मणिपूर्वकात्कायतेः कर्तरि " अन्येभ्योऽपीति " डप्रत्यये मूलविभुजादित्वात्के वा मणिकम् । मणिके मणिपूर्वाख्ये नगरे भवम् " शण्डिकादिभ्योञ्यः " इति 'ञ्ये' चातुर्वर्ण्यादित्वात् 'ष्यञि' वा ञित्त्वादवृद्धौ च माणिक्यम्=प्रवालसदृशमश्मजातं रत्नम्, रक्तमणिर्वा । भाष्यते सूत्रार्थोऽनेनेति विग्रहे 'भाष व्यक्तायां वाचि' अस्मात्करणे " कृत्यल्युटो बहुलम् " इति 'ण्यति' भाष्यम् " सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः "। स्यन्दते, स्यन्देः कर्तरि " स्यन्देः संप्रसारणं च " इत्यूरनि, संप्रसारणे च सिन्दूरम् " सिन्दूरस्तरुभेदे स्यात्सिन्दूरं रक्तवर्णके । सिन्दूरी रोचनारक्तचेलिकाधातकी पुत्र " (इति मेदिनी) चीयते, चिनोतेः कर्मणि " शुसिचिमीनां दीर्घश्च " इति रक्, दीर्घं च चीरम्–" चीरी झिल्ल्यां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालिखनभेदयोः " (इति मेदिनी) चीयते, चिञः कर्मणि " छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः " इति ष्वरचि प्रत्ययान्ते निपातिते चीवरम्=मुनिवसनम्, " शाक्यभिक्षुप्रावरणमिति वा सुभूतिः "। पिञ्ज्यते, 'पिजि संपर्के' अस्माद्दादादिकारकर्मणि बाहुलकादरप्रत्यये पृषोदरादित्वादिकारस्यात्वे च पञ्जरम् " यावन्मध्यं बहुधा पाञ्जरं नावगाहते " इति दमयन्तीश्लेपादकारवान् । क्वचित्तु पिञ्जरमिति वा पाठः । " पिञ्जरोऽश्वान्तरे क्लीबं स्वर्णे पीते च वाच्यवत् " (इति मेदिनी) कायास्थिवृन्दं पक्ष्यादिबन्धनगृहं च भणितं सुधीभिरिति ॥ ३१ ॥

चार्वाकशास्त्र, हरिताल, बाँस का पात्र, थारा या देशभेद.

लोकायतं हरितालं विदलं स्थालबाह्लवम् ।

इति क्लीबसंग्रहः ॥

लोक इति–लोके आयतन्ते, लोकाङ्पूर्वाद्यतेः कर्तरि 'पचाद्यचि' लोकायताश्चार्वाकास्तेषामिदं शास्त्रम् " तस्येदम् " इत्यणि, संज्ञापूर्वकत्वाद्वृद्ध्यभावे च लोकायतम् । हरितेनालाति, हरितपूर्वकादलतेः कर्तरि 'पचाद्यचि' हरितालम् " हरितालं धातुभेदे स्त्री दुर्वाकाशरेखयोः " (इति मेदिनी) विदलति, विपूर्वकाद्दलतेः कर्तरि 'पचाद्यचि'

* उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते । तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः ॥ १ ॥

विदलम्=वंशकृतपात्रभेदः । स्थलत्यत्र 'ष्ठल स्थितौ' अस्मादधिकरणे "हलश्च" इति घञि' णिजन्तादचि वा स्थालम् "स्थालं भाजनभेदेऽपि स्थाली स्यात्पाटलोखयोः" (इति मेदिनी) वह्लुदेशे भवम् । "तत्र भवः" इत्यणि, णित्त्वाद्वृद्धौ, गुणे, अवादेशे च बाह्लवम्=कुङ्कुमम् ।

इति क्लीबसंग्रहविवरणम् ॥

आधीऋचा, तिलोकी खली, काटा.

(पुंनपुंसकयोः) शेषोऽर्धर्चपिण्याककण्टकाः ॥३२॥

पुमिति—"पुन्नपुंसकयोरित्यधिक्रियते" शेषः=उक्तादन्यः पुंनपुंसकयोः स्यात् । ऋचोऽर्धम् । "अर्धं नपुंसकम्" इति समासे, "ऋक्पूरब्धूरिति" अ प्रत्यये समासान्ते च अर्धर्चः । अर्धर्चम् । अत्र 'अर्धर्चाः पुंसि च" इति पुंनपुंसकत्वम् । पण्यते इति पिण्याकः "पिनाकादयश्चेति" साधुः । "पिण्याकोऽस्त्री तिलकल्केहिङ्गुबाह्लीकसिह्लके" (इति मेदिनी) । कण्टति 'कटि गतौ' अस्माद्भौवादिकात्कर्तरि 'ण्वुलि' अकादेशे च कण्टकः "कण्टकः क्षुद्रशत्रौ च कर्मस्थानकदोषयोः । रोमाञ्चे च द्रुमाङ्गे च कण्टको मस्करेऽपि च" (इति विश्वः) "कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे । नैयोगिकादिदोषोक्तौ स्याद्रोमाञ्चद्रुमाङ्गयोः" (इति मेदिनी) क्षुद्रशत्रुप्रभृतिषु कण्टकः स्त्रियां न स्यादिति ॥ ३२ ॥

लड्डू, उपताप, टांकी, साडी, कपड़ा, खर्व, दशकरोड़, पातक, उद्योग, चरकशास्त्र, तमाखू, आंवला, नरई.

मोदकस्तण्डकष्टङ्कः शाटकः खर्वटोऽर्बुदः ।

पातकोद्योगचरकतमालामलका नडः ॥ ३३ ॥

मोदेति—मोदते, मोदयते वा 'मुद हर्षे' अस्माद्भौवादिकात्स्वार्थण्यन्ताद्वा कर्तरि ण्वुलि, अकादेशे च मोदकः "मोदकः खाद्यभेदेऽस्त्री हर्षके पुनरन्यवत्" (इति मेदिनी) । तण्डते 'तडि आघाते' अस्माद्भौवादिकात्कर्तरि 'ण्वुलि' अकादेशे च तण्डकः।"तण्डकःखञ्जने फेने समासप्रायवाचि च। गृहदारुतरुस्कन्धमायाबहुलकेष्वपि" (इति मेदिनी) । दण्ड एव, स्वार्थे कनि, "दण्डकः" इत्यपि । टङ्कयति, 'टकि बन्धे' अस्माच्चौरादिकात्कर्तरि 'पचाद्यचि' णिलोपे च टङ्कः "टङ्को नीलकपित्थे च खनित्रे टङ्कनेऽस्त्रियाम् । जङ्घायां स्त्री पुमान्कोपे कोपासिग्रावदारणे" (इति मेदिनी) तङ्कतीति विग्रहे तु 'तकि कृच्छ्रजीवने' अस्मात्कर्तरि 'पचाद्यचि' णिलोपे च तङ्कोपि । तङ्को=भयम् । शटति, 'शट गतौ' अस्मात्कर्तरि 'ण्वुलि' वृद्धौ, अकादेशे च शाटकः=परिधानीयः । खर्वति, 'खर्व दर्पे' अस्माद्भौवादिकात्कर्तरि "शकादिभ्योऽटन्" इत्यटनि, खर्वटः "यत्रैकतोभवेद्ग्रामो नगरं चैकतः स्मृतम् । मिश्रन्तु

खर्वटं नाम नदीगिरिसमाश्रयम् ” अर्वति, ‘ अर्व हिंसायाम् ’ अस्मादौणादिकात्कर्तरि बाहुलकादुदचि, अर्बुदः “ अर्बुदो मांसकीलेऽस्त्री पर्वते दशकोटिषु । महीभृद्विशेषे ना ” (इति मेदिनी) पातयति ‘ पत्लृ गतौ ’ अस्माद्णौवादिकाण्णयन्तात्कर्तरि पचुणि, णिलोपे, अकारादेशे च पातकम्=पापम्, दोषः, अपराधो वा । उद्योजनम्, उत्पूर्वकाद्युनक्तेर्भावे ‘ घञि ’ उद्योगः=उद्यमः, उपायः, यत्नः, परिश्रमः, चेष्टा च । चरति, चरतेः कर्तरि ण्वुलि, अकारादेशे च चरकम्=वैद्यकशास्त्रभेदः । वरकमिति पाठे तु स्यूतं वस्त्रम् । ताम्यति, तमेः कर्तरि “ तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् ” इति ‘ कालनि ’ तमालः “ तमालस्तिलके राज्ञि तापिच्छे वरुणद्रुमे ” (इति मेदिनी) आमलक्याः फलम् “ नित्यं वृद्धशरादिभ्यः ” इति मयटि, तस्य “ फले लुक् ” इति लुकि च आमलकः, आमलकम् । नडति, ‘ नड भ्रंशे ’ अस्माच्चौरादिकाण्णिचोऽभावपक्षे कर्तरि ‘पचाद्यचि’ नडः=नटोऽन्तरविवरं तृणभेदश्चेति ॥ ३३ ॥

कोढ, मूंड, मद्य, भूजामांस, वीरनाद, क्षेम, फर्श, संयोग, तोलभेद, अक्षिरोग, रस्ताखर्च, विकारशल्य, नाचना।

कुष्ठं मुण्डं शीधु वुस्तं क्ष्वेडितं क्षेम कुट्टिमम् ।
संगमं शतमानार्मशम्बलाव्ययताण्डवम् ॥ ३४ ॥

कुष्ठमिति—कुष्णाति, कुष्णातेः कर्तरि “ हनिकुषि ” इति ‘ क्थनि ’ कुष्ठम् । “ कुष्ठं रोगे पुष्करेऽस्त्री ” (इति मेदिनी) मुण्डयते, मुण्डेः कर्मणि ‘ घञि ’ मुण्डम्=शिरः, मुण्डोऽसुरो वा । शेतेऽनेन । शीङः करणे “ शीङोधुक्लक्—” इति धुकि, शीधु=मद्यम् । वुस्यतेस्म, वुस्यतेः कर्मणि क्ते, वुस्तम् “वुस्तं मांसशष्कुली, भृष्टमांसम्, पनसादिफलसारभागश्च । क्वचित् ‘ पुस्त ’ मिति पाठः । पुस्तयतीति, पुस्त्यते वा कर्तरि ‘अचि’ कर्मणि ‘ घञि ’ वा पुस्तम्—तदेव पुस्तकम् । क्वचिच्चुस्तमिति वा पाठः । च्युस्यते, चुसेः कर्मणि क्ते, निपातनाद्यलोपे इडभावे च चुस्तम् ‘तंग’ इति ख्यातम् । क्ष्वेडनम्, क्ष्वेड्यते वा क्ष्विडेर्भावे कर्मणि वा ‘ ञीतः क्तः ” इति क्ते क्ष्वेडितम्=वीरगर्जितम् । क्षयति, क्षियति वा क्षयतेः क्षियतेर्वा कर्तरि “ अर्तिस्तुसुहु—” इति मनि, गुणे च क्षेमम्=कुशलम् । कुट्टनम्, कुट्टयतेर्भावे घञि कुट्टस्तेन निर्वृत्तम् । “भावप्रत्ययान्तादिमप् ” इति ‘ इमपि ’ कुट्टिमम् “ कुट्टिमोऽस्त्री निबद्धाभूः ’ (इति कोषान्तरम् ।) संगमनम्, संपूर्वकाद्गमेर्भावे “ ग्रहवृदृ ” इत्यपि संगमम्=संयोगः । शतंमानमस्येतिशतमानम्=रूप्यपलम् । ऋच्छति, अर्तेःकर्तरि मनि, गुणे, रपरत्वे च अर्मम्क्षिरोगः । शम्बति अनेन शम्बयतेः करणे बाहुलकादलचि शम्बलं=पाथेयम् ।

---

१ “ चुरादीनां वा णिच् ” इति पक्षाश्रये पचाद्यजिति पीयूषव्याख्यायाम् ॥

सम्बलमितिपाठे तु ' सम्ब सर्पणे ' धातुर्बोध्यः। न व्येति न क्षयं यातीति, नञ्पूर्वका-देतेः कर्तरि 'पचाद्यचि' भावे " एरच् " इत्यचि वा अव्ययम् "अव्ययो ऽस्त्री शब्द-भेदे ना विष्णौ निर्व्यये त्रिषु (इति मेदिनी) तण्डुना प्रोक्तम् " तेन प्रोक्तम् " इत्यणि, वृद्धौ, गुणे, अवादेशेच ताण्डवम्=नर्तनमिति ॥ ३४ ॥

तोवडा, जिमीकन्द, कपास, नदी के दोनो किनारे, जूआ आदि, यज्ञस्तम्भ, झरोखा, यज्ञपात्र, जूस, यज्ञपात्र, पात्रविशेष

कवियं कन्दकर्पासं पारावारं युगन्धरम् ।
यूपं प्रग्रीवपात्रीवे यूषं चमसचिक्कसौ ॥ ३५ ॥

कवीति—कवते, कुङः कर्तरि बाहुलकादियप्रत्यये, गुणे, अवादेशे च कवियम् । " नार्यां कवी खलीनं कवियंत्वानातुरंगमुखभाण्डम् " (इति वोपालितः) क्रन्दति, कन्दते: कर्तरि 'पचाद्यचि' कन्दः, कन्दं वा "कन्दोऽस्त्री सूरणे सस्यमूले जलधरे पुमान् " क्वचित्कर्मेति वा पाठः। करोति, क्रियते वा कृञः कर्तरि, कर्मणि वा " कृञः पासः " इति पास प्रत्यये, गुणे, रपरत्वे च, कर्पासम्=' कपास ' इति ख्यातम् । पारयति, पार्य्यते वा पारयतेः कर्तरि 'पचाद्यचि' कर्मणि, " पुंसीति" घे वा पारम् । न वारयति, नञ्पूर्वकाद्वारयतेःकर्तरि 'पचाद्यचि' अवारम्—पारं च अवारं चानयोःसमाहारः पारावारम्=परार्वाचीतीरम् । युगंधारयति, युगपूर्वकाद्धारयतेः कर्तरि " संज्ञायां भृतॄ—" इति खचि, " खचिह्रस्वः " इति ह्रस्वे, " अरुर्द्विषत् " इति मुमागमे च युगन्धरम्=कूबरः । युवन्त्यस्मिन्, यौतेराधारे " कुयुभ्यां च " इति पे, दीर्घे च यूपम्, यूपः यज्ञस्तम्भः । प्रगता ग्रीवा यस्मिन्निति प्रग्रीवम्=वातायनम्, मुखशाला, द्रुमशीर्षं वा । पात्रीं वातीति, पात्रीपूर्वकाद्वातेःकर्तरि " आतोनुपसर्गे कः " इति के, आलोपेच पात्रीवम्=यज्ञोपकरणपात्रभेदः । यूषति, यूषतेः कर्त्तरि "इगुपध-" इतिके, यूषम् " मुद्गामलकयूषस्तु ग्राही पित्तकफेहितः " (इति वैद्यकशास्त्रम्) । चमन्त्यनेन, चमतेः करणे "अत्यविचमि—" इत्यसचि ' चमसम्=सोमपानपात्रम् । चेतत्यनेन, चितेःकरणे कसप्रत्यये तस्य कादेशे च । चिक्कनम्, चिक्कयति वा चिक्कयतेर्भावे घञि, कर्त्तरि ' पचाद्यचि ' वा चिक्कः । चिक्कं स्यति, चिक्कपूर्वकात्स्यतेःकर्तरि " आतोऽनुपसर्गे कः " इति के, आलोपेच चिक्कसः=अयमपि यज्ञपात्रविशेषो ज्ञायतामिति ॥ ३५ ॥

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिहलोकेऽपि तच्चेदस्त्यस्तु (शेषवत्) ॥ ३६ ॥

इति पुन्नपुंसकसंग्रहः ॥

अर्धेति—अर्धर्चादौ अत्र पुन्नपुंसकाधिकारवर्गे घृतादीनां पुंस्त्वाद्यं पाणिन्यादिभि-

भिहितम् । तद् ध्रुवं वैदिकं लोकप्रसिद्धम् । तस्मादिह नोक्तम्, न व्याख्यातम् । येषामि लिङ्गेष्वस्ति तत् शेषवदस्तु शिष्टप्रयोगानुसारम्प्रमाणमिति ॥ ३६ ॥

इति पुन्नपुंसकलिङ्गाधिकरणम् ॥

स्त्रीपुंसयोरपत्यान्ता, द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च स्त्रीयोगैःसह मल्लकः ॥ ३७ ॥

स्त्रीति—'' स्त्रीपुंसयोः '' इत्यपि क्रियते । अपत्यार्थे विहिता येऽणादयस्तदन्ताः सर्वे स्त्रीपुंसयोः स्युः । औपगवः, औपगवी । गार्ग्यः, गार्गी । द्विचतुष्पदषट्पदवाचिनः उरगवाचिनश्च जातिविशेषाः स्त्रीपुंसयोः स्युः । मानुषः, मानुषी । विप्रः, विप्रा । शूद्रः, शूद्रा ''शूद्रा चामहत्पूर्वाजातिः'' इति टाप् । बकः, बकी । हंसः, हंसी । सिंहः, सिंही । भ्रमरः, भ्रमरी । उरगः, उरगी । '' जातेरस्त्रीविषयात्– '' इति ङीष् । अ-वाचिता इत्येव । मक्षिका, शिवा, लूता । पिपीलिका । जातिवाचिनः स्त्रीपुंसयोः स्युः । हरिणः, हरिणी । मत्स्यः, मत्सी । केचित्तु ' षट्पदादिभिरर्थैकवाक्यतां वदन्ति । पुमाख्याः पुरुषाख्याः स्त्रीयोगैः सह वर्तमानाः स्त्रीपुंसयोःस्युः । ब्राह्मणः, ब्राह्मणी । शूद्रः, शूद्री । मल्लते,मल्लेः कर्तरि 'ण्वुलि' अकादेशे च मल्लकः, स्त्री चेन्मल्लिका अत्र '' प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः '' इति पूर्वस्यात इदादेशः । '' मल्लिका तृण शून्येऽपि मीनमृत्पात्रभेदयोः '' (इति मेदिनी) तृणशून्ये मीनमृत्पात्रभेदयोरपि मल्लिका स्यादिति ॥ ३७ ॥

यती, कौड़ी, नक्षत्र, चन्दन, कालीपाढरि, मनु, घरिया, परिमाण, वेरी, लाठी, साड़ी, कमर, झोपड़ी.

मुनिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः ।
मूषा त्वपाटी कर्कन्धूर्यष्टिः शाटी कटी कुटी ॥ ३८ ॥

मुनिरिति—मन्यते, मनेः कर्तरि '' मनेरुच्च '' इतीनि, उदादेशे च मुनिः '' मुनिः पुंसि वशिष्ठादौ वङ्गसेनतरौ जिने '' (इति मेदिनी) वरमटति, वरपूर्वकादटतेः कर्तरि ' क्वुनि, अकादेशे च वराटकः=बीजकोषः, शुल्वं वा । शोभनमतति सुपूर्वकादततेःकर्तरि '' अज्यतीभ्यां च '' इतीणि, णित्त्वाद्वृद्धौ च स्वातिः,=नक्षत्रभेदः । वर्णयति, वर्णयतेः कर्तरि ' ण्वुलि ' अकादेशे च वर्णकः '' विलेपने चन्दने च वर्णकं पुन्नपुंसकम् '' (इति रभसः) झटनम् ' झट संघाते ' अस्माद्भौवादिकाद्भावे 'घञि' झाटः । झाटं लाति, झाटपूर्वकाल्लातेःकर्तरि बाहुलकाड्डि प्रत्यये, डित्त्वाट्टिलोपे च झाटलिः=वृक्षभेदः । मन्यते, मनेःकर्तरि '' शॄस्वृस्निहि–'' इत्युप्रत्यये मनुः=आदि राजा, मन्त्रश्च । मूषति, मूषेः कर्तरि ' पचाद्यचि, ' टापि च मूषा=स्वर्णादिविलेपन-

भाण्डम्। सरति, सर्पति वा सरतेः सर्पतेर्वा कर्तरि बाहुलकात्पाट प्रत्यये पृषोदरादित्वाद्वा-सूपाटः=परिमाणभेदः। जातित्वाद्गौरादित्वाद्वा ङीषि सूपाटी। कर्कं दधातीति, कर्कन्धूः " अन्दूहम्भू-" इति साधुः। बदरी वृक्षः। यक्षते, ' यक्ष पूजायाम् ' अस्माच्चौरादिकात्कर्तरि क्तिचि " स्कोः संयोगाद्योः " इति कलोपे, ष्टुत्वे च। यजतेर्बाहुलकात्ति प्रत्यये " व्रश्चभ्रस्जेति " षत्वे वा यष्टिः=लगुडो, मधुयष्टिका च। शाट्यते, शाटयतेः स्वार्थण्यन्तात्कर्मणि घञि, जातिलक्षणे ' ङीषि ' च शाटी=पटभेदः। कटति, कटतेः कर्तरि ' पचाद्यचि ' जातिलक्षणे ङीषि च " सर्वधातुभ्य " इतीनि वा " कृदिकारादिति " वा ङीषि कटी, कटिर्वा। कुटति, कुटतेः कर्तरि इनि। " इगुपध-" इति वा के, " जाते-" रिति गौरादित्वाद्वा ङीषि च कुटी कुटिर्वा गृहविशेषः, पर्णशाला वेति विज्ञायतामिति ॥ ३८ ॥

इति स्त्रीपुंससंग्रहविवरणम् ॥

अथ स्त्रीनपुंसकसंग्रहो व्याख्यायते ॥

ष्यञ्, वुञ्, उचित, मिताई.

"स्त्रीनपुंसकयो" भावक्रिययोः 'ष्यञ्' क्वचिच्च 'वुञ्'।
औचित्यमौचिती मैत्री मैत्र्यं 'वुञ्' (प्रागुदाहृतः)॥३९॥

स्त्रीति-" स्त्रीनपुंसकयोः " इत्यधिक्रियते। भावक्रिययोः भावकर्मणोर्विहितः ष्यञ् वुञ् च क्वचित् स्त्रीनपुंसकयोः स्यात्। " गुणवचनब्राह्मणादिभ्यः कर्मणि च " इति चकाराद्भावे च विहितः ' ष्यञ् ' स्त्रीनपुंसकयोः स्यात्। क्वचिदिति ष्यञ्वुञ्भ्यां सम्बध्यते। क्वचित् ' ष्यञ् ' स्यात्। क्वचिच्च वुञ् स्यात्। यथा उचितस्य भावः, कर्म वा। ष्यञि, वृद्धौ, " यस्येति च " इत्यलोपे च औचित्यम्। स्त्रियान्तु " षिद्गौरादिभ्य " इति ' ङीषि ' " हलस्तद्धितस्य-" इति यलोपे च औचिती। मित्रस्य भावः, कर्म वा ' ष्यञि ' मैत्र्यम्। स्त्रियां तु 'ङीषि' यलोपे च मैत्री। एवं समग्रस्य भावः सामग्र्यम्। स्त्रियां तु सामग्री। अर्हतो भावः कर्म वा ' ष्यञि ' " अर्हतो नुम्च " इति नुमागमे च आर्हन्त्यम्। स्त्रियान्तु आर्हन्ती=योग्यता। प्राग् ' द्वितीयकाण्डे ' वुञ् उदाहृतः। यथा अहो अहं पुरुषः " सुप्सुपा " इति समासे अहो पुरुषस्य भावः 'मनोज्ञादित्वाद्' वुञि, वृद्धौ, अकादेशे, टापि च आहोपुरुषिका। शिष्यश्च उपाध्यायश्च तयोर्भावः "द्वन्द्वमनोज्ञादिभ्यश्च" इति ' वुञि ' शैष्योपाध्यायिका। गर्गस्य भावः "गोत्रचरणादिति-" वुञि, गार्गिका। क्वचिन्न। मनोज्ञस्य भावः वुञि, अकादेशे च मानोज्ञकम्। रमणीयस्य भावः कर्म वा " योपधाद्गुरूपोत्तमादिति " ' वुञि ' रामणीयकम्। " भावे " इति किम्। चत्वारो वर्णाश्चातुर्वर्ण्यम्, अत्रस्वार्थे 'ष्यञ्' बोध्यः। स्त्रियां न स्यादिति ॥ ३९ ॥

सेना, छाया, शाला आदि, मनुष्यों की सेना, कुत्तों की रात, गायगोठ।

षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः।
स्याद्वा नृसेनं श्वनिशं गोशालमितरे च (दिक्)॥ ४० ॥

षष्ठीति—षष्ठ्यन्तं प्राक्पदं पूर्वपदं येषामिति=तत्पुरुषाः—सेनाच्छायाशाला सुरानिशास्तत्पुरुषे स्त्रीनपुंसकयोः स्युः। यथा नृणां सेना, नृसेना। वृक्षाणां छाया, वृक्षच्छाया। गवां शाला, गोशाला। यवानां सुरा, यवसुरा। श्वनां निशा, श्वनिशा। पक्षे "विभाषा सेनासुराच्छायाशालानिशानाम्" इति क्लीबता स्यादिति। यथा नृसेनम्। वृक्षच्छायम्। गोशालम्। यवसुरम्। श्वनिशम्। एवमितरेऽपिबोध्याः। यथा "छायाबाहुल्ये" छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये। इक्षूणां छाया, इक्षुच्छायम्, "विभाषासेना" इति विकल्पस्यापवादः। 'इक्षुच्छायानिषादिन्यः' इति तु "आसमन्तान्निषादिन्यः" इत्यादावन्येपेक्षोऽस्य। इति दिक् उदाहरणमिदं विज्ञायताम्॥ ४० ॥

आबन्तन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप्।
त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि॥ ४१ ॥

इति स्त्रीनपुंसकसंग्रहः।

आबिति—आबन्तोत्तरपदोऽन्नन्तोत्तरपदश्चद्विगुरपुंसि स्त्रीनपुंसकयोः स्यात्। नश्च अनोनकारस्य च लोपनं लुप्=लोपःस्यात्। "आबन्तो वा" आबन्तोत्तरपदोद्विगुः स्त्रियां वेष्टः। अनोनलोपश्च वाच द्विगुः स्त्रियाम्। आबन्तोत्तरपदो यथा तिसृणां खट्वानां समाहारः "गोस्त्रियोरुपसर्जनस्य" इति ह्रस्वे कृते "द्विगोरिति" ङीपि च त्रिखट्वी। पक्षे "सनपुंसकम्" इति क्लीबत्वम्। त्रिखट्वम्। एवं पञ्चानां खट्वानां समाहारः, पञ्चखट्वी—पञ्चखट्वम्। अन्नन्तोत्तरपदो यथा त्रयाणां तक्ष्णां समाहारस्त्रितक्षी अत्र "अनोनलोपश्चेति" नलोपे, "द्विगोरिति" ङीप्। पक्षे त्रितक्षम्। एवं पञ्चानां तक्ष्णां समाहारः, पञ्चतक्षी। पक्षे पञ्चतक्षमिति॥ ४१ ॥

इति स्त्रीनपुंसकसंग्रहविवरणम्॥

अथ त्रिलिङ्गशेषो व्याख्यायते॥

पात्र, दोना, वाटी, पेटारा, कमल या बेरफल, अनार.

"त्रिषु" पात्री पुटी वाटी पेटी कुवलदाडिमौ।

इति त्रिलिङ्गशेषः।

त्रीति "त्रिषु" इत्यधिक्रियते। पाति, पातेः कर्तरि "दादिभ्यश्छन्दसि" इति 'ष्ट्रन्' "षिद्गौरादिभ्यश्च" इति ङीषि च पात्री "पात्र्यमत्रे त्रिषु क्लीबं स्रुवादौ राजमन्त्रिणि। तीरद्वयान्तरे योग्ये" (इति मेदिनी)। पुटति, पुटतेः कर्तरि "इगुपध—" इति के, गौरादित्वान्ङीपि च पुटी=पात्रभेदः। वाटयते, वाटयतेरर्य-

न्तात्कर्मणि ' घञि ' वाटः, गौरादित्वान्ङीपि च वाटी । वाटः पथिवृतौ वाटं वरण्डेऽङ्गान्नभेदयोः । वाटी वास्तौ गृहोद्यानकट्योः " (इति हैमः) । पिटयते—पिटः कर्मणि घञि, गुणे, जातित्वाद्गौरादित्वाद्वा ङीपि पेटी । स्त्रीलिङ्गप्रदर्शनं तु ङ्यन्तता सूचनार्थम् । वेत्रादिरचिता । कौ वलति, कुपूर्वकाद्वलतेः कर्तरि ' पचाद्यचि ' कुवलम् " कुवलं चोत्पले मुक्ताफलेऽपि बदरीफले " (इति मेदिनी) दलनम्—दलतेर्भावे ' घञि ' दालः , दालेन निर्वृत्तः " भावप्रत्ययान्तादिमप् " इतीमपि, डलयोरेकत्वाल्लस्य डत्वे च दाडिमः, दाडिमी, दाडिमम् " दाडिमः करको दन्तबीजो लोहित पुष्पकः " (इति भावप्रकाशः) " अनार " इति ख्यातम् । " वियोगिनीमैक्षत दाडिमीमसौ " (इति नैषधम्) असौ वियोगिनी दाडिमीं ऐक्षत अपश्यदिति ॥

इति त्रिलिङ्गशेषविवरणम् ॥

द्वन्द्वसमास, तत्पुरुषसमास. **परलिङ्गं स्वप्रधाने द्वन्द्वे, तत्पुरुषेऽपि (तत्) ॥ ४२ ॥**

परेति—स्वे समस्यमानाः पदार्थाः प्रधानं यत्र तस्मिन्नितरेतरयोगद्वन्द्वे परपदस्य लिङ्गं स्यात् । यथा कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ । मयूरी च कुक्कुटश्च मयूरीकुक्कुटौ अत्रेतरेतरयोगाद् द्विवचनम् । तत्परलिङ्गं तत्पुरुषेऽपि स्यात् । यथा कुलस्य ब्राह्मणः, कुलब्राह्मणः । ब्राह्मणस्य कुलं, ब्राह्मणकुलम् । अर्धं पिप्पल्याः, अर्ध-पिप्पली । " परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः " इति परवल्लिङ्गता स्यादिति ॥ ४२ ॥

अस्यापवादमाह—

अर्थान्ताः प्राद्यलंप्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थे द्विगुः संख्यासर्वनामतदन्तकाः ॥ ४३ ॥

अर्थेति—अर्थोऽन्ते येषामिति अर्थान्ताः, प्राद्यादिपूर्वं येषामिति ते प्राद्यलंप्राप्ताऽऽपन्नपूर्वाश्च परं विशेष्यमुपगच्छन्तीति परोपगाः विशेष्यलिङ्गाः स्युः । अर्थान्ता यथा—द्विजायायम्, द्विजार्थः सूपः । द्विजायेयम्, द्विजार्था यवागूः । द्विजायेदं, द्विजार्थं पयः । एवं विप्रार्थोपेटः, विप्रार्थामाला, विप्रार्थं वस्त्रम् । अत्र " अर्थेन नित्यसमासो विशेष्यलिङ्गताचेति वक्तव्यम् " इति नित्यसमासो वाच्यलिङ्गता च बोध्या । प्रादिपूर्वा यथा—प्रगतः आचार्यः=प्राचार्यः " प्रादयो गताद्यर्थे प्रथमया" इति समासः ॥ खट्वामतिक्रान्तोऽतिखट्वः । "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः । एवमतिक्रान्तो मालामतिमालोहारः । अतिक्रान्तामालामतिमालेयम् । अतिमालमिदम् । अवक्रुष्टः कोकिलया, अवकोकिलः । " अवादयः क्रुष्टाद्यर्थे तृतीयया " इति समासः । अलं पूर्वो यथा अलं कुमार्यै इत्यलंकुमारिरयम्, अलंकुमारिरियम्, अलंकुमारि इदम् । अलंजीविकायै अलंजीविकः, अलंजीविका, अलंजीविकम् । प्राप्तोजीविकाम्, प्राप्तजीविको द्विजः, प्राप्तजीविका स्त्री, प्राप्तजीविकमिदम् । एवम् आपन्नो जीविकाम्,

आपन्नजीविको विप्रः, आपन्नजीविका विप्रा, आपन्नजीविकमिदम् । अत्र " द्विगुप्राप्ता-पन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः " इत्यस्मात्सूत्रात्परवल्लिङ्गताप्रतिषेधः । तद्धितार्थे यो द्विगुः सवाच्यलिङ्गः स्यात् । पञ्चसु कपालेषु संस्कृतः, पञ्चकपालः=पुरोडाशः । पञ्चकपाला, पञ्चकपालम् । " संख्यापूर्वो द्विगुः " इति द्विगुसमासः । " संस्कृतं भक्षाः " इत्यण् । " द्विगोर्लुगनपत्ये " इत्यणोलुक् । संख्या सर्वनामानि च संख्या सर्वनामान्ताश्च शब्दा वाच्यलिङ्गाः स्युः । एकः पुमान्, एका स्त्री, एकं कुलम् । द्वौ पुमांसौ, द्वे स्त्रियौ, द्वे कुले । त्रयः पुरुषाः, तिस्रः स्त्रियः, त्रीणि कुलानि । एवं चत्वारो ब्राह्मणाः, चतस्रो ब्राह्मण्यः, चत्वारि वस्त्राणि । बहवो जनाः । बह्व्यो रमण्यः । बहूनि धनानि । सर्वनामानि यथा सर्वो देशः, सर्वा नदी, सर्वं जलम् । एवं परः पुमान्, परा स्त्री, परं कुलम् । संख्यान्तका यथा ऊनत्रयः, ऊनतिस्रः, ऊनत्रीणि । सर्वनामान्तका यथा परमसर्वः, परमसर्वा, परमसर्वमित्याद्यवसेयम् ॥ ४३ ॥

बहुव्रीहिरदिङ्नाम्नामुन्नेयं (तदुदाहृतम्) ।
गुणद्रव्यक्रियायोगोपाधयः (परगामिनः) ॥ ४४ ॥

बहिति—अदिङ्नाम्नाम्, न दिङ्नामानि येषामिति तेषामदिङ्नाम्नां बहुव्रीहिः, बहुव्रीहिसमासो वाच्यलिङ्गः स्यात् । तदुदाहृतं तस्योदाहरणमुन्नेयम् स्वयमेव विचारणीयम् । बहु=प्रचुरं धनं यस्येति बहुधनः, बहुधनं यस्या इति बहुधना, बहु धनं यस्मिंस्तद्बहुधनं गृहम् । ' अदिङ्नाम्नामिति किम् ' उत्तरस्याः पूर्वस्याश्च दिशोरन्तरालम् + उत्तरपूर्वा । अत्र " दिङ्नामान्यन्तराले " इति बहुव्रीहिः । गुणद्रव्यक्रियाणां योगे उपाधिर्निमित्तं येषामिति ते परगामिनो विशेष्यलिङ्गाः स्युः । यथा शुक्लःपटः, शुक्ला शाटी, शुक्लं वस्त्रम् । दण्डोऽस्त्यस्येति दण्डी, दण्डोऽस्त्यस्या इति दण्डिनी, दण्डो विद्यते यस्य तद्दण्डि । पचति, पाचयति वा पाचकः, स्त्री पाचिका, कुलं पाचकमित्याद्यवसेयम् ॥ ४४ ॥

कृत्प्रत्ययान्त, कृत्य प्रत्ययान्त, अणाद्यन्त.

" कृतः कर्त्र्यसंज्ञायां " कृत्याः (कर्तरि कर्मणि) ।
अणाद्यन्ता (स्तेनरक्षाद्यर्थे) नानार्थभेदकाः ॥ ४५ ॥

कृत इति—असंज्ञायां कर्तरि अर्थे " कर्तरि कृत् " इत्यादिना विहिताः कृतः कृत्संज्ञकप्रत्ययास्तदन्ताः शब्दाः परगामिनो वाच्यलिङ्गाः स्युः । यथा करोतीति विग्रहे कर्तरि " ण्वुल्तृचाविति " तृचि, कर्ता पुमान् । स्त्रियां " ऋन्नेभ्योङीप् " इति ङीपि, कर्त्री=माया । कर्तृ=कलत्रम् । कुंभस्य कारः, कुम्भकारः=कुलालः । अत्र "कर्मण्यण्" इत्यण्प्रत्ययः । स्त्रियां " टिड्ढेति " ङीपि, कुम्भकारी=कुलाली । कुम्भकारम्=कुलम् । ' असंज्ञायां किम् ' । " संज्ञायां भृतॄवृजिधारिसहितपिदमः " इति

विहिता वाच्यलिङ्गा न स्युः । विश्वं बिभर्तीति विश्वम्भरोऽच्युतः, शक्रश्च । विश्वंभरा भूमिः । कर्तरि—कर्मणि च विहिताः कृत्याः कृत्यप्रत्ययान्ताः शब्दाः वाच्यलिङ्गाः स्युः । कर्तरि यथा—भवतीति भव्यस्तरुः, भव्या वराङ्गना, भव्यं कुलम् । अत्र " भव्यगेयेति " कर्तरि यत्—एवम् " वसेस्तव्यत्कर्तरि णिच्च " वसतीति वास्तव्योऽयम्, वास्तव्या सा, वास्तव्यं तत् । कर्मणि यथा क्रियतेऽसौ कार्यो घटः, कार्या सृष्टिः, कार्यं जगत् । अत्र कर्मणि " ऋहलोर्ण्यत् " इति ण्यत् । कर्तरीत्यादिकिम् । एधितव्यम्, एधनीयं त्वया । अत्र भावे औत्सर्गिकमेकवचनं क्लीवत्वं च बोध्यम् । असंज्ञायामित्येव । भिद्यः नदः, उध्यः । अत्र " भिद्योध्यौ नदे " इति क्यप्, उभौ वाच्यलिङ्गौ न स्यातामिति तेनरक्ताद्यर्थे—" तेन रक्तं रागात् " इत्याद्यर्थे विहिता ये अणादयस्तदन्ताः शब्दाः, नानार्थानां भेदका विशेषणानि । नानार्था वा भेदका विशेष्या येषां ते वाच्यलिङ्गाः स्युः । यथा कौङ्कुमेन रक्तः, कौङ्कुमः पटः । अत्र " तेन रक्तं रागात् " इत्यण् । स्त्रियां कौङ्कुमी शाटी । कौङ्कुमं वस्त्रम् । लाक्षयारक्तः, लाक्षिकः पटः । अत्र " लाक्षारोचनाट्ठक् " इति ठक् । लाक्षिकी शाटी । लाक्षिकं वस्त्रम् । कृत्तिकाभिर्युक्ता कार्त्तिकी । अत्र " नक्षत्रेण युक्तः कालः " इत्यण् । वसिष्ठेन दृष्टं, वासिष्ठं साम " दृष्टं साम " इत्यण् । वसिष्ठेन दृष्टो, वासिष्ठो मन्त्रः । वासिष्ठी ऋक् । प्रजापतिना प्रोक्तः, प्राजापत्यः । " तेन प्रोक्तम् " इत्यर्थे " दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः " इति ण्यः । " अणाद्यन्ताः " इत्यादिपदेन ग्रामे भवो, ग्राम्यः पुमान्, ग्रामेभवा, ग्राम्या स्त्री, ग्रामे भवं, ग्राम्यमित्यादिषु " ग्रामाद्यखञौ " इति ' य ' प्रत्ययः । " रक्ताद्यर्थे " इत्यादिपदेन मथुराया आगतः " तत आगतः " इत्यण्, माथुरः, स्त्रियां " टिड्ढेति " ङीप् । माथुरीयमित्याद्यवसेयम् ॥ ४५ ॥

षट् संज्ञका " त्रिषु " समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे, शेषं (तु) ज्ञेयं " शिष्टप्रयोगतः " ॥ ४६ ॥

इति लिङ्गादिसंग्रहवर्गः ॥

षडिति—" ष्णान्ताःषट् "—" डति च " इति सूत्राभ्यां कृतषट्संज्ञकाः, युष्मदस्मदी, तिङन्तम्, अव्ययानि चैते त्रिषु लिङ्गेषु समाः तुल्याः स्युः । एषामलिङ्गत्वेन सादृश्यत्वमिति बोध्यम् । यथा षट् नराः, षट् स्त्रियः, षट् कुलानि । पञ्च नराः, पञ्च नार्यः, पञ्च फलानि । कति घटाः, कति स्त्रियः, कति गृहाणि । त्वं पुरुषः, त्वं स्त्री, त्वं फलम् । एवम् अहं पुरुषः, अहं स्त्री, अहं फलम् । पुरुषः पचति, स्त्री पचति, कुलं पचति । उच्चैः प्रासादः, उच्चैः शाला, उच्चैर्गृहम् । विरोधे " लिङ्गविधायकवचनविरोधे सति परं वचनं ग्राह्यम् । यथा ' स्त्रियामीदूद्विरामैकाच् ' इत्यस्याव

१ विश्व बिभर्तीति-विग्रहे " संज्ञायां भृतॄवृजि–" इत्यादिना खचि विश्वम्भरः " विश्वम्भरोऽच्युते शक्रे पुंसि विश्वम्भरा भुवि " (इति कोषान्तरम्) ॥

काशः—धीः, भ्रूः । "कृतःकर्तर्यसंज्ञायाम्" इत्यस्यावकाशः—कर्ता, पाचकः । श्रीः, लूः, इत्यादावुभयप्रसंगे परत्वात्त्रिलिङ्गता भवति । शेषमित्यनुक्तं तु शिष्टप्रयोगतः लिङ्गानां प्रयोगाल्लेयं ज्ञातव्यम् । यथा "प्राजनी नितउः पुमान्" इत्युक्तम् । इह "नितउ परिवपनं भवति" इति पस्पशाभाष्यप्रयोगान्नपुंसकत्वमपि बोध्यम् । यथा "ताटङ्कमे" त्याचार्यप्रयोगात्ताटङ्कशब्दस्य पुंस्त्वम् । यथा वा 'कलिका कोरकः पुमान्' तीहोक्तम् । 'कोरकाणि' इति माघकाव्यप्रयोगान्नपुंसकत्वमप्यवसेयं सद्भिः सुधी-भिरिति ॥ ४६ ॥

इति लिङ्गादिसंग्रहवर्गविवरणम् ॥

अथोक्तस्यैवोपसंहारमाह—

इत्यमरसिंहकृतौ, नामलिङ्गानुशासने ।
सामान्यकाण्डस्तृतीयः, साङ्ग एव समर्थितः ॥ ४७ ॥

इत्यमरसिंहकृतौ नामलिङ्गानुशासने तृतीयः सामान्यकाण्डः साङ्गःसाङ्गोपाङ्गसमेत एव समर्थितः संपादितः संभाषितो वा अथवा अमरसिंहकृतौ अमरसिंहाचार्य निर्मिते नामलिङ्गानुशासने नामलिङ्गप्रतिपादके शास्त्रे साङ्गः प्रस्ताव-वर्गसमूहाङ्गसमेत एव समर्थितः संभणितः संपादितो वा तृतीयः सामान्यकाण्डः इति समाप्तिं पफाणोति शम् ॥ ४७ ॥

अथ व्याख्याकृद्वंशवर्णनमाह—

श्रीमत्प्राज्ञनरायणेन प्रभुणा स्वाज्ञापितः सादरं
नाम्ना शक्तिधरः सदाशिवपदद्वन्द्वे रतो नित्यशः ।
चक्रे चामरके प्रशस्तविवृतिं विद्वज्जनानां मुदे
नानाकोषयुतां विशुद्धिसहितां वाणिद्वयालंकृताम् ॥ १ ॥
शाके शैलगुणाष्टभूपरिमिते वर्षे द्विगोत्राङ्कको
पौषे मास्यसिते हरीशतिथिके श्रीभास्करे वासरे ।
सर्वेषां सुखबोधनाय रचिता व्याख्या रसाला मया
तां नित्यं प्रविलोकयन्तु सुधियो हृष्यन्तु स्वान्ते स्वके ॥ २ ॥
व्याख्याः सन्ति विदांवरैर्विरचिता यद्यप्यनेकानघा
यासु स्वल्पधियो विवेकरहिता बाला विषीदन्ति ये ।
तेषामेव कृते पदार्थकलिता व्याख्या रसाला कृता
सोयं मेऽत्र परोपकारकुशलैः संक्षम्यतां दुर्नयः ॥ ३ ॥
एषा रसाला रचिता विशाला, व्युत्पत्तिमाला सरला सुधीनाम् ।
स्वान्ते कवीनामनिशं विभातु, बालाः सुबोधं नितरां लभन्ताम् ॥ ४ ॥
पुरे मुरादाबादाख्ये शुक्लवंशोद्भवः सुधीः ।
आसीद्दुर्गाप्रसादाख्यो बलभद्रस्तु तत्सुतः ॥ ५ ॥
तस्यात्मजः शक्तिधरः शिवपादार्चने रतः ।
कृतवान्सर्वतोषाय विस्पष्टार्थप्रबोधिनीम् ॥ ६ ॥
बुद्धिमान्द्यवशात्किञ्चिद्यदशुद्धमलेखि तत् ।
द्वेषभावं समुत्सृज्य शोधनीयं मनीषिभिः ॥ ७ ॥

इति श्रीमदमरसिंहविरचिते अमरकोषे आनरेबुलश्रीमद्रायबहादुरभार्गवप्रयागनारायणाज्ञया द्विजवरशक्तिधरसंकलितायां रसालाख्यायां व्याख्यायां तृतीयः काण्डः समाप्तिमगादिति शम् ॥ ३ ॥

समाप्तश्चायं ग्रन्थः ॥

भागीरथ कोष।

इसमें अकारादि क्रम से सर्वशब्द उर्दू तथा हिंदी में दिये गये हैं। यह कोष विशेषता से कचहरियों के अहलकारों, विद्यार्थियों और मुसलमान-शिक्षकों के लिये प्रकाशित किया गया है और इसमें उर्दू के वे शब्द भी हैं जो प्रायः क़ानूनी किताबों में पाये जाते हैं। मूल्य ॥।)

शब्दार्थसंग्रहकोष।

इसमें अमरकोष व वैद्यककोष आदि कोषों से शब्दों का संग्रह अकारादि क्रम से किया गया है। इसके मनन करने से विना गुरु की सहायता के शब्द व शब्दार्थ का बोध हो जाता है। यह प्रथम तथा मध्यम परीक्षोत्तीर्ण वालकोंके लिये अत्यंत ही उपयोगी है। मूल्य १)

अमरकोष-भाषाभाष्यसमेत।

इसके भाषाभाष्यकर्ता लखनऊ नरहीनिवासी पंडित शङ्करशर्मा शास्त्री हैं। यह रसालाव्याख्यासमलंकृत पुस्तक अद्वितीय, अनुपम तथा सर्वोपयोगी है। इसमें सर्वशब्दों का अर्थ हिंदी-भाषा में दिया गया है। और कहीं २ शब्दों की व्युत्पत्ति भी देकर कोषांतरों के प्रमाणों से विभूषित किया है और अकारादि क्रम से शब्दानुक्रमणिका भी लगाई गई है। यह नवीन व्याख्या हिंदीप्रेमी प्रिय-पाठकों को अत्यंत लाभदायक तथा सर्वसाधारण पंडितों, विद्यार्थियों और कवियों को परम आवश्यक है। मूल्य ३) रुपया मात्र है।

श्रीधरभाषाकोष।

इसके संग्रहकर्ता हैं संस्कृत-भाषा के अध्यापक पंडित श्रीधरजी त्रिपाठी। जिसमें भाषा के शब्द, शब्दार्थ, अनेकार्थ, धातु, पर्याय, छन्दलक्षण और उनके प्रामाणिक उदाहरण व्याकरण की रीति से नियुक्त किये गये हैं। इससे हिंदीप्रेमियों और विद्यार्थियों को बहुत सी सहायता मिल सकती है। मूल्य विना जिल्द २॥) और जिल्द समेत ३) रुपया मात्र रक्खा है।

चतुर्वेदी संस्कृत-हिंदी-कोष।

इसके संग्रहकर्ता हैं हिंदी के सुप्रसिद्ध लेखक पंडित द्वारकाप्रसाद जी चतुर्वेदी। इसमें अकारादि क्रम से शब्द लिखे हैं और संस्कृत की रीति से पुंलिंग, स्त्रीलिंग, नपुंसकलिंग लिखने के बाद कितने ही पर्यायवाची शब्द दिये गये हैं। यह कोष विद्यार्थियों, पंडितों और लेखकों के लिये परमोपयोगी है। मूल्य जिल्दसमेत का ३) रुपया है।

पता:—मैनेजर, नवलकिशोर प्रेस,

लखनऊ.